Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

BHARTI

JAN-OCT 1969

G. K. U.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri U.3339

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

COMPILED

Stock Verification 2004

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

3-2-69
पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार
COMPILED
30

[भा]रती

[सं]स्कृतमासिकस्य

❁ श्रद्धाञ्जल्यङ्कः



नितान्तनिर्मलस्वान्तस्तथायुर्वेदपारगः ।
दान्तः शान्तो वदान्यो यो लक्ष्मीरामपदानुगः ॥
हा हन्त ! स्वर्गतः **स्वामी जयरामो**ऽगदङ्करः
सत्रैर्भवत्याऽधुना श्रीमान् सोऽयं चित्रे प्रणम्यताम् ॥

—मधुप

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

वार्षिकमूल्यं सप्तमुद्राः ७.

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान–मध्यप्रदेश–गुजरात–महाराष्ट्र–मद्रास–आंध्र–उत्तरप्रदेश–
बिहार–पञ्चनद–सर्वकारैः स्वीकृता—

विषय-सूची

क्र० सं०	लेखाः	लेखकाः	पृष्ठ संख्या
१.	मङ्गलम्	आशुकवि–श्रीहरिशास्त्री, जयपुरम्	८७
२.	श्रद्धाञ्जलिः	मधुपः ,,	८८
३.	अथ श्रीशिवराज्योदये महाकाव्ये, ३५ सर्गः	महाकविः डॉ० श्रीधरभास्करवर्णेकरः, नागपुरम्	९०
४.	राष्ट्रनिष्ठं समाज-सेवा-सङ्घटनं	अनु० श्रीगणेशराम शर्मा, डूंगरपुरम्	९४
५.	अर्गलास्तोत्रम्, कीलकम्, देवीकवचम्	आशुकवि–श्रीहरिशास्त्री, सम्पादकः	९९
६.	मोविनोदकणिका	मधुपः	१०५
७.	कलिकौतुकम्	आचार्य–श्रीविश्वनाथमिश्रः, बीकानेरः	१०७
८.	हेमन्तचर्या	वैद्य–श्रीबदरीप्रसादशर्माशास्त्री, तूंगा	१०९
९.	कथमिव जीवनं साहित्यमन्तरा	श्री राधेश्याममिश्रः नवलगढः रामगढः	१११
१०.	पिपासाया मरुभूमौ महाकविः शेली	अनु० श्रीगणेशरामशर्मा डूंगरपुरम्	११४
११.	सम्पादकीयम्	'मधुपः' सहसम्पादकः	११७
१२.	लघुकथा	श्रीगिरिराजशर्मा शास्त्री, जयपुरम्	१२३
१३.	सूक्तिसुधा	आशुकवि–श्रीहरिशास्त्री, सम्पादकः	१२५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

1135 39
Digitized by Arya Samaj Foundation Chennai and eGangotri
113539

सम्पादकः
आशुकवि-कविभूषण-
श्रीहरिशास्त्री

सहसम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
साहित्यालङ्कारः

प्रबन्धसम्पादकः
सहसम्पादकश्च
गिरिराजशर्मा

भारती-भवनम्,
गोपालजी का रास्ता,
जयपुरम्

भारती

लेखैरुपष्टुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

वर्षम् १९ | पौषः, विक्रमाब्दः २०२५ (जनवरी, १९६९) | अङ्कः ३

मङ्गलम्

आशुकवि-श्रीहरिशास्त्री, सम्पादकः

कृत्तं शिरो निदधती निजमेव हस्ते,
वामे कपालमपरे करवाल मन्ये।
तुर्ये वरं स्वपदसेवक—सिद्धिदात्री,
छिन्नाम्बिका कलयतान्मम मङ्गलानि ॥१॥

मासावतरणम्

कान्ताः स्वकान्तान् निशि शीतभीवहाः
वल्ल्यः स्ववृक्षानिव न त्यजन्ति वै।
यस्मिन् स उत्तप्तपयोधय[1]प्रियः
पौषाख्यमासः समुपागतः सखे ॥१॥

★

१ घेट् पाने, अचि धयः, पानमित्यर्थः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतप्रसिद्ध-वैद्यप्रवरेभ्यो लोकोपकारकेभ्यो दिवंगतेभ्यः स्वामिश्रीजयरामदासमहाभागेभ्यः

❀ श्रद्धांजलिः ❀

महती दुःखावहेयं घटना यद् गतदिसम्बर-मासस्य १८ तारिकायां प्रातः स्वनिवासस्थान एव ६४ चतुःषष्टिवर्षात्मके वयसि वर्तमाना देशविख्याता आयुर्वेदाचार्याः स्वनामधन्या मान्याः **श्रीजयरामदासस्वामिनो** हन्त सहसैव पाञ्चभौतिकं विनश्वरं देहमिमं परित्यज्य वैकुण्ठधाम प्रयाता इति । संस्कृतसेविनो विद्वांसोऽनवद्या वैद्याः समग्रा नागरिकाश्च स्वामिनामेषामाकस्मिकेनानेन निधनेन संस्कृत-समाजे तथा आयुर्वेदजगति चापि महतीं क्षतिमनुभवन्तोऽतिशोकसन्तप्ताः समभूवन् । तथैतेषां स्वामिनां दाहसंस्कारश्च दिनस्य तृतीये प्रहरे मोतीडूँगरीसमीपस्थिते लक्ष्मीरामोद्याने समपद्यत ।

आयुर्वेदजगतः प्राणभूतस्याऽऽयुर्वेदमार्तण्डस्य **स्वर्गीय-स्वामि श्रीलक्ष्मीराममहाभाग-**स्योत्तराकारित्वं साधु समुद्वहद्भिस्तदानीन्तन-जयपुरस्थ-महाराजसंस्कृत-कालेजे आयुर्वेद-विभागस्य वरिष्ठप्राध्यापकपदे समनोयोगं कार्यं कुर्वद्भिस्तथा राजस्थान-प्रदेश-वैद्यसम्मेलनस्य, रा० सं० साहित्यसम्मेलनस्य, संस्कृतप्रचारि-परिषदश्चाध्यक्षपदमलङ्कुर्वाणैरपि स्वामि-प्रवरैस्तैर्भारत--साधुसमाज--धन्वन्तरिसमिति--लक्ष्मीरामट्रस्ट-दादूमहाविद्यालय — प्रभृतीनां संस्थानामपि कार्यपद्धतिं सम्यक् सञ्चालय-द्भिरन्ते च राजकीयायुर्वेदकालेजस्य प्रधाना-चार्यपदाद्विश्रान्तिर्गृहीता ।

स्वर्गतस्वामिमहाभागानां तेषां जन्म जयपुर-मण्डलान्तर्गते भादवाग्रामे १९६२ तमे वैक्रमेऽब्दे मार्गशीर्षकृष्णपक्षस्य द्वितीयायां जातम् । स्वा-मिनां नाम बाल्यकाले मातापितृभ्यां 'जीवन' इति रक्षितमभूत्, तच्च स्वामिवर्यैः रसंख्येभ्योऽ-साध्यरोगाक्रान्तेभ्यो जनेभ्य आयुर्वेदोक्त-विधिनैव जीवनं प्रदाय सार्थकमक्रियत ।

किमधिकं कच्चिम--स्वामिमहाभागानां तेषामखिलमप्यनाविलं जीवनमेव संस्कृता-युर्वेदोभयसाहित्यपरिशीलने धार्मिक-सामाजिक-सेवासु च व्यत्यगात् । किञ्च स्वामिनामेतेषां गुरुवर-लक्ष्मीरामस्वामिमहाभागानाञ्च शिष्य-परम्पराभिरभिव्याप्तमिदमखिलमायुर्वेदजगदि-तीह नास्ति मनागपि सन्देहः ।

अपि च महाराज-संस्कृत-कालेज-सद्वैद्य-सभा-संस्कृत-वाग्विवर्द्धिनीसभा-संस्कृतप्रचारि-परिषत्प्रभृतिभिर्विभिन्नाभिः संस्थाभिश्च स्थाने स्थाने स्वर्गतेभ्यस्तेभ्यः स्वामिमहाभागेभ्यः श्रद्धाञ्जलयः सादरं सभक्ति च समर्प्यन्त, सहैव तत्र तत्र शोकप्रस्तावाश्चापि पारिताः सञ्जाताः ।

अन्ते च सोऽयं भारतीपरिवारोऽपि भारती संरक्षकाणां स्वामिमहानुभावानां तेषां सहसा शरीरपरित्यागेन महद् दुःखमनुभवन् वैकुण्ठ-लोकगतेभ्यस्तेभ्यः श्रद्धाकुसुमानि भक्त्या सम-र्पयन् सर्वशक्तिसम्पन्नं भगवन्तं भवानीपतिं प्रार्थयते यत्स तेभ्यः स्वामिमहाभागेभ्यः शाश्व-तिकीं शान्तिं दद्यात्, सहैव तदीयशोकसन्तप्ताय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदुत्तराधिकारिणे **भिषगाचार्य— श्रीराम-प्रकाशस्वामिने**ऽसह्यं दुःखमिदं सोढुं शक्तिञ्च प्रयच्छेदिति ।

शोकसभायां पठितानि पद्यानि

वैद्योत्तमा अपि सुयोग्यबुधाग्रगण्याः,
लक्ष्मीयुता अपि न ये विषयेषु सक्ताः ।
ईशाङ्घ्रिचिन्तनपराः प्रवरा यतीनां,
हा हन्त! ते दिवमिता **जयरामदासाः** ॥१॥

दादूं दयालुमनिशं मनसा भजन्तः,
लक्ष्मीशरामप्रभृतीनपि मानयन्तः ।
ये प्राणिजातमखिलं परमात्मबुद्धया
विलोकयन्त इह, हन्त ! दिवं गतास्ते ॥२॥

वैद्याः सन्ति सहस्रशोऽपि भुवने
सन्तस्तथा स्वामिनः,
वित्ताढ्या अपि भान्ति हन्त बहवः
स्वार्थप्रवृत्ताः, परम् ।
कारुण्यार्द्रमनाः सदा
परहितानुष्ठाननिष्ठो जनः,
स्वामिन् श्रीजयरामदास ! भवता
तुल्यो न सन्दृश्यते ॥३॥

शान्तो दान्तो धनी धीरः सदाचारपरायणः ।
स्वर्गतः स्मर्यते स्वामी जयरामदासोऽधुना ॥४॥

कायेन वाचा मनसा च येन,
परोपकारो विहितोऽत्र लोके ।
महात्मने स्वामिवराय तस्मै
श्रद्धाञ्जलिं सादरमर्पयामि ॥५॥

विनीतो
दीनानाथत्रिवेदी मधुपः
भारतीसहसम्पादकः

Protect your property against Fire & other damages

Ruby General Insurance Company Limited

Year	Nett Premium Income	Nett Claims Paid	Capital & Funds	Assets.
1966	Rs. 2,75,88,000	Rs. 1,44,57,000	Rs. 2,50,00,000	Rs. 5,18,00,000

BUSINESS TRANSACTED ;

FIRE MARINE MOTOR ACCIDENT AVIATION MACHINERY
AND
ERECTION ETC. ETC.

Branches & Agencies in all Important Towns in India
Foreign Branches & Agencies.

Aden, Amsterdam, Beirut, Biratnagar, Georgetown (Guyana), Kingston (Jamaica), Kathmandu, Nairobi & Sanfernando

Head Office & Registered Office :

"RUBY HOUSE"

8, India Exchange Place, CALCUTTA-1.

Managing Director, **Shri K. P. Modi**, B.Com., B.L., A.F.I.I., J.P.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ श्रीशिवराज्योदये महाकाव्ये

३५ सर्गः

महाकविः डॉ० श्रीधरभास्करवर्णेकरः, डी.लिट्, नागपुरम्

अथ स्वपुत्रं रिपुसैन्यपाश-
निबद्धमाकर्ण्य चराननेन ।
समाश्रिता राजगडं चिराय
जिजातिचिन्ता ज्वलिता बभूव ॥१॥

अहर्निशं सा कुलदेवतायाः
प्रपन्नलोकार्तिविभञ्जनायाः ।
निरन्तरध्याननिमग्नचित्ता
जिजाऽभवन्मूर्तिमतीव भक्तिः ॥२॥

दृढं निसद्धापि च देहलीश-
प्रचण्डसेनाक्रमणैः समन्तात् ।
सा पुत्रनिर्मोचनचिन्तनार्ता
स्वयं रिपावाक्रमितुं चकांक्ष ॥३॥

सङ्ग्रामशूरेषु शिवस्य मित्रे-
ष्वभ्याशमागच्छतु कश्चिदेकः
यस्तत्र पर्णालगिरेः समन्ताद्
आक्रम्य भिन्द्यादरिसैन्यपाशम् ॥४॥

विचिन्तयन्तीति जिजा कदाचित्
पुरःस्थितं प्रैक्षत वीरवर्यम् ।
नेताजिमत्युज्ज्वलशौर्यराशि
सिद्दी-हिलालानुसृतं विनम्रम् ॥५॥

तं विक्रमार्कं विपदन्धकारे
दृष्ट्वा चिरेणाभ्युदितं ह्यकस्माद् ।
अस्तं गतास्तत्क्षण एव नूनं
तदन्तरस्था निखिला विकल्पाः ॥६॥

अयं पराक्रम्य महातरस्वी
विच्छिद्य शत्रून् सहसैव शीघ्रम् ।
असंशयं मोचयिता सुतं मे
दिनैस्त्रिभिर्वाऽथ चतुर्भिरेव ॥७॥

संकल्पयन्तीति तमानमन्तं
वीरं मनाक् क्रोधमिवोद्गिरन्ती ।
जिजाऽऽह नेताजिमुदग्रवीर्यं
निर्भर्त्सयन्ती कटुतीव्रशब्दैः ॥८॥

न वेत्सि किं ते प्रणयी सखा वा
राजाऽथवा मान्यवरः प्रणेता ।
शिवोऽवरुद्धो रिपुभिश्चिराय
प्राणैः समं मे परनालदुर्गे ॥९॥

विलम्बमानस्य तवालसत्वं
कर्तव्यवैमुख्यजयक्षमार्हम् ।
तनूजबन्धाकुलचेतनायाः
ममान्तरङ्गं क्रथति प्रकामम् ॥१०॥

सुहृद्विपत्तिं स्वविपत्तिमेव
प्रायः कुलीना गणयन्ति लोके ।
तवाऽन्यथा चेष्टितमीक्षमाणा
त्वामन्यथैवाऽस्मि वितर्कयामि ॥११॥

त्वं सत्कुलीनो यदि तत्त्वतोऽसि
गच्छाग्रतस्तत्र निमेषमात्रात् ।
नो चेद्, गमिष्याम्यबलैकलाऽपि
स्वपुत्रनिर्मोचनसंगराय ॥१२॥

स्वयं प्रविश्याधिरणं जवेन
निर्मस्तकीकृत्य च जौहरं तम् ।
चिरादहृष्टं रिपुपाशबद्धं
विमोचयाम्यात्मजमात्मभूतम् ॥१३॥

इत्यातुरं तद्वचनं जिजायाः
निर्भर्त्सनादुःश्रवमात्तरौक्ष्यम् ।
शृण्वन्नकस्माद् व्यथितः स मेने
विषाक्तभल्लाहतिमात्मनीव ॥१४॥

विद्धोऽपि हृन्मर्मणि तद्वचोभिः
अक्षुब्धचेता स निसर्गधीरः ।
वृत्तं यथाभूतममूं निवेद्य
ह्यारोपमात्मन्यपमार्ष्टुमैच्छत् ॥१५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मातः क्षमस्वाल्पमिदं वचो मे
महापराधस्य हि किंकरस्य ।
नापेक्षसे यत्खलु लेशमात्रं
घोरेऽधुना पुत्रविपत्तिकाले ॥१६॥

मया न कर्तव्यपराङ्मुखेन
नैवालसेनात्र कृतो विलम्बः ।
जातः समे दुष्करयुद्धसाध्ये
कार्येऽवलग्नस्य कथञ्चिदेव ॥१७॥

शिवप्रभोः शासनतः समस्तं
तस्याफभुल्लस्य बलं निपात्य ।
सम्प्रस्थितोऽहं रिपुराजधानीं
कर्तुं महाभीतिविपत्तिरुग्णाम् ॥१८॥

ततश्च दिल्लीपतिवाहिनीं ताम्
अत्रासमन्तात् प्रसृतामगाधाम् ।
विच्छिन्नकूलां प्रचलन्महोर्मि
नदीमिवोल्लङ्घ्य समागतोऽस्मि ॥१९॥

यथागतं गच्छति दास एष
तव क्षणेऽस्मिन्नविलम्बमेव ।
भुजंगभोगाभमरातिपाशं
विच्छिद्य कर्तैव शिवं विमुक्तम् ॥२०॥

इत्यूचिवान् स प्रबलः प्रणम्य
पदाब्जयोः श्रीशिवराजमातुः ।
विनिर्ययावाशिषमेतदीयां
विलम्बहेतुं खलु मन्यमानः ॥२१॥

अथाचिराद् दौर्हृदसैन्यपाश-
विमुक्तमभ्यागतमात्मजं सा ।
उत्प्रेक्षमाणा जननी शिवस्य
संग्रामवार्ताहरमैक्षताग्रे ॥२२॥

स राजमातुः पदयोर्निपत्य
कथंचिदुद्भिन्नवचःप्रवृत्तिः ।
महात्रपानम्रशिरा उवाच
विषण्णवक्त्रानुमितां प्रवृत्तिम् ॥२३॥

मातः स नेताजिरितोऽभिद्रुत्य
पर्णालदुर्गं परितोऽरिसेनाम् ।
विदारयन्नप्ययशः प्रपेदे
दुरन्तदुर्भाग्यनिरुद्धवीर्यः ॥२४॥

शिवैकनिष्ठस्य विधर्मिणोऽपि
पुत्रो हिलालस्य[1] युवा बलाढ्यः
प्रयुध्यमानो समराग्रभागे
वीरोचितां सद्गतिमभ्युपेतः ॥२५॥

विच्छिन्नधैर्येव च तद्वधेन
चमूर्हिलालस्य बत क्षणेन ॥
प्रताड्यमाना रिपुशस्त्रपातैः
बभूव वात्याहतधूलिकल्पा ॥२६॥

प्रतीक्षमाणो रिपुसैन्यभेदं
स्वामी बहिर्यातुमनाः स बन्धात् ।
दुर्गाग्रतोऽपश्यदतीवदूरात्
पलायितोत्थापितधूलिरेखाम् ॥२७॥

अकल्पिताभ्यागतमात्मसेना-
पराभवोदन्तममुं निशम्य ।
सा मेरुकल्पं निजधैर्यमुच्चैः
मेने विषादाम्बुधिगाढमग्नम् ॥२८॥

अथात्मनिर्मोचनयुक्तिचिन्ता-
निमग्नधीर्धीरवरः शिवाजिः ।
वर्षर्तुमर्धक्षपितं विलोक्य
सम्भाविनीमापदमैक्षतान्तः ॥२९॥

अभिन्नजीवान् सुहृदोऽल्पसंख्यान्
अनल्पधीभक्ति विवेकवीर्यान् ।
मन्त्रोचिते सद्मनि रात्रिकाले
स युक्तितः संगमयाञ्चकार ॥३०॥

तेष्वागतोऽसौ प्रभुवंशकेतुः
बाजिर्विपत्सागरवज्रसेतुः ।
गंगाधराख्यः कुटिलो द्विजन्मा
तथाऽपरस्त्र्यम्बकभास्कराह्वः ॥३१॥

वितानवह्निप्रतिमेषु तेषु
त्रिषु प्रदीप्ताननकान्तिमत्सु ।
स्वातन्त्र्यसंग्रामसुदीक्षितोऽसौ
शिवः स्वयं मन्त्रहविर्जुहाव ॥३२॥

[1] वाहवाह इत्याख्यः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदैव रात्रौ शिवमभ्युपेतो
वनेचरः कोऽपि चरोऽतिगूढ़म् ।
मन्दस्मितोद्भिन्नतमिस्रजाले
यः स्वामिकर्णे निजगाद किञ्चित् ॥३३॥

शृण्वन् वचस्तस्य वनेचरस्य
चिराय चिन्तास्तमितस्मितोऽपि ।
शिवः स्मितोत्फुल्लविशालनेत्रः
स्वभूषणैस्तं समलंचकार ॥३४॥

अथापरेद्यू रिपुसैनिकास्ते
चिराय चैकत्र-निवासखिन्नाः ।
दुर्गस्य कोणे क्वचिदेकमीषद्
उद्घाटितं द्वारमलोकयन्त ॥३५॥

ततो बहिर्गच्छदहष्टपूर्वं
निरीक्ष्य दूराच्च मनुष्ययुग्मम् ।
साश्चर्यभीहर्षसमाकुलास्ते
ह्यन्योन्यमैक्षन्त विचित्रमुद्राः ॥३६॥

कृत्वा ततज्यानि धनूंषि शीघ्रं
मौर्वीसमारोपिततीव्रबाणाः ।
सुदूरवेधक्षमधन्विनस्ते
प्रैक्षन्त तत् संकुचितैकनेत्राः ॥३७॥

ततश्च चिह्नं शरणागतानां
तत्रोद्धृतं दृष्टिपथं प्रपदे ।
यद् वीक्ष्य सर्वेऽपि विमुक्तचापं
सहर्षगर्जं ननृतुः प्रमत्ताः ॥३८॥

क्षणादुदन्तः कुतुकावहोऽसौ
तैलस्य बिन्दुर्वहदम्बुनीव ।
पर्णालदुर्गं परितोऽरिसैन्ये
विचित्ररूपः प्रससर्प सद्यः ॥३९॥

स जौहरो यावदिमां प्रवृत्तिं
शृणोति सानन्दमतीव हृद्याम् ।
तावत्पुरोऽपश्यदुपस्थितं तत्
मनुष्ययुग्मं विनतोत्तमाङ्गम् ॥४०॥

ततोऽब्रवीदेकतरोऽति मन्दं
गंगाधरोऽहं नरवीर! विप्रः ।
ततेन मूर्ध्नाऽर्पयते तवेदं
पत्रं प्रणामेन समं शिवस्य ॥४१॥

सोल्लासमादाय तदर्पितं तत्
सुहृद्वरान् श्रावयितुं हि पत्रम् ।
वर्णानभिज्ञोऽपि तु विज्ञमानी
स्वयं पपाठ स्खलिताक्षरं सः ॥४२॥

इदं जौहरवीराय नमोवाकं प्रयाचते ।
शाहसूनुः शिवो नम्रो संस्मरन् जगदीश्वरम् ॥४३

पर्णालदुर्गं प्रत्येति वीरवर्यो भवादृशः ।
अवगत्येति जातोऽहं सहसा दर्शनोत्सुकः ॥४४॥

राज्यलोभाभिभूतेन मयैच्छं खलचेतसा ।
अपराधाः कृताः पूर्वं तेऽरुन्धन्निव मां तदा ॥४५॥

भयेन चाल्पमाग्येन परिग्रस्तं मनो मम ।
भवत्कृपामहालाभाद् बत मामत्यवञ्चयत् ॥४६॥

पश्चात्तापावदग्दोहं श्रीमतः शुभदर्शनम् ।
नक्तमद्यैव वाञ्छामि स्वकल्याणाय केवलम् ॥४७

मत्कल्याणाय यत् किञ्चिद् भवान् समुपदेक्ष्यति ।
हृत्कोशे रत्नवन्नित्यं धारयिष्यामि वीर तत् ॥४८

भूत्वा विजापुरेशस्य करुणालेशभाजनम् ।
को न विन्देत कल्याणं जगदीशस्य चाऽथ वा ॥४९

मज्जन्तु मेऽपराधास्ते भवतो हृदयाम्बुधौ ।
वर्षन्तु करुणासान्द्राः कटाक्षा मयि भूभुजः ॥५०॥

श्रीमन्! विजापुरेशस्य सुदुर्लभमनुग्रहम् ।
मयि कारयितुं शक्तो ह्येक एव भवान् भुवि ॥५१

तदनुग्रहपात्रत्वं प्राप्तुमुत्को ह्ययं जनः ।
स्वायत्तं भवदायत्तं मिथोऽद्यैव चिकीर्षति ॥५२॥

पत्रं पठित्वाधिगतं प्रमोदं
विधातुकामो द्विगुणं तदीयम् ।
गङ्गाधरोऽसौ विनतोग्रजन्मा
तादृक् पुनर्वाचिकमप्युवाच ॥५३॥

अहो महाभाग महीश्वरस्य
कृत्वाऽप्रियं कः सुखमत्र शेते ।
कुपथ्यसेवीव नितान्तमन्तः
पश्चात् तपत्येव नृपापकारी ॥५४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भुञ्जीत हालाहलमप्यसह्यं
गाहेत वा व्याघ्रवनं प्रकामम् ।
न तु प्रमादादपि सौख्यकामी
सम्राडपथ्यं विदधीत लोके ।।५५।।

अनाद्यनन्ते धरणीतलेऽस्मिन्
काले च को नाम कदा क वाऽसौ ।
जातः प्रजायेत जनो महात्मन्
नृपापकारी च सुखाधिकारी ।।५६।।

अस्माद्दशैर्विप्रजनैर्नितान्तं
सम्राड्विरोधादुपरन्तुमेव ।
प्रबोधितोऽप्युद्धतमित्रमन्त्राद्
अपथ्यमद्धा कृतवान् रिपुर्वः ।।५७।।

तस्य प्रबोधस्य हि साम्प्रतत्वं
सम्प्रत्यसौ हन्त विदाकरोति ।
विप्रोपदेशानवहेलयन्तः
तपन्ति पश्चाद् बलिनोऽपि नूनम् ।।५८।।

तद् वीरशार्दूल शिवस्य पत्र
सम्मान्यतां पर्वतमूषकस्य ।
खल्वत्र किञ्चित् खलु संशयित्वा
स्थितोऽस्मि सत्यप्रतिभूर्द्विजोऽहम् ।।५९।।

निर्विण्णश्चिरमेकदेशवसतेस्त्रस्तो महावर्षणात्
हस्तप्राप्तमिवावगत्य सकलं प्राप्यं विना संगरम् ।
सेनानीः स जिगीषुरात्मसचिवैः सम्मन्त्र्य कालोचितं
स्वीचक्रे शिवराजपत्रलिखितामभ्यर्थनां जौहरः ।।

सैन्ये तत्र पुनश्च संपरिसृता सेनापतेर्मण्डपात्
सा वार्ता शरणागतः शिव इति प्रत्येकमानन्दयत् ।
मन्वानाः कृतकृत्यतां प्रमुदिताः सर्वत्र पर्यभ्रमन्
स्वस्वस्थानमपास्य सैनिकगणाः प्रातर्विहंगा इव ।।

फैशन और उपयोग में अद्वितीय

'सेंचुरी' के अनूठे वस्त्र

हिज चॉईस–हर चाईस—सर्वोत्तम इजिप्सीअन रूई से निर्मित-मर्सराईज्ड, सेंचुराईज्ड (प्रीश्रक) पौपलिनें।

हर हाईनेस—सफेद और रंगोन, मर्सराईज्ड सेंचुराईज्ड पॉपलिन।

रुबी—सुगंधित पौपलिन डोबी और चेक शर्टिङ्ग, सफेद, रंगोन और छपी हुई केम्ब्रिक्स।

परमसुख—सुपर फाईन धोतियों में सर्वश्रेष्ठ।

लेक्स ब्यूटी—सर्वोत्तम बारीक मलमल।

हर चॉईस—महिलाओं के वस्त्रों के लिए मनमोहक कपड़ा।

निराला—और "स्विस चैक" सिकुडुन रोधक और गण्डी।

निर्माता :

दी सेंचुरी स्पिनिंग एण्ड मैन्युफेक्चरिंग कम्पनी लि०

इण्डस्ट्रीज हाउस

१५९, चर्चगेट रिक्लेमेशन, बम्बई—१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राष्ट्रनिष्ठं समाज-सेवा-सङ्घटनमेव किलाद्यतन्यावश्यकता

हिन्दु-समाजस्य सामर्थ्य एव हि राष्ट्रस्य प्रतिष्ठा रा० स्व० सङ्घस्य विजया-दशमी-महोत्सवे आचार्यरंगामहोदयस्य तथा श्रीगुरुजीमहाभागस्य भाषणानि

अनु० श्रीगणेशरामशर्मा डूंगरपुरम्

राष्ट्रिय-स्वयं सेवकसङ्घस्य विजयादशमी-महोत्सवे भाषमाणः स्वतन्त्र-दलस्य संस्थापकोऽध्यक्षश्चाचार्यः श्रीएन. जी. रंगामहोदयः प्रोक्तवान् यद्धि देशेऽत्राद्यत्वे यन्नैतिकं पतनं जायमानं दरीदृश्यते, तन्न केनापि च राजनैतिकेन दलेनावरोद्धुं शक्यते। तदर्थं तु रा.स्व. सङ्घ सदृशीनां संस्थानामावश्यकता वर्तते, यत्र राष्ट्राय स्वात्मनः समस्तश्रद्धार्पणस्य संस्कारा विधीयेरन्। राष्ट्रैकनिष्ठानामथ च मातृभूमेः सेवार्थं सदा सर्वदैव सहर्षं तत्पराणां सङ्घटनानामेवाद्यत्वे नितान्तमावश्यकता विद्यते खलु।

अस्मिन्नेवावसरे स्वभाषणे रा. स्व. सङ्घस्य प्रधानसञ्चालकेन श्रीगुरुजीमहाभागेन प्रोक्तम् यद् राष्ट्रस्य प्रतिष्ठा हिन्दु-समाजस्य शक्त्याधारमेवानुमीयते तथा च प्रभावशालिनः सुसङ्घटितस्य च सामर्थ्यस्य निर्माण-क्षमता रा. स्व. सङ्घे विद्यमानास्ते। अत एवास्माभिः सर्वैर्जनैरधिकाधिकमात्रायां दायित्वमादाय प्रगतिः कर्तव्या स्यात्। वयं यथा यथाग्रे सरेम, तथा तथा स्वल्पसमयान्तर एव यशोभाजो भविष्यामः।

सहयोग आवश्यकः

श्रीगुरुजीमहाभागः प्रावोचद्यद्धि किमपि कार्यं यदि कर्तव्यं चेत्तदा मनुष्यः स्वात्मानं कामं कियदपि कर्तृत्ववन्तं किं न भावयेन्नाम, परन्तु स एकलः किमपि कर्तुं न पारयते। अनेकेषां जनानां सहयोग आवर्जनीयो भवति। तं विना न हि कार्य-सिद्धिः। तेषां सर्वेषां सहयोगेनानायासं कार्यं सम्पद्यते।

प्रतिष्ठा किमर्थं न ?

तदिदमस्माकं सङ्घस्य कार्यं सङ्घटन-कार्यमास्ते। अस्य विशालस्य भारतवर्षदेशस्य परिसरे पुत्ररूपे निवसन्—कोटि-कोटि संख्यात्मको हिन्दु-समाजो विद्यते यो हि जात्युपजाति-भाषादीनां विभेदै र्जर्जरो जायमानोऽस्ति। स एषः समाजश्छिन्नो विच्छिन्नश्च बभूव। अस्यां स्थितौ तदेतदवबोधनस्यावश्यकता नास्ते—यदेवं विधस्य समाजस्य सविधे शक्ति र्न भवति तथा यो हि समाजः शक्ति-सम्पन्नो न भवति, तस्य न कापि च प्रतिष्ठाऽवशिष्यत इति। प्रकारान्तरेण च वयं स्वदौर्बल्यात् सर्वेषामाक्रमणस्य भक्ष्या भवामः।

नाभियोगापत्तयो, जागरणमक्ष्यते

श्रीगुरुजीमहाभागेनोक्तम् यद्देशेऽस्मिन् यदा यदा कलहा भवन्ति। हिन्दुसमाजस्य लोका आपत्तिं कुर्वन्ति यदत्र-ईषां सम्प्रदायद्वारा विधर्मीकरणं बोभूयमानमास्ते। पार्थक्य-भावनां जागरयित्वा, विद्रोहार्थम् प्रेरयन्ति विधर्माणः। लोका आपत्तिं कुर्वन्ति रुदन्ति च। परन्तु रोदनशीलत्वं नास्त्येव कोऽपि चाभ्युपायो नाम। उपायोऽस्ति स्वत्व-जागरणम्। यदि वयं स्वबन्धूनां व्यथामपाकर्तुमग्रे सरेम तदा न कोऽप्यन्यस्तृतीयोऽग्रे सतुं पारयेत्। अस्माकं कर्तव्यमस्ति, स्वत्वं जागरयित्वा तेन स्वव्यवहारे परिवर्तनम् तथा तद्द्वारा समाजस्य सूत्रबद्धमाविष्कारः। तदेतदस्माकं दौर्बल्यमेवास्ते, यद्देशस्योपरि बाह्याभ्यन्तरमापत्तिर्विजृम्भते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राष्ट्रशक्तेराधारोऽस्ति हिन्दुसमाजः

तत्र भवान् श्रीगुरुजीमहाभागः प्रोवाच, यदस्य हिन्दु-समाजस्य शक्तेराधार एव राष्ट्रस्य शक्तिः प्रमीयते। यदि स सबलश्चरित्रसम्पन्नश्चास्ते तदा संसारोऽसौ राष्ट्रमिदं बलवत् मन्येत। तदेतद्धिन्दु-समाजस्य सामर्थ्य एव निर्भरमास्ते। अस्माकं दौर्बल्यादेव पाकिस्तानं चीनदेशश्चास्मान् धर्षयन्तौ सन्तिष्ठेते। यदि चैतन्नास्ति चेत्तदा मैत्र्याभासमाचरतां व्यवहारोऽपि न शोभनः।

सोऽयमपमानजनको व्यवहारः

अस्माकं देशेऽधुनैवैकं रूषदेशीयं प्रतिनिधिमण्डलमागच्छत्। तदस्माकं प्रतिनिधिभिर्यां चर्चामकरोत्, तद्वृत्तविवरणं पठित्वा यो लज्जां नान्वभवत्, स्वात्मापमानो बभूवेति प्रत्यैत्, स हि भारतमातुः स्तन्यं पीत्वा नो ववृधे।

रूषदेशीयं प्रतिनिधिमण्डलं तथाविधां वार्तामवदद्यतस्तदस्माकं सामर्थ्यं परिचिनुते। वयं प्रत्येकस्मिन् विषये तन्निर्भरा आस्महे, तदनुकरणैकशरणा वर्तामहे।

अस्याः स्थितेर्हेतोरमरीकादयोऽन्यान्ये देशाः सचिन्त वीक्षन्ते-साशङ्काश्च सन्ति। फलतः संसारेऽस्माकं नास्ति किमपि स्थानम्।

हिन्दु-समाजस्य सामर्थ्यं वर्द्धनीयं भवेत्

श्रीगुरुवर्योऽभाषत, यद्वयं स्वसमाजस्य, यो हि भारतस्य राष्ट्रजीवनस्य मूलाधारोऽस्ति, तस्य हिन्दुसमाजस्य तेजस्वि जाग्रज्जीवनं प्रत्युपेक्षाभावं सेवमानाः स्मः। अन्ये लोका अस्मान् साम्प्रदायिकादीन् ब्रुवन्ति चेत् कामं ते तथा ब्रुवन्तु नाम, परमस्माभिश्चिन्तनीयम्, यदस्माकमुपमर्द्दापमानकरणस्य दुस्साहसं बहिस्त आगता लोकाः कुर्युः, किं तामिमां स्थितिं वयं सहेमहि? अप्येतदुचितम्? अत्र त्वरितं परिवर्तनं भवितुमर्हति, तथैतत्तदैव सम्भवति, यदाऽऽसेतुहिमाचलं सुसङ्घटितस्य, चारित्र्यसम्पन्नस्यैकरसपूर्णस्य च हिन्दु-समाजस्य जीवन-निर्माणं स्यात्। राष्ट्रस्य विराट्पुरुषस्याजेयसामर्थ्यरूपे समाजमभ्युत्थापयेम तदैव वयं विश्वस्य प्रमुखराष्ट्रत्वस्य सौभाग्यमाप्नुयाम।

श्रीगुरुजीमहाराजोऽवादीद् यद्धि देशेऽद्य तादृशं किमपि राजनैतिकं दलं नास्ति यस्मिन् सत्तासम्पन्ने जाते सति मदमत्तता नोत्पद्येत। नैवंविधं विश्वासं कोऽप्यापादयितुं प्रभवति। देशे प्रजातन्त्रमास्ते। एकं नो चेदपरं दलं सत्तारूढ़मेवेदेवावश्यम्। तथा च यदि प्रत्येकस्य दलस्य विकृतिमत्त्वस्य सम्भावना स्यात्तदादेशस्य भविष्यदन्धकारमयं भविष्यति।

सङ्घे क्षमता वर्तते

अनेनैव कारणेन राजनैतिकात् पंकगर्ताद् दूरमास्थाय, राष्ट्रस्य गम्भीरं चिन्तनं कुर्वाणम्, समग्रे समाजे तच्चिन्तनस्य स्फुलिङ्गोत्पादकम्, स्वकार्यकलापेन समाजे स्नेहादरयोः पदप्राप्तिकरं तथा सर्वेष्वपि च राजनैतिकेषु दलेष्वात्मनः प्रभावप्रस्थापकं, समाजस्य सङ्घटितं सामर्थ्यमावश्यकमास्ते।

सोऽवोचत्—यदि च वयं तया दृष्ट्या चिन्तयेम तदा सङ्घकार्यावबोधः कठिनो नास्ति, तथास्मिन् सङ्घटने सा क्षमतास्तेऽनुभवोऽयंस्यादिति विश्वासो भवितुमर्हति।

अत एवास्माभिः सर्वैर्जनैरधिकाधिकमात्रायां दायित्वं गृहीत्वा गतिशीलैर्भाव्यं स्यात्। यथा यथा वयमग्रेसरा भविष्यामस्तथा तथा स्वल्पीयसि काल एव यशो लप्स्यामहे, एवं परिदृश्येत।

अतः पूर्वं नागपुरस्य सङ्घसञ्चालकः श्रीघटाटेमहोदयः, समारोहस्याध्यक्षस्य श्रीरङ्गा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाभागस्य स्वागतं कुर्वन् सङ्घस्य स्थापनातोऽद्यपर्यन्तं सङ्घ–स्वयं सेवकैः कृतस्य कार्यस्य संक्षिप्तं परिचयं प्रददौ तथा च प्रकटयामास यद्धि संस्कारयुक्तस्य सङ्घस्य स्वयंसेवकेषु समाजस्य विश्वासः कियदधिकं विवर्द्धमानोऽस्तीति।

अथाचार्यः श्रीरङ्गामहोदयः स्वभाषणमारभमाणोऽवदत् यदद्यतनं प्राणदायिनं समारोहमिममवलोक्य स्वदेशस्य भाविजीवनं प्रति शुभाकाङ्क्षा वर्धन्ते।

साम्प्रतं देशे किलैकात्मता-परिषदो जायमानाः सन्ति, परन्तु भवतां सङ्घटनकर्ताऽस्या एकात्मकताया आवश्यकतां चिरपूर्वमेवानुभूतवांस्तथास्य (सङ्घटनस्य) राष्ट्रियम्–इति नामकरणं चक्रे। भारताभिजना विश्वस्मिन् यत्र कुत्रापि स्युः, स्वकीयां मातृभूमिं तामिमां भारतजननीं प्रति श्रद्धाप्रवणतां रक्षेयुरत्र नास्त्येव नवीनत्वम्। प्रत्येकं देशवासी स्वात्मनो मातृभूमिं किं वा पितृभूमिं प्रति श्रद्धां रक्षत्येव। परन्त्वद्यत्वे केषांचिल्लोकानामयमपि च विचारोऽस्ति यन्मातृभूमिं प्रत्येव श्रद्धायां किमर्थं बलमर्पितव्यम्? यदा विश्वस्यैकतायास्तथा विश्व-बन्धुत्वस्य च चर्चा क्रियते, यदेदं विश्वं समग्रमेकनीडरूपमेव वयं मन्यामहे तदा भारतमातरं प्रत्येव श्रद्धायाः का वार्ता? परन्तु ते तदेतद्विस्मरन्ति यद्वयं यदा भारतमातरं प्रति श्रद्धानिष्ठाया वार्तां कुर्मस्तदा वयं विश्वबन्धुत्वस्य मूलाधारमेव सुदृढं विदध्म इति। तस्मादेव स्वमातृभूमिं प्रति समादरस्य, भक्तेः, श्रद्धायाश्च भावनां जागरयितुमर्हामः।

वयमात्मनोऽस्या भूमेरस्या विशालजनतायाश्च गर्वमावहामः। स एष विषयो भिन्नोऽस्ति, यदस्मच्छाशसकेषु केचन महाशया नन्वेवं विधाश्चापि सन्ति येषामत्र गौरवमिव प्रतीयते, यत्तैरस्यां पुण्यभूमौ जन्मासाद्य दशलक्षसंख्याकाञ्छिशूनवरोध्य कापि महतो खलूपलब्धिः प्राप्तास्तीति। परन्त्वेवं विधानि तत्त्वानि परिहरेम तदा वयं सर्वेऽपि तामिमां स्वात्मनो भूमिं प्रति तथास्याः सम्पन्नतां प्रति चात्यन्तं श्रद्धामावहामः।

किमर्थं तान्येतानि सङ्घटनानि?

कानिचिदेवं विधान्यपि तत्त्वानि वर्तन्ते यानि विषयेऽत्र समुद्विग्नानि सन्ति, यल्लोकाः स्वात्मानं स्वयं सङ्घटितानि किमर्थं कुर्वते? परन्तु श्रीरङ्गामहोदयोऽब्रूत–यत्ते त्विदं जिज्ञासन्ते यत् सङ्घटनत्वे किन्नु बतानौचित्यमास्ते? इति। ईशोः सम्प्रदायानुयायिनो मोहम्मदीयादयः स्व-स्वधर्मसम्प्रदायं प्रति निष्ठापूर्वकं श्रद्धापूर्वकं स्वसङ्घटनानि विकासयन्ते। विश्वस्य विभिन्नेषु क्षेत्रेषु संचारं कुर्वन्ति, तदास्माकं स्वात्मसंघटनोद्योगः किमर्थमनुचितः स्यात्?

सामाजिको सुरक्षा

आचार्यो रंगामहोदयो रा. स्व. सङ्घस्य स्वयंसेवकद्वारा बिहारप्रदेशे दुर्भिक्षपीडितानां सहायतार्थं कृतानां कार्याणामुल्लेखं कुर्वाणोऽवादीद् यदिदमेकं प्रशंसनीयं कार्यमभूत्, श्रीमज्जयप्रकाशमहोदयोऽपि च कार्यमेतत् प्रशशंस, तदिदमतीव शोभनम्। स उवाच—"अहं तु तदिदं कामये, यद् वयं भौतिक्या प्रगत्या साकमेव सामाजिक्याः सुरक्षायाश्चाप्युत्तरदायित्वमावहेम। न वयं तांल्लोकान् विस्मर्तुमर्हामो येऽभावग्रस्ते जगति निवसन्ति, ये चास्मत्तः सहानुभूतिमपेक्षन्ते। एतत्कार्यार्थं लक्षेभ्योऽप्यधिकसंख्यानां स्वयंसेवकानामावश्यकता वरीवर्ति। ते हिन्दवः सन्ति–मोहम्मदीयाः सन्ति-ईशोरनुयायिनो वा सन्ति–अनेन नास्ति किमपि प्रयोजनम्। ते सङ्घटनानामेतेषां कस्याप्यामन्त्रणेऽग्रेसर्तुमर्हन्ति। मूलभूतं यद्वस्त्वावश्यकमस्ति, तदस्ति मातृभूमिं प्रति निष्ठा, तथा चैतेषामात्मनो दीनानां बन्धूनां सेवासम्पादनस्य तत्परता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'नदीनां सागरो गतिः' इत्यनुसारं सर्वेषां सम्प्रदायानां जनताभिः स्वसेवा राष्ट्रसेवायां समर्पणीया। ताः सर्वा भारतमातुरस्याः सम्मुखं श्रद्धावनता भवन्तु-तासां श्रद्धास्पदमतो भिन्नं न भवतु।

नैतिकं पतनं को नु खल्ववरुन्धीत ?

आचार्यो रंगामहोदयो देशे व्याप्तं भ्रष्टाचारं तथा च नैतिकं पतनमुल्लिखन्नुवाच, यद्धि तदिदं पतनं राजनैतिकै र्दलैरवरोद्धुं न शक्यते। एतदर्थं भवतामसौ संस्थेव नानासंख्या अपेक्ष्यन्ते तथा चेत्थंविधाः संस्था योग्येन नेतृत्वेन निरन्तरं प्रयत्नशीलेनैवाभ्युत्थातुं सक्षमा भवन्ति।

पुरुषोत्तमानां निर्माणमावश्यकम्

अथासावाचार्यवर्योऽब्रूत—वयं भारतीयाश्चराचरेऽणौ परमाणौ चेश्वरस्य साक्षात्कारं कुर्महे। सर्वेषु तेष्वीश्वरं पश्यन्तोऽपि च वयमेकेश्वरोपासनां विदध्मः-तत एव हि पुरुषोत्तममपेक्षामहे।

आचार्योऽग्रेऽवोचत्—'अहमस्म्येकः कर्षकस्तथा तदिदं जाने, यावत् सक्षममुत्तमं च बीजं नोप्येत, तावत् शस्यानां पालनं पोषणं च सम्यङ् न स्यादिति। सैव नियमः समाजविषये घटते।

समाजस्य लघुमहत्सु सर्वेष्वपि च जनेषु शुभसंस्कारान् प्रयोज्यास्माभिः पुरुषोत्तमानां निर्माणं कर्तव्यमास्ते। परन्तु किं सामाजिकसुरक्षैवास्ते पर्याप्ता ?

अस्माकं देशस्य सीमानः सुरक्षिता वर्तन्ते? सीमान्तक्षेत्रेषु गत्वास्माभिस्तत्रत्यगिरिकन्दरासु निवसत्सु सर्वेषु जनेषु कार्यजातं सम्पाद्यतेषु राष्ट्रभक्तेर्भावा जागरयितव्याः स्युः।

नेतृत्वं प्रति नास्ति कोऽप्यादरः

आचार्यः प्रोवाच यद्देशे केन्द्रियकर्मचारिणां हरतालान्दोलनं बभूव। सर्वकारस्तदवरोद्धुमध्यादेशं प्रयुयोज। परन्तु किं तदिदमावश्यकमभूत् ? किं कदापि तदिदं चिन्तितमभूद्यदिमे कर्मचारिणः किमर्थं याचनाः कुर्वाणाः सन्ति ? मुद्रास्फीतिरेव तेषां याचनानां मूलकारणमास्ते। मुद्रास्फीते र्महर्घता ववृधे तथा चानुचिताभिर्योजनाभि र्मुद्रास्फीति र्वृद्धि जगाम। ता इमा योजनाश्चास्मादेवहेतोरसफला बभूवुर्यतस्ता रूषदेशानुकरणेन निर्मिता आसन्। रूषदेशस्य भौतिकीं सम्पदमवेक्ष्य तदनुकरणमक्रियत परन्तु रूषदेशः कोटि-कोटिलोकानां क्रूरतया बलिं दत्त्वा तामिमां सम्पदं प्राप्तवानास्ते। किं वयमपि च तन्मार्गमेवानुसर्तुमभिलाषामः ?

सर्वकारीयाः कर्मचारिणश्चापि सर्वकाराद्विरुद्धा भवेयुरतः परं किं नाम निकृष्टं भवितुमर्हति ? यदा स्वगृह एव प्रतिष्ठा नास्ति तदा बहिर्विदेशेषु का नाम प्रतिष्ठा भवितुमर्हति ?

एकतोऽस्माकं शासकानामेषास्ते स्थितिस्तदा परतोऽस्मत्पुरतस्तच्चित्रमप्यास्ते यद्देशस्यैको भिक्षुकः संन्यासी चापि संसारे सम्माननीयं पदं प्राप्नुते।

अन्तेऽत्र भवान् रंगाचार्यमहोदयो रा. स्व. सङ्घद्वारा राष्ट्रे श्रद्धा-सेवा-त्यागानां भावैः क्रियमाणस्य कार्यस्य गौरवपूर्णैः शब्दैरुल्लेखं कुर्वाणोऽभाषत, यद्धि परमेश्वरो भवत्सु कृपादृष्टिं रक्षतादिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

एक अचूक तावीज़

मैं आपको एक तावीज़ देता हूँ। जब कभी आप दुविधा में हों या आपको अपना स्वार्थ प्रबल होता दिखाई दे तो यह नुस्खा आज़मा कर देखिये। अपने मन की आँखों के सामने किसी ऐसे गरीब और असहाय व्यक्ति का चेहरा लाइये, जिसे आप जानते हों और अपने आप से पूछिये कि क्या आपकी करनी उसके किसी काम आयेगी? क्या उसे कुछ लाभ होगा? क्या उस काम से उसे अपना जीवन और भविष्य को बनाने में कुछ मदद मिलेगी? दूसरे मानों में, क्या आपकी करनी हमारे देश के लाखों-करोड़ों भूखे-नंगे लोगों को स्वराज्य की राह दिखायेगी? बस, इतना सोचते ही आपकी सारी दुविधायें दूर हो जायेंगी और स्वार्थ मोम की तरह पिघलकर बह जायेगा।



महात्मा गांधी

davp 68/297

MAHATMA GANDHI
BIRTH CENTENARY
OCT. 2, 1968 TO
FEB. 22, 1970
महात्मा गांधी
जन्म शताब्दी
अक्तूबर 2, 1968 से
फरवरी 22, 1970

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

❀ अथार्गलास्तोत्रम् ❀

श्रीहरिशास्त्रिणानूदितो दुर्गापाठः

ॐ अस्य श्रीअर्गलास्तोत्रमन्त्रस्य विष्णुर्ऋषिः, अनुष्टुप् छन्दः, श्रीमहालक्ष्मीर्देवता, श्रीजगदम्बाप्रीतये सप्तशतीपाठाङ्गत्वेन जपे विनियोगः ॥

ॐ नमश्चण्डिकायै ।

मार्कण्डेय उवाच

ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥

जय त्वं देवि चामुण्डे जय भूतार्तिहारिणि ।
जय सर्वगते देवि कालरात्रि नमोऽस्तु ते ॥२॥

मधुकैटभविद्राविविधातृवरदे नमः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥३॥

महिषासुरनिर्णाशि भक्तानां सुखदे नमः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥४॥

रक्तबीजवधे देवि चण्डमुण्डविनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥५॥

शुम्भस्यैव निशुम्भस्य धूम्राक्षस्य च मर्दिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥६॥

वन्दिताङ्घ्रियुगे देवि सर्वसौभाग्यदायिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥७॥

अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥८॥

नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥९॥

स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१०॥

चण्डिके सततं ये त्वामर्चयन्तीह भक्तितः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥११॥

देहि सौभाग्यमारोग्यं देहि मे परमं सुखम् ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१२॥

श्रीगणेशानमः । श्रीजगदम्बिकायै नमः ।

अथ अर्गलास्त्रोत्रम्—

जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वधा स्वाहा तुम्हें नमः ॥

मधुकैटभ नाशो हे विधिकी वरदे नमः ।
रूप दो जय दो देवि ! यश दो शत्रु मारदा ॥२॥

महिषासुरविध्वंसी वरदाता तुम्हें नमः ।
रूप दो जय दो देवि ! यश दो शत्रु मार दो ॥३॥

पद वन्दित हैं तेरे तू है सौभाग्यदायिनी ।
रूप दो जय दो देवि ! यश दो शत्रु मार दो ॥४॥

रक्त बीज प्राणहरी चण्डमुण्ड बिनाशिनी ।
रूप दो जय दो देवि ! यश दो शत्रु मार दो ॥५॥

निशुम्भशुम्भमथिनी धूम्रलोचनमारिणी ।
रूप दो जय दो देवि ! यश दो शत्रु मार दो ॥६॥

अचिन्त्य रूपचरिता तू है शत्रु बिनाशिना ।
रूप दो जय दो देवि ! यश दो शत्रु मार दो ॥७॥

भक्तिप्रणत लोगों को चण्डिके ! नमते मुझे ।
रूप दो जय दो देवि ! यश दो शत्रु मार दो ॥८॥

भक्ति से स्तुतिकारों के कष्टहारिणि चण्डिके !
रूप दो जय दो देवि ! यश दो शत्रु मार दो ॥९॥

जो तुम्हें भक्तिसे नित्य पूजते हैं उन्हे शिवे !
रूप दो जय दो देवि ! यश दो शत्रु मार दो ॥१०॥

दे ओ आरोग्य सौभाग्य देओ देवि महासुख ।
रूप दो जय दो देवि ! यश दो शत्रु मार दो ॥११

शत्रुओं का नाश करो उत्कृष्ट बल दो हमें ।
रूप दो जय दो देवि ! यश दो शत्रु मारदो ॥१२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१३॥

विधेहि देवि कल्याणं विधेहि परमां श्रियम् ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१४॥

सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१५॥

विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१६॥

प्रचण्डदैत्यदर्पघ्ने चण्डिके प्रणताय मे ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१७॥

चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१८॥

कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदाम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१९॥

हिमाचलसुतानाथसंस्तुते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥२०॥

इन्द्राणीपतिसद्भावपूजिते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥२१॥

देवि प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥२२॥

देवि भक्तजनोद्दामदत्तानन्दोदयेऽम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥२३॥

पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम् ।
तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम् ॥२४॥

इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ।
स तु सप्तशतीसंख्यावरमाप्नोति सम्पदाम् ॥२५॥

इति देव्या अर्गलास्तोत्रं सम्पूर्णम् ।

कल्याण कीजिए देवि देओ श्री विपुला हमें ।
रूप दो जय दो देवि ! यश दो शत्रु मार दो ॥१३

यशस्वी और विद्यावान् लक्ष्मीवान् जनको करो ।
रूप दो जय दो देवि यश दो शत्रु मार दो ॥१४॥

दैत्यों का दर्पहरणी चण्डिके ! नमते मुझे ।
रूप दो जय दो देवि ! यश दो शत्रु मारदो ॥१५

चतुर्भुजे तू विधिसे हुई स्तुत महेश्वरि ।
रूप दो जय दो देवि ! यशदो शत्रु मारदो ॥१६॥

कृष्ण ने स्तुति की तेरी भक्तिपूर्वक अम्बिके ।
रूप दो जय दो देवि ! यश दो शत्रु मारदो ॥१७॥

शिव से भी हुई तू है पूजिता परमेश्वरी ।
रूप दो जय दो देवि ! यश दो शत्रु मार दो ॥१८॥

सुरासुर किरीटों से घृष्ट हैं पद आपके ।
रूप दो जय दो देवि ! यश दो शत्रु मारदो ॥१९॥

सद्भाव पूजिता है तू इन्द्र से परमेश्वरी ।
रूप दो जय दो देवि ! यश दो शत्रु मार दो ॥२०॥

प्रचण्ड भुजदण्डों के दैत्यों की मदनाशिनी ।
रूप दो जय दो देवि ! यश दो शत्रु मार दो ॥२१

भक्तों को आप देती हैं उत्कृष्टानन्द अम्बिके ।
रूप दो जय दो देवि ! यश दो शत्रु मार दो ॥२२

पत्नी मनोरमा देओ मनके अनुकूल हो ।
तारिणी दुर्ग संसार सिन्धुसे, कुलजात हो ॥२३॥

इसको पढके जो भी महास्तोत्र पढै नर ।
वही दुर्गा पाठ जप सम्पदा फल पायगा ॥२४॥

इति श्रीहरिशास्त्रिविरचित अर्गला स्तुति पूर्ण हुई ॥१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

❀ अथ कीलकम् ❀

ॐ अस्य श्रीकीलकमन्त्रस्य शिव ऋषिः, अनुष्टुप् छन्दः, श्रीमहासरस्वती देवता, श्रीजगदम्बाप्रीत्यर्थं सप्तशतीपाठाङ्गत्वेन जपे विनियोगः ।

ॐ नमश्चण्डिकायै ॥

मार्कण्डेय उवाच

ॐ विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ।
श्रेयः प्राप्तिनिमित्ताय नमः सोमार्द्धधारिणे ॥१॥
सर्वमेतद्विजानीयान्मन्त्राणामभिकीलकम् ।
सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परः ॥२॥
सिद्धयन्त्युच्चाटनादीनि वस्तूनि सकलान्यपि ।
एतेन स्तुवतां देवि स्तोत्रमात्रेण सिद्धयति ॥३॥
न मन्त्रो नौषधं तत्र न किञ्चिदपि विद्यते ।
विना जाप्येन सिद्धयेत सर्वमुच्चाटनादिकम् ॥४॥
समग्राण्यपि सिद्धयन्ति लोकशङ्कामिमां हरः ।
कृत्वा निमन्त्रयामास सर्वमेवमिदं शुभम् ॥५॥
स्तोत्रं वै चण्डिकायास्तु तच्च गुप्तं चकार सः ।
समाप्तिर्न च पुण्यस्य तां यथावन्नियन्त्रणाम् ॥६॥
सोऽपि क्षेममवाप्नोति सर्वमेवं न संशयः ।
कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः ॥७॥
ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति ।
इत्थंरूपेण कीलेन महादेवेन कीलितम् ॥८॥
यो निष्कीलां विधायैनां नित्यं जपति संस्फुटम् ।
स सिद्धः स गणः सोऽपि गन्धर्वो जायते नरः ॥९॥
न चैवाप्यटतस्तस्य भयं क्वापीह जायते ।
नापमृत्युवशं याति मृतो मोक्षमवाप्नुयात् ॥१०॥
ज्ञात्वा प्रारभ्य कुर्वीत न कुर्वाणो विनश्यति ।
ततो ज्ञात्वैव सम्पन्नमिदं प्रारभ्यते बुधैः ॥११॥
सौभाग्यादि च यत्किञ्चिद् दृश्यते ललनाजने ।
तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभम् ॥१२॥
शनैस्तु जप्यमानेऽस्मिन् स्तोत्रे सम्पत्तिरुच्चकैः ।
भवत्येव समग्रापि ततः प्रारभ्यमेव तत् ॥१३॥
ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसम्पदः ।
शत्रुहानिः परो मोक्षः स्तूयते सा न किं जनैः ॥ॐ
इति देव्याः कीलकस्तोत्रं सम्पूर्णम् ।

अथ कीलकस्तवप्रारम्भः—

शुद्ध ज्ञान तनूवाले त्रिवेदी दिव्य नेत्रवान् ।
श्रेयके हेतु सोमार्द्ध धारी शङ्कर को नमः ॥१॥
सबके जानने योग्य मन्त्रों का यह कीलक ।
वह भी क्षेम पाता है जो सदा जप में लगे ॥२॥
उच्चाटनादि सब ही उसके योग सिद्ध हों ।
इससे स्तुतिकर्ता की सिद्धि हो स्तोत्र मात्रसे ॥३॥
न मन्त्र औषध नहीं कुछ आवश्यक है यहां ।
बिना जप किये होते सिद्ध उच्चाटनादि हैं ॥४॥
सिद्ध होंगे सभी लोग शङ्कापै ध्यान दे हर ।
आमन्त्रित किया बोले सभी से यह श्रेष्ठ है ॥५॥
चण्डिका स्तोत्र इसको अति गूढ बना दिया ।
इसके पुण्य की पूर्ति न होगी यह जानिए ॥६॥
वह भी क्षेम पावेगा सभी भांति न संशय ।
कृष्ण चौदस या अष्टमी, को मानव ध्यान दे ॥७॥
दानप्रतिग्रह करै अन्यथा सिद्ध हो नहीं ।
ऐसे कीलकसे कील दिया शङ्कर ने इसे ॥८॥
कील को खोलके कोई जपता स्पष्ट जो इसे ।
होगा गण वही सिद्ध गन्धर्व बन बीच हो ॥९॥
सर्वत्र फिरते कोई भय होगा नहीं इसे ।
अपमृत्यु न पाता है मृत हो मोक्ष लाभ हो ॥१०॥
करै समझ प्रारम्भ तजै जो नष्ट हो सही ।
इससे जानकर ही प्रारम्भ इसका करै ॥११॥
सौभाग्य आदि जो भी है कुछ कान्त समूह में ।
सब इसकी कृपासे है इससे यह जाप्य है ॥१२॥
धीरे जपेसे कुछ ही सम्पदा हो अतः इसे ।
उच्चैः पढै तो सम्पूर्ण पावे प्रारम्भ से इसे ॥१३॥
ऐश्वर्य जो सदा देवै सौभाग्य स्वास्थ्य सम्पदा ।
शत्रु नाश तथा मोक्ष उसे क्यों न भजैं जन ॥१४॥
इति श्रीहरिशास्त्रिविरचित हिन्दी दुर्गापाठ में कीलकस्तुति पूर्ण हुई ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

❁ अथ देव्या कवचम् ❁

ॐ अस्य श्रीचण्डीकवचस्य ब्रह्मा ऋषिः, अनुष्टुप्छन्दः, चामुण्डा देवता, अङ्गन्यासोक्तमातरो बीजम्, दिग्बन्धदेवतास्तत्वम्, जगदम्बाप्रीत्यर्थे सप्तशतीपाठाङ्गत्वेन जपे विनियोगः ।

ॐ नमश्चण्डिकायै ॥

मार्कण्डेय उवाच

ॐ यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् ।
यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥१॥

ब्रह्मोवाच

अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम् ।
देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने ॥२॥

प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी ।
तृतीयं चन्द्रघण्टेति कूष्माण्डेति चतुर्थकम् ॥३॥

पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च ।
सप्तमं कालरात्रीति महागौरीति चाष्टमम् ॥४॥

नवमं सिद्धिदात्री च नवदुर्गाः प्रकीर्तिताः ।
उक्तान्येतानि नामानि ब्रह्मणैव महात्मना ॥५॥

अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे ।
विषमे दुर्गमे चैव भयार्ताः शरणं गताः ॥६॥

न तेषां जायते किञ्चिदशुभं रणसंकटे ।
नापदं तस्य पश्यामि शोकदुःखभयं न हि ॥७॥

यैस्तु भक्त्या स्मृता नूनं तेषां वृद्धिः प्रजायते ।
ये त्वां स्मरन्ति देवेशि रक्षसे तान्न संशयः ॥८॥

प्रेतसंस्था तु चामुण्डा वाराही महिषासना ।
ऐन्द्री गजसमारूढा वैष्णवी गरुडासना ॥९॥

माहेश्वरी वृषारूढा कौमारी शिखिवाहना ।
लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया ॥१०॥

श्वेतरूपधरा देवी ईश्वरी वृषवाहना ।
ब्राह्मी हंससमारूढा सर्वाभरणभूषिता ॥११॥

इत्येता मातरः सर्वाः सर्वयोगसमन्विताः ।
नानाभरणशोभाढ्या नानारत्नोपशोभिताः ॥१२॥

दृश्यन्ते रथमारूढा देव्यः क्रोधसमाकुलाः ।
शङ्खं चक्रं गदां शक्तिं हलं च मुसलायुधम् ॥१३॥

अथ ब्रह्मकवच प्रारंभ

मार्कण्डेय बोले—

रक्षा कवच लोकों का निगूढतम है वही ।
किसीसे न कहा है जो पितामह मुझे कहो ॥१॥

ब्रह्मा बोले—

हे विप्र अति ही गूढ सबके उपकारक ।
पुण्य देवी कवच है उसे सुन महामुने ! ॥२॥

पहली शैलपुत्री है दूसरी ब्रह्मचारिणी ।
तीसरी चन्द्रघण्टा है चौथी कूष्माण्डिका कही ॥३॥

पांचवीं स्कन्दमाता है छठी कात्यायनी शिवा ।
सातवीं कालरात्री है गौरी है आठवीं महा ॥४॥

नवीं है सिद्धिदा ऐसे नव दुर्गा प्रसिद्ध हैं ।
ये नाम प्रोक्त हैं दिव्य, महात्मा विधिने स्वयम् ॥५

आग से जलते हों जो, शत्रु-आक्रान्त युद्ध में ।
घोर सङ्कटमें प्राप्त डरे शरण प्राप्त हों ॥६॥

उनको रणमें कोई अशुभ प्राप्त हो नहीं ।
न विपत्ति उन्हे आती सर्व दुःखं क्षयङ्करी ॥७॥

देवी को सुमरे शीघ्र समृद्धि उनको मिलै ।
प्रेतासना है चामुण्डा वाराही महिषासना ॥८॥

ऐन्द्री गजसमारूढा वैष्णवी गरुडासना ।
माहेश्वरी वृषारूढा कौमारी मोरवाहना ॥९॥

ब्राह्मी हंसासना देवी सर्वाभरण सोहनी ।
नाना भूषण-शोभा को नाना रत्नच्छटाधरै ॥१०॥

दीखती हैं रथारूढ देवियां क्रोधसे भरी ।
शंख चक्र गदाशक्ति हल मूसल खेटक ॥११॥

पाश तोमर परशु, कुन्त और त्रिशूल है ।
दानवोंके विनाशार्थ भक्तों के त्राण के लिए ॥१२

धारती हैं शस्त्र ऐसे देवों के हित के लिए ।
महोत्सांहा बलवती महाभय विनाशिनी ॥१३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

खेटकं तोमरं चैव परशुं पाशमेव च ।
कुन्तायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमम् ।।१४।।

दैत्यानां देहनाशाय भक्तानामभयाय च ।
धारयन्त्यायुधानीत्थं देवानां च हिताय वै ।।१५।।

नमस्तेऽस्तु महारौद्रे महाघोरपराक्रमे ।
महाबले महोत्साहे महाभयविनाशिनि ।।१६।।

त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्द्धिनि ।
प्राच्यां रक्षतु मामैन्द्री आग्नेय्यामग्निदेवता ।।१७।।

दक्षिणेऽवतु वाराही नैर्ऋत्यां खड्गधारिणी ।
प्रतीच्यां वारुणी रक्षेद् वायव्यां मृगवाहिनी ।।१८

उदीच्यां पातु कौमारी ऐशान्यां शूलधारिणी ।
ऊर्ध्वं ब्रह्माणि मे रक्षेदधस्ताद् वैष्णवी तथा ।।१९

एवं दश दिशो रक्षेच्चामुण्डा शववाहना ।
जया मे चाग्रतः पातु विजया पातु पृष्ठतः ।।२०।।

अजिता वामपार्श्वे तु दक्षिणे चापराजिता ।
शिखामुद्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता ।।२१

मालाधरी ललाटे च भ्रुवो रक्षेद् यशस्विनी ।
त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके ।।२२।।

शङ्खिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी ।
कपोलौ कालिका रक्षेत्कर्णमूले तु शाङ्करी ।।२३।।

नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका ।
अधरे चामृतकला जिह्वायां च सरस्वती ।।२४।।

दन्तान् रक्षतु कौमारी कण्ठदेशे तु चण्डिका ।
घण्टिकां चित्रघण्टा च महामाया च तालुके ।।२५

कामाक्षी चिबुकं रक्षेद् वाचं मे सर्वमङ्गला ।
ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी ।।२६।।

नीलग्रीवा बहिःकण्ठे नलिकां नलकूबरी ।
स्कन्धयोः खड्गिनी रक्षेद् बाहू मे वज्रधारिणी ।।

हस्तयोर्दण्डिनी रक्षेदम्बिका चाङ्गुलीषु च ।
नखाञ्छूलेश्वरी रक्षेत्कुक्षौ रक्षेत्कुलेश्वरी ।।२८।।

स्तनौ रक्षेन्महादेवी मनः शोकविनाशिनी ।
हृदये ललिता देवी उदरे शूलधारिणी ।।२९।।

दुर्दर्शे रक्ष मुझको शत्रुकी भयवर्द्धिनी ।
ऐन्द्री रक्षा करै पूर्व, अग्नि में अग्निदेवता ।।१७

वाराही दक्षिणा दिक में नैरुत्यदिशि खड्गिनी
वारुणी पश्चिमा दिक् मे वायवी में मृगासना ।।१८

उदग्दिशामें कौमारी शैवी में शूलधारिणी ।
ब्रह्माणी ऊर्ध्वदिशि में नीचे में वैष्णवी रखै।।१६

रखै दशों दिशाओं में चामुण्डा शववाहनी ।
आगे रहै जया मेरे विजया पृष्ठ भाग में ।।१७।।

अजिता वाम में आवे दाहिने अपराजिता ।
शिखामें द्योतिनी रक्षा करै मस्तकमें उमा ।।१८।।

मालाधरी भालमध्य भ्रूकुटी में यशस्विनी ।
त्रिलोचना भौंहमध्य नासामे यमघण्टिका ।।१९।।

नेत्रों को शङ्खिनी रखै कानों को द्वारवासिनी ।
कपोलों को रखै काली शाङ्करी कर्णमूलमें ।।२०।।

सुधाकला अधरमें जिह्वामध्य सरस्वती ।
घण्टिका को चित्रघण्टा माया तालु प्रदेशमें ।।२१।।

भद्रकाली गर्दन को धन्विनी पृष्ठवंश में ।
कामाक्षी हनुको रखै वाणीको सर्वमंगला ।।२२

नीलग्रीवा कण्ठबहि (कण्ठ आगे) नली को नल
कूबरी ।

स्कन्धप्रदेशमें खड्गधारिणी बाहु वज्रिणी ।।२३।।

हाथों को दण्डिनी रखै अंगुली सब अम्बिका ।
नख शूलेश्वरी रखै कोंख रखै नलेश्वरी ।।२४।।

स्तन रक्खै महादेवी मनको शोकनाशिनी ।
ललिता उरको रखै पेटको शूलधारिणी ।।२५।।

कामिनी नाभिको रखै गुह्येशा गुह्यदेश को ।
भूतनाथा मेढ़ रखै गुदा महिषवाहनी ।।२६।।

कटी भगवती रखै जानुको विन्ध्यवासिनी ।
बिनायकी जानु बीच जंघाओं को महाबला ।।२७

टखनों को नारसिंही पाद पृष्ठ मितौजसी ।
श्रीधरी पादशाखाएँ पादनीचे तलेश्वरी ।।२८।।

नखों को क्रूरदाढ़ी की केशों को ऊर्ध्वकेशिनी ।
कौबेरी रोमकूपों को चर्म वागीश्वरी रखै ।।२९।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाभौ च कामिनी रक्षेद् गुह्यं गुह्येश्वरी तथा ।
पूतना कामिका मेढ्रं गुदे महिषवाहिनी ॥३०॥
कट्यां भगवती रक्षेज्जानुनी विन्ध्यवासिनी ।
जङ्घे महाबला रक्षेत्सर्वकामप्रदायिनी ॥३१॥
गुल्फयोर्नारसिंही च पादपृष्ठे तु तेजसी ।
पादाङ्गुलीषु श्री रक्षेत्पादाधस्तलवासिनी ॥३२॥
नखान् दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी ।
रोमकूपेषु कौबेरी त्वचं वागीश्वरी तथा ॥३३॥
रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती ।
अन्त्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी ॥३४॥
पद्मावती पद्मकोशे कफे चूडामणिस्तथा ।
ज्वालामुखी नखज्वालामभेद्या सर्वसन्धिषु ॥३५॥
शुक्रं ब्रह्माणि मे रक्षेच्छायां छत्रेश्वरी तथा ।
अहंकारं मनो बुद्धिं रक्षेन्मे धर्मधारिणी ॥३६॥
प्राणापानौ तथा व्यानमुदानं च समानकम् ।
वज्रहस्ता च मे रक्षेत्प्राणं कल्याणशोभना ॥३७
रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी ।
सत्त्वं रजस्तमश्चैव रक्षेन्नारायणी सदा ॥३८॥
आयू रक्षतु वाराही धर्मं रक्षतु वैष्णवी ।
यशः कीर्ति च लक्ष्मीं च धनं विद्यां च चक्रिणी ॥
गोत्रमिन्द्राणि मे रक्षेत्पशून्मे रक्ष चण्डिके ।
पुत्रान् रक्षेन्महालक्ष्मीर्भार्यां रक्षतु भैरवी ॥४०॥
पन्थानं सुपथा रक्षेन्मार्गं क्षेमकरी तथा ।
राजद्वारे महालक्ष्मीर्विजया सर्वतः स्थिता ॥४१॥
रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु ।
तत्सर्वं रक्ष मे देवि जयन्ती पापनाशिनी ॥४२॥
पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः ।
कवचेनावृतो नित्यं यत्र यत्रैव गच्छति ॥४३॥
तत्र तत्रार्थलाभश्च विजयः सार्वकामिकः ।
यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम् ॥
परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमान् ॥४४॥
निर्भयो जायते मर्त्यः संग्रामेष्वपराजितः ।
त्रैलोक्ये तु भवेत्पूज्यः कवचेनावृतः पुमान् ॥४५॥

रक्त मज्जा बसा मांस अस्थि आदिक पार्वती ।
अन्त्रालिको कालरात्री पित्तको मुकुटेश्वरी ॥३०॥
पद्मावती पद्मकोष कफ चूडामणी स्वयम् ।
ज्वालामुखी नखज्वाला अभेद्या सब सन्धि में ॥३१
ब्रह्माणी शुक्र को रक्खे छाया छत्रेश्वरी रखै ।
अहङ्कार मनो बुद्धि रक्खै श्रीधर्मचारिणी ॥३२॥
प्राणापान तथा व्यान समानोदान को तथा ।
यश लक्ष्मी और कीर्ति करै रक्षित चक्रिणी ॥३३
इन्द्राणी गोत्रको रक्खै पशुमण्डल चण्डिका ।
पुत्र रक्षा करै लक्ष्मी भार्या रक्षण भैरवो ॥३४॥
क्षेमङ्करी मार्गमध्य विजया सब ओर से ।
रक्षारहित जो स्थान होवे कवच वर्जित ॥३५॥
करै सकल की रक्षा जयन्ती पापनाशिनी ।
निजका श्रेय चाहे तो अरक्षित चले नहीं ॥३६॥
कवचावृत हो नित्य जावे नर जहां जहां ।
वहां वहां अर्थलाभ जय हो सब काम में ॥३७॥
जोजो चिन्तित हों काम वही निश्चय से मिलै ।
ऐश्वर्य्य भी अतुल ही पाता है वह भूमिपै ॥३८॥
निर्भीक नर होता है हारता रण में नहीं ।
त्रिलोकी में पूज्य होवा कवचावृत मानव ॥३९॥
यह देवी-कवच है देवोंको भी अलभ्य है ।
जो पढ़ै ध्यान से नित्य श्रद्धायुक्त त्रिकाल में ॥४०
दैवी कला प्राप्त उसे मिले जय त्रिलोक में ।
एकसौ वर्षसे आगे अपमृत्यु बिना जिये ॥४१॥
लूता विस्पोट इत्यादि व्याधियां सब नष्ट हों ।
बनावटी विष तथा विष स्थावर जङ्गम ॥४२॥
परकृत्य सभी मन्त्र यन्त्र भूतल पै सभी ।
भूचारी खेचर तथा जलजा उपदेशिका ॥४३॥
सहजा कुलजा माला डाकिनी शाकिनी सभी ।
नभचारी और घोर डाहनें बलपूर्ण भी ॥४४॥
ग्रहभूतपिशाचादि यक्ष गन्धर्व राक्षस ।
ब्रह्मराक्षस वेताल कुष्माण्डी भैरवादि भी ॥४५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदं तु देव्याः कवकं देवानामपि दुर्लभम् ।
यः पठेत्प्रयतो नित्यं त्रिसन्ध्यं श्रद्धयान्वितः ।।४६

दैवी कला भवेत्तस्य त्रैलोक्येष्वपराजितः ।
जीवेद् वर्षशतं साग्रमपमृत्युविवर्जितः ।।४७।।

नश्यन्ति व्याधयः सर्वे लूताविस्फोटकादयः ।
स्थावरं जङ्गमं चैव कृत्रिमं चापि यद्विषम् ।।४८

अभिचाराणि सर्वाणि मन्त्रयन्त्राणि भूतले ।
भूचराः खेचराश्चैव जलजाश्चोपदेशिकाः ।।४६।।

सहजा कुलजा माला डाकिनी शाकिनी तथा ।
अन्तरिक्षचरा घोरा डाकिन्यश्च महाबलाः ।।५०।।

ग्रहभूतपिशाचाश्च यक्षगन्धर्वराक्षसाः ।
ब्रह्मराक्षसवेतालाः कूष्माण्डा भैरवादयः ।।५१।।

नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते ।
मानोन्नतिर्भवेद् राज्ञस्तेजोवृद्धिकरं परम् ।।५२।।

यशसा वर्द्धते सोऽपि कीर्तिमण्डितभूतले ।
जपेत्सप्तशतीं चण्डीं कृत्वा तु कवचं पुरा ।।५३।।

यावद्भूमण्डलं धत्ते सशैलवनकाननम् ।
तावत्तिष्ठति मेदिन्यां सन्ततिः पुत्रपौत्रिकी ।।५४।।

देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ।
प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ।।५५।।

लभते परमं रूपं शिवेन सह मोदते ।।ॐ।।५६।।

इति देव्याः कवचं सम्पूर्णम् ।

भागते हैं देखते ही जिन्हें कवच सिद्ध हों ।
राजा से मान पाताहै तेज वृद्धि करै सदा ।।४६।।

यश की वृद्धि पाता है कीर्ति मण्डित भूमिपै ।
पढै पूर्व कवच को पीछे सप्तशती पढै ।।४७।।

यावद्धरा मण्डलपै रहैंगे बन शैल ये ।
तावत् रहैगी उसकी पुत्रपौत्रादि सन्तति ।।४८।।

मरने पै वही स्थान जो दुर्लभ सुरादि को ।
वह मानव पाता है महामाया प्रसाद से ।।४६।।

इति श्रीहरिशास्त्रिविरचित हिन्दी दुर्गा पाठ में ब्रह्मकवच पूर्ण हुआ ।

मनोविनोदकणिका—

पत्त्रम्

पतिः— स्वभार्यां प्रेषयन् ग्रामं भर्ता तां समबोधयत् ।
'पितुर्गेहमितः प्राप्य पत्त्रं लेख्यं त्वया द्रुतम्' ।।

पत्नी— अवश्यं, परमेतत्तु ज्ञातुमिच्छामि वल्लभ !
लिखेयं कतिमुद्राणां कृते पत्त्रं, त्वयोच्यताम् !!

—दीनानाथत्रिवेदी मधुपः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान प्राच्यविद्या प्रतिष्ठान, जोधपुर

– द्वारा –

शोध, संदर्भ एवं दुर्लभ महत्त्वपूर्ण ग्रंथों का

राजस्थान पुरातन ग्रंथमाला के अन्तर्गत प्रकाशन

प्रकाशित ग्रंथों की सूची

(ख) राजस्थानी–हिन्दी

प्रकाशन का नाम	सम्पादक	मूल्य
कान्हड़दे प्रबन्ध	प्रो० के० वी० व्यास	रु० ६२–२५
क्यामखां रासा	डा० दशरथ शर्मा और अगरचन्द भंवरलाल नाहटा	,, ४–७५
लावा रासा	श्रीमहताबचन्द खारेड़	,, ३–७५
बांकीदास री ख्यात	श्रीनरोत्तमदास स्वामी	,, ५–५०
राजस्थान साहित्य संग्रह भाग १	,, ,, ,,	,, २–२५
,, ,, ,, भाग २	डा० पुरुषोत्तमदास मेनारिया	,, २–७५
कवीन्द्रकल्पलता	रानी लक्ष्मीकुमारी चूण्डावत	,, २–००
जुगलविलास	,, ,, ,,	,, १–७५
भगतमाल	श्री उदयराज उज्ज्वल	,, १–७५
राजस्थान, पुरातत्व मंदिर के हस्तलिखित ग्रंथों की सूची भाग १	पद्मश्री मुनि जिनविजय, पुरातत्वाचार्य	,, ७–५०
राजस्थान प्राच्यविद्या प्रतिष्ठान हस्तलिखित ग्रंथों की सूची भाग २	श्री गोपालनारायण बहुरा	,, १२–००
राजस्थान हस्तलिखित ग्रंथ सूची भाग १	पद्मश्री मुनि जिनविजय, पुरातत्वाचार्य	,, ४–५०
,, ,, ,, भाग २	डा० पुरुषोत्तमलाल मेनारिया	,, २–७५
स्व० पुरोहित हरिनारायणजी विद्याभूषण ग्रंथ संग्रह	श्री गोपालनारायण बहुरा	,, ६–२५
मुहता नैणसी री ख्यात भाग १	श्री बदरीप्रसाद साकरिया	,, ८–५०
,, ,, ,, भाग २	,, ,, ,,	,, ९–५०
,, ,, ,, भाग ३	,, ,, ,,	,, ८–००
,, ,, ,, भाग ४	,, ,, ,,	,, ८–७५
राजस्थानी साहित्य संग्रह भाग ३	श्री लक्ष्मीनारायण गोस्वामी	,, ५–५०
सूरजप्रकाश भाग १	श्री सीताराम लालस	,, ८–००
,, भाग २	,, ,, ,,	,, ९–५०
,, भाग ३	,, ,, ,,	,, ९–७५
नेहतरंग	श्री रामप्रसाद दाधीच	,, ४–००
मत्स्य-प्रदेश की हिन्दी साहित्य को देन	डा० मोतीलाल गुप्त	,, ७–००

पुस्तक विक्रेताओं को २५ प्रतिशत कमीशन दिया जाता है।

(राजस्थान सरकार द्वारा प्रसारित)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

❀ कलिकौतुकम् ❀

आचार्य—श्रीविश्वनाथमिश्रः, श्रीशार्दूलसंस्कृतविद्यापीठं, बीकानेरः ।

पूर्वानुवृत्तम्—

पञ्चमदृश्यम्, स्थानम्–ब्राह्मणस्य गृहम्

(ब्राह्मणः शंकरमर्चयति ततः प्रविशति कलिः)

कलिः—रे पाखण्डापसद ? मूर्ख ! किमिदं मदीयं शासनमुल्लंघ्यातिवर्तसे । कथमेवं मम विरोधमाचरन् आत्मानमनभीष्टे गर्ते पातयितुमुद्यतोऽसि ।

ब्राह्मणः—क्रूर ! नाहं कमप्यनर्थमाचरामि प्रत्युत स्वकर्मण्येव प्रवृत्तोऽस्मि । किमिति त्वं शिवपूजनमपि न सहसे । रे अज्ञ ! पश्य—

यस्माद् विश्वमुदेति यत्र
रमते यस्मिन् पुनर्लीयते,
भासा यस्य जगद् विभाति
सहजानन्दोज्ज्वलं यन्महः ।
शान्तं शाश्वतमव्ययं
यमपुनर्भावाय भूतेश्वरम्,
द्वैतध्वान्तमपास्य यान्ति
कृतिनः प्रस्तौमि तं पूरुषम् ॥

कलिः—अन्धविश्वास ? गतोऽसौ कालो यदा अज्ञानिनः परोक्षे विश्वासं कुर्वन्ति स्म । ममास्मिन् भौतिके युगे न मुक्तेः न वा कस्यापीश्वरस्य स्थानम् । ननु धर्महीनं मदीयं शासनम् । कुतस्त्वया देवार्चनादिकमद्यापि न त्यज्यते । मन्ये, मुमूर्षुरसि ।

ब्राह्मणः—कस्त्वम् सभ्यवेशाच्छन्नः, असभ्य इव अन्धबधिरमूर्खादिभिः मर्मच्छेदकैः शब्दैः मां सम्बोधयसि ?

कलिः—(क्रोधं नाटयन्) इयती धृष्टता (गलहस्तयन्) रे ब्राह्मणापसद ? परवञ्चक ? शृणु मे परिचयम्–अहमस्मि अनभिषिक्तोऽपि संप्राप्तराज्याधिकारः कलिः । ममायं समयः । यदा यज्ञादिधर्मव्याजेन जगद् वञ्चयित्वा त्वादृशाः जनाः स्वार्थं साधयन्ति स्म, व्यतीतोऽसौ सत्ययुगादीनां समयः । इदानीं ममाभिनवेन राज्यविधानेन सर्वैस्तथाऽचरणीयं यथा प्राचीनाः सर्वाः व्यवस्था विलुप्येरन् । किन्तु अद्यापि त्वयाऽसौ व्यवस्थैवाद्रियते इति दण्डनीयोऽसि ।

ब्राह्मणः—(हस्ते शिरः कृत्वा) हा दैव ! कथमिदं सम्प्राप्तं कलिराज्यम् ? किं करोमि क्व गच्छामि ! (क्रोधं नाटयन्) पापशासन ! भवतु नाम तव साम्राज्यं तथापि त्वं न शक्ष्यसि मां सदा चारात् प्रच्यावयितुम् !

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेच्छम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
धर्म्यात् पथः प्रविचलन्ति पदं न धीराः ॥

तस्मात् स्वधर्मे निधनमपि मे श्रेयः ।

कलिः—(मुष्टिकया प्रहरन्) रे पुराणप्रिय ! वञ्चक ! त्वं कथं मम समक्षमेव मां पापमय इति घृणिताक्षरैरधिक्षिपसि । भुंक्ष्व स्वकृतस्य फलम् । (पुनः प्रहरति) ।

ब्राह्मणः—(उच्चैराक्रन्दन्) अब्रह्मण्यम्, अब्रह्मण्यम्, अन्याय्यम्, अन्याय्यम् भो भो भारतरक्षकाः क्व स्थ यूयम् ? पश्यत पश्यत एष दस्युयुगः कलिः निराश्रयं मां निर्दयं ताडयति ।

कलिः—आक्रन्द अथवा भृशं रुदिहि । नाहं त्वां मुञ्चामि । अवलोकये कस्तव साहाय्यं कर्तुमायातीति । (यष्टिमुद्यमयति)

(यवनिकाभ्यन्तरे) समाश्वसिहि समाश्वसिहि भूदेव ! अयमहं भारतरक्षिता परीक्षितः समागतोऽस्मि । न भेतव्यम् न भेतव्यम् ।

परीक्षितः—(प्रविश्य) सावधानो भव !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पापात्मन् ! कले ! अहमस्मि रक्षिता अस्य ब्राह्मणस्य । तिष्ठ तावत् यावत् द्विजद्रुहं त्वां खड्गेन यमलोकं प्रापयामि ।

कलिः—को भवान् ममाधिकारं निरोद्धुमुद्यतः ? कथं पुनर्माम् भवान् दण्ड्यं मन्यते ? किं समयप्रवाहं निरोद्धुं कोऽपि समर्थः? ब्रवीतु भवान् ।

परीक्षितः—म्लेच्छहतक! अहमस्मि शास्ता उत्पथगामिनाम्, निग्रहीता-अधर्मस्य, संस्थापयिता सनातनधर्मस्य, पालयिता, वेदद्विजगवाम्, भारतवर्षस्यास्य सम्राट् परीक्षितो नाम।

नीच ! नात्र तवाधिकारः क्षणमप्यवस्थातुम् । दुराचारिन् ! ज्ञातं मया तव चेष्टितम् । अद्यास्मिन् वने भ्राम्यता मया सा गौः दृष्टा या प्रताडिता त्वया । स च धर्ममूर्तिः वृषभोऽपि दृष्टः यस्य त्रयः पादाः त्वया खण्डिताः । अतो नूनमेव दण्डनीयं त्वामहमद्यै व घातयिष्यामि ।

यत्र भारते पुण्यदेशे लोकत्रयं पुनाना प्रवहति भगवती भागीरथी, यत्र च जनानामन्तर्मलं क्षालयन्तो गीता सुगीता क्रियते, तत्र देशे कोऽयं समयप्रवाहो नाम व्यर्थजल्पनम् ? मद्यमांसप्रिय ! कामचारिन् ? शूकर ? अहमपि आखेट-व्याजेन त्वादृशान् हिंस्रान् अन्विष्यन् प्रचरामि । अद्य परीक्षितस्य दृष्टिगोचरस्त्वं भूत्वा न खलु भविष्यसि ।

कलिः—अतिगर्वित ! कथं मामवमन्यसे ।
भवामि नाहमेकाकी बहवोऽनुचरा मम ।

कथमेको भवानस्मान् बहून् जेतुं क्षमो भवेत् ।।
शिक्षितः शस्त्रसंधाने किं जानासि जगद्गतिम् ।
यतो मूलाद् भवान् जातः नाहं जातोऽस्मि किं ततः ।।

ननु समानं पाञ्चभौतिकं नः शरीरं, कुतः खलु भवानधिकः ?

परीक्षितः—अलमनर्गलप्रलापेन । यदि अहमिव त्वमपि जातस्तर्हि सन्नद्धो भव, युद्धयस्व । अहं युद्धेनैवात्र निर्णयं करोमि ।

शिक्षयिष्यामि योद्धुं त्वां यदि बाणान् सहिष्यसे!
अन्यथा गच्छ दुर्बुद्धे शकटीभारमुद्वह ।।

कलिः—अभिमानिन् ? मया त्वं शकटीं वाहयितुमिच्छसि ? आयाहि तर्हि पश्यामि तव सामर्थ्यम् ।

(उभयोश्चापधारिणोः युद्धं भवति परीक्षितेन विद्धः कलिः भूमौ पतति)

परीक्षितः—कथय रे क्व गतं बलवत्ताभिमानम् ? ब्रूहि यावत्त्वां मम बाणः गतप्राणं करोति ।

कलिः—(करौ कम्पयमानः उत्थाय) वीरप्रवर ! मुञ्च माम्, मुञ्च माम् तव महापुरुषस्य कृते कस्यचित् प्राणिनः हिंसा न शोभते ।

परीक्षितः—त्वादृशानां पापीयसां हिंसनमेव क्षत्रियाणां धर्मः । पापीयसि दया एव हिंसा ।

यस्मिन् यथा वर्तते यो मनुष्यः
तस्मिन् तथा वर्तितव्यं स धर्मः ।
साध्वाचारः साधुना वर्तितव्यः
पापाचारो हिंसया प्रत्युपेयः ।।

तस्मात् अहिंसागीतं तव न विश्वसनीयम् । त्वं ममाद्य वध्य एवासि ।

कलिः—शरणागतवत्सल ! शरणमागतोऽस्मि तवाहम्, अतो मुञ्च माम् ।

परीक्षितः—कथं शरणमायासि ? मम राज्ये अधमानां त्वादृशानां स्थातुं स्थानं नास्ति, चलितुं पन्था नास्ति, पातुं जलं नास्ति, भोक्तुं भक्ष्यं नास्ति । ततस्तवाद्य मन्ये वध एव वरम् ।

कलिः—दयस्व दयामय ! दयस्व मयि शरणागते । मामपि जीवितुं मुञ्च । कश्चिन्मापि स्थानं निरूप्यताम् । राजन् पश्य—

शुक्ला यत्र स्थिता हंसास्तत्र किं नैव वायसाः ।
द्विजैरध्युषिते ग्रामे चाण्डालाः किम् वसन्ति न ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्याचन्द्रमसोः प्रभावाद् द्वे अयने भवतः। तत्रैकमुत्तरायणमपरञ्चदक्षिणायनम्। दक्षिणायने चन्द्रमा बलवान् भवति, कालश्च विसर्गाख्यः। "विसर्गश्च यद्बलं विसृजत्ययम्" अष्टाङ्गहृदयं) "विसृजति जनयत्याप्यमंशं प्राणिनाञ्च बलमिति विसर्गः" अर्थात् कालेऽस्मिन् सौम्यस्वभावाच्चन्द्रमा जगतः समस्तप्राणिनां बलमभिवर्धयति।

परीक्षितः—कले? शरणागतरक्षणं तु भारतीयानां सनातनो धर्मः। तर्हि वद-क ते स्थानं रोचते, येन धर्माचरणस्य हानिर्न जायेत।

कलिः—अस्त्येव तादृशं स्थानं मम वासयोग्यम्। न च कस्यापि सततस्ततो हानिः संभाव्यते। प्रथमन्तावत् सुरास्थानम्, द्वितीयं वेश्यागृहम्, तृतीयं द्यूतशाला। राजन्? अत्र मे निवासमनुजानीहि, यतो नात्र सन्ता व्रजन्ति।

परीक्षितः—(विचार्य) का हानिः, दत्तानि मया ते पापस्थानानि।

कलिः— राजन्? महती खलु कृपेयं दयार्द्रचेतसस्तत्र खलु भवतः। परन्तु भगवन्! अल्पमिदं स्थानं न युज्यते सकुटुम्बस्य मे निवासाय पूर्णम्। अतः काञ्चनमपि देहि मे स्थानम्। काञ्चनं विना कोऽपि कथं जीवितुमर्हति?

काञ्चनं सर्ववस्तूनां यतो मूल्यं निरूपितम्।
अतः काञ्चनहीनस्य जीवनात् मरणं वरम्॥

परीक्षितः—युक्तं वदसि। चलति मम राज्ये स्वर्णमुद्रा। तत् सुवर्णं तावत् सर्वसाधारणं जीवनस्थानमस्ति। त्वमपि तत्र वस। अनुज्ञातो मया ते काञ्चनवासः। किन्तु एभ्योऽन्यत्र मदाज्ञामुल्लंघ्य न त्वया स्थातव्यम्। अन्यथा मम प्रखरशरहतः कथावशेषतां यास्यसि।

कलिः—(हस्तौ संयोज्य) यथा ज्ञापयति देवः। (निष्क्रान्तः)।

पटाक्षेपः

क्रमशः

❀ हेमन्तचर्या ❀

ले० वैद्यबदरीप्रसादशर्मा शास्त्री, राजकीय औषधालयः तूंगा, जयपुरम्

दक्षिणायने वर्षाशरद्हेमन्ताख्यास्त्रयः ऋतवः प्रवर्तन्ते। तथा कालेऽस्मिन् मधुराम्ललवणारसास्त्रयोऽपि बलवन्तो भवन्ति। तत्र वर्षास्वम्लो शरदि लवणो हेमन्ते मधुररसो बलवान् भवति। तत्र वर्षासु स्वल्पबलः, शरदि मध्यमबलो हेमन्ते चोत्तमबलो भवति।

यद्यपि शिशिरे ऋतौ(माघफाल्गुनयोः) प्रचलितेन शीतवातेन शीतमप्यधिकं भवति, किन्तु तत्रादानकालवशाद्देहे रूक्षता प्रादुर्भवति। वातस्तु योगवाही, शीतेन सह शीतोत्पादकः, उष्णेन सहोष्णः। अतो हेमन्तशिशिरयोरप्याहारविहारौ समानावेव परिपालयेयुः प्राणिनः।

मार्गशीर्षपौषमासद्वयमधिकृत्य हेमन्त ऋतुः प्रवर्तते। अत्र वातकफौ प्रकुप्यतः। कालोऽयमतीवशीतप्रदः सुखावहश्च। यस्मिन्नुत्तरतः शीतो वातः प्रवहति। सूर्यो नभः सर्वा दिशो जलाशयाश्च तुहिनाच्छन्नाः भवन्ति, तत्र गजमहिषकाक्रोरअखड्गादयो जन्तवोऽपि सगर्वाः मदोद्धताः प्रतिभान्ति, किमुतान्यप्राणिनां कथा।

व्यायामः

शीतकालेऽस्मिन् यथाशक्ति व्यायामोऽवश्यं कर्तव्यः। "शरीरेणायासजननं व्यायामः" बलिनां स्निग्धभोजिनां तु पुरातनीया व्यायामः (दण्ड बैठक) समुचितः। स च महान् स्वास्थ्यवर्धकः, समस्तशरीरावयवानां सौन्दर्यप्रदो भवति। तथाल्पप्राणिनां कृते कन्दुकक्रीडनं चङ्क्रमणं यथाशक्ति प्रधावनमेव बलवर्धकं भवति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तैलाभ्यङ्गः

प्रातरुत्थाय चोष्णोदकेन शौचादिकं कृत्यं विधाय-शरीरस्य शीतोद्भवां रूक्षतामपनेतुं तैलाभ्यङ्गश्चाचरणीयो नियमेन। विशेषेण शिरसि पादयोस्तैलमर्दनेन दृष्टिपुष्टिः मृदुता तनोः कचानां दाढर्थं श्यामतादिकञ्च भवति। तैलाभ्यङ्गेन-कफवातशान्तिर्भवति।

वातशूलनिपीड़ितानां पुरुषाणां महानारायणाख्येन विषगर्भतैलेन वाभ्यङ्गः श्रेयष्करो भवति। ये चास्थिमात्रावशेषा अत्यन्तदुर्बलाः बालकाः सन्ति; तेषां सूर्यातपे महालाक्षादितैलस्याभ्यङ्गोऽतीवलाभकरं भवति।

सूर्यव्यायामः

प्रातर्निर्वातप्रदेशे विवस्त्रो भूत्वा भगवतः सूर्यस्यातपे चोपविश्य यथेच्छमातपः सेवनीयः। तत्र च देहाङ्गानां मर्दनं तैलेन सद्यः स्फूर्तेर्मनोबलस्य कान्तेश्च वर्धकं भवति।

नस्यविधिः

वातामये सायं, पित्ते च मध्याह्ने कफप्रकोपे च प्रातरेव सर्षपतैलं शिरसि नासिकया नित्यमेवोपयोज्यम्। अनेन सततोत्पन्ना शिरोव्यथा प्रतिष्यायश्च (जुखाम) समूलं नश्यति। एवं सायं कर्णयोरपि तैलस्य पूरणेन कर्णामयाः नोत्पन्ना भवन्ति।

स्नानम्

दन्तधावनपूर्वकं स्नानं नित्यमेवोचितम्। केषांचित् शीतापां स्पर्शमात्रेण दशनेषु मार्मिकी व्यथा समुत्पन्ना भवति, तदपनोदाय मानवैः सैन्धवलवणाक्तेन सर्षपतैलेन दन्तशोधनं नित्यमेव कर्तव्यम्। अनेन शीतबाधा शनैः २ दूरीभविष्यति। प्रायः बहुशो जनाः शीतोदकेनैव प्रत्यहं स्नानमाचरन्ति तेषां तच्च सात्म्यमपि भवति। किं च केचन मृदुप्रकृतिभाजो मानवाः शीतजलस्पर्शमात्रेणैव बिभ्यति तेषामुष्णोदकमेव स्नानाय हितकरम्। किंच स्नानकाले शिरसि नोष्णोदकं पातयेत् दृष्टेर्मांद्यभयात्। यदुक्तं चापि "शिरः स्नानमचक्षुष्यमत्युष्णेनाम्बुना सदा" (भावप्रकाशः)।

भोजनम्

ऋत्वनुकूलानामहारविहारादीनां सम्यक् निषेवणेनैव मानवानां शक्तिसंचयो भवति। शीतकाले घृतदुग्धादिनिर्मित पौष्टिकामन्नं तथा बलवर्धकं नानौषधिसेवनमतीवावश्यकम्। यथा—चन्द्रोदयवसन्तमालतीवसन्तकुसुमाकर—लौहाभ्रामृतभल्लातकनारसिंहचूर्ण—च्यवनप्राश-ब्राह्मरसायनादीनां दीव्यौषधीनां सेवनेनैव धर्मार्थकामानां सम्पादने प्रभवन्ति जना नान्यथा।

शीतप्रधाने समयेऽस्मिन् बाह्यशीतेनावरुद्धो जाठराग्निः स्वयमेव विवृद्धो भवति, तथा शीतकालिकी निशापि दीर्घतमा भवति, अतः कारणद्वयेन प्रातरेव प्राणिनो बुभुक्षया पीड्यन्ते। तैर्यदि किमपि स्निग्धान्नं नो लभ्येत तदासौ प्रवृद्धो जाठराग्निः रसादिधातून् परिपाचयन् शरीरं शोषयति, शरीरे च विशुष्यमाणे नानाव्याधयः समुत्पन्नाः भवन्ति।

प्रातर्भोजनेषु नव्यगोधूमघृतमाषशर्करादिभिर्मोदकानि निर्माय भोज्यानि। साधारणजनास्तु घृताभावे सर्वाण्यपि भोज्यवस्तूनि तैलनिर्मितान्येवादन्ति, तच्च तेषां रुचिकरं शीतनिवारणायालं भवति। मुद्गमाषमकुष्ठकपिष्टीनांस्तैलभर्जिता बर्बरा (बड़ा, पकोड़ी) सदा पुष्टिकराः रुचिकरा वा भवन्ति। श्वेतकृष्णतिलगुड़मिश्रितानां मोदकानां सेवनेनासक्लघुशंकानिवारणं जायते। येषां च पाचकाग्निः भुक्ताहारं सम्यक् पाचयति ते च वज्रान्नं (बाजरा) सेवन्ते। ग्रामेषु बहुशो जनाः बज्रान्नलप्सिका (दलिया) तैलेन गुडेन च सह सेवन्ते, लप्सिकेयं रुचिकरा शीतापहारिणी च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथमिव जीवनं साहित्यमन्तरा
अथवा
को वै सम्बन्धः जीवनसाहित्ययोः

ले० श्रीराधेश्याममिश्रः भू० पू० प्राचार्यः, महाविद्यालयः, नवलगढः, रामगढः,

पूर्वानुवृत्तम्—

यद्यत्रेशस्थाने 'समाज' (समष्टि) शब्दः प्रयुज्येत, तर्हि सकलः "सोशलिज्म" सिद्धान्तः स्वयं समायाति। व्यष्टिस्तु (व्यक्ति) समेष्टकक मनुच्छेद्यमंगम्। अतः परमेश्वरार्थं संघार्थं वा वस्तूनामुपभोगः, कतव्यं कर्म च कर्तव्यम्। यदेव उपभोगवस्तु प्राप्तं स्यात् तदुपभोगः अर्थगृध्रभावनयाऽकृत्वा केवलं तावदेव ग्राह्यं यावता शरीरयात्रा, कुटुम्बपालनम् संसारयात्रा च निर्वहेत्। सर्वे वयं व्यष्टिरूपेण समष्टेः (समाजस्य) अङ्गानि, उपभोगवस्तूनि च परमेश्वरस्यैव सन्तीति भावना सर्वासां व्यष्टीनां (व्यक्तीनाम्) हृदयेषु संगता भवेत्। एतेन ये च बहवो दुर्गुणा राष्ट्रं कलुषीकुर्वन्ति ते स्वयममेव विलोप्स्यन्ते।

मध्यकालीनग्रन्थेष्वपि जोवनचर्चोपलभ्यते। यथा हि—साहित्यसंगीतकलाभिरेव पुरुषस्य पुरुषत्वम्, अन्यथा पशुत्वम्। यद्यपि तादृशः पुरुषविशेषो विचित्र एव शृङ्गविहीनत्वात् तृणभक्षणाभावाच्च। यतः शृङ्गित्वं तृणखादनञ्च पशुष्वेव दृश्यते।

अन्यच्च,—काव्यशास्त्रविनोदेन
कालो गच्छति धीमताम्।
व्यसनेन च मूर्खाणाम्
निद्रया कलहेन वा॥

अर्थात्, पण्डिताः काव्यशास्त्राध्ययनेनैव कालं यापयन्ति, मूर्खास्तु रिक्तेषु कालेषु कुम्भकर्णवत् स्वपन्ति, अथवा कलहायमानाः प्रतिवेशिनं क्लेशयन्ति।

अस्मिन् संदर्भे किमप्यन्यदपि स्मरणीयम्, यद्धि अग्रिमचर्चामवतारयति।

कस्यापि विशिष्टसाहित्यमर्मज्ञस्योक्तिरधोऽङ्किता रोचेत—

सवासनानां सभ्यानाम्
रसस्यास्वादनं भवेत्।
निर्वासनास्तु रङ्गान्तः-
काष्ठकुड्याश्मसन्निभाः॥

अर्थात्, तादृशा एव पुरुषाः रङ्गमञ्चेषु अभिनीतानाम् अभिनयानाम् आनन्दम् अनुभवितुं समर्थाः, यादृशानां हृदयानि सुसंस्कृतानि सन्ति। अन्ये तु असंस्कृतहृदया अशिक्षितमनस्कास्तत्र रङ्गस्थिता अपि काष्ठकुड्याश्मवत् अभिनयानन्दरसानभिज्ञाः केवलं कोलाहलकारिणः जनसमुदायवर्धकाः। रङ्गशोभा तु सवासनैः सभ्यैरेव वधते न तु मूर्खैः।

एवं सुसंस्कृता एव पुरुषा जीवनपदसार्थकाः।

साहित्यशब्दस्य व्याख्या विवेचनं वातीवगहनो विषयः। पाश्चात्यपण्डितै रेतदर्थं

कदाचित् ऋतुसन्धिषु ऋतुवैषम्याद्वा कासश्वासप्रतिष्यायपार्श्वशूलज्वरादयो विविधा रोगाः प्रादुर्भवन्ति। तत्र गृहस्थवस्त्रादिवस्तूनां पानयोग्यस्य जलस्य वायोरपि शुद्धिः परमावश्यकी स्यात्। निम्बपत्रगन्धकरालगुग्गुलादीनां धूपदानेन वातमण्डलं निर्दोषं भवति।

समयेऽस्मिन् कटुतिक्तकषायाणि वातलान्यन्नपानानि च सदा परिहर्तव्यानीति सर्वं भद्रं भूयात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"लिटरेचर" (Literature) शब्दः प्रयुज्यते। स तु अन्यानपि विषयान् स्वार्थे समावेशयति। यथा हि मेडिकल लिटरचर साइंटिफिक लिटरेचरेत्यादि। भारतीयभाषासु चैवमेव दृश्यते। विज्ञानसाहित्यं दर्शनसाहित्यमित्यादि-प्रयोगा दृष्टिगोचरा भवन्ति। एतादृशाः प्रयोगाः संगता असंगता वेति निम्नभागे विविच्यते! संस्कृतभाषायामथवागीर्वाणवाङ्मये कास्ति परम्परा इति निश्चेतुं प्रयत्यते।

गीर्वाणवाण्यां साहित्यं कवीनां कृतिषु काव्यसमालोचनग्रन्थेषु च प्रयुज्यते। यतः काव्य-साहित्यञ्चेति समानार्थकम्। कवेर्भावः काव्य-मिति कवयो यदेव स्वकृति-रूपेण प्रस्तूयन्ते तदेव काव्यं साहित्यं वा। हिन्दीभाषायां तु आङ्ग्ल-वदनेकविषयार्थेषु प्रयुज्यते। सर्वं वाङ्मयं तावत् साहित्यपरिधौ समायाति। संस्कृते त्वेदर्थे शास्त्रशब्दः प्रयुज्यते। बहवो विद्वांसः साहित्यशब्दस्यैवं व्युत्पत्तिं कुर्वन्ति, "हितेन सहितं सहितम् तस्य भावः साहित्यम् इति"। यदेवास्ति हितप्रतिपादकं भाषायां तदेव साहित्यं भवति। अत्रास्य निबन्धस्य कर्तुरन्य एव विचारः। नायं विस्तृतार्थो युज्यते। तान्येव वाक्यानि वाक्यांशा वा साहित्य कोटिमारोहन्ति यानि नवरसरुचिराणि स्युः। काव्यकर्तुर्-वाणी तथा चमत्कृतिसमुत्पादिका भवेत्, यथा श्रोतुर्हृदये ब्रह्मानन्दसहोदरमानन्दमनुभाव-येत्। एवंभूतेषु गद्येषु पद्येषु वाऽनिवार्यतो रससिञ्चनम् स्वाभाविकम्। विभिन्नप्रकारेण विविधास्ववस्थासु शब्दाः वाक्यानि वाक्यांशा वा कवेर्हृदयान्निःसृताः श्रोतुर्हृदये समाविश्या-नन्दानुभूतिं सम्पादयन्ति।

गीर्वाणवाणी धुरन्धराः विद्वांसः ऐतिहा-सिकपरम्परानुसारेणापि काव्यं साहित्यं वा विभिन्नलक्षणैर्लक्षितवन्तः। साहित्यदर्पण-कारो वाक्यं 'रसात्मकं काव्यमिति' रससिञ्चितं रसरुचिरं वाक्यमेव काव्यकोटिमारोहयति। काव्यप्रकाशकारो मम्मटः, रसगङ्गाधरप्रणेता पण्डितराजो जगन्नाथश्चाप्येवमेवैनमामनन्ति किञ्चिद्भेदबुद्ध्या किञ्चित्परिवर्तनेन। अत्र तु किमस्ति साहित्यमित्येव प्रतिपादयितुं यत्नः क्रियते।

काव्यप्रकाशस्यादौ मङ्गलाचरणरूपे यन्म-म्मटेन भणितं तदाशयस्त्वेवमस्ति। कवेर्भारती अर्थात् कृतिसम्पन्ना वाणी विजयताम् सर्वत्र विजयं प्राप्नुयात्। सुसंस्कृतहृदयेषु ब्रह्मानन्द-सहोदरानन्द सञ्चार्य रससिञ्चनं कृत्वा सार्व-भौमां सुख्यातिमाप्नुयात्। कथं केन प्रकारेण वा एवं भूयादित्येव कारणं ब्रूते मम्मटः। यद्धि सा वाणी तथानन्दमनुभावयति चम-त्कृतिमनुशीलयति यथा नियमश्रृङ्खलाबद्धा दिव्या प्रकृतिरपि दर्शयितुमनुभावयितुमशक्या। प्रकृतिदेव्याः प्रभावस्तु कदाचिद् विकृतिमपि उत्पादयति, क्षोभमप्यनुभावयेत्। कवेर्भारती तु केवलं विशुद्धं ह्याह्लादमेव पर्यवसाने जन-यति। अपि तु कवेर्वाणी सर्वतन्त्रस्वतन्त्रीभूय न कापि निगडैर्बद्धा स्वाधीनव्यवहारा सर्वान्तः श्रेयः प्रेयश्च अभिवर्षति। नवरसात्मिका अव-साने विशुद्धानन्दप्रदा न कापि तादृशी दिव्या विधातुः सृष्टौ दृष्टा यादृशी कविभारती। पद्यं तु अधः —

"नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपर-तन्त्राम्। नवरसरुचिरां निर्वृतिमादधती भारती कवेर्जयति"।

त्रिगुणमयी ब्रह्मणः सृष्टिः। कवेस्तु नव-रसमयी। सर्वं च वाङ्मयं नवरसविभाव-स्थायिभावादीनामेव व्यक्तं रूपम्, तत्कस्याञ्चि-देव भाषायामभिव्यक्तं स्यात्। यतो भाषा तु भावाभिव्यक्तेः साधनमात्रम्। तस्या अनेक-विभिन्नदेशकालपात्राण्यनुसृत्यानेकानि रूपाणि भवितुमर्हन्ति। यद्येष सिद्धान्तः सर्वसामान्यो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवेत् तर्हि यत्किमपि मानवचेतनाऽथवा चेतनाभिव्यक्तं स्यात्—शब्देषु संकेतेषु वा तत् सर्वमनुबन्धिलक्षणलक्षितं साहित्यशब्दार्थान्तःपाति एव। स्वत एव च तस्य जीवनेन स्वाभाविकस्तात्त्विकश्च सम्बद्धः सिध्येत्। स चान्योन्याश्रयः स्यात्। इत्येवमत्र साहित्यावतरणिकायाः समस्यापूर्ति विधातुं रसनिरूपणमावश्यकं भवति। तेन प्रायश्चतुर्दशशताब्दीस्थस्य विदुषो विश्वनाथस्य शारदादेशवास्तव्यस्य कैय्यटसहोदरस्य मम्मटस्य चोक्ती संगते भवताम्।

अथ को नाम रसः ? अस्य वस्तुतो रूपमन्वेष्टुञ्चेतना विज्ञानमाश्रयणीयं भवति। अस्य विज्ञानस्य तु विभिन्ने स्रोतसी पूर्वीयपाश्चात्यभेदतः। पाश्चात्यमनोविज्ञानं साइकॉलॉजीति नामधेयमनेकेषु अन्यतममं विज्ञानम्। अन्यादृश एवास्याविष्कारविकासयोः प्रकारसञ्चारश्च। पाश्चात्यवैज्ञानिकैर्मानवहृदयं मनोमस्तिष्कञ्च प्रकृतिदेव्या कृतानि यन्त्राणि इति मत्वा सर्वो विज्ञानवादो रचितः। कियती सिद्धिः प्राप्ता तैरिति अद्यावधि विवादास्पदम्।

भारतीयमनीषिभिस्तु अस्मिन् विषये यत्किमपि अनुसंधानं व्यधायि तन्नास्ति बाह्यदृष्टेः फलं नापि केवलं बुद्धिवैभवस्य तर्कवितर्कप्रकारस्य। यन्नास्ति प्रत्यक्षं तत्परोक्षम्। परोक्षस्यापि भारतीयैरपरोक्षीकृत्यानुभूतिः सम्पादिता। पाश्चात्यमनोविज्ञानस्य तु अन्तःसमीक्षावधिर्यत्नः। भारतीयपरम्परायां तु ततोऽप्यूर्ध्वतरा गतिरासीत्। बुद्धिपर्यन्तं तु जडात्मिकायाः प्रकृतेः साम्राज्यम्। तत ऊर्ध्वं चेतनायाः। तस्यास्तु निस्सीममनन्तं साम्राज्यम्।

मनसस्तिस्रोऽवस्थाः पाश्चात्यैर्निर्धारिताः। प्रथमा चिन्तनशीला, द्वितीया भावनामयी तृतीया च संकल्पात्मिका इच्छाशक्तिः। एतास्तिस्रोऽन्योन्यप्राधान्येन सम्मिश्र्यैव चेतनातत्वस्याभिव्यक्तिं सम्पादयन्ति। रसानुभूतिस्तु भावनावृत्तेः प्राधान्यावस्थायामेव। कश्चन प्रवीणः साहित्यकारः हृदि रसमनुभूय शब्दैरभिनयैर्वा मूर्तरूपेण अभिव्यज्य सवासनिकान् श्रोतॄन् दर्शकान् वा तमेव रसमनुभावयति तेषां मनांसि रञ्जयति च।

संस्कृतसाहित्ये रसाश्च नव, शृङ्गारो-हास्यं करुणा रौद्रो वीरो भयानको बीभत्सोऽद्भुतः शान्त इति। एते चान्योन्यसाहाय्येनैव मनोरञ्जनकारणम्। एतेषामनुभूतिश्च बाह्यचेष्टानामपि कारणं स्यात्। ताभिरेव कोपि रसः स्थायिभावमधितिष्ठति। तासां चेष्टानां नामानि तु यथाक्रमं रतिश्चित्तविकारश्चित्तवैकल्यं क्रोध उत्साहो भयं जुगुप्सा विस्मयः शान्तिश्चेति। एते प्रतिदिनं साधारणतयानुभूयन्ते। काव्यात्मिके साहित्ये तु आलम्बनविभावस्थायिभावानुभावैरखिले वाङ्मये वर्तमाना लोकान् रञ्जयन्ति। रञ्जनानुकूलव्यापारोपि एतेषां परिष्कृतसंस्कृत्यानुबद्धा। अन्यथा रसाभासापत्तिः स्यात्। सभ्यगणास्तु रसाभासमसहमाना नासाभ्रूसंकोचात्मिकां मुखविकृतिं दर्शयन्ति।

एवं संक्षेपेण साहित्यशब्दः काव्य एव प्रयुज्यमानो दृश्यते। अन्ये विषयाः धर्माश्च विज्ञानोद्योगादयः कथं साहित्यशब्दभाजः भवितुमर्हन्ति इति प्रमाणीकर्तुं नवरसानां मर्यादा प्रसारणं स्यात्। तच्च तेषां लक्षणानां व्यापकत्व एव सम्भावितुं शक्यते। यतोऽन्येपि तदन्तःपातिनो भवेयुः। गीर्वाणवाण्यामेतत्सर्वं सम्भावनीयं ह्येतस्याः संसारे सर्वासु भाषासु अतितमं लावण्यमयत्वात् सर्वग्राह्यगुणत्वाच्च (elasticity)। एवं सत्येव साहित्यस्य जीवनेन सम्बन्धो नु पूर्णतया घटते।

क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिपासाया मरुभूमौ महाकविः शेली

मूललेखकः–श्रीइलाचन्द्रजोशीमहाभागः, अनुवादकः–विद्याभूषणः श्रीगणेशरामशर्मा, डूंगरपुरम्

पूर्वानुवृत्तम्—

एकस्मिन्नेव सप्ताभ्यन्तरे तावेतौ तस्मादेकान्तवासादपरज्यमानावास्ताम्, तावदेवैकस्मिन्दिने पुनः कश्चिन्महताऽऽघातेन द्वारं ताडयामास। शेली साश्चर्यं प्रसन्नतया च ददर्श यत् स खल्वागन्तुकस्तस्य विश्वविद्यालयस्य सहाध्यायी, बालमित्रं, घनिष्ठसुहृद्–हॉगनामा जनोऽभूद्योहि तस्यैव नास्तिकवादसम्बन्धिन्याः पुस्तिकायाः पक्षसमर्थने भाषणाद्धेतोः सः स्वयमिव विश्व–विद्यालयान्निर्वासितो बभूव।

हॉगमहाशयस्य तत्रागमनात्तस्यैकान्तवासस्योद्विग्नताया वातावरणं सहसा सर्वथा पर्यवर्तत। द्वावपि तौ सुहृदौ नानाविषयेषु सुखदुःखयोर्वार्तालापांश्चक्रतुः साकमेव तौ शेलिकवे र्भाविनीषु योजनासु, नवीनासु काव्य–रचनासु, नव्येषु भावेषु तथा च विवाहप्रकरणादुद्भूतासु सद्योजातासु समस्यासु वादविवादानाचेरतुः। मध्ये–मध्ये यदा तावुद्विग्नावभूतां तदा हैरियटबाला कस्यचिन्नवीनस्योपन्यासपुस्तकस्य, कथाया वा पठनं कृत्वा श्रावणायाकथ्यत। सा च परमया तत्परतया तत्पठनमारभते स्म।

हॉगमहाशयः प्रायेण सतृष्णया सलालसया च दृशा हैरियटबालायाः सुन्दरीं मुखाकृतिं प्रति निर्निमेषं पश्यति स्म। क्षणे-क्षणे स तस्या अतितरां श्लाघां कुर्वाणो विविधोपचारैस्तां प्रसादयितुमचेष्टत। अथैकस्मिन् दिने सोऽवसरमाप्य हैरियटबालामवरुरोध तथा तस्याः पुरतोऽतीवभावपूर्णैः शब्दैः प्रणय–निवेदनं कृतवान्। स हि हैरियटबालां सानुनयविनयं प्रतारयन्नुवाच–"यदि चावयो र्द्वयोर्मिथः प्रणयभावं शेली परिचिनुयादपि, तदा तेन स नो मनागपि विमनायेत। स हि मुक्तप्रणयस्योपासको वर्तते। स मामेकवारमकथयत्—'तव च मम च सम्पत्तौ नास्त्येव किमप्यन्तरं नाम। आवां द्वावपि तस्याः सम्मिलित–सम्पत्तेः समानौ भागभाजावास्वहे'। स मया पृष्टोऽभूद्यत् कस्याश्चापि प्रणयपात्र्याश्चाप्यावयोः समानोऽधिकारः स्यात् ? सोऽवदत्—'निश्चयमेव, यतः सम्पत्ताविव कस्यामपि प्रणयपात्र्यामपि न कस्याप्येकाधिकारो भवितुमर्हति। स एष मन्त्रो मया वास्तविकात् स्वगुरोर्गाडविनमहोदयाच्छिक्षितोऽस्ति" ।

हॉगस्यैवं विधा वार्ताः समाकर्ण्य हैरियटसुन्दरी अतीवाश्चर्योद्भ्रान्ता बभूव। साऽपरिपक्ववयस्का बालाऽऽसीत्तथा शेलिकवेर्घनिष्ठेनैकेन मित्रेणानायासं प्रतारिताऽभविष्यत्, परमधुनापर्यन्तं तस्याः प्राचीनसंस्काराणां मूलाधारो द्रढीयानविचलश्चाभूत्। ततः सा कथमपि चाक्षुण्णाऽविचलाऽस्खलिता च संतस्थे। सा हॉगमहाशयं माधुर्येण भर्त्सयामास। ततः प्राप्तावसरं सा ता इमाः सर्वा वार्ताः शेलिनं सुस्पष्टं कथयामास। श्रुत्वा च शेली नन्वाकाशाद् भूतलेऽवाङ्मुखं निपपातेवोद्भ्रान्तः संतस्थे। सोऽन्येद्युरेव हॉगमहाशयं शिष्टैः शब्दैः किन्तु दृढतयाऽवादोद्यत्तस्य (हॉगस्य) अधुना तत्र ताभ्यां जम्पतिभ्यां सहावस्थानं न सम्भवतीति।

हॉगमहाशयश्चेखिद्यमानः स्वीचकार यद्धि सौन्दर्यं प्रति तन्मनसि महामोहो विजृम्भते तथा च स हैरियटबालाया अपूर्वं सौन्दर्यं निरीक्ष्य धैर्यं रक्षितुं न शेक इति। शेली तमुवाच—"अहं तु तद्दिने मुक्त–प्रणयस्य चर्चा–प्रसङ्गे केवलं गाडविनमहोदयस्य सिद्धान्तस्य चर्चामकरवम् यद्धि कस्यामपि प्रेयस्यां कस्यापि च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रणयिनो नन्वेकाधिपत्यं भवितुं नार्हति—न देहदृशा न च साम्पत्तिक्या दृष्ट्या। परन्तु तत् त्वं मम व्यक्तिगतं मतं मत्वा तथा च तच्छाद्मिके रूपे गृहीत्वा मे सद्यो विवाहितां पत्नीमपवञ्चयितुमारभथाः। त्वमेतत्सीमावधि-अधः पतितुं शक्नोषि, नाहमस्य कल्पनामपि चकार। तथापि त्वामहं क्षमे। परमिदानीं तेऽत्रावस्थानं भयङ्करमस्ति। यदि च त्वमत्र शांतवृत्त्यापि तिष्ठेस्तदापि हैरियटसुन्दर्या उपस्थितौ ते कामजन्यो मोहस्त्वामन्तरन्तः प्रज्वाल्य भस्मसात्प्रकुर्वीत। अतस्त्वं तत्कालमेवापगच्छ"।

ततस्तौ दम्पती कानिचिद्दिनानि-एडिनबरास्थाने उषित्वा यार्कनगरमाजग्मतुः। अत्रागतः शेली जजान यत् तत्पिता टिमोथीशेली तस्मा अत्यन्तं क्रुद्धोऽस्ति। स हि शेलिनो विश्वविद्यालयाद् बहिष्काराद्धेतोस्तस्मै पूर्वत एव प्रकुपितोऽभूदधुना च तदिच्छाविरुद्धं हैरियटनाम्न्या 'एकया हीनकुलोत्पन्नया बालिकया' साकं स्वपुत्रस्य विवाहोदन्तं श्रुत्वा स भूयस्तरां चुक्रोध। टिमोथीशेलो स्वात्मजं स्वसंरक्षणात् सर्वथापवञ्चयामास। शतद्वयपौण्डमुद्रामितं यं हि वार्षिकं धनराशिं स तस्मै प्रहिणोति स्म, तमपि स्थगितं चकार। शेली चेतस्ततः कुसीदस्यातीवोच्चमूल्येन यस्मात्कस्मादपि चाधमर्णत्वेन धनमाददानोऽभूत्। तस्यार्थिकी चिन्ता बतेत्थं प्रबलतां जगाम, यदन्याः सर्वाः समस्याः खलु गौणा बभूवुः। अस्मिन् भ्रष्टाचारग्रस्ते संसारे स्वात्म-मुक्तौ, स्वतन्त्रे चिन्तने, प्राकृतिकानन्दे च निर्बाधं विचरणं सहजतया न सम्भवति—अस्यानुभवस्याघातः सर्वादौ शेलिकविना विंशतिवर्षात्मके स्वायुषि समन्वभूयत।

सत्यप्येवं पञ्जरबद्धस्य पक्षिणः कल्पनायाः प्रोच्चैरुड्डयने मनागपि न्यूनता न बभूव। सः स्वकीयं 'क्वीन मैब' इत्याख्यं सुप्रसिद्धं काव्यं प्रणयंस्तस्थौ। काव्येऽस्मिन्-शेली भूतकाले, वर्तमाने च मानवताया दुर्गतेः कारणानि निरूपयन्, भविष्यति सः (मानवः) कथमिव, केन वा प्रकारेण सत्यज्ञानस्य विकाशेन साकं प्रकृत्यास्तादात्म्यद्वारा पूर्णत्वं प्राप्तुं शक्नुयादिति तथ्यमिदं प्रति सङ्केतं कृतवान्। अस्मिन् काव्ये स धार्मिकीं सङ्कीर्णतामेव मनुष्यस्य सर्वासामपूर्णतानां, दोषाणां च निदानं निरूपयामास। स तत्र कथयति यदा मनुष्यः सङ्कीर्णधर्मस्य स्थाने प्रकृतेर्मूलात्मनः शासनं स्वीकुर्वीत, तदैव सः स्वात्म-विकाशस्य वास्तविकं लक्ष्यं प्राप्तुं शक्नुयात्। शेलिकवेरस्मिन् प्रथमप्रकाशिते काव्ये नवयौवनस्योद्दामोत्साहाद् वर्धमाना अतीव तीक्ष्णाः, प्रगतिशीलाः क्रान्तिकारिणश्च विचाराः समुपलभ्यन्ते। मुक्तप्रणयं प्रति सङ्केतोऽन्यत्र काव्ये वर्तते तथा वैवाहिकं बन्धनं शेली मनुष्यस्य मुक्तात्मानं प्रति सामाजिकमत्याचारं मेने। स हि पुरुषाणामिव स्त्रीभ्योऽपि च पूर्णाधिकारप्रदाने बलमर्पयति।

विवाहानन्तरं वर्षादपि न्यूने समये हैरियटबाला माता-जननी-बभूव। सा बालिकामेकां सुषुवे। तस्याः साहित्यिकं नामकरणं कृतम्—इयान्थे।

अथ मातृत्वानन्तरं हैरियटबालायाः स्वभावे परिवर्तनमभूद्यद्धि कियत्सीमावधि स्वाभाविकं बभूव। परन्तु तस्यामस्वाभाविकतापि चोत्पेदे। सत्यपि शेलिकवे र्बह्वाग्रहे सा तां बालिकां स्वयं स्तन्यं पाययितुम् न्यषेधीत्। तस्मिन् युगे तदिदमेकं नवीनं तथ्यमासीत्। मन्थरारूपिणी-एलिजा तां निर्दिदेश यत् (कारिते हि स्तन्यपाने) सा गलितयौवना वृद्धा च भवेच्छेली च तां प्रति प्रणयाचरणं परित्यजेदिति। एलिजाया एव परामर्शात्—हैरियटबाला मातृत्वादनन्तरं शृङ्गारसज्जाप्रसाधने पूर्वतोऽप्यधिकं समयमुपयुयोज तथा नवीनप्रचलनस्य वस्त्राणि परिधातुमारेभे, येन सा कुमारिकाभ्योऽप्यतितरां सद्यो नवयौवनवतीव प्रतीयेत।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हैरियटबालायाः सम्बन्धे शेलिकवेः खिन्नताभाव इत एवारभ्यते । स हि हैरियटबालायै तावन्न चुक्रोध यावदेलिजायै । स खलु पश्यन्नासीद्यदेलिजा घोरया सांसारिकया स्वार्थबुद्धचा प्रेरिता भूत्वा सरलस्वभावाया एकस्याः कल्याण्या नवकिशोर्या मस्तिष्के विकृतीः परिपूरयन्ती वर्तत इति । शेली तदिदमपि च पश्यन्नभूद्यद्धि हैरियटबाला तस्य प्रणय-स्निग्धेनानुशासनेन परिचालिता न भूत्वा-एलिजाया कूटबुद्धचानुशासिता भवतीति ।

अथ १८१४ ई० वर्षस्य मार्चमासे शेली हॉगमहाशयं लिलेख यत् स एलिजायाः कूटैः प्रपञ्चैश्चेखिद्यमानोऽस्ति तथा स तां प्रति निःसीमं घृणाभावं कर्तुमारेभ इति । स हैरियटबालाया विषये किमपि नोल्लिलेख ।

कियद्भ्यच एव दिनेभ्योऽनन्तरं शेली तामिमां सूचनां लेभे यद्यो हि धर्माचार्यः पुरोधास्तस्य विवाहस्य राजेष्टिमकारयत्तस्मा अधिकारपत्रं च प्रददौ, सः समाजबहिष्कृतोऽस्ति, तथा तद्विरुद्धं कोऽप्यभियोगः प्रचलन् विद्यत इति । शेली चिन्ताकुलो बभूव, यन्नकदाचित्तस्य विवाहो न्यायविधिविधानद्वारा निरस्तो विधीयेत तथा सति तत्सन्ततयो दुःखमनुभवेयुरिति । वैवाहिक्याः प्रथाया विरोधो सोऽयं तरुण-कविः शेली-अधुना पर्याप्तं सांसारिको बभूव । स हि लन्दननगरे पुनर्विवाहस्याधिकारपत्रं प्राप्तंचक्रे ।

परमेकतस्तु सः पुनः स्वविवाहं दृढतरमकारयत् तथाऽन्यतो हैरियटबालातस्तस्य मनोऽपरज्यमानमासीत् । दम्पत्योस्तयोर्द्वयोः प्रागिव नेदानीं मुक्तरूपेण वार्तालापाश्चापि भवन्ति स्म । एको जनोऽन्यं प्रति, कामचेष्टायास्तु का कथा, सामान्यामपि वार्ताम् वक्तुं न प्रभवति स्म । वृद्धा नायिकेव एलिजा हैरियटबालां तदिदमशिक्षयद् यत् सा शेलिकविं प्रत्युन्मुक्तभावं न सम्भाषेत, तदैव स तस्या वशमागच्छेदिति ।

मुग्धा हैरियटबाला विनाशकूपगर्तस्य समीपमेवोपतिष्ठन्ती समभूत्तथापि सा यथार्थतामवगन्तुं न पारयामास । सा चिन्तयन्ती समभूद्यत्तदिदं दम्पत्योर्मिथोऽस्थायि मनोमालिन्यमास्ते तथा शीघ्रमेव हि स्थितिः स्वयमेवानुकूला स्यादिति ।

क्रमशः

गिरने से पहले उनकी रक्षा करें

बालों और दांतों की नियमित देखभाल और उनका पोषण आवश्यक है। क्यों न फिर उनके गिरने से पहले उनकी रक्षा की जाय ? इसके लिए उदयपुर का गाय छाप ब्राह्मी आँवला तेल और काला दन्त-मन्जन सर्वोत्तम है। इन आयुर्वेदिक उत्पादनों से आपके बाल घने तथा लम्बे और आपके दाँत [illegible] मजबूत रहेंगे।

इलाज से बचाव बेहतर है!

[illegible]

गाय छाप

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



दीनानाथत्रिवेदी मधुपः, सहसम्पादकः

यदि संस्कृतं राष्ट्रभाषा स्यात्तदा तु भाषाविषयकाः सर्वेऽप्युपद्रवा न भवेयुः ।

गतदिवसेषु डा० श्रीसत्कारीमुखोपाध्याय-महोदयस्य वाराणसेय-संस्कृतविश्वविद्यालयस्य एकादशदीक्षान्तभाषणं दिल्लीस्थ-राज्यपाल-डा० एन० ए० झामहोदयेन पठितम् । तत्र भाषणे प्रोक्तमासीद्यत् संस्कृतमिदं सर्वासामपि भारतीयभाषाणां जननी वर्तते, परं दुर्भाग्यस्यास्त्ययं विषयो यदस्माकं देशस्य नेतारः संस्कृतं मृतभाषां मन्यन्ते । अत्र तथ्यमिदमस्ति यत्ते वस्तुतः संस्कृतं जानन्त्येव न यदियं सुरभाषा कियती समृद्धा भाषा वर्तत इति ।

किञ्च विश्वासोऽयमपि मिथ्यैव विद्यते यत् संस्कृतभाषा आंग्लभाषापेक्षयास्ति कठिनेति प्रत्युत आंग्लभाषापेक्षयैषा तु सरला वर्तते । यदि हिन्द्याः स्थाने संस्कृतभाषा राष्ट्रभाषापदमलमकरिष्यत् तर्हि भाषाविषयकं प्रश्नमुद्दिश्य जायमानाः विविधाः कलहा अपि नाभविष्यन्निति ।

त्रिचत्वारिंशत्तमे अखिलभारतीय—शिक्षा-सम्मेलने जयपुरे २९-१२-६८ दिने प्रातः ९ वादने

संस्कृत-सङ्गोष्ठी

चर्चा विषयः—"त्रिभाषासूत्रयोजनायां संस्कृतस्य स्थानम्"

अध्यक्षः—श्रीरामचन्द्रवामनकुम्भारे M. A. वनस्थली विद्यापीठे आचार्यः

संयोजकः—आचार्य-नारायणशास्त्री काङ्करः M. A. विद्यालङ्कारः जयपुर-राजकीयायुर्वेदमहाविद्यालये संस्कृतसाहित्य-विवेचकः

सचिवः—आचार्य-रामस्वरूपमिश्रः बाँदीकुई-स्थे राजकीयोत्तर-माध्यमिक-विद्यालये संस्कृतशिक्षकः

तत्र प्रारम्भे श्रीललिताकान्त-यशवन्त-चक्रदेव-महाशयेन कृते मङ्गलाचरणकर्मणि संयोजकमहोदयः अस्वास्थ्यवशाद् अनुपस्थितानां जयपुर-पारीककालेजे संस्कृतविभागाध्यक्षाणां कविशिरोमणि-पण्डितश्रीनवलकिशोर-काङ्कर महाभागानां पक्षात् सङ्गोष्ठ्यां सम्मिलितानां सभ्यानां कृते संस्कृतस्वागतपद्यानि संश्राव्य चर्चितव्य-विषये प्रास्ताविकं विशदं संस्कृते अभाषत ।

अथ तत्रोपस्थिताश्च सभ्याः चर्चाविषयं सुस्फीतं कुर्वाणाः त्रिभाषासूत्र-योजनायां विश्वजनोपकारिण्याः भारतीयसंस्कृतेः आधारशिला-संस्कृतभाषायाः कृते स्थानं प्रदातुं सयुक्तिकम् उपादेयताम् उपयोगितां च प्रतिपादितवन्तः ।

अन्ते च सर्वसम्मतया सोऽयं प्रस्तावः पारितः—

यतो हि भारतीय-संविधान-परिषदि पारिभाषिकशब्दानां निर्माणाय संस्कृतभाषा आधारभाषारूपे स्वीकृताऽस्ति—अतः भारतस्य प्रत्येक-राज्यीयभाषाभाषिणां कृते संस्कृतस्य पर्याप्त-सुष्ठु-ज्ञानोत्पादनाय विभिन्न-राज्यीय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिक्षासंस्थासु त्रिभाषीसूत्रयोजनायाम् आंग्ल-भाषा-स्थाने संस्कृतभाषा अनिवार्यतया अध्याप्येत इति अभिप्रेत्य—

अखिलभारतीयशिक्षाक्रमे त्रिभाषासूत्रम् अनुमन्वाना अपि शिक्षाऽऽयोगस्य प्रतिवेदनाभिमतम् अविरुध्य अपि च त्रिचत्वारिंशत्तम-नि० भारतीय शिक्षासम्मेलनान्तर्गता सेयं संस्कृत-सङ्गोष्ठी ऐकमत्येन शिक्षाविदः सर्वकारं च अनुरुणद्धि यत्—

"संस्कृतभाषा आंग्लभाषा-स्थाने द्वितीय-भाषा-रूपे अनिवार्यरूपेण माध्यमिकशिक्षायाः सर्वेष्वपि स्तरेषु सर्वत्र देशे पाठ्येत"-इति।

अन्ते सोपसंहार-वक्तव्यम्-अध्यक्ष-संयोजकाभ्यां वक्तृ-श्रोतृ-सदस्येभ्यः साभारं कृते धन्यवादार्पणे सङ्गोष्ठीयं सानन्दं निर्विघ्नतया व्यसृज्यत इति।

* श्रद्धाञ्जलयः *

वैद्यराज-**श्रीजयरामदास-स्वामि**महाभागानां सहसा स्वर्गमनेन तद्वियोगसन्तप्ततया **संस्कृतवाग्विवर्द्धिन्या** परिषदानया गत-दिसम्बरमासस्य २२ तारिकायां लक्ष्मणद्वारपीठाचार्याणां वैद्यश्रीनारायणप्रसादमहोदयानामाध्यक्ष्ये शोकसभैका समायोज्यत।

तत्र श्रीसुदेवचन्द्रपाराशरि-भट्टश्रीकलानाथ-शास्त्रि-श्रीनारायणशास्त्रिकाङ्कर-वैद्यवर-श्रीरामदयालुभिषगाचार्यप्रभृतिभिर्विद्वद्भिः स्वीयः काव्यमयस्तथा वैद्यश्रीमोहनलालशर्म—वैद्यश्री-मदनलालशर्मभ्यामपि गद्यमयः श्रद्धाञ्जलिर्दिवंगत-स्वामिवर्येभ्यः समर्पितः।

अस्मिन्नेवावसरे च राजस्थानसंस्कृतशिक्षा-निदेशक श्रीमाधवकृष्णशर्म-रा० वि० विद्यालय-भूतपूर्वोपकुलपति-द्रावतर- श्रीमथुरालालशर्म-श्रीमदिन्द्रलालशास्त्रिजैनमहोदयानां प्राप्ताः शोकसन्देशा अपि श्राविताः साम्प्रञ्च तेऽत्र प्रकाश्यन्ते—

श्रीसंस्कृतवाग्विवर्धिन्यां परिषदि शोकसभायां

— श्राविताः शोकसन्देशाः —

(१)

प्रियाः श्रीनारायणकाङ्कराः !,

श्रीमतां जयरामदासजी स्वामिमहोदयानां निधनं श्रुत्वाऽत्यन्तं खिन्नोऽहम्। या क्षतिरनेनेदानीं संस्कृतस्य विशेषतश्चायुर्वेदजगतः समुत्पन्ना सा चिरमपूर्णैव भविष्यति।

महदिदं दौर्भाग्यं यदधुना संस्कृतविद्वत्परम्परायां स्थानिवदादेशो न दृश्यते। श्रीस्वामिनामात्मशान्त्यर्थं जगदीशं प्रार्थये।

भवदीयः
माधवकृष्णशर्मा
२२-१२-६८

(२)

श्रीस्वामि — जयरामदासमहानुभावानां निधनवृत्तं श्रुत्वाहमतिदुःखमनुभवामि। आयुःपर्यन्तं तैर्लोकचिकित्सां कुर्वद्भिर्जनव्याधि-निवारणं कृतम्। तेषां दाक्ष्यं, पाण्डित्यं, परोपकारपरत्वं च न कदापि केषामपि विस्मर्त्तव्यम्। तेषां सद्गत्यर्थं शान्त्यर्थं च सर्वैरस्माभिः ईश्वरः प्रार्थयितव्यः।

मथुरालालशर्मा
२२-१२-६८

(३)

महामान्य-चिकित्सकशिरोमणि-वैद्यरत्न-स्वामि —श्रीजयरामदासमहोदयानामाकस्मिक-स्वर्गगतिं निशम्य चेतसि प्रबलशोकसन्दोहः समजनिष्ट। स्वामिमहापादा जयपुरस्यैव न किन्तु समग्रभारतदेशस्य अलङ्कारभूता आसन्। तेषामायुर्वेदविज्ञानेन वैदुष्येण च भारतीय-संस्कृते गौरवमासीत् परन्त्वद्य तद्विलुप्तमिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञायं ज्ञायमान्तरिकवेदना बोभवीति। स्वर्गत-महानुभावानामात्मनः शान्तिकृते भगवन्तं प्रार्थये—

इन्द्रलालशास्त्री जैनः
२२-१२-१६६८

※ स्वर्गं गतास्ते जयरामदासाः ※

वैद्यराज—श्रीनारायणाचार्यः,
लक्ष्मणद्वारपीठाधीशः, जयपुरम्

अधीत्य विद्यां गुरुसेवयाऽखिलां
ज्ञात्वा समस्तौषध-कल्पनाञ्च ।
कृत्वाऽतीतरुजो रोगचर्यादितान्
स्वर्गं गतास्ते जयरामदासाः ॥

श्रीलक्ष्मीराममाश्रित्य दादूदर्शितमार्गतः ।
संसिद्धिं परमां प्राप्ता जयरामा भिषग्वराः ॥

लब्धा गुरुप्रसादेन शास्त्रं प्राणप्रदं महत् ।
कृत्वा सूतेन्द्र संसिद्धिं सद्यः प्राणप्रदाः श्रुताः ॥

पाश्चात्त्यवात्या दुर्दर्शे प्राणशास्त्रेऽप्यपार्थके ।
स्वभासा चक्रिरे दीप्तं जयरामा जयन्तु ते ॥

रक्षोभल्लूकमर्काणां शक्त्या रामो यथाऽजयत् ।
रोगरक्षःपुरीं लङ्कां जयरामास्तथाऽभवन् ॥

यावच्छ्रीस्वामिपादानां कीर्तिः स्थास्यति भूतले ।
तावच्छ्रीजयरामाणां यशः साधु सुपूजितम् ॥

पुष्पाञ्जलिं सप्तपुष्पमर्पयामि मुदा सखे ।
चिरन्तिष्ठतु स्वान्ते ते शान्तिः स्वर्लोक विश्रुता ॥

—: जयरामो दिवङ्गतः :—

आचार्य-नारायणशास्त्री काङ्करः, एम. ए.,
विद्यालङ्कारः, जयपुरम्

स. द्विषष्ट्युत्तरैकोनविंशे वैक्रमवत्सरे ।
मार्गशीर्षे द्वितीयायामवतीर्याऽत्र भूतले ॥१॥

पञ्चविंशोत्तरे विंशे वैक्रमाब्दे बुधे भिषक् ।
पौषकृष्ण-चतुर्दश्यां **जयरामो** दिवङ्गतः ॥२॥

श्रीजयरामदासोऽद्य स्वामी वैद्यमणिः सुधीः ।
पुण्यात्मा धर्मवीरोऽयं कीर्त्तिकायेन जीवति ॥३॥

बाल्ये 'जीवन'-नामाऽसौ चतुःषष्ट्यब्द-जीवने ।
रुग्णेभ्यो जीवनं दत्त्वा साऽर्थं चक्रे स्वनामकम् ॥

कुलस्याऽर्थेऽशुभो बुद्धो विश्वस्याऽसौ शुभोऽभवत् ।
तदन्योऽजातशत्रुः कः प्रियकृत् प्राणिनां ध्रुवम् ॥५

संस्कृते संस्कृतौ सोऽयमायुर्वेदे च निष्ठितः ।
आसीत् पूर्णं समाजस्य कल्याणे चिन्तितः सदा ॥६

साहाय्यलिप्सु र्विपदा च दूनो
यः कोऽपि तस्याऽन्तिकमाजगाम ।
कायेन वाचा मनसा च शश्वद्
अपूरयत् सोऽपि तदीय-वाञ्छाम् ॥७॥

उदारचेता महनीयमानः
श्रद्धेयवाणी स बभूव वैद्यः ।
दूरङ्गतः क्वापि न दृश्यमानः
सन्तिष्ठतां सम्प्रति शान्तचेताः ॥८॥

पीयूषस्राविणी वाणी दृष्टिः स्नेहपरिप्लुता ।
मधुरं तस्य हास्यं च प्रत्यक्षमिव भासते ॥९॥

कायेन वाचा मनसा स्वधर्मं
निर्भीतिपूर्वं समपालयत् सः ।
अन्त्यक्षणे **दादुदयालुसिद्धं**
जपन् स्मरन्नेव दिवङ्गतोऽभूत् ॥१०॥

विहाय नोऽत्र त्रिदिवङ्गताय
स्वनामधन्याय सुरप्रियाय ।
चिकित्सक-**श्रीजयरामदास !**
दादेतु शान्तिं परमेश्वरस्ते ॥११॥

श्री-रामगञ्जे जयपत्तनस्य
सुमेरुकर्णाऽध्वनि वासकारी ।
श्रद्धाञ्जलिं सादरमद्य तुभ्यं
ददेति नारायणकाङ्करोऽम् ॥ १२ ॥

※ जयरामो दिवङ्गतः ※

वैद्यराज-पण्डि-श्रीसुदेवचन्द्रपाराशरी शास्त्री, जयपुरम्

(१)

श्रीमान् यशस्वी निर्वैरभावः
जैरामदासः वाचंयमोऽसौ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामाग्रगो रामाधारनिष्ठः,
मन्ता गुरोरातुर्यस्य हन्ता ॥
दानी ह्यमानी ज्ञानी प्रमाणी
सस्सम्मतः सम्वृद्धस्सभासु ।
स्वामी स नश्वाज्ञानान्धकारे
मीढुष्टमो ह्यायुर्वेदभासा ॥

(२)

कीर्तिमात्रावशेषोऽद्य धन्यस्स्वामी दिवङ्गतः ।
रामान्तलक्ष्मीतीर्थः सः जयरामो रामाग्रपः ॥

(३)

युक्तो धर्मपरस्साधोर्दादोस्साधुपथाग्रणीः ।
भूयसा श्रेयसा'जुष्टः पुष्टात्मा तुष्टमानसः ॥

(४)

यायजूको यतिर्योगी पुण्यायुर्भिषजां वरः ।
त्यक्तकिल्विषकैवल्यो जीवन्मुक्तिमुपाश्रितः ॥

(५)

शुभं सर्वस्य लोकस्य भद्रं मानवसन्ततेः ।
कृत्वा, दिवौकसां कर्तुं मन्ये, स्वामी दिवङ्गतः ॥

श्रीस्वामिमहाभागेभ्यः स्मरणाञ्जलिः

दे० श्रीकलानाथशास्त्री, साहित्याचार्यः, एम. ए.
(आंग्लसाहित्ये), सहायकनिदेशकः,
भाषाविभागे, राजस्थानशासनम्

घनाक्षरीः—

आसीद् यो हि वैद्यगणेष्वग्रणीः समस्तेष्वथ
विद्वद्वृन्दगोष्ठीष्वपि प्रामुख्येन संगतः ।
यस्य मधुरस्मितार्द्रं वचसश्चिकित्सामाऽऽप्य
जहति स्म रोगिणः समस्तां रुजमंगतः ।
स्वल्पीयसि वयसि त्वया स कवलीकृतोऽद्य
काल ! ते प्रकोपो'वद, कथमिव संगतः ?
क्षामीकृत आसीद् येन रोगगणः पृथ्व्यां सोऽपि
स्वामी जयरामदाससुकृती दिवंगतः ॥

शार्दूलविक्रीडितम् :—

येनाऽऽबाल्यमसेवि निर्मलधिया नित्यं हि गीर्वाणगी-
रत्रत्येषु समेषु पंडितकुलेष्वात्मीयता रक्षिता ।
दौर्भाग्यात्सुधियां हि संस्कृतगिरः, स्वर्गं समासेदुषे
वैद्य श्रीजयरामदासकृतिने तस्मै स्वधा स्वामिने ।

चरणप्रतिष्ठानम्

किञ्च जनवरीमासस्य ३ तारिकायां स्वर्गीय-श्रीजयरामदासस्वामिमहाभागानां चरणप्रतिष्ठापनमहोत्सवोऽपि स्व० श्रीलक्ष्मीरामोद्याने साधु समपद्यत ।

मध्याह्ने च स्वामिलक्ष्मीरामचिकित्सालये **वैद्यश्रीरामप्रकाशस्वामिना**मुत्तराधिकारिसंस्कारः सम्पन्नः समभूदिति शम्—

श्रद्धाञ्जलिः

मासेऽस्मिन् राजस्थानस्य भूतपूर्वराज्यपालस्य तथोत्तरप्रदेशस्य भू०पू० मुख्यमन्त्रिणो **डा० श्रीसम्पूर्णानन्दस्या**कस्मिकेन निधनेन संस्कृतसंसारे महतीं क्षतिमनुभवन् भारतीपरिवारो दिवं गताय द्रावतरमहानुभावाय श्रद्धाञ्जलिमर्पयन् परमात्मानञ्च प्रार्थयते यत् स दिवंगतात्मने तस्मै शाश्वतिकीं शान्तिं दद्यादिति—

—मधुपः

संस्कृतप्रचारपरिषदध्यक्षः
श्रीस्वामीजयरामदासमहाभागः

हा ! हन्त !! अस्माकं संस्कृतप्रचारपरिषदध्यक्षः संस्कृतसंस्कृतेरनन्यानुरागी सबलः समर्थकः प्रबलपोषकश्च विशुद्धायुर्वेदस्य च त्राताऽखिलवैद्यसमाजस्याग्रणीः श्रीस्वामिजयरामदासमहाभागोऽद्यास्मान् सर्वान् परित्यज्य परलोकगामी बभूव ।

आयुर्वेदस्योत्थानस्य प्रचारप्रसारयोश्च कर्मणि सातत्येन समनोयोगं चेष्टमानः स्वर्गीय-पूज्यस्वामिश्रीलक्ष्मीराममहाराजस्य कीर्तिकौमु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

११३५३९

दीमाधिवयेन समुद्योतयदेवायं महाभागः सहैव च संस्कृतसाहित्यस्य समुत्थानार्थं प्रचाराय प्रसाराय चापि सुमहत्कार्यमन्वतिष्ठत्। यदा हि महामहोपाध्यायः पण्डितश्रीगिरिधरशर्म-चतुर्वेदिमहाभागो जयपुरस्थ-महाराज-संस्कृत-महाविद्यालस्याध्यक्षपदे समासीन आसीत्। तदानीमितो जयपुरात् 'संस्कृत-रत्नाकरः' मासिकपत्रं यन्नियमितरूपेण प्राकाश्यमलभत तस्य नियमितरूपेण प्रकाशने चार्थिकसहयोग-प्रदाने तथा तस्य प्रचारप्रसारयोश्चास्य स्वामि-प्रवरस्यापूर्वः सहयोगोऽवर्तत। तस्यैवेदमभूत्फलं यत् स 'रत्नाकरः' जयपुरतः (राजस्थानात्) सर्वदेव स्ववेलामनतिक्रामन्नेव प्राकाश्यमलभत, परं बहोः कालात् पूर्वं विगते काशीस्थे संस्कृत-सम्मेलने वाराणसेयास्तथोत्तरप्रदेशस्य च केचन संस्कृतविद्वांसोऽकामयन्त यत्-रत्नाकरोऽयं काशीतः प्रकाशितो भवेदिति। ततश्च स्वल्पं कालं यावत् स तत एव प्रकाशितो भूत्वानन्तरञ्च कानपुरं तथा दिल्लीं गत्वा ग्राहकाणां समक्षमा-गच्छति।

किञ्च प्रारम्भादेव जयपुरनगरमिदं संस्कृ-तस्य प्रचारप्रसारयोः केन्द्रमवर्तत तथा चात्रात्याः संस्कृतस्य सुयोग्या महान्तो विद्वांसो लेखनकला-कुशला भगवत्यां सुरसरस्वत्यां बद्धादराश्चाप्य विद्यन्त। अत एवात्र संस्कृतपत्रस्याभावमव-लोक्य ते नितान्तं खिन्नमनस इव समजनिषत।

तथा च १९५० तमे ख्रिस्ताब्दे यदा मान-नीया उमाकान्तकेशव आप्टेमहोदया जयपुरमाग-तवन्तः, तदा नगरस्यास्य कतिचन विद्वांस आपटेमहाभागस्य समीपमागत्य—'संस्कृतपत्रमेकं जयपुरात् प्रकाशितमवश्यं भवेत्, तदर्थञ्चाव-श्यकः सर्वविधोऽपि सहयोगोऽस्माभि र्विधास्यते' इति स्वाभिप्रायं प्रकाशितवन्तः। तत्र च श्रीस्वामिमहाभागोऽयमासीदेव प्रमुखः। ततश्च 'स्वामिश्रीसुरजनदासमहोदयस्य सम्पादकत्वे पत्रिकायाः (भारत्याः) प्रकाशनं शीघ्रातिशीघ्र-मेव कर्तव्यम्' इत्येष निर्णयोऽजायत। मह्यञ्च पत्रिकाया मुद्रापण-प्रकाशनयोस्तथान्यान्यसर्वं विधव्यवस्थायाश्चोत्तरदायित्वमदीयत। इत्थं गुरुतरमिमं भारमहं पूज्यस्वामिमहाराजस्यैवानु-ग्रहेण वहन् प्रायो विगताष्टादशवर्षेभ्यः 'भारती' पत्रिकामिमां यथाकालं नियमितरूपेण प्रकाश-यितुं सफलः समभूवम्। अष्टादशवर्षात्मके सुदीर्घे कालखण्डेऽस्मिन् यदा-यदास्याः 'भारती' पत्रिकायाः प्रकाशनविधौ काठिन्यमापतितम्, तदा तदा श्रीस्वामिमहाराजस्यास्यैव सक्रियेण सहयोगेन तन्निराकर्तुमपार्यतास्माभिः।

किन्तु विधेः क्रूराघातेन अस्माकं संस्कृत-प्रचारपरिषदध्यक्षः, आयुर्वेदस्य संस्कृतसंस्कृतेः हिन्दुसमाजस्य प्रबलपोषकोऽस्मान् सर्वान् विहाय परलोकं गतः।

कालिकत्तानगरस्य सुविख्यातकविरजेन श्रीहरिवख्शजोशीमहाभागेन सह विगतपक्षे तत्र कलिकतानगरे श्रीस्वामिमहाभागस्य विषये वार्तालापे संलग्नः आसम् तदा महद्दुःखं प्रकटयता श्रीजोशीमहोदयेन कथितम् यत् "श्रीजयरामदासस्वामिमहोदय अस्माकं बाल्य-कालस्य सहचरः सहृदयो, विद्वान् आयुर्वेदस्य संस्कृतसंस्कृत्योश्च प्रबलपोषक आसीत् तस्य असामयिकं निधनं समाजस्य अपूर्णीया क्षतिरस्ति, किन्तु तदनन्तरं श्रीजोशीमहोदयेन कथितम् यत् तस्य सच्छिष्य-श्रीरामप्रकाशस्वामि-महोदयः स्वपूर्वपरम्परायाः निर्वाहं कुर्वन् श्रीलक्ष्मीरामस्वामिमहोदयस्य तथा श्रीजयराम-दासस्वामिनः धवलां कीर्तिं अक्षुण्णां रक्षिष्यति इति भगवन्तं प्रार्थये। अहमपि सर्वशक्तिमन्तं परमेश्वरं प्रार्थये यत् श्रीरामप्रकाशमहोदयः स्वपूर्वपुरुषाणां पूर्णतः अनुगमनं कुर्वन् पर-म्पराया निर्वाहं करिष्यतीति।

—गिरिराजशर्मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दी अवध सूगर मिल्स लिमिटेड

प्रधान कार्यालय :-
इण्डस्ट्री हाउस
१५६ चर्च गेट रिक्लेमेशन
बम्बई-१

मिल्स :-
हरगांव
जिला-सीतापुर
उत्तरप्रदेश

निर्माता :—

शुद्धा, श्वेता, कणवती शर्करा

आप 'भारती' के लिए क्या कर सकते हैं

१. ७) रु० भेजकर ग्राहक बनिये।

२. अपने परिचित मित्रों को सम्मानार्ह संरक्षक, विशिष्ट संरक्षक, साधारण संरक्षक, सन्मान्य सहायक, आजीवन सदस्य अथवा स्थायी ग्राहक बनने को प्रेरित कीजिए।

३. अपनी सुन्दर व विद्वत्तापूर्ण रचनाएं 'भारती' में भेजिए।

४. 'भारती' में अपने व्यवसाय के लिए विज्ञापन दीजिये व दूसरों को प्रेरित कीजिये।

५. धन भेजकर भारती को स्वावलम्बी बनने में सहायता कीजिये।

६. 'भारती' के अभिकर्त्ता (प्रचारक) बनिए।

७. 'भारती' की कमियां तथा सुधार के लिए हमें समय समय पर आपकी बहुमूल्य सम्मतियों से अवगत कराते रहिए।

८. आपके नगर के विद्वानों को 'भारती' में लेख सामग्री भेजने को प्रोत्साहित कीजिए। हमें विश्वास है कि श्रीमान् एक अथवा अनेक रीतियों से 'भारती' की सहायता के लिये अग्रसर होते रहेंगे।

विनीत—**गिरिराज शर्मा, प्रबन्ध सम्पादक**

भारती भवन—गोपालजी का रास्ता, जयपुर (राजस्थान)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपयोगी लघुकथा

श्रीगिरिराजशर्मा शास्त्री, जयपुरम्

बुद्धो जिनेन्द्रो गोरक्षः
शङ्करश्च पतञ्जलिः।
रामानुजोऽथ चैतन्यः
कबीरो गुरुनानकः ॥१६॥

बुद्धः—एषः शुद्धोदनात् मायादेवीगर्भजातः शाक्यसिंहसर्व्वार्थसिद्धार्कबन्धुगौतमेत्यादिनामचतुष्टयेन प्रसिद्धोऽन्तिमो लोकविश्रुतो बुद्धः कपिलवस्तुनगरे सुरद्विषां सम्मोहनाय साक्षात् विवेकमूर्तिः प्रादुर्बभूव। स तु दशावतारेषु नवमोऽवतारो यथा—

"ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषाम्।
बुद्धो नाम्नाञ्जनसुतः कीकटेषु[1] भविष्यति"

इति श्रीभागवते १ स्कन्धे ३ अध्यायः।

एषः सर्व्वज्ञः सुगतः धर्मराजः तथागतः समन्तभद्रः भगवान् मारजित् लोकजिदित्यादिनामभिः प्रख्यातः। तस्य वयसा सह क्रमेण शीलगुणसाहसरूपौदार्यबलवीर्य्यादयो वर्द्धन्ते स्म। उदिते यौवने पितुराज्ञया स शाक्यान्वयजां मनोज्ञां रूपलावण्यवतीं दण्डपाणितनयां गोपानाम्नीमुपयेमे।

जननसमयेऽस्य गणकाच्छ्रुतवान् नरेश्वरः शुद्धोदनो यत् व्याधिग्रस्तजराजर्जरसंन्यासिमृतजनदर्शनाज्जातवैराग्यः पुत्रस्ते गृहं संत्यक्ष्यतीति। तस्मात् संज्ञातशङ्को राजा शिल्पिभिरुपवनपरिवृतं सुगुप्तं रम्यं हर्म्यत्रयम् भूभूषणभूतं निर्मापयामास। तत्रासौ युवतीजनपरिवेष्टितमुपच्छन्दितं विषयविमुग्धचेतसं तनयं निवृ-

१ गया प्रदेशे

बुद्ध, जिनेन्द्र गोरक्ष शङ्कर पतञ्जलि रामानुज चैतन्य, कबीर और गुरुनानक।

बुद्धः—यह शुद्धोदन का मायादेवी के गर्भ से पैदा हुआ शाक्यसिंह, सर्वार्थसिद्ध, अर्कबन्धु और गौतम इन चार नामों से प्रसिद्ध सबसे अन्तिम संसार में प्रख्यात बुद्ध कपिलवस्तु नगर में सुरद्वेषी लोगों का सम्मोहन करने के लिये साक्षात् विवेक की मूर्ति के रूप में उत्पन्न हुआ। यह दशावतारों के मध्य में नवां अवतार था।

तदनन्तर कलियुग के आने पर सुरद्वेषियों का सम्मोहन करने के लिए गयाप्रदेश में अञ्जन का सुत बुद्ध नाम से उत्पन्न होगा"।

यह सर्वज्ञ, सुगत, धर्मराज, तथागत समन्तभद्र भगवान् मारजित् लोकजित् इत्यादि नामों से प्रख्यात हैं। उसके आयु के साथ क्रम से शील साहस, रूप औदार्य बल वीर्य्यादि बढ रहे थे। युवा होने पर पिता की आज्ञा से उसे शाक्यवंश में उत्पन्न मनोज्ञ रूपलावण्यवाली दण्डपाणिकी पुत्री गोपा नामवाली को ब्याहा। इसके उत्पन्न होने के समय ज्योतिषी से नरेश्वर शुद्धोदन ने सुना कि "व्याधिग्रस्त जराजर्जर संन्यासी मृतजन के दर्शन से उत्पन्न वैराग्य वाला आपका पुत्र घर छोडेगा"। उस कारण से उत्पन्न शङ्का वाला राजा शिल्पियों द्वारा उपवन से घिरे हुए सुगुप्त रम्य तीन पृथ्वी पर भूषण सदृश महल बनवा दिए। वहां इसने युवतीजनों से परिवेष्टित विषय से विमुग्ध चित्त

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्तन्निर्गमनम् स्वच्छन्दतयान्ववासयत्। अथ गच्छति कालेऽस्य शिथिलीबभूव भोगसन्तर्षः। ततः कारागारमिव प्रतीयमानं निष्कुटनिकेतं विहायास्य धरण्या नानास्थानानि द्रष्टुमिच्छा समुत्पद्यत। ततः स पितरं शुद्धोदनं सम्बोधयामास निकटे स्थितं नगरं प्रजानामृद्धामवस्थाञ्च विलोकयितुं वासना मे बलवतीति। राजा प्रथमं निवारयितुमियेष प्रलोभनेन। स नैव तु ततो विरराम। अथ विज्ञाय निर्बन्धं पुत्रस्य मन्त्रिणमादिदेश, कुमारेण शाक्यसिंहेन भ्रमणे कृते प्रारब्धे राष्ट्रे जरातुर-सन्यासि-मृतमानवाः केनापि कारणेन राजवर्त्मनि नोपतिष्ठन्तामिति विघोषयेति। तथानुष्ठिते कुमारः रथमारुह्य सारथिना सह बहिर्निर्गत्य भ्रमितुमारब्धवान्। ततश्चतुर्दिक्षु प्रकृतिभिस्तारस्वरैर्जयोऽस्य प्राघोषि। नगरं विलोक्यासौ मनसि परां मुदं प्राप्तवान्।

वाले पुत्र को निर्गमन से निवृत्त करके स्वच्छन्द निवासी किया। इसके पश्चात् समय बीतने पर इसकी भोग करने की तृषा शिथिल होगई। तदनन्तर कारागार (जेलखाने) की तरह दीखने वाले उपवन वाले घर को छोडकर इस पृथ्वी के नानास्थानों को देखने की इसकी इच्छा उत्पन्न हुई। इसके पश्चात् पिता शुद्धोदन को इसने कहा आसपास में नगर को तथा प्रजजान की समुन्नत अवस्था को देखने को वासना मुझ में बलवती है। राजा ने पहले तो प्रलोभन से इसे रोकने की चेष्टा की। किन्तु वह इससे शान्त नहीं हुआ। तब पुत्र के मुक्त भाव को जानकर मन्त्री को आज्ञा दी कुमार शाक्यसिंह के भ्रमण आरम्भ करने पर राज्य में बुड्ढे रोगी संन्यासी तथा मृतजन किसी भी कारण से राजमार्ग में नहीं आवें यह घोषणा करें। वैसा होने पर कुमार ने रथ पर चढ कर सारथी के साथ बाहर आकर घूमना प्रारम्भ किया। तदनन्तर चारों दिशाओं में प्रजाजन ने उच्चस्वर से इसका जयघोष किया। नगर को देखकर यह परम हर्षित हुआ।

शुभ कामनाओं के साथ

∴

* इन्डो फॉरेन एजेन्सीज् *

२३, सर फिरोजशाह मेहता रोड़,

बम्बई - १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



सदा संस्कृत-संस्कृत्योस्तथा वेदस्य चायुषः ।
समुत्थाने महोत्साहः सफलो यश्चिकित्सकः ॥
अभिरक्षन् प्रयत्नेन यः स्वगुरुपरम्पराम् ।
स्वामी रामप्रकाशोऽयं प्रसन्नमुखमण्डलः ॥
कर्मणा मनसा नित्यं लोकस्य हितमाचरन् ।
सुखं कीर्तिं श्रियं लोके लभतां कृपया प्रभोः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आज की आवश्यकता

राजस्थान के मुख्य मंत्री श्रीमोहनलाल सुखाडिया का उद्बोधन

उत्पादन

हमें उत्पादन में अधिक से अधिक वृद्धि के कार्य को एक राष्ट्रीय कर्तव्य मानकर खेतों कारखानों व खदानों में कार्य करना है जिससे कि हम अपनी अर्थ-व्यवस्था को मजबूत बना सकें और हमें अपनी आवश्यकताओं की वस्तुओं के लिए बाहरी सहायता पर निर्भर नहीं रहना पड़े। देश के हर नागरिक को. चाहे वह किसी भी कार्य में लगा हो, यह मानकर कार्य करना चाहिए कि वह देश की शक्ति और समृद्धि बनाने के लिए योगदान दे रहा है।

परिवार नियोजन

परिवार नियोजन का उद्देश्य परिवार, समाज व देश के कल्याण के लिए परिवार को सीमित करना है। हमें उतने ही बच्चे पैदा करने चाहिए जिनका भरण-पोषण माता-पिता भली-भांति कर सकें उन्हें अच्छी शिक्षा दे सकें और अच्छे वस्त्र तथा स्वास्थ्यप्रद भोजन उनके लिए उपलब्ध कर सकें। यदि हमने ऐसा किया तो हम हर परिवार को समाज की एक समृद्ध और सुखी इकाई बना सकेंगे।

अल्प बचत

हमारे साधनों में अल्प बचत का विशेष महत्व है। यह न केवल पारिवारिक जीवन में बचत की आदत डालती है बल्कि इससे योजना की क्रियान्विति हेतु आवश्यक धन राशि भी प्राप्त होती है। इस वर्ष अल्प बचत योजना के अन्तर्गत हमें अधिक से अधिक धनराशि एकत्रित करनी होगी। इस लक्ष्य की पूर्ति होने से राज्य को विकास कार्यों के लिए उपयुक्त धन प्राप्त होगा और हम विकास के क्रम को जारी रख सकेंगे।

राजस्थान सरकार द्वारा प्रसारित

भारती के कतिपय प्रकाशन

		मूल्यं
१.	अम्बिकासूक्तम्	२.५०
२.	गल्पकल्पलतिका (बालोपयोगी)	१.५०
३.	सरलसंस्कृत शिक्षणोपायः (बालोपयोगी)	१.५०
४.	गोलनवांकुर	१.२५
५.	चित्र द्वारा संस्कृतशिक्षा (बालोपयोगी)	१.५०
६.	सुवर्णलक्ष्मी नक्षत्र माला	०.५०
७.	आयुर्वेद विशेषांक	५.००
८.	आरोग्यांक विशेषांक	४.५०

भारती के ग्राहकों को २५% वर्तन दिया जायगा यदि सम्पूर्ण पुस्तकें एक साथ मंगायें।

व्यवस्थापक
भारती संस्कृत मासिक

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

आशुकवि–श्रीहरिशास्त्री, सम्पादकः

(गर्वमुद्दिश्य)

धनेन विद्यया जात्या
वैभवेन कुलेन च ।
तपसा च प्रभुत्वेन
रूपेणापि नृणां भुवि ॥१॥

भूमण्डल पर मनुष्यों को धन से, विद्या से, जाति से ऐश्वर्य से कुल से, तथा तप से और हकूमत से एवं रूप से भी अहन्ता प्राप्त हो जाती है ॥१॥

अहन्ता जायते सैव
गर्व इत्यभिधीयते ।
गर्वो हि हेतुः सर्वेषां
मानवानां निपातने ॥२॥

यह अहन्ता ही गर्व कहलाता है। यह गर्व ही मनुष्यों के निपात का कारण है ॥२॥

गुणानामपि सर्वेषां
मालिन्यस्योपधारकः ।
गर्वेणैव दशास्याद्या
महान्तो बलिनो हताः ॥३॥

यह सुजनों के गुणों को भी शीघ्र ही मलिन कर देता है, अर्थात् गर्व गुणों पर कालिमा लगा देता है । गर्व के कारण ही रावणादि बड़े बड़े बलवान मारे गये हैं ॥३॥

भगवान्तमिमं क्वापि
सहते न कदाचन ।
पुष्पमप्यति फुल्लं स्व
वृक्षात्सम्पातयत्यधः ॥४

भगवान् (परमेश्वर) इस गर्व को कहीं भी सहन नहीं करते हैं। देखिए अधिक फूल जाने वाबे पुष्प को तुरन्त ही वृक्ष से नीचे गिरा देते हैं। वह धूल में पडा रहता है और कुम्हला जाता है ॥४॥

तस्माद् गर्वः सदा त्याज्यो
नैव धार्यो मनीषिभिः ॥

इस कारण कभी किसी गुण के पा लेने पर गर्व न करो, इसका तो त्याग ही अच्छा है॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. No. J 7
Licence No. PP.6
'Licenced to Post.
Without Prepayment.

एक राष्ट्रीय उत्पादन

३५००० से अधिक श्रमिकों को काम देने वाला

श्रेष्ठतम सामग्रियों से निर्मित

मेंगलूर

गणेश बीड़ियां

धूम्रपान करने वालों की अति प्रिय

प्रधान कार्यालय

मेंगलूर गणेश बीड़ी वर्क्स

विनोबा रोड : मैसूर-५

दूरभाष : ४२१ तार : AROMA

प्रकाशक:—जयबहादुरसिंह पता : भारती भवन, गोपालजी का रास्ता, जयपुर। दूरभाष : ७५४९६
राधेश्याम शर्मा द्वारा श्री हनुमान प्रिं० प्रेस, चौडा रास्ता, जयपुर में मुद्रित। फोन: ६३१५६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतमासिकस्य



सम्मान्यो योऽस्ति नेतॄणां नॄणाञ्च देशवासिनाम् ।
महात्मा नम्यतां सोऽयं **गान्धी** राष्ट्र-पिता सदा ॥

...स्र १६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

वार्षिकमूल्यं सप्तमुद्राः ७.००

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान–मध्यप्रदेश–गुजरात–महाराष्ट्र–मद्रास–आंध्र–उत्तरप्रदेश–

बिहार–पञ्चनद–सर्वकारैः स्वीकृता—

विषय-सूची

क्र० सं०	लेखाः	लेखकाः	पृष्ठ संख्या
१.	मङ्गलम्	आशुकवि–श्रीहरिशास्त्री, जयपुरम्	१३१
२.	लिङ्गविषयको विचारः	श्रीबदरीप्रसादशास्त्री, प्रपूर्णा, खेतडी, राजस्थानम्	१३२
३.	अथ व्याप्तिलक्षणानि	श्रीयमुनाधरशास्त्रिणो नैयायिकाः, रामगढः	१३६
४.	गान्धेर्महात्मनो मित्रत्वम्	अनु० श्रीगणेशराम शर्मा, डूंगरपुरम्	१३९
५.	जिज्ञासा	श्रीकल्याणदत्तशर्माणः, खोरी	१४१
६.	कथमिव जीवनं साहित्यमन्तरा	श्री राधेश्याममिश्रः नवलगढः, रामगढः	१४३
७.	वाराणसीस्थ-सार्वभौम संस्कृतप्रचार-कार्यालयस्य विशेषाधिवेशन समारोहः	श्रीकेशवमिश्रः प्रधानमन्त्री, वाराणसी	१४७
८.	कलिकौतुकम्	आचार्य–श्रीविश्वनाथमिश्रः, बीकानेरः	१५१
९.	अथ श्रीशिवराज्योदये महाकाव्ये, ३६ सर्गः	महाकविः डॉ० श्रीधरभास्करवर्णेकरः, नागपुरम्	१५३
१०.	पिपासाया मरुभूमौ महाकविः शेली	अनु० श्रीगणेशरामशर्मा डूंगरपुरम्	१५५
११.	सम्पादकीयम्	'मधुपः' सहसम्पादकः	१६१
१२.	अथ वेदोक्तं रात्रिसूक्तम्	श्रीहरिशास्त्रिणानूदितो दुर्गापाठः	१६४
१३.	जयतु संस्कृतम्	श्रीकालूटिहनुमन्तरावः हैदराबादः	१७२
१४.	लघुकथा	श्रीगिरिराजशर्मा शास्त्री, जयपुरम्	१७३
१५.	सूक्तिसुधा	आशुकवि–श्रीहरिशास्त्री, सम्पादकः	१७७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः
आशुकवि-कविभूषण-
श्रीहरिशास्त्री

सहसम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
साहित्यालङ्कारः

भारती

प्रबन्धसम्पादकः
सहसम्पादकश्च
गिरिराजशर्मा

भारती-भवनम्,
गोपालजी का रास्ता,
जयपुरम्

लेखैरुपस्तुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

वर्षम् १६ | माघः, विक्रमाब्दः २०२५ (फरवरी, १९६९) | अङ्कः ४

मङ्गलम्

आशुकवि-श्रीहरिशास्त्री, सम्पादकः

गौर्य्या रदाः किं स्मितभातिशुभ्राः ।
स्मितं किमस्या रदभातिशुभ्रम् ।
निर्णेतुमित्थं हि विमर्षमुद्रा-स्थितो
महेशोऽभ्युदयाय भूयात् ॥१॥

मासावतरणम्

सूर्यं सर्वसहं तथैव मधुरं कुर्वन्नृणां भूतले
वाम्भ्यो भीतिमुदश्चयन्ननलतो मैत्रीमिवापादयन् ।
भोज्यं पेयमपि प्रतप्तमखिलं लोकानलं रोचयन्
तप्तापूपतिलान्नतूलसुभगो माघो हि मा आगतः ॥१॥

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लिङ्गविषयको विचारः

ले० साहित्यरत्नं श्रीवदरीप्रसादशास्त्री, प्रपूर्णा, खेतड़ी राजस्थानम्

शब्दानां कृत्तद्धितस्त्रीप्रत्ययादिषूक्तविविध-प्रत्ययैरथवा प्रत्ययानां द्योतकत्वान्नामार्थतयैव सति सम्भवे लौकिकमन्यथा तु लौकिकविलक्षणं-शास्त्रीयं लिङ्गमङ्गीकृत्य केषांश्चिदेकलिङ्गत्वं द्विलिङ्गत्वं त्रिलिङ्गत्वं वा प्रदर्श्य लिङ्गानुशासनं दाक्षीकुक्षितः समधिगतजनिना महामुनिना भगवता पाणिनिना तदितरैर्वामिनामरशाकटायनादिभिः शाब्दिकाचार्यैः पृथगेव समुपदिष्टम् ।

तथा चात्र सरूपसूत्रगतभाष्यप्रदीपानुसारं यथा शब्दानुशासनप्रस्तावाच्छब्दसम्बन्धिरूपमेवगृह्यते, तद्वदिहापि लिङ्गानुशासनप्रस्तावाल्लिङ्गसम्बन्धिज्ञानमेव गृह्यते । अर्थाद् यथा घट इत्यादिषु शब्देषु तत्तदनुशासनार्थं घकारादिघटितं तत्तच्छब्दसम्बन्धिरूपमेव गृह्यते, तद्वल्लिङ्गानुशासने शब्दार्थनिष्ठं स्त्रीत्वादिकमेव लिङ्गरूपं गृह्यते । इति शब्दानुशासनलिङ्गानुशासनयोः पृथक्त्वे विवेकः । अथवा वाक्यपदीयेलिङ्गसमुद्देशस्य, टीकायां श्रीहेलाराजो लिङ्गन्तु नाम पदानामधिकं वाच्यमित्यूचिवान्, तथा च नामपदानां स्त्रीत्वादिविशिष्टार्थाभिधायकं सामान्यशब्दानुशासनशास्त्राद्विशिष्टमेव लिङ्गानुशासनशास्त्रमित्यपि ववक्तुं शक्यते । किञ्च "यः शब्दः सोऽर्थो योऽर्थः सः शब्दः" इत्यादिना शब्दार्थयोस्तादात्म्यावगमात्, लिङ्गस्य च पुन "एकं द्विकं त्रिकं चैव चतुष्कं पञ्चकं तथा । नामार्था इति सर्वेऽपि पक्षाः शास्त्रे निरूपिताः ॥ शब्दोऽपि यदि भेदेन विवक्षा स्यात्तदा तथा । नोचेच्छ्रोत्रादिभिः सिद्धोऽप्यसावर्थोऽवभासते" इत्यादिना नामार्थस्य त्रिकत्वपक्षे शब्दार्थत्वाविशेषाच्छब्दार्थयोश्च मिथोऽभेदान्वयात्, उत वा प्रकृतिप्रत्ययास्तत्तदर्थवाचकाः प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थस्य प्राधान्य" मित्यादिना प्रत्ययानां द्योतकत्वपक्षे वाचकत्वपक्षे वा शास्त्रप्रक्रियानिर्वाहार्थं प्रकृतिप्रत्ययज्ञानं यथा शास्त्रकृत्कल्पितं व्याकरणशास्त्रज्ञानजन्यं तद्वल्लिङ्गबोधकप्रत्ययविशिष्टेषु शब्देषु लिङ्गबोधक (द्योतक) प्रत्ययज्ञानेन सह शब्दनिष्ठमर्थ निष्ठं वा शब्दलिङ्गज्ञानमपि व्याकरणशास्त्रज्ञानजन्यमेव । अर्थाद् ऋते व्याकरणाद् यथार्थप्रकृतिप्रत्ययज्ञानाभावस्तत्त्वे च प्रकृतिप्रत्ययवेद्या लिङ्गव्युत्पत्तिस्तु खपुष्पायमाणा स्यादिति नहि शब्दानुशासनाल्लिङ्गानुशासनमतिरिच्यते । "अत एव अत्रापि लिङ्गं शास्त्रीयं प्रागुक्तमेव विवक्षित" मिति पाणिनीयलिङ्गानुशासनव्याख्यायां श्रीभैरवमिश्रा अप्याहुः । यदीयोऽयमाशयः—

पाणिनिना प्रतिपियादयिषितेऽस्मिं ल्लिङ्गानुशासने पाणिनीयाष्टाध्यायीतो भिन्नेऽ "पी" त्यपिना सूचयित्वा पुनः "प्रागुक्तमेवे" त्यनेन च "स्त्रियाम्" ४।१।३ सरूपे १।२।६४ त्यादिसूत्रभाष्ये प्रतिपादितं लौकिकविलक्षणं "मेवे" त्यत्रान्ययोगव्यवच्छेदकेनायोगव्यवच्छेदकेन वा "एव" कारेण शास्त्रीयं (शब्दानुशासनशास्त्रीयं) सति सम्भवे तु लौकिकमपि लिङ्गं विवक्षितमित्येव न प्रत्युत प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमित्यनया परिभाषया लिङ्गबोधक (द्योतक) प्रत्ययविशिष्टस्यापि प्रातिपदिकग्रहणे ग्रहणदर्शनाद् "विभक्तौ लिङ्गविशिष्टाग्रहण" मिति वार्तिके तु श्रुतार्थापत्त्याऽविभक्तौ सर्वत्र प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणनिश्चयात् उत वा बहुव्रीहे रूधसोऽङीष ४।१।२५ इतिसूत्रभाष्योद्यतानुसारं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्त्रीप्रत्ययसमभिव्याहारे प्रातिपादिकत्वतद्वद्या-व्यधर्माणां लिङ्गप्रत्ययविशिष्टेऽतिदेशावगमा-ल्लिङ्गबोधकप्रत्ययानां तद्विशिष्टानां शब्दानाञ्च पाणिनीयादिशब्दानुशासनस्मृतिष्वेवानुशासनदर्शनात् नहि 'शब्दानुशासनलिङ्गानुशासनयोः पृथक्त्वलेशोऽव्यवशिष्यते ।

पाणिनीयादिलिङ्गानुशासनानां पृथगुपदेशस्तु सौकर्यार्थं स्पष्टार्थ एवावगन्तव्यः ।

ननु लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति पातञ्जलभाष्योद्धृतवार्तिकानुसारं स्त्रीत्वादि-लिङ्गसमवेतानां शब्दानां लिङ्गानुशासने शब्दानुशासनमूलभूतानां पाणिनीयाष्टाध्यायादीनां व्याकरणस्मृतीनामेव नहि परमं प्रामाण्यमिति लिङ्गानुशासनं शब्दानुशासनात् पृथगेवोपदेष्टव्यम् । एवञ्च तयोः (शब्दानुशासनलिङ्गानुशासनयोः) पृथक्त्वमपि लिङ्गज्ञानस्य लोकाश्रयत्वात् सिद्धम् । इति चेन्न । दोषोऽयं लिङ्गज्ञानविषयकलिङ्गानुशासनस्य पृथक्शास्त्रत्वाभिमानिनस्तवापि समानः । लिङ्गानुशासनेऽपि स्पष्टार्थेयं त्रिसूत्रीति पाठस्य "लोकव्युत्पत्त्यैव तत्तल्लिङ्गाभिधानसिद्धत्वादिति व्याख्यानदर्शनात् उतवा वामनामरजैनाद्युपदिष्टेषु सर्वेष्वेव लिङ्गानुशासनेष्वपि च लोकव्युत्पत्त्यैवानुक्त-शब्दलिङ्गाभिधानसिद्धत्वादित्याद्यवलोकनान्नहि लिङ्गानुशासनेनापि समेषां शब्दानां लिङ्गज्ञानं सुकरम् । तत्रापि लोकतो लिङ्गज्ञानमपेक्षितमित्यत उभयत्रोक्तदोषतादवस्थ्ये सिद्धे यत्रोभयोः समो दोषः परिहारोऽपि वा समः । नैकस्तत्र प्रयोक्तव्यस्तादृगर्थविचारणे" इति न्यायान्नह्येकत्र शब्दानुशासनशास्त्रे स्त्रीत्वादि-लिङ्गविशिष्टानां सर्वेषां शब्दानां लिङ्गव्युत्पत्त्युपकारकत्वं नास्तीति वक्तुं शक्यते । नचापि-लिङ्गानुशासनं त्वखिलशब्दलिङ्गव्युत्पत्तावेकमात्रमुपकारकमिति वक्तव्यम् । न चैवं लिङ्गानुशासनस्य लिङ्गज्ञानकारणभूतस्यापि शब्दानुशासनरूपव्याकरणस्मृतेः पृथक्त्वं सिध्यति ।

प्रत्युत शब्दानुशासनस्य खिलभूतं कोषाङ्गभूतमुत वा कैश्चित्तु लिङ्गज्ञानसौकर्यार्थं स्वतन्त्रमपि प्रणीतं शब्दानुशासन (व्याकरण) शास्त्रमूलकं तदभिन्नमेवेत्यभ्युपगन्तव्यम् । अर्थाद् अन्यदेव 'अज' शब्दस्य प्रवृत्तिनिमित्तम्, अन्यदेव च अजाशब्दस्य प्रवृत्तिनिमित्तम्, इत्यतः शब्देषु स्त्रीत्वादिलिङ्ग वैशिष्ट्यं शब्दसाधुत्वार्थमेवेति निर्विवादम् ।

शब्दसाधुत्वस्य व्याकरणविषयत्वाच्छब्दानुशासनमूलकमेव लिङ्गानुशासनं तदभिन्नम् । तथा त्वेचाविशिष्टलिङ्गाव्यययुष्मदस्मद्षट्-संज्ञकशब्दसाधुत्वमिव लिङ्गसमवेतशब्दानां लिङ्गज्ञानपूर्वकशब्दसाधुत्वान्वाख्यानेऽपि शब्दानुशासनशास्त्र (पाणिनीयादिव्याकरणस्मृतिरूप) मेव प्रकृतिप्रत्ययव्युत्पादनद्वारेण प्राधान्यं भजते । अत्र शब्दस्य लिङ्गसमवेतत्वं तु शब्दार्थयोरभेदोपचाराद् बोध्यम् । यतो हि "स्वार्थमभिधाय शब्दो निरपेक्षो द्रव्यमाह समवेतम् । समवेतस्य च वचने लिङ्गं वचनं विभक्तिं चे" त्यादिना वाच्यस्य द्रव्यस्य लिङ्गसमवेतत्वादपि अर्थस्यैव स्त्रीत्वादिविष्टत्वात् इत्युपरिष्टात्सविशेषं वक्ष्यते ।

अस्तु लिङ्गव्युत्पत्तौ व्याकरणस्यैव प्राधान्ये कोषलिङ्गानुशासनादीनि तु तदुपजीव्यत्वान्न तदभिन्नानि केवलं व्याकरणशास्त्रोक्तलिङ्गज्ञानादि स्पष्टार्थकानीत्युन्नेयम् । अत एव व्याकरणशास्त्राचार्यैः पाणिन्यादिभिर्विरचितानि लिङ्गानुशासनानि शब्दानुशासनस्य खिलभूतान्येव मन्यन्ते । कोषस्य च पुनः पृथक्शास्त्रत्वं तु शब्दसंग्रहमात्रत्वे सति शक्तिग्राहकतयाऽवगन्तव्यं नहि लिङ्गसमवेतशब्दानुशासनतये तीत्यङ्गारं पृथक् शास्त्रत्वसिद्धिः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वस्तुतस्तु स्त्रिया ४-१-३ मिति सूत्रभाष्ये तस्योक्तौ लोकतो नामेतिवार्तिकमाटीकमानः कैय्यटो लोकत इति पदं शिष्टलोकादिति व्याचख्यौ कोऽसौ शिष्टलोक इति जिज्ञासायाम् तत्रैव तस्योक्काविति वार्तिकात्प्राक् यद्युभयं सर्वत्र कुतो व्यवस्था ? विवक्षात इति भाष्यविवृतौ कैय्यटोद्धृतेयं हरिकारिकापि मन्तव्यास्ति—"भावतत्त्वविदः शिष्टाः शब्दार्थेषु व्यवस्थिताः। यद् यद् धर्मेऽङ्गतामेति लिङ्गं तत्तत्प्रचक्षते" एतदीयं श्रीनागेशकृतं विवरणञ्चेदं भावतत्त्वविदो ब्रह्मतत्त्वसाक्षात्कारवन्तः शब्दार्थेषु व्यवस्थिता ये शिष्टाः तेषां प्रयोगे यल्लिङ्गं धर्मेऽङ्गतामेति तत्तदेव तच्छब्दस्य शिष्टप्रयुक्तस्य लिङ्गम्। अर्थाद् येषां शब्दानां यल्लिङ्गमुपादाय शिष्टा (पूर्वोक्तकैय्यटव्याख्यानुसारं लोकाः) साधुत्वावगमपूर्वकं धर्मजनकत्वबुद्धया प्रयोगं कुर्वन्ति तदेव लिङ्गमिति नियमः सिद्ध इति भावः। इत्थञ्चास्मन्मतौ तु लिङ्गस्य शिष्टप्रयोगज्ञेयत्वेऽपि कारिकायां प्रयोक्तुः शिष्टस्य—ब्रह्मतत्त्व—साक्षात्कारवत्त्वशब्दार्थेषु व्यवस्थितत्त्वसाधुत्वावगमपूर्वकं धर्मजनकत्व—बुध्या प्रयुञ्जानत्वादिविशेषणै विशिष्टवैयाकरणत्वमेवाभिव्यज्यते। शब्दे ब्रह्मणि निष्णातः परं ब्रह्माधिगच्छतीत्यादिना शब्दतत्त्वसाक्षात्कारवतो वैयाकरणस्यैव ब्रह्मतत्त्वसाक्षात्कारवत्त्वाभ्युपगमात्।

एवञ्च शब्दव्युत्पत्तिवलाच्छब्दार्थेषु व्यवस्थितत्वं साधुत्वावगमपूर्वकं धर्मजनकत्व—बुध्या शब्दप्रयोक्तृत्वञ्च वैय्याकरणे एव सङ्गच्छते। एवञ्च लिङ्गस्य लोकाश्रयत्वं नाम- वैयाकरणशिष्टाश्रयत्वमेव। इतश्च "लोक्यते येन शब्दार्थो लोकस्तेन स कथ्यते। व्यवहारोऽथवा वृद्धव्यवहर्तृपरम्परे" त्यनया कारिकया तु स्फुटैवास्मदभीष्टसिद्धिः अर्थाद् येन स्त्री पुमान्नपुंसकमिति व्यवहारेण शब्दार्थो लोक्यते प्रकाश्यते तेन कारणेन स वाङ्मयो व्यवहारो 'लोक' इति कथ्यते अथवा वृद्धा न ते येन विदन्ति धर्ममित्यादिना शब्दसाधुत्वावगमनरूपधर्मवेत्तारो वृद्धाश्च ते व्यवहर्तारश्चेति वृद्धव्यवहर्तारस्तेषां परम्परा एव लोकः अर्थाद् वृद्धव्यवहर्तारो वैयाकरणा एव लोकशब्दवाच्याः। एवमेव शब्दार्थप्रकाशको व्याकरणमूलको वाङ्मयव्यवहारोऽपि लोकशब्दवाच्यः। आहोस्विद् वृद्धव्यवहर्तृपरम्परे त्यनेन वृद्धव्यवहर्तृणां विशिष्टवैयाकरणा वृद्धाश्च ते व्यवहर्तार स्तेषां सम्प्रदायरूपेणानादिकालप्रवृत्ता परम्परा व्याकरणरूपा सैव लोकस्तत एव च शब्दानां लिङ्गव्यवस्था ज्ञेया व्याकरणेनैव लिङ्गसमवेतशब्दानामन्वाख्यानसम्भवात्। वृद्धव्यवहारस्यापि तदनु प्रचलितत्वात्तदनुजन्यत्वादन्यथा व्याकरणशास्त्रस्यानादित्वभङ्गापत्तेः।

व्याकरणेतरेषां कोषादीनान्तु लिङ्गसमवेतशब्दबोधे शक्तिग्राहकत्वेऽप्यसत्त्वमवास्तवत्वं गौणत्वमेव ज्ञेयम्।

अर्थाद् यथाह्याध्यात्मिकतत्त्वचिन्तने "सत्त्वं स्वातन्त्र्यमुद्दिष्टं तच्च कृष्णे न चापरे। अस्वातन्त्र्यात्तदन्येषामसत्त्वं विद्धि भारते तिस्मृतेर्ब्रह्मण एव स्वतन्त्रत्वात् सत्त्वं स्वीक्रियते। अस्वतन्त्राणां तदधीनानां तदात्मकानाञ्च कालकर्मादीनामचेतनद्रव्याणामसत्त्वमवास्तवत्वं मृदात्मकस्य घटस्य मृदभिन्नत्वनिर्देशादसत्त्वमवास्तवत्वमिवावगम्यते। एवमेव स्त्रीत्वादिलिङ्गतत्त्वचिन्तनेऽपि सत्त्वं स्वातन्त्र्यमुद्दिष्टं तच्च व्याकरणे स्थितम्। अस्वातन्त्र्यात्तदन्येषामसत्त्वं लिङ्गनिश्चये। अथवा गौणत्वं लिङ्गनिश्चये"

एवं हि शब्दानुशासनलिङ्गानुशासनयोर्लिङ्गानुशासनस्य शब्दानुशासनात्मकत्वाद् यो यदात्मकः स तदभिन्ननिर्देशार्ह इति व्युत्पत्त्या मिथो भिन्नाभिन्नत्वे सिद्धे लिङ्गस्यापि च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रातिपदिकार्थत्वाद् वाच्यवाचकतया पुनश्च स्त्रीत्वादे लिङ्गस्य विशेषणत्वाद्विशेष्यविशेषणतया वा शब्दलिङ्गयोरपि मिथो भेदाभेदौ सिध्यतः, इति तादृशं भेदाभेदवादमादायेह पाणिनीयप्रक्रियानुसारं लिङ्गविषयको विचारः प्रस्तूयते तदत्र कुहचिच्छास्त्रमर्यादाबहिर्भू तत्वावभासोऽपि मामकीनः स्तुत्यश्चिन्त्यो वेत्यत्र सहृदयहृदयाः पाठकास्तत्राप्यष्टकाः पाणिनीया एव प्रमाणम् ।

अथेह यदीयोऽयं विचारः प्रस्तूयते किं तल्लिङ्गमिति जिज्ञासायां पातञ्जलमहाभाष्यव्याख्यानरूपस्य वाक्यपदीयस्य लिङ्गसमुद्देशे तैर्थिकमतभेदेन श्रीभर्तृहरिणा विभाषया सप्तधालिङ्गलक्षणं दर्शितं, यथा —

स्तनकेशादिसम्बन्धो विशिष्टा वा स्तनादयः ।
तदुपव्यञ्जना जातिर्गुणावस्था गुणास्तथा ॥१॥
शब्दोपजनितोऽर्थात्मा शब्दसंस्कार इत्यपि ।
लिङ्गानां लिङ्गतत्त्वज्ञै विकल्पाः सप्त दर्शिताः ॥२

अर्थात् स्तनकेशकलापप्रजननादिरूपव्यञ्जनैरवयविनः सम्बन्धः संयोगसमवायलक्षणो लिङ्गमित्याद्यं लिङ्गलक्षणम्, अथवा तेन संयोगसमवायलक्षणाख्य सम्बन्धेन विशिष्टाः-स्तनादय एव लिङ्गम् इति द्वितीयम्, अथवा सर्वत्राभिन्नाभिधानप्रत्ययोन्नीतसद्भावा जातिरिति वैशेषिकमतानुसारं स्तनाद्युपव्यञ्जनाभिव्यक्तविशेषा स्त्रीत्वपुंस्त्वनपुंसकत्वरूपा जातिर्लिङ्गमिति तृतीयं लिङ्गलक्षणम् । उत वा सांख्यनयानुसारं सत्वरजस्तमसां गुणानां सततपरिणामिनामुपचयापचयमाध्यस्थ्यलक्षणा अवस्था विशेषा यथायोगं पुंस्त्वादिलिङ्गमातिष्ठन्ते इति तुरीयम् ।

आहोस्वित् गुणानामुपचयाद्यवस्थाविशिष्टा गुणा एव लिङ्गमिति पञ्चमं लक्षणम् ।

अपि च शब्दोपजनितोऽर्थात्मा अर्थाद् बहिरसन्नेव शब्दैरुत्पादित इव बाह्ये वस्तुनि लिङ्गयोग इत्येवं "शब्दाभिधेयस्वभावं लिङ्ग" मिति षष्ठम् ।

इतोऽपि तटस्तटी तटमित्यभिन्नेनापि शब्देनाभिन्नं वस्तु त्रिलिङ्गं प्रत्याय्यत इत्यतः "शब्दसंस्कारमात्रं लिङ्ग" मिति सप्तमम् ।

पुनश्चात्रैव प्रकरणे परम ज्यपादानां महामहोपाध्यायादिविविधपदवीजुषां श्रीगिरिधरशर्मचतुर्वेदमहाभागानां पुण्यस्मरणमप्यावश्यकं यैः प्रदीपोद्योततत्त्वालोकाख्यटीकात्रयोपेतस्य नवाह्निकमहाभाष्यस्य भूमिकायां सांख्योक्तसत्वादिगुणोपचयाद्यवस्थारूपम्, अथवा तदवस्थाविशिष्टा गुणा एव सत्त्वादयो लिङ्गमिति लिङ्गलक्षणद्वयमपि भाष्यकाराभिमतं नास्तीति सविस्तरं विविच्य नवीनमेव वैज्ञानिकं लिङ्गलक्षणमुपन्यस्तं तदेव च भाष्यकाराभिमतमित्युक्त्वा सर्वेऽपि भाष्यव्याख्यातारो भाष्याशयानभिज्ञा इवोपहासास्पदं यापिताः ।

तदिदं लक्षणमुपरिष्टाल्लक्षणपरीक्षणावसरे प्रदर्शयिष्यामः ।

क्रमशः

मनोविनोदकणिका—

संशोधनम्

बालिका— अहं ह्यः ससुखं रात्रौ जनकेन सहाऽस्वपः ।
अध्यापिका (संशोध्य) अहं ह्यः ससुखं रात्रौ जनकेन स ऽस्वपम् ॥
पुनः बालिका— तदा तु मयि सुप्तायां भवतीहाऽऽगता भवेत् ?

—दीनानाथत्रिवेदी मधुपः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

-: अथ व्याप्तिलक्षणानि :-

ले० लाटोपाह्व-श्रीयमुनाधरशास्त्रिणो नैयायिकाः, रामगढः

साध्यस्य हेतुसम्बन्धो व्याप्तिरित्युच्यते बुधैः ।
स चानेकविधो ज्ञेयो भो व्याप्तिपञ्चकादिषु ॥१॥

येन विना न यत्सिद्धिस्तेन तज्ज्ञाप्यते ध्रुवम् ।
यथा बह्निं विना धूमसिद्धि र्न जायते क्वचित् ॥२॥

अतो व्याप्येन धूमेन, व्यापकोऽग्निः प्रबोध्यते ।
पर्वतो बह्निमान् धूमादित्यनुमितिरुच्यते ॥३॥

आदौ व्याप्तिर्द्विधा प्रोक्ता ह्यन्वयव्यतिरेकतः ।
भावपदार्थयो र्व्याप्तिरन्वयव्याप्तिरुच्यते ।
अभावयोस्तु या व्याप्तिः सा व्यतिरेकनामिका ॥४॥

अन्वयव्याप्तिरप्येषा, द्विविधा परिकीर्तिता ।
पूर्वपक्षा च सिद्धान्तलक्षणेति प्रभेदतः ॥५॥

पूर्वस्या लक्षणान्यनेकानि व्यापनपञ्चके ।
सिंहव्याघ्रे तथा सन्ति, व्यधिकरणधर्मके ॥६॥

दिङ्मात्रं दर्शयिष्येऽहं काकेभ्यो दधिरक्षवत् ।
साध्यवदन्यवृत्तित्वाभाववत्त्वं हि लक्षणम् ॥७॥

साध्याभावाश्रयावृत्तित्वं लक्षणं द्वितीयकम् ।
भेदेन हि तथात्यन्ताभावेन घटितं द्वयम् ॥८॥

व्याप्यव्यापकभावो हि, भावयो र्यादृगिष्यते ।
तयोरभावयोस्तस्माद् विपरीतः प्रतीयते ॥९॥

अन्वये साधनं व्याप्यं, साध्यं व्यापकमिष्यते ।
साध्याभावोऽन्यथा व्याप्यो, व्यापकः साधनात्ययः ॥१०॥

व्याप्यस्य वचनं पूव, व्यापकस्य ततः परम् ।
एवं परीक्षिता व्याप्तिः, स्फुटीभवति तत्त्वतः ॥११॥

इदं वाच्यं प्रमेयत्वाज्ज्ञेयत्वात् पूवपक्षके ।
अव्याप्तिः स्याद्धि सिद्धान्तलक्षणं स्वीकृतं ततः ॥१२॥

हेत्वाश्रयस्थिताभावाऽप्रतियोग्यात्मकेन वै ।
साध्येन हेतुसामानाऽधिकरण्यं शुभं हि तत् ॥१३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साध्याभावस्य यो भावो, व्यापकत्वेन सम्मतः ।
तस्य च प्रतियोगित्वं, व्याप्तिस्तु व्यतिरेकिका ॥१४॥

हेतुरस्तु न साध्यं चेति शंका यदि जायते ।
तर्केण खण्ड्यतां तात, स्थिरं तेनानुमानकम् ॥१५॥

व्याप्यारोपणतो व्यापकारोपणं हि तर्ककः ।
वह्न्यभावेन धूमाभावः सिध्यति न संशयः ॥१६॥

गिरिर्धूमी कृशानोर्भो, नैत्यत्रातिप्रसंगतिः ।
तप्तायोगोलके धूमाभाववह्न्योश्च सत्वतः ॥१७॥

अभावस्तु त्रिधा लोके, सामान्याभाव आद्यकः ।
वशेषाभावनामा यो स द्वितीय उदाहृतः ॥१८॥

उभयाभावनामा यो, स तृतीयः प्रकीर्तितः ।
सामान्याभाव एवात्र, स्वीकृते नहि दूषणम् ॥१९॥

इति ज्ञात्वैव यत्नेन, नव्यन्यायं पठ प्रिय !
प्रकरणादत्र काठिन्यं, प्रतिभायाः प्रवर्धकम् ॥२०॥

बुद्धिस्तात्कालिकी ज्ञेया, मतिरागामिगोचरा ।
प्रज्ञां नवनवोन्मेषशालिनीं प्रतिभां विदुः ॥२१॥

—गिरने से पहले उनकी रक्षा करें—

बालों और दाँतों की नियमित देखभाल और उनका पोषण आवश्यक है। क्यों न फिर उनके गिरने से पहले उनकी रक्षा की जाय? इसके लिए उदयपुर का गाय छाप ब्राह्मी आँवला तेल और काला दन्त-मन्जन सर्वोत्तम है। इन आयुर्वेदिक उत्पादनों से आपके बाल घने तथा लम्बे और आपके दाँत [illegible] [illegible] मजबूत रहेंगे।

इलाज से बचाव बेहतर है!

गाय छाप

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतीय डाक व तार

अपने १,००,००० डाकघरों
१०,००० तारघरों और
१०,००,००० टेलीफोनों के जरिये

राष्ट्रीय एकता और अन्तर्राष्ट्रीय समझ-बूझ बढ़ाने में कार्यरत है

डाक-तार विभाग को यह गर्व है कि वह ५० करोड़ भारतवासियों और दुनिया के ३०० करोड़ लोगों के बीच सम्पर्क का साधन बनता है।



भारतीय डाक व तार

dovp 68/396

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गान्धेः शतवार्षिकी

-: गान्धेर्महात्मनो मितव्ययत्वम् :-

मूललेखकः-श्रीशंकरलालबैंकर महाशयः
अनु० विद्याभूषणः श्रीगणेशरामशर्मा डूंगरपुरम्

यरवदा-कारागारे महात्मागान्धिरहं च सह बन्दिनावास्व। कारागारे गान्धिमहाभागः स्वकक्षं स्वयमेव सम्मार्जयति स्म। द्वित्रदिनानन्तरमहं तमवोचम्-"भवत्कक्षस्य स्वच्छताकार्यं कर्तुं मामनुमन्यताम् भवान्"। स च मम कथनं स्वीचकार। अहमादौ तस्य कक्षं सम्मार्जय, तदनु मामकीनम्। अर्द्ध-सप्ताहप्रायः समयस्त्वेवमेव व्यतीयाय, तत एकदा गान्धिमहोदयो मामुवाच—"यदि भवान्न कुर्य्यात्तदाह किमपि वदेयम्, अहं स्वयमेव मम कक्षं सम्मार्जयिष्यामि"।

"किमर्थम् ?" अहमपृच्छम्।

स मामुदतरत्-"भवत्कार्यं तु शोभनमास्ते, परन्तु मलिनता नांशतोऽप्यवशिष्येत, तदेव मे रोचते। भवान् सम्मार्जयति, तदा केषुचित्स्थानेषु कोरोषु च धूलिरवशिष्यते। स्वच्छता तु सम्यग् भवितुमर्हति। पुस्तकान्यपि च स्वस्थानादुत्तार्य स्वच्छीकर्तव्यानि"।

अहमवदम्—"अतः परमहमेतदवधास्यामि, यथा भवानादिष्टवांस्तेनैव प्रकारेण सर्वं सम्यक् साधयिष्यामि"।

तदनन्तरमहं तस्य वस्त्रक्षालनस्यानुमतिमैच्छम्, सा च मेऽलभ्यत। वस्त्राणि सर्वथा दुग्धफेनस्वच्छानि भवेयुरित्यहमवदधे। ततस्तानि शोषयित्वा स्तरीकृत्य यथायोग्यमस्थापयम्। एकदा सोऽत्र विषये मामुवाच—"वस्त्रक्षालनस्य कार्यं त्यजतु भवान्, अहमेव हि क्षालयिष्यामि"।

"किमत्रापि किमपि ………"।

सोऽवोचत्—"वस्त्राणि स्वच्छं प्रक्षाल्यन्ते, परन्तु ममेत्थं प्रतीयते यदैपणं (साबुन) समधिकं व्येति। भवान् यावन्ति दिनानि व्ययत्येपणम्, ततो द्विगुणान्यहमुपयुञ्जे"।

अहमवदम्—"अधुनाहं सावधानं तद्व्ययं करिष्ये"। अहमेतदचिन्तयम् यदैपणं किञ्चिदधिकं व्ययं गच्छेच्चेत्तदा न कापि हानिः, परं वस्त्राणि स्वच्छानि प्रोज्ज्वलानि भवितुमर्हन्तीति। परन्तु तत्रापि च मितव्ययपूर्वकं कार्य-सम्पादनस्य दृष्टिर्भवेदिति शिक्षितं मया।

कारागारे जल-दुग्धादि पदार्थानां तापनाय चुल्ली समुपालभ्यत। प्रारम्भे दीपको नाभूत्परमन्ते सोऽप्यलभ्यत। तत्प्रज्वालनाय दीपशलाकापि च प्राप्यते स्म। यदैका पेटिका समाप्नोति स्म, तदान्योपलभ्यते स्म।

एकदा गान्धिर्मां पप्रच्छ—"दीपशलाकानामिका पेटिका कियत्सु दिनेषु समाप्तिं गच्छति'?

"यदैका पेटिका समाप्तिं गच्छति, तदापरां गृह्णामि"। अहमुदतरम्।

एतन्निशम्य गान्धिमहोदयोऽवादीत्—"अस्माभिः पेटिकायाः शलाका गणनीयास्तथा दिनस्य पृथक्-पृथक् कार्यार्थं कति शलाका अपेक्ष्यन्त, इत्यपि च द्रष्टव्यम्"।

स हि गणयित्वा मामुवाच—"यदि चैवं व्ययं कुर्याम चेत्तदा पेटिकैका सप्ताहमेकं यावज्ज्वलेन्नाम"।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परं मया गान्धि प्रत्येतद्वक्तव्यमेवाभूत्—"इत्थं गणनया कार्य-सञ्चालनं कठिनमास्ते, यतो वर्षर्तुः समयोऽसौ वर्तते। दीपशलाका निकृष्टतामुपयाति। काचिच्छलाका ज्वलति काचन न चापि ज्वलति। तथापि न्यूनान्न्यूनं व्ययो भवेदेतदर्थं प्रयतिष्येऽहम्"।

अथ गान्धिर्महाभागः प्रतिदिनं शतसंख्याका द्राक्षा उपयुङ्क्ते स्म। ताश्च सम्यग्गणनीया भवन्ति स्म। ततस्ता यथायोग्यं स्वच्छीकृत्य जले प्रक्षालनादनन्तरं प्रादां तस्मै। तदिदं कार्यं प्रातः काले कर्तव्यमभूत्। एकदा स मां वक्तुमारेभे—"भवांस्तु दशोत्तरशतमेकं द्राक्षाणां मे प्रादात्"।

अहमवदम्—"शीघ्रतयैवानुमानतः प्रादाम्"।

तदा स उवाच—"नैवम्। मत्कृतेतु ताः सर्वाः शतसंख्याका एवापेक्ष्यन्ते"।

इत्थं सामान्येष्विव प्रतीयमानेष्वपि विषयेषु गान्धिर्महात्मात्यन्तं ध्यानं प्रार्पयति स्म साव-धानतां च वर्तयति स्म।

अस्माकं सामान्यबन्दित्वस्य दण्डो बभूवात एव नियमानुसारं वयं स्वकीयानि वस्त्राणि परिधातुमपारयाम। कारागारे मम धौत्रवस्त्रं यत्र तत्र व्यशीर्यत। मया नवीनं धौत्रमानेतुं लिखितमभूत्, परन्तु तदागमने विलम्बो बभूव। अस्मिन्नन्तरालेऽहं तदेव शीर्णं धौत्रवस्त्रं परि-दधानोऽभूवम्। मम शीर्णं धौत्रवस्त्रमालोक्य गान्धिमहोदयो मामवदत्—"तदिदं धौत्रवस्त्रं विशीर्णमास्ते"।

"अन्यदानायितमास्ते"। अहमवदम्।

"यदि शीर्णमस्ति तदा किमर्थं नो सीव्यति भवान्"? अथ च स सत्यमेव मम धौत्रवस्त्रं शिर्णमतीव सम्यक्प्रकारेणासीव्यत्।

स च वक्तुमुपचक्रमे—"एवंविधस्य कार्य-करणस्य ममातीवाभिरुचिर्वर्तते। यदा यदा समयावकाशो लभ्यते, तदा-तदेत्थं विधं कार्य-महं शिक्षे। बहिस्तु पर्याप्तं कार्यजातं भवति, ततः समयावकाशो नोपलभ्यते; परन्तु यदा कारागारे-आगमनं भवति, तदैवं विधं कार्य-मनायासं शिक्षितुं शक्यते। एवं मयात्र कारा-गारे शिक्षणयोग्यानि सर्वाण्यपि च कार्याणि शिक्षितानि। अहं तूपानत्कारस्यापि कार्यं जाने। 'चप्पलं' त्वहं सम्यङ्निर्मातुं प्रभवामि। एत-त्कार्यमप्यहमफ्रीकाया एकस्मिन् कारागृहेऽशिक्षे"।

क्षणानन्तरं स उवाच—"गृहनिर्माणादेः कार्यमप्यहं शिक्षितुमिच्छामि, परमेतदनुकूलं वातावरणं नोपलभ्यते। अत्राहं पृथक् स्थापि-तोऽस्मि; तदा पुनर्मां कर्मशालां गन्तुं कथमि-वानुमन्येरन्नधिकारिणः। नो चेद्गृहनिर्माण-कार्यमप्यहमशिक्षिष्ये। एतद्धि कार्यं पर्याप्तं महत्त्वपूर्णमास्ते, तथैतच्छिक्षणीयमेव"।

गान्धिमहाभागः सौचिकस्य कार्यं जजान। नैतावदेव, तदिदं कार्यं तस्मा अभ्यरोचतापि। समग्रं दिनं तु तस्य कार्यं कुर्वत एव व्यत्येति स्म, परन्तु सायमर्द्धघण्टात्मको वा घण्टात्मको वा समयावकाशोऽलभ्यत। सोऽपि वृथा न यायादिति कारागाराधिकारिणः सकाशाद् वस्त्रमानाय्योप-धानकोशं सीव्यति स्म।

मम कारागारान्मुक्तेः स्वल्पदिनानन्तरमे-वाहमजानाम् यत् स पेषणी-पेषणस्यापि कार्य-मारभत तथा च दिनानुदिनं पिनष्टयपि।

गान्धिमहोदयः कथयति स्म यद्धि स्वहस्ताभ्यां कार्य-सम्पादनं जीवनार्थमतोवावश्यकमास्ते। या बुद्धिः, शक्तिश्चैकस्मिन् कार्ये समुपयुज्यते सान्यस्मिन् कर्मण्यप्युपयोगिनी सिद्ध्यतीति।

अॉक्टूबर ६८ मासस्य 'नवनीतात्' साभारम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

❀ जिज्ञासा ❀

जिज्ञासुः श्रीकल्याणदत्तशर्माणः प्रधानाध्यापकाः खोरी

महाभारतयुद्धं हि तावत्कौरवपाण्डवानां पारस्परिकेर्ष्याद्वेषमूलकमिति तु निश्चप्रचमेव। तत्र कः पक्षः सदोषः कश्चादोष इति तु नात्र वक्तव्यमपेक्षते नाम। यदा युद्धमिदमासीदारब्धं तदा खलु सञ्जयोऽपि वर्तमानस्तत्र। तत्प्रधनस्य स मुख्यो द्रष्टा। प्रत्यक्षमवलोक्यासौ धृतराष्ट्रमपि तदीयवृत्तजातं पूर्णरूपेण श्रावयामास। इममेव संजयधृतराष्ट्रसंवादमधिकृत्य संस्कृतजगति प्रायो धारणैषा संजाता वर्तते यत्सञ्जयस्तावद् दिव्यदृष्टिमधिगम्य प्रवर्त्तमानमेव महाभारतमायोधनं पश्यन् सन् धृतराष्ट्राय वर्णितवानासीत्। अर्थात् तदानीमपि तावदाधुनिकवेलावदेवासीद् दूरदर्शनकार्यक्रमपरम्परा (टेलीविजन प्रोग्राम) संजयाधीना, यया प्रत्यक्षदर्शनपुरःसरमसौ संजयो धृतराष्ट्रं बोधयामासेति।

यद्यप्यत्र नावलोक्यते प्रमाणविशेषः स्वाधीतग्रन्थेषु मयका तथापि कर्णपरम्परयाश्रयत एव। तत्तु भ्रान्तमेव। तथाहि—

यदि वस्तुतः संजयस्तादृशेन दूरदर्शकयन्त्रेण दिव्यदृष्ट्या वा पश्यन्नेव वृत्तान्तवर्णनमकरिष्यत्तदा न तावदसौ भूतकालिकक्रियाणामुपयोगमकरिष्यत्। किं च, धृतराष्ट्रोऽपि वर्त्तमानकालिकक्रियया प्रश्नमकरिष्यन्न भूतकालिकक्रियया यथा—

'धर्मक्षेत्रे कुरुक्षेत्रे, समवेता युयुत्सवः।
मामकाः पाण्डवाश्चैव, किमकुर्वत संजय'॥

अत्र 'किं कुर्वन्ति' इत्येव शोभनं भवितुं शक्नोति। एवमेव सञ्जयोत्तरेऽपि ………… राजानमब्रवीत्, शंखं दध्मौ० दध्मुः इति भूतकालिकक्रियाप्रयोगः। किंच प्रत्यक्षविरोधिलिट्लकारस्य प्रयोगेण तु सर्वथैतदेवावगम्यते यदायोधनानन्तरमेव संजयेनाखिलवृत्तं श्रावितमिति। सञ्जयस्यैतामुक्तिं पश्यन्तु 'व्यासप्रसादाच्छ्रुतवान्' अनयाप्येतदेवावसीयते यदसौ व्यासप्रसादात्—व्यासरचितवर्णनादुक्तवृत्तजातमवगतवान्, न तु दृष्टवान्। किं च, व्यासप्रसादाद् दिव्यदृष्टिर्यदि संजयस्य तदा प्रज्ञाचक्षुषो धृतराष्ट्रस्यैव सा कथन्नाभूदित्यपि संशयभूमिरेव। एवं विचारपरम्परया तावदियं कल्पना मुधैवेति।

आशासे, विद्वद्वरा विषयेऽस्मिन् किमपि वैशिष्ट्यावगाहि ज्ञानं दास्यन्ति 'भारती' मुखेनाचिरमिति।

दी अवध शूगर मिल्स लिमिटेड

प्रधान कार्यालय :—
इण्डस्ट्री हाउस
१५९ चर्च गेट रिक्लेमेशन
बम्बई—१

मिल्स :—
हरगांव
जिला—सीतापुर
उत्तरप्रदेश

निर्माता :—
शुद्धा, श्वेता, कणवती शर्करा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथमिव जीवनं साहित्यमन्तरा
अथवा
को वै सम्बन्धः जीवनसाहित्ययोः

ले० श्रीराधेश्याममिश्रः भू० पू० प्राचार्यः, महाविद्यालयः, नवलगढः, रामगढः,

पूर्वानुवृत्तम्—

सामान्यतस्तु साहित्यस्योपादेयत्वं वर्णयन् कश्चित् साहित्यकारो भणति—

"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये सद्यः परिनिर्वृतये कान्तासम्मिततयोपदेशयुजे", अर्थात् यशःसम्पत्तिलाभः, परस्पर व्यवहारशिक्षा, रोगादिविपत्तिनाशः, सद्य आनन्दानुभावकः, प्रियतमावन्मनोभावनोपदेशप्रदश्चेतिगुणाः साहित्ये विद्यमानाः सन्ति। उदाहरणान्यपि साहित्याकाशे तारागणा इव द्योतन्ते। यथा हि विदुषः सर्वमान्याः। धनप्राप्तिश्च आकाशवाणी-सभासमितिभ्यो दृश्यते। व्यवहारे कौशलं तु साहित्याध्ययनस्य मुख्यं फलमेव। रोगादिनाशः कथं स्यादिति चेतिहासो वर्णयति। यथाहि कुष्ठपीडितं मयूरकवेः शरीरं "सूर्यशतक" रचनया पुनरपि कान्तिमदभवदिति प्रसिद्धम् किल।

अद्यतने काले तु शंकाकुला लोकाः पृच्छेयुः अस्त्येतत्सम्भाव्यं विश्वसनीयं वृत्तमिति। प्रत्यक्षवादिनां बुद्धिमात्रप्रत्यर्थिनां विज्ञानकालीनानां मतौ एतादृशाः प्रश्नाः सहजा एव। यतो हि तेषां हृदयं तादृग् विकसितं नास्ति यादृशी बुद्धिः। हृदयं तु मानवभावनामूलकशिक्षया (Humanities) पूर्णतां याति। आधुनिकशिक्षापद्धतौ विज्ञानेन सह मानवभावनात्मिकं शिक्षणं न दीयते, तयोर्भिन्नविषयकत्वात्।

अत्र फ्रांसदेशीयस्यैकस्य डॉक्टरस्य कथानकं, रोगिभिः सह तस्य व्यवहारः, अनन्यसामान्यपद्धतिश्च सम्बन्धांशं पुष्णातीत्येव वर्ण्यते।

आसीत् कोपि फ्रांसदेशीयश्चिकित्सकः "एमील कोउए" नामकः (Emile Quoe) स तु अनेकेषां रोगाणां चिकित्सां केवलं श्रद्धाविश्वासान् उत्पाद्यैव करोति स्म। श्वासवातव्याधिक्षयादिरोगिणः कतिपयैरेव दिनैः स्वस्थीभूय चिकित्सकं प्रति स्वानुगृहीततां प्रदर्शयितुकामास्तमुपगच्छन्ति स्म।

वस्तुतो रोगाणामोषधयश्चिकित्सकश्च शरीर एव तिष्ठन्ति। नैषास्ति जनश्रुतिः किंवदन्ती वा। एतद्विषयिका चिकित्सापद्धतिरनेकैर्विद्वद्भिः सश्रद्धाविश्वासं वर्णितास्ति। एव सति अपि मयूरकवेः श्लोकशतेन कुष्ठनिवारणमसङ्गतं भवेत्? कवेः कवित्वं तु श्रद्धाविश्वासमूलकमेवात्र नास्ति संदेहः।

साहित्यकार एव साहित्यं रचयति। तस्यैवान्तःकरणं मूर्तरूपेण साहित्यं भवति। अतो महीयांसस्ते स्वकृतिभ्यः। तेषां प्रतिभा कदाचित्परोक्षदृष्टिर्भूत्वा चमत्कृतिमुत्पादयति। यथाहि गङ्गकवेरेकदा स्वपोषणकर्तुर्नृपस्यान्तःपुरवर्णनं प्रत्यक्षीकृतमिवासीत्। अन्तःपुरे कवेर्गतिरस्तीति नृपस्य शङ्कोत्पन्ना जाता। शङ्का चान्यै र्द्वेषबुद्धिभिः प्रवृद्धा राज्ञः क्रोधस्य कारणमभवत्। क्रोधमूलश्च कवेः प्राणनाशः हस्तिपादमर्दितस्य।

रघुवंशे च त्रयोदशे सर्गे लङ्कां विजित्य पुष्पकेनायोध्यां प्रस्थितस्य रामस्य मुखात् समुद्रस्य तपोवनस्य च वर्णनं प्रत्यक्षानुभूतमिवास्ते। कालिदासः कदाभवदित्यद्यापि विवादास्पदम्। गुप्तकालीनः कविः कालिदास इत्यपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्यमाने न कोपि विश्वसिति कालिदासेनाधुनिक-वायुयानैर्यात्रा कदापि कृतासीदिति । तथापि कविकालिदासकृतं विमानयात्रावर्णनमाधुनिकमिव । न केवलं भारतीयेष्वेव अन्यत्रापि कविप्रतिभासौन्दर्यं चमत्कृतिमावहति दिव्यताञ्च द्योतयति ।

प्राचीनतमेष्वपि ग्रन्थेषूदाहारणाय कठोपनिषदि प्रेयसः श्रेयसश्च वर्णनमायाति । मानवाय प्रेयः रोचते श्रेयो वेति कतमं तयोर्वृणुयात् पुरुषः इत्यपि सूच्यते । तस्येदं पद्यम् अद्य उद्ध्रियते ।

"श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः । श्रेयो धीरोऽभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते," अर्थात् यमदेवो नचिकेतमुपदिशति—"श्रेयस्करं प्रियकरञ्चोभे प्रयोजने पुरुषस्य वरणार्थमुपस्थिते भवतः । तयोः पुरुष एकं वृणीते । श्रेयस्कामः श्रेयः प्रियकामश्च प्रेय इति । श्रेयसा कल्याणं प्रेयसा च प्रियवस्तु प्राप्यते । साहित्येपि एवं संघटते ।

अथ साहित्ये किन्नाम श्रेयः किञ्च प्रेय इत्यपि विवेचनीयं भवति । श्रेयःप्रेयसौ शब्दौ भावनामूलकौ स्तः । श्रेयोभावनया श्रेयः प्रेयोभावनया च प्रेयो वरणीयं स्यात् । इत्थं द्विधावृत्तिः पुरुषस्येति । यश्च संसारव्यवहारेषु लग्नः तत्रैवेन्द्रियसुखमभिलषितुकामः व्यवहारकौशलेन जीवनसाफल्य मन्यमानः तत्प्रयोजनमुद्दिश्य तादृशं साहित्यं चिनुते यादृशेन तस्य प्रेयः सिध्येत् । अस्मिन् पुरुषे स्वभावतः सहजरजसः प्राधान्यात् प्रवृत्तिपथानुगामित्वमायाति । विपर्यये तु सहजसत्वोद्रेकात् तादृशस्य पुरुषस्यात्मज्ञानलालसाक्रान्तचित्तस्य संसारव्यवहारेषु न तादृशी प्रवृत्तिः यादृशी पूर्वोक्तस्य प्रेयःकामस्य । अत एव विपरीतस्वभावः स श्रेयो भिलषते । अत्र श्रेयो नाम कल्याणम् । तत्तु आत्मसाधनमेव । एवमात्मानं साधयितुकामः अन्तःकरणचतुष्टयं साधु संशोध्य तद् विश्वात्मनः प्रतीके हृद्गुहायां निविष्टे चेतनातत्वे लीनं कर्तु कामः अर्थात् तेनैकात्म्यतां कर्तु कामः संसारव्यवहारेषु निवृत्तचित्तः निवृतिमार्गमवलम्बते, तदनुकूलं श्रेयःसाधकं साहित्यं वृणुते । ईदृशी सार्थकता कठोपनिषद्वाक्यस्य । एवमस्ति समन्वयस्तयोः ।

भगवद्गीता तूभयोर्भेदमपास्य कर्मफलसंन्यासेन प्रवृत्तौ अपि निवृत्तिफलं साधयते । उभयोः समन्वयः कथमभ्यासकोटिमारूढो भवेदिति अतीवगहना गतिः ।

यो हि रस्यते आस्वाद्यते स रसः इति व्युत्पत्त्या यत्र रसस्तत्र साहित्यमिति व्याख्या च प्रवृत्तिनिवृतिमार्गगावुभावपि पुरुषौ स्वस्वाध्यायविषयेषु रसप्रेप्सया तान् प्रयोजनीकृत्य प्रवर्तन्ते । अतोऽध्यात्मशास्त्रं तथा प्रियं श्रेयः प्राप्तुकामाय, यथा चान्यानि लौकिकानि शास्त्राणि प्रेयो लब्धुकामाय स्युः । कर्मफलसंन्यासमार्गे येषां रसास्वादः प्रयोजनत्वेनानुभूयेत तेभ्यस्तु तद्विषयका ग्रन्थाः साहित्यं भवितुमर्हन्ति ।

साहित्यविज्ञानयोर्यथाक्रमं प्राचीनार्वाचीनविद्यया विवेचनमपि नास्ति संगतं यथोपरि कैश्चिद् हि पाश्चात्यविद्वद्भिर् व्यधायि" पुरातनं काव्यं नूतनतमं विज्ञानं विश्वसनीयतामर्हति इति । अत्र हि कालिदासकवेरुक्तिरतितरां न्यायसंगता प्रतीयते ।

यथा हि—

"पुराणमित्येव न साधु सर्वम्
न चापि काव्यं नवमित्यवद्यम्
सन्तः परीक्ष्यान्यतरद्भजन्ते
मूढः परप्रत्ययनेयबुद्धिः"

अर्थात् काव्ये साहित्ये वा गुणवत्तायाः साधुतायाः समीचीनताया वा मानदण्डं पुराणत्वं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नूतनत्वं वा नास्ति । विवेकिनो हि स्वबुद्ध्यैव गुणदोषान् परीक्ष्योभयोरेकतरमेवाङ्गीकुर्वन्ति । मूर्खास्तु अन्येषु विश्वासं कृत्वानुसरन्ति तद् यदन्यै बुद्धया निर्धारितं स्यात् । एतादृश एव परीक्षानिकषोपलोऽन्यादृशेष्वपि लौकिकेषु विषयेषु सम्मान्यो भवेत् ।

रसविवेचनमधिकृत्य कुमारिलभट्टस्यान्तेवासिनो मण्डनमिश्रस्य सहाध्यायिन आद्यशंकराचार्यस्य च समकालीनस्योत्तरचरितस्य रचयितुर्भवभूतेः विचित्रोक्तिः स्मृयतेऽत्र संदर्भे । तद्धि—

"एको रसः करुण एव निमित्तभेदाद्भिन्नः
पृथक् पृथगिवाश्रयते विवर्तान्
आवर्तबुद्बुदतरङ्गमयान्विकारान्
अम्भो यथा सलिलमेव तु तत्समग्रम्"

अर्थात्—यथा ब्रह्मैव सर्वमखिलं न हि किञ्चिदस्ति' तथैव करुणारस एव प्राधान्येन रसः । यथा च जल बुद्बुदतरङ्गावर्ताद्यनेकास्ववस्थासु नामरूपाभ्यां भिन्नासु अनेकानि रूपाणि नामानि चादधाति, तथैव करुणापि शृङ्गाराद्यनेकनामरूपाणि गृहीत्वा साहित्यव्यवहारे समायाति । मुख्यस्तु सलिलवत् करुणारस एव । रसस्तु चेतनाविज्ञानविषयः (Psychological Problem) । अस्मात् कारणात अस्य प्रामाण्यं तावन्न सम्पद्यते यावत्साक्षादनुभूत्या न परीक्ष्यते । अनुभूतिरेवास्य निकषः । भवभूतेः कासीत् तर्कवितर्क शैलीति न ज्ञायते । कथं च तेन करुणैव सर्वरसानां स्रोत इवेति न ज्ञायते । चेतनाविज्ञानविद एव समादधतु ।

अवसाने, कोस्ति जीवनस्य साहित्येन संबन्ध इत्यस्य संक्षेपतः प्रतिपादनं विधाय अखिलस्य संक्षेपार्थमधः सारं विलिख्य विरम्यते ।

मानवहृदि स्थितस्य चेतनातत्वस्य प्रकृतिगुणैरावृतस्य प्राग् अद्यतनवासनाभिरभिभूतस्योत्थानाय साहित्याध्ययनव्यापारस्तथैवानिवार्यः यथा हि आकरान्निःसृतस्य रत्नस्य शोधनाय क्रियाविशेष उपयुज्यते ।

जीवनस्य भूषणं साहित्यम् । साहित्येन जीवनं प्रस्फुटति, विकसति पूर्णतां च याति ।

शुभ कामनाओं के साथ

* इन्डो फॉरेन एजेन्सीज् *

२३, सर फिरोजशाह मेहता रोड़,

बम्बई – १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान प्राच्यविद्या प्रतिष्ठान,

शोध, संदर्भ एवं दुर्लभ महत्त्वपूर्ण ग्रंथों का
राजस्थान पुरातन ग्रंथमाला के अन्तर्गत प्रकाशन

प्रकाशित ग्रंथों की सूची

(क) संस्कृत प्राकृत

प्रकाशन का नाम	सम्पादक	मूल्य
दशकण्ठवधम्	श्री गङ्गाधर द्विवेदी	रु० ४–००
श्रीभुवनेश्वरी महास्तोत्रम्	श्री गोपालनारायण बहुरा	रु० ३–७५
रत्नपरीक्षादिसप्तग्रन्थसंग्रह	पद्मश्रीमुनि जिनविजय, पुरातत्वाचार्य	रु० ९–२५
स्वयम्भूछंद	प्रो० एच० डी० वेलणकर	रु० ७–७५
वृतजातिसमुच्चय	" " "	रु० ५–२५
कविदर्पण	" " "	रु० ६–००
वृत्तमुक्तावली	स्व० पं० श्रीमथुरानाथ भट्ट	रु० ३–७५
कर्णामृतप्रपा	पद्मश्रीमुनि जिनविजय, पुरातत्वाचार्य	रु० २–२५
पदार्थरत्नमंजूषा	पद्मश्रीमुनि जिनविजय, पुरातत्वाचार्य प्रस्तावना–श्री दलसुख मालवणिया	रु० ३–७५
त्रिपुराभारती–लघु–स्तव	पद्मश्रीमुनिजिनविजय, पुरातत्वाचार्य	रु० ३–२५
प्राकृतानन्द	" "	रु० ४–२५
इन्द्रप्रस्थ–प्रबन्ध	डा० दशरथ शर्मा	रु० २–२५
एकाक्षर–नाम कोश–संग्रह	पन्यासप्रवर मुनि रमणीकविजय	रु० ९–००
वासवदत्ता कथा	जे० एम० शुक्ला	रु० ४–५०
वृतमौक्तिक	म० विनयसागर	रु० १८–२५
चांद्रव्याकरण	पं० वेचरदास दोशी	रु० ७–००

पुस्तक विक्रेताओं को २५ प्रतिशत कमीशन दिया जाता है ।

(राजस्थान सरकार द्वारा प्रसारित)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाराणसीस्थ-सार्वभौमसंस्कृतप्रचारकार्यालयस्य
विशेषाधिवेशनसमारोहः

श्रीकेशवमिश्रः प्रधानमन्त्री, वाराणसी

बहवः खलु विभिन्नप्रदेशवासिनः संस्कृतज्ञा जानन्त्येव यदखिलभारते संस्कृतप्रचारकै: श्रीवासुदेवद्विवेदिमहोदयैः संस्थापितं वाराणसीस्थं सार्वभौमसंस्कृतप्रचारकार्यालयनामकं संस्थानं सभा-सम्मेलनादीनामायोजनेन-संस्कृत-प्रचारोपयोगिविविधसाहित्यप्रकाशनेन च गतेभ्यो द्वाविंशतिवत्सरेभ्यः संस्कृतसेवायामनारतं निरतं वर्तत इति। एतस्यैव संस्थानस्य ऐषमः पौषशुक्ल त्रयोदशी-चतुर्दशी-पूर्णिमातिथिषु (तदनुसारं १, २, ३ जनवरी १९६९ दिनांकेषु) संस्कृतजगतो हृदयसम्राजां महामान्यानां, दिल्ली-उपराज्यपालानां पण्डितश्रीमदादित्यनाथ झा आई० सी० एस० महोदयानां सभापतित्वे विविधैः सम्मेलनैः सह महता समारोहेण विशेषमधिवेशनं सम्पन्नम्। प्रस्तूयमाने लेखे तस्यैव संक्षिप्तं विवरणं पाठकानां पुरतः समुपस्थाप्यते।

प्रथमदिनस्य कार्यजातम्

मांगलिकं कृत्यम्

प्रथमे दिवसे तावत् प्रातरेव नववादन-वेलायां सम्मेलनस्य निर्विघ्न-परिसमाप्तये वाराणसेयसंस्कृतविश्वविद्यालयस्य वेदविभागाध्यक्षाणां श्री पं० गोपालचन्द्रमिश्रमहोदयानां संयोजकत्वे मांगलिकं कृत्यजातं सम्पन्नम्। अस्मिन्नवसरे सरस्वतीपूजनं संस्कृतविश्वविद्यालयस्य शुद्धाद्वैतजपयज्ञसमितेश्च वेदपाठिभिर्बालकैः चतुर्णामपि वेदानां सस्वरमन्त्रपाठः, मांगलिकपद्यपाठः तथा हवनादिकं चेति विविधानि कृत्यानि विधिपूर्वकं सुसम्पादितानि।

प्रदर्शनीनामुद्घाटनम्

मध्याह्ने साप्ताहिक "गाण्डीवम्"-सम्पादकानां पण्डित श्रीरामबालकशास्त्रिणामुद्घाटन-भाषणानन्तरं प्रदर्शन्या उद्घाटनमक्रियत। प्रदर्शन्यां त्रिविधा सामग्री प्रदर्शिता आसीत्। प्रथमतः संस्कृतस्य महाकाव्य-काव्य-मुक्तक-नाटक-प्रहसन-कथा-उपन्यास--जीवनी--यात्रा आलोचना-स्तुति-गीत-सुभाषितप्रभृतिविषय-संबद्धानां नूतनरचनानां संग्रहः, द्वितीयतः संस्कृतशिक्षणोपयोगिनां वर्णमाला-रूपावली-अनुवाद-निबन्ध-व्याकरण-गद्य-पद्यसंग्रह वाक्य-संग्रहप्रभृतिविषयेषु विविधाः पद्धतीरनुसृत्य लिखितानां पुस्तकानां संग्रहः, तृतीयतश्च सम्प्रति प्रकाश्यमानानां संस्कृतस्य विविधपत्र-पत्रिकाणां संग्रहः। प्रदर्शन्या अन्यतम उद्घाटकः श्री डा० सत्यव्रतसिंहमहोदयः (लखनऊ विश्वविद्यालये संस्कृतविभागाध्यक्षः) अस्वास्थ्य-वशाद् उद्घाटनसमारोहे न सम्मिलितः। पत्र-पत्रिकादिषु संस्कृतविद्यालयेभ्यः प्रकाश्यमाना वार्षिकपत्रिका अपि प्रदर्शिता अभूवन्।

विशेषाधिवेशनम्

प्रथमदिने एव सायं संस्कृतविश्वविद्यालयस्य सुसज्जिते मुख्यभवने महामान्यपण्डित-श्रीमदादित्यनाथझामहोदयानामध्यक्षतायां विशेषाधिवेशनसमारोहः सम्पन्नः। कार्यालयस्य संस्कृतसंगीतशिक्षकैः श्रीपण्डितराधाकान्त-शास्त्रिभिः 'अमर वाणि जय जननि" इति प्रार्थनागीतेन अधिवेशनस्य शुभारम्भे विहिते प्राच्यविद्याविशारदैः डा० श्री रायगोविन्दचन्द्र-महोदयैः समागतानामतिथीनां कृते विनयवैदु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ष्यपूर्णं स्वागताभाषणमकारि । अनन्तरं काशीविद्यापीठस्योपकुलपतिभिः श्रीराजारामशास्त्रिमहोदयैरुद्घाटनभाषणे विहिते कार्यालयस्य प्रधानमन्त्रिभिः श्रीकेशवचन्द्रमिश्रमहोदयैः कार्यालयस्य कार्यविवरणं मुद्रितं पठितम् । ततः परं पण्डितराजश्रीराजेश्वरशास्त्रिद्रविडमहोदयैस्तथा काशीहिन्दुविश्वविद्यालयस्य रेक्टरपदभाग्भिः आचार्य-श्रीहजारीप्रसादद्विवेदिमहोदयैः शुभाशंसनेषु वितीर्णेषु श्रीमतां झामहोदयानामेतदधिवेशनस्य कृते विशेषरूपेण सरलसरसवचोभिरुपनिबद्धं मनोहारि अध्यक्षीय भाषणं सम्पन्नम् । तदनु श्रीसीतारामचतुर्वेदिमहोदयैर्धन्यवादप्रदानानन्तरं विशेषाधिवेशनसमारोहः समाप्तिमगात् ।

बालोपयोगिरचनासम्मेलनम्

विशेषाधिवेशनस्य कार्यकलापेषु समाप्तेषु किञ्चित्कालानन्तरं तस्मिन्नेव मंचे बालोपयोगिरचनासम्मेलनं नाम द्वितीयोऽपि कार्यक्रमः "पारिजातहरणम्" महाकाव्यप्रणेतॄणां, मूलतो देवरियानिवासिनां सम्प्रति च वाराणसीमलंकुर्वतां, श्रीमदुमापतिद्विवेदि "कविपति" महोदयानामध्यक्षतायां लखनऊविश्वविद्यालयस्य प्राच्यविद्याविभागे प्राध्यापकानां न्यायाचार्यश्रीपण्डित आनन्द झा महोदयानां कवितापाठेन सह समारब्धः । अस्मिन् सम्मेलने बाह्यैः वाराणसीनिवासिभिश्च कतिपयैः कविवर्यैः स्वकीया बालोपयोगिन्यः सरलमधुरा रचनाः श्राविताः संस्कृतसाहित्ये बालोपयोगिरचनानां निर्माणस्य प्रोत्साहनप्रदानस्य च कृते आयोजितमिदं प्रथमं सम्मेलनमासीत् ।

द्वितीयदिनस्य कार्यजातम्

विचारगोष्ठी

द्वितीयदिने प्रातः "संस्कृतस्य प्रारम्भिकशिक्षणपद्धतेः सरलं वैज्ञानिकं च स्वरूपं कीदृशं स्यादिति विषयमवलम्ब्य विचारगोष्ठी प्रावर्तत । आरम्भे गोरखपुरविश्वविद्यालयस्य संस्कृतविभागे-अध्यापकैः डा० श्री रामअवधपाण्डेयमहोदयैः प्रवर्तमानशिक्षणपद्धतिसमीक्षापूर्वकं विषयोपन्यासः विस्तरेण कृतः अनन्तरं च संस्कृतविश्वविद्यालयस्य पालिविभागाध्यक्षैः श्रीजगन्नाथ उपाध्यायमहोदयैस्तथा प्रशिक्षणविभाध्यक्षैः श्रीकरुणापतित्रिपाठिमहोदयैश्च स्वकीया विचारा उपस्थापिताः । अन्ते च शिक्षाजगति सुविख्यातनामधेयानाम् आचार्य श्रीपण्डितसीतारामचतुर्वेदिमहोदयानामध्यक्षीयभाषणे जाते गोष्ठी समाप्तिं गता ।

संस्कृतप्रचारसम्मेलनम्

मध्यान्हे आन्ध्रप्रदेशस्य उन्नतसंस्कृतशिक्षाधिकारिणां श्रीकप्पगन्तुल–लक्ष्मणशास्त्रिमहोदयानां सभापतित्वे संस्कृतप्रचार-सम्मेलनं प्रारब्धम् । तत्रादौ संस्कृतविश्वविद्यालयस्य साहित्यविभागाध्यक्षैः श्रीपट्टाभिरामशास्त्रिमहोदयैः स्वागतवचनेषु व्याहृतेषु ओडीसा साहित्य-एकेडमीसंस्थानस्य भूतपूर्वैः सम्पादकैः प्रो० श्रीगौरीकुमारब्रह्मामहोदयैः सुदीर्घेणापि सकलविद्वज्जनमनोहारिणा सरसमधुरेण भाषणेन सम्मेलस्योद्घाटनमकारि । सम्मेलनमिदं सभापतिमहोदयानामध्यक्षीयभाषणेन तथा सभासंयोजकानां श्री प० वासुदेवद्विवेदिशास्त्रिमहोदयानां धन्यवादप्रदानेन च सह समाप्तिमगमत् ।

बालसंस्कृतसम्मेलनम्

अस्य समारोहस्य विविधेषु कार्यकलापेषु बालकानामिदं सम्मेलनं सर्वथा अपूर्वं, नितरामाकर्षकं, बालक–बालिकानां च परममुत्साहवर्धकं समजायत । अत्र द्विवर्षीयबालकैरारभ्य पंचदशवर्षीयैर्बालकैः वेदपाठः, श्लोकपाठः अष्टाध्यायीसूत्रपाठः, सन्धिज्ञानम्, हँसते-खेलते संस्कृत, स्तुतिप्रार्थना, अभिनयः, भाषणं, वार्तालापः गीतं चेति विविधमनोरमाः कार्यक्रमाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समुपस्थापिताः । अस्मिन् सम्मेलने संस्कृत-पाठिनः क्रिश्चियनबालका अपि सम्मिलिता अभूवन् । शिशुबालकैरुपस्थापितानि विविध-दृश्यानि सम्मेलनस्य अस्य सभासदां कृते चिर-स्मरणीयानि जातानि । अस्य सम्मेलनस्याध्यक्षाः पण्डितराजश्रीपण्डितकालीप्रसादमिश्रमहोदया:-अभूवन् । स्वागतभाषणकर्ता च विद्यार्थी श्रीयुगलकिशोरमिश्र आसीत् । सम्मेलनान्ते देवरियामण्डलस्थ-श्रीबैकुण्ठनाथपवहारिसंस्कृत-महाविद्यालयसंचालकैः माननीयश्रीमौनी हरि-सेवकदासमहोदयैर्बालक-बालिकाभ्यो मोदक-वितरणमक्रियत ।

तृतीयदिनस्य कार्यजातम्

संस्कृतप्रचारसम्मेलनस्य समापनम्

तृतीयदिवसे प्रातः नववादने पुनः संस्कृत-प्रचारसम्मेलनस्य द्वितीयमुपवेशनं प्रारब्धम् । अस्मिन्नुपवेशने विविधा महत्त्वपूर्णाः प्रस्तावाः समुपस्थापिताः सर्वसम्मत्या पारिताश्च । प्रस्तावकाः, प्रस्तावानधिकृत्य वक्तारश्च श्रीबदरीनाथशुक्लः संस्कृतविश्वविद्यालये न्यायवैशेषिकविभागाध्यक्षः श्रीजगन्नाथ उपाध्यायः संस्कृतविश्वविद्यालये पालिविभागाध्यक्षः, श्रीयशवन्तसिंहचौहान् हरदोईमण्डले सकाहाग्रामस्थ श्रीशिवसंकटहरणसंस्कृतमहाविद्यालयस्य प्रधानाचार्यः, आचार्य श्रीरामाश्रयत्रिपाठि – शाहजहांपुरस्थसंस्कृतमहाविद्यालयस्य प्रधानाचार्यः, श्रीवासुदेवमिश्रो वैद्यः जोनपुरस्थस्य अमरभारतीमहाविद्यालयस्य संचालकः तथा वासुदेव द्विवेदी शास्त्री चेत्यनेके विद्वांस आसन् । अन्ते सभापतिमहोदयैः स्वकीयभाषणेन सम्मेलनमिदं सधन्यवादं समाप्त-मुद्घोषितम् ।

महिलासंस्कृतसम्मेलनम्

अस्य समारोहस्य इदं खलु द्वितीयं महत्त्व-पूर्णं सम्मेलनमासीत् । अस्मिन् वाराणस्या भूयस्यो विदुष्यः संस्कृतानुरागिण्यश्च सम्भ्रान्त-महिलाः, बालिकाः, ब्रह्मचारिण्यो विद्यार्थिन्यश्च उपस्थिता आसन् । अस्य सम्मेलनस्याध्यक्षपदे हिन्दूविश्वविद्यालयीय महिलामहाविद्यालयस्य संस्कृत-विभागाध्यक्षा सांख्ययोगपुराणेतिहासाचार्या श्रीमती डा० पद्मामिश्रामहोदया विराजमाना आसीत् । अत्रारम्भे श्रीमती रेखा त्रिपाठी "संस्कृत भारती" संयोजिका प्रास्ताविकं भाषणं कृतवती । तदनु कु० प्रेमलताशर्मणा स्वागतभाषणे कृते आर्यमहिलाहितकारिणी-महापरिषदः, आर्यमहिलामहाविद्यालस्य संचालिका श्रीमती विद्यादेवीमहोदया स्वभाषणेन सम्मेलनस्योद्घाटनं कृतवती । अनन्तरं वाराणसीस्थाभिः कतिपयबालिकाभिः, ब्रह्मचारिणीभिश्च श्लोकपाठ-संगीत-भाषणप्रभृतिषु कार्यक्रमेषु उपस्थापितेषु अध्यक्षमहोदयायाः सरलं सुललितं सारगर्भितंच भाषणमभूत् । अनेन भाषणेन उपस्थिताः सर्वेऽपि विद्वांसो नितरां प्रसन्नाः प्रभाविताश्च आसन् । अन्ते श्रीवासुदेवद्विवेदिमहोदयैः धन्यवादभाषणे विहिते सम्मेलनमिदं समाप्तिगमत् ।

संस्कृतसंगीतसम्मेलनम्

अस्मिन्नेव दिने सायं षड्वादनात् संस्कृत-संगीतसम्मेलनस्य कार्यक्रमः हिन्दूविश्वविद्या-लयीयसंस्कृतकलामहाविद्यालयस्य प्राध्यापिकायाः कु० प्रेमलताशर्मणः साहित्याचार्यायाः सभापतित्वे समारब्धः । सम्मेलनस्यास्य उद्घाटनं साहित्यसंगीतोभयविद्याविशारदैः अभिनवभरतैः आचार्य श्रीसीतारामचतुर्वेदिमहोदयैर्विहितम् । अस्मिन् सम्मेलने विविधैः कलाकारैः प्राचीनान्यभिनवानि सुबहूनि सरसमधुराणि संस्कृतगीतानि श्रावितानि । अत्र सर्वेपि गायका वादकाश्च संस्कृतज्ञा आसन् । कजली-कौवाली प्रभृतिलयेष्वपि निबद्धानि अत्र गीतानि समुपस्थापितानि यानि सभासदां कृते अतितरामाल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हादकारीणि अभूवन् । अन्ते श्रीवासुदेवद्विवेदि-महोदयानां धन्यवादभाषणेन सम्मेलनस्य समापनं जातम् ।

एवं दिवसत्रयव्यापी समारोहोऽयं हर्षोल्लासपुरस्सरं महत्यां च सफलतया सह दिशि-दिशि संस्कृतप्रचारसन्देशं प्रसारयन् समाप्तिमगात् । अत्र प्रस्ताविताः पारिताश्च प्रस्तावा अग्रिमांके प्रकाशयिष्यन्ते ।

वाराणसीस्थसार्वभौम संस्कृतप्रचार-कार्यालयद्वारा आयोतितेषु सम्मेलनेषु पारितानां प्रस्तावानां सारांशाः

१— सर्वैरपि संस्कृतानुरागिभिः स्वस्वगृहे एकस्मिन् लघुपात्रे प्रदिदिनं नूतन पणद्वयं स्थापनीयं यस्य वर्षान्ते निष्कासनं तथा संस्कृतप्रचारकार्ये उपयोगः स्यात् ।

२-क-संस्कृताध्यापकानामपि कृते लाभत्रयी-योजना स्वीकृता स्यात् ।

ख-"ग" वर्गीयपाठशालानामध्यापकवर्गस्य वेतनक्रमः यथाशीघ्रं निर्धारितः स्यात् क्रियान्वितश्च विधीयेत ।

३— संस्कृतशिक्षासम्बन्धिनां प्रश्नानां समस्यानां च विचारार्थं तथा समाधानार्थं च उत्तरप्रदेशीयशासनेन शिक्षाशास्त्रिणामेकः आयोगः स्थापनीयः ।

४-क-संस्कृतविद्यालयानां शिक्षकेभ्यो दीयमानं सर्वमपि वेतनरूपं धनं शाशनेन चेकद्वारा साक्षाद् अध्यापकेभ्य एव प्रदेयम् ।

ख-गवर्गीयविद्यालयाध्यापकानामपि सर्वं वेतनं शासनेन प्रदेयम् ।

ग-वेतनातिरिक्तः छात्रवृत्ति-परीक्षाशुल्क-कायालय-पुस्तकालयादीनां सर्वो व्ययभारः संचालकैः स्वीकार्यः ।

घ-राजकीयोच्चमाध्यमिकविद्यालयानां राजकोयसंस्कृतोच्चतरमाध्यमिकविद्यालयेषु परिणमनं कर्तव्यं येनातिरिक्तधनव्ययमन्तरेणापि शासनेन संस्कृतस्योल्लेखनीया सेवा साधिता स्यात् ।

५— भाषाशिक्षणयोजनायां संस्कृतस्य अनिवार्यतया सन्निवेशः स्यात् ।

६—मध्यमा-शास्त्रिप्रभृतिसंस्कृतपरीक्षाणां हाई-स्कूल-इन्टमीजिएट-बी० ए० प्रभृतिपरीक्षाभिः समकक्षतायाम् अंग्रेजीभाषाया ज्ञानमनिवार्यं न मन्येत ।

७— वाराणसेयसंस्कृतविश्वविद्यालये एकः संस्कृतप्रचारविभागोपि संचालितः स्यात् ।

८-क-विदेशेषु भारतीयराजदूतः सह एकैकस्य आचार्यस्यापि नियुक्तिः स्यात् ।

ख-संस्कृतशिक्षासम्बन्धिषु राजकीयपदेषु प्राप्तसंस्कृतोपाधिकानामेव जनानां नियुक्तिः स्यात् ।

ग-राजस्थानप्रदेशवत् सर्वेषु प्रदेशेषु संस्कृतशिक्षानिदेशालयः संस्कृतशिक्षानिदेशकश्च स्वतन्त्ररूपेण स्थापितौ स्याताम् ।

९— सार्वभौमसंकृतप्रचारकार्यालयस्य कृते वाराणस्यां स्वतन्त्रभवननिर्माणाय तदुपयुक्तभूमिधनादिप्राप्तये एका समितिः निर्मिता स्यात् । (एतत्प्रस्तावानुसारं त्रयोदशसदस्यानामेका समितिः निर्मिता)

१०-क-वाराणस्यां केन्द्रद्वारा उत्तरप्रदेशशासनेन वा एकः महिलासंस्कृतविद्यालयः स्थापितः स्यात् तस्य च सर्वोपि व्ययभारः ताभ्यामेव निर्व्यूढः स्यात् ।

ख-संस्कृतपण्डितसमाजेन स्वकुटुम्बान्तर्गताः सर्वा अपि कन्या महिलाश्च संस्कृतमवश्यं शिक्षणीयाः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

❀ कलिकौतुकम् ❀

आचार्यः—श्रीविश्वनाथमिश्रः, श्रीशार्दूलसंस्कृतविद्यापीठं, बीकानेरः।

पूर्वानुवृत्तम्—

षष्ठं दृश्यं, स्थानम्—आरण्यको मार्गः

(प्रसन्नमुद्रायां कलेः प्रवेशः)

कलिः—अद्य जातो मे पूर्णो विजयः। सिद्धं समीहितं नः। न दृश्यतेऽधुना कश्चन प्रत्यवायः। आसीदेकः परीक्षितो नाम राजा मम विरोधी। सोऽपि मे वशंगतः। (हसन्) धर्मभीरुः परीक्षितः अतिसरलः। अत एव मद्वचसि विश्वासमुपेत्य प्रतिश्रुतं तेन झटिति मे स्थानम्। अन्यथा भारते-माहशस्य म्लेच्छस्य प्रवेश एव दुर्लभः स्यात्। इदानीं जातं मे व्यापकं क्षेत्रम्। राज्ञः शिरसि स्वर्णमुकुटे, तस्य कोषागारे, स्वर्णबहुले तदीयान्तःपुरे च धत्तं मया पदम्। अ हा हा हा।

(ततः प्रविशति क्रोधः)

क्रोधः—अधर्मराज! केयं दृश्यते महती प्रसन्नता?

कलिः—आयाहि मित्र! आयाहि! अद्य जातो मे पूर्णो विजयः।

क्रोधः—कीदृशस्ते विजयः?

कलिः—राजानं परीक्षितं वञ्चयित्वा लब्धं मया विस्तृतं क्षेत्रं निवासाय।

क्रोधः—एतावतैव प्रसन्नो भवान्? मन्ये परीक्षितस्य वशीकरणं यावत् अपूर्ण एवायं-विजयः।

कलिः—मित्र! मम वागुरायां पतितमेवावेहि तं वराकम्।

क्रोधः—कथमिव?

कलिः—बिभर्ति असौ काञ्चनं मुकुटम्। तत्रारूढोऽहं भूताविष्टमिव पिशाचाक्रान्तमिव बुद्धिभ्रष्टं तमापादयिष्यामि। तदा काष्ठपुत्तलिकेवासौ ममेच्छानुसारं नर्तिष्यति।

क्रोधः—एतच्च मे असम्भाव्यमिव प्रतिभाति।

कलिः—मा मैवम्। चल मया साकं, पश्य मे-कौतुकम्। समागतोऽस्ति परीक्षितः अस्मिन् वने मृगयार्थम्। स चेदानीं क्षुत्क्षामः पिपासाकुलितः गमिष्यति शमीकस्याश्रमपदम्। तत्रैव करिष्यते मया स्वकौतुकम्। आयाहि

(उभौ गच्छतः)

सघनवनस्यैकस्मिन्नाश्रमे शमीकः ऋषिः ध्यानावस्थिः।

कलिस्तत्रागत्य मृतं सर्पमेकं तत्र निक्षिप्य गतः।

(ततः प्रवेशति मृगयापरः परीक्षितः)

परीक्षितः—अये! एतावद्दूरमागतेनापि न लब्धः कोऽप्याखेटः। प्रत्युतभ्रान्तमार्गः परिभ्रमामि इतस्ततः। इतो बाधते मां पिपिसा। तिमिराच्छन्नमिव प्रतिभाति मे सर्वम्। किं करोमि? क्व गच्छामि? अये! इदन्तावत् आश्रमपदम्। तथाहि—

अरण्ये निवासो निवासे सुमतयो
मुनीनां जनानां छटा कीदृशीयम्।
इयं पर्णशाला विशाला धरेयं
विचरतां मृगाणां छटा कीदृशीयम्।
इमे श्वापदाः काननं रम्यरूपं
झरन्निर्झराणां छटा कीदृशीयम्।
अयं धान्यराशिर्गवां दर्शनञ्च
मनोज्ञाश्रमेऽस्मिन् छटा कीदृशीयम्॥

अस्तु प्रविशामि तावदाश्रमपदम्।

(प्रविश्य ध्यानावस्थितं शमीकं सम्बोध्य)

महर्षे! परीक्षितोऽहम् अस्मि पिपासुः। अतः पानीयं दत्त्वा मे प्राणरक्षां विधेहि भगवन्? (मुनेः उत्तरमप्राप्य) कीदृयोऽयं वर्तते ऋषिः? प्रतिवचनमपि न ददाति जलदानन्तु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दूरमास्ताम् । किमपराद्धं मयाऽस्य येन क्रुद्धो मौनी वा जातो मुनिः ।

(तावत् कलिप्रवेशात् भवति राज्ञो विपर्ययः बुद्धेः)

परीक्षितः—अवगतं मया, नायं साधुः, किन्तु ऋषिवेशाच्छन्नः कश्चन दस्युरिति मन्ये। कीदृशं गर्वमुद्वहति येन प्रतिवचनमपि न ददाति। महान् धूर्तः । अस्तु पिपासित एव प्रतिगच्छामि। (अग्रे गच्छन् मध्येमार्गं मृतं सर्पं दृष्ट्वा) इमं सर्पं कृत्रिमस्य ऋषेः गले पातयामि। स्यादेवं ध्यानभंगोऽस्य।

(परीक्षितस्तथैवाचरति, ऋषिश्च पूर्ववदेव स्थितः, परीक्षितश्च गतः)

(ततः प्रविशन्ति क्रीडाकौतुकाः केचन बालकाः)

दाण्ड्यायनः—भो भो मित्राणि अद्य किमपि नूतनं क्रीडनकमारब्धव्यम्।

वामदेवः—अस्तु अद्य धावनक्रीडा। पश्यामः कस्तावत् क्षिप्रं धावतीति।

उपमन्युः—धावनक्रीडायां निपुणः शृङ्गी अपि आहूयतामिति प्रतिभाति मे।

वामदेवः—शोभनं स्मारितम्। शृङ्गी तु धावनेऽतितीव्रः अवश्यमेवात्र सम्मेलनीयः।

दाण्ड्यायनः—एष गत्वाहं शृङ्गिणम् सहैवानयामि। तावत् प्रतिपालयतम् किमपि क्षणम्।

(दाण्ड्यायनः आश्रमपदं गच्छति तत्र च ऋषेः गले सर्पं दृष्ट्वाक्रन्दति)

(आक्रन्दन् एव च समायाति मित्राणां पार्श्वे)

दाण्ड्यायनः—(वेपमानः) भो भो सखायः अतीवानिष्टं सम्पन्नम्।

उपमन्युः—किमिदम्, कुत इदम्, आपतितमनिष्टम्?

दाण्ड्यायनः—महर्षिशमीकस्य गले न जाने केन पातितः सर्पः। अहो भयंकरः सर्पः। (वेपते)

(ततस्तत्रैवायाति परिभ्रमन् शृङ्गी)

शृङ्गी—अहो शोभनोऽयमवसरः। सर्वाणि सहैव मिलितानि। मन्ये आमन्त्रितं युष्माभिः किमपि क्रीडनकम्।

दाण्ड्यायनः—अरे शृङ्गिन्? दूरमास्ताम् तावत् क्रीडनकम्। पूर्वं गत्वा खलु आश्रमपदं निभालनीया ते स्वकीयपितुः दयनीया दशा।

शृङ्गी—(व्याकुलः सन्) किमुक्तम्? मम पितुः दयनीया दशा। कथय, स्पष्टं कथय, किं जातं मे पितुः?

दाण्ड्यायनः—तव पितुः गले केनापि भयंकरः सर्पः निक्षिप्तः। स चाधुनाऽपि ध्यानावस्थित एव। तत् शीघ्रं चल तत्र।

शृङ्गी—(आश्चर्येण क्रोधं नाटयन्) तपस्विना सह एतादृशः उपहासः? ईदृशी धृष्टता? क्व वर्ततेऽसौ पापः दारुणकर्मकर्त्ता? झटिति आयाहि मम समक्षम्, अन्यथा शापाग्निना भस्मीभूतमापादयिष्यामि।

वामदेवः—अलमत्र क्रोधेन। तत्रैव गत्वा किमप्यनुष्ठेयम्।

शृङ्गी—(क्रोधमुद्रया) अस्तु—अरे पापाचरण। गृहाण स्वकुकर्मणः फलम्—

तुभ्यं शापं प्रयच्छामि रक्षेत् यो रक्षितुं क्षमः।
दष्टा त्वां तक्षकः सर्पः सप्तमेऽह्नि महाविषः।

(पृथिव्यां जलं निक्षिप्य शीघ्रतया बालकैः सहाश्रमं गत्वा सर्पमपाकरोति)

(ऋषेश्च ध्यानभंगो जायते)

शमीकः—कुतः अयं मृतः सर्पः?

शृङ्गी—महाराज! केनापि दुष्टेन भवतां गले एनं निक्षिप्य स्वमूर्खतायाः परिचयो दत्तः। सूचितश्चाहं वटुभिरत्रागत्य इमं दूरं करोमि। अस्तु, तेनापि दुष्टेन स्वकर्मणः फलं भोक्तव्यमेव भविष्यति। क्रोधात् कम्पते

(शेषं १५९ पृष्ठे)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ श्रीशिवराज्योदये महाकाव्ये

३६ सर्गः

महाकविः डॉ० श्रीधरभास्करवर्णेकरः. डी.लिट्, नागपुरम्

अथारिसैन्यविक्षोभं निजनीतिप्रयोगजम् ।
यथापेक्षं चरप्रोक्तं शृण्वन्नानन्दितः शिवः ॥१॥

स्वसखं च तदा प्राह सौहार्दैकनिदर्शनम् ।
प्रभुवंशमहारत्नं बाजिभाजिधुरन्धरम् ॥२॥

चरेण नक्तं ह्यः प्रोक्तं रन्ध्रस्थानमरातिषु ।
नीरन्ध्रमभितो दुर्गं स्रोतःप्रायं स्थितेष्वपि ॥३॥

मम कूटप्रयोगेण चेदानीं रिपुसैनिकाः ।
व्यामूढा इव चेष्टन्ते छिन्नसेनानुशासनाः ॥४॥

बहु नृत्यन्ति गायन्ति पिबन्तो मदिरां मुहुः ।
भक्षयन्ति यथाकाम सर्वेऽप्यानन्दतुन्दिलाः ॥५॥

न स्मरन्ति स्वकर्तव्यं गणनेतृनियोजितम् ।
स्मरन्ति गृहदाराणां सर्वे निर्गमनोत्सुकाः ॥६॥

अद्याषाढस्य मासस्य पौर्णिमासी शुभा तिथिः ।
पूर्णोऽपि लुप्तः स्यादिन्दुर्नभस्यम्बुदमेदुरे ॥७॥

ज्योत्स्नी चापि तमिस्रेव भवेदद्य निशीथिनी ।
तदद्यैव प्रयास्यामि दुर्गान्तरमितो ध्रुवम् ॥८॥

विशालदुर्गोऽस्माद् दुर्गाद् यः क्रोशे दशमे स्थितः ।
स मामाह्वयते नूनं सहवासाय मित्रवत् ॥९॥

नक्तमद्यैव गच्छेयं तत्रोल्लङ्घ्यारिवाहिनीम् ।
वसुदेवो महापूरां धैर्येण यमुनामिव ॥१०॥

यत् स्वधर्मपरित्राणसम्भवं पुण्यमुज्ज्वलम् ।
मम मूर्ध्नि स्थितं किञ्चित् तस्य दिव्यार्भकं यथा ॥

तन्मामस्मान्महापूराद् रिपुसेनाभयात् क्षणात् ।
हृदिस्थ ईश्वरो ब्रूते ध्रुवं संतारयेदिति ॥१२॥

स्वस्वामिनोऽतिपूज्यस्य तद् विज्ञाय मनीषितम् ।
महामनीषी श्रद्धावान् बाजिस्तं सहसाऽवदत् ॥१३

देव त्वया यन्निर्णीतं युक्तायुक्तविवेकिना ।
कस्तत्र मादृशो दोषं पश्येदत्यल्पबुद्धिभाक ॥१४॥

पूर्वमुल्लंघितोऽम्भोधिर्बलिना वायुसूनुना ।
न चित्रं तत्र पश्यामि सोऽगाद् यद् वायुवर्त्मना ॥

घोरा जलचरास्तत्र ये व्यालमकरादयः ।
न तेषां दृक्पथं प्राप्तो मारुतिर्यत्स खेचरः ॥१६॥

पर्णालपरिखीभूते रौद्रेऽस्मिन्नरिसागरे ।
रक्षिणः पर्यवेक्षन्ते चरतः कीटकानपि ॥१७॥

एतस्मिन् संकटे घोरे साहसं यच्चिकीर्षसि ।
तादृशं न कदा कोऽपि कृतवान् नो करिष्यति ॥१८

धीरवर्यस्य वीरस्य महासाहसगाहिनः ।
कस्तवाह सहायाय किंकरश्चरणाश्रितः ॥१९॥

निःशस्त्रो निःसहायोऽपि धीमान्नसचिवो भवान् ।
अक्षौहिण्यापि शत्रूणामजय्यः खलु मे मतः ॥२०॥

साहसे परमेतस्मिन्नपूवचाप्यनुत्तरे ।
पदानुसरणं कर्तुं देव ! दासस्तवेच्छति ॥२१॥

भवच्चरणनिक्षेपोत्थितपङ्ककणैः प्रभो ।
तोर्थस्नानमहापुण्यं दासोऽयं सञ्चिचोषति ॥२२॥

आपच्चेदापतेत् काचिद् रिपुपक्षादकल्पिता ।
त्वदन्नपरिपुष्टोऽयं देहस्तत्रार्गलीभवेत् ॥३॥

त्वमेव परमात्मा मे त्वद्वाणी मे परा श्रुतिः ।
त्वदर्थे जीवनं प्रेयः श्रेयश्च मरणं मतम् ॥२४॥

अनुमन्ये तपस्तीव्रं कृतं प्राक्तनजन्मसु ।
यदस्मिञ्जन्मनि प्राप्तं त्वच्छायाप्रायिकं वपुः ॥२५

तदिदानीं प्रभो ! याचे त्वन्निर्गमनवर्त्मनि ।
तमःप्राये क्षणं क्षीणज्योतिर्भावं प्रपद्यताम् ॥२६

शिवस्तां वाचमाकर्ण्य स्वामिभक्तिरसोत्कटाम् ।
वाच्यावाच्यविमूढोऽभूत् सुप्रत्युत्पन्नधीरपि ॥२७॥

अहो निर्मलशीलस्य पुण्यचारित्र्यशालिनः ।
स्वस्मिन्ननुत्तमां भक्तिं ज्ञात्वा देवोऽपि मुह्यति ॥२८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहो साहसकर्तारः सन्ति केचन कुत्रचित् ।
दुर्लभाः किन्तु लोकेऽस्मिंस्तेषां स्वेच्छानुयात्रिकाः ।।

अनापद्यपि साहाय्यं विरलो हि चिकीर्षति ।
किं पुनर्दुर्मदाराति-प्रचुरायां महापदि ।।३०।।

तस्य भक्तिसमां शक्तिं तादृशीं च महाधृतिम् ।
विजानन् स शिवो धीमाननुजज्ञौ तदीहितम् ।।३१

निजाकांक्षितसम्पूर्तिप्रसन्नास्यं तमब्रवीत् ।
नवीनसाहसारम्भसुप्रसन्नाननः शिवः ।।३२।।

नूनं भाग्यवती माता पिता च मम भाग्यवान् ।
यत्पुत्रेण सुहृत् प्राप्तः त्वादृशः कोऽपि धैर्यवान् ।।

नूनं मित्र महाभाग्यो मादृशो नात्र भूतले ।
आपत्स्वग्रेसरा यस्य त्वादृशा वीर्यशालिनः ।।३४।।

यामब्रवीः सखे वाचं सौहार्दहृदयंगमाम् ।
तयाऽहमधमर्णत्वं नीतोऽस्म्यामरणं ध्रुवम् ।।३५

मदन्तः सात्विका भावास्त्वद्वाचाऽङ्कुरिता हि ये ।
प्रत्युत्तरप्रयत्नेन ते वैकल्यमवाप्नुयुः ।।३६।।

सद्भावोदीरितां वाचं प्रतिवक्तुमुदीरिता ।
वाणी सद्भावगर्भाऽपि भवत्येवौपचारिकी ।।३७।।

तदलं मम भाषित्वा समयोऽयमपेक्षते ।
कण्टकाकीर्णमार्गेण बहिर्निर्गमनक्रियाम् ।।३८।।

सहस्रषट्कमस्माकं वीराणामत्र वर्तते ।
मामन्वेतु त्वया साकं तेषां षड्गुणितं शतम् ।।३९

साहाय्येनावशिष्टानां संरक्षन् दुर्गमुत्तमम् ।
विगृह्णीतारिभिः धीरः धीरस्त्र्यम्बकभास्करः ।।

कृष्णवेशाः खड्गवन्तो यान्तु सर्वेऽनुयात्रिकाः ।
नृवाह्यं तेषु नेतव्यं केवलं वाहनद्वयम् ।।४१।।

वहन्ति पथिकाः प्रायः पाथेयं देहधारणम् ।
सुदुष्करे प्रयासेऽस्मिन् पाथेयं प्रभुचिन्तनम् ।।४२।।

श्वासार्थमपि पर्याप्तोऽवसरो दुर्लभोऽधुना ।
भोक्तुमन्नं जलं पातुं स लभेत कुतः पुनः ।।४३।।

निःश्वासमपि निःशब्दं कुर्वन्तोऽखण्डगामिनः ।
अश्वानीकप्रवेगेन यास्यन्त्यद्य पदातयः ।।४४।।

प्रायेण क्षुण्णमध्वानमध्वगा मार्गयन्ति ते ।
अद्य बुध्द्यैव पन्थानमक्षुण्णं मार्गयामहे ।।४५।।

वर्जयन्ति प्रवासार्थं प्रायः सर्वे निशीथिनीम् ।
तामेव तिमिरग्रस्तां बहुमन्यामहे वयम् ।।४६।।

यमाश्रयितुमिच्छामो निकटस्थमितो गताः ।
असौ विशालदुर्गोऽपि ग्रस्तः स्वातंत्र्यशत्रुभिः ।।४७

सूर्यरावाभिधः कश्चित् सुर्वेवंशोद्भवोऽधमः ।
जसवंतसहायो यो दुर्गं तमधितिष्ठति ।।४८।।

यद्यपीतः प्रयास्यामः परिहर्तुमिहाहवम् ।
किन्तु तेन विना तत्र प्रवेशोऽपि सुदुष्करः ।।४९।।

तत् केवलप्रवासार्थं नाद्य निर्गमनं हि नः ।
प्रवत्स्यामो ध्रुवं वीर ! संग्रांमायैव तत्त्वतः ।।५०।।

तस्यामेव निशि प्रचण्डजलदक्लिष्टेऽपि तारापथे
प्रक्रान्तं विधुना निगूढगमनं वेगादिवैकाकिना ।
तद्विज्ञाय च साहसातिरसिको दुर्लङ्घ्यगूढाध्वना
निष्चक्राम शिवोऽपि वाजिसहितः शीघ्रं यथा-
निश्चितम् ।।५१।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिपासाया मरुभूमौ महाकविः शेली

मूललेखकः—श्रीइलाचन्द्रजोशीमहाभागः, अनुवादकः—विद्याभूषणः श्रीगणेशरामशर्मा, डूंगरपुरम्

पूर्वानुवृत्तम्—

एतत् सत्यम्, यच्छेलिकवेर्मनसि हैरियटबालां प्रति नांशतोऽपि घृणाभावोऽभूत् परन्तु स तस्या अज्ञानविलसितादबोधात् क्षुभ्यन्नासीत् तथा विद्यमानायामेलिजायां तस्याः सुधारस्य न मनागपि सम्भावनां पश्यन्नभूत् ।

इतः परच्छिद्रान्वेषणपरैः कैश्चिज्जनैः शेलिकवेर्मनस्येकं नवीनं सन्देहमुत्पादयितुं प्रयत्नः क्रियमाणोऽभूत । स प्रयत्नोऽयं बभूव यद्धैरियटबालाया गर्भतो यः शिशुः (कन्या) जातास्ते, तत्पिता शेली नास्ते, वरञ्च कश्चनान्यो जनो—मैजर रायन इतिनामा—वर्त्तते, यो हि कियता समयेन तत्परिवारे प्रायेण यातायातं कुर्वाणोऽभूत् । शेली तदिदं विश्वसितुं नैच्छत् परन्तु यादृशी मनःस्थितिस्तदानीं तस्यासीत्तस्यां मनुष्यः स्वयमेवात्मानमविश्वासेनापवञ्चयितुमिच्छति नाम नूनम् । हैरियटबालां प्रति सोऽधुनापि च पत्रं प्रहिण्वन्नभूत् । एकस्मिन् पत्रे स लिलेख यत् स हैरियटबाया योग्यो नास्ति, परन्तु सा तस्मै नो जुगुप्सेतेति । एतदपि च सुनिश्चितमस्ति यद्धि हैरियटबालाऽधुनापि तं बहु प्रीणयन्त्यासीत् । एकवारं कतिचिद्दिनानि यावच्छेलिकवेः कस्मिन्नपि पत्रेऽनुपलब्धे सा शेलिकवेः (साहित्यकृतिपुस्तकादीनां) प्रकाशकं हुकहमनामानं (स्वपत्रे) लिलेख—"कृपया तदिदमावृतं पत्रं शेलिकवये प्रदीयताम् । चतुर्भ्यो दिनेभ्यस्तस्य नैकमपि पत्रमहं प्राप्तवती । तानीमानि चत्वारि दिनानि मत्कृते युगमेकमिव व्यतीयुः । कृपया तत्कालमेव कवेः कुशलसम्वादं प्रहिण्वन्तु । यदि च सकुशलोऽस्ति सस्तदा नाहं लन्दननगरमागच्छेयम्, परन्तु यदि शीघ्रमेव तत्कुशलपत्रं नागतम्, तदा निश्चयेनाहं तत्र प्राप्स्यामि ।"

स्पष्टमास्ते, यत्तस्या मनसीदानीं सन्देहभावोऽभ्युदितुमारभत यद्धि शेलिकविः कस्याश्चिदन्यस्याः किशोर्याः प्रणयजालेन निगडितोऽस्तीति ।

दौर्भाग्यात् सत्यमेव हि शेली किलैकामपरां किशोरीं प्रति प्रणयं कर्तुमारेभे । गाडविनमहाशयस्योल्लेखस्तावत् प्रागेवाक्रियत, यस्य प्रगतिशीलानां क्रान्तिकारिणां च विचाराणां प्रभावो गम्भीरः कतिचिद्वर्षेभ्यः पूर्वमेव हि शेलिकवौ निपतितो बभूवेति । अथ ८, जून १८१४ दिवसे शेली गाडविनमहाशयेन सह साक्षात्कारार्थं जगाम । तत्र सः प्रथमवारं गाडविनस्य पुत्रीं मेरीं ददर्श । गाडविनस्य प्रथमो विवाहो मेरी वोल्स्टनकाफ्ट इत्याख्यया महिलया साकं बभूव । सा हि स्त्रीणामधिकारार्थ सङ्घर्षाचरणात् प्रसिद्धाभूत् । मेरीगाडविननाम्नी तस्या एव पुत्री बभूव । तदानीं तस्या वयः षोडशवर्षमितमासीत् । सा हैरियटबालेव सुन्दरी नाभूत् परमतीव बुद्धिमती बभूव । आदौ तु शेली तदिदं नान्वभूद् यत्तस्याः प्रणये स निमङ्क्ष्यति, परन्तु यथा यथा स तया किशोर्या सह साहित्यं, समाजं चाधिकृत्य वार्तालापेषु प्रववृते तथा तथा स आश्चर्यान्वितो बभूव, यत्तस्यामल्पीयस्यामप्यवस्थायां मेरीकिशोर्याः (साहित्य-समाज-दर्शनादिविषयेषु चिन्तने) कीदृग्गभीरोऽस्ति प्रवेश इति ।

तस्या मेरीकिशोर्या माता ममार । सा प्रायेण सन्ध्यासमये स्वमातुः समाधि-स्थलं गच्छति स्म । २६ जून-दिने रविवासरोऽभूत् । तद्दिने सन्ध्या-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काले यदा मेरी स्वविमातुः कन्यकया भगिन्या क्लेयरमांट इति नाम्न्या साकं समाधिस्थलपरिसरं गन्तुमुद्यताभूत्तदा शेली चापि ताभ्यां सह तत्र गमनाय स्वेच्छां प्राचीकटत् । गाडविनस्य पत्रेणैकेन स्पष्टं भवति यत्तदानींमेव शेलीकवेर्मनसि प्रथमवारं मेरीं प्रति प्रणयभावना तीव्ररूपेणान्दोलिता तरङ्गिता च बभूव, तथा च सः स्पष्टैः शब्दैस्तां प्रति स्वात्मनः प्रणयं निवेदयामासेति, शेलिकवेरेव वार्ताभिर्मेरी तदिदं ज्ञातवती यत्तस्य (शेलिनः) वैवाहिकं जीवनमतीव दुःखितमस्ति संजातम् तथा स नवीनां सान्त्वनामपेक्षत इति । सा स्वयमेव प्रथमदर्शने तमप्रीणयत्, परन्तु सा नेदमाशासानाऽभूत् स एकस्यां परिणीतायां स्त्रियां विद्यमानायां सत्यां तां प्रति प्रणयसम्बन्धं स्थापयितुमिच्छेदिति । इदानीं यदा शेली स्वकीयस्य विवाहितजीवनस्य सर्वाश्चापि तास्ता विपत्तीरुन्मुक्तभावम् वर्णयन् तां प्रणय-याचनां चक्रे, तदा साऽद्रवत् । मेरी स्वस्य माता-पित्रोः प्रगतिशीलान् विचारान् निपुणं परिचीय जजान तथा तयोः सिद्धान्तमिमं (उन्मुक्त-प्रणय-विषयकं) मान्यं मेने । अतोऽतिरिक्तं गाडविनमहाशयो मुक्तस्य, सहजस्य, चाविवाहितस्य प्रणयस्य पक्षेऽपि स्वात्मनो विचारान् कतिपयेभ्यो वर्षेभ्यः पूर्वं व्यक्तीकृतवानासीत् । स स्वयं तथा मेर्या माता च स्वविवाहात् पूर्वं पर्याप्तं समयं यावत् पतिपत्नीरूपे तस्थतुः । तदिदं मेरी जानाति स्म । अतः सा विनैव मनागपि ग्लानिं शेलिकवेः प्रस्तावं प्रति स्वसहमतिं प्रकटयामास ।

६, जुलाई—दिने शेली गाडविनस्य पुरतः स्वप्रस्तावमुपस्थापयामास । गाडविनस्य प्रगतिशीलेषु विचारेष्वधुना बह्वधिकं परिवर्तनमागतमभूत् । सः स्पष्टतः कथयामास शेलिकविं यत् सः स्वपत्नीं (हैरियट सुन्दरीम्) अपवञ्च्य तत्तनूजया मेर्या साकं कमपि सम्बन्धं रक्षितुं न शक्नोतीति ।

परन्तु तदानीं गाडविनोऽर्थसंकटे निपतितोऽभूत्तथा च शेलिकवेः सकाशाद् येन केनापि चाप्युपायेन रूप्याण्यादातुं तत्परो बभूव । तस्य गृहे शेलिकवेर्यातायातं निरन्तरमक्षुण्णं जायमानमासीत् ।

गाडविनस्य द्वितीया पत्नी स्वे नसाकं पूर्वपतिनोत्पन्नां कन्यां जेवक्लेयरमांट इत्यभिधानामपि चानिन्ये । सा जेनकन्यका स्वायुःक्रमे मेर्याः समवयस्का बभूव, परन्तु सा परमसुन्दरी, चञ्चला, धूर्ता चासीत् । सा साहित्यस्य प्रकीर्णमध्ययनं चकार, नाटकेषु तस्याः सविशेषं मनोरुचिर्बभूव । सा किलैकवारं बायरनमहाकवेः साहाय्येन कयाचिद् विशिष्टया नाट्य-संस्थया स्वसम्बन्धं स्थापयितुमसफलं प्रयत्नमपि चक्रे । सा शेलि-कविनापि चातीव प्रभाविताभूत् । अथैकदा शेलिकवेर्मेर्या जेनकन्यकायाश्च मिथो गुप्तः परामर्शो बभूव, यत्फलस्वरूपं तदिदं निर्णीतमभूद्यदपरेद्युरुषस्येव ते त्रयोऽपि चाश्वरथमारुह्य युगपत् पलायिष्यन्त इति । तदनुसारं पलाय्य ते कालेसंज्ञकं स्थानं प्रापुस्तदा जेनकुमार्या मातापि च तानन्विष्यन्ती तत्र प्राप्ता । सा जेनकन्यकां प्रति निवर्तयितुं महान्त प्रयत्नं चकार, परन्तु जेनकिशोरी न परावर्तयामास, यतस्तेषां त्रयाणामपि सा प्रणयलीला तस्यै भृशं रुरुचे ।

अस्मिन् हि प्रणय-पलायने विशेषः खल्वेकः प्रसङ्गः सोऽयं बभूव यच्छेलिकवियंस्मात् प्रकाशकात् पौण्डसंज्ञकानि रूप्यकाणि प्राप्तुमाशासानोऽभूत्तेन पैरिसनगरे पत्रेणैकेन ज्ञापितं यदस्मिन् समये सः किमपि साहाय्यं कर्तुं न पारयत इति । शेलिकविः स्वकीयां महामूल्यवतीं स्यूत-घटिकां तथा च स्वर्ण-सूत्रं विक्रीय कथमपि द्वित्रचतुर्दिनानि यावदयं निरुवाह । किम्पचत्वमप्यापतितं, परन्तु मेर्या उत्साहो न मनागपि मन्दतां जगाम, वरञ्चास्मात् किम्पचत्वाद्धेतोः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमे प्रणयलीलानुभवे रसस्य समधिका वृद्धिर्बभूव । ततः कथमपि काश्चन पौण्डमुद्राः संगृह्य ते सर्वे जनाः स्विट्ज़रलैण्डस्य पदयात्रां कर्तुं विनिश्चिक्युः षां सम्भारानुपढौकयितुं तैर्गर्दभ एकः समर्घेण मूल्येन क्रीतः । एतदपि च चिन्तितमम्, यदि च मेरी मध्येमार्गं श्रमखिन्ना, परिश्रान्ता, क्लान्ता च भवेत्तदा तं गर्दभमारोक्ष्यतीति ।

परमसौ गर्दभो बत नहि विशेषमुपयोगी प्रासिद्ध्यत् । ततोऽग्रिमे विश्रामस्थले स विक्रीतः । तत्परिवर्तेनैकोऽश्वतरः क्रीतः । मेरी तमारुह्य प्रचलति स्म । शेलो तस्य वल्गां गृहीत्वाऽग्रेऽग्रे पद्भ्यामेव चचाल । मेरी च जेनबाला च वारं वारं क्रमेणाश्वतरमारुरुहतुः । पञ्चदिनानि यावन्निरन्तरमध्वानमतिक्रास्यन्तस्ते ट्राइजननामकं स्थानं प्रापुः । शेलिकवेश्चरणेऽपक्षतं बभूव, ततस्तत्रैव विश्रम्य ते श्रमापनोदनं चक्रुः । तत एव शेलो स्वपत्नीं हैरियटबालां प्रति पत्रमेकं सुविस्तृत दीर्घाकारं च लिलेख, यस्मिन् विस्तरेण सर्वमपि विलिख्यैतदपि च लिखितवान्, यत् स तस्याः कृते धनव्ययस्य पूर्णं प्रबन्धं स्वमित्रमेकं प्रति लिखित्वा कृतवानास्त इति ।

अथाधुनावधि शेली तदिदमेव विशश्वास- यद्धि हैरियटबाला तस्य नवीनया परिस्थित्या विचलिता न भूत्वा, तत्सर्वं सहजतया सह्यतां नेष्यतीति ।

कानिचिद्दिनानि स्विट्जरलैण्डस्य विभिन्नानि स्थानानि भ्रामं भ्रामं पर्यन्ते यदार्थिकीस्थितिः समाप्तिं जगाम तदा ते पुनरिंगलैण्डं परावर्तितुं निश्चिक्युः ।

सैषा पुनः-परावर्तन-यात्रा यावच्छक्यं जलमार्गेण बभूव-कदाचित् सरोवरेण, क्वचिच्च नदीमार्गेण । अथ १३ सितम्बरदिने ते लन्दननगरं प्रापुः । तदा शेली रिक्तहस्तोऽकिञ्चनो बभूव । यदा सः स्वस्य धनन्यास-कार्यालयं जगाम- अनयाऽऽशया, यत्तत्र तस्य कतिपयपौण्डमुद्रा अवशिष्टाः स्युरिति—तदा स ततः सूचनां लेभे यत्तस्य तत्र निःक्षेपरूपं सर्वमपि च धनं हैरियटबाला जग्राहेति ।

तत्कालं सोऽन्यदुपायान्तरमपश्यन् लज्जां, शीलं, शालीनतादिकं सर्वं त्यक्त्वा सपदि हैरियटसुन्दरीसमीपं गतवान् । हैरियटबाला तस्मै विंशतिपौण्डमुद्राः प्रयच्छन्ती भृशमपशब्दैस्ततक्ष, निनिन्द च । तदापि च हैरियटबालाया मनस्येवमियमाशासीद्यदेकदा शेली परावर्त्य तत्समीपमवश्यमेवागमिष्यतीति । मुग्धा वराकी हैरियटबाला ।

अथ मासद्वयानन्तरं समाचारोऽयं लब्धो यद्धैरियटबाला पुत्रमेकं सुषुवे—अर्थादेकस्य समृद्धस्य समान्तसुतस्य पर्सी बिशीशेलिमहाशयस्योत्तराधिकारी समुत्पेद इति । शेली लिलेख—अवसरेऽस्मिन् हर्षमहोत्सवा आयोजनीया इति । परित्यक्तायाः स्वपत्न्यास्तमिमं शिशुं प्रति मोहेनानेन सुस्पष्टमिदमास्ते यच्छेली प्रकारेणानेनात्मनोऽन्तःकरणस्य ग्लानिमपाकर्तुमियेष । तदनन्तरम् हैरियटबालापि च स्वयमेकेन पत्रेण तामिमां सूचनां प्रददौ । शेली तत्कालमेव धावं धावं तस्याः समीपं जगाम । अस्मिन् समये हैरियटबाला तमतीव लाञ्छित तिरस्कृतमपमानितं च चक्रे । सा शेलिविरुद्धं न्यायाधिकरणे विधिविधानानुसारं अभियोगस्थापनस्यापि धर्षणां चक्रे । शेली ग्लानिलज्जाभ्यामवनतशिराः प्रतिनिववृते ।

क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Cable : **BOWREAH** *Phone* : **22-9601 (6 lines)**

FOR NOBLE DURABLE QUALITIES

INSIST ON

COTTON TEXTILES & YARNS MANUFACTURED BY

BOWREAH COTTON MILLS CO., LTD.

B O V R I A.

★

Specialists :—

SIZED BEAMS AND HOSIERY YARN DEEPSHADE, POPLIN AND CORD COATING SHIRTING IN CHECKS & DOBBIES DYED AND PRINTED LAUNS AND CAMBRICS.

Managing Agents :

KETTLEWELL BULLEN & CO., LTD.

21, STRAND ROAD,

CALCUTTA I.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(१५२ पृष्ठस्य शेषं)

शमीकः—पुत्र ! कथमीदृशं क्रोधं करोषि ? क्व नु खलु शप्तोऽसौ वराकः ?

शृङ्गी—आम् भगवन् ? तेन यथाचरितं तथैव मयापि शप्तम् यत् तक्षकेन सप्तमदिवसे दष्टो भविष्यसीति ।

शमीकः—एवञ्चेत् न कृतं शोभनं त्वया । (मुनिः ध्यानमुद्रायां सर्पनिक्षेपकस्य परिचयं प्राप्नोति)

अरे पुत्र असौ खलु आसीत् परमभागवतो धर्मज्ञः साधुजनपरिपालकः, राजा परीक्षितः । कलिमायया ग्रस्तेन अज्ञानवशादेव एवमाचरितम् । हा शृङ्गिणः शापो मिथ्या भवितुं नार्हति । हा हतः प्रजावत्सलः ।

सर्वे—गुरुदेव ? अस्ति कश्चनाभ्युपायस्तस्य राज्ञः कल्याणाय ?

शमीकः—न दृश्यते कश्चनाभ्युपायः । ब्राह्मणशापेन सार्थकेनैव भवितव्यम् । अस्तु—भो दाण्ड्यायन ? गच्छ त्वमिदानीमेव मदादेशात् हस्तिनापुरम् । देहि मे सन्देशं राज्ञः । ननु भो राजन् ? कलिप्रभावात् निक्षिप्तवानसि ऋषिः गले सर्पम् । तस्मात् क्रुद्धेन ऋषिपुत्रेण शप्तः सप्तमदिने तक्षकेन दष्टो भविष्यसि । अतः सप्तदिनं यावत् भगवद्भजनपूजनादिपुण्यकर्मणि कालमतिवाहय, येन स्वर्गलोकप्राप्तौ न भवेत् कश्चनान्तरायः ।

दाण्ड्यायनः—यथाज्ञापयति गुरुदेव ? (गच्छति)

पटाक्षेपः

क्रमशः

भारती के कतिपय प्रकाशन

		मूल्यं
१.	अम्बिकासूक्तम्	२.५०
२.	गल्पकल्पलतिका (बालोपयोगी)	१.५०
३.	सरलसंस्कृत शिक्षणोपायः (बालोपयोगी)	१.५०
४.	गोलनवांकुर	१.२५
५.	चित्र द्वारा संस्कृतशिक्षा (बालोपयोगी)	१.५०
६.	सुवर्णलक्ष्मी नक्षत्र माला	०.५०
७.	आयुर्वेद विशेषांक	५.००
८.	आरोग्यांक विशेषांक	२.५०

भारती के ग्राहकों को २५% वर्तन दिया जायगा यदि सम्पूर्ण पुस्तकें एक साथ मंगायें ।

व्यवस्थापक
भारती संस्कृत मासिक

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बस दो या तीन बच्चे :
होते हैं घर में अच्छे



परिवार नियोजन केन्द्र की पहचान लाल तिकोन

davp 68/278

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीनानाथत्रिवेदी मधुपः, सहसम्पादकः

राष्ट्रपतेः सन्देशः

गणराज्यदिवसस्य पूर्वसन्ध्यायां राष्ट्रपति-श्रीजाकिर-हुसैनमहाभागेन राष्ट्रवादिनः प्रति प्रेरको यः सन्देशः प्रत्तः स सर्वैरपि मन्त-व्यस्तथोदात्तभवनया च पूर्णरूपेण स्व-जीवने सदावतारणीयश्च विद्यते।

तेन हि स्वभाषणे विशेषतो वार्तात्रयं प्रति सर्वेषां देशवासिनां ध्यानमाकृष्टम्। तत्र सर्वतः प्रथमा वार्ता सा वर्तते यतः समाजः सर्वकारश्चैतौ उभावपि विशृङ्खलितौ स्तः, अर्थाद् उभयत्राप्यनुशासनहीनता दृष्टिपथमुपयातीति। द्वितीया च सास्ति, यत्कारणादस्माकं कर्तव्यानि कर्माणि फलदानि न भवन्ति सम्प्रति, यत्नाश्च विफलाः सन्ति जायमानाः, अर्थाद् देशवासिषु नैतिकतायाः प्रतिदिनं विद्यते समेधमानो ह्रासः। तृतीया चामूल्या वार्तास्ति सा, उक्तयोरुभयोरपि समस्ययोर्निदानरूपा तथोपचाररूपा च, अर्थात् महात्मना श्रीगान्धिना समुपस्थापितानामादर्शानां स्वजीवने पुनरवतारणमिति।

प्रधानमन्त्रिणः सन्देशः

प्रधानमन्त्री श्रीमती इन्दिरागान्धि-महोदया देशवासिनः प्रत्यनुरोधं कृतवती यत् ते प्रतिज्ञामिमां कुर्युर्यद् देशस्याभ्यन्तराणां बाह्यानाञ्च शत्रूणां साम्मुख्यं विधाय देशमिममुन्नतिमार्गं प्रति नयन्त्विति।

कवीनां कर्तव्यम्

दिल्ल्यां जनवरीमासस्य २२ तारिकायामखिलभारतीयसंस्कृतप्रचारकस्य तथा शिक्षासमितेश्च तत्त्वावधाने गणतन्त्रदिवसमुद्दिश्य समायोजितस्य संस्कृतकविसम्मेलनस्योद्घाटनमाचरतोपराज्यपालेन श्रीमता आदित्यनाथ-झा-महोदयेन भाषितं यत्सम्प्रति संस्कृतकविभिः स्वरचनाभी राष्ट्रस्यैकतायां तथोन्नतौ च विशिष्टः सहयोगोऽवश्यं प्रदेयः—इति। तथा च—

नेतृणां भारतीयानां नृणाञ्च देशवासिनाम्।
कृते हितकरं भूयाद् गणतन्त्रदिनं त्विदम्॥

सांस्कृतिकजागरणेनैव राष्ट्रोत्थानस्य सम्भवः

गतमासे श्रीमन्महर्षिवर्यो महामहोपाध्यायो योगिराजः स्वामी श्री माधवानन्दमहाराजः स्व० श्रीगिरिधरशर्मचतुर्वेदजयन्त्यवसरे समभाषत यद् राष्ट्रस्य स्थायि समुत्थानं सांस्कृतिकेन जागरणेनैव सम्भाव्यते। भारतस्य मौलिकः सांस्कृतिक इतिहासश्चापि संस्कृत एव वर्तते निहितः। अतः समेषामपि संस्कृतविदुषां कर्तव्यमिदमस्ति यत्ते राष्ट्रस्यास्य सांस्कृतिके जागरणात्मके कार्ये सन्नद्धा भवेयुरिति।

श्रीगिरिधर-साहित्यिकशोधसंस्थानस्य तथा राजस्थान संस्कृतसंसदश्च तत्त्वावधाने समायोजितेऽस्मिन् समारोहे संस्कृतस्य प्रमुखा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



विद्वांसो भागं गृहीतवन्तः। यथा हि-भारतीय-संस्कृतिपरिषदो महामन्त्री श्रीरामजोलालशास्त्री, स्व० महामहोपाध्यायस्यात्मजः श्रीदेवीदत्तचतुर्वेदः, महाराजसंस्कृतकालेजाध्यक्षः श्रीगोविन्दनारायणशर्मा नैयायिकः, वैद्यश्रीरामदयालुशर्मा, श्रीयुगलकिशोरशर्ममहोदयः, श्रीनारायणलालकाङ्करस्तथा श्रीरामस्वरूपशर्मप्रभृतयो विद्वांसोऽपि स्व० श्रीमहामहोपाध्यायस्य सर्वाङ्गीणं जीवनमधिकृत्य समभाषन्त।

संस्कृत-संस्कृति-प्रचार मण्डलस्य विचारसभा

यस्य स्थापनाऽधुनैव जाता, तस्यैव प्रचारमण्डलस्यास्य तत्त्वावधाने गतमासेऽत्रैका विचारसभा समायोजिताऽभूत्। अवसरेऽस्मिन् मण्डलस्य गतिविधीनां कृते सक्रियं रूपं दातुं मिथो विभिन्ना विचाराः समुपास्थाप्यन्त। तथागामिन्या भानुसप्तम्याः शुभेऽवसरे गायत्रीयज्ञस्यायोजनस्यापि निश्चयोऽक्रियत। अवसरे चात्र **योगिराजस्य श्रीमाधवानन्दस्वामिनः** शुभाशीर्वादात्मकः सन्देशोऽपि प्रास्तूयत, यत्र स्वमण्डलस्य रूपरेखायास्तथा आदर्शानाञ्च प्रसारणे स्वयोगदानस्य स्वीकृतिरप्यासीत् प्रदत्ता। मण्डलस्यास्योद्देश्यञ्च वर्तते भारतीयसंस्कृत्या आदर्शानां तथा मर्यादानाञ्च स्थापनया सह नव्यवंशपरम्परागतानां जनानां कृते समुचितस्य प्रशिक्षणस्य प्रदानं तथैतन्निर्मितानां विभिन्नानां योजनानाञ्च कृते मूर्तरूपस्य दानञ्चेति।

संस्कृत-प्रचार-परिषद्

गतजनवरीमासस्य २७ तारिकायां रात्रौ ८॥ सार्धाष्टवादने राजस्थानीय-संस्कृतपरिषदोऽस्या उपवेशनं परिषत्कार्यालये **वैद्यराज-श्रीरामप्रकाशस्वामिनो**ऽध्यक्षतायां समपद्यत। तत्राद्यावधि सम्पन्नस्य वृत्तजातस्य पठनानन्तरं कार्यकारिण्याः पुनर्घटनमजायत।

तथा 'भारती' मासिकपत्रिकायाः सरलसंस्कृतपरीक्षाणाञ्च परिचालनाय भारती-संस्कृतविद्यालयस्य च सम्यक् परिचालनस्य निर्णयोऽक्रियत। कार्यकारिण्याः सङ्घटने च निम्नाङ्किताः पदाधिकारिणो निर्वाचिताः समभूवन्। यथाहि—

अध्यक्षः— वैद्य-श्रीरामप्रकाशस्वामिमहाभागः।

उपाध्यक्षः—श्रीहरिशास्त्री

मन्त्री—श्रीगिरिराजशास्त्री

प्रचारमन्त्री—वैद्यश्रीकेदारनाथशर्मा

कोषाध्यक्षः—श्रीनिवासवाक्कीलः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सदस्याश्च—१. श्रीखेमचन्द्रशर्मा, २. श्री-
द्वारकाप्रसादः पाटोदिया, ३. श्रीधनप्रकाशः,
४. श्रीकालीचरणभट्टाचार्यः, ५. दीनानाथत्रिवेदी
मधुपश्चेति।

हन्त ! श्रीमाणिक्यलालवर्मा स्वर्गतः

भीलवाडामण्डलान्तर्गते विजोलियाभिधे
ग्रामे १८९७ ईशवीयेऽब्दे दिसम्बरमासस्य ४
तारिकायां लब्धजन्मा भूतपूर्वः संसत्सदस्यो
मेवाडप्रजामण्डलसंस्थापको राजस्थानस्य वयो-
वृद्धो जननेता ७२ वर्षात्मके वयसि च वर्तमानो
श्रीमाणिक्यलालवर्मा जनवरीमासस्य २४
तारिकायां प्रातः ८ वादने उदयपुरस्थे चिकि-
त्सालये नश्वरमिमं देहं परित्यज्य दिवं गतः।
गताब्देषु च राजस्थानस्य सोमाक्षेत्रेषु नागरि-
काणां समुत्थानार्थं तेन श्रीवर्ममहानुभावेन
महद्रचनात्मकं कार्यमनुष्ठितम्। एवञ्च राज-
स्थानखादी-ग्रामोद्योगमण्डलस्याध्यक्षपदे विद्य-
मानस्य तथादिवासिनामुपकाराय विविधानि
रचनात्मकानि कार्याणि कुर्वतस्तस्य वर्ममहो-
दयस्य निधनेन महती क्षतिर्जातेति स्फुटमेव।
किञ्च—

विनम्रः सफलो नेता सत्यवक्ता स निर्भयः।
लक्ष्यसिद्धौ महोत्साहो **वर्मा** हन्त दिवं गतः॥

पण्डितश्रीचैनसुखदासो दिवं गतः

हन्त अस्यैव मासस्य २६ तारिकायां रात्रौ सार्धैकवादने जयपुरस्थ-दिगम्बरजैन-संस्कृत-महाविद्यालयस्य प्रधानाचार्यो दार्शनिको विद्वान् पं० श्रीचैनसुखदासो न्यायतीर्थः ७० वर्षात्मके वयसि वर्तमानः स्वर्गं गतः। स हि पण्डितवरो-जयपुरमण्डलान्तर्गते भादवाग्रामे श्रीजवाहर-मलस्य गृहे १९५६ तमे वैक्रमेऽब्दे माघकृष्णपक्षे १५ तिथौ जन्म लब्धवान्। स हि शोभनो वक्ता कुशलो लेखकस्तथा पत्रकारश्चाप्यवर्तत।

किञ्च दि० जैनसंस्कृतकालेऽत्र प्रधानाचार्य-पदे वर्तमानेन तेन ३८ वर्षाणि यावत् संस्कृत-शिक्षणस्य सुमहत्कार्यमनुष्ठितम्। तथा च तेन महानुभावेन १९६७ तमे खैष्टेऽब्दे राष्ट्रपति-पुरस्कारोऽपि लब्ध आसीत्। अतस्तस्य दार्श-निकपण्डितस्य स्वर्गमनेन संस्कृतजगति विशेष-तश्च जैनसमाजेऽपूरणीया क्षतिर्जाता।

किञ्च वर्षद्वयात् प्राक् स्वर्गीयपण्डितवरम-धिकृत्य **वीर-वाणी** पत्रिकया 'पं० चैनसुख-दास-जयन्ती-विशेषाङ्कः प्रकाशितः, तत एव पण्डित-श्रीदामोदराचार्यैं रचितं पद्यद्वयं संगृह्यात्र प्रकाश्यते—

साहित्यसेवी च समाजसेवी,
विद्यार्थिसेवी जिनधर्मसेवी।
श्रीन्यायतीर्थादपरो न कश्चिद्
दृष्टो मया जैनसमाजमध्ये॥
विद्वांसः किमु सन्ति सम्प्रति परे
जैनेषु न प्राञ्जलाः;
नैवासन् कति वा पुरा न च तथा
भूयो भविष्यन्ति वा।
सर्वे स्वोदरपूरणैकनिरताः
किन्त्वत्र विद्यार्थिनां।
दृष्टः कष्टहरो मया नहि परः
श्रीन्यायतीर्थोपमः॥

श्रद्धाञ्जलिः

किञ्चोभयोरप्येतयोर्महानुभावयोः सहसा स्वर्गमनेन दुःखमनुभवद्भिः संस्कृतपण्डितैरुभाव-प्येतौ समुद्दिश्य महाराजसंस्कृतकालेजे **प्राचार्य-श्रीगोविन्दनारायणशर्मनैयायिकानां** साभा-पत्ये शोकसभैका समायोज्यत। एवं भारती परिवारोऽपि सोयं दिवं गताभ्यां ताभ्यामुभा-भ्यामपि श्रद्धाञ्जलिं समर्प्य स्वकर्तव्यमनुतिष्ठ-तीति शम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

❀ अथ वेदोक्तं रात्रिसूक्तम् ❀

श्रीहरिशास्त्रिणानूदितो दुर्गापाठः

ॐ रात्रीत्याद्यष्टर्चस्य सूक्तस्य कुशिकः सौभरो रात्रिर्वा भारद्वाजो ऋषिः रात्रिर्देवता गायत्री छन्दः देवीमाहात्म्यपाठे विनियोगः।

ॐ रात्रि व्यख्यदायती पुरुत्रा देव्यक्षभिः।
विश्वा अधि श्रियोऽधित ॥१॥

अर्वप्रा अमर्त्या निवतो देव्युद्वतः।
ज्योतिषा बाधते तमः ॥२॥

निरु स्वसारमस्कृतोषसं देव्यायती।
अपेदु हासते तमः ॥३॥

सा नो अद्य यस्या वयं नि ते यामन्नविक्ष्महि।
वृक्षे न वसतिं वयः ॥४॥

नि ग्रामासो अविक्षत नि पद्वन्तो नि पक्षिणः।
नि श्येनासश्चिदर्थिनः ॥५॥

यावयावृक्यं वृकं यवय स्तेनमूर्म्ये।
अथा नः सुतरा भव ॥६॥

उपमा पेपिसत्तमः कृष्णं व्यक्तमस्थित।
उषऋणेवयातय ॥७॥

उप ते गा इवाकरं वृणीष्व दुहितर्दिवः।
रात्रि स्तोमं न जिग्युषे ॥८॥

ॐ रात्री आती देखती है तारों की दृष्टिसे जगत्।
बहुधा, सब शोभाएँ यही धारण हैं किए ॥१॥

अमर्त्या वह देवी ही ऊंचे नीचे बड़े लघु।
पदार्थ ढाँप लेती है ज्योतिसे तम नाशती ॥२॥

वही रात्री भगवती प्रगटाती उषा स्वसा।
उषाके स्पष्ट होतेही निशाका तम भागता ॥३॥

जिसके प्राप्त होनेसे सुखसे घरमें बसें।
जैसे संसार-वृक्षोंमें पंक्षी गण सुखी रहें ॥४॥

जैसे गांव सभी सोवे पशु भी पक्षिवृन्द भी।
बाज से पंख फैलाये स्वार्थ साधक लोक भी ॥५॥

अये माता रात्रि देवो वृक के साथ वृवय को।
पृथक् निकालो हमसे, हमको सुखदा रहो ॥६॥

यह काला तम हमैं समुपस्थित होगया।
हे उषे! ऋण के तुल्य इसको दूर कीजिए ॥७॥

गौके सम तुम्हें पास आता मैं संमुखी करूँ।
हे रात्रि मेरे स्तव सा हवि भी लीजिए स्वयम् ॥८

इति रात्रि सूक्तं।

यह रात्रि सूक्त ऋक् संहिता का है।
इसकी अधिष्ठात्री देवता भगवती है।
अब नवार्ण मन्त्र का विनियोग लिखते हैं—
इस दुर्गा नवाक्षर मन्त्र के ऋषि तीन हैं।
ब्रह्मा विष्णु रुद्र; छन्द; गायत्री और उष्णिग् ॥१
अनुष्टुप् हैं, देवताऐं काली लक्ष्मी सरस्वती।
नन्दा शाकम्भरी भीमा, शक्तियां तीन हैं तथा ॥२
रक्तदन्ती और दुर्गा भ्रामरी तीन बीज हैं।
अग्नि वायु तथा सूर्य इसके तीन तत्त्व हैं ॥३॥
अभीष्ट लाभ सिद्धयर्थ इसका विनियोग है ॥४॥
ऐंह्रींक्लीं चामुण्डाये विच्चे यह नवार्ण मन्त्र

दुर्गा महामाया का प्रधान मन्त्र है। इसके न्यास करके दुर्गापाठ करने वाला साधक ध्यान करै फिर मन्त्र जपे १०८ बार।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमोऽध्यायः

विनियोगः

ॐ प्रथमचरित्रस्य ब्रह्मा ऋषिः, महाकाली देवता, गायत्री छन्दः, नन्दा शक्तिः, रक्तदन्दिका बीजम्, अग्निस्तत्त्वम् ऋग्वेदः स्वरूपम्, श्रीमहाकालीप्रीत्यर्थे प्रथमचरित्रजपे विनियोगः ।

❀ ध्यानम् ❀

खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुण्डीं शिरः शङ्खं संदधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम् ।
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम् ।

प्रथम चरित की देवता महाकाली का ध्यान—

खड्गबाण गदा शूल शंख चक्र सुदण्ड भी ।
भुशुण्डी कार्मुक शिर हाथोंमें धारती हुई ॥१॥
तामसी सांवली शक्ति महामाया महेश्वरी ।
दशपाद दशभुजा देवी दशमुखी शिवा ॥२॥
जिह्वा लहलहाती है बिखरे केश पीठ पै ।
दिगम्बरा महाकाली विशालाक्षी महाभया ॥३॥
प्रदीप्त दाढ दांतों से प्रकाश करती दिशा ।
विशाल होठ प्रान्तों से रक्त की धार वर्षती ॥४॥
मुण्डमाला पहनती शव शङ्करपै चढी ।
भीषण प्रेत हाथों की रसना पहने हुए ॥५॥
अट्ट हास करै चण्डी भक्तके भयहारिणी ।
वरं ब्रूहि वरं ब्रूहि कहती उच्चनाद से ॥६॥
ज्ञान प्रदान करती हरती भक्त कष्टको ।
मनोरथ मयी सिद्धि देती है ध्यान मात्र से ॥७॥
महाकाली महाशक्ति आद्या प्रकृतिको भजूं ।
घोर चीत्कार करती शिवाओं से घिरी हुई ॥८॥

श्रीगणेशायनमः ॥ अथ हिन्दी दुर्गापाठ, प्रथम अध्याय प्रारम्भ—

विष्णु सम्मोह जननी मधुकैटभ नाशिनी ।
ब्रह्मा का त्राण करणी, कालिका को नमोनमः ॥

(भगवान् व्यास के शिष्य जैमिनि श्रीव्यास के मुख से सभी धर्मों का विवरण सुनकर शेष कुछ प्रश्नों को पूछने के लिए महर्षि मार्कण्डेय के पास पहुँचे, तब मार्कण्डेय ने भगवती के ध्यान स्थित होने के कारण अवकाश न देखकर विन्ध्याचल की गुफा में अपने चार शिष्यों के पास जैमिनी को (जो पक्षी रूप में वहां रहते थे) भेजा । उन पक्षियों ने मार्कण्डेय भागुरि सम्बाद प्रारम्भ कर मन्वन्तरों की कथा के प्रसंग में आठवें सावर्णि मन्वन्तर की कथा सुनाते हैं—मार्कण्डेय उवाच इत्यादि)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ नमश्चण्डिकायै

'ॐ ऐं' मार्कण्डेय उवाच ॥१॥

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ।
निशामय तदुत्पत्तिं विस्तराद् गदतो मम ॥२॥

महामायानुभावेन यथा मन्वन्तराधिपः ।
स बभूव महाभागः सावर्णिस्तनयो रवेः ॥३॥

स्वारोचिषेऽन्तरे पूर्वं चैत्रवंशसमुद्भवः ।
सुरथो नाम राजाभूत्समस्ते क्षितिमण्डले ॥४॥

तस्य पालयतः सम्यक् प्रजाः पुत्रानिवौरसान् ।
बभूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तदा ॥५॥

तस्य तैरभवद् युद्धमतिप्रबलदण्डिनः ।
न्यूनैरपि स तैर्युद्धे कोलाविध्वंसिभिर्जितः ॥६॥

ततः स्वपुरमायातो निजदेशाधिपोऽभवत् ।
आक्रान्तः स महाभागस्तैस्तदा प्रबलारिभिः ॥७॥

अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः ।
कोशो बलं चापहृतं तत्रापि स्वपुरे ततः ॥८॥

ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः ।
एकाकी हयमारुह्य जगाम गहनं वनम् ॥९॥

स तत्राश्रममद्राक्षीद् द्विजवर्यस्य मेधसः ।
प्रशान्तश्वापदाकीर्णं मुनिशिष्योपशोभितम् ॥१०॥

तस्थौ कंचित्स कालं च मुनिना तेन सत्कृतः ।
इतश्चेतश्च विचरंस्तस्मिन्मुनिवराश्रमे ॥११

सोऽचिन्तयत्तदा तत्र ममत्वाकृष्टचेतनः ।
मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत् ॥१२॥

मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा ।
न जाने स प्रधानो मे शूरहस्ती सदामदः ॥१३॥

मम वैरिवशं यातः कान् भोगानुपलप्स्यते ।
ये ममानुगता नित्यं प्रसादधनभोजनैः ॥१४॥

अनुवृत्तिं ध्रुवं तेऽद्य कुर्वन्त्यन्यमहीभृताम् ।
असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययम् ॥१५॥

संचितः सोऽतिदुःखेन क्षयं कोशो गमिष्यति ।
एतच्चान्यच्च सततं चिन्तयामास पार्थिवः ॥१६॥

ॐ नमश्चण्डिकायै

मार्कण्डेय बोले (१)

सूर्य का पुत्र सावर्णि कहता आठवां मनु पूरी
बतावें उसकी उत्पत्ति मुझ से सुनो ॥१॥ मंत्र २

जैसे मन्वन्तराधीश महामाया प्रभावसे बडभागी
वह हुवा सावर्णि रवि का सुत ॥२॥ मं० ३।

स्वारोचिष अन्तर में पहले चैत्रवंश में।
सारे धरामण्डल में हुआ सुरथ भूपति ।३ मं० ४॥

अपने तनूजों जैसे प्रजाको पालते हुए।
कोला विध्वंसि भूपाल उसके शत्रु होगये ।४। मं०५

युद्ध प्रबल दण्डी भी उसका उनसे हुआ।
थोडेसे शत्रुओंसे भी युद्ध हारगया वह ।५।मं. ६॥

अपने पुरमें आया स्वराष्ट्रपति ही रहा।
वहां भी वह आक्रान्त हुआ रिपु समूहसे ।६।मं.७॥

बली दुर्जन दुष्टात्मा उसके मन्त्रिवृन्दने।
कोष सैन्य सभी छीना वहां निजपुरस्थ का।७।मं.८

आखेट का मिष लिए प्रभुताहीन भूपति।
इकेला चढ घोडेपे घने जंगल में गया ।८। मं. ९॥

वहां महर्षि मेधाका देखा आश्रम भूपने।
भराथा मुनिशिष्यों से शान्त श्वापद थे जहां।१०।

आतिथ्य पाया मुनिसे कुछकाल वहीं रहा।
यहां वहां विचरता मुनि आश्रम बीच ही ॥११॥

ममताधीन मनसे वह यों सोचता रहा।
पूर्वजोंने जिसे पाला वह मुझसे विहीन हो ॥१२॥

पुर मेरे कुभृत्यों से है सुरक्षित या नही।
न जानें वह मातङ्ग शूर मेरा सदामदी ॥१३॥

बैरियों के वशपडा कौन से भोग पा रहा।
मेरे सेवक पाते थे धन भोग प्रसाद जो ॥१४॥

वे आज और भूपों के चलते अनुकूल हैं।
उन दुर्व्ययशीलोंके सदा व्यय प्रयोग से ॥१५॥

दुःख सञ्चित भी मेरे कोषका क्षय होयगा।
सोचता ही रहा राजा यहभी और औरभी ॥१६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र विप्राश्रमाभ्याशे वैश्यमेकं ददर्श सः ।
स पृष्टस्तेन कस्त्वं भो हेतुश्चागमनेऽत्र कः ॥१७॥
सशोक इव कस्मात्त्वं दुर्मना इव लक्ष्यसे ।
इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितम् ॥१८॥
प्रत्युवाच स तं वैश्यः प्रश्रयावनतो नृपम् ॥१९॥

वैश्य उवाच ॥२०॥

समाधिर्नाम वैश्योऽहमुत्पन्नो धनिनां कुले ॥२१॥
पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः ।
विहीनश्च धनैर्दारैः पुत्रैरादाय मे धनम् ॥२२॥
वनमभ्यागतो दुःखी निरस्तश्चाप्तबन्धुभिः ।
सोऽहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकाम् ॥२३
प्रवृत्तिं स्वजनानां च दाराणां चात्र संस्थितः ।
किं नु तेषां गृहे क्षेममक्षेमं किं नु साम्प्रतम् ॥२४॥
कथं ते किं नु सद्वृत्ता दुर्वृत्ताः किं नु मे सुताः ॥२५

राजोवाच ॥२६॥

यैर्निरस्तो भवांल्लुब्धैः पुत्रदारादिभिर्धनैः ॥२७॥
तेषु किं भवतः स्नेहमनुबध्नाति मानसम् ॥२८॥

वैश्य उवाच ॥२९॥

एवमेतद्यथा प्राह भवानस्मद्गतं वचः ॥३०॥
किं करोमि न बध्नाति मम निष्ठुरतां मनः ।
यैः संत्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः ॥३१॥
पतिस्वजनहार्दं च हार्दि तेष्वेव मे मनः ।
किमेतन्नाभिजानामि जानन्नपि महामते ॥३२॥
यत्प्रेमप्रवणं चित्तं विगुणेष्वपि बन्धुषु ।
तेषां कृते मे निःश्वासो दौर्मनस्यं च जायते ॥३३॥
करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरम् ॥३४

मार्कण्डेय उवाच ॥३५॥

ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ ॥३६॥
समाधिर्नाम वैश्योऽसौ स च पार्थिवसत्तमः ।
कृत्वा तु तौ यथान्यायं यथार्हं तेन संविदम् ॥३७
उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ ॥३८॥

वहीं आश्रम के पास एक वैश्य दिखा उसे ।
पूछा हो कौन है हेतु यहां आगम का कहो ॥१७॥
शोकपीडितसे क्यों हो दुर्मना दीखते मुझे ।
ऐसी प्रेमभरी वाणी सुनके क्षितिपालकी ॥१८॥
नृपको उत्तर दिया विनयानत वैश्यने ॥१९॥

वैश्य बोला मं० ॥२०॥

समाधि नाम मैं वैश्य धनवान् कुल जातहूँ ॥२१॥
दुःशील पुत्रदारों ने निकाला धन लोभसे ।
होन हूं धनदारों से पुत्रोंने धन लेलिया ॥२२॥
दुःखी हो वनमें आया तजा बान्धववर्ग ने ।
न जानता मैं पुत्रोंकी प्रवृत्ति सुखदुःखकी ॥२३॥
सुजनों सुतदारों की आश्रमस्थ हुआ यहां ।
उनके घरमें क्षेम अक्षेम वा है अभी ॥२४॥
कैसे हैं वे सदाचारी अथवा हीनवृत्त हैं ॥२५॥

राजा बोला ॥२६॥

धनहेतु निकाला है पुत्रदारादिने तुम्हें ॥२७॥
उन्हीमें अब क्यों चित्त तुम्हारा स्नेह बाँधता ॥२८

वैश्य बोला मं० ॥२९॥

ऐसी ही है हमारी जो कहते आप बात हैं ॥३०॥
क्या करूं मन मेरा तो धरै निष्ठुरता नही ।
जो छोड पितृका स्नेह पति स्वजन प्रेमभी ॥३१॥
निकाला धन तृष्णासे उन्हीमें मन स्निग्ध है ।
क्यों मैं यह नहीं जानूं ज्ञानवान् भी महामते ! ॥३२
निर्गुणी भी बन्धुओं में मन स्नेह बांधता ।
उन्हीपै यह निःश्वास और व्याकुल चित्त है ॥३३
क्या करूं उन रूखों में मन निष्ठुर हो नही ॥३४

मार्कण्डेय बोले मं० ॥३५॥

तब वे साथ ही विप्र ! गये मुनि समीप में ॥३६॥
समाधि बनियां और वह राजन्यरत्न भी ।
नीतियुक्त यथा योग्य बातें कर मुनीश से ॥३७॥
बैठे वैश्य महीपाल कथाऐं करने लगे ॥३८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजोवाच ॥३९॥

भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत् ॥४०॥

दुःखाय यन्मे मनसः स्वचित्तायत्ततां विना ।
ममत्वं गतराज्यस्य राज्याङ्गेष्वखिलेष्वपि ॥४१

जानतोऽपि यथाज्ञस्य किमेतन्मुनिसत्तम ।
अयं च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः ॥४२॥

स्वजनेन च संत्यक्तस्तेषु हार्दी तथाप्यति ।
एवमेष तथाहं च द्वावप्यत्यन्तदुःखितौ ॥४३॥

दृष्टदोषेऽपि विषये ममत्वाकृष्टमानसौ ।
तत्किमेतन्महाभाग यन्मोहो ज्ञानिनोरपि ॥४४॥

ममास्य च भवत्येषा विवेकान्धस्य मूढता ॥४५॥

ऋषिरुवाच ॥४६॥

ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे ॥४७॥

विषयश्च महाभाग याति चैवं पृथक् पृथक् ।
दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथापरे ॥४८

केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ।
ज्ञानिनो मनुजाः सत्यं किं तु ते न हि केवलम् ॥४९

यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः ।
ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणाम् ॥५०

मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः ।
ज्ञानेऽपि सति पश्यैतान् पतङ्गाञ्छावचञ्चुषु ॥५१

कणमोक्षादृतान्मोहात्पीड्यमानानपि क्षुधा ।
मानुषा मनुजव्याघ्र साभिलाषा सुतान् प्रति ॥५२

लोभात्प्रत्युपकाराय नन्वेतान् किं न पश्यति ।
तथापि ममतावर्ते मोहगर्ते निपातिताः ॥५३॥

महामायाप्रभावेण संसारस्थितिकारिणा ।
तन्नात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः ॥५४॥

महामाया हरेश्चैषा तया संमोह्यते जगत् ।
ज्ञानिनामपि चेतांसि देवी भगवती हि सा ॥५५॥

बलादाकृष्य मोहाय महामाया प्रयच्छति ।
तया विसृज्यते विश्वं जगदेतच्चराचरम् ॥५६॥

राजा बोले मं० ॥३९॥

भगवन् मैं तुम्हें पूछूँ एक बात बताइये ॥४०॥

बिना मननिरोधे जो मनके दुःख के लिए ।
मेरा राज्य गया तोभी राज्याङ्गोंमें ममत्व है ॥४१

जानते अज्ञके जैसे यह क्यों है महामुने ।
यह भी त्यक्त है पुत्रों और भृत्य स्वदारसे ॥४२॥

बिछुडा स्वजनों से भी उन्हींमें प्रेमवान हैं ।
मुझे और इसे दोनोंको ही अत्यन्त दुःख है ॥४३॥

दोष दीखे विषय में ममताधीन चित्त हैं ।
मोह हो ज्ञानियों में भी यह कैसे महामुने ! ॥४४॥

अज्ञानान्ध हुए मेरी इसकी यह मूढता ॥४५॥

ऋषि बोले मं० ॥४६॥

ज्ञान है सब जीवों में विषयों के प्रयोग का ॥४७

महामते विषय भी प्राप्त होते जुदा जुदा ।
दिवान्ध हैं कई प्राणी और रात्र्यन्ध हैं कई ॥४८

दिनरात्र्यन्ध हैं कई प्राणवान् समदृष्टि हैं ।
ज्ञानी मनुज हैं सत्य किन्तु केवल वे नहीं ॥४९॥

क्योंकि सभी ज्ञानवाले पशुपक्षिमृगादि हैं ।
ज्ञान जो मनुजों के है मृगपक्ष्यादिके वही ॥५०॥

जो मृगादिक में ज्ञान दोनोंमें तुल्य है वह ।
ज्ञान होते इन्हे देखो खग ये शिशु चोंचमें ॥५१॥

दाना ला डालते ही है क्षुधापीडित भी हुए ।
योंही नर नरश्रेष्ठ पुत्रों में साभिलाष हैं ॥५२॥

लोभी प्रत्युपकारार्थ क्या नहीं देखते इन्हे ?
पडे हैं फिर भी ममता चक्रवात् मोहगर्त में
(खड्डे में) ॥५३॥

संसार की स्थितिकारी महामाया प्रभाव से ।
यहां आश्चर्य न करो योगनिद्रा महेश्वर ॥५४॥

हरिकी यह माया है जगको यह मोहती ।
मनको ज्ञानियों के भी देवी भगवती वही ॥५५॥

महामाया डालती है मोहमें खींचके बलात् ।
रचती यह माया ही है चराचर विश्व को ॥५६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ।
सा विद्या परमा मुक्तेर्हेतुभूता सनातनी ।।५७।।
संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरी ।।५८।।

राजोवाच ।।५९।।

भगवन् का हि सा देवि महायायेति यां भवान् ।६०।
ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च किं द्विज ।
यत्प्रभावा च सा देवी यत्स्वरूपा यदुद्भवा ।।६१।।
तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ।।६२

ऋषिरुवाच ।।६३।।

नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततम् ।।६४।।
तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम ।
देवानां कार्यसिद्धयर्थमाविर्भवति सा यदा ।।६५।।
उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते ।
योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते ।।६६।।
आस्तीर्य शेषमभजत्कल्पान्ते भगवान् प्रभुः ।
तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ ।।६७।।
विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ ।
स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः ६८
दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च जनार्दनम् ।
तुष्टाव योगनिद्रां तामेकाग्रहृदयस्थितः ।।६९।।
विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम् ।
विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ।।७०
निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ।।७१।।

ब्रह्मोवाच ।।७२।।

त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका
सुधा त्वमक्षरे नित्ये त्रिधामात्रात्मिका स्थिता ।
अर्धमात्रा स्थिता नित्या यानुच्चार्या विशेषतः ।।७४।।
त्वमेव सन्ध्या सावित्री त्वं देवि जननी परा ।
त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत् ।।७५।।
त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा ।
विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ।।७६।।

यही प्रसन्ना वर दे नरों की मुक्तिके लिए ।
यही विद्या परा मुक्तिहेतु होती सनातनी ।।५७।।
संसार बन्ध की हेतु यही सर्वेश्वरी ।।५८।।

राजा बोला ।।५९।।

भगवन् ! कौन है देवी महामाया जिसे कहैं ।।६०।।
कैसे उत्पन्न होती है इसके काम क्या द्विज ? ।
कहां से उद्भव हुवा क्या प्रभाव स्वरूप क्या ।।६१
सभी मैं सुनना चाहूं ब्रह्मज्ञ वर आपसे ।।६२।।

ऋषि बोले ।।६३।।

नित्या वह जगन्मूर्ति उसीने सब है रचा ।।६४।।
तो भी उत्पत्ति उसकी बहुधा मुझसे सुनो ।
देवों के काम करने होती प्रगट है तभी ।।६५।।
नित्या भी वह उत्पन्न कहाती इस लोक में ।
समुद्र मात्र जगमें शेष-विस्तर पै हरि ।।६६।।
कल्पान्तमें योगनिद्रा सेरहे थे महाप्रभु ।
तब केशव के कर्णमल संजात दैत्य दो ।।६७।।
मधु-कैटभ ब्रह्माको मारनेको खडे हुए ।
वहां केशवके नाभिपद्मस्थित विरंचिने ।।६८।।
देख दारुण दैत्यों को और निद्रित विष्णुको ।
एकाग्रमन से योगनिद्रा की स्तुतियां पढी ।।६९।।
प्रबोधनार्थ हरिके हरिनेत्रनिवासिनी ।
विश्वेश्वरी जगद्धात्री स्थिति संहारकारिणी ।।७०
उस निद्रा भगवती विष्णु तैजस शक्तिकी ।।७१।।

ब्रह्मा बोले ।।७२।।

तू स्वाहा तू स्वधा तूही वषट् तू ही स्वरात्मिका ।।
तू सुधा अक्षरे नित्ये तीन मात्रा स्वरूपिणी ।
अर्धमात्रा तुही मातः जो अवाचा विशेष है ।।७४
तू सन्ध्या और सावित्री देवि ! तू जननी परा ।
तू ही जगद्धारती है तू ही है रचती जगत् ।।७५।।
तूही है पालती तूही खाती है अन्त में सदा ।
विसृष्टि में सृष्टि तू है स्थिति पालनमें तु ही ।।७६।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये ।	जगन्मये ! जगत् की तू अन्त संहार रूपिणी ।
महाविद्या महामाया महामेधा महास्मृतिः ॥७७॥	महाविद्या महामाया महामेधा महास्मृति ॥७७॥
महामोहा च भवती महादेवी महासुरी ।	महामोहस्वरूपा तू महादेवी महासुरी ।
प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ॥७८॥	तू है प्रकृति सबकी गुणोंकी योजिका तु ही ॥७८॥
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ।	कालरात्री महारात्री मोहरात्री भयङ्करी ।
त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ७९	तू श्रीः तू ईश्वरी तूही बुद्धि तू बोधलक्षणा (बोधकारिणी) ॥७९॥
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च ।	लज्जा पुष्टि तूहीं तुष्टि तू शान्ति क्षान्तिरूप तू ।
खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥८०	खड्गिनी शूलिनी घोरा गदिनी चक्रधारिणी ॥८०
शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा ।	शंखिनीं चापिनी बाण भुशुण्डी दण्डधारिणी ।
सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी ॥८१	सौम्या तू अति सौम्या तू सौम्योंमें भी सुरूपिणी
परापराणां परमा त्वमेव परमेश्वरी ।	परों की भी परा तू है परमा परमेश्वरी ।
यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ॥८२॥	कुछ भी जो कहीं वस्तु सदसत्सर्वरूपिणी ॥८२॥
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा ।	सबकी शक्ति तूही है मैं तेरी स्तुति क्या करूं ।
यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ॥८३	तूने जो जगका कर्ता भर्ता संहारकारक ॥८३॥
सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ।	उसे निद्रावश किया कौन तेरी करै स्तुति ।
विष्णुः शरीरग्रहणमहमीशान एव च ॥८४॥	विष्णुको मुझको देहधारी शङ्करको किया ॥८४॥
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत्।	उसकी स्तुति गानेको कौन सामर्थ्य युक्त है ।
सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ॥८५॥	ऐसे तू स्वप्रभावों से उदारों से हुई स्तुता ॥८५॥
मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ।	मोहले इस दुर्धर्ष मधुकैटभ युग्म को ।
प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ॥८६॥	प्रबोधको प्राप्तकर शीघ्रही विष्णुदेवको ॥८६॥
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥८७॥	इसको ज्ञानदे शीघ्र मधुकैटभ नाशका ॥८७॥
ऋषिरुवाच ॥८८॥	ऋषि बोले ॥८८॥
एवं स्तुता तदा देवी तामसी तत्र वेधसा ॥८९॥	ऐसे स्तुत हुई देवी तामसी ब्रह्मदेव से ॥८९॥
विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ ।	मधुकैटभ नाशार्थ विष्णुके बोधके लिए ।
नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः ॥९०॥	नेत्र नासा मुख भुजा उरसे बाह्य हो वही ॥९०॥
निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः ।	अव्यक्तजन्मा ब्रह्माके दृष्टिमें व्यक्त होगई ।
उत्तस्थौ च जगन्नाथस्तया मुक्तो जनार्दनः ॥९१॥	उठ बैठे जगन्नाथ उससे परिमुक्त हो ॥९१॥
एकार्णवेऽहिशयनात्ततः स ददृशे च तौ ।	एकाब्धिमें शयन से फिर देखे सुरारि को ।
मधुकैटभौ दुरात्मावतिवीर्यपराक्रमौ ॥९२॥	मधुकैटभ दुष्टात्मा बहुवीर्य पराक्रमी ॥९२॥
क्रोधरक्तेक्षणावत्तुं ब्रह्माणं जनितोद्यमौ ।	क्रोध से लाल दृग्वाले विधिको मारने उठे ।
समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः ॥९३॥	उठते उन दोनों से लड़े श्रीभगवान् हरि ॥९३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चवर्षसहस्राणि बाहुप्रहरणो विभुः ।
तावप्यतिबलोन्मत्तौ महामायाविमोहितौ ॥९४॥
उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम् ॥९५
श्रीभगवानुवाच ॥९६॥
भवेतामद्य मे तुष्टौ मम वध्यावुभावपि ॥९७॥
किमन्येन वरेणात्र एतावद्धि वृतं मम ॥९८॥
ऋषिरुवाच ॥९९॥
वञ्चिताभ्यामिति तदा सर्वमापोमयं जगत् ॥१००
विलोक्य ताभ्यां गदितो भगवान् कमलेक्षणः ।
आवां जहि न यत्रोर्वी सलिलेन परिप्लुता ॥१०१॥
ऋषिरुवाच ॥१०२॥
तथेत्युक्त्वा भगवता शङ्खचक्रगदाभृता ।
कृत्वा चक्रेण वै च्छिन्ने जघने शिरसी तयोः १०३
एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयम् ।
प्रभावमस्या देव्यास्तु भूयः शृणु वदामि ते ।ऐंॐ

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये मधुकैटभवधो नाम प्रथमोऽध्यायः ॥

उवाच १४, अर्धश्लोकाः २४, श्लोकाः ६६ ॥
एवमादितः ॥१०४॥

बाहुयुद्ध किया पांच हजार तक वत्सर ।
मायासे मोहित हुए वे महा मदमत्त भो ॥९४॥
बोले केशव को कोई हमसे वर मांगलो ॥९५॥
भगवान् बोले ॥९६॥
तुष्ट हो तो तुम अभी मुझसे बध्य होइये ॥९७॥
क्या मुझे अन्य वरसे वर मेरा यही सहो ॥९८॥
ऋषि बोले ॥९९॥
यों वञ्चित हुऐ दोनों सर्वत्र जल विश्वमें ॥१००॥
देख ो बात यों बोले भगवान् कमलाक्षको ।
जहां जल न हो भूपें हमको मारिये वहीं ॥१०१॥
ऋषि बोले ॥१०२॥
शङ्ख-चक्र गदाधारी हरि ने 'अस्तु' बोलके ।
चक्रसे शिर दोनोंका काट डाला स्वजंघपै ॥१०३
ऐसे यह समुत्पन्न हुई स्तुति विरिंचिसे ।
प्रभाव इस देवीका सुन और कहूं तुझे ॥१०४॥

श्रीहरिशास्त्रिविरचित हिन्दीदुर्गापाठ में प्रथम अध्याय पूर्ण । श्रीः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जयतु संस्कृतम्

श्रीकालूटि हनुमन्तरावः हैदराबादः

क्रोडे सति शिशौ माता भ्रमाद्विचिनुयाद् यथा ।
सत्यां संस्कृतभाषायां देशभाषा विचीयते ॥१॥

मंदाकिनीव या भाषा दिवोऽस्मद्देशमाविशत् ।
यद्भाषासरित्पदाद्भिः सारा साहित्यभूरियम् ॥२॥

माता भारतभाषाणां भाषाविद्भिः प्रकीर्तिता ।
व्युत्पत्तिबहुला पुष्टाऽर्थव्यक्तौ शक्तिशालिनी ॥३॥

शास्त्ररत्नाकरः सर्वज्ञानानां च महाखनिः ।
पुरा भारतविज्ञानं यन्नाव्यप्रदिशो ययौ ॥४॥

पारावारं मसिं कृत्वा लेखिनीं हिमपर्वतम् ।
जगत्पत्रेऽप्यनंतानि लिख्येरन् तत्पदानि न ॥५॥

पुरुषाणां रामचंद्रः स्त्रीणां जनकनंदिनी ।
मरुत्पुत्रो बलवतां वदान्यानां शिविः प्रभुः ॥६॥

कवीनां नाकुजन्मा च लोहानामपि कांचनम् ।
जात्यां जात्यां यथा श्रेष्ठं भाषाणां संस्कृतं तथा ॥७॥

एका संस्कृतभाषाऽस्मद्देशभाषाऽस्तु सांप्रतम् ।
सर्वेषां च हृदस्त्वेकं भाषावैरं च सीदतु ॥८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीगिरिराजशर्मा शास्त्री, जयपुरम्

पूर्वानुवृत्ता—

अथ स जराजीर्णतनुं मानवमेकं दृष्टवान् । इतः प्राक् कदाचिदपि स शाक्यसिंहो जगतो दुःखं नानुभूतवान् । इदानीञ्च निरीक्ष्य प्रथमं तं जराग्रस्तं विवरणमस्य विज्ञातुं सकौतूहलं सारथिं पप्रच्छ ।

हे सारथे ! एष कः पुरुषो दुर्बलः शुष्कमांसो रुधिरत्वक्स्नायुनद्धः श्वेतशिराः दन्तविहिनो दण्डमवलम्ब्य कष्टेन चलति ?

सारथिः प्राहः—

हे देव ! एष जरयाभिभूतः पुरुषः क्षीणेन्द्रियो बलवीर्यहीनोऽतिदुःखितः बन्धुजनेन तिरस्कृतोऽनाथभूतः कार्यकरणेऽसमर्थो वने छिन्नद्रुम इवास्ते ।'

बोधिसत्त्व उवाच—

किमेष अस्य कुलधर्मः ? अथवा समग्रस्य संसारस्यैव एषा अवस्था जायते ? मां प्रति एतत् शीघ्रं वद ? का वार्ता वर्तते ? येन विचिन्त्य अस्य विषयेऽहं चिन्तयिष्यामि इति ।

सारथिः प्राह—

'हे देव ! जरया जीर्णभावो नास्य कुलधर्मो नापि राष्ट्रधर्मः, किन्तु समग्रस्य संसारस्य प्राणिनां यौवनं जराजीर्णं भवति, भवतो मातापितृबान्धवज्ञातिसमूहेऽपि जरया विमुक्तः कोऽपि नास्ति' ।

इसके पश्चात् बुढापे से जर्जरित शरीर एक मनुष्य को उसने देखा । इसके पूर्व कभी भी उस शाक्यसिंह ने संसार के दुःख का अनुभव नहीं किया था । अब उस प्रथम जराग्रस्त वृद्ध को देखकर इसके विवरण को जानने को उत्सुक उसने सारथि को पूछा । उसने कहा—

हे सारथि ! यह कौन पुरुष दुर्बल, एवं क्षीणमांस वाला रुधिर त्वचा और स्नायुजाल से दबा हुआ श्वेत सिरवाला, दन्तविहीन दण्ड का सहारा लेकर दुःखी हुआ चल रहा है ।"

सारथि बोला—

हे देव यह बुढापे से अभिभूत पुरुष क्षीण इन्द्रियों वाला बल और वीर्य से हीन अत्यन्त दुःखी बन्धुजनों से पोड़ित अनाथ हुआ काम करने में असमर्थ वन में जैसे वृक्ष आधा कट जाता है वैसे है ।

बोधिसत्व बोले—

क्या यह इसका कुल धर्म ही है ? या सम्पूर्ण जगत् की ही यह अवस्था है यह शीघ्र बता यह क्या बात है जिसे सोच कर इसके विषय में मैं विचार करूंगा ।

सारथि बोला—

हे देव ! यह जरा से जीर्ण होना इसका कुल धर्म नहीं है और न ही यह राष्ट्रधर्म है, किन्तु समस्त संसार के प्राणियों का यौवन जरा से जीर्ण होता है । तुम्हारे माता पिता बान्धव और जाति समूह सब में जरा से मुक्त कोई नहीं है ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बोधिसत्त्वः पुनराह—

'हे सारथे ! बालानिव बुद्धिशून्यान् तान् नरान् धिक्, ये यौवनमदेन मत्ता भूत्वा वार्धकं न पश्यन्ति। इतः शीघ्रं रथं निवर्तय, अहं पुनः द्रक्ष्यामि जराग्रस्तस्य कीदृशी दशा भवतीति।

बोधिसत्व बोले—

हे सारथि ! अज्ञानी बालजन जैसी बुद्धिवाले लोगों को धिक्कार है जो यौवन से मदमत्त होकर वृद्धावस्था को नहीं देखते यहाँ से शीघ्र रथ को लौटाओ मैं फिर देखूँगा कि वृद्धावस्था से ग्रस्त की कैसी दशा होती है।

अथ शाक्यसिंहः सारथिं सन्दिदेश रथं सञ्चालयेति। गत्वा च स नगरस्य दक्षिणे द्वारे व्याधिग्रस्तं यातनापरीतं पुरुषमेकमोक्षाञ्चक्रे। ततः स सारथिं पप्रच्छ। तेन चोक्तं यथा—

तदनन्तर शाक्यसिंह ने सारथि को सन्देश दिया कि रथ को चलावें। जाकर नगर के दक्षिण द्वार पर व्याधिग्रस्त पीड़ा से दुःखी एक पुरुष को उसने देखा। तब उसने सारथि को पूछा उसने कहा—

कः सारथे ! पुरुष एष विवर्णगात्रः
सर्वेन्द्रियैश्च विकलः गुरु प्रश्वसंश्च।
सर्वाङ्गशुष्क उदराकुलप्राप्तकृच्छ्रः
मूत्रे निजे शकृति तिष्ठति कुत्सनीये॥

"सारथि ! पुरुष रूप वाला यह विवर्ण शरीरवाला सम्पूर्ण इन्द्रियों से विकल और कठिनाई से श्वास प्रश्वास लेता हुआ सम्पूर्ण अङ्ग जिसके सूख गए है और उदर से रुग्ण होने से जो क्षीण शरीर होगया है तथा जो अपने कुत्सित मूत्र और टट्टी में ही बैठा है। यह कौन है।

सारथिः पुनरवदत्—

हे देव ! अयं पुरुषः घातकेन रोगेणाक्रान्तो भूत्वा मरणासन्नामवस्थामुपगतः। बलतेजोविहीनो भूत्वा चात्र असहायः पतितोऽस्ति।

सारथि बोला—

हे देव ! पुरुष यह अत्यन्त घातक रोगयुक्त होकर मरणासन्न अवस्था को प्राप्त है। तथा बल और तेज विहीन यहां भूमि पर असहाय होकर पडा है।"

बोधिसत्वः उवाच—

हे सारथे ! नीरोगता तु जनस्यास्य विलोकनेन स्वप्नक्रीडेव प्रतीयते। व्याधिर्भयश्च एतादृशं भयङ्करं रूपं धारयतः। एतादृशः को मतिमान् पुरुषो भविष्यति यः एतामवस्थां दृष्ट्वापि रतिक्रीडां शुभां वदिष्यति।

बोधिसत्व बोले —

हे सारथि ! आरोग्यता तो इसे देखकर स्वप्न की क्रीडा जैसी लगती है। रोग और भय इस प्रकार का भयंकर रूप ले लेते है ? कौन ऐसा बुद्धिमान् पुरुष होगा जो इस अवस्था को देख करके भी क्रीड़ारति को शुभ संज्ञा देगा।

तदनन्तरं सारथिं बोधिसत्त्वस्य रथं पुनर्नगरं प्रत्यग्रेऽवधर्यत्। तदा बोधिसत्त्वः पश्चिमेन नगरस्य द्वारेणोद्यानभूमिं प्रति गच्छन् दृष्टवान् यत् सुमहता जनसमूहेन सह मृतं पुरुषमेकं

इसके पश्चात् बोधिसत्व के रथ को फिर से नगर में आगे बढाया। तब बोधिसत्व ने पश्चिम नगर द्वार से उद्यान भूमि में जाते हुए देखा बहुत बड़े जनसमूह ने मरे हुए पुरुष को

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समादाय तंज्जातीया जनाश्च रुदन्तः क्रोशन्त इतस्ततः शिरस्ताडनं कुर्वन्तो गच्छन्ति स्म। पुनर्बोधिसत्त्वः सारथिं प्रत्यवदत् सारथे! कोऽयं पुरुषो नीयते ?

सारथिः प्राह—

देव! एष पुरुषः सम्प्रति जम्बूद्वीपाद् अस्मात् प्रयाणं कृत्वा गतो न पुनर्मातरं पितरं पुत्रं भार्याञ्च द्रक्ष्यति, सर्वं परित्यज्य लोकान्तरं गतोऽयं पुनः स्वबन्धून् नैव द्रक्ष्यति।

बोधिसत्त्वः प्राह—

जरया ग्रस्तं यौवनं धिक, विविधैः रोगैः पराहतमारोग्यं धिक्, चिरमस्थिरं जीवनमप्येतं धिक्, रतिप्रसङ्गासक्तं पण्डितं जनञ्च धिक्।

अथ बोधिसत्वः—"सारथे! पुन र्नगरं मां प्रवेशय' इत्याह। पश्चात् उत्तरेण द्वारेणोद्यान-भूमिर्मभिगच्छन्तमेकं भिक्षुकं दृष्ट्वा स पुनः सारथिमाह—

कः सारथे! पुरुष एष प्रशान्तचित्तो
नोत्क्षिप्तचक्षुर्व्रजते युगमात्रदर्शी।
काषायवस्त्रवसनः सुप्रशान्तचारी
पात्रं गृहीत्वा न चोद्धत उन्नतो वा॥

सारथिः प्रत्यवदत्—

हे देव! एष पुरुषो भिक्षुनामा कामरतिं परित्यज्य अतिविनम्राचरणः संन्यासी भूत्वा आत्मवत् सर्वान् प्राणिनः पश्यन् रागद्वेषरहितो भूत्वा शरीरचर्यां निर्वर्तयन् वर्तते।

मार्ग में लिटा दिया, जाति के लोग रोते हुए चिल्लाते हुए इधर उधर सिर पटकते हुए जा रहे थे। फिर बोधिसत्व ने सारथि को यह कहा—सारथि! यह कौन पुरुष लेजाया जा रहा है।

सारथि बोला—

हे देव! यह पुरुष इस जम्बूद्वीप से प्रयाण करके गया हुआ अब फिर माता पिता पुत्र और गृहिणी को नहीं देखेगा। सब को छोडकर परलोक को प्राप्त हुआ है, यह फिर से अपने बन्धुओं नहीं देखेगा।

बोधिसत्व बोला—

बुढापे से आक्रान्त होनेवाले यौवन को धिक्कार है। अनेक प्रकार की व्याधियों से पराहत आरोग्य को भी धिक्कार है जो लम्बे समय तक न रहेने वाले जीवन को भी धिक्कार है। तथा पण्डित पुरुष का रतिप्रसङ्ग में लिप्त होना भी धिक्कार है।

अब भिक्षु बोधिसत्व सारथि को फिर से नगर में प्रवेश करने को कहा। पश्चात् उत्तर द्वार से उद्यान भूमि को निकलते हुए एक भिक्षुक को देख कर उसने सारथि से कहा—

"क्या सारथि! यह पुरुष शान्त प्रशान्त चित्त चक्षु को ऊपर न करते हुए युगमात्रदर्शी होकर चल रहा है, गेरुआँ वस्त्र के कपड़े पहने हुए अच्छे प्रशान्त आचरण वाला भिक्षा-पात्र को लिये हुए खडा यह न उद्धत है न उन्नत, यह कौन पुरुष है।

सारथि बोला—

हे देव! यह पुरुष भिक्षु नाम का व्यक्ति कामरति को छोड़कर अतिविनम्र आचरण वाला संन्यासी होकर अपने समान सब प्राणियों को देखने वाला रागद्वेष रहित होकर शारीरिकचर्या करते हुए रहता है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बोधिसत्त्वः प्राह—

सारथे! सुभाषितमिदं मह्यं रोचते। 'संन्यासः' इति नामेदं विद्वद्भिः सदा प्रशंसितमास्ते, यत्रात्मनः परस्य चापि हितं विद्यते। अत्र च ससुखं जीवनस्य यापनं तथा सुमधुरस्यामृतफलस्य प्राप्तिरपि वर्तते।

तदनन्तरं संक्षुब्धचित्तोऽयं स्वस्य शुद्धान्तं विवेश। दिवसेऽस्मिन् राहुलनामा पुत्रोऽस्य समजनि। राजा शुद्धोदनः स्वाङ्गजस्य भ्रमणवृत्तान्तं सर्वं निशम्यास्य संन्यासग्रहणमाशङ्कमानो नगरस्य चतुर्षु द्वारेषु सेनाव्यूहं तं निरोद्धुं न्ययुङ्क्त।

क्रमशः

बोधिसत्व बोले—

सारथे! यह सुभाषित मुझे रुचता है। सन्यास यह नाम विद्वानों द्वारा सदा प्रशंसित है जहां अपना हित और पर का हित भी है। सुखपूर्वक जीवन यापन और सुमधुर अमृतफल की प्राप्ति भी (इसमें) है।

तदनन्तर संक्षुब्धचित्त यह अपने अन्तःपुर में घुसा। इसी दिन राहुल नाम का इसके पुत्र हुआ। राजा शुद्धोदन अपने पुत्र के भ्रमण का वृत्तान्त सुनकर संन्यासग्रहण की शंका करता हुआ चारों नगरद्वारों पर सेनाव्यूहों को उसके रोकने के लिये लगा दिया।

आप 'भारती' के लिए क्या कर सकते हैं

१. ७) रु० भेजकर ग्राहक बनिये।

२. अपने परिचित मित्रों को सम्मानार्ह संरक्षक, विशिष्ट संरक्षक, साधारण संरक्षक, सन्मान्य सहायक, आजीवन सदस्य अथवा स्थायी ग्राहक बनने को प्रेरित कीजिए।

३. अपनी सुन्दर व विद्वत्तापूर्ण रचनाएं 'भारती' में भेजिए।

४. 'भारती' में अपने व्यवसाय के लिए विज्ञापन दीजिये व दूसरों को प्रेरित कीजिये।

५. धन भेजकर भारतो को स्वावलम्बो बनने में सहायता कोजिये।

६. 'भारती' के अभिकर्त्ता (प्रचारक) बनिए।

७. 'भारती' की कमियां तथा सुधार के लिए हमें समय समय पर आपकी बहुमूल्य सम्मतियों से अवगत कराते रहिए।

८. आपके नगर के विद्वानों को 'भारती' में लेख सामग्री भेजने को प्रोत्साहित कीजिए। हमें विश्वास है कि श्रीमान् एक अथवा अनेक रीतियों से 'भारती' की सहायता के लिये अग्रसर होते रहेंगे।

विनीत—**गिरिराजशर्मा, प्रबन्धसम्पादक**

भारती भवन—गोपालजी का रास्ता, जयपुर (राजस्थान)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

प्रियवादित्वमुद्दिश्य

आशुकवि–श्रीहरिशास्त्री, सम्पादकः

प्रिया हि भाषा सर्वेषां
हृदयावर्जनो मता ।
मनुष्यः प्रियवागेव
सर्वं सम्मानमृच्छति ॥१॥

संसार में लोगों के हृदय को आवर्जन (संमुखी करण) करने वाली एक प्रिया भाषा ही है, यह निश्चय जानिए । प्रिय बोलने वाला मनुष्य सभी सम्मान पालेता है ॥१॥

यदीच्छथ वशीकर्तुं
लोकानेकेन कर्मणा ।
तदा सदैव मधुरा-
मुदीरयत भारतीम् ॥२॥

यदि आप लोगों को एक ही काम से वश करना चाहते हैं तो सदा ही मीठे बोलो ॥२॥

नहीदृशं संवलनं
लोके किञ्चन दृश्यते ।
यादृशं सूनृतं वाक्यं
सर्वत्रादरदायकम् ॥३॥

ऐसा वशीकरण और कोई भी नहीं है जैसा सब जगह आदरदिलाने वाला मधुर भाषण है ॥३

सुवर्णपुष्पां पृथिवीं
चिनोत्येकः स मानवः ।
जानाति यः सुमधुरं
वक्तुं सर्वत्र सर्वदा ॥४॥

सुवर्ण के पुष्पों से भरी इस पृथ्वी को वही एक मनुष्य चुनता है अर्थात् (वही एक सर्व सुखसमृद्धि पालेता है) जो सदा सभी जगह मीठा भाषण करना जानता है ॥४॥

श्रीहरेर्मन्त्रणामेतां
समाहृत्य सुधोपमाम् ।
बालाश्छात्राः !!! भवन्तोऽपि
भवन्तु प्रियभाषिणः ॥५॥

श्रीहरि की यह सलाह जो सुधा समान मीठी है । मानकर हे बालक विद्यार्थियो !!! आप सभी मधुर भाषण करने वाले बनें ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. No. J 7
Licence No. PP.6
"Licenced to Post.
Without Prepayment"

एक राष्ट्रीय उत्पादन

३५००० से अधिक श्रमिकों को काम देने वाला

श्रेष्ठतम सामग्रियों से निर्मित

मैंगलूर

गणेश बीड़ियां

धूम्रपान करने वालों की अति प्रिय

प्रधान कार्यालय

मैंगलूर गणेश बीड़ी वर्क्स

विनोबा रोड : मैसूर-५

दूरभाष : ४२१ तार : AROMA

प्रकाशक:—जयबहादुरसिंह पता : भारती भवन, गोपालजी का रास्ता, जयपुर। दूरभाष : ७५४६६
राधेश्याम शर्मा द्वारा श्री हनुमान प्रिं० [illegible] में मुद्रित। फोन: ६३१५६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतमासिकस्य



स्वामिविवेकानन्दप्रभृतीनां यो गुरुर्गरीयान् वै ।
श्रीरामकृष्णनामाऽर्धाषितधामा परमहंसः ।।

वर्षम् १९

वार्षिकमूल्यं सप्तमुद्राः ७.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान–मध्यप्रदेश–गुजरात–महाराष्ट्र–मद्रास–आंध्र–उत्तरप्रदेश–
बिहार–पञ्चनद–सर्वकारैः स्वीकृता—

विषय-सूची

क्र० सं०	लेखाः	लेखकाः	पृष्ठ संख्या
१.	मङ्गलम्	आशुकवि-श्रीहरिशास्त्री, जयपुरम्	१८१
२.	अध्यक्षीयं भाषणम्	महामान्यानां पण्डित-श्रीमदादित्यनाथझा-आई. सी. एस., दिल्ली-उपराज्यपाल-महोदयानां	१८२
३.	अथ वेदान्तमतेन ज्ञानप्रक्रिया	श्रीयमुनाधरशास्त्री रामगढः (सीकर)	१८७
४.	विश्वस्य प्रथममाध्यात्मिकं सम्मेलनम्	अनु० श्रीगणेशराम शर्मा, डूंगरपुरम्	१८९
५.	रससिद्धान्तपरिशीलनम्	कालूरि-श्रीहनुमन्तरावः, हैदराबादः	१९३
६.	कलिकौतुकम्	आचार्य-श्रीविश्वनाथमिश्रः, बीकानेरः	१९७
७.	पिपासाया मरुभूमौ महाकविः शेली	अनु० श्रीगणेशरामशर्मा डूंगरपुरम्	२०१
८.	अथ श्रीशिवराज्योदये महाकाव्ये, ३७ सर्गः	महाकविः डॉ० श्रीधरभास्करवर्णेकरः, नागपुरम्	२०५
९.	सम्पादकीयम्	'मधुपः' सहसम्पादकः	२११
१०.	लघुकथा	श्रीगिरिराजशर्मा शास्त्री, जयपुरम्	२१३
११.	सूक्तिसुधा	आशुकवि-श्रीहरिशास्त्री, सम्पादकः	२१६
१२.	दुर्गासप्तसती	श्रीहरिशास्त्री, सम्पादकः	२१७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः
आशुकवि-कविभूषण-
श्रीहरिशास्त्री

सहसम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
साहित्यालङ्कारः

भारती

लेखैरुपष्कृता याऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

प्रबन्धसम्पादकः
सहसम्पादकश्च
गिरिराजशर्मा

भारती-भवनम्,
गोपालजी का रास्ता,
जयपुरम्

वर्षम् १९ | फाल्गुनः, विक्रमाब्दः २०२५ (मार्च, १९६९) | अङ्कः ५

मङ्गलम्

आशुकवि-श्रीहरिशास्त्री, सम्पादकः

मूर्तस्य कर्णं परमात्मनोऽपि
विगृह्य कृष्णस्य, कराङ्गुलीतः ।
तं तर्जयन्ती किल नन्दजाया
माया यशोदास्तु सतां सुखाय ॥१॥

मासावतरणम्

वासन्तीं श्रियमाह्वयन् मनसिजोत्साहं समुद्वर्द्धयन्
वृक्षाँश्चैव लता नवारुणदलोद्भासांसि संधारयन् ।
भानोरुत्तचये समुज्ज्वलमहः संचारयन् भूतलं
कुर्वन्नूतनवत्सखे ह्युपगतो मासः शुभः फाल्गुनः ॥१॥

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतजगतो हृदयसम्राजां, महामान्यानां
पण्डित-श्रीमदादित्यनाथ झा आई० सी० एस०,
दिल्ली-उपराज्यपाल-महोदयानाम्

* अध्यक्षीयं भाषणम् *

भूमिष्ठाऽपि न याऽत्रभूः, त्रिदिवतोऽप्युच्चै अधःस्थापि या,
या बद्धा भुवि मुक्तिदा, स्युरमृता यस्यां मृता जन्तवः ।
या नित्यं त्रिजगत्पवित्रतटिनीतीरे सुरैः सेव्यते,
सा काशी त्रिपुरारि-राजनगरी पायादपायाज्जगत् ॥

धन्योऽयं भारतो देशः धन्या वाराणसी पुरी ।
धन्या संस्कृतभाषेयं धन्याः संस्कृतपण्डिताः ॥

आदरणीयाः पण्डितवर्याः, माननीया महात्मानः, संस्कृतविद्याया उपासनायां संलग्नाः विद्यार्थिनः, संस्कृत प्रति निष्ठावन्तो नागरिकाः, संस्कृतानुरागरञ्जिता महिलाः, संस्कृतस्य शिक्षणार्थं सोत्साहा बालका बालिकाश्च ।

अद्य मे महान् हर्षः, यदहं संस्कृतसम्बन्धे उपयोगिनीं चर्चां कर्तुं भवतां मध्ये उपस्थितोऽस्मि । अयं सुन्दरोऽवसरः, अस्य महतः समारोहस्य यैः आयोजकैः, मह्यं प्रदत्तः तेभ्योऽहं हार्दिकान् धन्यवादान् दातुं कामये । सज्जनाः ! भवतां भाग्यम् अतीव श्लाघनीयं विद्यते, यतो भवन्तः तां वाराणसीम् अधिवसन्ति यत्र विद्यागुरुः विश्वनाथः विश्वम्भरा भगवती अन्नपूर्णा, लोकत्रयपावनी भगवती भागीरथी च नित्यं सन्निहिता । यत्र त्रं पण्डितानां साधुसंन्यासिनां, विद्यार्थिनाञ्च जिह्वासु संस्कृतभारती अनवरतं नृत्यति । अत्र च धर्मार्थकाममोक्षाणां चतुर्विध-पुरुषार्थानां प्राप्तेः उपाया न केवलं चर्चा-विषया अपि तु अनायास-लभ्याः । एवं विधानां भवादृशां भाग्यशालिनां सम्पर्कं प्राप्य को नाम मानवः आत्मानं धन्यं न मंस्यते । अहमपि भवतां संसर्गेण आत्मानं धन्यं मन्यमानः संस्कृतभाषायाः प्रचारप्रसारसम्बन्धे कांश्चन आत्मनो विचारान् प्रकटयितुं कामये प्रार्थये च यद् भवन्तः कृपया तान् शृण्वन्तु । अत्र च यदि कश्चिद् उपयोगि-अंशः प्रतीयेत तदा तस्य आत्मनः संस्कृतप्रचारयोजनायां समावेशं कुर्वन्तु ।

इदं सत्यं यद् बहुवर्षतो देशे वैदेशिकभाषायाः वैदेशिकसंस्कृतेः, वैदेशिकसभ्यतायाः, वैदेशिकजीवनक्रमस्य च संक्रमणेन संस्कृतभाषायां, संस्कृतमूलिकायां संस्कृतौ, सभ्यतायां, जीवनप्रणाल्यां च देशस्य जनतायाः रुचिः पर्याप्तं ह्रासं गता । सर्वतो मुखस्य अस्य ह्रासस्य कारणं यदि विविच्यते तदा स्पष्टं प्रतिभाति यद् देशस्य राजनीतिकी परतन्त्रता एव अस्य ह्रासस्य प्रधानं कारणम् । एवं हि मनुष्यस्य प्रायशः स्वभावो यत्स स्वविजेतुः भौतिकेन उत्कर्षेण अभिभूय, तस्य सर्वमेव श्रेष्ठं ग्राह्यं च मन्यते । स्वकीयं च सर्वं प्राक्तनं हीनं त्याज्यं च मन्यते । एतत्स्वभावानुसारेणैव अस्य देशस्य जनतया विजेतुः आङ्ग्लदेशस्य सर्वश्रेष्ठं मत्वा तद्ग्रहणाय औत्सुक्यं स्वकीयायाः सर्वस्याः परम्परायास्त्यागाय तत्र वैराग्यं च दर्शितम् । किन्तु खेदस्य स्थानमेतद् यद् देशस्य राजनीतिके पारतन्त्र्ये नष्टेऽपि, देशे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रजातन्त्रशासने स्थापितेऽपि, देशस्य सर्वतोमुख-विकासाय विविधे आयोजने क्रियमाणेऽपि स्वदेशस्थ-भाषायां, सभ्यतायां, संस्कृतौ, जीवन-क्रमे च आदरभावनाया यथोचित उदयो जन-ताया मनसि अधुनावधि न जातः। देशस्य जनता वैदेशिक शासनकाल इव इदानीं स्वकीयशासन-कालेऽपि आङ्गलभाषायाः आङ्गलजीवनपद्ध-तेश्च अनुरागमदेन उन्मत्ता विद्यते। प्रादेशिक-तायाः साम्प्रदायिकताया भाषाविवादस्य च भूतावेशेन देशोऽतितरां ग्रस्तो वर्तते। येन देशस्य सर्वविधा शक्तिः अहर्निशं क्षीयमाणा दृश्यते, आसीत् कदाचिद् 'वसुधैव कुटुम्बकम्' इति भावनाऽपि द्रुततरं विनाशोन्मुखो दृश्यते, दक्षिणोत्तर-भेदभावनाया अधुनातनो दुश्चि-कित्स्यो व्याधिः भाषाभेदमूलक एवेति निश्च-प्रचम्। देशस्य इयं दुरवस्था कथं दूरीकार्या, आत्मनोऽतीते गौरवे, आत्मनः पुरातने रिक्थे, आत्मनोऽवदाते जीवनक्रमे आत्मन आध्यात्मि-क्यां सम्पदि च देशस्य जनताया आस्था कथ-मुत्पादनीया ? इत्येष विषयो यदि निष्पक्षं विचार्यते तदा तथ्यमिदं हठादवतिष्ठते यत् संस्कृतशिक्षाया भारतव्यापी प्रचार एव देशस्य सर्वविधव्याधीनामेकमात्रमौषधम्। संस्कृतं हि देशस्य पुरातनी भाषा। समस्ता प्रादेशिक्यो भाषाः संस्कृतादेव प्रादुर्भूताः संस्कृतशब्दैरेव च समृद्धिं गता ? देशस्य कापि ईदृशी भाषा नास्ति या संस्कृतभाषया भृशमुपकृता न स्यात्। तिष्ठतु तावदन्यासां प्रादेशिकभाषाणां कथा, किन्तु या भाषा तद्भाषाभाषिभिः स्वतन्त्रा सुप्राचीना च उद्घोष्यते, तस्या आसक्तिः साम्प्रतं देशे विप्लवमुत्पादयन्ती विद्यते, तस्या-स्तमिलभाषाया अपि यदि भाषाविपश्चिद्भिः सर्वेक्षणं क्रियते तदा तस्यामपि संस्कृतभाषायाः पर्याप्तः प्रभावः, तत्साहित्ये च संस्कृतसाहित्यस्य च सुमहती छाया च सुस्पष्टं लक्षिष्यते। प्रादे-शिकभाषाणाम् अस्यां स्वरूपावस्थितौ इदं निर्विवादं यत् संस्कृतभाषाया देशव्यापी प्रचारो यथा सुकरस्तथा अन्यस्याः कस्या अपि भाषायाः प्रचारो न सुकरः। किं च संस्कृतस्य प्रचार एव संस्कृतसाहित्यस्यापि जीवितमायतते, अन्यथा तस्य लोपोऽपि सुनिश्चितः, तल्लोपे च देशे आपत्स्यमानायाः शून्यतायाः परिहारः प्रकारा-न्तरेण सुदुष्करः। यदा देशे वेदाः, उपनिषदः, पुराणानि, दर्शनानि आगमाः रामायणं, महा-भारतं, कालिदासादीनां कमनीयानि काव्यानि च न भविष्यन्ति, यदा देशे संस्कृतसाहित्यप्रदत्ता जीवनदृष्टिर्न भविष्यति, यदाऽनादिकालात् संस्कृतसाहित्येन साधितो मानवमनः-संस्कारो न भविष्यति, तदा अस्य देशस्य या शून्यावस्था विपन्नता च भविष्यति तत्कल्पनयैव मस्तिष्कं भ्रमति गात्रं शुष्यति, मनो म्लायति, बुद्धिश्च अन्धीयते।

बन्धवः,

अतोऽस्माकं पूर्वजानां बहुमूल्यैः उपार्जनैः चिरसञ्चितैः ज्ञानविज्ञानकोषैः, देशस्य सर्वस्व-भूतैः सनातनैः संस्कारैश्च सार्धं यदि देशस्य स्वतन्त्रतायाः संरक्षणे विश्वस्य अन्यदेशानां समक्षं मूर्धानमुच्चैःकृत्य जीवनं च अभीष्टं तदा संस्कृतस्य भारतव्यापि विश्वव्यापि च प्रचारणं निस्संशयमावश्यकम्। किन्तु विचारणीयमिद-मस्ति यद् देशस्य युवकानां युवतीनां च वर्तमा-नायां मनःस्थितौ इदं कार्यं कथं साध्येत ? व्याघ्रवन इव दुष्प्रवेशे व्याकरणप्रधाने संस्कृत-शिक्षणे लोकः कथमुत्साह्येत ? किं च आङ्गल-भाषा यदा प्रत्येकं शिक्षितगृहं प्रविष्टा विद्यते यदा सर्वव्यवहारपदम् आङ्गलपद्धत्या आक्रा-न्तं वर्तते, यदा सर्वेषां मानसम् आङ्गलजाती-यानां संस्कारेण अभिभूतमास्ते। यदा शिक्षा-संस्थानां प्रशासनस्य विभिन्नविभागानां, कार्य-पालिकाया न्यायपालिकायाश्च विभिन्नभागा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाम् उच्चपदानि आङ्गलभाषाद्वारेणैव लभ्यानि सन्ति, तदा संस्कृतस्य अध्ययनाध्यापनयोः देशस्य भविष्णूनां बालकानां बालिकानाञ्च प्रवृत्तिः कथं सम्पद्येत ? अद्य अस्मिन् संस्कृत-सम्मेलने समवेतैः भवद्भिरयमेव विषयः प्रथमं विचारणीयः। मम तु अस्मिन् सम्बन्धेऽयं विचारो विद्यते यत् संस्कृतं प्रति जनताया अनुरागोत्पादनाय नूतनानां बालकबालिकानां संस्कृतस्याध्ययनेऽभिरुचेः प्रवर्तनाय च नारीणां संस्कृतशिक्षणं प्रयत्नेन प्राथम्येन च प्रोत्साहनीयम्। देशे त्रिप्रकारः समाजो विद्यते। एकः समाजो अधुनातनीः शिक्षासंस्थाः प्रचलन्तीः शिक्षाश्च नारीजातेः अनुपयुक्ता मत्वा आत्मनो बालिका अधुनातनेषु विद्यालयेषु न प्रेषयितुमिच्छति। अन्यः समाजः इत्थंभूतोऽस्ति-यत्स स्वबालिका अधुनातनेषु विद्यालयेषु प्रेषयत्यवश्यं परं सोऽपि तत्र दीयमानया शिक्षया बालिकानां लाभं न मनुते। सोऽनुभवति यद् आङ्गलपद्धत्या प्रचलत्सु विद्यालयेषु विश्वविद्यालयेषु च शिक्षिता बालिका आत्मनो गृहस्य कुलस्य च प्राचीनानां मर्यादानां नारीजातिसाध्यानां गृहकार्याणां च निर्वहणे निपुणा न भवन्ति। अतः स केवलं तासां विहादिसौकर्यबुद्ध्या तथा करोति। एकः समाजो नूनमेतादृशो विद्यते य आत्मनो बालिका आङ्गलबालिका इव विकसिता दिदृक्षति परं समाजः अत्यन्तं सीमितः। शिक्षिता नार्योऽपि त्रिविधाः एको नारीवर्गः प्राप्तशिक्षामाजीवनं भाररूपेण वहति। अन्यो वर्गः निष्फालामपि तां स्वरूपशोभाधिया धारयति। अपरो वर्गः शिक्षा-संस्थासु कार्यालयेषु वा नियुक्तिं प्राप्य तया अर्थोपार्जनं कुरुते। अनया रीत्या बालिकानां शिक्षास्थितेः पर्यालोचनेन इदं स्पष्टं भवति यद् बालिकाभ्यस्तज्जीवनानुरूपायाः शिक्षायाः व्यवस्था इदानीं नास्ति। शिक्षाया अन्यसमुचित-व्यवस्थाया अभावादेव प्रचलन्त्या शिक्षाव्यवस्था सीमितसंख्याका बालिकाः शिक्ष्यन्ते। अतो ममेदं मतमस्ति यन्नगराणां प्रतिभागं प्रतिग्रामं च बलिकानां शिक्षणाय संस्कृतविद्यालयानां स्थापना कार्या। बालिकानां भारतीयसंस्कृतेरनुरूपस्य जीवनस्य विकासार्थम् उपयुक्तानां विषयाणां तदीये पाठ्यक्रमे सन्निवेशः कार्यः। स पाठ्यक्रम एतादृशो निर्धारणीयो यो बालिकानां सुशकः स्वास्थ्यानुकूलः, गृहकार्येषु दाक्ष्यसम्पादकः, युगस्य प्रवृत्तीनां परिचायकः संस्कृतप्रधानश्च भवेत्। इदं हि निश्चप्रचम् यद् यदा बालिकाः संस्कृतशिक्षिका भविष्यन्ति, तदा ता मातृत्वलाभे स्वोत्सङ्गगतान् शिशून् संस्कृतं शिक्षयिष्यन्ति, संस्कृतश्लोकान् कण्ठस्थीकारयिष्यन्ति व्यावहारिकान् संस्कृतशब्दान् बोधयिष्यन्ति। इत्थं स्तन्यपान-कालादेव बालानां मनसि संस्कृतस्य संस्कारः समुत्पत्स्यते, स च संस्कारः 'यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत्' इति नीत्यनुसारेण नष्टो न भविष्यति। किन्तु वयसो वृद्धिक्रमेण वर्धिष्यते। फलतया संस्कृते बालक-बालिकानां प्रीतिः स्वत एव उपचेष्यते। इत्थं संस्कृताध्ययने देशस्य जनता अनायासमुत्सहिता प्रवृत्ता च भविष्यति।

संस्कृतप्रचारस्य एकः प्रकारोऽयं भवितुमर्हति, यत्संस्कृतस्य पण्डिता विद्यार्थिनश्च यत्र वसन्ति तत्र समीपस्थैः गृहैः साधं ते सम्पर्कं स्थापयन्तु, त्यागभावनया च तद्गृहेषु उपस्थाय कियत्कालं निःशुल्कं संस्कृतशिक्षां दद्युः। प्रारम्भेऽयं कार्यक्रमः किञ्चित् कठिनो नीरसश्च भविष्यति परं शनैः शनैस्तद्गृहजनानां संस्कृत-शिक्षां प्रति अभिरुचेर्जागरणे जाते कार्यक्रमोऽयमत्याकर्षकः शिक्षकाणां सम्मानवर्धक आयकारकश्च सम्पत्स्यते।

संस्कृतनाटकानां, संस्कृतभाषाया कथोपकथनानां, संस्कृतसङ्गीतानां, निर्दक्षिणानां भागवतादिकथानां, संस्कृतवाचनस्य, संस्कृत-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized By Arya Samaj Foundation Chennai and eGangotri

वादविवादस्य प्रतियोगितानां चायोजनेनापि संस्कृतस्य प्रचारः, संस्कृते जनताया रुचेः उत्पादनं च कर्तुं शक्यते । अतोऽस्यां दिश्यपि संस्कृतप्रचारकामैः संस्कृतज्ञैः अवश्यं दृष्टिः देया । गृहे, मार्गे, यात्रायां, विद्यालये च पारस्परिके वार्तालापे, पारस्परिके पत्राचारे च संस्कृतस्य प्रयोगोऽपि संस्कृतप्रचारस्य सुमहत्साधनम् । परं खेदस्थानमिदमस्ति यत् ते संस्कृतस्य प्रयोगं न कुर्वन्ति । यदि ते पारस्परिके व्यवहारे संस्कृतप्रयोगस्य संकल्पं कुर्युः, जनतायाः मध्ये गत्वापि परस्परं संस्कृतेनैव व्यवहरेयुस्तदा संस्कृतमजानन्ती अपि जनता शनैः शनैः संस्कृतस्य सम्पर्के आगमिष्यति । प्रयोज्यप्रयोजकवृद्धव्यवहारः शब्दार्थसम्बन्धग्रहस्य प्रथमं साधनम् । वृद्धजनाः प्रथमं साधनम् । वृद्धजना व्यवहारेणैव बालान् शब्दार्थसम्बधं ग्राहयन्ति । सृष्टेः प्रारम्भकाले परमेश्वरः स्वयं प्रयोज्यप्रयोजकानां शरीरं गृहीत्वा आदिमानवान् शब्दार्थसम्बधं ग्राहयामास इति संस्कृतपण्डिताः संस्कृतच्छात्रान् सततं पाठयन्ति । परं तथापि व्यवहारकाले सर्वमिदं विस्मरन्ति । किमस्ति कश्चिदत्र सन्देहो यद् यदा संस्कृतज्ञाः असंस्कृतज्ञजनानां मध्ये परस्परं संस्कृतेन व्यवहारं करिष्यन्ति तदा असंस्कृतज्ञ-जनानामपि कर्णेषु संस्कृतशब्दाः प्रवेक्ष्यन्ति । तेषामपि संस्कृतज्ञानां संस्कृतशब्दप्रयोगाधीनव्यवहारदर्शनेन संस्कृतशब्दानामर्थज्ञानं भविष्यति । फलतया क्रमेण असंस्कृतज्ञा अपि संस्कृतशब्दानां ज्ञानमासाद्य तत्प्रयोगे उत्साहिता भविष्यन्ति । यदि नास्त्यत्र सन्देहस्तदा संस्कृतज्ञैः परस्परं संस्कृतेनैव व्यवहारस्य प्रतिज्ञा कार्या । तस्याः प्रतिज्ञायाश्च पूर्णतया निर्वाहः कार्यः । अहं मन्ये, संस्कृतज्ञानामियं प्रतिज्ञा संस्कृतप्रचारस्य महती साधिका भवितुमर्हति ।

संस्कृतप्रचारस्य इदमप्येकं सुमहत्साधनं यत्साधवः, संन्यासिनश्च प्रतिवर्षं यत्र चातुर्मास्यं कुर्वन्तु तत्र प्रत्यहं धनिकानां बालकबालिका महिलाश्च किंचित्कालं किञ्चित् संस्कृतं पाठयन्तु । तत्र वयस्कानां पाठे मुख्यतया संस्कृतस्य केचन नीतिश्लोकाः, केचन देवस्तुतिश्लोकाश्च स्युः । यदि चातुर्मास्यस्थलेषु कश्चित् संस्कृतविद्यालयो भवेत्तदा तद्द्वारा संस्कृतस्य धार्मिकः अभिनयोऽपि कारयितव्यः तस्मिन्नभिनये संस्कृतस्य छात्रा इव धनिकभक्तानां बालका अपि समावेष्टव्याः । अभिनयव्याजेन तेषां बालकानां नाटकाभिनयदर्शने सोत्साहानां तत्परिवारसदस्यानां च संस्कृतेन परिचयो भविष्यति । यैः धनिकैः बालकबालिका अर्थोपार्जनाय न पाठ्यन्ते किन्तु केवलं शिक्षायै पाठ्यन्ते, ते धनिकाः तदीयश्रद्धाभाजनैः साधुभिः संन्यासिभिश्च बालकबालिकानां संस्कृतशिक्षायै प्रेरयितव्याः । ये धनिका अधुनातनान् विद्यालयान् परिचालयन्ति ते द्वितीयविषयरूपेण संस्कृताध्येतॄणामेव छात्राणां प्रवेशनियमनाय निर्देष्टव्याः ।

संस्कृतप्रचारकामैरित्थभूतमेकमान्दोलनमपि चालयितव्यं यद् अधुनातनेषु विद्यालयेषु दीयमानायाः शिक्षायाः पाठ्यक्रमे कतिपयासु कक्षासु संस्कृतस्य सन्निवेशो नूनं भवेत् । विद्यालयानां प्रबन्धकैः प्रधानाचार्यैश्च सम्पर्कं विधाय इयमपि व्यवस्था कारयितव्या यद् ये छात्रा द्वितीयविषयरूपेण संस्कृतं ग्रहीष्यन्ति स्वतन्त्ररूपेण संस्कृतपरीक्षासु वा प्रवेक्ष्यन्ति, शुल्कमुक्तौ अन्यविधे आर्थिके साहाय्ये च ते प्रथमं परिगृहीता भविष्यन्ति । विभिन्नसेवासु नियोजनाधिकारिभिः सह सम्पर्कं स्थापयित्वा अयमपि उद्योगः कर्त्तव्यो यत्ते तासु-तासु सेवासु नियुक्तिकरणे संस्कृतं जानद्भ्यः प्रार्थिभ्यः प्राथम्यं दद्युः । एतादृशा उद्योगाः संस्कृतप्रचारे निर्विवादं सहायका भवितुमर्हन्ति ।

संस्कृतप्रचारस्यैकं साधनमिदमपि सम्भवति यद् आस्तिकेष्वपि हिन्दूगृहेषु अनुदिनं ह्रासं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गच्छतां धार्मिकसंस्काराणां यथोचितप्रवर्तनाय प्रयत्नः क्रियेत। तदर्थमिदमावश्यकं यत् संस्कारा यथासमयं यथाविधि च क्रियेरन्। तेषु-तेषु संस्कारेषु पित्रा, मात्रा, संस्कार्याभिः बालकबालिकाभिश्च प्रयोक्तव्याना संस्कृतवाक्यानां प्रयोगस्तैरेव क्रियेत। इदानीमियं दुरवस्था वर्तते यत् संस्काराः समयेन स्तैः न क्रियन्ते। यदा क्रियन्तेऽपि तदा सर्वं वाक्यं संस्कारकारकैः पण्डितैरेव उच्चार्यते। संस्कारकारका अपि प्रायः अल्पशिक्षिता भवन्ति यैः कार्यमाणस्य संस्कारस्य समुचितः प्रभावः संस्कार्येषु तत्संरक्षकेषु च न भवति। अतः संस्काराणां माहात्म्यबोधनं तेषां समयेन प्रवर्तनं, तत्र संस्काराङ्गभूतैः जनैः उच्चारणीयानां संस्कृतवाक्यानां तैरेव उच्चारणनियमनं कृत्वा अनेन मार्गेणापि संस्कृतप्रचारः कस्यांचिन्मात्रायां साधयितुं शक्यः। प्रादेशिकभाषासु हिन्दीभाषायाम् आङ्गलभाषायां च यानि समाचारपत्राणि प्रकाशितानि भवन्ति तेषां व्यवस्थापकैः सह सम्पर्कं विधाय अयमपि उद्योगः कर्तव्यो यत्तेषु पत्रेषु कतिपयस्तम्भाः सरलया ललितया च संस्कृतभाषया केषांचिद् लोकप्रियाणां विषयाणां प्रकाशनाय विनियोक्तव्याः। यदि तेषां पत्राणां कतिषु च स्तम्भेषु संस्कृतं भविष्यति तदा तत्पत्रपाठकेषु बहूनां तत्र दृष्टिपातो भविष्यति, क्रमेण च तद्द्वारा संस्कृते बहूनां रुचेर्जागरणं सम्पत्स्यते—इत्थमयमपि प्रकारः संस्कृतप्रचाराय सफलो भवितुमर्हति।

ममायमनुभवो विश्वासश्च विद्यते यद् इदानीमपि संस्कृतशिक्षायां जनताया आदरो वर्तते। जनता संस्कृतं शिक्षितुं कामयते। परं संस्कृतशिक्षाया युगानुरूपा व्यवस्था नास्ति। संस्कृते नवयुगस्य विषयाणां सन्निवेशो नास्ति। संस्कृते सरलानां रुचिवर्धकाणां, नूतनग्रन्थानां रचना न जायते। संस्कृतप्रचाराय योजनाबद्धः प्रयासो न क्रियते। यदि मया निर्दिष्टानां संस्कृतप्रचारसाधनानामवलम्बनं क्रियेत, तदा संस्कृतस्य अपेक्षितः प्रचारो नूनं सम्पद्येत।

सज्जनाः !

किन्तु इदमवश्यमवधेयं यत् संस्कृतप्रचारस्येदं सर्वं कार्यजातम् आङ्गलभाषाया भाषान्तराणां वा अध्यापका अध्येतारश्च न करिष्यन्ति। इदं तु संस्कृतस्य पण्डितैः, संस्कृतस्य विद्यार्थिभिः संस्कृतोपजीविभिः साधुप्रभृतिभिरेव च कर्तव्यं भविष्यति।

अतो मे भवत्सु विनयपूर्णा इयमभ्यर्थना विद्यते यद् भवन्तो निद्रां विमुच्य परावलम्बनवृत्तिं परित्यज्य, कर्तव्यभावनां पुरस्कृत्य, कालप्रातिकूल्यमनाक्षिप्य, 'सर्वं भाग्यात्प्रवर्तते, सर्वमीश्वरो घटयति' इत्येवं विधामकर्मण्यताप्रदां धारणामवधीर्य, वाराणस्या मुकुटभूतमिमं संस्कृतविश्वविद्यालयं केन्द्रीकृत्य च—

उत्थातव्यं जागृतव्यं योक्तव्यं भूतिकर्मसु।
भविष्यतीत्येव मनः कृत्वा सततमव्यथैः॥

इति व्यासोक्तिं पाथेयीकृत्य च संस्कृतप्रचारस्योक्तानां साधनानां प्रयोगे सोत्साहाः कटिबद्धाश्च सन्तो द्रुततरं प्रवर्तन्ताम्, येन सुरभारती सम्पूज्ये देशे समग्रे संसारे च प्राप्तपदा भूत्वा आत्मनोऽक्षय्यकोषेण विश्वमानवान् तर्पयन्ती भारतवर्षं जगद्गुरुपदे पुनः प्रतिष्ठापयितुं प्रभवेत्।

यावद् भुवि नरास्तित्वं यावत्सभ्यत्वभावना।
तावत् संस्कृतभाषायाः संसारे जीवनं ध्रुवम्॥

[मान्या विद्वांसः ! विगते २०२५ तमे वैक्रमाब्दे पौषशुक्लत्रयोदश्यां सम्पन्ने वाराणसीस्थ–सार्वभौम–संस्कृतप्रचारकार्यालयस्य विशेषाधिवेशने सम्माननीयानां श्रीझामहाभागानां भाषणमिदमिह प्रकाश्यते। अत्र हि येऽपि संस्कृतस्य प्रचारप्रसारयोः शोभना उपायाः सन्ति निर्दिष्टाः, तेषां समेषामपि पालनं सर्वैरपि संस्कृतस्य पण्डितैश्छात्रैश्छात्राभिः संस्कृतानुरागिभिर्धनिकैश्चापि विधेयमिति भूयो भूयो मयापि हृदयेन निवेद्यत इति—
मधुपः]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ वेदान्तमतेन ज्ञानप्रक्रिया

व्याख्यानकलानिधिः श्रीयमुनाधरशास्त्री रामगढः (सीकरः)

वेदान्तमततो ज्ञानप्रक्रिया प्रोच्यते वटो !
तज्ज्ञो वेदान्तशास्त्रेषु, व्याख्याता जायते द्रुतम् ॥१॥

प्रमायाः करणं चात्र प्रमाणं तच्च षड्विधम् ।
प्रत्यक्षमनुमानञ्चोपमानं शब्द एव च ।
अर्थापत्तिस्तथैवात्रानुपलब्धिः क्रमेण षट् ॥२॥

अज्ञाताऽबाधितोऽर्थो यस्तद्विषयकबुद्धिताम् ।
स्मृतिभिन्नप्रमायास्तु विद्वांसो लक्षणं विदुः ॥३॥

ब्रह्मैव ज्ञानमित्याहु र्ब्रह्म द्रव्यं गुणो नहि ।
प्रत्यक्षं ब्रह्म वै श्रुत्या प्रोक्तं प्रमाणभूतया ॥४॥

ब्रह्मज्ञानं सदा मुख्यं वृत्तिज्ञाने तु गौणता ।
वृत्तावेवोपयुज्यन्ते, संयोगाद्याः सदा हि षट् ॥५॥

उच्यन्ते मनसो धर्मा वृत्तिकामादयो बुधैः ।
तार्किकास्त्वथ मन्यन्ते, धर्मानात्मनः सदा ॥६॥

पञ्चदश्यां तु तत् सम्विच्छब्देन ब्रह्म साधितम् ।
व्यापकं देशकालादे विषयताख्य योगतः ॥७॥

घटादिज्ञानमित्यत्र घटादेः परिहानतः ।
निर्विषयं हि वेदान्ते ज्ञानमेवावशिष्यते ।
वैयाकरणमतेऽप्येयं शब्दब्रह्म प्रसिद्ध्यति ॥८॥

[1]प्रमातृणा प्रमाणेनाऽवच्छिन्नं विषयेण च ।
चैतन्यं त्रिविधं ज्ञेयं चैतन्यं ज्ञानमेव च ॥९॥

एतत्त्रयं यदैकत्वं याति प्रत्यक्षकं हि तत् ।
तदभावेऽनुमित्यादीनि ज्ञानानि भवन्ति भोः ॥१०॥

भेदकानामुपाधीनां त्रयाणां किल सत्तम !
प्रत्यक्षहेतुभूतं तच्चैतन्यैक्यं कथं गुरो ! ॥११॥

---

[1] अन्तःकरणेन—इतिबोध्यम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भिन्नेषु देशेषु च वर्तमानेतरेषु कालेषु च संस्थितानाम् ।
भो भोदकत्वं खलु नान्यथा त्वं जानीहि तेनात्र न दोषसङ्गः ॥१२॥

अत्रान्तःकरणं मातृ वृत्तिरेव प्रमाणकम् ।
घटादि विषयः सर्वं चैतन्येऽधिष्ठितं हि तत् ॥१३॥

तडागाम्भो यथा गच्छत् कुल्यात्मना प्रविश्य च ।
केदारांस्तद्वदाकारं भजते तद्वदेव हि ॥१४॥

अन्तः करणमेत्याशु विषयं परिणामभाक् ।
परिणामस्य नामास्ति वृत्तिः सा कारणं मतम् ॥१५॥

असौ गवयशब्दार्थ इत्यत्रानुमितौ ध्रुवम् ।
प्रत्यक्षत्वं भवेद्दोषस्त्रिचैतन्यप्रमेलनात् ॥१६॥

भिन्ना प्रतीतिर्वेदान्ते तया प्रत्यक्षता न हि ।
मदीया गौः समानेनेतिप्रतीतिर्विलक्षणा ॥१७॥

मदीया धेनुरत्रास्ति प्रधानविषयो वटो !
तयेन्द्रियस्य सम्बधाभावान्न त्रिप्रमेलनम् ॥१८॥

समवायं न मन्यन्ते वेदान्तमतवादिनः ।
तत्स्थाने खलु तादात्म्यमद्वैतभंगशंकया ॥१९॥

संयुक्तसमवेतत्वादि—चतुर्ष्वपि धारय ।
तदेव शिष्यवर्य त्वं बुद्धया विमलया सदा ॥२०॥

फाल्गुने मनोविनोदकणिका—

मित्रं प्रति सदुपदेशः

वदन्ति विज्ञाः सुविचार्य चैतत्—
'न चुम्बनं स्वास्थ्यहिताय लोके ।'
सत्यं, तवास्याचरणेन पूर्वं,
भग्नं शिरः पादुकया यतोऽभूत् ।

विश्वासः

ग्रामीणः— **विश्वासस्तु कदा कार्यः प्रेयस्यां धीमता ? वद ।**
नागरिकः— **यदा नैव भवेदन्यस्तस्याः कश्चित् प्रियो जनः ॥**

—मधुपः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वस्य प्रथममाध्यात्मिकं सम्मेलनम्

(संक्षिप्तं विवरणम्)

अनुवादक : विद्याभूषणः श्रीगणेशरामशर्मा, डूंगरपुरम्

'विज्ञानं, शिल्पतन्त्रं तथा च राजनैतिक औद्योगिकविषयश्च शक्तयस्तादृशस्य विश्वस्य निर्माणे सफलाः समसिद्ध्यन् यद्धि सर्वेषामाकांक्षानुरूपं स्यात्। अत एव हि समस्तैर्लोकैस्तथा च राष्ट्रैविश्वधर्मानैकसूत्राबद्धान् स्वीकर्तुं समय आगतोऽस्ति, येन वर्तमानायाः शताब्द्या मानवस्य भाग्यनिर्माणं सम्भवेत्। अस्माकमयं निर्णयोऽस्ति यन्महान्तो धर्माः स्वयमेव सक्रिया भवन्तु तथा पारस्परिके सम्प्रेषणे वृद्धिं कुर्वन्त्विति। बोध-सहयोगयोर्वातावरणस्य निर्माणार्थं भूतकालस्य पूर्वाग्रहा अन्यथा बोधाश्च परित्यक्तव्याः स्युर्नोचेत्समस्तापि मानव-जातिः समाप्तिं गन्तुं शक्नोति।

उपर्युक्ताः शब्दा बोधपीठ-(टेम्पुल ऑफ अण्डरस्टैंडिंग) द्वारा ऽऽयोजितस्य विश्वस्य प्रथमाध्यात्मिकशिखरसम्मेलनद्वारा कृताभ्यो घोषणाभ्य उद्धृताः सन्ति। एवंविधा महत्त्वपूर्णा घोषणाः कालिकातायामधुनैव सम्पन्ने प्रोक्ते सम्मेले भागं गृहीतवताम् विश्वस्य विभिन्नधर्माणां शताधिकैः प्रतिनिधिभिराघोष्यन्त, येषामयमखण्डोऽस्ति विश्वासो यद्धि विश्वमिदं हत्या-हिंसा-भय-घृणाभावेभ्यस्तावन्मुक्तम् भवितुं नार्हति यावद्धार्मिकाणां मतवादानामवलम्बनं न क्रियेत।

बोधपीठं नामाधुनैव संघटितमेकममरीकायाः संघटनमास्ते, यस्योद्देश्यं विश्वस्य विभिन्नधर्माणां मध्ये सम्प्रेषणे बोधे च वृद्धिकरणं वर्तते। अस्य संस्थापिकाऽध्यक्षा च श्रीमती डिकरमन होलिस्टर महोदया तथा च बोधपीठस्यान्ताराष्ट्रियसमितेरध्यक्षा श्रीमती वसन्तकुमार-बिरलामहाशया (श्रीमती सरला बिरला) वर्तेते। आलोच्यमेतच्छिखर-सम्मेलनम् दार्जिलिंगभूभागस्य सुरम्ये पार्वतीयाञ्चले सम्पादयितुं निश्चयः कृतोऽभूत्, परमुत्तरबङ्गप्रदेशे प्राप्तस्याप्रत्याशितस्य जलोप्लवस्य तथा तेन जलेन जातैतिहासिकी विनाश-लीला तदिदमैतिहासिकं शिखर-सम्मेलनं महत्याक्रोश-कोलाहले कालिकातायां स्थानान्तरितमकार्षीत्। धर्मभीरवो धर्मावलम्बिनो जनाः कोलाहलाक्रोशे कियन्ति दिनान्यतिवाह्य शांतेरन्वेषणे शिवपुरस्य, वनस्पत्यारामं जग्मुस्तथा चैशियाभूखण्डस्य सर्वतः पुरातनस्य महतो (विस्तृते क्षेत्रे प्रसृतस्य) वटवृक्षस्य च्छायामधः सामूहिकेन व्यक्तिगतेन च रूपेणेश्वरप्रार्थनां कृतवन्तः।

बोधपीठस्य तदिदं प्रथमं विश्वस्याध्यात्मिकं शिखर-सम्मेलनं कालिकातानगरे बिरलाअकादेमीं ऑफ आर्ट एण्ड कल्चर इति संस्थानस्य सभागारे विगताक्टूबरमासस्य २२ दिनतः २६ पर्यन्तं सम्पद्यमानमभूत्। सम्मेलनमेतदेकाम्-'अन्ताराष्ट्रियास्थासमितेः' स्थापनामकरोद् या हि विश्वधर्मपरिषदः सङ्घटनाय कार्यं करिष्यति। सम्मेलनेऽस्मिन् विश्वस्य प्रमुखानां दशधर्माणां १८ प्रतिनिधयो भागं जगृहुः।

बोधस्य विकासो बोधपीठस्यास्य संस्थापिका श्रीमती डिकरमैन होलिस्टरमहोदया समवोचद् यद्धि बोधपीठद्वारा ऽऽयोजितस्यास्य सम्मेलनस्योद्देश्यं विश्वस्यमहतां धर्माणां मध्ये बोधस्य विकाससाधनमास्ते। अद्यतनीनां समस्यानां समाधानं धर्मात् पृथग्भावमाश्रित्य कर्तुं न शक्यते। एतदर्थं विभिन्नेषु धर्मेषु पारस्परिकं सम्प्रेषणं, सद्भावस्तथा बोधश्चाण्यावश्यकोऽस्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधिकमधिकमधिकम्—वेटिकनस्य रेवरेंड पियरे फैलाँमहोदयः प्रभोरीशो धर्मस्य भूमिकाया उल्लेखं कुर्वाणोऽवादीद्यदधिको न्यायोऽधिकं स्वातन्त्र्यं तथाधिकं प्रीति-भ्रातृत्वस्य मार्गमन्वेषयतोऽधुनातनस्य विश्वस्याद्यत्वे यथा धर्मस्यावश्यकतास्ते, नेतः पूर्वं कदाप्यासीत्। अद्यत्वे वृद्धानां यूनां च पुरुषक्रमे धर्मनिष्ठा पूर्वापेक्षया समधिकं वर्तते।

धर्म-परिवर्तनमनुचितम्—वाँशिंग्टन नगरस्य प्रेस्बिटेरियन-केन्द्रस्य निर्देशको द्रा. लावेलरसेल डिटुजेनमहोदय ईषोर्धर्मप्रचारकै धर्मपरिवर्तनोद्योगं निंदन्नवोचद्यद्भारते केचन ईषोर्धर्मप्रचारकाः स्वधर्मायान्येष्वारोपणस्य मूर्खतां कुर्वाणाः सन्ति। सोऽयमेकोऽक्षम्योऽस्त्यपराधः। परन्त्वेतदपि च सत्यमास्ते यदिषोर्धर्मे वहवः सत्याः सेवकाश्चापि विद्यन्ते, ये विभिन्नक्षेत्रेषु महत्त्वपूर्णां भूमिकामभिनाटयन्तः सन्ति। प्रोटेस्टेंट धर्मावलम्बिनः २२ कोटिसंख्याका लोकाः ३०० उपशाखासु विभाजिता वर्तन्ते।

इस्लामधर्मस्य संदेशः—इस्लामधर्मस्य प्रतिनिधिर्देहली-विश्वविद्यालस्य द्रा. सैयदवहीदुद्दीनमहोदयोऽब्रवीद्यद्धि-इस्लामस्यार्थो नान्यः कोऽपि विद्यते, केवलमीश्वरस्य पुरतः स्वात्मसमर्पणमास्ते अद्यप्वेऽस्य धर्मस्यानुयायिनः स्वकीयानां धार्मिकमार्गप्रदर्शकाणां शिक्षोपदेशान् विस्मृतवन्तः। परिणामतः प्रचाराडम्बरस्य, दुस्थितेश्चातङ्को विजृम्भमाणोऽस्ति। मनुष्यः स्वमेवात्मनः कृते समस्यारूपं प्रपेदे। वैचित्र्यमिदमास्ते यच्छिल्पतन्त्रस्य वृद्धिर्यत्र मनुष्यं मनुष्यस्याधिकं समीपमानिन्ये, तत्रात्मभावदृशा प्रत्येको जनोऽन्यस्माज्जनाद्भृशं दूरीभूतोऽस्ति। वैज्ञानिकी अभ्युन्नतिरद्यत्वे मनुष्यस्य रक्षणायनोऽपितु विनाशाय पर्यणमत्। प्रश्नो नायमास्ते यन्मनुष्यः कतिसमा जीवेत्, प्रश्नस्त्वसौ वर्तते यन्मनुष्यो यावज्जीवेत् तावत् स कया रीत्या केन वा प्रकारेण जीवन् सन्तिष्ठतेति।

सत्यं, शिवं, सुन्दरम्—हिन्दुधर्मस्य प्रतिनिधिः स्वामी लोकेश्वरानन्दमहाभागो (रामकृष्णमिन, नरेन्द्रपुरम्) ऽवादीत्-यद्धिन्दुधर्मस्यादर्शः सत्यं शिवं सुन्दरमित्यास्ते। विज्ञानस्य प्रगतिर्दैन्यं दारिद्रयं नोन्मूलयामास। विज्ञानेन जगति विजयः प्राप्तुं शक्यते, परन्तु दीनतायां विजयोऽवाप्तुं न शक्यते। केवलं धर्मेणैव दारिद्र्ये, द्वेषेऽसंतोषे, घृणायां तथाऽभावे विजयावाप्तिः सम्भवति।

हिन्दुधर्मस्यान्यः—प्रतिनिधिः स्वामी चिन्मयानन्दः प्रावोचत्-अस्यां विंशत्यां शताब्द्यां विज्ञानस्य, धर्मस्य च स्थानं स्वस्वस्थाने विद्यते-ततस्तावन्योऽन्यमेकी द्वितीयस्य क्षेत्रं प्रवेष्टुं नापचेष्टेयाताम्। न तु धर्मेण राजनीतेः शिल्पतन्त्रस्य च भ्रमावर्तचक्रे निपतितव्यम् न तु राजनीत्या धर्मे हस्तक्षेपः कर्तव्यः।

धर्मोऽपरिहार्यः—बौद्धधर्मस्य प्रतिनिधिस्थाईलैंडस्य राजकुमारी पूनडिस्कूल इत्याख्याया, या हि विश्व-बौद्ध-सङ्घटनस्याध्यक्षापि च वर्ततेमतमासीद्यद्धि मानव-जीवनस्य कृते धर्मोनामापरिहार्योऽस्ति। अतोऽसौ विधिवदंगीकर्तव्यः। बौद्धधर्मस्त्यागे, दयालुतायां तथा च समतायाभावनायामाधृतोऽस्ति। विश्वस्मिन्ननेकेषां धर्माणामस्तित्वमावश्यकमास्ते, परन्तु तेषु पारस्परिकं सौहार्दं भवितुमर्हति।

सर्वमेकं परिचीयताम्:—सिक्खधर्मस्य प्रतिनिधिः प्राध्यापकः शेरसिंहोऽब्रूत यद्धि सिक्खधर्मे ज्ञाति-पङ्क्त्योः किमपि स्थानं नास्ति। धर्मेऽस्मिन् मानवमात्रस्य सेवासम्पादनस्य शिक्षा प्रादीयत। 'मनुष्यजातिः सर्वैकत्वेन परिचीयताम्।' इत्यस्य सिद्धान्तस्य स्वजीवने चरितार्थीकरणमेव हि सिक्खधर्मस्य स्वीकरणमास्ते। सिक्खधर्मस्यान्यैर्धर्मैः कोऽपि च विरोधो नास्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अज्ञानमन्धविश्वासश्च:—डिवाइन नॉलेज-सोसाइटी, मोहमयीत्यस्य संस्थानस्य प्रतिनिधिना जैनमुनिना श्रीचित्रशानुना महाभागेन जैनधर्मस्य सन्दर्भे प्रोक्तम् यत् सर्वेषां धर्माणां विचारधाराणां चैकमेव लक्ष्यं विद्यतेऽज्ञानस्यान्धविश्वासस्य च निवारणम्। सांसारिकेभ्यो बन्धनेभ्यो मुक्तो भूत्वैव मनुष्यो वास्तविकसुखस्यानन्दस्य चोपलब्धिं कर्तुं पारयते।

तितिक्षा:—आधुनिके जीवने जर्थुस्त्रवादमधिकृत्य भाषमाणः श्रीहोमी बी. ढल्लामहाशयोऽब्रूत यद्धर्मेऽस्मिन् मुख्यतश्चतुर्षु विषयेषु समधिकं बलमर्पितमास्ते (१) ऐक्य सहिष्णुता च (२) अहिंसा तथा प्राणिमात्रे प्रीतिः (३) आत्मत्यागः सेवा च तथा (४) दैवी योजना।

श्री दस्तूर एन. बी. होमीमहोदयो दारिद्र्यं, विद्वेषं, भेद-भावं, पारिवारिकीं सङ्कीर्णतां च धर्मविरुद्धान्यूचे तथामीषां निवारणे बलं समर्पयत्।

कन्फ्यूशियन—धर्मस्य प्रतिनिधिर्द्रावितरो वेईतातमहोदयः प्राध्यापकः कॉलेज ऑफ़ चाइनीज़कल्चर, ताइपेह इति, कन्फ्यूशियन-धर्ममपि च हिन्दुधर्मसदृशमाचख्यौ, यस्मिन् पुनर्जन्मवादः, सद्भावः, प्रलयः, सत्यमित्यादयः सिद्धान्ताः स्वीकृताः सन्ति। महाभागोऽसौ स्वधर्मस्य ६४ सूत्राणामुल्लेखं कृतवान्।

जुडानिज्मस्य रबीमोर्डिकाइवैक्समैनमहोदयः समताया धरातले मानवीयसम्बन्धानां विकास-साधनमावश्यकमुक्तवान्। सोऽयं महाभागः प्रेम, दयां तथा त्यागमेव हि यहूदिधर्मस्याधारं घोषयन् विश्वस्य विभिन्नान् धर्मान्-एकस्य द्वितीयं निकटमानेतुं बलमर्पयामास।

८, दिसम्बर ६८ दिनस्य 'दिनमान'-पत्रात्साभारम्।

गिरने से पहले उनकी रक्षा करें

बालों और दाँतों की नियमित देखभाल और उनका पोषण आवश्यक है। क्यों न फिर उनके गिरने से पहले उनकी रक्षा की जाय? इसके लिए उदयपुर का गाय छाप ब्राह्मी आँवला तैल और काला दन्त मन्जन सर्वोत्तम है। इन आयुर्वेदिक उत्पादनों से आपके बाल [illegible] तथा लम्बे और आपके दाँत [illegible] [illegible] मजबूत रहेंगे।

इलाज से बचाव बेहतर है!

आयुर्वेद [illegible] [illegible] लिमिटेड [illegible]

गाय छाप

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवाहित जीवन का भरपूर
आनन्द... और अनचाहे गर्भ से मुक्ति।

अब हर व्यक्ति गर्भ-निरोध का सबसे
आसान और सन्तोषजनक तरीका
"निरोध" इस्तेमाल कर सकता है।

निरोध

परिवार नियोजन के लिये

३ के लिये १५ पैसे, १ के लिये ५ पैसे

(सरकार ने इनके मूल्यों में रियायत कर दी है)

अभी कुछ ही जिलों में मिल रहा है।

अगले २८ वर्षों में ही हमारे देश की आबादी दुगुनी यानी ५० करोड़ से बढ़कर १०० करोड़ हो जायेगी। नतीजा क्या होगा? मकान, शिक्षा, दवाइयां जैसी बुनियादी जरूरतें... और अनाज व कपड़े जैसी रोजमर्रा की चीजें आबादी की बढ़ती हुई मांगों को पूरा नहीं कर पायेंगी। इसका प्रभाव बच्चों पर... आपके बच्चों पर पड़ेगा। उन्हें ही यह कमियां भुगतनी पड़ेंगी। इसलिये, आज से ही इस खतरे को टालने की कोशिश कीजिये। अपना परिवार छोटा रखिये।

बच्चे का जन्म रोकना अब आपके बस में है।

निरोध इस्तेमाल कीजिये।

davp 69/246

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रससिद्धान्तपरिशीलनम्

काल्लूरि–श्रीहनुमन्तरावः हैद्राबादम्

पठितरि जन्यमाना काव्यानुभूती रस इति भारतीयसाहित्यशास्त्रज्ञानामभिप्रायः । "रस आस्वादने" इति धातोः "रस्यते आस्वाद्यते इति रसः "इति रसशब्दव्युत्पत्तिः । काव्यार्थ-परिज्ञानभव आत्मानंदपरीवाह एव रस इति फलितार्थः । काव्यस्थानां विभावानुभावव्यभि-चारिणां संयोगात् सामाजिके रसो निष्पद्यते इति रससिद्धांतः । तस्मादस्या रसनिष्पत्तेः काव्ये विद्यमानः अवकाशः खंडकाव्ये नास्ति, मुक्तके अयमवकाशः अत्यंताल्प इति च प्रतिभाति । परंतु कानिचित् खंडकाव्यानि मुक्तकानि चोत्त-मकवित्वं मन्यंते अस्माभिः; एषोऽस्मन्मानसि-कानुभवश्च । षेक्सपियरकवेर्गीतानि (Sonnets) एकैकश उज्ज्वलकवितामयानि सन्ति । निष्पन्न-रसानि ताराशशांकादिकाव्यानि षेक्सपियर-विरचितेनैकेनापि मुक्तकेन तुलयितुमलं नु ? किं तु मुक्तकेष्वपि रसपुष्टेरवकाशोऽस्तीति रस-गंगाधरे इदं पद्यमुदाहृतम्—

"अपहाय सकलबांधवचिंता-
मुद्वास्य गुरुकुलप्रणयम्
हा तनय ! विनयशालिन्
कथमिव परलोकपथिकोऽभूः ॥"

अत्र मृततनय आलंबनविभावः । बांधवानां दर्शनविलपनादिः उद्दीपनविभावः । रोदनमनु-भावः । दैन्यादयो व्यभिचारिणः । एतत्संयोगेन शोकः स्थायी भूत्वा करुणरसः अभिव्यज्यते ।

अपि तु सर्वाणि मुक्तकानीदृशान्येव भवन्तीति न । पश्यतेदं पद्यम्—

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये
जगतः पितरौ वंदे पार्वतपरमेश्वरौ ॥

अत्र कालिदासकविनिष्ठः पार्वतीपरमेश्वर-विषयको रतिभावः प्रधानः पार्वतीपरमेश्वरयोः शृंगारस्तद्भावस्य पोषकः । अत्र प्रधानभूतस्य भावस्य रसो गुणीभूयालंकारमात्रः अस्ति । एषोऽपरो दृष्टांतः —

"अल्पः सदा आडंबरेण व्याहरति
सज्जनः प्रशांतं भाषते
कांस्यं यथा रणति तथा कांचनं न रणति
विश्वदाभिराम ! शृणुरे वेम !"
(वेमन्नकृतांध्रपद्यस्य च्छाया)

पद्येऽस्मिन् वस्तु (अभिप्रायम्) विना रसादिः कोऽपि नास्ति । तथापि पद्यमिदमेकमपि पठित्वा उत्तमकवित्वपठनानुभूतिं रस्माभिः प्राप्यते खलु । रससिद्धांतदृष्ट्या तु रसगंगाधरा-दुद्धृतं पद्यमुत्तमम्, कालिदासकृतं पद्यं मध्यमम्, वेमन्नपद्यमधमं च भवति । वेमन्नस्य पद्ये अलं-कारं विना किमप्यन्यन्नास्ति । आलंकारिका ईदृशं काव्यानर्हमिति न वदंति, किं तु ईदृशैः पद्यै रसमन्मनो न रसीभवतीति वदंति । अपि तु रसगंगाधरकारकृतमिदं रसनिष्पत्तिमत् पद्यं वेमन्नकृतपद्यात् श्रेष्ठतरकवित्वमिति केनांगीक्रि-येत ? नीतिकवित्वम् (Didactic Poetry) इत्येव वेमनपद्यानि उत्तमकवित्वं कथं न भवितु-मर्हंति ? भर्तृहरिसुभाषितपद्यानि, भारतो-द्योगपर्वणि विदुरोपदेशपद्यानि चेदृशान्येव । मयूरकृतसूर्यशतकस्य पद्येषु चेदमित्थमिति निर्णेतुं शक्यः कोऽपि रसो न विद्यते । अपितु सूर्यशतकं समस्तप्रपंचस्याप्युत्तमकाव्येषु अन्यतममिति वक्तुं को नाम संदिह्यात् ।

रससिद्धांत आलंकारिकाणां कांश्चित् क्लिष्ट-प्रश्नानुत्पादयामास । रसो नाम निष्पाद्यः, पोष्टव्यश्च । विभावानुभावव्यभिचारिणस्तन्नि-ष्पत्तेः पुष्टेः हेतवः । तत एकत्र द्वौ रसौ प्रायशो न निष्पद्येते । यदि विरलेन कदाचिन्निष्पद्येते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकत्र, परस्परविरुद्धौ तौ न भवताम् । परस्पर-विरुद्धयोस्तु एकत्र संघटनं दोषो भवति। श्रृंगारबीभत्सरसौ परस्परविरुद्धौ। यो रति-जनकः स एव जुगुप्सां च न जनयति किल। अपि तु कवय आलंकारिककृतनियमानां क्रीता दासा इव कदापि काव्यानि न रचयंति। विरुद्धरससमावेशा बहुत्र महाकविकृताः सन्ति। तान् रक्षितुं "विरुद्धरससमावेशो दोषः" इति नियमस्य बहूनतिपातान् अलंकारिका असूचयन्। तथापि कतिचित् कविप्रयोगाः शिष्यंते ये न तेष्वतर्भवन्ति। श्रृंगारबीभत्सरसयो निर्व्यवधानसन्निवेशः अस्मिन्नस्तीति रघुवंश-काव्यस्यं इदं पद्यं दुष्टमित्युदाहृतं काव्यप्रकाश-कारेण—

"राममन्मथशरेण ताडिता
दुस्सहेन हृदये निशाचरी
गंधवद्रुधिरचंदनोक्षिता
जीवितेशवसतिं जगाम सा ॥"

पद्यमिदं दुष्टं वा न वेति विषये आलंका-रिकाणां मतभेदः अस्ति। तिष्ठतु नाम तन्म-तविभेदः। कवेः प्रतिभां न प्रशंस्य तूष्णीं तिष्ठामः यथा रक्तं श्रृंगारांगं संवृत्तम्, मरणं च श्रृंगारः परिणतम्। भासकृते ऊरुभंगना-टके ईदृशमेवापरं पद्यम्—

"माल्यैर्ध्वजाग्रगलितैः कृतमुंडमालम्
लग्नैकसायकवरं रथिनं विपन्नम्
जामातरं प्रवहणादिव बंधुनार्यो
हृष्टाः शिवा रथमुखादवतारयंति ॥"

अचेतनानां वर्णनं काव्यं कथं भवतीति रससिद्धांतादपरः प्रश्न उत्पद्यते। अचेतनेषु रतिशोकहासादयो न भवंति किल। ध्वन्यालो-ककारः अचेतनवस्तुवर्णनं काव्ये सर्वदा चेतन-वृत्तांतमिलितमेव भवतीति इमामुदाहृतिं ददौ—

"तरंगभ्रूभंगा क्षुभितविहगश्रेणिरशना
विकर्षंती फेनं वसनमिव संरंभशिथिलम्
पदाविद्धं यांती स्खलितमभिसंधाय बहुशो
नदीरूपेणेयं ध्रुवमसहमाना परिणता ॥"
(विक्रमोर्वशीयम्।)

अस्मिन् पद्ये नदीचरितं मानवतीचरिता-रोपात् सरसं भवति। अपितु सर्वाण्यचेतनवर्ण-नानीदृशान्येव न दृश्यंते। चेतनत्वारोपणरहि-तानि समुद्रपर्वतादिवर्णनानि काव्येषु बहूनि संति। उदाहरणं यथा आंध्रश्रृंगारनैषधकाव्ये तटाकवर्णनम्—

"शेषपुच्छच्छायया भासमानानि बिसानि
तन्मग्नसुरदंतिदंता इव
परिपूर्णपरिफुल्लपुंडरीकश्रेणी
यामिनीरमणरेखालीव
प्रतिबिंबितोपांतबहुलपादपाः
गर्भस्थशैलसंघा इव
एकदेशे इंदीवराणि
कालकूटमयूखखंडानीव
बालशैवालवल्लरीजालकम्
बाडवानलभवधूमपंक्तिरिव
वारिराशिरिव गंभीरम्
घनतटाकं ददर्श सजनविभुः ॥" (छाया)

अस्मिन् पद्ये तटाके चेतनत्वारोपणा नास्ति। श्रीवेदुलसत्यनारायणशास्त्रिकृतात् "आषाढमेघम्" नामांध्रखंडकाव्यादुद्धृतमिदं पद्यं पश्यत—

"नास्ति तदानींतनी उज्जयिनी; नास्त्यल-
कानगरीप्रयाण सम्मोदः
नास्ति च प्रेमभरमुग्धस्तत्कालगिरिप्रवासी
भानूदयचित्रितेंद्रधनुरुज्ज्वलमूर्तिस्त्वम्
तत्प्रकारेण प्रवासिबांधवोऽद्यापि दृश्यसे ॥"
(छाया)

अस्मिन् प्रवासिबांधवत्वं मेघे आरोपितम्। "भानूदयचित्रितेंद्रधनुरुज्ज्वलमूर्ति" रित्यत्र तु चेतनत्वारोपणं विनापि मेघनिसर्गसौंदर्यमेव मनोज्ञं वर्णितम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अचेतने चेतनत्वारोपणमेवास्तु इति ध्वनिकारस्याग्रहो नास्ति। अचेतनवर्णनं काव्ये चेतनवृत्तांतसंयोजितं वर्तते इत्येव तस्याशयः। उपरि पद्ययो र्नीलयक्षयो श्चेतनवृत्तांताभ्यां तटाकमेघौ विभावरूपेण संयोजितावेव स्तः। परतु चेतनैः कश्चिद्बादरायणसंबंधरहितमचेतनं नाम न विद्यते। "वाक्यं रसात्मकं काव्यम्" इति साहित्यदर्पणकारोक्तं लक्षणं जगन्नाथः नदीपर्वतादिवस्तुवर्णनानि यानि न रसात्मकानि, अनेन लक्षणेन काव्यत्वं न लभंते इति खंडयामास। कृत्स्नं काव्यं रसात्मकं भवति, रसरहितान्यपि पर्वतादिवर्णनानि तन्मध्यपतितानि तत्संपर्केण रसस्पर्शं वहंतीति प्रतिवादिकृतां शंकां, तथा चेत् "गौश्चलति", "मृगो धावति" इत्यादिवाक्यमपि कथञ्चिद्रसस्पर्शं प्राप्य काव्यं भवेत्, "अर्थमात्रस्य विभावानुभावव्यभिचार्यन्यतमत्वा" दित्युक्त्वा निवारयामास।

अचेतनवस्तुवर्णने साक्षाद्रसानुभवो न भवति। चंद्रमेघादि विभावादि र्भवति। तदेव तस्य प्रयोजनम्। ततः केवलवस्तुमात्रं प्रकृतिवर्णनं रससिद्धांतदृष्ट्या उत्तमकवित्वं न भवितुमर्हति।

किं तु (Wordsworth) प्रभृतयः प्रसिद्धकवयः संति ये स्वस्वकाव्येषु प्रकृतिरामणीयकमेव वर्णयामासुः। वाल्मीकिर्महान् प्रकृतिकविः। रामायणस्थानीमानि प्रकृतिवर्णनात्मकानि पद्यानि पठितारो विभावयंतु—

"प्रस्तरेषु च रम्येषु विविधाः काननद्रुमाः
वायुवेगप्रचलिताः पुष्पैरवकिरंति गाम्।
पतितैः पतमानैश्च पादपस्थैश्च मारुतः
कुसुमैः पश्य सौमित्रे क्रीडन्निव समंततः।
विक्षिपन् विविधाः शाखा नागानां कुसुमोत्कचाः
मरुतश्चलितस्थानैः षट्पदैरनुगीयते।
मत्तकोकिलसन्नादै र्नर्तयन्निव पादपान्
शैलकंदरनिष्क्रांतः प्रगीत इव चानिलः॥"

"वर्षोदकाप्यायितशाद्वलानि
प्रवृत्तनृत्तोत्सवबर्हिणानि
वनानि निर्वृष्टबलाहकानि
पश्यापराह्णेष्वधिकं विभांति।
समुद्वहंतः सलिलातिभारम्
बलाकिनो वारिधरा नदंतः
महत्सु शृंगेषु महीधराणाम्
विश्रम्य विश्रम्य पुनः प्रयांति॥"
"सप्तैकहंसं कुमुदैरुपतम्
महाह्रदस्थं सलिलं विभाति
घनै र्विमुक्तं निशि पूर्णचंद्रम्
तारागणाकीर्णमिवांतरिक्षम्॥"

अत्र वर्णिता वसंतवर्षाशरत्काला रामविरहविभावा इत्येव न, प्रकृतिरामणीयकयथार्थचित्रणादप्यत्यंतमनोज्ञाः संति। तेन हि अचेतनस्य वर्णनं चेतनवस्तुसंयोजितेनैव भवितव्यमिति न, रसस्पर्शरहितान्यपि वर्णनानि हृदयान्युत्तमकाव्यानि स्युः।

अथ परिशीलयामो रससिद्धांतप्रभावाद्यपरिणामा अस्मद्भारतीयसाहित्ये समजनिषतेति। शकुंतलादिविभावैः, कटाक्षाद्यनुभावै र्लज्जादिव्यभिचारिभिश्च रतिः स्थायी भवति; तदा शकुंतला सामान्यकांतेवाभाति, रसज्ञनिष्ठा रत्यादिचित्तवृत्त उद्बोध्यंते, विभावादय आस्वाद्या भवन्ति, अलौकिकव्यापार उदयति, रसानंदः अनुभूयते इति रससिद्धांतः। काव्ये तावत् शकुन्तलापात्रं कवेः कल्पनवर्णनादिभिर्यदि शकुन्तलात्वं जहाति साधारणतां च प्राप्नोति, किमेभिः कल्पनवर्णनादिभिः ? कवेराशयो व्यर्थः अभूत् किल। शाकुन्तलपठनेनास्मन्मनसि शकुंतलाया व्यक्तित्वमेव स्पष्टमुद्रितं भवति। तथैव सीता, सावित्री, दमयंती, द्रौपदी, देवयानी, अ.फीलिया, क्लियोपात्रा, नटाषा इत्यादिस्त्रीणां विविधव्यक्तित्वानि तत्तत्कथासु चित्रितानि संति रससिद्धांतप्रभा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वादुत्पन्ने अस्मद्देशसाहित्ये पात्रेषु प्रायशः स्त्रीपात्रेषु पात्रचित्रणं मुख्यं वर्तते।

कति रसा इति विषये महानस्ति कोलाहलः। भरतः शृंगारहास्यकरुणरौद्रवीरभयानकबीभत्साद्भुतानैष्टावेव रसान् (अस्मिन्नभिप्राये विप्रतिपत्ति रस्ति) नाट्यशास्त्रे उदाजहार। नाट्यानानुकूल इति स्यात् शांतरसो नोदाहृतः। अर्वाचीनैः शांतरसस्तेषु संकलितः। रुद्रटो दशमं प्रेयोरसं निरूपितवान्। अनंतरं वत्सलभक्तिमया रसाः कैश्चित् प्रतिपादिताः। एवं रससंख्यायां कैश्चिद् वर्धितायां, केचिदूचुः इयंतो रसा न संति, अद्भुत एक एव रसः प्रकृतिः अन्ये तस्य विकृतय इति। भवभूतिः "एको रसः करुण एव" इत्युवाच। प्रायेण तु आलंकारिका उपरि उक्तान् नव रसानंगीकुर्वंति।

यद्येवं, Shakespeare विरचितेषु Macbeth, Othelo, Hamlet इत्यादिनाटकेषु के रसा इति शंका जायते। तेभ्यो नूतना रसाः कल्पनीया भवंति।

"विभानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" इति भरतेन नाट्यशास्त्रे उक्तम्। कस्तस्य दृष्टान्त इति प्रश्ने—

"यथा हि नानाव्यंजनौषधिद्रव्यसंयोगाद्रसनिष्पत्ति र्भवति, दथाहि गुडादिभिर्द्रव्यै र्व्यंजनैरौषधिभिश्च षाडाबादयो रसा निवर्तंते यथा नाना भावोपगता अपि स्थायिनो भावा रसत्वमाप्नुवंति।"

"यथा नराणां नृपतिः शिष्याणां च यथा गुरुः
एवं हि सर्वभूतानां भावः स्थायी महानिह॥"

"यथाहि समानलक्षणः तुल्यपाणिपादोदरशरीरसमानांगप्रत्यंगा अपि पुरुषाः कुलशीलविद्याकर्मशिल्पविचक्षणत्वात् राजत्वमाप्नुवंति। तत्रैव चान्ये अल्पबुद्धयः तेषामेवानुचरा भवंति, तथा विभावानुभावव्यभिचारिणः स्थायिभावानुपाश्रिता भवन्ति। बह्वाश्रयत्वात् स्वामिभूताः स्थायिनो भावाः तद्वत् स्थानीयपुरुषगुणभूता अन्ये भावास्तान् गुणतया आश्रयंते परिजनभूता व्यभिचारिणो भावाः। अत्राह को दृष्टांतः? यथा नरेंद्रो बहुजनपरिवारोऽपि सन् स एव नाम लभते नान्यः सुमहानपि पुरुषः। तथा विभावानुभावव्यभिचारिपरिवृतः स्थायी भावो रसनाम लभते।"

क्रमशः

शुभ कामनाओं के साथ

* इन्डो फॉरेन एजेन्सीज् *

२३, सर फिरोजशाह मेहता रोड़,

बम्बई – १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म्

ार्वदेशिक साप्ताहिक

का ऋषि बोध विशेषांक

महर्षि दयानन्द सरस्वती
जिन्हें शिवरात्रि पर्व पर सच्चे शिव का बोध हुआ था।

सार्वदेशिक आर्य प्रतिनिधि सभा का मुखपत्र

म्पादक :
ाश पुरुषार्थी
म्पादक :
प्रसाद पाठक

वर्ष ११ अंक १७ । वार्षिक मूल्य १२)
२९ फरवरी १९७६ विदेश में दो पौण्ड
फाल्गुन कृष्णा १४ सं० २०३२ इस अंक का मूल्य
दूरभाष : २७४७७१ १) रुपया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैदिक-प्रार्थना

एमं यज्ञमनुमतिर्जगाम
सुक्षेत्रतायै सुवीरतायै सुजातम्।
भद्रा ह्यस्याः प्रमति र्बभूव
सेमं यज्ञमवतु देवगोपा ।।

अथर्व० ७-२०

(इमं सुजातं यज्ञं) इस प्रसिद्ध सत्कर्म के प्रति (अनुमति सुक्षेत्रतायै सुवीरतायै आजगाम) अनुमति उत्तम स्थान बनाने के लिये और उत्तम वीरता उत्पन्न करने के लिये आई है (अस्याः प्रमतिः भद्रा बभूव) इसकी श्रेष्ठ बुद्धि कल्याण करने वाली है। (सा देवगोपा इमं यज्ञं आ अवतु) यह देवों द्वारा रक्षित हुई अनुमति सब प्रकार से इस सत्कर्म की रक्षा करे।

प्रार्थना—सुप्रसिद्ध-सत्कर्म के लिये हमारी अनुकूल मति होवे और उसमें हमें उत्तम वीरत्व तथा उत्तम कार्यक्षेत्र प्राप्त होवें। ऐसी जो सद्बुद्धि होती है वही कल्याण करती है। यह देवों से रक्षित होने वाली हमारे द्वारा किये जाने वाले सत्कर्म की रक्षा करे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीय

युगपुरुष महर्षि दयानन्द के स्वप्नों का भारत

महर्षि दयानन्द की भावना सत्यनिष्ठा थी और लक्ष्य था कि मनुष्य मनुष्य बनकर, परिवार बनकर परिवार और समाज का श्रेष्ठ अंग बने।

उनकी दिव्य दृष्टि ने देखा कि देशवासी धार्मिक सामाजिक और राजनीतिक दासता में बुरी तरह जकड़े हुए हैं। उनके जीवन की गर्हित भावना और यत्न उन्हें पतन की ओर ले जा रहे हैं। उन्होंने लौकिक और पारलौकिक उन्नति को धर्म बताकर देशवासियों के हृदयों से मायावाद, प्रारब्धवाद, नैष्कर्म्यवाद, शून्यवाद और जगत् मिथ्यावाद के वहम को मिटाकर उद्योगवाद का पाठ पढ़ाया। मूर्ति-पूजा, अद्वैतवाद, अवतार, पापों की क्षमा, योग विहीन भक्ति, काल्पनिक स्वर्ग नरक, झूठे तीर्थ, फलित ज्योतिष आदि-आदि का प्रबल खण्डन करके वेदानुकूल शुभ-ज्ञान और शुभ-कर्म के द्वारा मोक्ष प्राप्ति का मार्ग सुझाया। लौकिक उन्नति पारलौकिक उन्नति में बाधक नहीं इसके लिए 'त्यागवाद' की अमोघ प्रणाली पर बल देते हुए वर्णाश्रम व्यवस्था का पुनरुद्धार किया। झूठे और सच्चे ब्रह्मचारियों, साधुओं, गुरुओं, आचार्यों और ब्राह्मणों की पहचान बताकर धर्म के नाम पर होनेवाली ठगी और लगी हुई दूकानों को उठवाने की प्रक्रिया आरम्भ कराई। वैदिक वर्ण व्यवस्था का उज्ज्वल स्वरूप प्रस्तुत करके जन्मना जात-पात की विविध अभि-शापों के साथ नीव हिलाई। जन्म और धन-सम्पदा की तुलना में गुणों और योग्यताओं के सामाजिक सम्मान का माप दण्ड उद्घोषित किया।

इससे जन्माभिमान और धनाभिमान दूर होकर अयोग्यों को योग्य बनने और तथाकथित गिरे हुओं को ऊंचा उठने की प्रेरणा मिली और आशा बंधी। स्त्री और शूद्रोंको वेदाऽध्ययन का अधिकार

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिलाया। नारी जाति की प्रतिष्ठा की पुनः स्थापना की। शिक्षा और विवाह का आदर्श ऊंचा किया। विवाह और गृहस्थाश्रम की वरेण्यता दर्शायी।

शिक्षा की आधार शिला ब्रह्मचर्य पर रखकर गुरुकुल शिक्षा प्रणाली को पुनर्जीवित किया। परिवार को समाज की इकाई ठहरा और उसे श्रेष्ठ बनाकर समाज को स्वस्थ, कर्मठ, सदाचारी और शिष्ट नागरिक देना आवश्यक ठहराया। विवाह में आयु, योग्यता और क्षमता की समानता और उचित अनुपात निर्धारित करके धर्म पूर्वक अर्थ एवं काम का उपार्जन एवं उपभोग करते हुए गृहस्थ तथा समाज को सुखधाम बनाने का उपाय बताया। कन्या के विवाह की कम से कम आयु १६ और लड़के की २४ वर्ष नियत की गई। इस प्रकार बाल-विवाहों, अनमेल विवाहों, वृद्ध विवाहों को तिरस्कृत कराया।

जो भाई-बहिन अपनी या समाज की भूलों के कारण हिन्दूसमाज से पृथक् होकर विधर्मी बन गए थे अथवा जो विधर्मी भाई हिन्दू समाज में आने के लिए उत्सुक थे उनके लिए हिन्दू समाज का बन्द द्वार खुलवाया। विधवाओं, अनाथों और पतितों की सुधि ली।

विदेशी शासन को किसी भी देश के लिये अभिशाप सिद्ध करके भारतीय राजनीतिक परतन्त्रता को धार्मिक एवं सामाजिक बुराइयों, लोगों की गिरावट और कंगाली का कारण सिद्ध करके और देश प्रेम की भावना फूककर उसके जुए को उतार फेंकने की प्रेरणा की।

विविध मतों का खंडन करके, धर्म में बुद्धि का संचार करके, धर्म, ईश्वर और मानव को प्रतिष्ठा दिलाई और धर्म के नाम में होने वाले अधर्म की कालिमा को धोया। धर्म को समाज रूपी भवन का सीमेन्ट तथा लोगों को आपस में मिलाने वाला सिद्ध करके हिन्दू जाति को ही नहीं अपितु विश्व के प्राणियों को एकता के सूत्र में बांधने का प्रयत्न किया और इसका उपाय वैदिक शिक्षा के अनुसार एक भाषा, एक धर्म, एक जैसी स्वस्थ विचारधारा, एक जैसा सुख, दुःख और सार्वभौम चक्रवर्ती राज्य बताकर कल्याण-मार्ग पर चलने का आह्वान किया। इस प्रकार महर्षि दयानन्द ने धार्मिक, सामाजिक, शैक्षणिक और राजनीतिक उत्थान के युग का सूत्रपात किया और वह स्वयं युगपुरुष बन गए।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजनैतिक स्वतन्त्रता की प्राप्ति के पश्चात् भारत अपने इतिहास में एक उज्ज्वल अध्याय जोड़ने में समर्थ हुआ है परन्तु देशवासियों को पहले से भी अधिक परतन्त्रताओं में शारीरिक, मानसिक—ग्रस्त हुआ देखकर ऐसा लगता है कि स्यात् यह अध्याय न जुड़ सके। यदि जुड़ा भी तो सुन्दर भविष्य में इसका प्रमुख कारण देश का निर्माण मात्र भौतिक समृद्धि पर किया जा रहा है, नैतिक समृद्धि को एक ओर रख दिया गया प्रतीत होता है। इसके परिणाम स्वरूप नैतिकता की उपेक्षा एवं नैतिक असमृद्धि भौतिक समृद्धि के मार्ग में रोड़ा बनती जा रही है।

सर्वप्रथम शिक्षा प्रणाली में आमूल परिवर्तन किए जाने की आवश्यकता है जो पूर्वजों का सम्मान करना सिखाए, विद्यार्थियों को उत्तम नागरिक बनने और आजीविका कमाने में समर्थ बनाए। एक शब्द में मनुष्य को मनुष्य बनाने वाली शिक्षा की व्यवस्था होनी चाहिए। ऐसी शिक्षा को दूर से ही नमस्कार करना चाहिए जो मनुष्य को सब कुछ बनाए परन्तु मनुष्य न बनाए।

समाज को इस प्रकार परिष्कृत रखा जाय जिससे अपराधों के करने की न तो प्रवृत्ति हो और न हिम्मत ही हो।

व्यक्तियों के उत्थान में समाज बाधक न हो और समाज के उत्थान में व्यक्ति बाधक न हो। इसके लिए मनुष्य के देवत्व को विकसित और पशुत्व को निरुत्साहित करना अनिवार्य होता है। यहीं धर्म और धार्मिक जीवन की अनिवार्यता स्वीकार करनी पड़ती है। यह भी अनुभूति होती है कि शासन का अभिप्राय-धर्म की रक्षा और अभिवृद्धि होता है।

हमारा शासन और हमारा समाज इस उद्देश्य की पूर्ति में सफल हो इसके लिए महर्षि दयानन्द सरीखे महान् नेताओं की आवश्यकता है जो देश का योग्य धार्मिक, सामाजिक और राजनीतिक मार्ग-प्रदर्शन करते हुए उसी भारत का निर्माण कर सकें जो कभी ज्ञान-विज्ञान, कला कौशल, उद्योग धन्धों, धन वैभव और आध्यात्मिक सम्पदा तथा राजनीतिक प्रभुता में सब देशों का सिरमौर था और जिसका महर्षि दयानन्द ने स्वप्न लिया था। तथा जिसके माध्यम से विश्व के हर प्रकार के कल्याण की उन्होंने आशा लगाई थी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सार्वदेशिक पत्र के स्वामित्व आदि के विषय में विवरण

फार्म—४

(नियम ८ देखिए)

१—प्रकाशन का स्थान—	सार्वदेशिक आर्य प्रतिनिधि सभा, महर्षि दयानन्द भवन, रामलीला मैदान, नई दिल्ली-११०००२
२—प्रकाशन की अवधि—	साप्ताहिक
३—मुद्रक का नाम—	रघुनाथप्रसाद पाठक
(क्या भारत का नागरिक है)	भारतीय
(यदि विदेशी है तो मूल देश)	
४—पता—	ऊपर दिया हुआ है।
५—प्रकाशक का नाम—	रघुनाथप्रसाद पाठक
(क्या भारत का नागरिक है ?)	भारतीय
(यदि विदेशी है तो मूल देश)	
पता—	ऊपर दिया हुआ है।
६—सम्पादक का नाम—	श्री ओम्प्रकाश जी पुरुषार्थी सभा-मन्त्री सहा० रघुनाथप्रसाद पाठक
(क्या भारत का नागरिक है?)	हां
(यदि विदेशी है तो मूल देश)	
पता—	उपरोक्त
७—उन व्यक्तियों के नाम व पते जो समाचार पत्र के स्वामी हों तथा जो समस्त पूंजी के एक प्रतिशत से अधिक के साझेदार या हिस्सेदार हों	सार्वदेशिक आर्य प्रतिनिधि सभा, महर्षि दयानन्द भवन, रामलीला मैदान, नई दिल्ली-११०००२ (पत्र की स्वामिनी)

मैं रघुनाथप्रसाद पाठक एतद् द्वारा घोषित करता हूं कि मेरी अधिकतम जानकारी एवं विश्वास के अनुसार ऊपर दिए गए विवरण सत्य हैं।

दिनांक
२०-२-१९७६

रघुनाथप्रसाद पाठक
प्रकाशक के हस्ताक्षर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवरात्रि पर आत्मावलोकन

आर्य समाज : संघर्ष और सफलतायें

रामगोपाल शालवाले, प्रधान
सार्वदेशिक आर्य प्रतिनिधि सभा, नई दिल्ली

"तमसो मा ज्योतिर्गमय" की प्रेरणा के साथ संघर्ष करते हुए हम ने सौ वर्ष पूरे किये हैं। समय की प्रत्येक चुनौती को स्वीकार करते हुए हमने मानव की जीवन धारा को संवारा है। राष्ट्र के गत १०० वर्ष के इतिहास को कुछ निश्चित और उज्ज्वल आयाम दिए हैं। हमने अन्याय से समझौता नहीं किया, उसे समाप्त किया है। महर्षि दयानन्द ने जिस वैदिक ज्ञान की मशाल को हमारे हाथ में देकर संसार के कर्मपथ पर चलने का आदेश दिया था हम उसी दिशा में चले हैं। अन्धकार से लड़ने का जो मन्त्र १०० वर्ष पूर्व ऋषि ने बताया था वही मात्र हमारा संबल है 'चरैवेति, चरैवेति'। पाँव लहू लुहान हुए हैं शरीर थकान, पीड़ा और आघातों से क्षतविक्षत हो गया पर हम रुके नहीं चलते रहे हैं, आगे भी चलते रहेंगे। हमें अपने भविष्य और मानव की गरिमा पर विश्वास है।

आर्यसमाज एक वर्ग, एक देश या काल विशेष तक सीमित नहीं, यह सार्वदेशिकहै। समस्त विश्व इसकी परिधि है। काले, गोरे, पीले सभी मानव इसके अंग हैं। हम किसी कृत्रिम आवरण पर सांचे विशेष में बंधे आन्दोलन या गुरुडम के पक्षपाती नहीं। समस्त विश्व हमारा कर्मक्षेत्र है। त्याग और बलिदान की नींव पर खड़ा आर्य समाज भविष्य के प्रति सचेत हैं। स्वार्थ या किसी और बड़ी सम्पत्ति को पाने का ध्येय हमारा नहीं। 'नेकी कर और पानी में बहा' ऐसा अलमस्त फक्कड़पन कहीं नहीं मिलेगा। आर्यसमाज विश्व मानव की जीवन धारा के साथ गतिशील है। संकीर्णता हमें कभी नहीं अच्छी लगी। आलोचक तो पहचान ही धब्बों की करते हैं। किन्तु वास्तव में आर्य समाज मानव को ज्ञान का प्रकाश दिखाता रहा हैं। विश्व कवि रवीन्द्र नाथ ठाकुर ने इसी सत्य को पहचान कर महर्षि को संसार का गुरु कहकर उनका स्मरण किया था।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"स्वाधीन राष्ट्र" की कल्पना सर्वप्रथम स्वामीदयानन्द के हस्ताक्षरों में ही दिखाई देती है। देश में जब तक कोई राजनीतिक मंच ही नहीं बना था उस समय ऋषि ने देश को स्वाधीनता के लिये प्रेरित किया।

"माता पिता के समान सुखदायी विदेशी राज्य भी त्याज्य है" इस छोटे से वाक्य की तुलना में संसार के बड़े-बड़े स्वाधीनता परक भाषण बौने जान पड़ते हैं। महात्मा गांधी, स्वामी श्रद्धानन्द, लाला लाजपतराय और तिलक ने जैसे इस सत्य को समझ लिया था। स्वस्थ प्राण स्वस्थ शरीर में रहते हैं। ऐसे ही विकसित संस्कृति स्वाधीन राष्ट्र में जन्म लेती है। पराधीन राष्ट्र हो या व्यक्ति, वह प्रगति या विकास की बात सोच ही नहीं सकता। आर्यसमाज राष्ट्र के प्रत्येक स्वाधीनता आन्दोलन में अग्रणी रहा है। बलिदान ही इसकी धरोहर है। भारतीय स्वाधीनता संग्राम के कटु आलोचक वेलेटाइन शिरांल ने ऋषि की भावनाओं को इस वाक्य में व्यक्त किया है—

(आई एक बोर्न टू कमांड एण्ड नाट टू ओबे) मैंने दास बनने के लिए नहीं स्वशासन के लिए जन्म लिया हैं। दयानन्द का दर्शन-पौरुषमय कर्म से संयुक्त हैं ऐसी गौरवपूर्ण धरोहर किसी और को मिली हो--स्मरण नहीं। स्वाधीन और प्रभुता-सम्पन्न राष्ट्र की कल्पना सर्वप्रथम महर्षि दयानन्द ने की। यही कारण है कि प्रत्यक्ष या परोक्ष रूप से देश का प्रत्येक आन्दोलन आर्यसमाज से प्रभावित रहा। हंसते हंसते शिर कटाने की मांग हो या जेल जाने की--आर्यजन सदा अग्रिम पंक्ति में रहे हैं। सत्य तो यह है कि विना आर्य समाज के योगदान के भारत के स्वाधीनता संग्राम की कहानी पूरी नहीं होती।

"श्वेताश्वतर" के द्रष्टा के अनुसार 'नहि मानुषात् श्रेष्ठतरं हि किंचित्' की धारणा हमारी भी है। हमने विधाता की सृष्टि में मानव को सर्वोपरि माना है। उसकी पूर्ण मुक्ति ही हमारा ध्येय है। मात्र राजनीतिक या भौतिक मुक्ति ही पर्याप्त नहीं। युगों की दासता से जन्मे जड़ और रूढ़ संस्कार एवं कुरीतियां भी उसकी प्रगति में बाधक हैं। छूतछात, कन्यावध, मूर्तिपूजा, बाल विवाह, विधवा समस्या, अन्धानुकरण, गुरुडम, आदि अनेक सामाजिक रोग, व्यक्ति के मन को बीमार बना देते हैं। आर्यसमाज ने

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इनके स्थान पर पुनः स्वस्थ भारतीय संस्कृति की प्रतिष्ठा की। आर्यसमाज को निकाल दीजिये—भारत की वर्तमान सांस्कृतिक इमारत क्षण भर में भूमिसात् हो जाएगी।

आर्यसमाज ने शताब्दी पर्व मनाया। भारत में और संसार के दूसरे देशों में इस अवसर पर अजीब उल्लास रहा। भारत की हृदय स्थली दिल्ली पांच दिन दुल्हन की तरह सजी रही। कड़ाके की सर्दी और अनेक कठिनाईयों के बावजूद दस लाख व्यक्तियों ने इस पर्व को उत्साह और शालीनता से मनाया।

हम किसी गुरुडम या मजहब के प्रचारक नहीं। हम मानव को किसी किस्म के डिब्बों में बन्द कर उन पर अपना कोई खास ट्रेडमार्क चिपकाना नहीं चाहते। हम चाहते हैं मानव सब प्रकार की दासता और रूढ़िवादिता से मुक्त हो। मानवता को शोषण से मुक्ति मिले। समानता विश्व बन्धुत्व, वास्तविकता, करुणा, सत्य और बलिदान की भावनायें विश्व-मानव तक ले जाने के लिए आर्यसमाज कृतसंकल्प है।

शिक्षा का क्षेत्र आर्य समाज ने सरकार के उपरान्त सबसे अधिक प्रभावित कियाहै। हजारों की संख्यामें कार्यरत गुरुकुल, कन्या महाविद्यालय, डी० ए० वी० शिक्षण संस्थान इसके उदाहरण हैं। मैकाले की जिस दूषित शिक्षा पद्धति ने राष्ट्र की नई पौध को बौद्धिक दासता में जकड़ देने का निश्चय किया था, जिसका परिणाम आज सभी स्वीकार करते हैं। आर्य समाज की शिक्षण संस्थाए इसका एकमात्र उत्तर रही है। महात्मा गांधी, राष्ट्र नायक जवाहर लाल और श्रीमती इंदिरा गांधी ने इस संस्थाओं के शिक्षा के क्षेत्र में योगदान की अनेक बार सराहना की है। हमारा प्रारम्भ से यह विश्वास रहा है कि-शिक्षा व्यक्ति के तन, मन और बिचारों को परिष्कृत करे। उनके चरित्र और राष्ट्र प्रेम की भावना में सर्वोपरि रहे।

सार्वदेशिक महिला वर्ष के अवसर पर नारी जागरण के क्षेत्र में आर्य समाज भारत की सर्व प्रथम प्रभावशाली संस्था है। नारी के शोषण अशिक्षा, दहेज, पर्दा प्रथा और बाल विवाह जैसे बन्धकों और कुरीतियों का उन्मूलन कर नामों को सही अर्थों में पुरुषों की सहधर्मिणी, माता और बहिनों का महत्वपूर्ण स्थान प्रदान कराया। भारत की नारी ऋषि दयानन्द और आर्य समाज के ऋण से कभी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उऋण नहीं हो सकती।

शताब्दी वर्ष में हम मानव मात्र के कल्याण, समृद्धि, महायुद्धों की समाप्ति, शिक्षा के प्रसार, धर्म और विश्वबन्धुत्व की मंगलमय कामना करते हैं।

आइये, आज शिवरात्रि अथवा महर्षि दयानन्द बोधरात्रि के अवसर पर हम और आप सब मिलकर आत्मावलोकन करें और अपने अन्दर की त्रुटियों को बाहर निकाल फेंकने का व्रत लें।

जो पाषाणादि मूर्त्तियों को न मानकर सर्वदा सर्वव्यापक, सर्वान्तर्यामी, न्यायकारी परमात्मा को सर्वत्र जानता और मानता है वह पुरुष सर्वत्र, सर्वदा परमेश्वर को सबके बुरे-भले कर्मों का द्रष्टा जानकर एक क्षणमात्र भी परमात्मा से अपने को पृथक् न जान के, कुकर्म करना तो कहां रहा किन्तु मन में कुचेष्टा भी नहीं कर सकता क्योंकि वह जानता है, जो मैं मन, वचन और कर्म से भी कुछ बुरा काम करूंगा तो इस अन्तर्यामी के न्याय से विना दण्ड पाये कदापि न बचूंगा।

—महर्षि दयानन्द सरस्वती

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवलिंग पूजा और वेद | एक समीक्षा

दर्शनवाचस्पति श्री विश्वबन्धु शास्त्री 'साहित्यरत्न'

वैदिक शिव और पौराणिक शिव में आकाश और पाताल का अन्तर है। पौराणिक शिव ऐतिहासिक पक्ष को पुष्ट करता है परन्तु वैदिक शिव योगी और परमात्मा के गुण का प्रतीक है।

पौराणिक शिव की पत्नी पार्वती है और वैदिक शिव की पत्नी पार्वती अर्थात् ज्ञान, कर्म, उपासना और विज्ञान पर्व वाली ब्रह्म-वेद विद्या है। पौराणिक शिव का एक पुत्र अमिथुनज है और एक मिथुनज। वैदिक शिव के भी दो प्रकार की सन्तानें हैं।

(१) सृष्टि के आदि में अमैथुनज

(२) सृष्टि के मध्य में मैथुनज

दोनों प्रकार की सृष्टि ईश्वरीय नियम में आबद्ध है।

पुराणों में पार्वती की माता का नाम मेना और पिता का नाम हिमालय तथा भ्राता का नाम मैनाक है।

ये तीनों सम्बन्ध 'वैदिक शिव' में भी घटित होते हैं। यथा—पार्वती—ब्रह्मविद्या भी "मेना" (मे+ना) मेरा कुछ नहीं, अर्थात् 'इदं न मम' की वैदिकभावना से उत्पन्न होती है। इस ब्रह्मविद्या की पितृवत् रक्षा करने वाला, हिमालय के समान स्थिर चित्त वाला तथा हिम सदृश सात्विक वृत्ति वाला ही मनुष्य हो सकता है। तथा भातृवत् सहयोग देने वाला (मैनाक)="मे+न+अ+क, अर्थात् मे=मेरा, न+नहीं, अ+नहीं, क=आनन्द। मेरा आनन्द नैमित्तिक आनन्द नहीं, यह बात नहीं।

इतनी साधना के बाद तो आनन्द ही आनन्द है। इस प्रकार दोनों प्रकार के शिवों में शब्दों की समानता होते हुए भी अर्थों में बड़ा भारी अन्तर है।

जहां पुराणों का शिव अश्लीलताओं से परिपूर्ण है वहां वैदिक शिव अश्लीलांश-वर्जित है।

शिव के वैदिक नाम और उनके अर्थः-

शिव, शंकर, शम्भु, मयोभु, मयस्कर, रुद्र, नीललोहित, त्र्यम्बक,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हर महादेव, महेश आदि।

"शिव कल्याणे" धातु से शिव शब्द सिद्ध होता है, अर्थ= कल्याणमय।

शं करोतीति 'शंकर:' जो हृदय को शान्ति प्रदान करताहै अथवा जो प्रलय द्वारा गतिमय परमाणुओं में शान्ति स्थापित करता है।

शम्भु=शम्भवतीति शम्भावयतीति वा जो शान्ति निमित्त ही सर्वत्र वर्त्तमान है और जो शान्ति ही करता है।

मयोभु=मयो भावयतीति जो सुषुप्ति दशा में समस्त प्राणियों को सुखी करता एवं समाधि दशा में मानवात्माओं को आनन्दित करता तथा मुक्तावस्था में मुक्तात्माओं के लिए आनन्दमयी दशा का प्रादुर्भाव करता है।

मयस्कर=मयस्करोति इति, 'मय' इति सुखनाम (निरुक्त) सुख सामग्री को उत्पन्न करने वाला प्रभु 'मयस्कर' कहाता है।

रुद्र='रुदिर् अश्रुविमोचने' से रुद्र शब्द सिद्ध होता है। यो दुष्टान् रोदयति रुद्रः। जो दुष्टों को दुष्ट कर्म का फल देकर रुलाता है उसको 'रुद्र' कहते हैं।

नील लोहित=तमोगुण को रजोगुण में और रजोगुण को सत्वगुण में परिवर्तन करने की सदैव जीवात्मा को अन्तर्यामी रूप से प्रेरणा प्रदान करता रहता है। अथवा नीलम्=स्थिर जडम् लोहितम्=क्रियाशीलम् करोति जो मोहासक्तों को भी ज्ञान द्वारा कर्मठ बना देता है।

त्र्यम्बक=त्रीणि अम्बकानि यस्य सः तीन अक्षर हैं जिसमें ऐसे परमात्मा को 'त्र्यम्बक' कहते हैं जिसका मुख्य नाम ओम् है। अथवा उत्पत्ति, स्थिति और प्रलय तीन कर्म वाले परमात्मा को त्र्यम्बक कहते हैं।

हर=यः दुःखानि हरतीति जो प्राणिमात्र के दुःखों का हरण करता है, इसलिए उसको हर कहते हैं।

महादेव=पुराणों के अनुसार देव और असुरों के 'समुद्र मन्थन' संघर्ष में जो 'कालकूट' को निडर होकर पी गया वह देवों में महान्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हुआ इस लिए उसको महादेव कहा। परन्तु वेद के अनुसार महर्षि दयानन्द सरस्वती का विग्रह अत्यादरणीय है। यो 'महतां देवानामपि देवः स महादेवः' जो बड़ी से बड़ी दिव्यशक्तियों को भी दिव्यता प्रदान करता है इसलिए परमपिता को महादेव कहते हैं।

महेश="महांश्चासावीशः महेशः" जो बड़ा इशिन् कर्ता सृष्टिं रचयिता तथा सब पदार्थों का सबसे बड़ा स्वामी प्रभु ही महेश है।

शिवलिंग पूजा और पुराण

शिव को ऐतिहासिक देव मानकर तथा 'शिव पुराण' में दारुवन की कथा का प्रसंग छेड़कर तथा लिंग को उपस्थेन्द्रिय मानकर ऋषि-पत्नियों को व्यभिचारिणी सिद्धकर ऋषियों द्वारा शाप दिए जाने पर लिंग के कटकर तीनों लोकों को ताप तप्त करने पर पश्चात् पार्वती की योनि में शान्त होने की बात लिखकर पुराण कर्ता ने सन्मार्ग के स्थान पर वाममार्ग का प्रदर्शन किया है, जो निन्दनीय है।

पुराण की इस कथा का वैदिकीकरण

शिव=परमातमा का लिंग क्या हो सकता है ! इस प्रश्न पर गम्भीरता से विचार करने पर मैं इस परिणाम पर पहुंचा हूँ कि शिव लिंग, और कुछ नहीं, केवल मात्र यज्ञ है। यथा यज्ञ सर्वहित कारक है वैसे ही प्रभु भी सबका कल्याण चाहता है। ऋग्वेद के प्रथम मन्त्र में—अग्निमीड़े पुरोहितम् यज्ञस्य देवमृत्विम्। होतारं रत्नधातमम्। अग्नि, पुरोहित, यज्ञ, ऋत्विक, होता आदि का दर्णन है। यजुर्वेद के प्रथम मन्त्र में तो "इषे त्वोर्जे त्वा वायवस्थ देवो व. सविता प्रार्पयत श्रेष्ठतमाय कर्मण इन्द्राय भागं ······· यजमानस्य पशून् पाहि" कहकर, यजमान और श्रेष्ठतम कर्म यज्ञ को प्रधानता प्रदान की है।

सामवेद के प्रथम मन्त्र में भी—

"अग्न आयाहि वीतये गृणानो हव्यदातये हि होता सत्सि बर्हिषि' "अग्नि, हव्य, होता और बर्हिः का वर्णनकर यज्ञ की प्रधानता व्यक्त की है। ब्रह्मचर्य, गृहस्थ और वानप्रस्थ के कर्मों को प्रकट करने वाले तीनों वेदों में यज्ञमय जीवन बनाने की ओर संकेत है। परन्तु अथर्ववेद के प्रथम मन्त्र में साक्षात रूप से यज्ञ का वर्णन नहीं है क्योंकि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संन्यासी का ब्राह्म यज्ञ से कोई भी सम्बन्ध नहीं है।

साहचर्य नियम में लिंग और लिंगी का घनिष्ठ सम्बन्ध

'तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्' सर्वव्यापक परमात्मा यज्ञ में शुभ कल्याणमय कर्मों में नित्य ही प्रतिष्ठित रहता है। इस गीता वाक्य से भी वेदोक्त यज्ञ की महिमा प्रतिपादित होती है लिंगी परमात्मा का सूचक लिंग यज्ञ ही है।

शिव –परमात्मा अपना लिंग यज्ञ "सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः। अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्। समस्त प्रजा को प्रदान करने को चला। उसको प्रजा ने ऐसा अपनाया कि ज्ञानी जनों को उसका सही २ अर्थ बतलाना पड़ा। पुनःयज्ञ काप्रचार परमात्मा की आज्ञा के विपरीत अन्धपरम्परा के रूप में पशुहिसा-परक हो गया। पार्वती की योनि पृथ्वी पर बनाई वेदि में उसकी स्थापना हो गई। इस प्रकार से वैदिक शिवमयी यज्ञ पद्धति ही लिंग पूजा के रूप में परिवर्तित होकर वाममार्ग का रूप धारण करती चली गई।

महर्षि दयानन्द सरस्वती ने वैदिक यज्ञ पद्धति का स्वरूप परिष्कृत कर पशु हिंसा के विकृत रूप से पुनरुद्धार कर सत्यज्ञान द्वारा शिव और शिवलिंग=परमात्मा और देवयज्ञ की विशुद्ध परम्परा को पुनर्जीवित कर समस्त संसार को वेदों के प्राञ्जल रूप के दर्शन कराए महर्षि ने पौराणिक शिवलिंग पूजा को छुड़ाकर सच्चे शिवलिंग पूजा यज्ञ के करने कराने का पुनीत परिपाटी प्रचलित कर पावनता के दर्शन कराने का सौभाग्य प्राप्त कराया है। हम उनके सदा ऋणी रहेंगे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महर्षि महिमा गान

रचयिताः—पं० प्रकाशचन्द्र कविरत्न, अजमेर

धन्य ! धन्य ! आदर्श जगद्गुरु,
दयानन्द ऋषिराज !

चौदह वर्ष की आयु थी जब शिवरात्रि निराली आई।
जो भारत में अति सुखदाई, प्रभात नूतन लाई॥
मिथ्या शिव को तजकर, सच्चे शिव की खोज लगाई।
एक रात्रि क्या जागे हे ऋषि ! जगती सकल जगाई॥
जागरूक हो रखली तुमने
आर्य जाति की लाज।

धन्य ! धन्य ! आदर्श जगद्गुरु
दयानन्द ऋषिराज॥

यद्यपि तुमने विरक्त हो त्यागा कुटुम्ब अति प्यारा।
किन्तु हो गया यह सारा संसार कुटुम्ब तुम्हारा॥
जन्म-भूमि प्रिय टंकारा का स्वर्गिक सौख्य बिसारा।
वैभव कोष न सैन्य साथ, था हाथ न खड्ग दुधारा॥
आत्मशक्ति से किया करोड़ों
जन-गण-मन पर राज।

धन्य ! धन्य ! आदर्श जगद्गुरु
दयानन्द ऋषिराज॥

कहा, एक आराध्य ओ३म् है अखिलेश्वर अविनाशी।
सदा सर्व सुखराशि, असत् तम नाशी, ज्ञान-प्रकाशी॥
है सर्वत्र न कहो एक देशी कैलाश निवासी।
घट में खोजो उसे न भटको, मृगसम मथुरा काशी॥
किये विनष्ट अविद्या से,
उपजे सब बुरे रिवाज।

धन्य ! धन्य ! आदर्श जगद्गुरु,
दयानन्द ऋषिराज॥

अनार्ष ग्रन्थ पठन पाठन की पद्धति हीन हटाई।
आर्ष ग्रन्थ, श्रुति-स्वाध्याय प्रति श्रद्धा सुरुचि बढ़ाई॥
सत्य अर्थ मन्त्रों के कर, वेदों की महिमा गाई।
अनर्थ कर्त्ताओं की दूषित मनोवृत्ति बतलाई॥
मिथ्या मत पन्थों के गढ़ पर
विकट गिराई गाज।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धन्य ! धन्य ! आदर्श जगद्गुरु,
दयानन्द ऋषिराज ।।
हो यदि राज्य विदेशी पालक, पोषक मात-पिता सम।
राज्य स्वदेशी अधर्मरत भी उससे तो है उत्तम।।
इन वचनों से स्वतन्त्रता का पाठ पढ़ाया अनुपम।
स्वराज्य ही क्या सुराज्य हित भी बतलाये थे सुनियम।।
अग्रदूत तुम प्रथम, क्रान्ति के
नर-नायक सरताज।
धन्य ! धन्य ! आदर्श जगद्गुरु,
दयानन्द ऋषिराज ।।
हंसराज, गुरुदत्त, दर्शनानन्द, विद्वद्वर-नामी।
हुतात्मा श्री लेखराम पण्डित श्रद्धानन्द स्वामी।।
रोशनसिंह, सुखदेव, भगतसिंह स्वतन्त्रता के हामी।
वीर लाजपतराय तुम्हारे पथ के थे अनुगामी।।
बिस्मिल भी बलिदान हो गये,
देश, धर्म के काज।
धन्य ! धन्य ! आदर्श जगद्गुरु,
दयानन्द ऋषिराज ।।
छूत-छात औ जाति-पांति का भीषण भूत भगाने।
सौख्य, शान्तिप्रद सतत स्नेह की सुरसरिता उमगाने।।
भारतीय जनता में देशोन्नति की लग्न लगाने।
देश-विदेशों में प्रिय पावन वैदिक ज्योति जगाने।।
किया क्रान्तिकारी सुसंगठन
स्थापित आर्य समाज।
धन्य ! धन्य ! आदर्श जगद्गुरु,
दयानन्द ऋषिराज ।।
ऋषि ! तुम्हारी वैदिक शिक्षा कुल जग अपनायेगा।
परम पुनीत 'प्रकाश' ओ३म् ध्वज चहुंदिशि फहरायेगा।।
आर्य समाज समुन्नत होगा, शिथिल न हो पायेगा।
देव ! त्याग बलिदान तुम्हारा अजब रंग लायेगा।।
नियम निभायेंगे दश हम संकल्प यही है आज।
धन्य ! धन्य ! आदर्श जगद्गुरु, दयानन्द ऋषि राज।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवरात्रि का प्रकाश

पं० नरेन्द्र, हैदराबाद

कितनी शिवरात्रियां आईं और चली गईं, कितनों का कल्याण हुआ नहीं कह सकते। किन्तु वह शिवरात्रि वस्तुतः शिव-कल्याणी थी जिसने बालक मूलशंकर को सच्चे शिव की खोज के लिए प्रेरणा दी और उसे महर्षि दयानन्द के रूप में युग-युग तक मनुष्यों की पूजा और अर्चना के पद पर बिठा दिया।

शिवरात्रि के दिन महर्षि के हृदय में एक ज्ञान की किरण-चिनगारी प्रवेश कर गई थी किन्तु उस चिनगारी को सुरक्षित रखते हुए उसे प्रज्वलित अग्नि का रूप देना, जो संसार व्यापी हो रही है, यह उस महत्तम लोकोत्तर पुरुष का ही सामर्थ्य था। महर्षि ने इस आग को वन, उपवनों, घाटियों और पर्वतों में साधना और तप करते हुए सुरक्षित रखा, यह आग अद्‌भुत थी। अमेरिका के परम विद्वान् ऐंड्रोनेक्सन डेविस ने इस आग का वर्णन बड़े सुन्दर शब्दों में किया है, वे लिखते हैं कि मैंने एक ऐसी आग देखी है जो सार्वभौमिक है, यह असीम प्रेम की आग है जो द्वेष को जलाने वाली है और प्रत्येक, वस्तु को जलाकर शुद्ध कर रही है। अमेरिका के विस्तृत मैदानों, अफ्रीका के विशाल भूखण्डों, एशिया के गगनचुम्बी पर्वतों और यूरोप के महान् साम्राज्यों पर मुझे सबको पवित्र करने वाली आग दिखाई देती है। इस असीमित आग को देखकर जो राज्यों, साम्राज्यों और संसार भर के प्रबन्ध नीति के दोषों को जला देगी। मैं अत्यन्त आनन्दित होकर एक उत्साहमय जीवन यापन कर रहा हूं। असीम उन्नति की चमक से मनुष्य की आत्मा प्रज्वलित हो उठी है। आज केवल उसकी चिंगारियां आकाश की ओर उडती हैं वक्ताओं, कवियों और ग्रन्थ निर्माताओं की शिक्षाओं में आज उसी की ज्वालाएं दीख पड़ रही हैं। यह आग सनातन वैदिक धर्म को स्वाभाविक पवित्र दशा में जानने के लिए एक भट्टी के रूपमेंहै जिसे 'आर्यसमाज' कहते हैं। यह आग भारतवर्ष के परम योगी दयानन्द सरस्वती के हृदय में प्रकाशमान हुई थी।

हिन्दू और मुसलमान इस प्रचण्ड अग्नि को बुझाने के लिए चारों

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओर वेग से दौड़े, परन्तु यह आग ऐसे वेग से बढ़ती गई कि जिसका इसके प्रकाशक दयानन्द को भी ध्यान न था और ईसाइयों ने भी जिनके मत की आग और पवित्र दीपक पहले पूर्व में प्रकाशित हुए थे, एशिया के इस प्रकाश को बुझाने में हिन्दू और मुसलमानों का साथ दिया, परन्तु यह ईश्वरीय आग और भी भड़क उठी और सर्वत्र फैल गई। सम्पूर्ण दोषों का संगठन नित्य की शुद्धि करने वाली भट्टी में जलकर भस्म हो जायगा, यहां तक कि, रोग के स्थान में आरोग्यता, झूठे विश्वास की जगह तर्क, पाप के स्थान में पुण्य, अविद्या की जगह विद्या, द्वेष की जगह मित्रता, वैर की जगह स्नेह, नरक के स्थान में स्वर्ग, दुःख के स्थान में सुख, भूत-प्रेतों के स्थान में परमेश्वर और प्रकृति का राज्य हो जायेगा। मैं इस अग्नि को मांगलिक समझता हूं। जब यह अग्नि सुन्दर पृथिवी को नव-जीवन प्रदान करेगी तो सार्वजनिक सुख अभ्युदय और आनन्द का युग आरम्भ होगा।

इस ज्ञान-ज्योति को प्रज्वलित करने में ऋषि का अपना कोई स्वार्थ नहीं था। यह तो गुरु की दक्षिणा थी, जिसके लिए जीवन पर्यन्त अविराम संघर्ष और कुरीतियों से निरन्तर युद्ध करते रहे। उनको अपने कार्य में कितने कष्ट आए, स्वार्थी मनुष्यों ने उनके विनाश के लिए कितने षड़यन्त्र रचे, यह कौन नहीं जानता ?

महर्षि ने अपने स्वमन्तव्यामन्तव्य में लिखा है कि यह सिद्धांत सर्वत्र भूगोल में शीघ्र प्रवृत्त हो जावे जिससे सब लोग सहज में धर्मार्थ, काम, मोक्ष को सिद्ध करने सदा उन्नत और आनन्दित होते रहें। यही मेरा मुख्य प्रयोजन है। इस युग वन्द्य पुरुष की महनीय कृतियों और इस प्रकार विशालता को देखकर श्रद्धा से नत हो चरणों में लोट जाने की इच्छा होती है। भारतीय समाज ज्यों-ज्यों प्रगति कर रहा है और महर्षि के चरणों की ओर बढ़ रहा है।

महर्षि के प्रताप से चिरकाल से होने वाली शिवरात्री अपने सभी बन्धन तोड़कर हम आर्यों के लिए बोधरात्रि हो गई है। हम आर्यों को बोधरात्रि मनाते हुए महर्षि के प्रयोजन को सामने रखकर बढ़ना चाहिये। संकुचितता छोड़कर उदार अन्तःकरण से हमारे कार्य अवश्यमेव फलीभूत होंगे। प्राणीमात्र के कल्याण के लिए कार्य हमें इतनी शक्ति देंगे कि हम शक्तिमान् आग को अपने में सुरक्षित रख सकेंगे। यह ज्ञान की ज्योति है जो सदा प्रकाशित रहेगी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिभा-पुंज दयानन्द

श्री डा० सूर्यदेव शर्मा साहित्यालंकार, अजमेर

(१)

इस जग में प्रतिभा-पुंज मनुज, सदियों में बिरले होते हैं।
प्रज्ञा की प्रबल प्रखरता से, जो बीज प्रगति के बोते हैं ॥
जो नित नव आविष्कार करें, जग को लाभान्वित करते हैं।
निज की दैवी प्रतिभा से वे, सबको प्रतिभासित करते हैं ॥

(२)

सब दीन हीन दुखिया जन को, सड़कों पर मरते लखते हैं।
पर 'गौतम बुद्ध' बने कितने ? करुणाकर कौन परखते हैं ?
वृक्षों से सेब सदा गिरते, सब मानव नित्य निहारे हैं।
पर कौन गुरुत्वाकर्षण का, 'न्यूटन' बिन नियम निकारे हैं ?

(३)

था विवाह का अवसर भी क्या, वैराग्य वृत्ति का प्रावधान ?
जो बन गया 'गुरु रामदास' बस एक शब्द शुभ 'सावधान' ॥
हैं दिव्य दृष्टि वाले ऐसे प्रतिभा के पुंज मनुज कितने ?
युग चक्र बदल देने वाले, उत्पन्न किये कितने ॠत ने ?

(४)

इस युग में एक दयानन्द था, जो दम्भदुर्ग को हिला गया।
वैदिक बम्बार्डमेंट से गुरुडम-गढ़ मिट्टी में मिला गया ॥
पाषाण-मूर्ति पर दण्ड पेलते, सबने चूहा देखा है।
पर कितनों की प्रतिभा जागी, कितना ऋषित्व का लेखा है?

(५)

ऐ मेरी शिवरात्री प्यारी ! प्रत्येक यर्ष तू आती है।
पर किसी 'मूलशंकर' को क्यों, 'ऋषि दयानन्द' न बनाती है ?
प्रतिभा-सम्पन्न महा मानव क्यों अब उत्पन्न न होते हैं ?
जो दयानन्द, बुद्ध, न्यूटन सम, नव बीज ज्ञान के बोते हैं ॥

卐

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवरात्रि का पर्व और मृत्युञ्जय ऋषि दयानन्द

श्री आचार्य सत्यव्रत शास्त्री, विद्याभास्कर

प्राचीन रूढ़िगत परम्परा में फाल्गुन कृष्णा चतुर्दशी को महाशिव-रात्रि का परम पावन पर्व व्रत के रूप में निराहार रहकर बड़ी श्रद्धाभक्ति के साथ समस्त आधुनिक तथाकथित सनातन-धर्मावलम्बी महानुभाव मनाते चले आ रहे हैं।

इस महत्त्वपूर्ण परम प्रसिद्ध पर्व का आधार भागवत आदि पुराणों की ही परम्पराओं पर अवलम्बित है। जिनका वैदिक वाङ्मय के अन्तर्गत ईश्वरीयज्ञानभूत चार वेदसंहिता ऋग्, यजु, साम, और अथर्व से, उनके व्याख्यानभूत-ब्राह्मणों से तथा आरण्यकों, उपनिषदों, कात्यायनादि श्रौत सूत्रों, पारस्करादि गृह्य-सूत्रों, तथा आपस्तम्बादि धर्म सूत्रों, मन्वादि धर्मशास्त्रों से अथवा वेदांगों से कोई प्रयोजन नहीं। जिनकी समस्त मान्यताओं का एक मात्र आदर्शबिन्दु पुराण-उपपुराण आदि समस्त परवर्ती एवं काल्पनिक परस्पर विरुद्ध साहित्य ही है। जो जीवन भर उन्हीं के कल्पित एवं मनघढ़न्त मन्तव्यों को ही अपना चरम जीवन-लक्ष्य समझते हैं, उनकी ही उलझनों में यावज्जीवन उलझे रहते हैं। उनसे परम प्राचीन आदि सृष्टि में ईश्वरीय प्रेरणा से ज्ञानरूप में प्रादुर्भूत आर्ष वेदज्ञान का प्राचीन ऋषि मुनि प्रणीत वैदिक साहित्य का तदनुकूल मन्वादि स्मृतियों का—धर्मशास्त्रों का, अध्ययन करना उनके लिए अक्षम्य अपराध है, भयंकर पाप है, एक विडम्बना है या यह कहना भी अनुचित न होगा कि उनकी स्थूल दृष्टि उस अव्याहत आर्ष ज्योति तक पहुंच ही नहीं पाती। उन्हें वह दिव्य दृष्टि प्राप्त ही नहीं हुई जो जीवन पर्य्यन्त काल्पनिक सत्य नारायण की ही कथा को भगवान् की कथा मानते रहे और उसी को अपना इष्टदेव मान कर उसी का पाठ मात्र कर के मोक्ष जैसा दुर्लभ परम आनन्द प्राप्त

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

करना चाहते रहे। वहीं उनके लिए अथ और इति है। उससे आगे कुछ भी 'न भूतो न भविष्यति' है। यह प्रवृत्ति इधर विक्रम की ४-५ शताब्दियों से अधिक प्रबल होती हुई दृष्टिगत हो रही है।

ऐसे विज्ञान के युग में भी उनका ज्ञान विकसित नहीं हो सका। आज भी जो पैदल यात्रा कर के रेल गाड़ी में भी खड़े रहकर गंगा जल से भरी कांवर लेकर सुदूर प्रान्तों में नगर, उपनगरों में जाकर उस भोलानाथ शिवशंकर व भोले महादेव पर बड़ी आस्था और विश्वास से भावविभोर होकर उपवास और व्रत रख कर शिव की कृत्रिम प्रतिमा पर जल चढ़ाते हैं उसकी षोडशोपचार पूजा करते हैं यह सब क्रिया शिवरात्रि महापर्व के शुभ अवसर पर अर्धरात्रि के लगभग की जाती है। कहीं-कहीं दिनभर शिव मन्दिरों में अवच्छिन्न-गति से जलधारा प्रवाहित होती रहती है। इसका बड़ा माहात्म्य माना जाता है।

अब विचार करना यह है कि इस समस्त क्रियाकलाप में, रूढ़िगत परम्परा में कितनी वास्तविकता है और क्या ऐतिहासिकता है इसका रहस्य अभी तक भी उन भोले भाले श्रद्धालु परम शैव भक्तों को पुरानी अन्ध परम्परा पर चलने वाले व्यक्तियों को आज भी विदित नहीं हो सका।

आश्चर्य तो यह है कि आज सारा हिन्दू समाज इस भूल भुलइया में पड़ा हुआ है वह सुविज्ञ हो या अनभिज्ञ, साक्षर हो या निरक्षर, किन्तु इस रूढ़िगत परम्परा में सब एक हैं। "अन्धेनैव नीयमानाः यथा-ऽऽन्धाः" इसके उदाहरण बने हुए हैं।

इस शिवरात्रि का एक दूसरा पक्ष भी है और वह यह है कि इसी प्राचीन परम्परा के आधार पर आज से लगभग १३६ वर्ष पूर्व सन् १८४० ई० में मंगलवार को वीर विक्रमादित्य की १९ वीं शती में एक अद्वितीय वेदोद्धारक, आजन्म ब्रह्मचारी, परम सारस्वत, प्रबल सुधारक, वर्तमान प्रजातन्त्र प्रणाली के आविष्कारक सत्यं, शिवं, सुन्दरम् के परम उपासक, ज्ञान ज्योति प्रसारक, युगप्रवर्तक, नव-जीवन दाता, महान् क्रान्ति कारक, परम प्राचीन आर्ष शिक्षा प्रणाली के पुनरुद्धारक, ईश्वर के अनन्य भक्त, क्रान्तद्रष्टा, सन्त देव दयानन्द

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

की दिव्य दृष्टि और उसकी सूझबूझ और मान्यता के आधार पर यह शिवरात्रि का पर्व अपना विशेष महत्त्व रखता है। उसका यह नया स्वरूप हमारे लिए एक नई ज्योति को उदय कर रहा है, एक नवीन आदर्श, एक नया सत्य सिद्धान्त के रूप में प्रदान कर रहा है। इस शिव रात्रि का सम्बन्ध महान् क्रान्तिकारी आदित्य ब्रह्मचारी परम-ऋषि से भी है। वह है १६ वीं शताब्दी का कौपीनधारी महाव्रती तपस्या और त्यागकी साक्षात् मूर्ति, महर्षि दयानन्द सरस्वत।" इनका जन्म सौराष्ट्र (काठियावाड़) के मौर्वी राज्यान्तर्गत टंकारा उपनगर में सन् १८२७ ई० को हुआ था। ये जन्मना औदीच्य ब्राह्मण थे। इनके पिता परम शैव थे—शिव के उपासक थे। उसी परम्परा के आधार पर १४ वर्षीय बालक मूलशंकर को भी पूज्य पिता के आदेशानुसार इसी शिवरात्रि का व्रत और पूजन आदि कुल क्रमागत विधि विधानपूर्वक करने के लिए शिवालय में जाना पड़ा और सत्य शिव की खोजमें तन्मय होकर वह उस समस्त दृश्यको बड़े आदर भाव से रखते रहे। किन्तु अर्द्धरात्रि के पश्चात् सभी उपासक शिव भक्तों को निद्रा देवी ने अपने पार्श में ऐसा बान्धा कि सब पूजा का सामान इधर-उधर अस्त-व्यस्त होता हुआ न देख सके, उसके झोंकों ने सभी भक्त समुदाय को अपनी गोद में सुला लिया और एक अभूतपूर्व आनन्द का सुखपूर्वक रसास्वादन करने लगे।

उन्हें "समाधि सुषुप्तौ ब्रह्मरूपता" का अनुभव होने लगा। किन्तु सच्चे शिव का उपासक एकमात्र आराधक होनहार बालक मूलशंकर इस समस्त क्रिया-कलाप को जा वहां इस काल्पनिक शिव की ब्रह्ममयी प्रतिमा पर हो रहा था, देख कर एक महान् असमञ्जस एवं आश्चर्य में पड़ गया। और बड़ी गम्भीरता से उस सब दृश्य को अपने ज्ञान-चक्षुओं से एकटक देखता रहा और मन ही मन उसकी वास्तविकता पर ऊहापोह करता रहा। पर इस गुत्थी को न सुलझा सका, जितना सोचता था समाधान करता था उतनी ही गांठ पड़ती जा रही थी। कुछ भी समाधान नहीं कर पा रहा था। तब उसने अन्ततः विवश होकर भयभीत होते हुए वास्तविकता को जानने के लिए अपने पूज्य पिताजी को जगाया और उनके सम्मुख वह कौतूहल पूर्ण दृश्य प्रस्तुत किया। पिता जी उसकी शंकाओं का संयुक्तिक समाधान करने में सर्वथा असमर्थ रहे और मेधावी प्रत्युत्पन्नमति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालक को अपने शुष्क सारहीन तर्कों से प्रभावित व सन्तुष्ट नहीं कर सके।

"होनहार बिरवान के होत चीकने पात।" वह उनकी सभी युक्तियों को सुनता रहा। उसी समय उन्हें यह आभास हुआ कि वास्तविक शिव तो कोई और ही है जो इस पाषाणमयी जड़मूर्ति से भिन्न चेतन सत्ता है। यह कैसा शिवशंकर है पशुपति महादेव है त्रैलोक्य-आर्तिहर "हर" है यह तो अपनी रक्षा करने में भी सर्वथा अक्षम है अशक्त है तो यह दीन दुखियों की असहायों की शरणागतों की अपने भक्तों की रक्षा कैसे कर सकेगा। "अन्तरं महदन्तरम्"।

बस इसी सब दृश्य ने, एक मूषक की लीला ने उसकी अटखेलियों ने उसे विवश किया कि वह सत्य शिव की खोज में अपने जीवन को अर्पण कर दे, और वास्तविक शिव के दर्शन करे। "ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन।" उसकी ज्ञानाग्नि ने उसे पिता के थोथे आदेश पालन से सर्वथा मुक्त कर दिया। उसने उसी क्षण संकल्प किया और दृढ़ निश्चय किया कि 'लक्ष्यं वा साधयेयम्, शरीरं वा पातयेयम्" बस पिता माता के समस्त पारिवारिक जनों के मायामोह को त्याग कर सच्चे शिव की खोज में निकलपड़े। यही शिव रात्रि आज की घटना से केवल शिवरात्रि न रहकर दयानन्द बोध रात्रि नाम से सर्वत्र आर्य जगत् में प्रसिद्ध हुई। तभी से इस शिवरात्रि का यह वैदिक स्वरूप आर्य जनता के सामने आया और भ्रान्त जनता को वास्तविक शिव के दर्शन की एक प्रेरणा मिली।

उधर पौराणिक कथानक के आधार पर देवासुर संग्राम के समय समुद्र का मन्थन किया गया और मन्दराचल पर्वत को मन्थन दण्ड बनाया, वासुकि नागकी रस्सी बनाई। इस प्रकार दोनों की सहायता से समुद्र मन्थन हुआ। मन्थनस्वरूप समुद्र से कई रत्न उत्पन्न हुए उनके साथ-साथ अमृत और हलाहल विष भी प्रकट हुआ। उस विष की लपटों से देवता जलने लगे। जब किसी को भी यह साहस नहीं हुआ कि इस हलाहल विष को ग्रहण कर सके, तब सब देव मिलकर शिवजी के पास गये और उनसे प्रार्थना की कि भगवन् इस विष को आप शान्त करें। शिव ने इस प्रार्थना को स्वीकार किया और समुद्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

के मन्थन से निकले हुए उस कालकूट रूप महाविष का पान किया। और देवताओं की तथा समस्त संसार की रक्षा की। विष को पचाने का सामर्थ्य शिव में ही था यह कार्य किसी अन्य के वश का नहीं था। इस हलाहल विष को पीकर और उसे पचा कर ही शिव मृत्युञ्जय कहाए।

इस समुद्र-मन्थन का और विषपान का वास्तविक रहस्य क्या है यह एक पृथक् विषय है इस पर कभी यथावसर पुनः प्रकाश डाला जायगा। ये कथानक काल्पनिक होने पर भी रहस्यपूर्ण हैं पर मानव बुद्धि वहां तक पहुंची नहीं। उधर देव दयानन्द ने भी सच्चे शिव की खोज में अपने जीवन में अनेक वार साक्षात् विषपान किया है शिव का विषपान तो एक कल्पनामात्र है पर ऋषि का विषपान सर्वथा प्रमाणित है और प्रत्यक्ष है। ऋषि ने स्थूल विष के साथ-साथ सूक्ष्म विष का भी पान किया। उन्होंने भी मृत्युञ्जय उपाधि को प्राप्त किया। और समस्त जन मानस को एकवार पुनः अपने खोए हुए वेदामृत को पानकरने को वेदालोक में अपना जीवन निर्माण का सुलभ अवसर प्रदान किया।

उसने भी संसार में प्रचलित कुरीतियों का, तमसाच्छन्न पाखण्ड का, अनेक काल्पनिक मत-मतान्तरों का, संसार में व्याप्त बहु देवता-वाद का, ईश्वर के नाम पर विभिन्न स्वरूपों में अरिणत होने वाले अनेकानेक भगवानों का, जनता के दुःख दारिद्र्य का बड़ी निर्भीकता से सोरस्ताडम् दलन किया, और एक नया वेद का आलोक प्रदान किया उसी को सर्वश्रेष्ठ ज्ञान का आदिस्रोत स्वीकार किया और स्वतः प्रमाण माना।

ऋषि दयानन्द की राष्ट्र को देन—ऋषि दयानन्द सदा सत्य की खोज में लगे रहे वे जीवन भर सत्यपरायण, कर्त्तव्यनिष्ठ, ईश्वर विश्वासी, परम आस्तिक, अनाथ रक्षक, नारी उद्धारक, वेदों के अनन्त भक्त, समाज सुधारक, स्वतन्त्रता के समर्थक, स्वराज्य के प्रबल पोषक, प्राचीन आर्ष शिक्षा प्रणाली के पुनरुद्धारक रहे। उन्होंने समस्त राष्ट्र को एक नया दृष्टिकोण दिया, नया आलोक दिया जो कार्य पूर्ववर्ती महात्मा बुद्ध, आचार्य शंकर और बड़े-बड़े देशभक्त विदेश यात्री भी नहीं कर सके उसके लिए इस वीतराग संन्यासी ने सर्वप्रथम अपनी लेखनी, वाणी तथा अन्य साधनों द्वारा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देश की एकता को पुष्ट किया और विदेशियों के असांस्कृतिक अव्यावहारिक अनैतिकतापूर्ण आक्रमणों को समूल नष्ट कर प्राचीन देशानुसार देशभक्ति, आर्य मर्यादा, आर्य धर्म, आर्यगौरव, वैदिक सभ्यता संस्कृति की उसके उच्चतम सत्य सिद्धान्तों की पुनः प्रतिष्ठा की, उनको जागृत किया। और स्व-भाषा वेश-सभ्यता-संस्कृति आचार, विचार, मर्यादा, आदि की ओर समस्त देशका ध्यान आकृष्ट किया।

प्राचीन रूढ़िगत अन्धविश्वासों का सम्प्रदायों का सप्रमाण युक्तियुक्त निराकरण किया। ईश्वरका वास्तविक स्वरूप और उसका तर्कसंगत लक्षण किया। प्रत्येक सिद्धान्त का, मन्तव्य का वेद की कसौटी पर मन्थन कर के उसकी वास्तविकता की घोषणा की उस पर वैज्ञानिक दृष्टिकोण प्रस्तुत किया प्रचलित माया गुरुडम के ढोंग को समूल नष्ट किया, सच्चे गुरुओं का मार्ग प्रशस्त किया। विना जातिभेद के सर्वसाधारण व्यक्ति को आत्मोन्नति का अवसर प्रदान किया। सामाजिक, धार्मिक, राष्ट्रिय आदि सर्वाङ्गींण उन्नति में पूर्ण योग दान उनका सबसे महत्त्वपूर्ण कार्य है। उन्होंने देश में बढ़ते हुए भ्रष्टाचार, मिथ्याचार, दुराचार अनैतिकता, नास्तिकता आदि सक्रामक दुःसाध्य महारोगों का बड़ी कुशलता के साथ उपचार करते हुए सर्वभूतहित की भावना से उनका प्रबल विरोध किया। उन्होंने रोग का निदान किया ढूंड़ा और तदनुकूल चिकित्सा की। आजो आज इस पुण्य पावन पर्व के सुअवसर पर हम भी कुछ बोध प्राप्त करें और कुछ व्रत ग्रहण करें जिससे देश की रक्षा में समाज-सुधार में अपना सक्रिय योग दे सकें और ऋषि के ऋण से अनृण हो सकें। उसकी भांति हम भी सच्चे शिव के विविधताओं से कल्याण करने वाले प्रभु के परम उपासक होकर उसके पूर्ण विश्वासी और आस्तिक बन कर वेदों का स्वाध्याय करें, कर्तव्यपरायण हों, अपने सदाचरण के, उज्ज्वल चरित्र के द्वारा स्वयं अपना और समस्त देशवासियों का सच्चा पथ प्रदर्शन करते हुए ही भगवान् कृष्ण के इस अमर वाक्य को सर्वथा सार्थक कर सकेंगे, यद्यद्-आचरति श्रेष्ठः, तद्-तद् एव इतरो जनः। स यत् प्रमाणं कुरुते, लोकस्तदनुवर्तते।"

केवल जीवन पर्यन्त दूसरों को ही सम्बोधित न करते रहें उन्हीं को अपने प्रभावशाली प्रवचनों का, ओजस्वी एवं रोचक भाषणों का लक्ष्य न बनाते रहें।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अब समय आ गया है कि उन सब भाषणों का, प्रवचनों का प्रभावशाली ओजस्वी वक्तृताओं का धारावाही उपन्यासों का मुख अपनी ओर करके उन सब का लक्ष्य स्वान्तः को बनाकर उसे अपने जीवन में भी ढालने का सफल प्रयत्न करें जिसे जीवन भर दूसरों में ही ढालने का निष्फल प्रयास करते रहें । इसी दीक्षा व्रत के व्रती बनकर इसी दीक्षा में दीक्षित होकर हम ऋषि का बोध दिवस सार्थक कर सकेंगे तभी—"कृण्वन्तो विश्वमार्यम्" यह परम पावन वैदिक उद्घोष पूर्ण हो सकेगा ।

जब परमेश्वर निराकार, सर्वव्यापक है तब उसकी मूर्त्ति ही नहीं बन सकती और जो मूर्त्ति के दर्शन मात्र से परमेश्वर का स्मरण होवे तो परमेश्वर के बनाये पृथिवी, जल, अग्नि, वायु और वनस्पति आदि अनेक पदार्थ, जिनमें ईश्वर ने अद्भुत रचना की है क्या ऐसी रचना-युक्त पृथिवी पहाड़ आदि परमेश्वर रचित महामूर्त्तियां कि जिन पहाड़ आदि से मनुष्यकृत मूर्तियां बनती हैं, उनको देखकर परमेश्वर का स्मरण नहीं हो सकता ?

—महर्षि दयानन्द

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अरुणोदय

श्री कुसुमाकर आर्यनगर, फीरोजाबाद

देश हत-प्रभ था—
विभा का नहीं लेश जब —
ब्रिटिश—विशाल साम्राज्य भासमान था।
प्रबल प्रचण्ड मार्त्तण्ड आसमान में॥
सारा आर्यावर्त्त पराधीनता पिशाचिनी के—
पंजे में पड़ा हुआ कराह-आह भरता॥
जातियों के जाल में विभिन्नता के पारावत—
बद्ध होके दासता के दाने चुगने लगे॥
घृणित घटाएं घिर आईं वहां चारों ओर।
हो गई थी जागृत अभद्र-भावनाएं भूरि॥
भारतीय सभ्यता का स्रोत हुआ मन्द था।
तूती बोलती थी वहां—
पाधा जी, पुरोहितों की—
देव-मन्दिरों में देव दासियां विराजतीं॥
ईसा-और मूसा की जमात जुड़ने लगी।
मैकाले के काले कारनामे कुत्सित क्रूर—
आर्य-गुण-गरिमा मिटाने कटिबद्ध थे।
'रूप-रंग-रक्त' में भले ही भारतीय होंगे॥
आन्तरिक भाव से बनेंगे सारे पश्चिमी।
अभिरुचि, सम्मति, चरित्र और चिन्तन में—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतीय होंगे यह घोषणा हुई थी यहां ।
नारियां अनादृत दलित शूद्र तुल्य थीं ॥
वासना-विलासी कहते थे पग-जूतियां ।
दीन इस्लाम भी बताता इन्हें खेतियां ॥
विद्या की विभूति से विहीन हुईं देवियां ।
शङ्कर सरीखे महा दिग्गजों की घोषणा—
द्वार नर्क लोक की हमारी पूज्य नारियां ।
मानव समाज में न कोई अधिकार था ॥
नीच-ऊंच भावों से विभाजित स्वदेश था ।
ईश्वरीय वाणी से विमुख हुए नारी-नर—
वेद पढ़ने का अधिकार द्विज मात्र को ।
देश में अविद्या-आसुरी का बोल-बाला था ॥
आर्य-संस्कृति का कलंकित सु-भाल था ।
राष्ट्र-पशुओं का दयनीय दृश्य देखा गया ॥
गाय-वंश ध्वंस था, नृशंसता से चारों ओर ।
नरमेध, पशुमेध, अश्वमेध हो रहे—
'मेध' शब्द की भी थी विचित्र अर्थ योजना ।
पाहि माम्—पाहि माम् की पुकार हो रही ॥
विषम परिस्थिति हुई थी आर्यावर्त्त की ।
देखा अन्तरिक्ष में—
प्रभूत-प्रतिभा का पूत ।
उतर रहा हो नभ मण्डल से कोई दूत ॥
गात में समुद्र आत्म-बल का भरे अकूत ।
शङ्कर सा योगी—
भीम जैसा शक्तिशाली वह—
ब्रह्मचर्य बल में महान् हनुमान, भीष्म ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राम-मर्यादा, कृष्ण जैसा नीतिमान था ।।
शौर्य्यं था शिवा का, देशभक्ति थी प्रताप की ।।
बुद्ध सी विरक्ति, अनुरक्ति त्याग-तप की ।
ऋषि-मुनियों का आत्म ज्ञान आत्मसात् था ।।
बाल-रवि-रूप में अरुण किरणों को लिए—
पीन-तन-सज्जित—
क्षमा का करुणा का वर्म—
सत्य की सिरोही—
निर्भीकता से लेके साथ ।
हुए अवतीर्ण इस पुण्य धरा-धाम पर ।
आए वे गुणों में 'मूलशङ्कर' बने हुए—
किया उद्घोष यह—
'कार्यम् वा साधयेयम्
शरीरम् वा पातयेयम्'
हमको सिखाया—
'कृण्वन्तो विश्वमार्यम्' ।

卐

ईश्वर सदा से है और सदा रहेगा, फिर उसका अवतार कैसे हो सकता है ? वह सर्वव्यापक है, सर्वत्र विद्यमान है फिर उसका अवतार कैसे सम्भव हो सकता है । वह जन्म-मरण के बन्धन से रहित है ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

★ श्री सच्चिदानन्द शास्त्री एम. ए.

शिव-शंकर-महादेव

हिन्दू-मात्र में शिवरात्रि पर्व या शिव तत्त्व की मान्यता जो विद्यमान है वह बहुत कुछ पुराणों पर आधारित है। यदि इस शिव की खोज वैदिक-साहित्य में की जाती, तो वास्तविक शिव का रहस्य और सच्ची शिव पूजा का आधार कुछ और ही होता। महर्षि दयानन्द ने इसी नींव की खोज शिवरात्रि की अर्ध रात्रि की वेला में की थी। भ्रमित मूलशंकर का मूल कैलास-पर्वत बताया गया था। फिर क्या था, उसी की खोज के लिये मूलशंकर—दयानन्द बने और हिमालय की कन्दराओं की खाक छानी। जब सच्चे शिव की प्राप्ति कर ली—तब धरा पर के भोले मानव को सच्चे शिव के स्वरूप का ज्ञान कराया। शिव तत्त्व वेदों के आधार पर क्या है, यह विचारणीय है।

पुराणों में वर्णित शिव

शिव जटाधारी है अतः उसे 'धूर्जटि.' कहते हैं, माथे पर आधा चन्द्र है इसी हेतु उसे उपाधि प्रदान की है 'चन्द्रार्ध चूड़ामणि' की। उसे त्र्यम्बक भी कहते हैं क्योंकि वह तीन नेत्रों वाला है। विष पीकर विषकण्ठादि नामों से जाना जाता है। इसी प्रकार त्रिपुण्ड्रक, भस्मप्रिय, वृषभ-वाहन, अष्ट-मूर्त्ति आदि अनेक विशेषण वाले नामों से पुकार कर पूजते हैं। बिल्व-पत्र तथा गंगाजल चढ़ाकर शिव लिंग की पूजा की जाती है। विद्वन्मण्डल ! यदि भगवान् के नाना विशेषणों वाले 'शिव' की संज्ञा के अनेक अर्थ भी हो सकते हैं, तो यह अनर्थकारी पूजन तथा शिव के स्वरूप का अनर्थ न होना चाहिये था। सच्चा शिव जिसने विश्व को बनाया है वह अपने बनाये तत्त्व से स्वयं भयभीत हो, कुए में छलांग लगाकर छिप जाय और आज तक कुए से निकल कर पुनः अपने स्थान व मन्दिर की शोभा न बढ़ावे ! देश-जाति का पतन इस शिव स्वरूप के न समझने से ही हुआ। वेद क्या आदेश देता है इसका प्रमाण देना अभीष्ट है।

उपर्युक्त शिव के पर्याय या वैकल्पिक पौराणिक नामों का

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाम को भिन्न-भिन्न स्थलों से लेकर नाना अर्थों में उनकी परिणति करके शिव-शंकर महादेव की मूर्त्ति निर्माण कर दी है।

विश्लेषण करना भी उचित है। वह मूल रूप में वैदिक रुद्र के ही

१—शुचि केश

ऋग्वेद के १।४५।६ में शुचि केश शब्द आया है। सायण ने अपने व्याख्या मन्त्र में 'दीप्ति-रूप-केशोपेतम्, शोचन्त-इव ह्य एतस्य समिद्धस्य रश्मयः' तथा उव्बट महोदय ने यजु० १५।३१ इसी विशेषण की महत्ता इस अर्थ में की है कि "शोचन्ति-दीप्यन्ते ज्वालाः केशस्थानीया अस्येति"।

इसी प्रकार "हरिकेश" विशेषण सौराग्नि के लिये ऋग्वेद (३-२-१३) मन्त्र में आया है।

सायण ने 'हरण शीला, हरितवर्णा वा केशाः केशस्थानीयाः प्रकाशमाना दीप्तयो यस्य स सविता' अर्थ किया है। केश अग्नि की ज्वालायें और सूर्य की रश्मियां हैं। चूंकि धुम्रां और अग्नि दोनों ही बल खाती हुई ऊपर को उठती हैं इसी से इसे "कपर्दिन" कहा है।

यजु० १६।२९ में व्युप्तकेश-केशरहित तथा शिपिविष्ट गंजा अर्थ भी किया है। यदि रुद्र को शिव मानें तो यह अर्थ जटाधारी के बिल्कुल विपरीत ठहरता है। रुद्र शिव न होकर अग्नि-अर्थक होता है। क्योंकि, व्युप्त केश, ज्वाला रहित तथा भस्मीभूत स्थिति में है और 'शिपिविष्ट' दावानल के रूप के लिये है जो वनों को भस्मीभूत कर भूमि को गंजा बना देती है। अतः जटाधारी शिव का विशेषण वेद में 'कपर्दिन' से लिया है, यह अग्निरूप रुद्र का विशेषण है। वेद में कपर्द का अर्थ शंख तथा उसमें तीन सिरों पर बल पड़े होने से जटाजूट से प्रतीत होते हैं। अग्नि की प्रज्वलित शिखायें ही केश हैं इसी से 'शोचिष्केश' कहा गया है।

२—चूड़ामणि

रुद्रों का महत्त्वपूर्ण स्थान वैदिक साहित्य में आकाश में भी है अन्तरिक्ष की उपमा घड़े के ठीकरे से दी हैं—भूमि का विषम भाग खप्पड़ के समान दीखता है, अर्धचन्द्र के समान भी प्रतीत होता है। चन्द्रार्धं ह्य अन्तरिक्षमस्मिन्लोके पृथिव्यां अर्धं-अमुष्मिंल्लोके। तथा शतपथ में आता है—६-१-२-२ (यत् कपालमासीत्-तद् अन्त-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रिक्षम् अभवत्' इस प्रकार अन्द्रार्ध शब्द का सही अर्थ न कर शिव के मस्तक पर अर्धचन्द्र विराजमान कर दिया।

३—त्र्यम्बक

महादेव के जिन तीन नेत्रों की चर्चा की गई है वे यजु० ३-५८ के आधार पर हैं।

उस मन्त्र में महीधर ने त्र्यम्बक का अर्थ 'त्रीणि अम्बकानि नेत्राणि यस्य तादृशं देवम्' किया है। किन्तु वैदिक कोष में त्र्यम्बक का अर्थ नेत्र कहीं पर नहीं किया है।

सायण ने—(त्रयाणां-विष्णु-ब्रह्म-रुद्राणां-अम्बकं पितरम्) लिखा है। यहां भाव है कि त्र्यम्बक परमात्मा ही है। (यजु० ३। ३७)में, 'एष ते रुद्र भागः स्वस्रा-अम्बिकया तं जुषस्व' कहा है।

परमात्मा परक अर्थ-'त्रयाणां लोकानां अम्बकः पिता पालयितेति, त्र्यम्बकः' किया जाता है। यजु० ३। ५८ में (अमति एव ज्ञानेन-तद्-अम्बम्-त्रिषु-कालेष्वेकं रसं ज्ञानं तं त्र्यम्बकम्) जो तीनों कालों में एक समान ज्ञान वाला रहता है वह परमात्मा त्रिनेत्र-शिव न होकर त्र्यम्बक परमात्मा ही कहलाता है।

४—विष-कण्ठ

इस नाम की कथा भी बड़ी विचित्र हैं। जब क्षीर-सागर को—देवता और राक्षसों ने मथा तो रत्नों के साथ विष की भी उत्पत्ति हुई। इस विष को पीने को कोई तैयार न हुआ तो शिवजी महाराज ने उसे पीकर कण्ठ में धारण किया। तभी से उनका नाम 'विषकण्ठ' हो गया। वास्तव में विष का अर्थ जल भी है। शैवों ने इसका अर्थ विष कर दिया। ऋग्वेद में स्पष्ट है कि 'केशी-विषस्य पात्रेण यत् रुद्रेणापिबत् सह'।

यहां केशी का अर्थ जटाधारी शिव नहीं, अपितु रश्मि है। सायण ने केशी का अर्थ 'रश्मिभिर्-युक्तः सूर्यः' किया है। यहां विष का अर्थ जल है विभिन्न अर्थों में केशी-रुद्रेण—एक कर्त्ता तथा दूसरा करण साधन है। केशी जटाधारी शिव रुद्र नहीं हो सकता है।

५—नीलकण्ठ

नील कण्ठ शब्द वेद में ६ वार आया है। यजु० १६-७ में 'असौ यो अवसर्पति नीलग्रीवो विलोहितः' यहां उब्बट तथा महीधर ने

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'नील ग्रीवः' का अर्थ आदित्य अथवा रवि के लिये किया है। यजु० १६-२८ में—'नील ग्रीवाय-शिति कण्ठाय, का अर्थ नीले व श्वेत कण्ठ वाले है। साथ ही दोनों विशेषण परस्पर विरोधी होने से शिव के वाचक नहीं हो सकते हैं। महीधर ने 'विष भक्षणेन नीला नीलवर्णा ग्रीवा कण्ठैकदेशो यस्य स नीलग्रीवः' तथा 'शिति कण्ठः श्वेत कण्ठो नीलातिरिक्तः भागो यस्य स शितिकण्ठः' अर्थ किया है। अनेक रुद्रों के लिये भी यही विशेषण यजु० में १६-५६ ५७ पर देखें। कि—

'नीलग्रीवाः शितिकण्ठा दिवं रुद्रा उपश्रिताः'। तथा 'नीलग्रीवा' शितिकण्ठाः शर्वा अधः क्षमाचराः'॥ ये विशेषण नाना प्रकार के रुद्रों द्वारा कीटाणुओं के अर्थ में दिये हैं। अतः शिववाचक न होकर बहुवचन में नाना प्राणियों के लिये यह शब्द प्रयुक्त है।

पार्वती-पति

अम्बिका को पार्वती का पर्याय मानकर शंकर की पत्नी बना दिया। यह अर्थ का अनर्थ वेद विरुद्ध और गर्हित है, जब कि वेद में रुद्र की बहिन कहा है। (यजु० ३।५७) 'एष ते रुद्रभागः सह स्वस्त्राऽम्बिकया' हे रुद्र ! यह तेरा भाग बहिन अम्बिका के साथ है। यहां 'अम्बिका' बहिन के अर्थ में है न कि पार्वती के अर्थ में शैवों ने न जाने पार्वतीपति अर्थ कहां से कर लिया। अम्बिका माता अर्थ में भी है। ऋग्वेद में बहिन-भाई के यौन सम्बन्ध को निषिद्ध पाप कहा है। अतः अम्बिका (पार्वती) को शिव (रुद्र) की पत्नी बनाकर पौराणिकों ने घोर पाप किया है।

चर्माम्बरः वा कृत्तिवासाः

यजुर्वेद में ३-६१ पर 'कृत्तिवासाः' शब्द रुद्र के लिये प्रयुक्त है। उव्वट ने 'चर्म-वसन.' तथा महीधर ने 'चर्माम्बरः' अर्थ किया है। कृत्ति का अर्थ चर्म-त्वचा है किन्तु रुद्र का अर्थ ज्वर है।

जो कि शरीर की त्वचा पर ही प्रकट व अनुभूत होता है। त्वचा को वस्त्र समझ लेना आलंकारिक प्रकरण है। वेदों में महीधर ने चर्म के साथ गज या व्याघ्र का उल्लेख नहीं किया। सम्भवतः शिव का सम्बन्ध रुद्र के 'वैद्युताग्नि' मेघों में जिसका अस्तित्व है, हाथियों के स्वरूप वाले होने से तथा चितकबरे शेर की तरह होने से वैद्युताग्नि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समझ लिया है। वैद्युताग्नि भ्रान्त कल्पना है। मेघों को 'अहि' भी कहा है। इस सम्बन्ध में ऋग्वेद १-३२-१ मन्त्र द्रष्टव्य है। (अहन्न् अहिम् अन्व अपस् ततर्द) इसमें अहि मेघ को नष्ट कर जल को प्रवाहित कर दिया—वर्णन है।

वेद के अहि का अर्थ सर्प समझकर शिव के गले में सर्प डाल दिया। जलधारा को गले के सर्प के रूप में दिखाया गया।

इसी प्रकार पुराणों में शिव को वृषभ-वाहन भी कहा है। नन्दी को शिव का वाहन बताया गया है। किन्तु वेद में वृषभ का अर्थ मेघ कहा है। ऋग् ५-८३-१ में—'कनिक्रदद् वृषभो जीरदानुः' जल्दी वर्षा करने वाला बादल घोर गर्जन करता है। निरुक्त ९-३-३२ (वर्षणाद्-वृषभः) कहा है अर्थात् जो वर्षा करता है वह वृषभ है। यह मेघ ही वृषभ है 'वैद्युताग्नि' का वहन मेघ करता है किन्तु इन पुराणकारों ने वृषभ को शिव की सवारी बना दिया।

इसी प्रकार 'अष्टमूर्त्ति' कहकर शिव को आठमुख वाला माना है। किन्तु शतपथ में प्रसिद्ध आठ नाम दिये हैं जो निम्न हैं— 'तान्येतान्यष्टौ, रुद्रः, शर्वः पशुपतिः, उग्रः, अशनिः, भवः, महान् देवः, ईशानः अग्नि रूपाणि' कहा है।

पूजा-विधान के नाम पर शिवलिंग का महत्त्व भी इसी प्रकार चला जो 'शिश्न' अर्थ में लिया है। पुरुषांग अर्थ लेकर मूर्त्ति लिंगाकार रूप में दे दी है। किन्तु 'ऊर्ध्वो ह्यग्निरदीप्यत, प्रज्वलित अग्नि शिखायें भी ऊंची खड़ी मानी जा सकती हैं। आधुनिक लिंगपूजा को देखकर विदेशीय विद्वानों ने अपना मत अभिव्यक्त किया है कि वेद में 'शिश्न पूजा' का विधान है। ऋग्वेद में ७-२१-५ का उद्धरण—'मा शिश्न देवा अपि गुरु ऋतं नः' दिया है लेकिन 'शिश्न जिनका देवता है' इस प्रमाण में कोई अर्थ नहीं है। इसका अर्थ अब्रह्मचर्याः अर्थात् व्यभिचारी किया है।

अनेक प्रमाणों से सिद्ध है—रुद्र (शिव) अग्नि का नाम है। अग्नि को वेद में 'शचिकेश' कहा है। शचिकेश का पर्याय 'शिश्न' भी है। शतपथ में 'शिश्नं वै शोचिष्केशम्' शिश्न-धर्म और प्रजनन अर्थ में ही अग्नि के ही वाचक हैं। उत्पत्ति तथा जीवन अग्नि द्वारा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उस दौड़-धूप का बड़ा लाभ हुआ। मलशंकर शुद्धचैतन्य बन चुका था। दिया विद्यमान था, उसमें अब तेल व बत्ती भी पड़ चुकी थी, कसर थी एक जलती हुई ज्योति की, जिससे इस दिये की ज्योति प्रज्वलित हो सके। वह जलती ज्योति दयानन्द को मथुरा की एक कुटिया में मिली पुण्यात्मा स्वामी विरजानन्द के रूप में। प्रभु की लीला! बाहर के नेत्र बन्द हैं और भीतर के खुले, उनका प्रकाश उन फटे नेत्रों से झलक रहा था। दयानन्द ने पांव पकड़े। प्रज्ञा चक्षु ने समझ लिया कि सुपात्र है। दयानन्द पर दया आयी, जोत से जोत जल उठी।

जोत जली—खूब जली, अन्धकार ग्रस्त भारत और अन्धकार ग्रस्त भारतवासियों के हृदय में सब प्रकाशमान होने लगा। देश और जाति के भाग्य खुल गये।

इस रात के प्रभाव से एक वार पुन: ज्वलन्त दैवी प्रकाश हुआ, जो न केवल भारत के, अपितु सारे संसार के अविद्यान्धकार और दुःख के विनाश की ओर प्रेरित हुआ।

इस दिन मानवमात्र आर्य को शान्तभाव से आत्मनिरीक्षण करना चाहिये और अपनी त्रुटियों को दूर करने, संघटन को सुदृढ़ बनाने तथा महर्षि के मिशन को पूर्ण करने का व्रत लेना चाहिये।

विशिष्ठ पाठ

महर्षि ने मानव मात्र की उन्नति के लिये यह आवश्यक समझा कि सबके धार्मिक विचार एक से हों और वे विचार सृष्टि नियम बुद्धि तथा वेदज्ञान के अनुकूल होवें। उन्होंने यह भी अनुभव किया कि किसी जाति की राजनीतिक व्यवस्था उसके धार्मिक विचार एवं पारस्पारिक व्यवहार के गठन पर निर्भर रहती है। जिस जाति के धार्मिक विचार ऊंचे हों, जिसका आचार-विचार उत्तम और जिसके पारस्परिक व्यवहार मे सत्य और सौहार्द्र हो, उसकी राजनीतिक व्यवस्था भी ठीक होगी और किसी अन्य जाति को उस पर राज्य करने का साहस न होगा। भारत को उच्च बनाने के लिये प्राय: सभी साधनों का प्रचार किया।

वोधरात्रि में भारत तथा विश्व में महर्षि दयानन्द द्वारा जो जागृति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्पन्न हुई,वह किसी से छिपी हुई नहीं है । यह जागृति सत्यकी जागृति थी । इसरात्रि ने सबसे बड़ा पाठ यह पढ़ाया, कि अन्धविश्वासों को छोड़कर अपनी बुद्धि और ज्ञान से प्रत्येक मानव को काम करना चाहिये । यदि समस्त देशवासी और संसार के लोग यह निश्चय कर लेवें कि जो बात सत्य है उसी को हम मानेंगे और जो बात बुद्धि और ज्ञान के विपरीत है उसको नहीं मानेंगे, तो संसार का दुःख और वैमनस्य बहुत कम हो जाय।

सच्चे शिव की आराधना का यही बड़ा फल होगा । ऋषि की साधना रंग लायेगी—सारा संसार वेदानुयायी बनकर ऋषि की जय-जयकार करेगा ।



परमेश्वर के सब नाम सार्थक तथा परमेश्वर का कोई भी नाम अनर्थक नहीं । जैसे लोक में दरिद्री आदि के धनपति आदि नाम होते हैं । इससे यह सिद्ध हुआ कि कहीं गौणिक, कहीं कार्मिक और कहीं स्वाभाविक अर्थों के वाचक है । "ओ३म्" आदि नाम सार्थक हैं जैसे (ओं० खं०) "अवतीत्योम्, आकाशमिव व्यापकत्वात् खम्। सर्वेभ्यो बृहत्त्वाद् ब्रह्म" रक्षा करने से 'ओ३म्' आकाशवत् व्यापक होने से 'खम्' और सबसे बड़ा होने 'ब्रह्म' ईश्वर का नाम है ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवरात्रि से सच्चे शिव की खोज



● श्री सोमनाथ जी
एडवोकेट सुप्रीमकोर्ट

एक छोटे से चूहे ने—छोटे से बालक में—महान् क्रान्ति के बीज बो दिये। वह मूलशंकर से दयानन्द बनने के लिये लालायित हो घर से निकल पड़ा।

जिस शिव की रात भर पूजा करते हैं उसमें इतनी भी शक्ति नहीं—कि वह अपनी व अपने भोज्य पदार्थ की भी रक्षा कर सके। इस विचार ने ही उसमें क्रान्ति का बीजारोपण किया। एक जिज्ञासा ने नाना प्रश्नों की झड़ी लगा दी और शिव की खोज में शिवालिक तक दौड़ता रहा। समाधि लगाई, जब सच्चे शिव की प्राप्ति कर ली, तभी धारा पर उतरा और झूठे शिव से सच्चे शिव को प्राप्त कराने का एक मात्र उपाय बताया।

यो जागार तम्-ऋचः कामयन्ते। ऋ० ५-४४-१४

मां! आज जागरण कार्य से वेद की ऋचायें मेरी कामना पूरी करेंगी। भगवान् वेद मुझ में विराजेंगे। प्रभु की वाणी वेद, जिसमें पूर्ण ज्ञान भरा है, उसको इस जगती तल पर प्रसारित करूंगा।

मूल्यै जागरणम्॥ यजु० ३०-१७

जागरण में ऐश्वर्य है—मुझे भौतिक ऐश्वर्य नहीं चाहिये। मुझे मोक्ष-प्रदाता साक्षात् शिव की प्राप्ति की ही अभिलाषा है।

आ रात्रि: पार्थिवं रज: पितुरप्रायि धामभि:॥ यजु० ३४-३२

मूलशंकर रात्रि के अन्धकार को देखने लगे, अन्धेरी रात ने पृथ्वी-लोक को भली प्रकार अन्धकार से आच्छादित कर लिया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न यस्याः पारं ददृशे ।। अथर्व० १९-४७-२

जिस अन्धकार का आर-पार कहीं नहीं था, ऐसे अन्धकार में बालक मूलशंकर प्रार्थना करने लगा—कि—

भद्रे पारमशीमहि ।। अथर्व०

हे-रात्रि-महाशिव रात्रि—इस घोर-अज्ञानान्धकार के-पार को प्राप्त करा। भगवान् शंकर ! मैंने आज इस महा शिवरात्रि का व्रत किया था उसका प्रसाद मुझे मिल गया, मैं अब तुम्हारी सत्य स्थिति की साधना करूंगा। ज्ञान नेत्रों को खोले रखूंगा—

हे शिवां रात्रिं त्वां वन्दे ।।

वास्तव में शिवरात्रि भारत की दशा-परिवर्तन का दिन है। उस झूठे शिव का जिसके नाम का पूजन लिंग रूप में किया, उसे भगवान् माना। दुनियां ने ऐसे भगवान् के नाम का तिरस्कार किया, मजाक उड़ाया और ऐसे भगवानों के नाम पर नास्तिकता का जन्म हुआ। या कुछ ऐसे तत्त्व पैदा हुए जिन्होंने इन शिवों को अजायब घर की शोभा बढ़ाने का अनुरोध किया।

वाममार्ग ने जोर पकड़ा, अनाचार फलने-फूलने लगा और लिंग-पूजा के नाम पर भगवानों ने अपना स्थान बना लिया।

परमात्मा—जो दुष्टों को दण्ड देने वाला है—की पूजा छोड़कर पत्थर के बने शिव-लिंग की पूजा प्रचलित करके इन पौराणिकों ने हिन्दू जाति को घोर-अन्धकार में धकेल दिया। आधुनिक लिंग पूजा को भारत में अत्यधिक प्रचलित देखकर ही विदेशी विद्वानों ने वेद के -"शिश्न देवा:" का अर्थ लिंगपूजक कर दिया।

मैकडानल और कीथ के "वैदिक-इन्डक्स, में दास शब्दके सम्बन्ध में लिखाहै कि सम्भवतः वे लिङ्ग-पूजक थे। पाश्चात्य विद्वान् ऋग्वेद (७-२१-५का उद्धरण मा शिश्न देवा: अपि गुरु ऋतं नः) जिसका अर्थ "शिश्न-लिंग, जिनका देवता है करते हैं। पर इस अर्थका उनके पास कोई प्रमाण नहीं। यास्काचार्य, जो प्राचीन निर्वचन कर्त्ता है, ने निरुक्त ४-१९में "शिश्न देवा:" का अर्थ व्यभिचारी-कामी किया है। वास्तव में इसका विग्रह—अब्रह्मचर्याः का विश्लेषण "शिश्नेनोपस्थेन्द्रियेण दीव्यन्ति-क्रीडन्ति इति शिश्नदेवाः" जो लिंग-इन्द्रिय से

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

खेलते हैं जो भोग व कामरत रहते हैं वह हमारे यज्ञ में न आयें।
वेद का भाव इस प्रकार का ही माननीय है।

वेद में अग्नि को "शोचिकेश" भी कहा है ऋग्० १-४-५-६ शोचिकेश का पर्यायवाची शब्द "शिश्न" भी है।

शतपथ में "शिश्नं वै शोचिकेशम्" शिश्न-धर्म का भी पर्यायवाची शब्द है। जो कि अग्नि का धर्म है। इसी प्रकार ऐतरेय में "स यो धर्मस् तच् छिश्नम्" धर्म अग्नि ही है। (धर्मः शिरस्-तद्-अयम्-अग्निः) शिश्न का सम्बन्ध "प्रजनन" अर्थात् सृष्टि-उत्पत्ति पैदाइश करना भी है और प्रजनन का अर्थ भी अग्नि नाम दिया है। तैत्तिरीय १-५-९-१ "प्रजननं हि अग्निः।" इस प्रकार इन समस्त प्रकरणवित् उद्धरणों से सिद्ध है कि शिश्न धर्म और प्रजनन शब्द अग्नि के ही पर्यायवाची माने हैं। इसी 'शिश्न" शब्द को लेकर गुप्तांग अर्थ मान कर शिव-महादेव की मूर्त्ति लिंगाकार बना दी गई है। प्रज्वलित अग्नि की लपटें ऊंची-ऊंची जाकर लिंग को भी ऊर्ध्वाकार खड़ा किया है। "ऊर्ध्वो ह्य अग्निरदीप्यते" जैमिनीय ब्रा० में लिखा है।

इस बातका खण्डन केवल इन समस्त उद्धरणों के द्वारा स्पष्ट तौर पर हो जाता है कि लिंग पूजाका वैदिक वाङ्मय में कहीं भी उल्लेख नहीं मिलता। यह परिपाटी बाद में पुराणों में कथानक जोड़कर अर्थ का अनर्थ किया। हमारी संस्कृति को विकृत कर इतिहास को गंदा किया। यजुर्वेद के अध्याय १६ मन्त्र ४ में स्पष्ट कहा है कि "शिवेन वचसा त्वा गिरिशाच्छा वदामसि ॥ उव्वट विद्वान् ने "गिरौ पर्वते कैलासाख्ये शेते" और महीधर ने "गिरौ कैलासे शेते" लिखा है। गिरि शब्द का अर्थ पर्वत है जो कि वेद में मेघों का पर्यायवाची है।

(१-१०) निघण्टु में तथा ऋग्वेद में (४-१७-३) में "भिनद्-गिरिं शवसा" अर्थात् इन्द्र ने बलपूर्वक गिरि–मेघ को फाड़ डाला।

नाना विद्वान् भाष्यकारों ने न जाने कैसे पृथ्वी पर स्थित कैलास को शिव का निवास बना दिया। वस्तुतः वैद्युताग्नि—रुद्र का वास गिरि—मेघ में है। उच्च स्थानीय हिमालय पर कैलास है तथा गंगा हिमालय से निकलती है। अतः गंगा को शिव के शीर्ष से

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निकल कर गिरती हुई दिखाया है। "गिरि शाच्छा वदामसि" जो कि ऊपर लिखा है कि हे गिरीश ! रुद्र हम आपको शुभवचन से सम्बोधित करते हैं। पर उव्वट महीधर विद्वानों ने कैलासवासी-लिखकर अर्थ का अनर्थ कर दिया। महर्षि ने इन शब्दों को प्रकरण-वित् बताकर उनका अर्थ भी सत्य स्पष्ट कर दिया।

इस प्रकार रुद्र शिव (शिव) अर्थ रुद्र आदित्य के अर्थ ये, रुद्र स्तोता के अर्थ में, रुद्र-मरुत के अर्थ में रुद्र जीवात्मा तथा प्राणों के अर्थ में कहीं ज्वर के अर्थ में प्रयुक्त है। यजु० ३-५८ में—(एष ते रुद्रः भाग सहस्वस्रा-अम्बिकया) इस मन्त्र में ताप और कष्ट पहुंचाने के अर्थ में रुद्र का अर्थ ज्वर कियाहै। स्वामी दयानन्द ने रुद्र का अर्थ (यो रोदयति-शत्रून्-शूरवीर.) किया है।

हमने उस शिव को नाना काल्पनिक नामों से पुकारा है -- जटा-धारी, तीन आंखों वाला—त्र्यम्बक आदि। इन शब्दों को वैदिक साहित्य में भिन्न-भिन्न अर्थों में भी स्पष्ट किया है।

उपर्युक्त संक्षिप्त प्रकरण एकत्र कर ऋषि दयानद ने यह सिद्ध किया है कि शिव नाम परमात्मा का है तथा अन्य अर्थों में भी आया है। और शिव की मूर्त्ति तथा उसके भिन्न-भिन्न नाम, उसकी पत्नी और पुत्र सभी काल्पनिक हैं जो कि आर्य जन मानस को भ्रम में डाल कर मूर्खता व जहालत के साधन हैं। प्रभु की सच्ची पूजा से हटकर पत्थर के वीभत्स लिंगाकार की पूजा चलाकर हिन्दू-वैदिक-धर्म को कलंकित किया गया है। महर्षि ने पवित्र शिव की रात में जागरण कर—सच्चे शिव का—आराधन किया। इस शिव को पाकर स्वयं प्रकाशित हुए और विश्व को प्रकाशित किया। पत्थर के शिव से शिवालिक तक तथा शिवालिक से शिव तक पहुंच गये शिवरात्रि में।

ओ३म्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वामी दयानन्द जी की शिक्षा और कार्य

* श्री बिहारी लाल शास्त्री
बरेली

सन १८५७ का स्वतन्त्रता-संग्राम विफल हो गया था। सन् ५८ में तो अंग्रेजों का शासन पूरे दबदबे के साथ स्थापित हो चुका था। सब भारतीय निराश, परास्त, किं कर्त्तव्य विमूढ़ से हो गये थे। साम्राज्ञी विक्टोरिया की विज्ञप्ति प्रजा में बांटी गयीः—

"अब ईस्ट इण्डिया कम्पनी के हाथ से शासन हमने ले लिया है। अब प्रजा के साथ पक्षपातरहित, न्याययुक्त, माता-पिता के समान दयापूर्ण शासन होगा।"

इसे पढ़कर, सुनकर प्रजा फूली न समायी। मुसलमान नेताओं ने सर सय्यद अहमद के नेतृत्व में पहले ही अंग्रेज शासकों के सामने घुटने टेक दिये थे। अब हिन्दू भी साम्राज्ञी की भक्ति में शिर झुकाने लगे। कवियों ने विक्टोरिया को त्रिजटा का अवतार लिखना प्रारम्भ कर दिया। सब ओर अंग्रेजी शासन का जय जयकार था। यह देखकर अंग्रेजों ने विचारा कि भारत पर शारीरिक विजय तो प्राप्त कर ही ली, अब सांस्कृतिक और मानसिक विजय भी प्राप्त करनी चाहिये, बस फिर क्या था, देशभर में स्कूल, कालेज खुले और पादरी घूमने लगे। हिन्दुओं की धार्मिक भावना नष्ट होने लगी। अपनी संस्कृति, सभ्यता, धर्म और इतिहास को हिन्दू नवयुवक हीन समझने लगे। हिन्दू आत्महीनता के रोग से पूरी तरह ग्रस्त हो गया।

मुसलमानों पर प्रभाव बहुत कम इसलिये पड़ा कि वे अपने मत में बहुत कट्टर होते हैं। परन्तु फिर भी पादरी अमादुद्दीन, पादरी अब्दुल हक आदि उनमें भी बने। पादरी अमादुद्दीन ने तो 'तारीखे मुहम्मदी' और 'उम्महातुल मोमनीय, ये दो किताबें लिखकर इस्लाम की जड़ें ढीली कर दीं।

ऐसी आंधी का समय था जब ऋषि दयानन्द धर्म प्रचार के क्षेत्र में उतरे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहलोल लोदी का समय जबकि एक ब्राह्मण को बादशाह ने जिन्दा ही जलवाकर मार डाला था कि वह हिन्दू और मुसलमान दोनों मतों को समान बताता था। भला कुफ्र और इस्लाम बराबर यह भारी गुनाहहै।

ईस्ट इण्डिया का शासन बंगाल में स्थापित हो जाने पर श्री राजा राममोहन राय ने ईसाई, मुसलमान और हिन्दू सब धर्मों को बराबर कहने का साहस किया। फिर महात्मा गांधी ने भी राजा साहब की ही बात दोहराई पर हिन्दू तो मानते चले गये। मगर ईसाई और मुसलमानों ने न राजा राममोहन राय की बात मानी न महात्मा गांधी की। वे लोग हिन्दू धर्म को निकृष्ट, कुफ्र और असत्य ही कहते रहे। महात्मा गांधी के दाहिने हाथ अली बन्धुओं ने भी हिन्दू धर्म को कुफ्र ही कहा। बस केवल स्वामी दयानन्द ही इस काल में ऐसे हुए कि जिन्होंने घोषणा की कि वैदिक धर्म सर्वोच्च धर्म है, सनातन है, तर्क पूर्ण और बुद्धि संगत है। भारतीय आर्य संस्कृति ही सर्वोत्तम है—

"सा प्रथमा संस्कृतिर्विश्ववारा" (यजुः)

अन्य संस्कृतियां इसकी विकृतियां है। अन्य धर्म, धर्म नहीं केवल मत है।

"वेद एव परो धर्मः।"

धर्म केवल वेदोक्त उपदेश हैं। यह केवल कहा ही नहीं, सत्यार्थ-प्रकाश द्वारा सप्रमाण सिद्ध करके दिखा दिया।

इसका परिणाम हुआ कि शताब्दियों से नीचे झुकी हुई हिन्दू की गर्दन ऊपर उठी। आर्य जाति का स्वधर्माभिमान जीवित हुआ। आर्य जाति की आत्महीनता की भावना आत्म गौरव में बदल गयी। जो विदेशी मत आर्य जाति को समूल मिटाने के स्वप्न देख रहे थे उनके चहरे उतर गये। ऋषि के शास्त्रार्थों से विधर्मी दहल गये। आर्य धर्म में भी जो अन्धविश्वास, गुरुडम और कुरीतियां प्रविष्ट हो गई थीं, स्वामी जी ने उसका घोर खण्डन किया। अब आर्य धर्म स्वस्थ और निर्मल बन गया। स्वार्थरहित निष्पक्ष विद्वान् आर्य समाज में बड़ी रुचि से आने लगे।

हिन्दुओं में भावनात्मक एकता (Emotional Integration) के लिये श्री स्वामी जी ने दार्शनिक एकता पर बल दिया। विधर्मी जन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिन्दुओं पर यह लाञ्छन लगाते थे कि हिन्दू बहुदेवपूजक हैं और हिन्दू सम्प्रदाय स्वयं ऐसी ही भावनाओं का प्रचार करके आपस में भेदभाव बढ़ाते थे। शैव और वैष्णवों का विरोध मिटाने के लिये श्री गोस्वामी तुलसीदास ने भी बड़ा उद्योग किया। शिव, राम के भक्त हैं और राम शिव के पूजक हैं। यह उन्होंने बार बार लिखा। परन्तु दो अस्तित्व पृथक् पृथक् हैं—इस धारणा को वे न हटा सके। परन्तु स्वामी जी ने आर्ष ग्रन्थों को पढ़ा था। वेद का भी सर्वांग पूर्ण अध्ययन उन्होंने किया था। अतः उन्होंने प्रतिपादन किया कि वेदोपनिषद् में केवल एक ही ईश्वर की उपासना का विधान है। इन्द्रादि नाम भी केवल ईश्वर के ही हैं। पृथक् पृथक् देवों का अस्तित्व कहीं नहीं है और आर्ष प्रमाण अपने पक्ष की सिद्धि में प्रस्तुत किये। देखिये कितना स्पष्ट प्रमाण है—

"स ब्रह्मा स विष्णुः स रुद्रस्स शिवस्सोऽक्षरस्स परमः स्वराट् स इन्द्रस्स कालाग्निः स चन्द्रमा" (कैवल्य उपनिषद्) स० प्र० १ समु० आगे वेद मन्त्रों के भी प्रमाण दिये हैं।

दूसरा विरोध था हिन्दुओं में दर्शन शास्त्रों पर। वेदांती अपनी बघारता था नैयायिक के नगाड़े अलग बज रहे थे वैशेषिक की वीणा निराली थी तो सांख्य का शंख अलग गर्जना कर रहा था। मीमांसा का मेल किसी से भी नहीं था। योग की युक्तियां निराली थीं। एक दूसरे के खण्डन में कमर कस कर लगे हुए थे तो ईसाई-मुसलमान मतों के द्वारा किये हुए आक्षेपों के उत्तर कौन देता ? ऋषि दयानन्द ने कहा कि=

"सृष्टि के छः कारण हैं। इनमें से एक-एक की व्याख्या एक-एक शास्त्रकार ने की है। इस लिये इनमें कुछ भी विरोध नहीं हैं।

(स० प्र० ३ समु०)

तीसरा रोग है हिन्दुओं में बिरादरी की छुटाई बड़ाई का। इस नीच ऊंच की भावना के कारण हिन्दू राष्ट्र को अपार हानि पहुँची है। ऋषि दयानन्द ने सप्रमाण सिद्ध कर दिया कि ऊंच, नीच, वर्ण आश्रम गुण कर्मानुसार हैं। बाल विवाह का विरोध कर जाति का बहुत ही हित किया। वैदिक धर्म केवल भारत का नहीं, हिन्दुओं का नहीं किन्तु सार्वभौम धर्म है। इस घोषणा का प्रभाव यह हुआ कि विदेशी मतों को मानकर अपनी राष्ट्रीयता भी जो लोग बदल चुके

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

थे वे लोग आर्य जाति में सम्मिलित होकर पुनः भारतीय राष्ट्रवाद के भक्त बन गये। आर्य समाज ने कई सहस्र आगाखानियों ईसाईयों और अन्य सुन्नी आदिकों को अपने में मिलाया और कई लाख व्यक्तियों को आगाखां के जाल में जाने से रोक दिया। लाखों को ईसाई बनने से रोका और राष्ट्रहित की दृष्टि से यह काम देश के लिये अति उत्तम हुआ। स्वामी जी ने सब ही मतों की आलोचना पक्षरहित होकर करी, क्योंकि उनका लक्ष्य सार्वभौम मानवहित था। देखिये:—

"और जो मत मतान्तर के परस्पर विरुद्ध झगड़े हैं उनको मैं पसन्द नहीं करता क्योंकि इन्हीं मतवालों ने अपने मतों का प्रचार करके मनुष्य को फंसा कर परस्पर शत्रु बना दिया है। इस बात को काट सर्वं सत्य का प्रचार कर सबको ऐक्यमत करा द्वेष छुड़ा परस्पर प्रीति युक्त करा के सब से सबको सुख लाभ पहुंचाने के लिये मेरा प्रयत्न और अभिप्राय है।'

(सत्यार्थ प्रकाश)

श्री स्वामी जी का उपर्युक्त लेख अक्षरशः सत्य है। इन मतवालों ने अपने से अन्य धर्म वालों पर तो अत्याचार किये ही परन्तु आपस में भी घोर हत्याकांड किये। रोमन कैथोलिक ने खुलकर लाखों प्रोटेस्टेन्टों की हत्या की, प्रोटेस्टेन्टों ने लाखों कैथोलिकों को मौत के घाट उतारा। तनक तनक से मतभेद पर पोपों ने निर्दयतापूर्वक सहस्रों की हत्या करा डाली। ईसाईयों का इतिहास पढ़ा तो आश्चर्य होता है। यही दशा मुसलमानों की रही। शियासुन्नियों के संघर्ष में लाखों मुसलमान मारे गये। तैमूर ने लाखों हिन्दुओं की तो हत्या की ही,साथ ही लाखों हिन्दुओं सुन्नीमुसलमानों पर भी डटकर अत्याचार किये। पाकिस्तान में भी शियों की अहमदियों की हत्यायें हुई और अहमदियों की तो पाकिस्तान में अब घोर दुर्दशा हो रही हैं। लखनऊ में भी शियासुन्नियों का संघर्ष मारकाट चलती ही रहती है। इन हत्याओं से केवल आर्य जाति बुद्धिवाद को प्रधानता देती है बौद्धिक खण्डन, मंडन, शास्त्रार्थ होते रहे। खण्डन, मण्डन के अनेक ग्रन्थ लिखे गये। केवल तर्क से काम लिया जाता रहा, तलवार से नहीं। आर्य जाति के सब ही सम्प्रदायों में बुद्धिवाद और आचार को महत्व दिया गया है, केवल विश्वासों पर नहीं।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋषि दयानन्द जिस धर्म को सबको अपनाने के लिये प्रस्तुत करते हैं वह आचारात्मक ही है। ऋषि लिखते हैं--

"सुनो सब लोगो, सत्य भाषण में धर्म है या मिथ्या में ? सब एक स्वर होकर बोले--सत्य भाषण धर्म और असत्य अधर्म हैं। वैसे ही विद्या पढ़ने, ब्रह्मचर्य रखने, पूर्ण युवावस्था में विवाह, सत्संग, पुरुषार्थ, सत्य व्यवहार आदि में धर्म और अविद्या ग्रहण, ब्रह्मचर्य न रखने, व्यभिचार करने, कुसंग, आलस्य, असत्य व्यवहार, छल, कपट, हिंसा, परहानि कर्मों में अधर्म है।"

(सत्यार्थ प्र०—११ समु०)

यहां व्यावहारिक धर्म को स्वामी जी सार्वजनिक बता रहे हैं। वस्तुतः मतवालों और वैदिक धर्म में यह बड़ा अन्तर है। मतवादी लोग सदाचार नैतिकता (Character and Morality) को प्रमुख स्थान नहीं देते। एक दुराचारी भी मसीह पर ईमान लाने से तर सकता है। हजरत मुहम्मद पर विश्वास रखने वाला दुराचारी भी अन्य धर्म वाले सदाचारी से अच्छा है। ऐसी मान्यताओं ने व्यवहारात्मक धर्म को विध्वंसकर डाला परन्तु वैदिक धर्म में--'आचारः परमोधर्मः' सदाचार धर्म की आधार शिला माना गया है।

यह तो हुआ स्वामी जी का धार्मिक सामाजिक विचारों का दिग्दर्शन। अब उनके राजनीतिक विचारों की भी झलक देखियेः=

१—"सृष्टि से लेकर पांच सहस्र वर्षों से पूर्व समय पर्यन्त आर्यों का सार्वभौम चक्रवर्ती अर्थात् भूगोल में सर्वोपरि एकमात्र राज्य था।

२—(मैत्री उप० चक्रवर्ती राजाओं के नाम) इत्दादि प्रमाणों से सिद्ध है कि सृष्टि से लेकर महाभारत पर्यन्त चक्रवर्ती सार्वभौम राजा आर्यकुल में ही हुए थे। (स० प्र० ११ समु०)

३--अब अभाग्योदय और आर्यों के आलस्य प्रमाद, परस्पर के विरोध से अन्य देशों के राज्य करने की कथा ही क्या किन्तु आर्यावर्त में भी आर्यों का अखण्ड, स्वतन्त्र, स्वाधीन निर्भयराज्य नहीं है। जो कुछ है सो भी विदेशियों के पादाक्रांत हो रहा है।

४--"कोई कितना ही करे परन्तु जो स्वदेशीय राज्य होता है वह सर्वोपरि उत्तम होता है। अथवा मतमतान्तर के आग्रह रहित अपने और पराये की पक्षपात शून्य प्रजा पर माता पिता के समान

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृपा, न्याय, और दया के साथ भी विदेशियों का राज्य पूर्ण सुख-दायक नहीं है।" (स. प्र. ८ वां समु.)

ये पंक्तियों देश की पराधीनता पर स्वामी जी की आहें हैं! देश-दशा देखकर दयानन्द का हृदय क्रन्दन कररहा है।

चतुर्थ अनुच्छेद में साम्राज्ञी विक्टोरिया की उस विज्ञप्ति का उत्तर है जो सन् १८५८ में निकली थी कि प्रजा के साथ पक्षपात रहित न्याय किया जायगा। इस विज्ञप्ति पर सभी भारतीय जन सन्तुष्ट थे परन्तु दयानन्द का हृदय सन्तुष्ट नहीं था। उत्तम से उत्तम भी विदेशी शासन शासित देश वासियों में आत्म-हीनता पैदा कर देता है और फिर अत्याचार भी होने लगते हैं। जाति में जड़ता आ जाती है। अतः अत्याचारों के विरोध की शक्ति नहीं रहती। स्वामी दयानन्द की इस विचारधारा का प्रभाव यह हुआ कि स्वामी जी के प्रमुख शिष्य श्री श्याम जी कृष्ण वर्मा ने इंगलैण्ड और फिर फ्रांस में रह कर श्री मदन लाल ढींगरा जैसे अनेक क्रान्तिकारी उत्पन्न कर दिये। पूज्य वीर सावरकर जी भी श्याम जी कृष्ण वर्मा की ही मण्डली के थे।

इधर पूज्य लाला लाजपतराय, सरदार अजीत सिंह आदि अनेक गर्म दल के नेता, पूज्य स्वामी श्रद्धानन्द जी जैसे सर्वस्व त्यागी देश भक्त आर्य समाज ने ही देश को दिये तथा वीर बलिदानियों में सरदार भक्तसिंह, पं० राम प्रसाद बिस्मिल, ठाकुर रोशनसिंह आदि अनेक वीर आर्य समाज से ही प्रकट हुए। केवल मात्र देश में एक ही मुसलमान हुआ है जिसने देश की स्वतन्त्रता के लिये फांसी की रस्सी को गले लगाया—वीर अशफा-कुल्ला खां शाहजहां पुरी। यह देश भक्त वीर पं० रामप्रसाद बिस्मिल के शिष्य थे। पण्डित जी ने ही खानसाहब के विचार बदले थे। विचार बदलने का डाक्टर केवल आर्यसमाज है।

महात्मा गांधी का पुत्र हीरालाल जब अब्दुल्ला बना तो गांधी जी तो सन्तोष कर चुप रह गये किन्तु माता कस्तूरबा को धैर्य बंधाया पण्डित विजय शंकर प्रधान आर्य समाज बम्बई ने। एक मास के भीतर ही अब्दुल्ला को पुनः हीरालाल बना दिया। यदि हीरालाल अब्दुल्ला ही बना रहता तो इस समय भारत में उसकी समाधि बनी हुई होती, और मुसलमानों

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

के साथ-साथ हिन्दू भी उस कबर को पूजते और यह अविद्या-कर्म चालू रहता। कनाडा, मारीशस और अफ्रीका में यहां से गये हुये हिन्दू ईसाई बन रहे थे परन्तु किसी भी नेता को चिन्ता न थी। तब आर्यसमाज के संन्यासी पूज्य स्वामी शंकरानन्द जी ने जाकर वहां शुद्धियां करीं और आगे ईसाई बनने से रोका तथा हिन्दुओं के अनेक कष्ट सरकार से दूर करवाये।

स्वामी जी के स्थापित किए आर्यसमाज ने देश हित, समाज हित और धर्म संशोधन के बड़े-बड़े काम किये हैं पर उनका डंका नहीं पीटा। आज भी स्वामी दयानन्द के विचारों के प्रसार की बड़ी आवश्यकता है ताकि भ्रष्टाचार दूर हो, साम्प्रदायिक विद्वेष नष्ट हो, मानव हित की सद्भावना फैले, अन्धविश्वास दूर हों और इन पद लोलुप नेताओं ने जनहित के बहाने से जो उपद्रव मचा रक्खे हैं, वे नष्ट हों।

एक और भी उत्तम विचार स्वामी जी ने दिया है—आर्यों से पूर्व यहां (भारत में) कोई भी मनुष्य नहीं बसता था। इस देश का नाम आर्यावर्त आर्यों ने ही रक्खा। मानव सृष्टि की उत्पत्ति तिब्बत में हुई और वहीं से आकर मैदान में जो लोग बसे वह आर्य कहलाते थे।

आर्य कोई जाति नहीं थी किन्तु मानव जाति के दो विभाग थे—आर्य धार्मिक, व्रती (सदाचारी) और दस्यु अव्रती (सदाचारहीन)।

"आर्य लोग बाहर से आये और यहां के निवासियों को मार कर दक्षिण की ओर खदेड़ दिया आदि" इस मिथ्या प्रचार ने जो अंग्रेजों के अपने हित के लिये था, आज देश में हिन्दुओं में फूट फैला दी है। द्रमुक (द्रविड़ संघ) और 'हिन्द ऐतरेय ब्रह्मण' की कथा है कि विश्वामित्र से जो शिष्य पढ़ना, लिखना छोड़ कर भाग गये वे द्रविड़ आदि हैं। द्रविड़ दौड़ा हुआ अर्थात् जो गुरुकुल छोड़ कर दौड़ गया चला गया। वास्तव में यह भेद नस्ल जाति या 'रेस' का नहीं है। अतः पूरे भारत की जाति एक है—आर्य।

आर्य समाज की अगली शताब्दी में भी धूम के साथ बहुत काम करना है ताकि हमारा स्वराज्य सुराज बने और अन्य देशों से भी हमारा सांस्कृतिक भाईचारा बढ़े।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवरात्रि

विमलचन्द 'विमलेश'

मास फाल्गुन, काली रजनी, मौन खड़ी मदहीना ।
थी शिवरात, किन्तु चुपके से, किसे अमर रस पीना ।।

कभी-कभी निर्जन कंटक पथ, सुमन माल बन जाता ।
कभी काल की कोठरियां, बन जातीं राज प्रदाता ।।

कभी दुःख की भीषण वेला, भी मुसका जाती है ।
कभी-कभी मंजिल राही के, पास खिची आती है ।।

कभी-कभी अभिशापों में, वरदान हाथ लग जाते ।
कभी गरल से परिपूरित, प्याले अमृत बन जाते ।।

कहा पिता नेः—तुम्हें मूल ! शंकर का व्रत रखना है ।
निराहार दिन भर रह, मन्दिर सांझ हुए चलना है ।।

मन्त्रोच्चारण कर शिव पर, शुभ बिल्व चढ़ाने होंगे ।
भोले शंकर ! शिवशंकर को, श्लोक सुनाने होंगे ।।

था किशोर पर मूल हृदय में, विशेष अभिलाषा थी ।
भूखा रह, जगकर शिवदर्शन, पाने की आशा थी ।।

द्वार खुला मन्दिर का, टन, टन, टन घण्टे बजते थे ।
लिंग रूप धर भोले शंकर, भक्त रटन सुनते थे ।।

पहने रेशम की धोती, पण्डित, पूजक बैठे थे ।
हिल-हिल कर गाते, पढ़ते, लिखते अपलक बैठे थे ।।

पर ये सब जर्जरित पुजारी, जिन्हें न कोई आशा ।
जय शंकर, जय हर-हर, इनकी पूजा की परिभाषा ।।

घुटे घुटाये सिर जिन पर, चोटी हिलती जाती थी ।
हर शंकर स्वर पर कर की, माला फिरती जाती थी ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ले कोई इच्छा विवाह की, मन्दिर अन्दर आया।
मुझे पुत्र दो, किसी भक्त के, अन्तर ने यह गाया॥

मुझे न सन्तति चाह मुझे, कुछ धन प्रदान कर देना।
कोई कहता था—शंकर, कैलाश वास दे देना॥

इस प्रकार निष्काम भक्ति के, नारे मन्दिर में थे।
वर्षों से आते जाते, शिव प्यारे मन्दिर में थे॥

भक्त भावना देख देख, दीपक माला हंसती थी।
स्नेह जलाती जाती, यह, बालक से कुछ कहती थी॥

भोले बालक! तुझे विश्व का, प्रिय शंकर बनना है।
युग निर्माता, न्याय विधाता, विद्वद्वर बनना है॥

तू देगा आनन्द किन्तु जग, तुझे गालियां देगा।
तू देगा अमरत्व, जहर से, भरी प्यालियां देगा!!

बाल मूल शंकर! जीवन के, पथ पर हंसना सीखो।
अन्तस्तल की ज्योति जगाकर,क्षण-क्षण खिलना सीखो॥

अब हम सब बुझ रहे, किन्तु, यह तुमसे मूक निवेदनः—
अन्धकार से बन्धे विश्व के, खोल फकना बन्धन॥

दीपक कुछ बढ़ गये, निशा के, दो पद बीत चुके थे।
भक्त सो गये, उनकी पूजा, के घट रीत चुके थे॥

अन्धकार बिखरा, शिवमन्दिर, नीरवता ने घेरा।
किन्तु मूल के मन-मन्दिर में, था दर्शन का डेरा॥

आती नींद, मूल मुख को, शीतल जल से धोता था।
पांव थक गये, किन्तु अधर, युग'दर्शन दो' कहता था॥

बैठा मौन प्रतीक्ष्य, शिव-शकर पर मूषक आये।
पान पुष्प नैवेद्य बिल्व सब उछल कूद कर खाये॥

बालक मन में विचारता था:—क्या यह सब सपना है?
अथवा हमसे अधिक देव का, कोई प्रिय अपना है॥

मूषक गण ने शिव पिंडी की, सामग्री खा डाली।
तो भी जागे नहीं देव, शिव प्रलयंकर बलशाली॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिशु अन्तर में पुनः प्रश्न थे, क्या यह शिवशंकर हैं ?
जग पर छाने वाला जिसका, भीषण तेज प्रखर है ॥

बालक हृदय कह रहा—जिसने, शिर से गंग बहा दी ।
जिसके तीजे लोचन ने, अनहोनी प्रलय मचा दी ॥

क्या यह वह शंकर त्रिशूल, धारण करता अपने कर ।
क्या यह वह शंकर कहलाता, भक्तों का संकट हर ॥

बैल बना वाहन जिसका, क्या यह भगवान वही है ।
क्या गणेश का पिता, अचल-तनया का प्राण यही है ?

भक्तों के रक्षक ! अब कैसे, रक्षा कर पाओगे ।
निज भक्तों में अमर समर की, शिक्षा भर पाओगे ॥

तज शंकर का अर्चन सोते, अपने पिता जगाये ।
मूल हृदय के भाव प्रबल, धारा बन कर आये ॥

जो शंकर दो मूषक निज, तन से न हटा पायेगा ।
पिता ! झूठ कैसे भक्तों के, क्लेश मिटा पायेगा ॥

पिता ! बता दो वह मेरा, प्यारा भगवान् कहां है ?
पिता बता दो असुर नाश, भयहरण, महान कहां है ॥

पिता कहां वह जटा-जूट, जिसकी पवनाशन माला ।
पिता कहां जिसने सहर्ष, सब कालकूट पी डाला ॥

कहा पिता ने भोले बालक, यह भगवान् नहीं है ।
साँपों की माला वाला, शिव शम्भु महान् नहीं है ॥

यह उनकी प्रतिमूर्ति भावनाओं का केन्द्र हमारा ।
उन तक कोई जा न सका, सब जग पच-पच थक हारा ॥

मैं उनके दर्शन लूंगा, अपना सर्वस्व लुटाकर ।
मैं उन तक जा पहुंचूंगा, प्राणों की होड़ लगाकर ॥

लघु तिनका भी वायु वेग से, पेड़ लांघ जाता है ।
तिल-तिल जलता दीपक, जग को राह दिखा जाता है ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लगी लगन ऊंचे हिमगिरि के, शृंग चूम लेती है।
लगी लगन जाते रोगी के, प्राण थाम लेती है ॥

लगी लगन यदि, पानी में, भारी पत्थर तर जाते।
लगी लगन यदि ऊसर पर,सर, सरिता जल भर जाते ॥

लगी लगन अन्दर भीतर, क्या शंकर नहीं मिलेगा ?
बालक ! तेरा नन्हा बेड़ा, सागर पार करेगा ॥

बीत गई शिवरात किन्तु, जग को प्रकाश दे डाला।
बीत गई वह बात किन्तु, इतिहास अमर कर डाला ॥

गई निशा काली-काली, जग की कालिमा मिटाकर।
बीत गया दिन भारत को, अनहोना पाठ पढ़ाकर ॥

आना, चौदस के दिन आना, युग-युग आते जाना।
अपने प्रकाश से जग का, अज्ञान मिटाते जाना ॥

('ऋषिगाथा' महाकाव्य से)

[कवि के रूप में भारत की भावी आशा श्री विमलेश ने १९वीं सदी के महान् क्रान्तिकारी युग प्रवर्तक महर्षि दयानन्द के जीवन को जिस योग्यता से 'ऋषिगाथा' के रूप में रखा है, उससे आर्य जगत् के प्रचार क्षेत्र में एक अद्वितीय क्रान्ति होने की सम्भावना है।

—सम्पादक]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवरात्रि और मानव

पं० श्यामसुन्दर स्नातक महोपदेशक
(आर्य समाज नैरोबी, कीनिया अफ्रीका)

शिवरात्रि आज ही नहीं अतीत काल से यह रात आती है पर कभी किसी को आत्मबोध न करा सकी। चूहे को प्रतिदिन घरों में घूमते-फिरते देखते हैं पर पिण्डी पत्थर की ही क्या—सभी सामान जड़ पिण्डी ही है, पर खाने-पीने की वस्तु ने भी सद्-ज्ञान का प्रदर्शन नहीं किया।

मूलशंकर को दयानन्द बनाने की अमर जिज्ञासा जगाई—पत्थर के शिव पर चढ़े चूहे ने। हृदय मन्दिर के कपाट खुले—सोचा चलो चलें प्रकाश पाने, दर-दर ठोकरें खाई पर हिम्मत नहीं हारी। गुरु को शिष्य तथा शिष्य को गुरु चाहिये था। अकस्मात् दोनों का साक्षात्कार हो गया दीप से दीप जल गया और मिट गया अज्ञान का अन्धकार। सिखाई सच्चे शिव की उपासना—

नमः शम्भवाय च मयोभवाय च
नमः शंकराय च मयस्कराय च।
नमः शिवाय च शिवतराय च॥

शिव शंकर महादेव को भांग धतूरा, सर्पों वाला, जटाओं वाला, धूर्जटी तीन आंखों वाला बताकर भौतिक अर्थों का दिग्दर्शन तो कराया। पर वैदिक वाङ्मय का अन्वेषण नहीं किया। यही कारण था कि दयानन्द बदला दुनिया में हलचल मची, जग बदला, सत्य अर्थ का प्रकाश हुआ। नाना मत पत्थों को सोचने के लिये पोथे पलटने पड़े। शास्त्रार्थ किये, अनार्ष ग्रन्थों का परित्याग कर आर्ष प्रणाली का प्रतिपादन किया। वेदों को स्वतः प्रमाण बताकर बड़े-बड़े विद्वानों का मान मर्दन कर सही दिशा दी। वेद गड़रियों के गीत हैं इसका खण्डन कर विश्व के विद्वानों को वेद का महत्त्व बताया, बस फिर क्या था धार्मिक तथा वैज्ञानिक मानव में चेतना आई और बड़े २ महा-पुरुष एक स्वर में दयानन्द का लोहा मान कर उनके अनुयायी बने।

विश्व बहुत तेजी से बदल रहा है। धार्मिक और वैज्ञानिक दोनों प्रकार की मान्यताएं पिछले पचास (५०) वर्षों में बहुत तेजी से

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बदली हैं। जहां कट्टरतम धार्मिक रूढ़ियां शिथिल हुई हैं वहां पाश्चात्य विचारधाराएं, जो सृष्टि जन्म व आत्मा से सम्बन्धित थीं, भी प्रगति की ओर अग्रसर हुई। इसमें कोई सन्देह नहीं कि वैज्ञानिक मानबिन्दु अनन्त को छू गये हैं और इस शताब्दी ने विश्व की अनन्यतम सेवा विज्ञान द्वारा की है परन्तु एक बात स्पष्ट है कि आज का मानव बावजूद–इसके कि वह समय के प्रवाह से पूर्णतः लाभान्वित है—घोर अशान्त है। पाश्चात्य शिक्षा व सभ्यता से ओत-प्रोत आज का नवयुवक शान्ति, योग, व स्वच्छ वातावरण की तलाश में सम्पूर्ण दिशाओं से पूर्व की ओर आशा लगाए हुए है। यह विचार लेखनीबद्ध करते समय मुझे एक आंखों देखी घटना स्मरण हो आई है बात १९६२ के आस-पास की है अम्बाला छावनी में जयन्ती के उपलक्ष में यजुर्वेद पारायण यज्ञ हो रहा था। श्री पं० मुनीश्वर देव जी महोपदेशक और मैं दोनों मिलकर यज्ञ सम्पन्न करवा रहे थे—पूर्णाहुति का दिन आया एक विशेष अतिथि के दर्शन हुए यज्ञ वेदी पर अतिथि महोदय थे मान्य डाक्टर मार्कस-अमेरिका निवासी। वातावरण शान्त एवं स्तब्ध था। अधिकारी-वर्ग ने उनसे विचार प्रकट करने की प्रार्थना की। हिन्दी न जानने की स्थिति में वे अंग्रेजी में बोले—अनुवाद कर रही थीं आर्य कालेज की प्रिंसिपल कुमारी शान्ता (श्री प० भीम सेनजी विद्यालंकार की बेटी जो उस समय अविवाहित थीं)। वे बोले—मैं अमेरिका से आया हूं जगह-जगह पर लोग मुझ से पूछते हैं डाक्टर मार्कस ? अमेरीका जैसे सम्पन्न, और विज्ञानोन्नत देश को छोड़कर क्या अतिरिक्त पाने के लिए यहां आये हैं ? बात यह है जैसी पर्वत-मालायें यहां हैं हमारे यहां भी हैं जैसी नदियां, झील, झरने यहां हैं ऐसे ही अमेरिका में भी है—मैं एक सद्गृहस्थी हूँ, पत्नी व बाल बच्चों वाला हूं, बहरे कानों के सुनने का यन्त्र बनाता हूं महीने में १० दिन कार्य करता हूं और मास भर की आजीविका अर्जित कर लेता हूं इन सबके होते हुए भी ये अमेरिका की वैभव महिमा व पारिवारिक सुख गरिमा मुझे शान्ति प्रदान नहीं कर सके मानसिक शान्ति की खोज में अपने मित्रों के परामर्श से मैं प्राचीन सभ्यता के आदि स्रोत इस भारत में आया हूं। यहां आकर गुरुकुल कांगड़ी (हरिद्वार) में बड़े-बड़े अशान्त हृदयों में शान्ति स्थापना करने वाले उपनिषदों की मैंने शरण ग्रहण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

की है। यह एक महान् ध्येय है। महान् ही मार्ग है। महान् ही कार्य है। यह जन्म इसके लिए कम है। वैदिक साहित्य को ठीक प्रकार से समझने के लिए संस्कृत भाषा का अध्ययन अनिवार्य सा प्रतीत होता है। अब तो दो ही इच्छाएं हैं। एक तो संस्कृत का अभ्यास करके उपनिषदों का अंग्रेजी में अनुवाद करूं जिससे और भी मेरे सदृश अशान्त व्यक्तियों को शान्ति मिले। दूसरी इच्छा यह है कि वेदों के सार गर्भित तत्त्व की प्राप्ति के लिए मेरा आगामी जन्म इसी धरती पर हो—डा० मार्कस के मथित विचारों ने अनायास ही श्रोताओं की आंखों में आंसू ला दिये।

कार्यक्रम के अन्त में चलते समय उन्होंने जब अपनी डायरी के दो पन्नों पर अंग्रेजी में लिखी दो उत्तम सूक्तियां दिखाईं तो सबका हर्षोल्लास से दिल भर आया। वे थीं—

ओम् अपाणि पादो जवनो ग्रहीता पश्यत्यचक्षु स शृणोत्यकर्णः।
स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्रयं पुरुषं प्रमाणम्॥

दूसरा श्लोक था गीता का

आपूर्यमाणं अचल प्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्।
तद्वत् कामाः यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी
अस्तु॥

वर्त्तमान उत्तेजक वातावरण से सम्पन्न लाखों आत्माएं (मनुष्य) मानसिक शान्ति के निमित्त भटक रही है जिन्हें कि आहार शुद्धि, अपरिग्रह, और ईश्वर विश्वास की दीक्षा देकर सन्मार्ग दिखाना है।

विशेष बात है—आर्यसमाज शताब्दी के बाद अब कुछ स्वयंसेवी निःस्वार्थ व अनुभवी विद्वान् आर्यसमाज के मूलभूत मन्तव्यों के प्रचारार्थ बाहर आयें, वे अंग्रेजी के माध्यम से विचार-प्रसारण का दायित्व निभाने में सक्षम होने चाहिएं।

यह कार्य यदि सार्वदेशिक आय प्रतिनिधि सभा के निर्देशन में चरितार्थ हो तो अत्युत्तम है। अब आज के वातावरण में कई प्रमुख समस्याएं उभर कर आई हैं जिनका समाधान व उपाय अपेक्षित है। वस्तुतः आर्यसमाज ही अपने परिमार्जित कलेवर में देशोय और अन्तर्देशीय समस्याओं का हल खोज सकता है।

卐

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपराजेय ! उठो आर्यो ! फिर

श्री राधेश्याम आर्य, वलीपुर, सुलतानपुर (उ० प्र०)

एक शदी पहले भूतल पर,
हुआ अवस्थित आर्यसमाज।
क़ण कण में नव आभा जागी,
सजा मनुजता का शुचि साज।

ऋषिवर दयानन्द ने निर्भय,
किया सुघोषित शंख निनाद।
कांप उठा धरती पर फैला.
दानवता का तत्व, विषाद।

हिमगिरि के उत्तुंग शिखर से,
मुखरित हुआ पुनः उद्गीथ।
स्वर्णिम उषा लगी मुस्काने,
अवसादित हो गयी निशीथ।

भू पर बिखरा निर्भय होकर,
नव जागृति का स्पन्दन।
ली अंगड़ाई नूतन युग ने,
जाग उठा जग का जन जन।

लाखों वर्ष पुरातन संस्कृति,
लेने लगी पुनः अंगड़ाई।
नव्य चेतन की गरिमा से,
जाग उठी भारत तरुणाई।

वैदिक सूर्य उगा धरती पर,
फैला स्वर्णिम दिव्यालोक।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुग्ध महीतल हुआ सहर्षित,
वैदिक-धर्म सुतत्व विलोक ।

हिले सभी गढ़ पाखण्डों के,
हुआ प्रकम्पित धर्माडम्बर ।
वेद भानु की प्रखर रश्मि से,
हुआ प्रकाशित अवनी अम्बर ।

तिमिर भगा, नव खिलीं रश्मियां,
महिमण्डल पर ज्योतिष्मान् ।
मानवता के शुभ पटल पर,
उदित हुआ, मधु भरा विहान ।

दीन, अनाथों, विधवाओं को,
सत्वर मिला, सुकोमल त्राण ।
भारत मां के जर्जर तन को,
फिर से मिला नवलतम प्राण ।

स्वच्छ समाज हुआ, संस्कृति भी,
लेने लगी नवल उन्मेष ।
'कृण्वन्तो विश्वमार्यम्' से,
गूंज उठा प्यारा स्वदेश ।

स्वतन्त्रता की वलिवेदी पर,
लाखों शीश लगे चढ़ने ।
जाति पांति के, छुआछूत के,
दानव सहस लगे भगने ।

डंका बजा पुनः वेदों का,
विश्वजयी उद्घोष हुआ ।
शक्ति अपरिमित आर्य जनों,
में जगी, नया जयघोष हुआ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपराजेय ! उठो आर्यो ! फिर,
स्वप्न अभी ऋषि के अवशेष ।
हरना है अज्ञान तिमिर, जो,
फैला भू पर अभी विशेष ।

सारे जग को आर्य बनानें,
का लें हम पावन संकल्प ।
मानवता की रक्षा का है,
बचा न कोई अन्य विकल्प ।

सुख, समृद्धि, सफलता के शुचि,
स्वर धरती पर लहराएं ।
शान्ति तथा आनन्द घने घन,
भू पर अमृत रस बरसाएं ।

शुचिर शताब्दी के अवसर पर,
व्रत ले फिर से आर्यसमाज ।
अन्तिम श्वासों तक रक्खेंगे,
धर्म तथा वेदों की लाज ।

दयानन्द के सैनिक बन कर,
भू को स्वर्ग बनायेंगे ।
जाग्रत सी नव ज्योति धरा.
पर, जगमग आज जगायेंगे ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिव का स्वरूप

—प्रेमचन्द्र शास्त्री

महर्षि दयानन्द सरस्वती ने अपने अमर ग्रन्थ 'सत्यार्थ प्रकाश' के प्रथम समुल्लास में ईश्वर विषय का व्याख्यान करते हुए ईश्वर के एक सौ नामों का विवरण दिया है। वहां 'शिव' का विवरण भी है। स्वामी जी लिखते हैं कि–शिवु कल्याणे धातु से शिव शब्द बना है और शं कल्याणं सुखं वा करोति—इति शंकरः। अर्थात् शिव और शंकर ये दोनों नाम कल्याण करने वाले परमेश्वर के नाम हैं। स्वामी जी महाराज ने प्रथम समुल्लास में अपना यह मत अभिव्यक्त किया है कि एक परमेश्वर के ही उसके अनेक गुणों के कारण तत्तद्-गुणवाची अनेक नाम हैं। जैसे कि सबसे बड़ा होने के कारण ब्रह्मा, सर्वव्यापक होने के कारण विष्णु, और सबका कल्याण करने वाला होने के कारण शिव वा शंकर भी उसी एक परमेश्वर के नाम हैं। परमात्मा वस्तुतः एक है, किन्तु उसके अनेक गुणों के कारण विप्रों ने उसके बहुत प्रकार के नाम रख दिये हैं।

हम प्रतिदिन प्रातः सायं ब्रह्मयज्ञ करते हुए अन्त में परमेश्वर का नमन करते हैं तो कहते हैं कि—

> ओ३म् नमः शंभवाय च मयोभवाय च,
> नमः शंकराय च मयस्कराय च,
> नमः शिवाय च शिवतराय च ॥

इस मन्त्र द्वारा परमेश्वर को नमस्कार किया गया है और यहां परमेश्वर के जो-जो नाम आए हैं, वे सभी 'कल्याणकारक' अर्थ का बोध कराते हैं। इस मन्त्र में परमेश्वर के 'शिव' और 'शिवतर' नाम भी हैं, इनका अर्थ भी कल्याण करने वाला परमेश्वर है।

इसी प्रकार वेदादि शास्त्रों के अन्य भी अनेक प्रमाण उद्धृत

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किए जा सकते हैं जहां 'शिव' कल्याण करने वाले परमेश्वर का नाम है।

महाकवि कालिदास ने अपने प्रसिद्ध महाकाव्य रघुवंश के ५ वें सर्ग के ८ वें श्लोक में कहा है –"शिवानि वस्तीर्थजलानि कच्चित्" यहां भी तीर्थ के जलों को कल्याणकारी कहने के प्रयोजन से 'शिव' शब्द का प्रयोग किया गया है।

हमने इस जिज्ञासा से कि सम्भव है कि 'शिव' शब्द का कुछ अन्य भी शब्दार्थ मिल जाए—संस्कृत के कई कोश उठा कर देखे तो उनमें भी 'शिव' का अर्थ 'कल्याण करने वाला' ही पाया।

इन सबसे यह जाना गया कि परमेश्वर जब संसार का कल्याण करता है, तब उस का नाम 'शिव' होता है।

परमात्मा का सर्वश्रेष्ठ नाम 'ओम्' है। उसी परमात्मा का नाम 'सच्चिदानन्द' भी है। ब्रह्मा, विष्णु और शिव भी उसी परमात्मा को कहते हैं। सृष्टि की उत्पत्ति, स्थिति और प्रलय करने वाला वही एक मात्र परमेश्वर है। इन सबका परस्पर समन्वय किस प्रकार होता है, जरा इसे देखिये:—

ओम् के तीन अक्षर हैं–अ, उ और म्। अ का उच्चारण स्थान कण्ठ है, जब अ का उच्चारण किया जाता है तब हमारा कण्ठ पूरा खुला रहता है अर्थात् मानो सृष्टि की उत्पत्ति हुई, उ का उच्चारण स्थान ओष्ठ हैं, जब उ का उच्चारण किया जाता है तब हमारे ओष्ठ मिलने की ओर जाते हैं किन्तु खुले भी रहते हैं अर्थात् मानो सृष्टि की स्थिति है। और म् का उच्चारण स्थान भी ओष्ठ ही है। जब म् का उच्चारण किया जाता है तब हमारे दोनों ओष्ठ परस्पर मिल जाते है अर्थात् मानो यह सृष्टि की प्रलयावस्था है।

सच्चिदानन्द शब्द में तीन शब्द समाविष्ट हैं—सत्, चित् और आनन्द। सत् का अर्थ है होना–सत्ता अर्थात् सृष्टि की उत्पत्ति, चित् का अर्थ है ज्ञान अर्थात् सृष्टि की स्थिति और आनन्द का अर्थ है सुख–दुःख का अभाव अर्थात् सृष्टि की प्रलयावस्था, जब प्रलय हो जाती है, तब आनन्द ही आनन्द होता है।

ब्रह्मा का अर्थ सब से बड़ा है, वह सृष्टि की उत्पत्ति करने वाला है, विष्णु का अर्थ सर्व व्यापक है, वह सृष्टि की स्थिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बनाए रखता है और शिव का अर्थ कल्याण करने वाला है, को सृष्टि का प्रलय करता है। जब प्रलय होता है तब उस अवस्था में सब का कल्याण ही कल्याण अर्थात् आनन्द ही आनन्द होता है।

इस प्रकार ओम्, सच्चिदानन्द, ब्रह्मा, विष्णु, शिव—ये सब उसी एक परमात्मा के नाम हैं। शिव का स्वरूप सब का कल्याण करने वाला और सृष्टि का प्रलय कर आनन्द ही आनन्द बरसाने वाला है।

हमें ज्ञात हो गया है कि शिव परमेश्वर का वह गुण वा शक्ति है जो सबका कल्याण करने वाली है।

प्रसिद्ध सन्त महाकवि तुलसीदास जी ने अपने 'रामचरितमानस' में शिव का अनोखा स्वरूप दर्शाया है। अपने ग्रन्थ में उन्होंने शिव और पार्वती के विवाह का प्रकरण लिखते हुए शिव का बड़ा मनोरंजक स्वरूप लिखा हैं। जब शिव अपनी बारात लेकर पार्वती के घर जाने लगे, उस समय शिव के गणों ने उसका किस प्रकार बनाव-सिंगार किया—यह तुलसी दास जी के शब्दों में ही देखिगे-

सिवहि संभुगन करहिं सिंगारा, जटा मुकुट अहि मौरु संवारा।
कुंडल कंकन पहिरे व्याला, तन विभूति पट केहरि छाला॥
ससि ललाट सुन्दर सिर गंगा, नयन तीनि उपवीत भुजंगा॥
गरल कण्ठ उर नर सिर माला, असिव वेष सिवधाम कृपाला॥
कर त्रिसूल अरु डमरू बिराजा, चले बसहं चढ़ि बाजहिं बाजा॥
देखि सिवहि सुरत्रिय मुसुकाहीं, वर लायक दुलहिनि जग नाहीं॥

उस समय शिव के गणों ने शिव का सिंगार इस प्रकार किया कि उसकी जटाओं का मुकुट बनाया और उस पर सांप का मौर सजा दिया। उसे कुंडल और कंकण के स्थान पर सर्प पहिनाए गए, सारे शरीर पर भस्म रमाई गई और पहनने के लिए वस्त्रों की जगह मृग छाला दी गई। मस्तक पर चन्द्रमा और सिर पर गंगा सुशोभित थी। शिव के तीन नेत्र थे और यज्ञोपवीत के रूप में भी भुजंग थे। कण्ठ विषपान के कारण नीलवर्ण था और उसमें नर मुण्डों की माला धारण कराई गई। उस समय शिव का वेष अशुभ था किन्तु तथापि वह कल्याण के धाम और सब पर कृपा करने वाले थे। उनके हाथ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

में त्रिशूल और डमरू विराजमान थे। शिवजी वृषभ पर चढ़कर चले और बाजे बजने लगे। शिवजी का यह स्वरूप देखकर देवताओं की स्त्रियां मुसकरानेलगीं और बोलीं कि इस वर के योग्य दुलहिन सारे जग में नहीं मिल सकती।

यह वर्णन बरात ले जाते हुए शिव जी के साज-संवार का श्री तुलसी दास जी ने किया है। इसमें तुलसी दास जी ने भी शिव जी को कल्याण के धाम और सब पर कृपा करने वाले कहा है। इन सब उद्धरणों से यह तो भली भांति सिद्ध हो जाताहै कि शिव कल्याण करने वाले का ही नाम है।

शिव का स्वरूप इससे मिलता-जुलता ही महाकवि भारवि ने अपने प्रसिद्ध ग्रन्थ 'किरातार्जुनीयम्' में भी किया है।

तुलसीदास जी ने शिव का जो स्वरूप निखारा है, उसमें विष और सर्पों का प्राधान्य है। हमारी सम्मति में पौराणिक बन्धुओं ने शिव में उस नेता की कल्पना की है जो संसार का कल्याण करने वाला है और जो संसार में व्याप्त विषाक्त वातावरण और विषैले तत्वों को अपने आधीन कर समाप्त कर संसार में शांति स्थापित करके सबका कल्याण करता है। शिव के कुण्डल और कंकण भी सर्प हैं, अर्थात् विषैले तत्वों को शिव अपने नियन्त्रण में रखकर संसार में अशान्त वातावरण नहीं होने देते। वृषभ को शिव की सवारी बनाने का अभिप्राय यह है कि संसार में जो भी अति बलिष्ठ पुरुष हैं उन पर भी शिव-कल्याण कारक नेता अपना पूर्ण नियन्त्रण रखता है। बाघ की छाला से तात्पर्य यह दीखता है कि वह सबसे भयंकर खूंख्वार जन्तु को भी मारने की शक्ति रखता है, और इसी लिए उसके हाथ में त्रिशूल हैं जो अनभीप्सित पुरुषों के लिए भय का कारण बना रहता है। शरीर को वस्त्रों से रहित रखने और भस्म लपेटने का तात्पर्य यह है कि वह नेता त्यागी-तपस्वी होना चाहिए। जब हमारे नेता में ये सब गुण होंगे तो वह चन्द्रमा के समान संसार में प्रकाशित होकर सब के लिए आह्लादजनक बनेगा। शिव के मस्तक पर चन्द्रमा और सिर पर गंगा का अभिप्राय यह व्यक्त है कि वह महापुरुष अत्यन्त शान्त प्रकृति का हो, उसमें क्रोध का नाम तक न हो। शिव के तीसरे नेत्र का अर्थ यह है कि शिव अति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेजस्वी, उसके तेज के प्रभाव से सर्व जगत् प्रकम्पित हो जाये। उस तेज में इतनी शक्ति है कि वह अनिच्छित तत्वों को भस्म भी कर सकता है।

उपर्युक्त पंक्तियों में हमने यह सिद्ध करने का प्रयास किया है कि शिव कल्याणकारक ईश्वर का ही नाम है और जो स्वरूप ईश्वर का है वही शिव का स्वरूप है। ईश्वर का स्वरूप इस प्रकार है:—

> ईश्वर सच्चिदानन्द स्वरूप, निराकार, सर्वशक्तिमान्, न्यायकारी, दयालु, अजन्मा, अनन्त, निर्विकार, अनादि, अनुपम, सर्वाधार, सर्वेश्वर, सर्वव्यापक, सर्वान्तर्यामी, अजर, अमर, अभय, नित्य, पवित्र और सृष्टिकर्त्ता है।

अतः उपर्युक्त ईश्वर का स्वरूप ही शिव का स्वरूप है।

'शिवु कल्याणे' इस धातु से "शिव" शब्द सिद्ध होता है। "बहुलमेतन्निदर्शनम्" इससे शिवु धातु माना जाता है, जो कल्याणस्वरूप और कल्याण का करनेहारा है इसलिये उस परमेश्वर का नाम "शिव" है।

—महर्षि दयानन्द

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उठो आर्यो ! निद्रा त्यागो : शिवरात्रि जगाने आई है !

श्री रमेशचन्द्र वर्मा एम० ए०

रात अन्धेरी प्रहर तीसरा, मन्दिर में शिव की माया।
भक्त उनींदे लगे लेटने, छाई स्वप्नों की छाया।।
पर बालक इक जाग रहा है, भूखा प्यासा अलसाया।
रेशम की पीली धोती में आंखें धोता अकुलाया।।
अन्तर जाग रहा है उसका ऊपर निद्रा छाई है।
उठो आर्यो निद्रा त्यागो शिवरात्रि जगाने आई है।।१।।

दीप शिखा की वृति अकंपित आलोकित पिंडी की ओर।
प्राण हीन हैं ज्ञान शून्य पर जीवित सी चिन्ता की कोर।।
जागरूक चेतन बालक का चित्त ज्ञानमय दृष्टि अछोर।
बार-बार शिवलिंग निहारे, उर में अविरल चिन्तन घोर।।
उठते मन में प्रश्न अनेकों फूट रही तरुणाई है।
उठो आर्यो निद्रा त्यागो, शिवरात्रि जगाने आई है।।२।।

कर्षन जी पितु सोते हैं पर इससे क्या उसको डरना।
उसको व्रत धारण कर है सफल आज जीवन करना।।
लगा मूलशंकर विचराने का स्रवित हुआ मन का झरना —
कैसे यह संसार बना है, क्या जीवन है क्या मरना ?
क्यों कर रिश्ते हैं मानव के मात पिता क्या भाई है ?
उठो आर्यो निद्रा त्यागो शिवरात्रि जगाने आई है।।३।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'सूर्य चन्द्र जलवायु बने क्यों, किसने रचा सकल संसार ?
किसकी माया जग में फैली,किस पर सधा भूमि का भार ?
स्वर्ग नरक अरु मोक्ष वस्तु क्या, कैसे हो भाव से उद्धार ?
निर्गुण सगुण ब्रह्म कैसा, निराकार है या साकार ?
यों विचार की उथल-पुथल ने हृदय तन्त्री खटकाई है,
उठो आर्यो निद्रा त्यागो शिवरात्रि जगाने आई है ॥४॥

शिव पिण्डी के पास चढ़ावा भक्तों ने रखा आला।
क्षुद्र जन्तु चूहों ने खाकर पल में जूठा कर डाला ॥
पिण्डी पर फिर चढ़ा एक चूहा कूदा हो मतवाला।
इस कौतुक को देख जगी उस बालक की अन्तर्ह्ज्वाला ॥
महानीच मूषक ने देखो कीर्ति पिण्ड की ढाई है।
उठो आर्यो निद्रा त्यागो, शिवरात्रि जगाने आई है ॥५॥

मेघों का गर्जन आलिगन विद्युत सी चमकी मन में।
ज्यों ताड़ित हो विषम वायु से ज्वर उठा सागर तन में ॥
बाल सूर्य के चिदाकाश में अगणित प्रश्न उठे क्षण में।
अन्धकार में दीप जले ज्यों तारे चमक उठे वन में ॥
बोध सत्य का हुआ हृदय में विमल भावना पाई है।
उठो आर्यो निद्रा त्यागो शिवरात्रि जगाने आई है ॥६॥

'अरे वही, क्या महादेव हैं गाते मानव जिसका गान ?
पूर्व समय के ऋषि-मुनि भी क्या धरते थे इनका भी ध्यान?
नहीं नहीं यह ढोंग निरा है महादेव का यह अपमान।
प्रस्तर की निर्जीव मूर्ति यह क्रियाहीन नश्वर निष्प्राण ॥
दिव्य मूर्ति उस बालक ने अन्तर की ज्योति जगाई है।
उठो आर्यो निद्रा त्यागो शिवरात्रि जगाने आई है ॥७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सच्चे शिव की उपासना करो

श्री राजपालसिंह शास्त्री
सम्पादक
"मधुर-लोक" दिल्ली-६

शिव जी सम्पूर्ण हिन्दू देवताओं में सबसे बड़े एवं महापराक्रमी देवता माने जाते हैं। अनेक पुराण उपपुराण उनकी प्रशंसा एवं उनके कार्य-कलापों की गाथाओं से भरे हुये हैं। कभी-कभी यह विवाद का भी विषय बन जाता है कि विष्णु-ब्रह्मा-महादेव में से कौन से देवता सर्वश्रेष्ठ हैं ? और इनकी पूजा भी कब और क्यों हुई ? यह पूजा वेद-विहित हैं या नहीं ? व्याकरण, न्याय, वेदान्त, पुराण, तन्त्र आदि अनेक शास्त्र पढ़े और वेदों को देखा, सुना और पढ़ा भी।

वेदों में विष्णु, लक्ष्मी, श्री, सुपर्ण, गरुड़, ब्रह्मा, सरस्वती, हंस, रुद्र, शंकर, महादेव, नीलकण्ठ, शितिकण्ठ, पशुपति, कृत्तिवासा, गौरी, अम्बिका, वृष आदि सब नाम आये हैं, विशेष क्या वर्णन किया जाये ? वेदों में तो विष्णुसूक्त, लक्ष्मीसूक्त, रुद्रसूक्त आदि सूक्त भी दिखाई देते हैं और इन्हीं सूक्तों से इन देवों की पूजा भी लोग किया करते हैं। इससे और भी अधिक सन्देह होता है कि यह पूजा वैदिक है या अवैदिक!

ब्रह्मा-विष्णु-महादेव इन तीन देवों के साथ जो वाहन-शक्ति, निवास, स्थान आदि अनेक उपाधि लगे हुए हैं उनका भी भेद कुछ प्रतीत नहीं होता। विष्णु-ब्रह्मा के वाहन पक्षी। और महादेव का

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाहन बैल। विष्णु का निवास समुद्र और महादेव का पर्वत। ये सब क्या हैं ? निश्चित नहीं होते।

अधिक विस्तार से न लिखता हुआ "शिव-उपासना" के बारे में कुछ लिखना चाहता हूं।

वेदों के अध्ययन से सम्यक् प्रकार विदित हो जायेगा कि आज-कल जितनी प्रसिद्ध-प्रसिद्ध उपासनायें देश में प्रचलित हैं केवल आलंकारिक अर्थात् मिथ्या हैं। सब ही प्रसिद्ध देव, विष्णु, महादेव ब्रह्मा, इन्द्र, वरुण आदि रूपकालंकार मात्र में वर्णित हुए हैं इस समय जिन-जिन प्रसिद्ध देवों की पूजा आप लोग देखते हैं वे सब कल्पित हैं।

वस्तुतः महर्षि दयानन्द जी सच्चे शिव के उपासक थे। उन्होंने वेद द्वारा शिव-उपासना का सच्चा और सरल मार्ग बता दिया। मैं ऋषि को कोटिश श्रद्धांजलि अर्पित करता हूं, जिन्होंने सच्चे शिव को खोजा-पाया और हमें बताया।

और बताया एक देव की उपासना

जिस काल में ब्रह्मवादी, मधुच्छन्दा, मेधातिथि, दीर्घतमा अगस्त्य, कक्षीवान्, विश्वामित्र, वामदेव, अत्रि, भारद्वाज, बृहस्पति वसिष्ठ, नारद, कश्यप, नारायण, शिवसंकल्प, याज्ञवल्क्य, ऐतरेय आदि और इनके पुत्र-पौत्र-दौहित्र आदि विद्वान्, तथा ब्रह्मवादिनी लोपामुद्रा, रोमशा, घोषा, सूर्य्या, उर्वशी, गार्गी आदि विदुषी सबने मिलकर वेद-विद्या का प्रचार किया और बताया केवल एक ब्रह्म की उपासना। परमात्मा को अनेक नाम से उच्चारते थे। इन्द्र, मित्र, वरुण, अग्नि, दिव्य, सुपर्ण, गरुत्मान्, मातरिश्वा, पृथ्वी, वायु आदि नाम आते हैं। वेद में लिखा भी है कि—'इन्द्रं मित्रं वरुणाग्नि-माहुरथो दिव्यः स सुपर्णो गरुत्मान्। एकं सद् विप्रा बहुधा वदन्त्यग्निं मातरिश्वानमाहुः सुपर्णं विप्राः कवयो वाचोभिरेकं सन्तं बहुधा कल्पयन्ति ॥

मनु महाराज भी लिखते हैं—"प्रशासितारं सर्वेषामणीयांसम-णोरपि। रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परम्। एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम्। इन्द्रमेकेऽपरे प्राणमपरे ब्रह्म शाश्वतम् ॥

बहुत युगों के अनन्तर वाममार्ग के बढ़ने पर उस प्रिय ब्रह्म को भूलकर प्राकृत वस्तुओं की उपासना करने लगे। प्राकृत वस्तु अनन्त

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हैं। पृथ्वी, जल, जलचर, विविध मत्स्य, मकर, कच्छप आदि। पृथिवीस्थ समुद्र, पर्वत, नदी, वृक्ष एवं विविध प्रकार के पशु, असंख्य सूर्य, चन्द्र, तारागण आदि।

अब एक ऐसा समय आ गया जब विद्वानों का अभाव हो गया और उपदेश की परिपाटी समाप्त हुई। प्रजा ज्ञानहीन बन चुकी थी। जनता मनमाने ढंग से उपासना करने लगी। बौद्ध एवं जैन सम्प्रदाय प्रचलित हो गया। ये लोग ईश्वर के अस्तित्व को भूल चुके थे। मूर्त्तियां बनाकर पूजा आरम्भ हो गई। ये लोग मूर्त्ति बनाकर मन्दिरों में स्थापित कर घण्टे-घड़ियाल शंखों की ध्वनि से भोली जनता को अपनी ओर खींच रहे हैं। हमें भी ऐसी मूर्त्तियां बनाकर स्थापित करनी चाहियें। तब कुछ पण्डितों ने विवाद में न पड़कर तीन देवता कल्पित किये। सूर्य के बदले विष्णु देव, वायु के बदले ब्रह्मा और विद्युत (बिजली) के स्थान पर महादेव आदि की पूजा आरम्भ हो गई।

महादेव

जिसको रुद्र शिव, भोलानाथ आदि नामों से पुकारा जाता है। जो शिव की उपासना करते हैं वे "शैव" कहलाते हैं। रुद्र का अर्थ है मेघस्थ अग्नि (वज्र, विद्युत्)।

हे आर्यो ! उस परमात्मा की लीला देखिये। मेघ में भी अग्नि है। कहां शीतल जल ! कहां विद्युत्प्रकाश। मेघ के पर्याय देखिये— वारिद=जल देने वाला, वारिवाह=जल ले जाने वाला। आप देखें कि मेघ में कैसा एक घोर नाद होता है। यह नाद (शब्द) करने वाला कौन? जो इतना गरज रहा है। उसका नाम "वज्र" है। "वज्र" शब्द पुंल्लिग है। अतः यह पुरुष देव है। इसका गर्जन मानो रोना है। जब यह रोता हुआ मेघ के ऊपर दौड़ता है तो भूमिस्थ प्राणियों को भी रुला देता है। इसी लिये इस वज्र का नाम "रुद्र" है। जब जीमूत (मेघ) अन्तरिक्ष में स्थिर रहता है, तब इसका स्वरूप हिमालय पर्वत के समान भासित होता है। वैदिक भाषा में पर्वत के जितने पर्यायवाची शब्द हैं वे सब मेघ के भी हैं। अतः मेघ तो पर्वत है और मेघोत्पन्ना विद्युत् "पार्वती" है। यह विद्युत् रूपा पार्वती रुद्र देव की पत्नी है। मेघ पानी देता है। इसीलिये यह "वृषभ"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्षा करने वाला कहलाता है। यह वृषभ (मेघ) रुद्र (वज्र) की सवारी है। यह रुद्र मेघ पर बैठा हुआ है। जो बिजली चारों ओर चमकती है वे इसके केश हैं। इसीलिये वज्रदेव, जटाजूट केशी, धूर्जटी भी इसके नाम हैं।

जो मेघ में धनुषाकार प्रकाशित होताहै वे इसके धनुष हैं। इसका नाम 'पिनाक'' है। जब यह वज्र गिरता है तब इसका स्वरूप अति महान् आकाश-पाताल में व्यापक प्रतीत होता है। इसीलिये इसका नाम ''महादेव'' है। जिससे विविध वनस्पति लता पुष्ट होती हैं अतः यह ''ओषधीश्वर'' है। घासों से पशुओं का पालन होता है अतः यह ''पशुपति'' है। ये मेघ कभी काले, कभी नीले, कभी श्वेतहैं, इसी हेतु यह ''नीलग्रीवा:, शितिकण्ठ:'' है।

इस प्रकार विद्युत्देव अर्थात् वज्र का प्रतिनिधि है। मुख्यता भी इसकी है। सम्पूर्ण आग्नेयशक्ति का यह प्रतिनिधि है। अतः अग्नि की पूजा करो। यही सच्चे शिव की पूजा है। हम आर्य अग्नि की उपासना करते हैं। वेद ने भी उपदेश दिया है—

अग्निमीले पुरोहितं, यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातमम्॥ ऋग्वेद मं० १। सू० १। मं० १

●

ईश्वर

विश्व के प्रारम्भ से, एक गूंज आ रही है।
ईश के शब्द का, एक ओ३म् नाम है॥
सूर्य के ताप से, हिमगिरि के शीत तक।
शून्य से भी शून्य है, महान् से महान् है॥
बालकों के रुदन में, रोगियों के कष्ट में।
भवरों के गीत में, एक ही तान है॥
ओ३म् की ही गूंज है, एक मूक सा शब्द।
समूह का शोर है, ध्यान से विचारिए॥
दूर से पुकारिए, क्षण में सदृश्य हो।
'अमर' ईश्वर महान् है॥

—अमर सुजानपुरी, दिल्ली-११००२३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आज की निशा विश्व की दिशा बन गई....।

● श्री अशोक कुमार भारद्वाज
साहित्याचार्य, एम. ए.

जिन दिनों देश में गोरों के शासन ने भारतीयों के मुंह पर ताला लगा रखा था, देशवासी गुलामी की जंजीरों में जकड़े हुये थे। चैन की नींद लेना हराम हो गया था। ऐसे नीरव, निस्तब्ध एवं नृशंस वातावरण में आज शिवरात्रि को १३७ वर्ष पूर्व १४ वर्ष की आयु में मूलशंकर के मन में शिव-पर मूषकों द्वारा नैवेद्य-भक्षण देख कर सच्चे शिव की जिज्ञासा का दार्शनिक विचार जागृत हुआ। "मैं सच्चे शिव के दर्शन करूंगा"—ऐसा दृढ़ निश्चयकर बालक मूलशंकर ने भयानक बीहड़ जंगलों, पर्वतों और घाटियों की भारी जलधाराओं एवं बर्फीले तूफानों व झंझावातों के बीच गन्तव्य की ओर बढ़ते हुए, योगियों और ऋषियों के शरण में बैठकर अपनी ज्ञान-पिपासा को शान्त किया। संन्यास की दीक्षा लेकर स्वामी दयानन्द सरस्वती बने। निर्भीक संन्यासी ने मत-मतान्तरों में भटकी भोली-भाली जनता को ईश्वर की आराधना का सच्चा मार्ग बताया।

स्वामी जी ने देश के कोने-कोने में घूमकर विदेशी शासन की कब्र खोदनी शुरू कर दी। उन्होंने स्थान-स्थान पर सभायें गोष्ठियां आयोजित कीं और स्वराज्य-आन्दोलन की प्रशस्त-भूमिका तैयार की। स्वामी जी ने न केवल स्वदेश में अपितु विदेशों में भी श्याम जी कृष्ण वर्मा सरीखे क्रान्तिकारियों को अपने व्यय पर भेजकर प्रवासी भारतवासियों में भारत के नये प्रभात की नयी उषा का साम्राज्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थापित करने के लिए वैचारिक क्रान्ति का सूत्रपात किया। श्याम जी कृष्ण वर्मा ने स्वामी जी के सम्बन्ध में कहा था—

"स्वामी दयानन्द को मैं अपना मार्गदर्शक गुरु मानता हूँ। उनके चरणों में रहकर मैंने बहुत कुछ पाया है। उनकी मुझ पर सदैव कृपा रहती थी। स्वामी जी की यह इच्छा थी कि विदेशों में भी वैदिक धर्म का प्रचार हो, उन्होंने मुझे विदेशों में वैदिक-संस्कृति का प्रचार करने की प्रेरणा दी।"

"मैंने राष्ट्र, जाति तथा समाज की जो सेवा की है उसका श्रेय महर्षि दयानन्द को प्राप्त है। मैंने जो कुछ प्राप्त किया है, उसमें सबसे बड़ा हाथ उस सर्वहितैषी, वेदज्ञ और तेजस्वी युगद्रष्टा का है। मुझे उस स्वतन्त्र विचारक का शिष्य होने में अभिमान है।"

स्वामी जी ने आज से सौ वर्ष पूर्व मानव के समतामूलक सिद्धांत की सबल स्वरों में घोषणा कर सच्चे समाजवाद की प्रतिष्ठा की। उन्होंने स्त्री जाति को समाज में पुरुषों के समान अधिकार दिलाकर कवि की इन पंक्तियों को चरितार्थ किया—

"नारी केवल तुम श्रद्धा हो,
विश्वास रजत नग पग तल में।
पीयूष-स्रोत सी बहा करो,
जीवन के सुन्दर समतल में।
—'प्रसाद'

\+ + + +

"मुक्त करो नारी को मानव,
चिरवन्दिनी नारी को।
युग-युग की बर्बर कारा से,
जननी, सखि, प्यारी को।
—'पन्त'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वामी जी ने हिन्दी को राष्ट्र-भाषा के गरिमामय पद पर प्रतिष्ठित करने में महत्वपूर्ण भूमिका अदा की। उन्होंने कहा था—"जब तक हिन्दी को उसके अनुरूप उचित सम्मान नहीं मिलेगा तब तक समस्त विशृंखलित भारत को एकता के सूत्र में नहीं पिरोया जा सकता।"

दयानन्द ने आर्यसमाज के १० नियमों का उल्लेख कर राष्ट्र को सामाजिक, आर्थिक, धार्मिक और आध्यात्मिक व्यवस्था का सुन्दर व सुनियोजित कार्यक्रम प्रदान किया। कांग्रेस का वर्तमान २० सूत्री कार्यक्रम उक्त नियमों का ही विशद स्वरूप मात्र है। यदि यह कहा जाय कि आर्यसमाज का दूरदर्शितापूर्ण नियोजित कार्यक्रम कांग्रेस को विरासत में मिला है, इसमें कोई दो राय न होंगी।

कांग्रेस के वर्तमान दहेज-प्रथा-उन्मूलन अभियान का उपक्रम स्वामी जी ने बहुत पहले ही रच दिया था। साथ ही बाल-वृद्ध-विवाह जन्मगत जातपांत और छुआछूत का जबर्दस्त विरोध किया।

महर्षि को श्रद्धाञ्जलि अर्पित करते हुए लौहपुरुष सरदार पटेल ने कहा था—

"स्वामी दयानन्द जी के राष्ट्र प्रेम के लिए, उनके द्वारा उठाये गये कष्टों, उनकी हिम्मत, ब्रह्मचर्य-जीवन और अन्य कई गुणों के कारण मेरा उनके प्रति आदर है। अपने समाज में उस समय जो जो त्रुटियां, कुरीतियां, वहम, अज्ञानता और बुराइयां थीं स्वामी जी ने उनको दूर करने के लिए बल लगाया। यदि स्वामी जी न होते तो हिन्दू समाजकी क्या हालत होती, इसकी कल्पना करना कठिन है। आज देश में जो भी कार्य चल रहे हैं उनका मार्ग स्वामी जी वर्षों पूर्व बना गये। शताब्दियों में ऐसे विरले महापुरुष मिलते हैं। समाज में जब बुराइयां घर कर जाती हैं, तब ईश्वर ऐसी विभूतियों को भेजता है। ऐसे महापुरुष कभी मरते नहीं, अमर होते हैं। उनका जीवन हमारे लिए आदर्श बन जाता है।"

卐

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री रामगोपाल जी शालवाले सभा-प्रधान एवं श्री ओम्प्रकाश जी पुरुषार्थी सभा-मन्त्री के साथ श्री वीरेन्द्र जी सभा-मंत्री पंजाब तथा श्री सोमनाथ जी मरवाह की

प्रेस कान्फ्रेन्स में घोषणा

अन्तर्राष्ट्रीय आर्यसमाज स्थापना शताब्दी समारोह के बाद भावी कार्यक्रम की रूपरेखा को प्रस्तुत करते हुए—आर्य नेताओं ने आर्य जनता के नाम अपील की कि वह दहेज, बाल-विवाह, बहु-विवाह तथा मद्य-निषेध के लिये कटिबद्ध होकर जन-आन्दोलन कर सरकार का साथ देकर समर्थन भी करें।

विवाहादि समय पर नृत्य, भांगड़ा का विरोध करें। साथ ही यह भी निर्देश उपदेशक, प्रचारकों को दिया कि वह ऐसे समय जो यह कार्य-दहेजादि प्रथायें चलें वहां कार्य छोड़कर आ जायें।

सम्मेलन नीति पर स्पष्ट करते हुए उत्तर प्रदेश में जो समारोह वाराणसी में हो रहा हैं उसके बाद हरियाणा-सभा मई में अपना समारोह मनायेगी। पंजाब के नवीन विवाद पर निर्णय दिया कि जो भी आर्यसमाज के विवाद को आपस में न सुलझाकर न्यायालय में जावेगा, उसको आर्यसमाज की सदस्यता से भी निष्कासित किया जायेगा।

पंजाब सभा का केस न्यायालय में श्री अग्निवेश जी तथा श्री इन्द्रवेश जी, मुरारीलाल शर्मा आदि ने किया है उन्हें आर्यसमाज की सदस्यता से पृथक् कर दिया है तथा कोई भी सम्मेलन इस समय रोहतक में नहीं हो रहा है।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मित भाषण सत्य का कवच है, इसलिए सत्यव्रत में मित भाषण का भी समावेश है।

—आचार्य बिनोवा भावे

यदि तुम भूलों को रोकने के लिए द्वार बन्द करोगे तो सत्य भी बाहर रह जायेगा।

—गुरुदेव रवीन्द्रनाथ टैगोर

त्याज्यं न धैर्यं विधुरेपि काले धैर्यात्कदाचिद् गतिमाप्नुयात्सः।
यथा समुद्रेऽपि च पोतभंगे सांयात्रिको वांछति तर्त्तुमेव॥

विपरीत काल में धीरज नहीं गंवाना चाहिए। धीरज से शायद भला समय भी आएगा। समुद्र में नौका टूट जाने पर मुसाफिर तैर कर बाहर निकलना चाहता है।

—सुभाषित

क्षमा शस्त्रं करे यस्य दुर्जनः किं करिष्यति।
अतृणे पतितो वह्निः स्वयमेवोपशाम्यति॥

जिसके हाथ में क्षमारूपी शस्त्र है उसका दुर्जन क्या बिगाड़ सकते हैं। घासहीन धरती पर पड़ी अग्नि स्वयमेव शान्त हो जाती है।

—सुभाषित

एकेनापि सुपुत्रेण जायमानेन सत्कुलम्।
शशिना चैव गगनं सर्वं दैवोज्ज्वलं कृतम्॥

एक ही चन्द्र गगन को उज्ज्वल करता है। एक सुपुत्र सारे कुल को तार देता है।

—सुभाषित

अणुरप्यसतां संगो सद्गुणं हन्ति विस्तृतम्।
गुणरूपांतरं याति तक्रयोगाद्यथा पयः॥

थोड़ी सी छाछ भी दूध के स्वरूप को बदल डालती है। दुर्जन का थोड़ा सा संग भी व्यापक सद्गुण को खत्म करता है।

—सुभाषित

पंजाबी चन्दू हलवाई कराची वाला

कार्यालय : १८५, बालकेश्वर रोड, तीन बत्ती, बम्बई-६

स्थापना : सन् १८९६ ई०

—: शाखाएं :—

१. जवेरी बाजार, २. ग्रान्ट रोड, ३. कोताबा, ४. दादर टी० टी०, ५. बरती नाका, ६. सायन सर्कल, ७. ठाकुरद्वार, ८. अकबरअली फोर्ट, ९. सर्वोदय स्टोर्स चर्चगेट, १०. घाटकोपर

कारखाना : चन्दू भवन, ग्रान्ट रोड, बम्बई-७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी फार्मेसी, हरिद्वार

विशेष उपहार

च्यवनप्राश

उत्तम पौष्टिक रसायन है। दैनिक नाश्ते में च्यवनप्राश का सेवन शरीर को बलवान् बनाता है। अब दो किलो के पैकिंग में उपलब्ध है।

सिद्ध मकरध्वज

यौवन को स्थिर रखने के लिये अत्युत्तम पौष्टिक रसायन है।

वसन्तकुसुमाकर रस

पेशाब अधिक आने को कम करता है एवं समस्त मूत्र विकारों में लाभदायक है।

गुरुकुल कांगड़ी चाय

खांसी, जुकाम, ज्वर को दूर कर शरीर में ताजगी लाती है। दैनिक प्रयोग कीजिये।

पायोकिल

दैनिक प्रयोग करें। मसूड़ों से खून व पीप आने को रोकती है एवं मुख की दुर्गन्ध दूर करती है।

द्राक्षासव

पुरानी खांसी, भूख न लगना, थकावट तथा निर्बलता के लिये बहुत लाभदायक है। शरीर में स्फूर्ति व ताजगी लाता है।

गुरुकुल कांगड़ी फार्मेसी, हरिद्वार

शाखा कार्यालय :—

६३ गली राजा केदारनाथ चावड़ी बाजार, दिल्ली-६

(स्थानीय विक्रेताओं एवं सुपर बाजार से खरीदें) फोन : २६१४३८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ही होता है।

वैदिक साहित्य के मर्मज्ञों ने ही जब अपनी मर्यादा का अतिक्रमण अज्ञानता में शुरू किया और अपने महापुरुषों के नामों का अर्थ सही रूप में प्रकट न कर, सार्थक न कर, निरर्थक बनाया, तो अन्यों का क्या दोष ! वेद के वास्तविक अर्थों को लेकर अपनी कल्पना से वैदिक ज्ञान को पाश्चात्य संस्कृति व सभ्यता से तुच्छ सिद्ध किया है। उसी से प्राचीन इतिहास भी बिगाड़ा गयाहै। इसका दुष्प्रभाव यह रहा कि हमारे विद्वान् भी उसी विचार धारा में प्रवाहित हुए और आज तक मुक्ति न पा सके। वेदों के स्वदेशीय प्राचीन भाष्यकार तथा व्याख्याकार जितने दोषी हैं उतने विदेशी विद्वान् नहीं। यही कारण है कि वैदिक परम्पराओं को न समझकर देवी-देवताओं और अनर्गल आख्यानों की काल्पनिक रचना करके साधारण व असाधारण जनों को भ्रान्त कर पथच्युत कर दिया गया है।

शिवरात्रि की पावन जागरण वेला में मूल में शंकर के प्रति अलगाव की भावना उत्पन्न हुई और सच्चे शिव की खोज में शिवालिक तक और शिवालिक से सच्चे शिव तक पहुंचकर ही उसने विश्रान्ति ली और कहा कि तेरी लीला अपरम्पार है प्रभो !

सर्वे वेदा यत्पदमामनन्ति तपाँसि
सर्वाणि च यद्वदन्ति।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् ॥
कठोपनिषदि [वल्ली २ । मं १५]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मूल-बोध

(कविवर "प्रणव" शास्त्री एम० ए०, आर्य नगर फीरोजाबाद उ० प्र०)

जब कभी धरा के जगते हैं, सोये भाग्य निराले
खुल जाते करुणानिधि की करुणा के अनुपम ताले।
उठते हैं, भाव अनोखे कर में शुचि धर्म ध्वजा ले
उगता रवि सत्य अरुण है, तरुणाई पुण्य प्रथा ले।१।

कल कर्म कञ्ज खिल जाते मकरन्द मान कामर के
सुनते हैं, श्रोत्र सुधाधर गुञ्जित गुणगान भ्रमर के
छाजाती कीर्ति सुरभि है, सुखदा दश दिशि में भरके
बन जाते शास्त्र समुज्ज्वल उज्ज्वल मधुमित्र प्रवर के।२।

दिन पर दिन बीत रहे हैं, मधु माधव आते जाते
संवत्सर काल-क्रम को कब कितने हैं, गिन पाते।
कोई दिनमान मनाते, दिन का ही मंगल गाते
कोई इस रात्रि अमा को ही शिवरात्रि बनाते।३।

इस पावन पुण्य प्रथा में शिव का व्रत धार हृदय में
दर्शन को बैठ गया था, इक बालक देवालय में
नैवेद्य समर्पित जो था. खाता था उसको चूहा
यह देख मूल के मन में जागी थी जागृति ऊहा।४।

लघुतर से मूषक को भी जो हटा नहीं सकता है
अपना भी भाग जो किसी से बचा नहीं सकता है।
इतना असमर्थ अबल है, कैसे वह अखिलेश्वर है
केवल पाषाण-शकल है, यह कभी नहीं परमेश्वर है।५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानस के मान सरोवर में उठीं तरंगें प्यारी
वैचारिक क्रान्ति-कला में भव भ्रान्ति हटादी सारी।
शिव, शंकर, ईश्वर, ब्रह्मा, नारायण, विष्णु, विधाता
है अगम अगोचर कोई जो नहीं समझ में आता।६।

उसके ही दर्शन करने का लक्ष्य हृदय में ठाना
चल दिया मूल जी शंकर बन शंकर का दीवाना।
गिरि, गह्वर, नदियां, नाले नवनिर्झर निर्जनवन भी
व्रत से न हटाने पाये दृढ़ तृषा, बुभुक्षा घन भी।७।

रख ध्यान ईश का पावन ले सत्यान्वेषण-माला
यह 'तस्य वाचक: प्रणव:'को जपता चला निराला।
अब मूल मूल को तजकर बन दयानन्द श्री स्वामी
विचरा इस धरतीतल पर बन श्रुति पथका अनुगामी।८।

उसका ही बोध-दिवस यह वर शोध ज्ञान का लावे
"तमसो मा ज्योतिर्गमय" का प्याला पुण्य पिलावे।
अज्ञान, अन्ध की अवनी तल से हट जावे राका
फहरावे उच्च गगन में जय वैदिक धर्म पताका।९।

☆

ओ३म् यह ओंकार शब्द परमेश्वर का सर्वोत्तम नाम है क्योंकि इसमें जो अ, उ और म् तीन अक्षर मिलकर एक 'ओम्' समुदाय हुआ है, इस एक नाम से परमेश्वर के बहुत नाम आते हैं, जैसे— आकार से विराट्, अग्नि और विश्वादि। उकार से हिरण्यगर्भ, वायु और तैजसादि। मकार से ईश्वर, आदित्य और प्रजादि नामों का वाचक और ग्राहक है। उसका ऐसा ही वेदादि सत्य शास्त्रों में स्पष्ट व्याख्यान किया है कि प्रकरणानुकूल ये सब नाम परमेश्वर ही के हैं।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नादान लोगों ने उस ऋषि का भेद न पाया

श्री पं० आनन्दप्रिय जी,
(प्रधान, गुजरात प्रान्तीय आर्य प्रतिनिधि सभा)

एक बार कोल्हापुर नरेश श्री शाहू छत्रपति जी महाराष्ट्र के अब्राह्मण-आन्दोलन के नेता थे। एकदम विचार किया कि अपने राज्य की प्राथमिक शालाओं से कालेज तक की सब शिक्षण संस्थायें ईसाई मिशनरियों को सोंप दूं ! तब महाराजा बड़ौदा श्रीमंत सयाजीराव गायकवाड़ ने जो उनके समधि होतेथे उनसे कहाकि आप ऐसा न करें। मैं अपने राज्य के एक शिक्षणाधिकारी को आपके पास भेजता हूं। यदि उनसे बातचीत करने के पश्चात् भी आपके विचार में परिवर्तन न हों तो अवश्य ईसाईयों को संस्था सोंप देना। महाराजा कोल्हापुर बोले ब्राह्मणों ने जो अत्याचार अब्राह्मणों पर किये हैं यदि मेरा राज्य ईसाई हो जाय तो मुझे दुःख न होगा।

बड़ौदा के महाराजा ने तत्काल मेरे पूज्य पिता मास्टर आत्माराम जी अमृतसरी को कोल्हापुर भेजा। और विशेष आग्रह किया कि महर्षि दयानन्द और आर्य समाज के विना कोल्हापुर के महाराजा के विचार में परिवर्तन और कोई नहीं कर सकेगा।

इस आदेश को लेकर मेरे पूज्य पिताजी कोल्हापुर गये। और पहली मुलाकात में ही उन्होंने महाराजा के मानस का परिवर्तन कर दिया। और महाराजा ने कहा कि मैं महर्षि दयानन्द जी के मानवतावादी सिद्धान्तों से अपरिचित हूं। परन्तु जो वैदिक मर्यादा आपने बतलायी है उससे मुझे विश्वास है कि हम अब अब्राह्मणों का उद्धार महर्षि दयानन्द एवं आर्य समाज द्वारा कर सकेंगे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

फलस्वरूप महाराजा कोल्हापुर ने राज्य की सब संस्थायें आर्य समाज को सोंपने का निश्चय कर लिया। और पू० पिताजी के परामर्श से उत्तरप्रदेश आर्यप्रतिनिधि सभा को संस्थायें सोंप दी गई। तुरन्त ही उस समय के प्रधान श्री हुक्मसिंह जी और आगरे वाले स्वामी श्री परमानन्द जी आए। वहां के राजाराम कालेज के प्रिंन्सिपल श्री बालकृष्ण जी बनाये गये। और हाई स्कूल के हैड-मास्टर अलीगढ़ के श्री मलखानसिंह जी बनाये गये। महाराजा ने अपने युवराज के कम्पेनियन के रूप में मेरी नियुक्ति कर दी।

पूरे दस वर्ष तक कोल्हापुर की सब शिक्षण संस्थाओं का संचा-लन आर्यसमाज द्वारा होता रहा और कोल्हापुर के नरेश के निधन के पश्चात् नये महाराजा श्री राजाराम जी ने आर्य समाजियों में परस्पर मतभेद के कारण फिर से सब शिक्षण संस्थायें राज्यहस्तक ले ली। हमारे नम्र मत में महाराजा यदि अपनी संस्थायें ईसाई मिशनरियों को दे देते तो कोल्हापुर जहां शिवाजी की गद्दी हैं वहां दक्षिण में ईसाईयों का गढ़ बन जाता। और न मालूम इसका कितना भयंकर प्रत्याघात होता।

आर्य समाज का कीर्ति काल दस वर्ष में समाप्त हो गया। पर हमसे कई गुनी व्यवस्थित ब्रिटिश राज्याश्रय प्राप्त ईसाई मिशनरी जोंख की तरह चिपक जाती। और जिस राज्य में हिन्दू समाज की रक्षा हुई, वही गद्दी हिन्दू जाति के ह्रास का कारण बन जाती।

आज महर्षि दयानन्द जी के कार्य का मूल्यांकन हम आर्य समा-जियों के कार्यों से कर के कह सकते हैं कि यदि महर्षि न होता तो भारत में आर्य संस्कृति की रक्षा कौन कर सकता ?

इसी प्रकार जब बड़ौदा महाराजा अपने राज्य के हरिजनों के लिये प्राथमिक पाठशालायें खोलना चाहते थे तब दुगुना वेतन देने पर भी कोई सवर्ण हिन्दू तय्यार न हुआ, तब पुण्यश्लोक महात्मा नित्यानन्द जी के कहने से सन् १९०८ में मेरे पू० पिता मास्टर आत्माराम जी को अमृतसर से बुलाया गया। और दस वर्ष में राज्याश्रय पाकर उन्होंने चार सौ प्राथमिक शालायें स्थापित कर दी। और अठारह हजार हरिजन बालक शिक्षण लेने लगे। यह चमत्कार आर्य समाज और महर्षि दयानन्द जी के सिद्धान्तों के

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारण हुआ। बड़ौदा महाराजा अपनी शिक्षण संस्थायें किसी काल में ईसाई एवं इस्लामी मास्टरों को नहीं सौंपना चाहते थे

आज आर्यसमाज के व्यक्तियों ने देश की परम्परागत संस्कृति की रक्षा में जो काम किया है वह इतिहास में स्वर्ण अक्षरों में अंकित रहेगा। आर्य समाज ने संस्कृति की रक्षा एक स्थल पर नहीं वरन् व्यापक रूप से समूचे भारत वर्ष में कई स्थानों में की।

महर्षि दयानन्द जी को केवल आर्य समाज का संस्थापक मानना भूल है महर्षि के अनेक उपकार समस्त भारत पर हुए। हमारी राष्ट्रीय संस्कृति की रक्षा कर महर्षि तथा उनके भक्तों ने राष्ट्र का कल्याण किया। आवश्यकता यह है कि प्रत्येक संस्कृति प्रेमी महर्षि दयानन्द जी को अपनाये और उनको सच्चे राष्ट्र के रूप में समझें।

आज महर्षि दयानन्द जी केवल आर्यसमाज के संस्थापक नहीं परन्तु वे इस देश की संस्कृति के परम रक्षक एवं उद्धारक हैं।

आज स्वामी समर्पणानन्द जी की यह कविता हमें याद आती है

"नादान लोगों ने उस ऋषि का भेद न पाया"।

'डुकृञ् करणे' "शम्" पूर्वक इस धातु से "शंकर" शब्द सिद्ध हुआ है। "शं कल्याणं सुखं करोति स शंकर:" जो कल्याण अर्थात् सुख का करने हारा है इससे उस ईश्वर का नाम "शंकर" है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋषिबोध-पर्व

रचयिता—पन्नालाल पीयूष अजमेर

बाल मूलशंकर ने एक रात जाग कर।
बन के महर्षि सारे जग को जगाया है॥
अन्ध अज्ञान तम तोम में भटकते थे।
वेद के प्रकाश द्वारा सुपथ सुझाया है॥
किन्तु सब आर्य सत्ता स्वार्थ निमग्न हुए।
धर्म अनुराग तप त्याग विसराया है॥
आलस विसार देश काल को निहारो अब।
करो बोध प्राप्त ऋषि बोध पर्व आया है॥

[२]

आर्य कहलाते आर्य नियम निभाते नहीं।
आर्य फिर कैसे सारे विश्व को बनायेंगे॥
ब्रह्म-देव आदि पञ्चयज्ञ न करेंगे यदि।
कैसे त्रय ताप तोम निधि तर जायेंगे॥
भिन्नता भरि है भाइयों में भरपूर जब।
प्रेम कर 'पीयूष' कैसे पर को पिलायेंगे।
ऋषि के बताये हुए कार्य जो करेंगे नहीं।
भला ऋषि ऋण को उतार कैसे पायेंगे॥

[३]

वैदिक धर्मावलम्बी होके रहें आर्य गण।
वैदिक शिक्षानुकूल जीवन बनाइये॥
करिये प्रथम आत्म उन्नति, पीयूष पुनि।
भौतिक विज्ञान के वितान को तनाइये॥
संगठन शुद्धि का बजाइये मधुर शंख।
बिछड़े हुओं को सर्व भांति अपनाइये॥
जागिये जगत को जगाईये महर्षि सम।
ऐसे ऋषिबोध ये महोत्सव मनाइये॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्योतिषां ज्योतिः एकः 'शिवः'

पं० त्रिलोकचन्द्र जी शास्त्री
सम्पादक 'आर्य जगत्'

मूलशंकर के हृदय में शिव मन्दिर की एक छोटी सी घटना ने उथल-पुथल मचा दी। पूज्य पिता जी के शंका निवारण न कर सकने पर बालक के मन में अन्धकार छा गया। वह खोया-खोया सा रहने लगा। प्यारी बहन और प्रिय चाचा की मृत्यु ने मन के अन्धकार को और भी गहरा बना दिया।

पहले अबोध बालक के मन में सच्चे शिव को पाने की तड़प थी अब युवक के मन में मृत्यु पर विजय पाने की तड़प भी जाग उठी। शिव की खोज करने और मृत्यु पर विजय पाने के लिये राह ढूंढने की चाह बलवती हुई, कुछ उपाय न सूझा। अन्धकार गहरा होता गया, अशान्ति बढ़ती गई। अन्धकार तथा शान्ति एक साथ नहीं रह सकते।

मूलशंकर के घर का सुख, माता-पिता का प्यार, ऐश्वर्य की लालसा शान्ति न दे सकी। मोह के बन्धन ढीले होते गये और एक दिन टूट गये। रेत की दीवार कब तक खड़ी रह सकती है? मूलशंकर घर से निकल पड़ा मन का अन्धकार दूर करने के साधन की खोज में। उसने मन मन्दिर की ज्योति जलाने के लिये सिर-धड़ तक की बाजी लगा दी, प्रकाश किसी भी मूल्य पर मिले, सस्ता है।

मूलशंकर स्थान-स्थान पर गया, मन्दिर मठ देखे, जंगल छाने नदियां पार की, गुफायें खोजी, कहीं भी वह ज्योति नहीं मिली जिससे मन मन्दिर के बुझे दीप को जला सके।

साधु-महात्मा मिले, उनकी शरण ली, यह सोचकर कि ज्ञान की ज्योति जलेगी। पर वे निकले जुगनू! भला जुगनू कहीं ज्योति जला सकेगा। मन की ज्योति न जली। अन्धकार मिटाने पर तुला रहा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



आर्यसमाज दीवानहाल दिल्ली में दिनांक २२-२-७६ को आयोजित दहेज विरोधी सभा में सार्वदेशिक सभा के प्रधान श्री रामगोपाल जी शालवाले भाषण करते हुए। पास में सभा के अध्यक्ष श्री पृथ्वीसिंह जी आजाद एम० एल० ए० बैठे हैं।

...शिक प्रेस, दरियागंज, दिल्ली में मुद्रित तथा रघुनाथप्रसाद पाठक मुद्रक और प्रकाशक के लिए सार्वदेशिक आर्य प्रतिनिधि सभा, महर्षि दयानन्द भवन, रामलीला मैदान नई दिल्ली-१ से प्रकाशित
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अखिल भारतीय हकीकतराय सेवा समिति के प्रधान श्री रतनलाल जी दिनांक ८-२-७६ को आर्यसमाज मन्दिर विनयनगर नई दिल्ली में वसन्त के अवसर पर सार्वदेशिक सभा के प्रधान श्री रामगोपाल जी शालवाले का स्वागत करते हुए।

योग्य पिता के योग्य पुत्र

श्री अशोक कुमार जी मरवाह एडवोकेट सुपुत्र श्री बा० सोमनाथ जी एडवोकेट सुप्रीम कोर्ट — जिन्होंने शताब्दी समारोह की दुकानों आदि की सुव्यवस्था में महत्वपूर्ण भूमिका निभाई।

वाराणसी शताब्दी समारोह के उपलक्ष्य में अगला ७ मार्च १९७६ का अंक बन्द रहेगा।

— व्यवस्थापक

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलिकौतुकम्

आचार्यः—श्रीविश्वनाथमिश्रः, श्रीशार्दूलसंस्कृतविद्यापीठं, बीकानेरः ।

पूर्वानुवृत्तम्—

सप्तमं दृश्यम्

परीक्षितस्य सभास्थलं

(सिंहासने परीक्षितः, पार्श्वे पुरोधाः धौम्यो, मन्त्री, राजकुमारो जन्मेंजयश्च)

परीक्षितः—(धौम्यं प्रति) भगवन् ? अद्य न जाने कथमिव दूयते चेतः कम्पते हृदयम् । भाविनम् अनिष्टमाशंक्य न शक्यते धैर्यमवधारयितुम् ।

धौम्यः—राजन् ? कोऽयमसामयिकः समुद्वेगः ? आखेटक्रीडायां किमप्यनिष्टं तु नाचरितम् कच्चित् ?

परीक्षितः—एवम् तु न स्मर्यते किमपि, किन्तु ततः परावृत्य शिरसो मुकुटे अपाकृते सति अनुभूतं किमप्यपराद्धमिति । (स्मृत्वा) आम्-आम् गुरुदेव ? जातम् स्मरणम् सत्यमेवापराद्धं मया ।

धौम्यः—राजन् ? भवादृशेन धर्मपरायणेन अपराद्धमिति न विश्वसिति मे मनः । तथापि कथ्यतां कथं कृतः अपराधः, कीदृशश्चासौ ?

परीक्षितः—गुरुदेव ? अधिवनं लक्ष्यमनुधावन् अनुचरैर्वियुक्तः, पिपासाकुलकण्ठः, एकस्य ऋषेः आश्रमपदमगच्छम् । तमेवानर्थमेकमचीकरम् ।

धौम्यः—(आश्चर्यमुद्रया) एवम् । राजन् ? कथ्यतां, शीघ्रमभिधीयतां कीदृशोऽसावनर्थः ?

परीक्षितः—किं कथयामि गुरुदेव ? निन्द्यस्य [illegible]स्य कर्मणः वर्णने शतधा भिद्यते हृदयम् । तथापि अस्ति चेत् कौतूहलं श्रूयताम्—

ध्यानमग्नमुनेः कंठे मृतं सर्पं समाक्षिपम् ।
प्रावोचं दारुणं वाक्यं मर्यादां स्वां व्यलंघयम् ।।

धौम्यः–कष्टम्-कष्टम् महत् कष्टम् । राजन् ? त्वादृशस्य पुण्यात्मनश्चित्ते कथं समुत्पन्नस्तादृशो दुर्भावः ?

मन्त्री–नूनमत्र केनापि कारणेन भवितव्यम् ।

परीक्षितः—एतत्तु गुरुवर्या एव निर्णेतुं शक्नुवन्ति ।

धौम्यः—महाराज ? सम्प्रति भवति द्वापरस्य पर्यवसानं समुदयश्च पापस्य कलेः । एतदेव चात्र हेतुरिति प्रतिभाति मे ।

परीक्षितः—(हस्तौ सम्मेल्य) धन्याः श्रीमन्तः । शोभनं स्मारितातीता घटना ।

धौम्यः–कीदृशी वर्ततेऽतीता घटना राजन् ? शीघ्रमभिधेयं, वर्द्धते नः कौतूहलम् ।

परीक्षितः—लोकानुरञ्जनपरायणेन मया राज्येषु भ्रमता कदाचिदवतीर्णमेकं ब्राह्मणस्य गृहम् ।

धौम्यः—ततस्ततः ।

परीक्षितः—तत्र च दृष्टो मया भयङ्करवेशः कलिः ।

धौम्यः—(चकितः सन्) किं भवता साक्षात् दृष्टः कलिः ?

परीक्षितः—अथ किम् । ब्राह्मणं निर्दयं ताडयन्नसौ दृष्टो मया ।

धौम्यः—ततस्ततः ।

परीक्षितः—तस्य दारुणं कर्म दर्शं दर्शं यदा नापारयमात्मानमवरोद्धुं तदा धनुरुद्यम्य यावत् प्रोद्यतोऽहं तस्य प्राणान्तं कर्तुं तावदसौ मम चरणयोः पपात अकामयच्च स्वनिवासयोग्यं स्थानं किमपि ।

धौम्यः—(उद्विग्नः सन्) अपि प्रतिश्रुतं कच्चित् तस्य स्थानं महाराजेन ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परीक्षितः—आम् भगवन् ! धर्म्यं शरणागतरक्षणमित्यालोच्य प्रतिश्रुतं तस्य स्थानम्

धौम्यः—किं किं स्थानं लब्धं तेन पापने ?

परीक्षितः—काञ्चनम्, सुरालयः, द्यूतस्थानम् वेश्यावेश्म च निवासाय मत्तः प्राप्तानि तेन।

धौम्यः—विदितं खलु सर्वं मे राजन् ? त्वाम् वञ्चयित्वा स्थानमुपलभ्य कल्पितस्तेन तव स्वर्णमुकुटे निवासः। अत एव कारितं तेनानभीष्टमिदं कर्म भवद्भिः।

परीक्षितः—यद्येवं तर्हि अद्यप्रभृति न धारयिष्यामि स्वर्णमुकुटम्। स्वर्णोपेतं धनुरपि दूरं करिष्यामि। किं बहुना, निखिलं स्वर्णभाण्डागारं याचकेषु विभज्य वितरिष्यामि।

धौम्यः—मा मैवम्। एवमाचरन् भवान् ब्राह्मणानाम् याचकानाञ्च गृहेषु स्वर्णं कल्पयित्वा कलिप्रतिष्ठानेन पापभाग् भविष्यति। धनुषस्त्यागेन च रक्षाव्यवस्थायां शैथिल्यमापाद्य जगन्निर्मर्यादं कृत्वा भूयसे कालाय कलङ्कितश्च भविष्यति। अतः अस्थाने खल्वियं तवोद्विग्नता

(ततः प्रविशति द्वारपालः)

द्वारपालः—जयतु जयतु राजन्यमौलिमुकुटायमानो महाराजः। एष खलु महर्षिशमीकाश्रमात् सम्प्राप्तः कोऽपि प्रतीक्षते द्वारि पटुर्ब्रह्मचारिर्वटुः।

परीक्षितः—शीघ्रं प्रवेशय तं ब्रह्मचारिणं सबहुमानम्।

(द्वारपालः ब्रह्मचारिणं प्रवेशयति)

परीक्षितः—आगम्यतां, सनाथ्यतां स्थलमिदं भगवन् ? अपि नाम वर्तते किमपि विशिष्टमुद्देश्यमत्रागमनस्य ?

आरुणिः—(उद्विग्नः सन्) किं कथयामि राजन् ? दारुणोदन्तोदीरणे वेपते मे हृदयम्। गुरुणाज्ञप्तोऽपि अनीशोऽस्मि वक्तुं किमपि।

परीक्षितः—मैवम्। गुरुणाज्ञप्तो भवान् अवश्यमेवाख्यातुमर्हति तत्र भवतः आदेशम्।

आरुणिः—नहि चिखेदयिष्यामि, न वा जिज्ञापयिषामि भवन्तं तथापि आग्रहश्चेत् श्रोतुं तदा सावधानेन भवितव्यं भवता। पतितस्तवोपरि शमीकपुत्रस्य शृङ्गिणः दुर्दान्तो भयङ्करः शापः।

धौम्यः—(उद्विग्नः सन्) कीदृशः शापः, कथं शापः, कदा, केन हेतुना शापः ? स्पष्टमविकलं उच्यतां तावत्।

आरुणिः—भगवन् ! श्रूयतां यदि कौतूहलम्। महर्षिशमीकस्य गले महाराजेनानेन निक्षिप्तो भयङ्करः सर्पः। ततः कुपितस्तत्पुत्रः शृङ्गी राजानमशीशपत् यत्—

दक्ष्यति त्वां महासर्पः सप्तमेऽह्नि तक्षकः
दत्त्वैवं दारुणं शापं मनस्तापमशीशमत्।

परीक्षितः—लब्धं मया स्वकृत्यस्य फलं कलियुगेन प्रथममहमेव लक्ष्यीकृतः। अस्तु अपरोऽपि वर्तते कश्चन संदेशः ऋषिवरस्य ?

आरुणिः—आदिष्टं तेन महर्षिणा यत् सप्तदिनं यावत् भगवत्पूजनभजनकीर्तनादिषु एवातिवाहनीयः समयः। येन सद्गतिप्राप्तौ न जायेत कश्चन प्रत्यवायः।

जनमेजयः—(क्रुद्धः सन्) केनेदमाकाशं पुष्पायितं कमठीस्तनायितनि शशश्च शृङ्गायितो येन मयि जीवति सति काम्यते मे पितुरेतादृशमनिष्टम्। प्रतिजानेहं सर्वेषां तत्रभवतां पुरस्तात्।

धरामिमां चापि तथान्तरिक्षं
क्षणेन सर्वं परिवर्तयिष्ये।
स तक्षकः स्थास्यति यत्र नाग
स्तत्रैव तस्य प्रलयं करिष्ये॥

(धनुषि बाणमारोप्य) अरे तक्षक हतक ! कुत्रासि त्वमधुना ? आयाहि ? यावत् पदात् पदमपि न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रचलिष्यसि तावत्मम बाणविद्धः यमलोकातिथिः सम्पत्स्यसे ।

परीक्षितः—वत्स ? शान्तो भव । सर्वं वै सम्भाव्यते भाग्यानुसारम् । जातं तदेव यद् भवितव्यमासीत् ।

जनमेजयः—किमिदं भवितव्यं नाम । अहं सर्वं खलु भवितव्यमन्यथयितुं समर्थोऽस्मि । पितुः कृते मे शक्तिः, बलं, किं बहुना जीवनञ्चापिव्रमस्ति ।

परीक्षितः—वत्स ? शान्तेन मनसा विचार्यताम् ।

अवश्यं भाविनो भावा भवन्ति महतामपि ।

पूर्वमपराद्धं मयैव, तदनन्तरमेव शप्तोऽहं शृङ्गिणा । कस्त्वत्र दोषः ऋषेः ? को वा दोषः तक्षकस्य ? वत्स ? एतदेव भवितव्यमित्युच्यते । तस्मात् शान्तो भव ?

जनमेजयः—अस्तु तावत् महर्षिवराणामादेशानुसारं धार्मिकायोजनम् । परन्तु तक्षकात् भवन्तं रक्षितुं मयापि यत्नो विधेयः । इति वर्तते मामकीना अभ्यर्थना ।

धौम्यः—राजन् ? ऋषिकुमारस्य शापो नान्यथा भावी । यतो हि स ब्रह्मतेजाः सत्यसंकल्पः । अतः शमीकस्य महर्षेः आदेशानुसारं प्रचलितुमर्हति सप्तदिनं यावत् भागवतीकथा अर्चना, वन्दना, अभ्यर्थना च ।

परीक्षितः—अस्तु, तावदेवमेव । परन्तु कीदृशं स्यात् धार्मिकायोजनम् ? कथं वा प्रचलेत् भागवती अर्चना वन्दना वा ?

धौम्यः—राजन् ?, पूर्वं तावत् गन्तव्यं भवद्भिः पावनं गंगातटं सम्प्राप्तं च तत्र भवन्तं विज्ञाय त्रिकालज्ञाः महर्षिवराः स्वयमेव समेष्यन्ति । समुपस्थितेषु तेषु विचार्य निर्णेष्यते कीदृशं स्यात् धार्मिकायोजनमिति ।

परीक्षितः-(मन्त्रिणं प्रति) भो भो मन्त्रिन् ? त्वरितमेव सम्पाद्यताम् गंगातटगमनव्यवस्था ।

मन्त्री—देव, सर्वमचिरादेव साधयिष्यते ।

(पटाक्षेपः)

क्रमशः

दी अवध शूगर मिल्स लिमिटेड

प्रधान कार्यालय :-
इण्डस्ट्री हाउस
१५९ चर्च गेट रिक्लेमेशन
बम्बई-१

मिल्स :-
हरगांव
जिला-सीतापुर
उत्तरप्रदेश

निर्माता :—
शुद्धा, श्वेता, कणवती शर्करा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान प्राच्यविद्या प्रतिष्ठान, जोधपुर

– द्वारा –

शोध, संदर्भ एवं दुर्लभ महत्त्वपूर्ण ग्रंथों का

राजस्थान पुरातन ग्रंथमाला के अन्तर्गत प्रकाशन

प्रकाशित ग्रंथों की सूची

(ख) राजस्थानी–हिन्दी

प्रकाशन का नाम	सम्पादक	मूल्य
कान्हड़दे प्रबन्ध	प्रो० के० वी० व्यास	रु० ६२-२५
कयामखां रासा	डा० दशरथ शर्मा और अगरचन्द भंवरलाल नाहटा	,, ४-७५
लावा रासा	श्रीमहताबचन्द खारेड़	,, ३-७५
बांकीदास री ख्यात	श्रीनरोत्तमदास स्वामी	,, ५-५०
राजस्थान साहित्य संग्रह भाग १	,, ,, ,,	,, २-२५
,, ,, ,, भाग २	डा० पुरुषोत्तमदास मेनारिया	,, २-७५
कवीन्द्रकल्पलता	रानी लक्ष्मीकुमारी चूण्डावत	,, २-००
जुगलविलास	,, ,, ,,	,, १-७५
भगतमाल	श्री उदयराज उज्ज्वल	,, १-७५
राजस्थान, पुरातत्व मंदिर के हस्त-लिखित ग्रंथों की सूची भाग १	पद्मश्री मुनि जिनविजय, पुरातत्वाचार्य	,, ७-५०
राजस्थान प्राच्यविद्या प्रतिष्ठान हस्त-लिखित ग्रंथों की सूची भाग २	श्री गोपालनारायण बहुरा	,, १२-००
राजस्थान हस्तलिखित ग्रंथ सूची भाग १	पद्मश्री मुनि जिनविजय, पुरातत्वाचार्य	,, ४-५०
,, ,, ,, भाग २	डा० पुरुषोत्तमलाल मेनारिया	,, २-७५
स्व० पुरोहित हरिनारायणजी विद्याभूषण ग्रंथ संग्रह	श्री गोपालनारायण बहुरा	,, ६-२५
मुहता नैणसी री ख्यात भाग १	श्री बदरीप्रसाद साकरिया	,, ८-५०
,, ,, ,, भाग २	,, ,, ,,	,, ९-५०
,, ,, ,, भाग ३	,, ,, ,,	,, ८-००
,, ,, ,, भाग ४	,, ,, ,,	,, ८-७५
राजस्थानी साहित्य संग्रह भाग ३	श्री लक्ष्मीनारायण गोस्वामी	,, ५-५०
सूरजप्रकाश भाग १	श्री सीताराम लालस	,, ८-००
,, भाग २	,, ,, ,,	,, ९-५०
,, भाग ३	,, ,, ,,	,, ९-७५
नेहतरंग	श्री रामप्रसाद दाधीच	,, ४-००
मत्स्य-प्रदेश की हिन्दी साहित्य को देन	डा० मोतीलाल गुप्त	,, [illegible]-००

पुस्तक विक्रेताओं को २५ प्रतिशत कमीशन दिया जाता है।

(राजस्थान सरकार द्वारा प्रसारित)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिपासाया मरुभूमौ महाकविः शेली

मूललेखकः–श्रीइलाचन्द्रजोशीमहाभागः, अनुवादकः–विद्याभूषणः श्रीगणेशरामशर्मा, डूंगरपुरम्

पूर्वानुवृत्तम्—

लोकाः खल्वद्यापि च शेलिकवेः पक्षमाश्रित्य तस्य निर्दोषतां प्रमाणयन्तस्तदेतत् कथयन्ति यदेकस्य प्रतिभाशालिनः कवेस्तदिदं स्वाभाविकमासीद्यत् स वैवाहिकबन्धनेन सम्बद्धानामात्मनः क्रान्तिकारिणां विचाराणां यथार्थरूपप्रदानाय हैरियटबालां तत्याजेति। ते नु कदाचिदेतन्न जानते यत् स्वकीयानां सिद्धान्तानां कीदृश्या दुर्गतेरनुभवं शेली स्वयं कुर्वाणोऽभूत्! घनाह णायैव केवलं सोऽधुनावधि स्वस्य परित्यक्तायाः पत्न्याः शरणागतोऽभूत्। उत्तमर्णानां भयादेव स इतस्ततः पलायनायेदानीं यावद्विवशो बाध्यश्चाभूत्। स चाधुनावधि हैरियटबालायै मिथ्या विश्वासं दातुं चेष्टमानोऽभूद्यत् स न तां परित्यक्तवानिति।

कांश्चिन्मासान् यावद्धैरियटबालया सार्द्धं तस्य सम्पर्को येन केनापि च रूपेण विद्यमानो बभूव। तयो र्द्वयोरनयोरन्तिमः साक्षात्कारः २२, अप्रेल १८१५ दिने बभूव। अस्मिन् समयान्तरे काश्चन महत्त्वपूर्णा घटनाः समघटन्त।

अथ च ६, जनवरी १८१५ दिवसे शेलिकवेः पितामहः सरबिशीशेली ८३ वर्षमिते स्वायुषि स्वर्गं जगाम। शेली जजान यत्तस्य पितामहस्तं बहुप्रीणयन्नासीत्, स च निश्चयेनोत्तराधिकाररूपे स्वपौत्रस्य (शेलिकवेः) कृते पर्याप्तां सम्पदं विसृष्टवान् स्यात्। ततः स गृहं ययौ। स तत्र विज्ञातवान् यत्तस्य पितामहः सरबिशी स्वसम्पत्तेयं भागं तन्नाम्ना विससर्ज, तत्रायमपवादोऽपि च तेन विहितोऽस्ति यत्तस्य (शेलिनः) पिता टिमो[illegible]शेली यदि वाञ्छेत्तदा तं सम्पदंशं क्री[illegible]वा स्वकनीयसः पुत्रस्य जान इत्याख्यस्य [illegible]नापि दातुं शक्नुयादिति। टिमोथी जजान यत्तस्याकर्मण्यः पुत्रः (शेली) स्वभागस्य सम्पत्तिमन्येभ्यो दातुं वा धनविनिमयेन विक्रेतुं शक्नोति–इति। अतः सः स्वयमेव तां सम्पत्तिं क्रेतुं विनिश्चिक्ये। अस्य व्यापारस्यानुसारमेतन्निश्चितं यत् स शेलिने–स्वपुत्राय–किलैकसहस्रपौण्डमुद्रामित धनं वार्षिकं तथा पञ्चसहस्रपौण्डमुद्रामितं धनराशिं तत्कालं सद्यः प्रदास्यतीति। शेली तमिमं समयं सहर्षं स्वीचक्रे। स हि सद्यो लब्धाद्धनराशेस्तत्कालमेकसहस्रपौण्डमुद्रा गाडविनाय प्रददौ, यदर्थं सः पूर्वत एव प्रतिश्रुतोऽभूत्। शतद्वयपौण्डमुद्रामितं धनं स हैरियटबालायै प्रेषयामास तथा शतद्वयपौण्डप्रमाणं धनं वार्षिकं तस्यै प्रदातुं प्रतिश्रुतवान्।

गाडविनमहाशयस्य विषये लोकानामेतावत्पर्यन्तमपीदं कथनमासीद्यत् स स्वात्मनो द्वेऽपि च कन्यके (मेरीगाडविनाख्या तथा च जेनक्लेवरमांट इति) पञ्चदश-पञ्चदशशतः पौण्डमुद्राणां शेलिकवे र्हस्ते विचिक्रायेति। सत्यं तथ्यं च यद्वा तद्वास्तु, परमेतत्तु निश्चितमास्ते यन्मुक्तप्रणयस्य प्रचारकोऽसौ गाडविनः शेलिसकाशादन्तपर्यन्तं धनमपहरन् बभूवेति।

भाग्यस्य सवतोऽधिकं महती विकटा विडम्बना सेयं बभूव यदेकस्यातीव सुप्रतिष्ठितस्य महासामन्तस्यात्मजोऽपि स एषस्तरुणो महाकविर्जीवनपर्यन्तमार्थिकसंकटग्रस्तस्तस्थौ तथा तेनैव कारणेनात्यन्तं दुर्गतिपूर्णासु परिस्थितिषु निरन्तरं समुद्ग्रथितो व्यथितो व्यग्रश्चास्यात्। वैयक्तिकस्यात्मनः स्वातन्त्र्ये तथा बाह्याभ्यन्तरप्रकृतेरपूर्वसौन्दर्यस्योच्चतमेषु विहारेषु तादात्म्येन विलीनतार्थं निरन्तरं लालायितस्य, वाण्या वरपुत्रस्यास्य शेलिकवेः सोऽयमितिहासो वास्तविकेऽर्थे बतारन्तं दयनीयः शोचनीयश्च वरी-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

र्वति। एकदा सः (शेली) स्वसुहृदा पीकाकमहाशयेन साकं कवेर्वर्डसवर्थस्य काव्यसम्बद्धं वार्तालापं कुर्वाणोऽभूत्। वर्डसवर्थस्यैकस्या रुचिरायाः कविताया अंशस्य श्रावणानन्तरं स सहसा प्रोवाच—"अपि त्वमस्य कल्पनां कर्तुं पारयसे, यद्यदि वर्डस्वर्थोऽहमिवोत्तमर्णः परिक्लिष्टो भवितुं बाध्योऽभविष्यत्तथापि स नन्वेतादृशीः सुन्दरीः कविताः प्रणेतुं प्राभविष्यन्नाम ? काव्यरचनार्थं पूर्णतो मानसिकोऽवकाशोऽपेक्ष्यते"।

सैषा शेलिकवेरनन्यसाधारणी प्रतिभासीद्यत् स खल्वेतावतीषु विडम्बनासु सतीष्वपि काव्यप्रणयनार्थमवकाशं संसाधयंस्तस्थौ तथा सुन्दरीभ्योऽपि सुन्दरतराः प्रोच्चकल्पनाविहारललिताः कविता लिखन्विलिखंस्तस्थौ।

अथ १८१५ ईषवीय वर्षस्य वसन्तागमसमये यदा मेरी गर्भवती बभूव तथा नाधिकं सञ्चारसक्षमाभूत्तदा तस्या (विमातुः पुत्री) भगिनी (याधुना 'क्लेयर' इति नाम्ना स्वपरिचयं दातुमारभत) शेलिना सह स्वप्रणयस्य गतिं वर्धयन्ती समभूत्। मेरी सर्वमप्येतत् पश्यन्ती बभूव परन्तु मौनमास्थितासीत्। शेली स्वात्मानमेकाकिनं मानुभवतु तदिदं सा विशुद्धेन सत्येन च मनसा ववाञ्छ। तस्या असौ द्रढीयान् हि विश्वासो बभूव यद्धि प्रणयलीलानामविशुद्धं 'क्रीडाविलासौषधम्' वर्तत इति। सत्यप्येवं यदा कदा तन्मनश्चाञ्चल्यमञ्चति स्म तथा सोद्विग्ना भवति स्म 'को जानीते, पुरुषस्य हृदयं क नु कदा कस्मिन् समये परिवर्तेत'!

अस्मिन्नेव समयान्तराले हॉगमहाशयस्तत्र प्राप। तथा चैकदा स मेर्याः पुरतस्तथैव प्रणयप्रस्तावमुपस्थापितवान् यथा कदाचिद्धैरियटबालायाः समक्षं निदधे। मेरी तस्य सुन्दरस्य पुरुषस्य प्रस्तावमशोभनं तु नाभावयत्, परं तु सा परिस्थितिं गम्भीरां विधातुं नैच्छनतो हॉगमहाशयो नैराश्यमालिङ्गितुं विवशो बभूव।

तदनन्तरमेव हि २२, फरवरीदिने मेरी शिशुमेकम् प्रासूत। शिशुरसौ सप्तमे मास्युत्ते देऽतो दुर्बलोऽभूत्। सप्ताहद्वयानन्तरं स ममार।

अथागामिनि वर्षे, सन् १८१६ ईषवीयवर्षस्यारम्भे शेलिकवे द्वितीयं महत्त्वपूर्णं च काव्यं 'एलेस्टर' इत्याख्यं प्रचकाशे। अस्मिन् गीततत्त्वमूलके काव्ये कविरसौ शेलो तथाविधं रूपकमेकं निबबन्ध, यस्मिन् सः कविजीवनस्य महतीनांमुदाराणां चाकाङ्क्षाणामसाफल्यस्य मार्मिकं चित्रणं कृतवान्। तथापि नायकस्य जीवनस्य दुःखान्तायां परिणतौ सत्यामपि कविना सत्ये शिवे मंगले च सुदृढो विश्वासोऽभिव्यञ्जितोऽस्ति। काव्यस्यास्य तत्कालीने साहित्य-संसारे महतीं चर्चा बभूव तथाद्यापि च तत्काव्यं स्वकीयं विशिष्टं पदं रक्षति।

अथ च सन् १८१६ ईषवीयस्य वर्षस्य मई मासे शेली, मेरो, क्लेयर (जेन) इति त्रयोऽपि जेनेवां प्रतिप्रतस्थिरे। तत्र प्रथमवारं शेलिकवेर्बायरनमहाकविना साकं साक्षात्कारो बभूव। विषयेऽत्र शेलो स्वस्यैकं मित्रं प्रति लिलेख—"लाडबायरनमहाशयोऽतीवैको हृदयाकर्षकोऽस्ति व्यक्तिविशेषः, परन्तु किं नेद शोचनीयमास्ते यदेतादृक् प्रतिभाशाली कविनार्याः, प्रणयस्य च विषये घृणितां धारणां धत्ते"?

किमण्यास्ताम्, शीघ्रमेव हि तयो र्द्वयोर्मिथोऽतीवघनिष्ठता भवितुमारेभे। यद्यपि तयो र्द्वयोः स्वभावे केवलमेतदेव साम्यमासोद्यत्तौ द्वावपि समाजद्वारा बहिष्कृतावास्ताम्। द्वयोरपि भिन्ना रुचयोऽभूवन्। शेलिकविः स्वस्य समस्तासु दुश्चेष्टासु सतीष्वपि च प्रणय-तत्त्वस्य तन्निहितस्याध्यात्मिकस्य सौन्दर्यस्योपासको बभूव यदा बायरनमहाशयः प्रणयस्य शारीरेण पक्षे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नैव प्रभावितोऽभूत् । शारीरस्य प्रणयस्य रसं बायरनः किलैतावन्तं सीमानं यावदातृप्ति पानं कृतवानासीद्यत् तत्प्रतिक्रियास्वरूपं तस्य नारीमात्रस्य व्यक्तित्वादरुचिर्भवितुमारभत । तस्यैवं विधायां मनःस्थितौ क्लेयरतरुणी (जेन क्लेयरमांट) सौन्दर्य-प्रणययोः प्रेतात्मेव तं सर्वतो मामण्डायितुमारेभे ।

वासना-क्षुत्क्षामा सैषा किशोरीशेलिकवेस्तुष्टिमाप्तुं न शेके तयाधुना विश्व-विख्यातः कविस्तथा च कुख्यातः प्रणयी सम्प्राप्तः । बायरनस्य सुन्दरे प्रभावशालिनि च व्यक्तित्वे तथा च तस्य किमपि किमप्युद्विग्नयोः किन्तु मादकयोर्नेत्रयोः स्वकीयस्य क्षुद्रव्यक्तित्वस्य विलीनीकरणस्य तीव्राऽदम्या चाकाङ्क्षा तस्या मनसि समुज्जजागार । बायरनस्तां वारम्वारं तिरश्चक्रे, भूयो भूयोऽपमेने परन्तु सा समस्तामपि लज्जां, सङ्कोचं च तरलीकृत्य पिबन्ती तमनुसंलग्ना तस्थे ।

यद्वा तद्वास्तु, जेनेवायां शेलि-बायरनयोर्द्वयोर्मिथोऽतीव घनिष्ठता सम्पेदे । बायरनोऽत्यर्थं दुरभिमानदृप्तोऽभूत्तथा च स केनाप्यांग्लेन लेखकेन, कविना च सह सौहृदं न ररक्ष, परन्तु सः शेलि-कविं 'विशुद्धात्मानं' प्राप, तस्य च प्रशांतप्रकृतेः पुरतो बायरनस्य समस्तोऽपि गर्वो-दुरभिमानः प्रशशाम । द्वावपि च तावेनौ सुहृदौ नौकाविहाररसिकावास्ताम् । प्रतिदिनं तौ नावमारुह्य सरोवरे विहरमाणौ जीवनगतानां, साहित्यसम्बद्धानां च विषयाणां चर्चायां निमग्नौ बभूवतुः । द्वयोरपि विचारेषु प्रायेण मतभेदो विजृम्भते स्म, परन्तु तयोर्द्वयोरपि विचाराः परस्परं विरोधिनो न भवन्तः पूरका बभूवुः ।

जेनेवा रूसोमहाशयस्य जन्मभूमिरासीत्तथा रूसोमहाशयस्तत्रत्यायाः प्रकृतेर्यन्मनोमोहकं वर्णनं स्वस्य विख्याते उपन्यासे 'ला नूनेव इलोइज' इत्याख्ये चकार, तच्छेली महता प्रेम्णा पपाठ । तानि दृश्याणि प्रत्यक्षमवलोक्य शेली विद्रोहिणं लेखकं रूसोमहाशयं भूयो भूयः सस्मार । रूसोमहाशयस्य जीवनस्य सर्वास्वपि चासफलतासु सतीषु शेली तं 'पुण्यात्मानं' मेने ।

अस्यां यात्रायां शेलिकविः स्वकीया अनेकाः प्रसिद्धाः कविताः प्रणिनाय, तथा बायरनकविरपि स्वस्य विश्वविख्यातं काव्यं 'प्रिजनर-आफ शियां' इति नामकं तत्रैव रचयामास । साहित्यिकं वातावरणं तस्मिन्नेकान्ते पार्वतीयाञ्चले किलेत्थं प्रससार (अस्य जीवनी-लेखकः श्रीइलाचन्द्रजोशीमहाभागोऽत्र वक्ति) यदन्यस्य जनस्य तु का कथा स्वयं ममापि च लेखनप्रेरणाभ्युदियाय । अस्याः प्रेरणाया किलैका लध्वीव किन्तु रुचिरा कथास्ते ।

बायरनमहाशयः स्वसम्बन्धे-इंगलैंडे समुत्थिताज्जनरवविप्लवादुद्विजितो भूत्वा जीवनपर्यन्तं मातृभूमेस्त्यागस्य किश्चयं कृत्वाऽऽगतोऽभूत् । तेन साकं केचनानुचराश्चाप्यवर्तन्त येष्वेको जान-विलियम-पोलीडोरिति नामको द्रावकरोऽभूत् । स एष द्रावकरो विचित्रप्रकृतिकोऽभूत् । स हि कविरूपेण यशोऽधिगन्तुमियेष, परन्तु तस्य वास्तविकी रुचिर्भूत-प्रेत-मन्त्र-तन्त्रादिभिः सम्बन्धितेषु विषयेषु बभूव । पोलोडोर महाशयो भूतप्रेतादीनां चर्चामचालयत् । स हि प्रेतयोनेरस्तित्वे विशश्वास तथा तत्पक्षे 'वैज्ञानिकानि प्रमाणानि' समुपस्थापयन् बभूव । अस्मिन्नेव प्रसङ्ग-क्रमे प्रेतैः सम्बद्धामेकां शमण्यदेशीयां कथां पठित्वा सोऽश्रावयत् । तदनन्तरं बायरनमहाशयः कोलरिजस्य 'क्रिस्टाबेल' इत्यस्य पुस्तकस्य काश्चन पङ्क्तीरश्रावयत् । तासु पङ्क्तिष्वेकस्मिन् स्थले कस्याश्चनैकस्याः सुन्दर्या युवत्याः सम्बन्धे तेन प्रोक्तमभूत्—'दृश्यताम्, दृश्यताम् तद्वक्षः-स्थलम् !' तस्मिन् क्षणे शेली मेरीं प्रति वीक्षमाणोऽभूत् । तद्वाक्यस्य श्रवणसमकालमेव सहसा भयादाक्रोशन्-शेली

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कक्षाद्बहिर्निर्जगाम । सर्वेऽप्याश्चर्यचकिता बभूवुः। यदा किञ्चित्समयानन्तरं शेली परिवृत्याजगाम तदा स उवाच यन्मेरीं प्रति पश्यन् स तद्वाक्यमश्रृणोत्तदा सः सहसा बाल्यकाले श्रुतपूर्वमिकां कथां सस्मार, यस्यामेकस्या नार्या वक्षःस्थलमुभयतो हि पार्श्वयोर्द्वयोश्चक्षुःप्रकाशं नयनयुगलं जटित-खचितमिवासीदिति । तदत्र सस्तद्दृश्यं संस्मरन् स्वकल्पनयैव स्वयमुद्विजितः सन् बहिः पलायनं कृतवानिति च ।

श्रुत्वैतत्तकथनं सर्वेऽपि जहसुः परं बायरनमहाशयस्य मनस्येका कल्पना प्रास्फुरत् । सः प्रस्तावमिमं चक्रे यद्धि यावन्तो जना अत्र निषण्णाः सन्ति, ते सर्वेऽपि प्रेतसम्बन्धिनीमेकैकां कथां लिखन्त्विति । सर्वादौ तदेतत् कार्यं मेर्याऽऽधीनं समर्पितम् । फलस्वरूपं मेरी किलेकां सुदीर्घाम् बृहतीं कथां लिखितवती, यस्याः शीर्षकम् भूत-'फ्रैंकेन्स्टाइनस्तथा च तस्य विकृताङ्गो दैत्यः ।' सैषा कथा तत्कालीने यूरोपीये साहित्यिके जगति शेली-कवेः काव्येभ्योऽप्यतितरां प्रसिद्धिमाससाद । अथाद्यापि च तस्याः कथायाः फलस्वरूपं फ्रैंकेन्स्टाइनः खल्वेकं प्रतीकमिव वर्तमानमास्ते । शेलिकवेर्मृत्योः कतिचनवर्षेभ्योऽनन्तरं मेरी किलैकमुपन्यासमपि 'लोडोर' इति नामकं लिलेख, यस्य नायको बायरन-शेलिनोः सम्मिलितस्य चरित्रस्य प्रतिनिधित्वं करोति । एकमन्यत् पुस्तकं 'अन्तिमः पुरुषः (लास्टमेन) इति नामकं मेरी लिलेख यद्धि शेलिकवेर्जीवनमध्याधारितमास्ते ।

८ अगस्त, १८१६ दिने शेलो पुनः—तथा चान्तिमवारं-इंगलैंड जगाम । बायरनस्तत्रैव तस्थौ । मेरीं क्लेयरबालां च बाथ-नामके स्थाने परित्यज्य शेली स्वयं लन्दननगरमुपजगाम। मेरी तमिममाभासमुपलब्धवती बभूव, यद्धि क्लेयरबालाया जन्म-जन्मान्तराणां साधना पूर्णतां जगाम—अर्थात् क्लेयरबालायां बायरनसंयोगाद् गर्भस्थितिर्बभूवेति ! परं तमिमं विषयं मेरी सहजरूपेण जग्राह । सा प्रकरणमिद क्लेयरबालायाः कृते गौरवपूर्णमिव मेने । तावत्पर्यन्तं तस्याः शेलिकवेश्चैयमेय धारणासीद्यद्धि बायरनः क्लेयरबालां प्रति प्रणयानुरक्तोऽस्तीति । तौ नाजानताम्, यद्बायरनद्वारा तिरस्कृतापि क्लेयरबाला कथमिव-केन वा प्रकारेण तमनुसंलग्ना सन्ततं समतिष्ठतेति ।

यदा शेली कियद्भ्यो दिनेभ्योऽनन्तरं लन्दननगराद् बाथ-स्थलमाजगाम तदा मेरी तं क्लेयरबालासम्बद्धं सर्वमपि च वृत्तान्तं कथयामास । शेली भृशमुद्विविजे, परं किमपि नो बभाषे । सोऽनु बभूव यत् स हैरियट-मेर्याविव जेन क्लेरियटमांटबालामपि च मुक्त-प्रणयस्य महत्ताया यं हि पाठमपाठयत् तस्यैवेदं प्रत्यक्षं फलं निष्पेद इति ।

क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ श्रीशिवराज्योदये महाकाव्ये

३७ सर्गः

महाकविः डॉ० श्रीधरभास्करवर्णेकरः, डी.लिट्, नागपुरम्

अथार्धरात्रे घनवर्षणार्द्रे
प्रतिध्वनत्स्फूर्जथुभीतभूते ।
मुहुःस्फुरद्वैद्युतभासि केचित्
चेरुश्चरा जौहरवाहिनीयाः ॥१॥

पर्णालपर्यन्तभुवि प्रभूत-
शिलोच्चयायां घनशैवलयाम् ।
पदे पदे भूरिपरिस्खलन्तो
यान्ति स्म ते विश्रमितुं निवेशम् ॥२॥

तेष्वाह कश्चिच्चर आत्मनैव
पर्जन्यसंक्लिन्नसमस्तचैलः ।
अद्यान्तिमं पर्यटनं निशीथे
श्वो यच्छिवाजिः शरणोन्मुखो नः ॥३॥

अन्योऽवदत् कश्चन रुग्णपादः
गर्ताद् बहिर्निष्क्रमितुं सयत्नः ।
नातः परं कृच्छ्रमिदं सहिष्ये
वशं प्रपद्येत रिपुर्यतः श्वः ॥४॥

इति ब्रुवाणा भ्रमणातिखिन्ना
ध्वनत्सु मेघेष्वपि ते कथञ्चित् ।
तमिस्रगूढे घनगुल्मजाले
ऽशंकन्त धावन्नरयूथमारात् ॥५॥

निशम्य वाताहत वृक्षपर्ण-
तालायमानं पदपातशब्दम् ।
रूक्षस्वरं तिष्ठत तिष्ठतेति
श्रान्ताश्चरास्ते सकृदुज्जगर्जुः ॥६॥

साश्चर्यमालेक्यत तैः क्षणेन
निजाग्रतो धीरतयोह्यमानम् ।
कराङ्गुलीगण्यजनानुयातम्
नृवाह्यमेकं चतुरस्रयानम् ॥७॥

नितान्तपर्जन्यतमिस्रघोरे
कालेऽधुना गच्छत रे कुतः क ।
को वाऽथ कार्ऽस्मिश्चतुरस्रयाने
समुह्यतेऽनेन हि दुष्पथेन ॥८॥

अस्मिन् प्रदेशे न गताऽऽगता वा
पिपीलिका चाऽपि न वीक्षिता या ।
आरक्षिभिः सततजागरूकैः
चरैस्तथास्माभिरतीवदक्षैः ॥९॥

इत्येवमाकर्ण्य चरस्य वाचं
मूकायमाने सकले नृयूथे ।
उवाच कोऽप्यस्फुटमेकवाक्यं
निःसम्भ्रमं सम्भ्रमकारणं च ॥१०॥

आषाढमासस्य हि पूर्णिमायां
कुर्वन्ति भक्ता गुरुपादपूजाम् ।
तदद्य यात्येष तदर्थमेव
राजाऽस्मदीयो गुरुपादनिष्ठः ॥११॥

सम्पद्यते सद्गुरुपादपूजा
तावन्न सेवेत जलं कुतोऽन्नम् ।
राजाऽस्मदीयो ह्यत एव यामो
वेगाद्रिमार्गेण विना विरामम् ॥१२॥

श्रुत्वाऽपि राजेति पदं द्विरुक्तम्
अविश्वसन्तः श्रवणेन्द्रिये स्वे ।
भ्रमाभिभूताः सकलाश्चरास्ते
मुहूर्तमात्रं जगदुर्न किञ्चित् ॥१३॥

नितान्तमाश्चर्यहतेषु तेषु
चरेषु कश्चित् सहसा बभाण ।
प्रब्रूत सत्यं कतमः किमाह्वः
भूयस्सु राजस्वयमत्र राजा ॥१४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्यां महाराष्ट्रभुवि प्रभूताः
श्वसन्ति राजेत्ययथार्थसंज्ञाः ।
एकः परं जीवति तेषु राजा
शिवाजिरित्युज्ज्वलनामधेयः ॥१५॥

स एव यातीत्यवदन्नकस्मात्
सर्वेऽपि ते वाहनवाहकास्तान् ।
श्रुत्वैव तद्वाक्यममी समस्ताः
चराः स्वखड्गान् सहसोदकर्षन् ॥१६॥

ऊचुश्च तारस्वरमादिशन्तो
ह्यवैधसञ्चारकृतो जनांस्तान् ।
अलं पदक्षेपमितो विधाय
पश्चात् पुरो दक्षिणवामतो वा ॥१७॥

विजापुराधीश्वरवाहिनीया
आरक्षिणः स्मोऽत्र चिरं चरन्तः ।
अवैधसञ्चारमहापराधान्
जनान्निरोद्धुं च धृताधिकाराः ॥१८॥

यद्येष राजा स शिवाजिरेव
निरुद्ध आसीत् खलु योऽत्र दुर्गे ।
सेनापति प्रत्यविलम्बमेव
तं नेतुमेते वयमुद्यताः स्मः ॥१९॥

तदत्र युष्माभिरिहैव सर्वैः
यथास्थितं स्थेयमचेष्टमानैः ।
वृत्तान्तमेनं द्रुतमेव तावत्
सेनापतेः कर्णपथं नयामः ॥२०॥

कालेऽधुना कर्तुमकर्तुमत्र
सैन्ये समर्थो हि स एक एव ।
यन्निस्सरेद् वाक्यममुष्य वक्त्रात्
तदेव युष्मद्भवितव्यमद्य ॥२१॥

उक्त्वेति वाचं सहसा चरास्ते
संकेतशब्दं परितो जगर्जुः ।
निशम्य तं चैकपदे समन्तात्
प्रपेदिरे शस्त्रधराः प्रवीराः ॥२२॥

संरोध्य तैस्तान् नरयानवाहान्
शिवाजिना चापि पलायमानान् ।
स्पशा अमी पङ्किलगर्तगूढ-
पथेन सेनापतिमभ्यगच्छन् ॥२३॥

प्रबोधितोऽसाऽवतिगाढनिद्रा-
सुखावमग्नः प्रतिहाररक्षैः ।
प्रमृज्य नेत्रे पुरतो ददर्श
स्पशानमून् पङ्कविलीढचैलान् ॥२४॥

तत्सन्निधौ सत्वरमेत्य सर्वेऽ-
प्येकस्वरं हर्षविकस्वराक्षाः ।
भूशीर्षसंस्पर्शमतिप्रणम्य
बन्दीकृतस्ते रिपुरित्यवोचन् ॥२५॥

प्रगाढनिद्रातिवशं गतोऽसा-
वाकस्मिकं दृश्यमदो वचश्च ।
पश्यंश्च शृण्वन्क्षणमात्रमन्त-
र्मेने सुखस्वप्नमहं विलोके ॥२६॥

ततश्च नेत्रे परिमृज्य भूयः
श्रोत्रे च निष्पीड्य भुजौ विधूय ।
जृम्भाभिरास्यं च विवृत्य सोऽथ
जागर्तिमात्मन्यतिनिश्चिकाय ॥२७॥

पप्रच्छ चामूनतिहृष्टवक्त्रान्
आश्चर्यवद् वीरवरः स भूयः ।
कः को रिपुर्मे क्व कदा कथं रे
बन्दीकृतो ब्रूत सविस्तरं तत् ॥२८॥

ते प्रोचुरुच्चैः प्रकटाट्टहासाः
सेनापते भूमितलेऽखिलेऽस्मिन् ।
एको हि शत्रुस्तव योऽत्र दुर्गे
सकुण्ठितोऽद्यावधि सैन्यपाशे ॥२९॥

गच्छन्निशीथे चतुरस्रयानम्
अध्यास्य गूढं नरवृन्दनीतम् ।
अस्माभिरव्याहतजागरूकैः
वने निरुद्धः स शिवाजिरद्य ॥३०॥

श्रुत्वैव तद्वाक्यमपारहर्ष-
प्रोत्तुङ्गकल्लोलविलोलचेताः ।
स तीव्रकादम्बरभूरिपान-
प्रमत्तवत्ताण्डवितं चकार ॥३१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उद्घोषयन्नुच्चतरस्वरेण
नामानि वात्मप्रियबान्धवानाम् ।
स आह्वयामास तदैव सर्वान्
बन्धून् निजानन्दमिवोपभोक्तुम् ।।३२।।

आकर्ण्य सन्देशममुष्य सर्वे
ऽप्याश्चर्यमग्ना इव बान्धवास्ते ।
अन्ये तथैवाधिकृताः प्रवीराः
सेनापतेः सन्निकटेऽन्वधावन् ।।३३।।

प्रत्येकमाह स्म पुनः पुनश्च
स जौहरो गर्वित एकवाक्यम् ।
जानीहि जानीहि मयाऽद्य बद्धः
शिवाजिनामा गिरिमूषकोऽसौ ।।३४।।

त्वरध्वमस्मिन् क्षण एव सर्वे
ऽप्यानेतुमेनं द्रुतमस्मदग्रे ।
वनेऽवरुद्धः कपटे पटीयान्
स निस्सरेदाखुवदाशु गर्ते ।।३५।।

फतेहखानो न तथाफभुल्लः
न फाभलो वा न च कश्चिदन्यः ।
शशाक यं बन्धुमरिं कथञ्चित्
स मेऽधुना हस्तगतः शिवाजिः ।।३६।।

जामातरस्मिन् क्षण एव याहि
मसूद नूनं रिपुसूदनोऽसि ।
साम्राज्यं शत्रुं प्रपलायमानं
निर्बध्य मामानय रज्जुपाशैः ।।३७।।

आदेशमन्वेव हि जौहरस्य
जामातृभूतः स मसूदनामा ।
आनेतुमग्रे श्वशुरस्य शत्रुम्
अल्पेन सैन्येन समं प्रतस्थे ।।३८।।

तमोनिगूढे पथि भूरिपङ्के
सशैवलग्रावणि गाढगर्ते ।
पदे पदे ते बहुधा स्खलन्तो
ऽप्यगुः पुरस्ताद् यवनाः सवेगम् ।।३९।।

विद्युद्विभाद्योतितमन्धकारे
नृवृन्दमालेक्य च नातिदूरे ।
जगर्जुरुच्चैरखिलाः सहर्षं
प्राप्ता वयं तिष्ठत तिष्ठतेति ।।४०।।

पलायमानं पथि सन्निरुद्धं
शिवाजिमारक्षिभिरात्मनीनैः
समीपमभ्येत्य निरीक्ष्य भूयो
ससूद आनन्दमनन्तमाप ।।४१।।

कादम्बिनीच्छादितपूर्णचन्द्रे
तस्मिन्निशीथेऽल्पतरप्रकाशे ।
उष्णीषिनं श्मश्रुलमासनस्थं
विलोक्य निश्चिक्युरमुं शिवाजिम् ।।४२।।

प्रतीक्षमाणं श्वशुरं प्रतीमं
शिवाजिमाक्रष्टुमना मसूदः ।
तेनाध्वना कर्दमदुर्गमेण
यथागतं मंक्षु पुनः प्रतस्थे ।।४३।।

यथा यथाऽसौ शिविरे स्थितानां
दृक्पातसीमानिकटे प्रपेदे
तथा तथा जौहरवाहिनीनां
जयध्वनिर्व्योम्नि भृशं जजृम्भे ।।४४।।

प्राप्तः स्वहस्ते विजयोऽद्य साक्षात्
शिवाजिरूपेण चिरेप्सितोऽसौ ।
मत्वेति सेनापतिना सहैव
सर्वेऽपि योधाः ननृतुः सहर्षम् ।।४५।।

दृष्ट्वा पदक्षेपममुष्य पुंसः
ह्यधीरवीरोचितमात्तशङ्कः ।
स जौहरस्तुच्छतया तमुच्चैः
पप्रच्छ किं खल्वसि रे शिवाजिः ।।४६।।

उवाच मन्दं स युवाप्यभीतः
शिवाजिरेवाऽस्मि निजेन नाम्ना ।
बद्धो वृथारक्षिजनैस्तु मूढैः
वृत्त्या यतोऽहं खलु नापितोऽस्मि ।।४७।।

प्रकोष्ठमालेक्य विलोम तस्य
जात्याऽथ वृत्त्याऽपि च नापितस्य ।
स्ववञ्चने निर्गतसंशयास्ते
सम्प्राप्तलज्जा यवना बभूवुः ।।४८।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवाजिनामा स च नापितस्तैः
प्रवञ्चनोद्दीप्तमहाप्रकोपैः ।
अनेकशः काष्ठकशाप्रहारैः
प्रताडितो वेत्तुमशेषवृत्तम् ।।४६।।

स पीडितोऽप्याहतिभिर्नितान्तं
बिभेद नैषन्निजमौनमुद्राम् ।
आपत्सु भर्तुः खलु सेवकानां
रहस्य-संगोपनमेव धर्मः ।।५०।।

तयात्मनो वञ्चनया तदानीं
प्रतर्क्य शत्रोः कपटप्रयोगम् ।
स जौहरस्तत्क्षण एव सर्वान्
प्रस्थातुमाज्ञापयदात्मनीनान् ।।५१।।

मार्गे मार्गयितुं शिवं निशि तदा दुर्गान्तरं प्रस्थितं
संक्रुद्धो निजवञ्चनेन समरे हन्तुं च तं वञ्चकम् ।
तत्कालं महतीं तुरङ्गमचमूमादाय पत्त्यन्वितां
जामाता स हि जौहरस्य बलिनः
सेनापतेर्निर्ययौ ।।५२।।

आप 'भारती' के लिए क्या कर सकते हैं

१. ७) रु० भेजकर ग्राहक बनिये ।

२. अपने परिचित मित्रों को सम्मानार्ह सरक्षक, विशिष्ट संरक्षक, साधारण संरक्षक, सम्मान्य सहायक, आजीवन सदस्य अथवा स्थायी ग्राहक बनने को प्रेरित कीजिए ।

३. अपनी सुन्दर व विद्वत्तापूर्ण रचनाएं 'भारतो' में भेजिए ।

४. 'भारती' में अपने व्यवसाय के लिए विज्ञापन दीजिये व दूसरों को प्रेरित कोजिये ।

५. धन भेजकर भारतो को स्वावलम्बो बनने में सहायता कोजिये ।

६. 'भारती' के अभिकर्त्ता (प्रचारक) बनिए ।

७. 'भारती' की कमियां तथा सुधार के लिए हमें समय समय पर आपकी बहुमूल्य सम्मतियों से अवगत कराते रहिए।

८. आपके नगर के विद्वानों को 'भारती' में लेख सामग्री भेजने को प्रोत्साहित कीजिए। हमें विश्वास है कि श्रीमान् एक अथवा अनेक रीतियों से 'भारती' की सहायता के लिये अग्रेसर होते रहेंगे ।

विनीत—गिरिराजशर्मा, प्रबन्धसम्पादक
भारती भवन—गोपालजी का रास्ता, जयपुर (राजस्थान)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बढ़िया किस्म चाहिए?

तो वही चीजें खरीदिये, जिन पर एगमार्क का निशान लगा हो।

जो लोग हमेशा शुद्ध ग्रौर बढ़िया चीजें खरीदना चाहते हैं, वे घी, मक्खन, तेल, शहद, मसाले ग्रौर ग्रन्य ऐसी ही चीजें एगमार्क का लेबल देखकर ही खरीदते हैं।

पिछले वर्ष लगभग १५० करोड़ रु० के मूल्य की कृषि व दूध से जनित वस्तुग्रों पर एगमार्क के लेबल लगाये गये।

ग्रौर, २ करोड़ रु० से भी ज्यादा के मूल्यों की चीजों का निर्यात किया गया।

एगमार्क का निशान केवल उन्हीं चीजों पर लगाया जाता है, जिनको सरकार शोधशालाग्रों में भली-भांति परीक्षा कर लेती है। इसीलिये, ग्राप एगमार्क का निशान लगी चीजों पर पूरा-पूरा भरोसा कर सकते हैं।

एगमार्क का निशान शुद्धता ग्रौर बढ़िया किस्म का द्योतक है।

davp 68/482

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Cable : BOWREAH

Phone : 22-9601 (6 lines)

FOR NOBLE DURABLE QUALITIES

INSIST ON

COTTON TEXTILES & YARNS MANUFACTURED BY

BOWREAH COTTON MILLS CO., LTD.

BOVRIA.

★

Specialists : --

SIZED BEAMS AND HOSIERY YARN DEEPSHADE, POPLIN AND CORD COATING SHIRTING IN CHECKS & DOBBIES DYED AND PRINTED LAUNS AND CAMBRICS.

Managing Agents :

KETTLEWELL BULLEN & CO., LTD.

21, STRAND ROAD,

CALCUTTA I.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

दीनानाथत्रिवेदी मधुपः, सहसम्पादकः

मलयालमस्य विकासः संस्कृतेऽवलम्बितः

गतमासे केरलशिक्षामन्त्रि—श्री सी० एच् मुहम्मदकोयामहोदयेन स्वभाषणे प्रतिपादितं यद् राज्ये मलयालम-क्षेत्रीयभाषायाः शिक्षाया मध्यमरूपे प्रशासने चाङ्गीकारेण संस्कृतभाषा विशिष्टं बलं लप्स्यते । अतः शिक्षायां संस्कृतस्य कृते समुचितं महत्त्वं दातव्यं भविष्यति, यतो हि मलयालमभाषायाः समधिको विकासोऽस्ति संस्कृतस्य विकास एवावलम्बितः-इति ।

संस्कृतस्य कृते प्रोत्साहनम्

करनालमण्डलस्य द्वादश विद्यार्थिनो ये विभिन्नासु परीक्षासु हिन्द्यां तथा संस्कृते प्राथम्यं प्राप्तवन्तस्ते हरियाणाभाषाविभागेन पुरस्कार-प्रदानेन सम्मानिताः । जिलाभाषाधिकारिणा श्रीप्रेमकपूरमहोदयेनैतदपि प्रतिपादितं यत् छात्राणां कृते हिन्द्यां तथा संस्कृते प्रोत्साहनं दातुं हरियाणासर्वकारेण प्रतिवर्षं पुरस्कार-दानस्य निर्णयः कृतः इति ।

कालिदासजयन्त्युत्सवः

सागरविश्वविद्यालयात् **श्रीराधावल्लभ-त्रिपाठिमहोदयः** समुल्लिखति यत्—

मध्यप्रदेशराज्यान्तर्गते सागर-विश्वविद्यालये विभागाध्यक्षमहोदयानां श्रीमतां रामजी-उपाध्यायानां सत्प्रेरणापरिणामस्वरूपं संस्कृतप्राध्यापकानां छात्राणां च संस्कृतभाषणाभ्याससंवर्द्धनाय प्रतिसप्ताहं नियमितरूपेणैका संस्कृत-गोष्ठी समायोज्यते । अस्यामेव परम्परायां २-११-६८ दिनाङ्के कालिदास-जयन्त्युत्सवस्यायोजनमभवत् । आदौ श्रीयमुनाशङ्करशास्त्रिभिर्ललितमधुरं मङ्गलगानम् प्रस्तुतम् । ततः कुमारीवीणया वाणी वन्दना गीता । अथ राधावल्लभस्त्रिपाठी कालिदास-शेक्सपीयरयोस्तुलनात्मकसमीक्षणं प्रस्तुतवान् । श्रीगोपीकृष्णद्विवेदिमहाभागेन कालिदासस्य भावसौन्दर्यं, लालित्यम्, अभिव्यञ्जनाकौशलं च साधु विशदीकृतानि । ततः प्राध्यापकाः श्रीविश्वनाथभट्टाचार्यमहाशयाः कालिदासमधिकृत्यैकं शोधपूर्णं समालोचनात्मकं निबन्धं पठितवन्तः । निबन्धोऽयं भट्टाचार्यमहाभागानां गहनचिन्तनस्य प्रौढप्रतिपादनसरण्या वैदग्ध्यस्य च परिचायक आसीत् । कवितायाः सृजनं कथं भवतीति प्रतिपाद्य कालिदासस्य कविदृष्टेर्मार्मिकमुद्घाटनं तैः कृतम् । प्राध्यापकैः श्रीबच्चूलाल-अवस्थी-महाभागैरुक्तं यत् कालिदासो बौद्धानां समुदय-समये बभूव । तेन बौद्धसिद्धान्तानां निराकृतये नारीतत्त्वस्य प्रेमतत्त्वस्य च स्थापना काव्ये कृतेति । अन्ते चाध्यक्षमहोदया अभाषन्त यत् व्यवहारिकी दृष्टिः खलु पशुदृष्टिः तत उत्थानं कविदृष्ट्या भवति । कविदृष्टिसम्पन्नो जनः समदृष्ट्या अखिलं जगत् पश्यति । कालिदासः खलु ऋषिरासीत् । तत्कृतीनामनुशीलनेन पारमार्थिकी दृष्टिरुपलभ्यत इति ।

वेदाचार्य-श्रीरामकृष्ण चतुर्वेदी दिवं गतः

जयपुरस्थो विख्यातो वैदिको विद्वान् याज्ञिकशिरोमणिः **श्रीरामकृष्णचतुर्वेदमहाभागो** ६२ वर्षात्मके वयसि वर्तमानो गतमासे २३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तारिकायां सहसा हृदयगतेरवरोधेन स्वर्गतः। दुःखावहं वृत्तमिदमुपलभ्यात्रत्यः सर्वोऽपि पण्डितवर्गोऽजायत शोकाकुलः। अस्य विदुषो लोकान्तरगमनेन वैदिकसमाजे महती क्षतिर्जाता। न केवलं स वैदिक एव पण्डितोऽवर्तत, अपि तु स सत्यवसरे संस्कृतसाहित्यं सेवमान एवास्थात्।

किञ्च मार्चमासस्यास्य २ तारिकायां सायं स्थानीय-श्रीचतुर्भुजमन्दिरे वैदिक-श्रीशिवदत्तशर्मणा श्रीबदरीनारायणवैदिकस्याध्यक्ष्ये स्व० श्रीचतुर्वेदिमहोदयमुद्दिश्यैका शोकसभा समायोज्यत। तत्र नगरस्यास्य संस्कृतपण्डिता वैदिकाश्च समवेताः समभूवन्। ततो वेदाचार्य-श्रीरामनारायणचतुर्वेदि—पं० श्रीराधेश्याम-नेवटाप्रभृतिर्विद्वद्भि दिवङ्गताय तस्मै महापुरुषाय पुष्पमालार्पणपुरस्सरं श्रद्धाञ्जलयः समर्प्यन्त। भाषणानि जातानि। तत्र मया पठितञ्च पद्यद्वयमिदम्—

विद्वद्वृन्दसमादृतः सुरसिकः
सम्माननीयश्च यः,
सत्साहित्यपरश्च याज्ञिकाशिरो
रत्नं सुधीवल्लभः।
नैकान् कारितवान् क्रतून्
सुविधिना यज्ञक्रियाकोविदः,
वेदाचार्यवरः स हन्त गतवतान्
श्रीरामकृष्णो दिवम्॥

सम्माननीयचरिताय बुधोत्तमाय,
वेदाब्धये जयपुरेन्द्रसमर्चिताय।
श्रीरामकृष्णविबुधाय दिवंगताय,
श्रद्धाञ्जलिं सुमनसाद्य समर्पयामि॥

एवमेवात्रत्यः संस्कृतहिताकांक्षी भूतपूर्वो रजिस्ट्रारो वयोवृद्धः **श्रीरूडमलशर्मा दाधीचोऽपि दिवं गतः।** वस्तुतो लोकादितो लोकान्तरं गच्छतो जनान् प्रयत्नशतेनापि न कोऽप्यवरोद्धुं शक्नोति। तथा चोक्तं कविवरभासेन-

कः कं शक्तो रक्षितुं मृत्युकाले
रज्जुच्छेदे के घटं धारयन्ति।
एवं लोकस्तुल्यधर्मो वनानां
काले काले छिद्यते रुह्यते च॥

एवमुभयोरप्येतयोर्विदुषो र्लोकान्तरमुपयातयोर्महान्तं शोकमनुभवन् भारतीपरिवारः सम्प्रति स्वर्गताभ्यां ताभ्यां श्रद्धाञ्जलिं समर्प्य परमात्मानं प्रार्थयते यत्स प्रभुः ताभ्यामुभाभ्यामपि स्वर्गस्थिताभ्यां शाश्वतिकीं शान्तिं दद्यात्, तत्परिवाराभ्याञ्चासह्यं दुःखमिदं सोढुं शक्तिञ्च यच्छेदिति शम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपयोगी लघुकथा

श्रीगिरिराजशर्मा शास्त्री, जयपुरम्

पूर्वानुवृत्तम्

रतिरसाभिज्ञान् युवतिजनानन्तःपुरे बहुतरान् प्रेषयामास बोधिसत्वस्य प्रमोहनाय। अथागता रजनी, सिद्धार्थस्य तु चित्तं व्याकुलितमिवाऽभूत् गेहात् प्रव्रज्य भैक्ष्यग्रहणार्थम्। ततो नृत्यादिप्रमोदसाधनैः अतिनिद्रिताः सर्वा युवतीर्विलोक्य शयनात् शनैः शनैरुत्थाय स व्यलोकयत्।

"तत्र काश्चिद् युवत्यो विवस्त्राः काश्चिद्विकीर्णाभरणाः काश्चिद् विभ्रष्टमुकुटाः काश्चिद्धसन्त्यः काश्चित्प्रलपन्त्यः काश्चिद्दन्तान् कटकटायन्त्यः काश्चिद्विवर्णवदनाः काश्चिदुद्घाटितशीर्षाः काश्चिदवगुण्ठितशीर्षाः काश्चित् ध्वस्तशरीराः, एवं तद्विकृतं धरणीतलगतमन्तःपुरं निरीक्षमाणो बोधिसत्वः श्मशानसंज्ञामदादस्य।

अतीतेऽथ निशीथे सिद्धार्थोऽश्वपालमाहूयाह जरामरणपञ्जरस्थितसत्वपरिमोचनस्य समयो ह्युपस्थितो मे। अत एव ग्रहीष्यामि संन्यासम्। विस्मितोऽश्वपालोऽब्रवीत् राजपुत्रस्य ते संन्यासग्रहणमनुचितम् न समर्थोऽसि संन्यासाश्रमस्य कष्टानि सोढुम्।

सिद्धार्थ आह—

यथा बुधैः सर्पशिरसः दूरे वर्तन्ते। यथा शुचयो जनाः मूत्रघटाय जुगुप्सन्ते तथा ज्ञानिनः कामान् सर्वसुखस्य विनाशकान् ज्ञात्वा तेभ्यः विरक्ता भवन्ति।

रतिरस से अभिज्ञ युवतीजनों को अन्तःपुर में बहुतसों को बोधिसत्व को मोहित करने के लिये भेजा। अब रात्रि आई, सिद्धार्थ का चित्त तो घर से जाकर भैक्ष्य ग्रहण हेतु व्याकुल होगया था। तदनन्तर नृत्य आदि प्रमोद साधनों से अत्यधिक निद्रित समस्त युवतिजनों को देख कर शय्या से धीरे धीरे उठकर (इन्होंने) देखा।

"वहां कोई विवस्त्र, कोई बिखरे आभरणोंवाली कोई विभ्रष्ट मुकटवाली, कोई हँसती हुई, कोई प्रलाप करती हुई, कोई दाँत कटकटाती हुई, कोई विवर्ण हुए मुख वाली, कोई उघडे मस्तक वालो, कोई ढके सर वाली, कोई ध्वस्त शरीर वाली इस प्रकार उस विकृत धरणीतल गत अन्तःपुर को देखते हुए बोधिसत्व ने इसे श्मशान की संज्ञा दी।"

रात्री के व्यतीत हो जाने पर सिद्धार्थ ने अश्वपाल को बुलाकर कहा "जरामरण के पिंजरे में रखे सत्व के परिमोचन का मेरा यह समय आगया है। इसलिये संन्यास ग्रहण करूंगा"। विस्मित अश्वपाल बोला "आप जैसे राजकुमार का संन्यास ग्रहण करना उचित नहीं है। आप संन्यासाश्रम के कष्टों को सहन करने में समर्थ नहीं हैं।

सिद्धार्थ बोला—

"जैसे ज्ञानी लोग सर्पशिरा से दूर रहते हैं, जैसे पवित्र लोग मूत्रघट से घृणा करते हैं वैसे सब सुख के विनाशक काम को जानकर विद्वान् उनसे विलग रहते हैं।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतश्छन्दक ! शीघ्रं त्वं वाहनमानय । तथाऽनुष्ठिते सिद्धार्थोऽसौ स्त्रीतनयगुरुजनान् सर्वान् राज्यमैश्वर्यञ्च विहायाश्वमारुह्य निर्गतः । निजनगराद् द्वादशयोजनदूरस्थितं मल्लराज्यं प्राप्य तत्रैव वसिष्ठाश्रमसन्निधौ छन्दकमश्वसहितं विसृज्य कौशेयवस्त्राण्यपहाय परिधाय वल्कलवासमेकाकी वैशालीं नाम नगरीमुपतस्थे । तत्र आराढकालभनामा जिनपुरुषस्त्रिशतकशिष्यैः सहावात्सीत् । सिद्धार्थोऽस्य शिष्योऽभूत् । एकदा गुरुराह पवित्रचेता ऋजुर्भक्तिमान् पुरुष एवालं ब्रह्मचर्यं ग्रहीतुम्, लब्धुञ्च सर्वमैश्वर्य्यम् शक्नोति । तस्य गुरुवचनं सुखदं नाऽभूत् । ततः सप्तशतीं-शिष्यततिन्दधानस्य रुद्रकनाम्नः साधोः समीपं गत्वा अनेन सम्भाषणं कृतम् तत्रोद्भावितमनेन यद् ब्राह्मणाः श्रमणाश्च बोधस्वरूपं लब्धुमविशुद्धे कायमानसे नियोजयन्ति तदग्निमुत्पादयितुमार्द्रकाष्ठस्य घर्षणमिव वैफल्यं भजन्ते । शुष्ककाष्ठद्वयस्य घर्षणेन यथालब्धमनोरथा मानवास्तद्वत् कायमनसोर्विशुद्धयोः सतोः बोधलाभः शक्यः । ततःपरमसौ बोधिसत्वो ग्रामं गुरुविल्वाख्यं गत्वा विजनं तत्रैवोषितुं मनो दधे । परमयत्नेनात्रैव कायशुद्धिं चित्तशुद्धिञ्च विधाय आस्फालनाख्यं दुर्धरं ध्यानं दधार ।

निर्वाणे पथि तस्य सततं परिपन्थी सन्नपि दुर्निवारो मारः पराजितो ध्यानवीरात् योगिसिंहात् पलायनं चक्रे । ततः सर्वेभ्यः कृच्छ्रेभ्यः विमुक्तः सिद्धार्थो विमलं बोधञ्च लेभे । तदासा-

इसलिये छन्दक शीघ्र वाहन को लाओ। वैसा करने पर वह सिद्धार्थ स्त्री, तनय (पुत्र) गुरुजनों को सब राज्य और ऐश्वर्य को भी छोड़ कर घोड़े पर बैठ कर चला गया। अपने नगर से बारह योजन दूर स्थित मल्लराज्य में जाकर वहीं वशिष्ठाश्रम के पास छन्दक को घोड़े सहित छोड़कर रेश्मी वस्त्र उतार कर वल्कल वस्त्र पहनकर अकेला वैशाली नाम की नगरी में ठहरा। वहाँ आराढकालाभ नाम के जिन-पुरुष तीन सौ शिष्यों के साथ रहते थे। सिद्धार्थ इसके शिष्य होगए। एक दिन गुरु बोले 'पवित्र चित्त, सरल (सीधे) भक्तिमान् पुरुष ही ब्रह्मचर्य ग्रहण कर सकते हैं, और सम्पूर्ण ऐश्वर्य प्राप्त कर सकते हैं।' उसको (सिद्धार्थ को) गुरु वचन सुखद नहीं लगे। तदनन्तर सात सौ शिष्यमण्डली को धारण करने वाले रुद्रक नामके साधु के पास जाकर इसने सम्भाषण किया। वहां इन्होंने (रुद्रक ने) कहा कि ब्राह्मण और श्रमण बोधस्वरूप प्राप्त करने को जो अविशुद्ध काया मन को नियोजित करते हैं वे अग्नि को उत्पन्न करने को गीले काष्ठ के टुकड़ों के घर्षण की तरह विफलता को प्राप्त करते हैं। शुष्क काष्ठ के टुकडों के घर्षण से जैसे मानव मनोरथ सिद्धि प्राप्त करते हैं वैसे ही काया और मन के विशुद्ध होने पर सत् पुरुषों को बोध लाभ सम्भव है। इसके पश्चात् वह बोधिसत्व उस विल्वाख्य ग्राम में जाकर जनशून्य उस स्थान पर ही रहने को मनको लगाया। अत्यन्त यत्न से वहीं कायशुद्धि और चित्तशुद्धि करके आस्फालनाख्य दुर्धर (कठिन) ध्यान को धारण किया।

निर्वाण के मार्ग में उसका (सिद्धार्थ का) लगातार अवरोधक होते हुए भी कठिनाई से टलने वाला (काम) पराजित होकर ध्यानवीर योगीसिंह के पास से पलायन कर गया। इसके

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

...धिरूढयोगः मनस्यस्य मुकुरे प्रतिफलितं सकारणमखिलं जगत्। तेनानूभूतं यत् जीवानां दुःखद्रुमः प्रकारेणानेनोत्पद्यते। अविद्यायाः संस्कारः संस्काराद् विज्ञानम्, विज्ञानान्नामरूपे, ताभ्यां षडायतनम्, षडायतनात् स्पर्शः, स्पर्शाद् वेदना, वेदनायाः तृष्णा, तृष्णाया उपादानम्, उपादानात् संसारः, संसाराज्जातिः जाते र्जरामरणे इति। अतः निरस्तायामविद्यायां कुतो दुःखप्रसङ्गः क्रमेण तस्मात् जन्मजरामरणदुःखचिन्ता-क्लेश-पीडा-दयश्च सर्वे दूरे पलायन्ते। एवं जीवानामुदेति चित्ताकाशे धर्मलोकः, उदिते तस्मिन् मनःसंयोगेन ज्ञानं दर्शनं विद्यास्मृतिर्बुद्धिश्च सर्वं प्रत्यक्षीभवति। ततः सिद्धार्थो बुद्धः संजातः।

ततः बिम्बिकानगर्या राजा बुद्धस्य दर्शनायागतः। सोऽस्मै ह्युपदिदेश "अहिंसा परमो धर्मः।" ततः तस्मात्स्थानान्निर्गत्य गयां नाहालं, बुन्दद्विरं, लोहितवस्तुकं, गन्धपुरं, सारथिपुरञ्च गत्वा काशिकामुपतस्थे। कालेऽस्मिन् बहुसंख्यकाः लोका आगत्यागत्य बुद्धस्य शिष्या अभूवन्। कालान्तरे मगधराजो बिम्बसारः कोशलपतिः प्रसेनजित् तथा शुद्धोदनोऽमृतोदनश्चास्य लक्षं लक्षं शाक्यसन्ततयश्च शिष्या अभूवन्।

निर्वाणसमये स्वशिष्याय आनन्दाय निम्नोपदेशं कुर्वन् निर्वाणं प्राप। "आनन्द! संसारोऽयमसारः सारो निर्वाणमेव, तदर्थं यतस्व" इति।

पश्चात् समस्त कठिनाइयों से विमुक्त सिद्धार्थ ने विमल बोध को प्राप्त कर लिया। तदनन्तर इसने योगाधिरूढ होकर मनके दर्पण में यह सकारण जगत् प्रतिफलित (प्रतिबिम्बित) हुआ। उसने अनुभव किया कि जीवों के दुःखरूपी वृक्ष इस प्रकार उत्पन्न होते हैं। अविद्या से संस्कार, संस्कार से विज्ञान, विज्ञान से नाम और रूप, इनसे षडायतन, षडायतन से स्पर्श, स्पर्श से वेदना, वेदना से तृष्णा, तृष्णा से उपादान, उपादान से संसार, संसार से जाति और जाति से जरामरण होते हैं। अतः अविद्या के निरस्त होने पर कहां दुःखप्रसङ्ग रहता है। क्रमशः ऐसा होने पर (अविद्या नष्ट होने पर) जन्म जरा मरण दुःख चिन्ता क्लेश पीड़ा सब दूर भाग जाते हैं। इस प्रकार जीवों के चित्तरूपी आकाश में धर्मलोक उदित होता है। धर्मलोक के उदित होने पर उसमें मन का संयोग होने से ज्ञान-दर्शन-विद्या-स्मृति और बुद्धि सब प्रत्यक्ष होती है (दिखती है) इसके पश्चात् सिद्धार्थ बुद्ध होगया।'

इसके पश्चात् बिम्बिकानगरी के राजा बुद्ध के दर्शन के लिये आया। उसने (बुद्ध ने) इसे उपदेश किया "अहिंसा सबसे ऊँचा (श्रेष्ठ) धर्म है।" तदनन्तर उस स्थान से चलकर गया, नाहाल, बुन्दद्विर, लोहितवस्तुक, गन्धपुर, सारथीपुर, जाकर काशिका में गए। इस समय बहुत संख्या में लोग आ आकर बुद्ध के शिष्य हुए। कालान्तर में मगधराज बिम्बसार, कोशलपति प्रसेनजित् तथा शुद्धोदन और अमृतोदन एवं लाखों शाक्य सन्ततियां इनकी शिष्य हुई।

निर्वाण के समय अपने शिष्य आनन्द को निम्न उपदेश करते हुए निर्वाण को प्राप्त हुए। "आनन्द! यह संसार असार है, सार निर्वाण ही है। अतः उसके लिए यत्न कर।" इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

(उपहासमुद्दिश्य)

माशुकवि-श्रीहरिशास्त्री, सम्पादकः

परेषामुपहासो हि
वैरबन्धाय कल्पते ।
तदेतं हि परित्यज्य
सुखी स्यात्मानवो भुवि ॥१॥

दूसरे लोगों की किसी बात पर हँसी करना वैर बाँध सकता है। इसलिए परोपहास के त्याग करने से ही मानव सुखी रह सकता है ॥१॥

दुर्योधनस्योपहासो
भीमेन कलितः सदि ।
कुरुपाण्डवयुद्धस्य
स बीजत्वमुपागतः ॥२॥

सभा में भीम ने दुर्योधन का उपहास किया था (जब उसे जलस्थलभ्रम हुआ और स्थल में जलभ्रम हुआ तब भीम ने हँसते हुए कहा था कि हां ठीक है अन्धे के अन्धे ही होते हैं) वह उपहास ही युद्ध का बीज होगया। दुर्योधन के हृदय में यह कांटा होकर चुभा उसने किसी की सलाह न मानी और युद्ध ही ठान लिया ॥२॥

कस्यचित् स्खलने कर्म-
प्रमादे विस्मृतौ तथा ।
हसनं व्याजनिन्दा वा
स्तुतिर्यात्युपहासताम् ॥३॥

इस कारण किसीके काम में स्खलन हो कोई त्रुटि हो प्रमाद और भूल से कुछ विकार होतो उस पर उपहास मत करो। व्याज से निन्दा और स्तुति भी न करो वह भी ईर्ष्या पैदाकर वैरबन्ध करे भी ॥३॥

स्वमित्राणां च बन्धूनां
सज्जनानां विपश्चिताम् ।
क्वापि कृत्ये त्रुटौ दोषे
प्रमादे न विहस्यताम् ॥४॥

इसलिए किसी भी मित्र बन्धु साधु तथा विद्वान् के किसी काम में त्रुटि दोष प्रमाद होतो उसको हँसी न करो ॥४॥

उपहासं समर्थानां
न हि कुर्वीत बुद्धिमान् ।
विषाक्तबाणतुल्यस्य
कर्तारं पुनरेष्यति ॥५॥

समर्थों का उपहास कभी बुद्धिमान् नहीं करै। यह विषैले बाण की तरह हँसी करने वाले को कभी पुनः प्राप्त हो जायगा ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयोऽध्यायः

(मध्यमचरित्रप्रारम्भः)

अस्य श्रीमध्यमचरित्रस्य विष्णुः ऋषिः उष्णिक् छन्दः महालक्ष्मीर्देवता शाकम्भरी शक्तिः दुर्गाबीजं वायुस्तत्वं यजुर्वेदः स्वरूपं श्रीमहालक्ष्मीप्रीत्यर्थे मध्यमचरित्रपाठे विनियोगः ।

मध्यमचरित्रप्रारम्भ

इस मध्यम चरित्र का ऋषि विष्णु, छन्द उष्णिक् देवता महा लक्ष्मी, शक्ति शाकम्भरी, बीज दुर्गा तत्व वायुः स्वरूप यजुर्वेद और श्रीमहालक्ष्मी के प्रसन्नतार्थ विनियोग है ।

ध्यानम्

ॐ अक्षस्रक्परशू गदेषुकुलिशं
पद्मं धनुः कुण्डिकां
दण्डं शक्तिमसिं च चर्म जलजं
घण्टां सुराभाजनम् ।
शूलं पाशसुदर्शने च दधतीं
हस्तैः प्रवालप्रभां
सेवे सैरिभमर्द्दिनोमिह
महालक्ष्मीं सरोजस्थिताम् ॥१॥

ध्यान

अक्षमाला पद्म बाण खड्ग वज्र गदा तथा ।
चक्र त्रिशूल परशु वांए नौ हाथ धरती ॥१॥
शंख घण्टा तथा पाश बरछी दण्ड ढाल भी ।
चाप प्याला कुम्भ घटे दाहिने नव हाथ हैं ॥२॥
अठारह भुजा देवी महालक्ष्मी मनोहरा ।
सर्वदेवमयी चन्द्रसमान मुखधारिणी ॥३॥
पद्मासना स्थित हुई पासमें सिंहरक्षिणी ।
स्वर्ण रत्नजडे नाना गहने पहने हुई ॥४॥
महिषासुर संहारकारिणी विश्वमोहनी ।
अपने नतभक्तों को निर्भीक करती हुई ॥५॥
पुष्पों को वर्षते देव संघसे संस्तुता हुई ।
साधकोंको सर्व सुख प्रदान करती हुई ॥६॥
महामाया महारात्री सर्वदुःख निवारिणी ।
भक्तोंकी स्मृतिमें आई देती जो सर्व सम्पदा ॥७॥
वरदानोन्मुखी माता करुणा रस से सनी ।
महालक्ष्मी पराम्बाका मनमें ध्यान मैं करूं ॥८॥

ऋषिरुवाच । मन्त्रः १

देवासुरमभूद् युद्धं पूर्णमब्दशतं पुरा
महिषेऽसुराणामधिपे देवानाञ्च पुरन्दरे ॥२॥
तत्रासुरैर्महावीर्यैं र्देवसैन्यं पराजितम्
जित्वा च सकलान्देवानिन्द्रोऽभून्महिषासुरः ॥३॥
ततः पराजिता देवाः पद्मयोनिं प्रजापतिम् ।
पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ ॥४॥

ऋषि बोले । मन्त्र १ ।

पहले पूर्ण सौ वर्ष, हुवा युद्ध सुरासुरी ।
दैत्याधिराट् महिषमें देवाधीश महेन्द्र में ॥२॥
वहां वलिष्ठ दैत्योंने देव सेना परास्त की ।
जय पा सब दैवोंपै बना महिष देवराट् ॥३॥
पराजित हुए देव पद्मयोनि विरञ्चिको ।
आगे कर, गये सारे जहां शङ्कर विष्णु थे ॥४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितम् । त्रिदशाः कथयामासुर्देवाभिभवविस्तरम् ॥५॥	महिषासुर की चेष्टा जो हुई जितनी हुई । सुनाई सब देवों ने सविस्तर पराभव ॥५॥
सूर्येन्द्राग्न्यनिलेन्दूनां यमस्य वरुणस्य च । अन्येषाञ्चाधिकारांश्च स्वयमेवाधितिष्ठति ॥६॥	सूर्य चन्द्राग्नि अनिल यम और जलेश के । औरों केभी अधीकार उसने हाथमें लिए ॥६॥
स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि । विचरन्ति यथा मर्त्या महिषेण दुरात्मना ॥७॥	निष्कासित किए देव स्वर्ग से सब भूमि पै । फिरते हैं मनुज ज्यों दुष्ट माहिष दैत्य से ॥७॥
एतद्वः कथितं सम्यगमरारिविचेष्टितम् । शरणं वः प्रपन्नाः स्मो बधस्तस्य विचिन्त्यताम् ॥८	हमने ये कही सारी कुचेष्टाएं सुरारिकी । शरणागत हैं देव उसका बध सोचिए ॥८॥
इत्थं निशम्य देवानां वचांसि मधुसूदनः । चकार कोपं शम्भुश्च भ्रुकुटीकुटिलाननौ ॥९॥	दैवतों के वचन यों सुन शङ्कर विष्णुने । किया कोप भ्रुकुटियां मुख पै मोड खागई ॥९॥
ततोऽतिकोपपूर्णस्य चक्रिणो वदनात्ततः । निश्चक्राम महत्तेजो ब्रह्मणः शङ्करस्य च ॥१०॥	तब क्रोधभरे विष्णु और ब्रह्म महेश के । मुखोंसे निकला तेज नभमें स्थिर होगया ॥१०॥
अन्येषाञ्चैव देवानां शक्रादीनां शरीरतः । निर्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत ॥११॥	इन्द्रादि और भी सारे देवतों के शरीर सें । महातेज हुवा व्यक्त वह एक हुवा सभी ॥११॥
अतीव तेजसः कूटं ज्वलन्तमिव पर्वतम् । ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगन्तरम् ॥१२॥	सबके तेजका कूट ज्वलन्त गिरिसा हुवा । देखा सुरोंने ज्वालाएँ दिग्विदिग् व्याप्त होगईं॥१२
अतुलं तत्र तत्तेजः सर्वदेवशरीरजम् । एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा ॥१३॥	सब देव शरीरों का वह तेज अनूप ही । एक नारी रूप हुवा त्रिलोकी व्याप्तकान्तिका ॥१३
यदभूच्छाम्भवं तेजस्तेनाजायत तन्मुखम् । याम्येन चाभवन्केशा बाहवो विष्णुतेजसा ॥१४॥	शंभु का तेज गौरा जो उसका मुख होगया । यमके तेजसे केश भुजाएं विष्णुतेजसे ॥१४॥
सौम्येन स्तनयोर्युग्मं मध्यं चैन्द्रेण चाभवत् । वारुणेन च जंघोरू नितम्बस्तेजसा भुवः ॥१५॥	चन्द्रतेज स्तन हुए मध्य माहेन्द्रतेजसे । जंघा ऊर वरुणके नितम्ब क्षितितेजसे ॥१५॥
ब्रह्मणस्तेजसा पादौ तदङ्गुल्योऽर्कतेजसा । वसूनाञ्च कराङ्गुल्यः कौबेरेण च नासिका ॥१६	ब्रह्माके तेजसे पैर अंगुली सूर्य तेजसे । वसुओं से हस्तशाखा नासा कौबेरतेजसे ॥१६॥
तस्यास्तु दन्ताः सम्भूताः प्राजापत्येन तेजसा । नयनत्रितयं जज्ञे तथा पावकतेजसा ॥१७॥	उसके दांत प्रगटे थे प्रजापति तेजसे । प्रगटे नेत्र थे तीन उसके अग्नि तेजसे ॥१७॥
भ्रुवौ च सन्ध्ययोस्तेजः श्रवणावनिलस्य च । अन्येषाञ्चैव देवानां सम्भवस्तेजसां शिवा ॥१८॥	सन्ध्याओं से भ्रुकुटियां कान वायव्य तेजसे । अन्य भी देवताओं से सम्भावित हुई शिवा ॥१८॥
ततः समस्तदेवानां तेजोराशिसमुद्भवाम् । तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः ॥१९॥	समस्त देवताओं की तेजोराशि–समुद्भवा । उसको देख हरखे देव माहिषपीडित ॥१९॥
शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृक् । चक्रं च दत्तवान् कृष्णः समुत्पाद्य स्वचक्रतः ॥२०॥	निकाल शूल से शूल उसको शिव ने दिया । दिया श्री विष्णुने चक्र उत्पन्नकर चक्र से ॥२०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शङ्खं च वरुणः शक्तिं ददौ तस्यै हुताशनः ।
मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधी ॥२१॥

जलेश ने शंख दिया अग्निने शक्ति दी उसे ।
दिया मारुतने चाप भरे तर्कस बाण से ॥२१॥

वज्रमिन्द्रः समुत्पाद्य कुलिशादमराधिपः ।
ददौ तस्यै सहस्राक्षो घण्टामैरावताद् गजात् ॥२२

इन्द्रने वज्रसे वज्र उत्पन्न करके दिया ।
इन्द्रने फिर घण्टादी ऐरावत गजेन्द्र से ॥२२॥

कालदण्डाद्यमो दण्डं पाशं चाम्बुपतिर्ददौ ।
प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमण्डलुम् ॥२३॥

दण्डसे दण्ड यमने दिया पाश जलेशने ।
प्रजेशने अक्षमाला विधाताने कमण्डलु ॥२३॥

समस्तरोमकूपेषु निजरश्मीन् दिवाकरः ।
कालश्च दत्तवान् खड्गं तस्याश्चर्म च निर्मलम् २४

समस्त रोमकूपोमें किरणें दी दिनेशने ।
कालने खड्ग उसको और निर्मल ढाल दी ॥२४॥

क्षीरोदश्चामलं हारमजरे च ताथाम्बरे ।
चूडामणिं तथा दिव्यं कुण्डले कटकानि च ॥२५॥

क्षीराब्धिने हार दिया तथा निर्जर वस्त्र दो ।
दिव्य चूडामणि तथा दिये कङ्कण कुण्डल ॥२५॥

अर्धचन्द्रं तथा शुभ्रं केयूरान् सर्वबाहुषु ।
नूपुरौ विमलौ तद्वद् ग्रैवेयकमनुत्तमम् ॥२६॥

अर्धचन्द्रदिया शुभ्र केयूर सब बाहुमें ।
दो दी पायलें और कण्ठभूषण उत्तम ॥२६॥

अङ्गुलीयकरत्नानि समस्तास्वङ्गुलीषु च ।
विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलम् ॥२७॥

सभी अंगुलियों में दी मुद्रिकाएं मनोहरा ।
उसको विश्वकर्मा ने दिया परशु उज्वल ॥२७॥

अस्त्राण्यनेकरूपाणि तथाभेद्यं च दंशनम् ।
अम्लानपङ्क्तां मालां शिरस्युरसि चापराम् ॥२८॥

अनेक अस्त्रशस्त्रादि तथा वर्म अभेद्य भी ।
प्रफुल्लपद्मोंकी माला शिरमें उरमें पृथक् ॥२८॥

अददज्जलधिस्तस्यै पङ्कजं चातिशोभनम् ।
हिमवान् वाहनं सिंह रत्नानि विविधानि च ॥२९॥

समुद्र ने फिरदिया उसे पद्म सुहावना ।
हिमाद्रि ने सिंह दिया तथा रत्न अनेकशः ॥२९॥

ददावशून्यं सुरया पानपात्रं धनाधिपः ।
शेषश्च सर्वनागेशो महामणिविभूषितम् ॥३०॥

सुराभरा पानपात्र धनाधीश्वरने दिया ।
शेषने जो सर्व नागाधीश धारक भूमिका ॥३०॥

नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमाम् ।
अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा ॥३१॥

महामणिजडा एक नाग हार उसे दिया ।
अन्यभी देवताओं की भूषणायुधभेट से ॥३१॥

सम्मानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः ।
तस्या नादेन घोरेण कृत्स्नमापूरितं नभः ॥३२॥

सम्मानित हुई अट्टहास से गजने लगी ।
उसके घोर रवसे नभ पूरित होगया ॥३२॥

अमायतातिमहता प्रतिशब्दो महानभूत् ।
चुक्षुभुः सकला लोकाः समुद्राश्च चकम्पिरे ॥३३॥

न माते दीर्घ स्वरसे प्रतिशब्द महा हुवा ।
सभी क्षुब्ध हुए लोक सिन्धुकम्पित हो उठे ॥३३॥

चचाल वसुधा चेलुः सकलाश्च महीधराः ।
जयेति देवाश्च मुदा तामूचुः सिंहवाहिनीम् ॥३४॥

भूमिकाँप उठी और महीध्र हिलने लगे ।
तव देव सभी बोले जय हो सिंहवाहिनी ॥३४॥

तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तयः ।
दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः ॥३५॥

भक्तिनम्र मुनीन्द्रो ने उसकी स्तुतियां पढी ।
सभी दानव त्रैलोक्य क्षुब्ध होता निहारके ॥३५॥

संनद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः ।
आः किमेतदिति क्रोधादाभाष्य महिषासुरः ॥३६॥

तैय्यार सब सेनाले सभी उठ खडे हुए ।
आः क्या है क्रोधसे ऐसा कहता महिषासुर ॥३६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः ।
स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा ॥३७॥

असुरोंसे घिरा दौडा उसही शब्द के प्रति ।
देवीको उसने देखा कान्तिसे लोक पूरती ॥३७॥

पादाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बराम् ।
क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन ताम् ॥३८

भूमी नमाती पदसे नभ छूती किरोट से ।
पाताल क्षुब्ध करती धनुर्ज्या के निनादसे ॥३८॥

दिशो भुजसहस्रेण समन्ताद् व्याप्य संस्थिताम् ।
ततः प्रववृते युद्धं तया देव्या सुरद्विषाम् ॥३९॥

भुजासहस्रसे व्याप्त दिशाएं करती खडी ।
दैत्योंका उस देवीसे युद्ध आरम्भ होगया ॥३९॥

शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगन्तरम् ।
महिषासुरसेनानीश्चिक्षुराख्यो महासुरः ॥४०॥

छूटते अस्त्रशस्त्रोंसे जहाँ दीप्त दिगन्त थे ।
सेनापति महिषका दैत्यचिक्षुर नामका ॥४०॥

युयुधे चामरश्चान्यैश्चतुरङ्गबलान्वितः ।
रथानामयुतैः षड्भिरुदग्राख्यो महासुरः ॥४१॥

लडा चामर भी और चौरंगी दलको लिए ।
उदग्र नामका दैत्य सेना साठहजार ले ॥४१॥

अयुध्यतायुतानां च सहस्रेण महाहनुः ।
पञ्चाशद्भिश्च नियुतैरसिलोमा महासुरः ॥४२॥

लडा करोडसेना ले सेनापति महाहनु ।
असिलोमा दैत्य लडा सेना पांचकरोड ले ॥४२॥

अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे ।
गजवाजिसहस्रौघैरनेकैः परिवारितः ॥४३॥

साठ लाख लिए सेना युद्ध वाष्कलने किया ।
गजबाजिसहस्रों के वृन्दसे परिवारित ॥४३॥

वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत ।
बिडालाख्योऽयुतानां च पञ्चाशद्भिरथायुतैः ॥४४॥

करोड रथ के साथ युद्धमें लडता रहा ।
विडाल नामका दैत्यसेनानी वेगसे वहां ॥४४॥

युयुधे संयुगे तत्र रथानां परिवारितः ।
अन्ये च तत्रायुतशो रथनागहयैर्वृताः ॥४५॥

पचास कोटि रथ ले समराङ्गण में वहां ।
रथ हाथी हय घिरे ओर ओर सहस्रहो ॥४५॥

युयुधुः संयुगे देव्या सह तत्र महासुराः ।
कोटिकोटिसहस्रैस्तु रथानां दन्तिनां तथा ॥४६॥

वहाँ महा दैत्य लडे देवी के साथ युद्ध में ।
रथों हयों गजों के भी प्रत्येकदल कोटि थे ॥४६॥

हयानां च वृतो युद्धे तत्राभून्महिषासुरः ।
तोमरैर्भिन्दिपालैश्च शक्तिभिर्मुसलैस्तथा ॥४७॥

ऐसे कोटि सहस्रों से घिराथा महिषासुर ।
तोमरों भिन्दिपालों से मुशलों शक्तिवृन्दसे ॥४७॥

युयुधुः संयुगे देव्या खड्गैः परशुपट्टिशैः ।
केचिच्च चिक्षिपुः शक्तीः केचित्पाशांस्तथापरे ॥४८॥

खड्ग पट्टिश पर्शोंसे देवीसें लडते रहे ।
फैंकते थे शक्ति केई कई थे पाश फैंकते ॥४८॥

देवीं खड्गप्रहारैस्तु ते तां हन्तुं प्रचक्रमुः ।
सापि देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डिका ॥४९

कोई खड्ग प्रहारों से देवीको मारने लगे ।
वर्सती निज शस्त्रास्त्र वहभी चण्डिका वहां ॥४९॥

लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी
अनायस्ताननादेवी स्तूयमाना सुरर्षिभिः ॥५०॥

दैत्यों के शस्त्र अस्त्रों को लीलासे काटने लगी ।
प्रसन्नवदना देवी देवर्षिगणसे स्तुता ॥५०॥

मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी ।
सोऽपि क्रुद्धो धुतसटो देव्या वाहनकेशरी ॥५१॥

ईश्वरी दैत्यदेहोंपै शस्त्रोंको छोडने लगी ।
जटा हिलाता देवी का सिंह बाहन क्रुद्ध हो ॥५१॥

चचारासुरसैन्येषु वनेष्विव हुताशनः ।
निःश्वासान् मुमुचे यांश्च युध्यमाना रणेऽम्बिका ॥५२

विचरा दैत्यसेनामें वनमें अग्निदेव ज्यों ।
जूझती उस देवीने छोडे जो श्वास वेगसे ॥५२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त एव सद्यः सम्भूता गणाः शतसहस्रशः ।
युयुधुस्ते परशुभिर्भिन्दिपालासिपट्टिशैः ॥५३॥

वेही तत्काल प्रगटे वहाँ गण सहस्रशः ।
पट्टिशों खड्ग दण्डोंसे फसौंसे रणमें लडे ॥५३॥

नाशयन्तोऽसुरगणान् देवीशक्त्युपबृंहिताः ।
अवादयन्त पटहान् गणाः शङ्खांस्तथापरे ॥५४॥

असुरों को मारते थे देवी की शक्ति से बढे ।
बजाते थे ढोल कई गण शङ्ख बडे बडे ॥५४॥

मृदङ्गांश्च तथैवान्ये तस्मिन् युद्धमहोत्सवे ।
ततो देवी त्रिशूलेन गदया शक्तिवृष्टिभिः ॥५५॥

अन्य केई मृदङ्गों को युद्ध उत्सव में वहां ।
तब देवी शूल गदा शक्ति खड्गादि वृष्टिसे ॥५५॥

खड्गादिभिश्च शतशो निजघान महासुरान् ।
पातयामास चैवान्यान् घण्टास्वनविमोहितान् ।५६

सैंकडों दैत्यवर्यों का संहार करने लगी ।
घण्टानिनाद से मुग्ध कई दैत्य गिरा दिये ॥५६॥

असुरान्भुवि पाशेन बद्ध्वा चान्याकर्षयत् ।
केचिद् द्विधा कृतास्तीक्ष्णैः खड्गपातैस्तथापरे ।५७

अनेक दैत्यों को बांध पाश से खींचती रही ।
केई द्विधा किये खड्ग प्रहारों से तथा कई ॥५७॥

विपोथिता निपातेन गदया भुवि शेरते ।
वेमुश्च केचिद्रुधिरं मुसलेन भृशं हताः ॥५८॥

गदानिपात से चूर्ण कई भूपर सोगये ।
कई मुशल से मारे रक्त को बमते रहे ॥५८॥

केचिन्निपतिता भूमौ भिन्नाः शूलेन वक्षसि ।
निरन्तराः शरौघेण कृताः केचिद्रणाजिरे ॥५९॥

कई त्रिशूल से दैत्य वक्ष में भिन्न हो पडे ।
केई बाण समूहों से रण में चुन ही दिये ॥५९॥

सेनानुकारिणः प्राणान् मुमुचुस्त्रिदशार्दनाः ।
केषांचिद् बाहवश्छिन्नाश्छिन्नग्रीवास्तथापरे ॥६०॥

बाज जैसे कई दैत्य प्राण छोड पडे वहां ।
अनेकों के बाहु कटे केई नाड कटे पडे ॥६०॥

शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः ।
विच्छिन्नजङ्घास्त्वपरे पेतुरुर्व्यां महासुराः ॥६१॥

अनेकों के सीस कटे केई मध्य कटे पडे ।
जघा कटे पडे कोई मही पर महासुर ॥६१॥

एकबाह्वक्षिचरणाः केचिद्देव्या द्विधा कृताः ।
छिन्नेऽपि चान्ये शिरसि पतिताः पुनरुत्थिताः ।६२

एकाक्षि बाहुपद के केई दैत्य द्विधा किये ।
केई शीसकटे दैत्य गिरे भी फिरसे उठे ॥६२॥

कबन्धा युयुधुर्देव्या गृहीतपरमायुधाः ।
ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः ॥६३॥

लडे कबन्ध देवी से खड्ग हाथ लिए कई ।
बाजोंको ध्वनिके साथ नाचते थे कबन्ध भी ॥६३॥

कबन्धाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः ।
तिष्ठ तिष्ठेति भाषन्तो देवीमन्ये महासुराः ॥६४॥

खड्ग शक्ति लिए हाथ कटे शीस कबन्धभी ।
देवी को दानव कई तिष्ठ तिष्ठ उचारते ॥६४॥

पातितै रथनागाश्वैरसुरैश्च वसुन्धरा ।
अगम्या साभवत्तत्र यत्राभूत्स महारणः ॥६५॥

पडे रथ गजाश्वों से असुरों से बहां मही ।
अगम्य होगई युद्ध जहां वह महा हुवा ॥६५॥

शोणितौघा महानद्यः सद्यस्तत्र प्रसुस्रुवुः ।
मध्ये चासुरसैन्यस्य वारणासुरवाजिनाम् ॥६६॥

दैत्य सेना बोच वहां गजाश्वासुर वृन्दके ।
रक्तप्रवाह की सद्य नदियां रणमें बहीं ॥६६॥

क्षणेन तन्महासैन्यमसुराणां तथाम्बिका ।
निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयम् ॥६७॥

दानवों की उस महा सेना को क्षणमात्र में ।
देवीने नष्ट करदी अग्नि ज्यों तृण काष्टको ॥६७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स च सिंहो महानादमुत्सृजन्धुतकेशरः ।
शरीरेभ्योऽमरारीणामसूनिव विचिन्वति ॥६८॥

और सिंह महानाद करता स्वजटा हिला ।
दानवोंके शरीरोंसे प्राणहो बीनता (चुनता) रहा ॥६८॥

देव्या गणैश्च तैस्तत्र कृतं युद्धं महासुरैः ।
यथैषां तुप्तुषुर्देवाः पुष्पवृष्टिमुचो दिवि ॥ॐ॥६९॥

देवी गणोंने दैत्योंसे ऐसा युद्ध किया वहां ।
जैसे कुसुमवर्साते हुए सन्तुष्ट देवता ॥६९॥

इति श्रीदुर्गासप्तशत्यां द्वितीयोऽध्यायः ।

श्रीहरिशास्त्रिविरचित हिन्दी दुगा पाठ में दूसरा अध्याय पूर्ण हुवा ।

पत्त्रस्य स्वामित्वसम्बन्धे अधिकृतं विवरणम्

पत्रकम् ४ (नियमः ८)

१. प्रकाशनस्थानम्	जयपूरम्
२. प्रकाशने कालावधिः	मासिकपत्त्रम्
३. मुद्रकस्य नाम	राधेश्यामशर्मा, श्रीहनुमान प्रि० प्रेस,
नागरिकता	राजस्थानीयः
संकेतः	चौड़ा रास्ता, जयपुरम्
४. प्रकाशकस्य नाम	श्रीजयबहादुरसिंहः
नागरिकता	भारतीयः
संकेतः	भारती भवन, गोपालजी रास्ता, जयपुरम्
५. सम्पादकस्य नाम	श्रीहरिशास्त्री, दाधीचः
नागरिकता	भारतीयः
संकेतः	तिलकनगरम्, जयपुरम्
६. पत्त्रस्य संपत्तेः अधिकारिणां आधिकारस्यांशभाजां वा जनानां संस्थाया वा नाम संकेतश्च	'संस्कृतप्रचारपरिषद्' जयपुरम्

अहं श्रीजयबहादुरसिंहः घोषयामि यत् उपरि लिखितं विवरणं मद्विश्वासेन परिज्ञानेन च सत्यमस्ति । दिनांकः १-३-६९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Kesoram Industries & Cotton Mills Limited

15, India Exchange Place,

CALCUTTA-1

Manufacturers of

Cotton Textile & Piece Goods, Rayon Yarn, Transparent Cellulose-Film, Sulphuric Acid, Carbon-di-Sulphide, Cast Iron Spun Pipes & Fittings, Industrial Furnace (Indoberg-Diado), Water Treatment & Water Treatment Plants, Cement, Refractories etc. etc.

Unit	*City Office*	*Mills*
Textile Unit	15, India Exchange Place, Caleutta-1.	42, Garden Reach Rd., Calcutta-24.
Rayon Unit	Industry House, 10, Camac Street, Calcutta-17.	Tribeni, Dist. Hooghly.
Spun Pipe Unit	Do.	Bansberia, Dist. Hooghly.
Kesoram Engineering Industries.	Do.	Tribeni, Dist. Hooghly. & Budge Budge, 24-Pgs.
Cement Unit	(a) 15, India Exchage Place, Calcutta-1. (b) 10-3-310/1, Sarojini Devi Hospital Road, Massab Tank, Hyderabad, A.P.	Palakurthy, Dist. Karimnagar, A.P.
India Refractories.	4A, Council House Street,	Kulti, Dist. Burdwan.
Manjushree (Show Room)		37/39, Park Street, Calcutta.

Managing Agents :

BIRLA BROTHERS PRIVATE LIMITED,

15, INDIA EXCHANGE PLACE,

CALCUTTA-1.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. Nlo. J 7
Llcence No. PP. 6
"Licenced to Post.
Without Prepayment"

एक राष्ट्रीय उत्पादन

३५००० से अधिक श्रमिकों को काम देने वाला

श्रेष्ठतम सामग्रियों से निर्मित

मेंगलूर

गणेश बीड़ियां

धूम्रपान करने वालों की अति प्रिय

प्रधान कार्यालय

मेंगलूर गणेश बीड़ी वर्क्स

विनोबा रोड़ : मैसूर-५

दूरभाष : ४[illegible]

तार : AROMA

प्रकाशकः—जयबहादुरसिंह पता : भारती भवन, गोपालजी का रास्ता, जयपुर। दूरभाष : ७५४६६
राधेश्याम शर्मा द्वारा श्री हनुमान प्रि० प्रेस, चौड़ा रास्ता, जयपुर में मुद्रित। फोनः ६३१५६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय गुरुकुल कांगड़ी विश्वविद्यालय हरिद्वार

भारती

संस्कृतमासिकस्य

पालयन् धर्ममर्यादां यो जघान द्विषद्गणम् ।
धनुर्बाणकरः सोयं रामचन्द्रः प्रणम्यताम् ॥

र्ष १९

वार्षिकमूल्यं सप्तमुद्राः ७.०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान–मध्यप्रदेश–गुजरात–महाराष्ट्र–मद्रास–आंध्र–उत्तरप्रदेश–
बिहार–पञ्चनद–सर्वकारैः स्वीकृता—

विषय-सूची

क्र० सं०	लेखाः	लेखकाः	पृष्ठ संख्या
१.	मङ्गलम्	आशुकवि–श्रीहरिशास्त्री, जयपुरम्	२२७
२.	आद्यशङ्कराचार्यपादानां जीवनवृत्तम्	श्रीराधेश्याममिश्रः, नवलगढः,	२२८
३	श्रीलक्ष्मणशास्त्रिणां जीवनचरितं तत्काव्यानि च	श्रीरत्नलालमिश्रः, नागौरः	२३०
४.	मनोविनोदकणिका	मधुपः, जयपुरम्	२३३
५.	लिङ्गविषयकोविचारः	श्रीबदरीप्रसादशास्त्री, प्रपूर्णा	२३५
६.	बसन्तचर्या	वैद्यश्रीबदरीप्रसादशास्त्री, तूंगा (जयपुरम्)	२३६
७.	अथ श्रीशिवराज्योदये महाकाव्ये, ३८तमः सर्गः	महाकविः डॉ० श्रीधरभास्करवर्णेकरः, नागपुरम्	२४१
८.	रससिद्धान्तपरिशीलनम्	काल्लूरि–श्रीहनुमन्तरावः, हैदराबादः	२४५
९.	कलिकौतुकम्	आचार्य–श्रीविश्वनाथमिश्रः, बीकानेरः	२४६
१०.	पिपासाया मरुभूमौ महाकविः शेली	अनु० गणेशरामशर्मा डूंगरपुरम्	२५१
११.	विचित्राः समाचाराः	” ” ”	२५४
१२.	सम्पादकीयम्	'मधुपः' सहसम्पादकः	२५६
१३.	दुर्गासप्तशती	श्रीहरिशास्त्री, सम्पादकः	२५८
१४.	लघुकथा	श्रीगिरिराजशर्मा शास्त्री, जयपुरम्	२६१
१५.	सूक्तिसुधा	आशुकवि–श्रीहरिशास्त्री, सम्पादकः	२६५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः
आशुकवि-कविभूषण-
श्रीहरिशास्त्री
•
सहसम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
साहित्यालङ्कारः

भारती

प्रबन्धसम्पादकः
सहसम्पादकश्च
गिरिराजशर्मा
•
भारती-भवनम्,
गोपालजी का रास्ता,
जयपुरम्

लेखैरुपष्टुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

वर्षम् १९ | चैत्रः, विक्रमाब्दः २०२६ (अप्रेल, १९६९) | अङ्कः ६

मङ्गलम्

आशुकवि–श्रीहरिशास्त्री, सम्पादकः

कृष्णाहिकाकपिकसंहतिमेचकाङ्गी
घोराट्टहासनिरता बहुदीप्तदन्ता ।
हस्तैः शिरोऽसिमभयं च वरं दधाना
श्रीकालिका कलयतान्मम सुप्रभातम् ॥१॥

मासावतरणम्

शीतापूपयवागुफाणितदधिप्राक्तैर्वटैः शीतला-
मागच्छन्निव योऽर्चयन्क्षितितले राजेव मासो बलात् ।
वासन्तीं छविमेधयन्नपि च यो गेहेषु वै देहिनां
दुर्गार्चां समुदञ्चयन् प्रविलसन् मासो मधुः प्राप्तवान् ॥१॥

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आद्य शंकराचार्यपादानां जीवनवृत्तम्

श्रीराधेश्यामिश्रः, नवलगढ़ः, रामगढः

अद्वैतदर्शनञ्च

प्रथमं तावज्जन्मस्थानमधिकृत्य किमपि कथ्यते। अस्ति किल केरलस्थ-कोचीनमण्डलान्तर्गतं कालटीति नामकं स्थानम्। वर्तते खलु तत् अलवाईति नामकात् रेल्वे-अवस्थानात् कतिपयक्रोशार्धेषु। अवस्थानञ्च तत् कोचीन-शूरानूराख्य-रेल्वेसरणिस्थम् वरीवर्ति बहुकालात् आरभ्य। आचार्यपादानां जन्मस्थानं हि प्राकृतसौन्दर्येण परितः परिपूर्णमिति च भूगोलेतिहासप्रसिद्धमेव।

पित्रोः निवासभूमिस्तु आदौ "पन्निऊर" इति संज्ञका आसीत्। तस्मात् स्थानात्कदा कथञ्च स्थानान्तरणं कृतवन्तौ इति तथ्यन्तु अद्यापि अविदितमेव। आचार्यपादानां जन्मभूमि-विषयेपि विभिन्नं मतम्। यथा हि आनन्दगिरिमहोदयः चिदम्बराभिधानं स्थानमेव आचार्यजन्मना परिपूतम् इति मन्यन्ते, परं तत्तु किमप्यालम्बनं नावहति। आचार्यजननी नम्बूदरीकुलजातेति विश्वस्यते। तत्कुलं नाम 'त्रिचूर' समीपे आसीन्निवसत्। ब्राह्मणाश्चैते वैदिकसंस्कृत्यै विशुद्धचारित्र्याय च प्रख्याता अभवन्। एष समाजविशेषः प्रचलित-शास्त्रोक्तपरम्परापरायणः संस्कारशास्त्रोक्तधर्माचारश्चेति मन्यते। आचार्यजनकश्च 'शिवगुरु' नाम्ना प्रसिद्ध आसीत्। स्वयं च बाल्यकाले गुरुकुले विद्यामधीयानः स्वाभाविकीं संन्यासप्रवृत्तिमदर्शयत् इति श्रूयते। जनकस्तु तस्य समावर्तनसंस्कारं गुरुगृहे एव विधाय अविलम्बेन तं स्वगृहमानिनाय। समपवर्तिनि ग्रामे निवसन्त्या कयाचित्कन्यकया सार्धं तस्योद्वाहं च चक्रे। तस्याः पिता 'मघ' नामेति कथ्यते, परन्तु तस्याः नामाधिकृत्य इतिहासज्ञाः भिन्नमतयः। भगवतः शंकराचार्यस्य वृत्तरचकः माधवः 'सती' इति तस्याः नामोल्लेखं करोति। आनन्दगिरिस्तु विशिष्टेति मन्यते। यथा हि—

"सा कुमारी सदा ध्यानासक्ताभूज्ज्ञानतत्परा
विशिष्टेति च नाम्ना तु प्रसिद्धाभून्महीतले"॥
'आनन्दगिरिः'

शताब्दीभ्यः परम्परागतमेकं कथानकं यत् शंकराचार्यजनकः शिवगुरुः वैदिकधर्ममार्गदृढ़निष्ठस्तपसा प्रपूताचारोपि संतानहीनः पुत्रकाम्यया दम्पती तदवाप्त्यै नितरामुत्कण्ठितौ, अपत्यमवाप्य च निरन्तरं तपःपूताचारौ पितृपैतामहिकधर्मपरायणौ स्वेष्टदेवमात्मानं सर्वथा समर्पयिष्याव: इति प्रतिश्रुतवन्तौ।

बहूनां महापुरुषाणाम् ऐतिहासिकप्रमाणमन्तरा जन्मकालविषयकाणि विभिन्नवृत्तानि कथ्यन्ते। आचार्यशंकरस्यापि तादृशी एव गतिः जनश्रुतिरेवाधारश्चेत् सर्वेषाम्, तर्हि वरिष्ठा परम्परैव मान्यतामारोहेत्। सन्ति मित्राणि शत्रवश्च प्रतिपुरुषम्, किम्पुनः युगनिर्मातॄणाम् ये हि युगधर्मप्रसारार्थं दिव्यप्रेरणया भूमौ अवतरन्ति।

अद्भुतबुद्धिसम्पत्तिः आचार्यशंकरस्य—

अन्ततः दम्पत्योः कृच्छ्रयमनियमादिनिष्ठा तपः परायणता च साफल्यमगात्। वैशाखशुक्लपञ्चम्यां शिवगुरु—पत्नी सुतमजीजनत्। स किल आयुषोऽष्टमे वर्षे चतुर्वेदनिष्णातः, द्वादशे च अखिलाम्नायज्ञः षोडशे च भाष्याणि अपूरयत्, द्वात्रिंशे च आयुष उद्देश्यम् स्वजनैः हेतुम् समाप्य तनुं तत्याज। यथाहि श्लोवयतेऽधः :—

"अष्टवर्षे चतुर्वेदान् द्वादशे सर्व शास्त्रकृत्।
षोडशे कृतवान् भाष्यम्, द्वात्रिंशे मुनिरभ्यगात्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एषोऽस्ति एकतमः अनेकेषु वृत्तकथानकेषु यं हि प्रख्यातपुराणवस्तुशास्त्रज्ञः डाक्टरपाठकः बेलगांवेति नामके स्थले प्राप्नोत् त्रिपृष्ठलघु-पुस्तिकायाम् ।

राजकीयसम्मानावधीरणा—

महाश्चर्यसम्पन्नमाचार्यशङ्करस्य बाल्यं कौमारञ्च अनन्यसामान्यम् । स्वायुषः प्रथमे वर्षत्रय एव मलयालमिति मातृभाषायाः ज्ञानमवाप्नोत् । किन्तु अस्य बाल्यकाल एव जनको दिवमगात् । विपन्नाया जनन्या एव सावधानावेक्षणपरायणे स्निग्धे उत्संग एवापुष्यत् । शैवास्योपवीतसंस्कारोऽचिरेण विधेयो येन स वेदाध्ययनार्हो भवेद् यदर्थमस्य अलौकिकः भाव्युत्कर्षसूचकः अतिवयस्कः प्रतिभावं भवश्चरितश्च एवं प्रणुदति इति पत्युः पुण्यां बद्धाभिलाषाम् निर्वर्तयितुं सप्रयत्ना आसीत् । अनुष्ठितायाञ्च तस्यां बालः स्वोपाध्यायस्यान्तिके शिक्षामवाप्तुं वेदाध्ययनशालां प्रहितः । स तु वर्षद्वय एव साङ्गोपाङ्गान् वेदानधीत्य आचार्यस्याशिषो लब्ध्वा गृहं परावृत्तः । जनान् ज्ञानप्रसारेण प्रबलबहुलात् तमसो स्निग्धानुकूलं ज्योतिर्गमयितुमनसोऽस्य चेतोऽतितरामुत्कण्ठते स्म । अतः सोऽनुकम्पाकार्यम् गृहत एवारभत । तस्याध्यापनकौशलं न केवलं सर्वजनानामपितु केरलाधिपतेः राजशेखरस्यापि ध्यानमाचकर्ष नृपश्च तदन्तिके मन्त्रिणं संप्रेष्य तमाहूतवान् राजसभायाम् । परन्तु श्वस्तनः अद्वैतवेदान्तप्रवर्त्तकः अपकर्षस्य अधस्तनां भूमिं गतानाम् पुरातन–धर्मविविधमतानाञ्चोद्धारकः सर्पादि राजसम्मानं, राज्ञः प्रसादञ्चाङ्गीकर्तुं प्रत्यादिदेश । स्वस्मै दत्तान्युपायनानि हस्तेनापि न पस्पर्श । अन्तत दृढमुत्सुकः विद्यानुरागी च स नृपः स्वयमेव आत्मसन्तोषाय शङ्करनिवसथमुपतस्थे ।

मातृस्नेहः—

शिशुः शंकरो तीव मातरि स्निह्यति स्म । सापि वार्धक्येनातितरां क्षामा क्षीणबला च गृह एवातिष्ठत् प्रायेण । किन्तु गृहादीषद्दूरे प्रवारिण्याम् अलवाईति नाम्ना प्रसिद्धायां सरिति सा नित्यमेवाह्निक-स्नानाय याति स्म । एकदा मार्गे एव भास्करप्रखरकिरणैः प्रतप्तायां भूमौ अतिक्लान्त्याऽवशन्ना निपपात निस्संज्ञा चबभूव । नूनम् मातृभक्तः सुतः ताम् स्वगृहमानयत् । परन्तु मातृस्नेहप्रणोदितः स पल्लीपरिसरप्रवहमाणा आलवाई निम्नगा कथमपि स्वप्रवाहं परिवर्त्य तस्य गृहान्नेदीयस्यां यदि न नेदिष्ठायां भूमौ प्रवहेत् येन जीर्णा शीर्णा माता यातायातक्लेशक्लिष्टा न भवेदिति अहर्निशम् कुलदेवतां प्रति प्रगाढम् प्रार्थयति स्म । एवं मातृस्नेहोद्रिक्तस्य पुत्रस्य प्रार्थना तयाङ्गीकृतेति तात्स्थानिक–जनश्रुति–मूलकेतिहासपरम्परागतं वृत्तं वर्तते । बालशंकरस्य नाम्ना कीर्त्या चानुषगिनः एवं भूता अनेके कथानकाः जनश्रुतिमवलम्ब्य परम्पराप्रवाहे समाविष्टा वर्तन्ते, यत्तेषाम् श्रद्धाविश्वासंसशयेनापि अत्रोल्लेखः साम्प्रतं प्रतीयते । जनसामान्यस्य विश्वासमारोहेयुर्न वेति नास्ति चिन्ताविषयोऽस्माकमाचार्यपादेषु श्रद्धापरायणानाम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीस्वामि-लक्ष्मणशास्त्रि-महाभागानां संक्षिप्तं जीवनचरितं तत्काव्यानि च

वैद्य-श्रीरतनलालमिश्रः, व्याकरणशास्त्री, काव्यतीर्थः, आयुर्वेदाचार्यः, नागौरः

समस्तेऽस्मिन् क्षितिमण्डले केचनैदृशा अपि महापुरुषाः सन्ति, ये गुण-गण-सम्पन्नाः सदाचार-परायणाः कृतिनः सन्तोऽपि स्वात्म ख्यापने आजीवनं किमप्यनभिदधाना मौनमेवावलम्बन्ते। ईदृक्षाः सत्पुरुषा वस्तुतो निर्मान-मोहाः क्षुद्रे वस्तुनि मनो न निबध्नन्ति। स्वयमीदृग्गुण-गण-विशिष्टा अपि एतादृशा जना जागतिकं यशश्चापि तुच्छं मनुष्यत्व-विकासे बाधारूपमिवाकलयन्ति। कामं ते कथमप्यन्तर्मुखाः स्वात्म-गोपन-परा भवन्तु, परन्तु—

जले तैलं खले गुह्यं पात्रे दानं मनागपि।
प्राज्ञे शास्त्रं स्वयं याति विस्तारं वस्तुशक्तितः॥१॥

इत्याभाणकानुसारेण यो हि वस्तुतः सदाचारी विद्वांश्च भवति स खलु प्राप्तेऽवसरे स्वत एव प्रकाशते। एवमेव हि मया प्रतीक्ष्यचरणानां गुरुवरेण्यानां प्रातःस्मरणीयानां नागौर-वास्तव्यानां महर्षिकल्पानां श्रीस्वामिलक्ष्मण-शास्त्रि-महाभागानां जीवनक्रम-विषये मदीयाध्ययनादारभ्य साम्प्रतं यावत् प्रसङ्ग-प्राप्तं यदन्वभावि, तदिदं लिख्यते। एभिर्महानुभावैर्बहूनि काव्यान्यपि रचितानि। येषां काव्यानां केषांचन पद्यानां रसास्वादं क्षिप्रमेव करिष्यन्ति श्रीमन्तः। आशासे-संस्कृत-पत्राणां खलु पाठका विशेषतो राजस्थानीया जना लेखमिमं पठित्वा ज्ञास्यन्ति यदस्मिन् स्वात्म-विज्ञापन-प्रधाने युगेऽपीदृशा महापुरुषा वर्तमानाः सन्ति। ये मनीषिणोऽतिसमर्थाः कवयो विचक्षणा गुणवन्तोऽपि स्वात्म-सन्तुष्टाः श्रीमद्भगवद्भक्तिपरायणाः स्वविषयेऽपृष्टा नैकाक्षरमपि वदन्ति। अस्माकं संस्कृत-समाजसदस्यानां तदिदं नैतिकं कर्तव्यमास्ते यद्धि एतादृशानां महापुरुषाणां गुण-गण-परिचयं कारयेम। अस्तु तावत् प्रकृतमनुसरामः।

कवीश्वराणां स्वामि-लक्ष्मणशास्त्रि-महाभागानां पूर्वजा राजस्थानान्तर्गत-बीकानेर-नगरे न्यवसन्। इमे महाकवयः खलु १९४० तमे वैक्रमाब्दे बीकानेर-नगरे जनिमाप्नुवन्। पितुरेषां नाम "जयश्रीरामदासजी" इत्यासीत्। इमे बाल्ये वयस्येव राजस्थानान्तर्गत-नागौर-नगरे निरञ्जनसम्प्रदायानुगत — श्रीस्वामि-मधुसूदन (मोतीरामजी) महाराजानां शिष्यत्वमूर्यकुर्वत। एतेभ्य एवैते सस्कृत-वाङ्मयस्य गभीरं पर्याप्तमध्ययनं व्यधत्सत। सहैव चाङ्ग्लभाषायामपि प्रगाढां प्रौढिमढौकन्त। ज्यौतिषशास्त्रस्यापि सुविस्तृत चूडान्तमध्ययनं विहितवन्तः। अस्यां स्वस्थविरावस्थायामपि पठितुकामान् छात्रान् विद्यान्न-वस्त्र-निवासादि-दानेनोपकुर्वन्ति नित्यशः। अस्मिन् समये राजस्थाने किं वा राजस्थानाद्बहिः स्थानेषु निवसन्त एषां बहवः शिष्याः सन्ति। ये स्वगुरूणां यशोध्वजान् चतुर्दिक्षु दोधूयन्ते। एभिर्महानुभावै र्वाल्मीकीय-रामयण-श्रीमद्भागवतादि-पुराणेषु साहित्य व्याकरणादिषु चापि पाण्डित्यमुद्भटमर्जितम्। पात्रत्वेन कुलीनत्वेन ग्राहिहृदयत्वेन चेमे संस्कृत-साहित्ये साधीयसीमुन्नतिं 'व्युत्पत्तिं' चापद्यन्त।

संस्कृत-काव्य-रचनायां भगवद्भक्तानां वैष्णवानामेषां प्रारम्भत एवाभिरुचिरासीत्। अत इमे १९६५ विक्रम-वत्सरादेव संस्कृते काव्य-निर्माणमारभन्त। अस्मादेव वर्षादेषां कवित्वकालः प्रारेभे। संस्कृत-पत्र-पत्रिकासु बहवो गद्य-लेखास्तथा बहूनि काव्यानि चैषां प्राकाश्यं प्राप्तानि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वामि लक्ष्मण-शास्त्रिचरणै लिखितानि काव्यानि नामग्राहं सपरिचयं चाधोनिर्दिश्यन्ते। सर्वाण्येमानि चित्र काव्यानि सन्ति प्रायशः।

काव्य-परिचयः

(१) श्रीविष्णुचरितामृतम् [चित्रकाव्यम्] अस्मिन् चित्रकाव्ये श्रीमहाभारतान्तर्गतस्य श्रीविष्णु-सहस्रनामस्तोत्रस्य सर्वे १०७ मिताः श्लोका निहिताः सन्ति। अत्र सर्गाश्च सप्तत्रिंशन्मिताः सन्ति अस्मिन् काव्ये श्रीविष्णोश्चतुर्विंशत्यवताराणामतिमनोज्ञं चरित्रं सरल-संस्कृतमयैरनुष्टुब्वृत्त-निबद्धैः पद्यैः वर्णितमस्ति। अत्रास्य त्रिचतुराण्युदाहरणानि निधीयन्ते:—

श्रीसेव्यं वि ष्णुमासेव्य
चित्ते वि श्वं च तज्जनम्।
कुर्वे श्री वि ष्णुचरिता-
मृतं वि ष्णु जनप्रियम् ॥१॥

वृत्तंस र्व त्र काव्येऽत्रा-
नुष्टुब्वि ष यभूषितम्।
शास्त्रष ट्का र्थविद्वे द्यं
गुम्फितं रो चनं सताम् ॥२॥

वन्देऽति व्य ग्रचित्तेन
श्रीराघ व पदाम्बुजम्।
संसार सा गरोत्तार-
करणा यो त्तमस्तवम् ॥३॥

कथां का व्य शिरोभूषा-
भूतां रा व णवैरिणः।
अयोध्या स्था ननाथस्य
वदाम्ये नः प्रणाशिनीम् ॥४॥

सत्यपि मनोहारिणि चित्रकाव्येऽस्य संस्कृत-पद्यभाषा सुतरां सरला मनोज्ञा चास्ति। विद्यार्थिनां श्रीविष्णुभक्तानां चेदं काव्यं नितरामुपयुक्तं पठनीयं चास्ति। कवे रचना-चातुर्यं काव्यस्य च महद् वैचित्र्यं विदुषामवश्यमेव द्रष्टव्यमस्ति।

(२) श्रीरामविवाहः [चित्रकाव्यम्] अस्मिन् काव्ये भगवतः श्रीरामस्य विवाहस्य मनोज्ञतमं वर्णनमस्ति। अत्र त्रयः सर्गाः सन्ति। सर्वत्र काव्येऽत्र वसन्ततिलकावृत्तम्। प्रथमद्वितीयसर्गयोः पादत्रयान्ते द्वयक्षरात्मकस्य शृङ्खलायमकस्य वैचित्र्यमस्ति। दृश्यतां तावदत्र काव्यच्छटा भगवतः परब्रह्मरूपस्य श्रीरामचन्द्रस्य जन्म विषये—

पञ्चाम्बरेचरगणे प्रबले विलग्ने
लग्ने कुलीरसहिते च किलौषधीन्द्रे।
धीन्द्रेण सङ्गतवतीह तमोविपक्षे
पक्षे मधौ च नवमीस्थपुनर्वसूडौ ॥१॥

रमारूपायाः सीताया उद्भवविषयेऽवलोक्यतां तावत्कवेरुत्प्रेक्षा—

पद्माप्यधिक्षिति वतीर्णवतिस्वनाथेऽ
नाथेव तद्विरहतो हि विचारशून्या।
शून्याश्रयेऽत्र पतिता निजलोकतोया
तो याजकोऽलभत तां जनको धरातः ॥२॥

तृतीयसर्गे प्रतिपादं द्वयक्षरात्मकस्य यमकस्य वैचित्र्यम्। भगवतः श्रीरामस्य चापभङ्ग-विषये दृश्यतां वर्णनभङ्गी—

वृक्षं प्रभञ्जन इव प्रबभञ्ज चापं
रामोहि मोहित-समस्तजनः स्वमूर्त्या।
सीताविवाहरचनाहरणैकहेतु-
मुन्मत्त-दानव-विनाश-निदानभूतः ॥१॥

(३) श्रीरामपादयुगलोस्तवः [चित्रकाव्यम्] अस्मिन् काव्ये सर्वत्र मधुमाधवीवृत्तनिबद्धानि पद्यानि चतुर्विंशतिमितानि सन्ति। श्रीविश्वामित्रमहर्षिकृतश्रीरामदुर्गस्तोत्रस्य प्रत्येकाक्षरं प्रत्येकपद्य-पादाद्यन्ताभ्यां विनिःसृतं भवति। इत्थमादावन्ते चाध्ययनेन समग्रं श्रीरामदुर्गस्तोत्रं निस्सरति। अहो! कवेः काव्यचातुरीदृशी न कस्य सहृदयस्य जनस्य मनो हरति?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अवलोक्यतां तावत् पद्य-पद्धतिरत्र—

श्री दायिनी भवतु नः किल साम्बुज श्री
रा मस्य पादयुगली क्षपिताघपू रा
मो हान्धनैजसहजाहृतराज्यरा मो
र क्षेप्युरर्कतनयो हृदि यां दधा र ॥१॥
क्ष म्य विभीषणमियं ननु यं रर क्ष
तु ङ्गाभिमाननिजसोदरधिक्कृतं तु
प्रा क्सञ्चितप्रचुर--पुण्यपरम्परां प्रा
च्यां मन्महेर्कमहसामिव तस्थलो च्याम् ॥२॥

पुनरस्य काव्यस्य विषये कविश्चात्र स्पष्टं व्यनक्ति—

एतत्स्तवाङ्गनवपादमुखान्तवर्णैः
श्रीकौशिकर्षिरचितस्तव–रामदुर्गम् ।
उत्पद्यतेऽतिमहतीति सुकाव्यरीति–
र्विज्ञै र्विमत्सरमनोभिरवेक्षणीया ॥१॥

(४) श्रीहरिद्वादशाक्षरीस्तोत्रम् [चित्रकाव्यम्] अस्मिन् काव्ये अकारादारभ्य हकारपर्यन्तवर्णानां द्वादशाक्षरी प्रतिपद्यं निहितास्ति। इयति सत्यपि ङकारञकारणकारादिवर्णनपरपद्यवर्जं पद्येषु काठिन्यं न समागतम् । दृश्यतां चात्र काव्य-निकुञ्ज-दृश्यम्—

अहो आत्मेष्टोऽसा इति विदित ईशो भुवनपा
उदग्रौजा ऊरीकृतपुरुतपा एधितबलः ।
य ऐश्वर्यौका ओ मितिपदसुधा और्वसमभा
जना अंहोऽसा अः क्षिपतु बहुदूरं हि भवताम् ।१।

कल्याणकारी किरतास्वकीर्ति
चित्ते सतां साधुकुलानुकूलः ।
केलिप्रियः कैरव-कोशहासः
स कौशलः कंसरिपुर्विशोकः ॥२॥

ङकारद्वादशाक्षरी दृश्यतामधुना—

यो नाघोण् ङयि ङावथो ङिति हरिः
श्रीवल्लभो ङीब् यथा,
प्राङुद्दीप्रणगात्मने पददद ङूर्जस्विधातुर्यथा।
ङे ङै ङो समसन्धिताक्षरवृतो ङौ तुल्यदीर्घस्वरो
माङं प्राप्य तिङः प्रकृत्युपमयाभूतार्थदस्तं भजे ।३

अत्र ञकारद्वादशाक्षरी—

यश्चेनोऽस्य ञवद्विपर्ययकरो ञावत् सुदीर्घो ञिवन्
ञी ह्वातोर्लयभूकरः स ञुववन् ञूवद् वचोऽगोचरः
ञे ञै ञो समनैकवर्णभृदसौ सन्धिप्रियो ञौ समो
बिभ्राणः खलु भव्यचिह्नमिव ञं
स्वन्तो यथा ञः सदा ॥४॥

अत्र णकारद्वादशाक्षरी—

प्रणति–वितरणाण्यश्चक्रपाणि र्घृणीन्द्रः
श्रुति–परिणुत–वेणूद्धूत–गीत–प्रणेता
दितितनयगणैकद्रावणो भीषणौजा
रुजतु गदगणं वः सर्वविद्या–प्रवीणः ॥५॥

इत्थ मस्मिन् काव्ये समस्तद्वादशाक्षरीनिस्सरति। येन कवेः काव्य–रचना चातुरी परिलक्ष्यते ।

(५) 'श्रीमहामन्त्रराजस्तोत्रम्" स्तोत्रेऽस्मिन् वसन्त-तिलकावृत्त-लक्षण-लक्षिताः ११८ मिताः सर्वे श्लोकाः सन्ति । अस्य स्तोत्रस्य श्लोकानामुत्तरार्द्धे मौलिकान्यष्टौ रामनामानि, पूर्वार्द्धे च भावार्थ-निष्पन्नमेकं रामनाम एवं प्रतिश्लोकं नव रामनामानि सन्ति । एवं प्रतिदिनमस्य स्तोत्रस्यैकविंशति-पाठ-करणेन षट्शताधिकैकविंशति-सहस्रसंख्यातोऽप्यधिकानां रामनाम्नां जापो भवति । दृग्गोचरीक्रियतां तावत्कवेरचना-चातुर्यम्—

श्रीविष्णुरूपमधिगम्य भवान् समस्तं
विश्वं च पाति सततं धृतसत्त्व-शक्तिः ।
श्रीराम राम कृतरक्षण राम राम
श्रीराम राम शरणं मम राम राम ॥१॥
त्वं दंष्ट्रया प्रलयकालजले निमग्नां
पातालतो वसुमतीं सहसोज्जहर्थ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीराम राम वसुधाधर राम राम
श्रीराम राम शरणं मम राम राम ॥२॥

इत्थं सर्वत्र भगवतो विष्णो वर्णनं प्रतिभाति। श्लोका मनोज्ञाः सन्ति। एषां हिन्दी-भाषानुवादः पं० रामनारायणदत्तशास्त्रिभिः कृतोऽस्ति। पुस्तकमिदं गीताप्रेसगोरखपुरतः प्रकाशितमस्ति।

(६) श्रीविष्णुस्तवद्वादशी [चित्रकाव्यम्]

अत्र द्वादशराशीनां तथा द्वादशतन्वादिभावाना-मुल्लेखोऽस्ति। सर्वत्र भगवतो विष्णोरेववर्णनं विद्यते। तदवलोकनीयं भवद्भिः—

चराचरात्मा धृतसाधुवेषः
सदा हरी रक्षति विश्वमेषः।
क्रियान्मनो मे भवभोगलग्नं
स्वकीर्तिपीयूषसमुद्रमग्नम् ॥१॥

वैवस्वतं यो भजतामधीनः
पातु स्वभक्तं हि बभूव मीनः।
तेषां भवेन्नैव कदापि हानिः
प्रीतोऽस्ति येषां च रमैकजानिः ॥२॥

इत्थं द्वादशराशीनां द्वादशभावानां च समुल्लेखेन विष्णु-वर्णनं भवति। द्वादशराशयो द्वादशतन्वादि भावाश्च क्रमशः सर्वेषु श्लोकेष्वमीषु निहिताः सन्ति। अस्मिन् काव्ये द्वादश-श्लोकाः सन्ति।

क्रमशः

मनोविनोदकणिका—

दया अपहृता जाता

छात्रमेकं कृपारामं छात्राञ्चापि दयाभिधाम्।
पाठकः पाठयन् कश्चित् स्वगेहे न्यवसच्चिरम् ॥१॥
एकदाऽवसरं लब्ध्वा कृपाछात्रस्तु दुर्मतिः।
तां दयामपहृत्यैव कुत्रचिन्निशि निर्गतः ॥२॥
परेद्युः पाठकं दृष्ट्वा तत्रत्यः कोऽपि सज्जनः।
प्रावोचत् साधुभावेन कच्चित् तेऽस्ति दया मयि॥३॥
सैव तु नास्ति किं कुर्वे पाठकः सोऽब्रवीदिदम्।
ननु ममास्ति भावोऽयं कृपा सम्प्रति विद्यते ?
साधो ! तेनैव दुष्टेन सा दयाऽपहृता मम ॥४॥

[छात्रस्य नाम तु 'कृपारामः' इत्येवासीत्, परं सोऽपि संक्षिप्तेन 'कृपा' इति नाम्नैव उच्यते स्म]

—दीनानाथत्रिवेदी मधुपः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Phone : **23-5661 (3 LINES)**

FOR THE BEST

CARPETS, SOFA-CUM-BEDS UNIFORMS

FOR HOME, OFFICE, INDUSTRY,
FOLDING ALUMINIUM FURNITURE.

ASK

HALL & ANDERSON

Props : **SHREE MADHUSUDAN MILLS LTD.**

Park Street, CALCUTTA-16

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लिङ्गविषयको विचारः

ले० साहित्यरत्नं श्रीबदरीप्रसादशास्त्री, प्रपूर्णा, खेतड़ी, राजस्थानम्

पूर्वानुवृत्तः—

अस्तु ! पक्षभेदसम्भवानीमान्युक्तानि लिङ्गलक्षणानि सर्वाणि च पुनर्भाष्ये निर्दिष्टान्येव । किन्तु तथापि यथोत्तरं मुनीनां प्रामाण्यमित्यभियुक्तव्यवहारात् मुनित्रये परमप्रमाणभूतस्य फणिशिरोमणे भंगवतो भाष्यकारस्याभिमत वास्तविकं लिङ्गलक्षणं किमस्ति ?

यतो हि शब्दानां लिङ्गज्ञानं सुलभं स्यादित्यत आदौ मूलभाष्यस्याऽऽवश्यकांशोद्धरणपुरस्सरं तत्रोक्तं लिङ्गज्ञानकारणं लिङ्गलक्षणं, तत्परीक्षणञ्च पूर्वाचार्यकृतमाश्रित्य किञ्चिदिव स्वान्तः सुखाय सुधियां कौतुकाय मन्दधियामुपकाराय वा स्ववचोभिरप्यारभ्यते ।

तत्र "का स्त्री नाम ? लोकत एते शब्दाः प्रसिद्धाः । स्त्री, पुमान्, नपुंसकमिति । यल्लोके दृष्ट्वैतदवसीयते, इयं स्त्री अयं पुमान् इदं नपुंसकमिति । सा स्त्री, स पुमान्, तन्नपुसकमिति । किं पुनर्लोके दृष्ट्वैतदवसीयते इयं स्त्री अयं पुमान्, इदं नपुंसकमिति ? लिङ्गम् । किं पुनस्तत् ।

"स्तनकेशवती स्त्रीस्याल्लोमशः पुरुषः स्मृतः ।
उभयोरन्तरं यच्च तदभावे नपुंसकम्" ॥

लिङ्गात् स्त्रीपुंसयोर्ज्ञाने भ्रूकुंसे टाप्प्रसज्यते" इत्यादि स्त्रियां ४।१।३। सूत्रगतमहाभाष्ये आक्षेपोपपादकसमाधानान्तरादिना लौकिकलिङ्गलक्षणं सपरीक्षणं प्रदर्शितम् ।

एवञ्चात्र भाष्ये का स्त्रीनामेति स्त्रीत्वविषयकजिज्ञासात्मके प्रश्ने पुंनपुसकयोरुपादानं तु प्रसङ्गप्राप्तं त्रिविधस्यापि लिङ्गस्य लक्षणज्ञानपूर्वकं तद्विषयकाज्ञानस्यापि निवारणार्थम् । इतश्च "गावो विश्वस्य मातर" इति वाक्ये सास्नादिमत्त्वरूपस्य गोत्वार्थस्य लोके प्रसिद्धस्यैव विश्वसम्बन्धवन्मातृत्वरूपकार्यान्तरविधानाय—"गो" शब्दस्य प्रथमान्ततयाऽनुवादः अथवा लोकप्रसिद्धगोत्वार्थको "गो" शब्दोऽत्र प्रथमान्ततयाऽनूदितो दृश्यते । तद्वदिहाण्यधिकाररूपकार्यान्तरविधानाय 'स्त्रिया'मिति सूत्रे सप्तम्यन्ततयाऽनूदितः प्रसिद्धः 'स्त्री' पदार्थः कः ।

शास्त्रेऽस्मिन् स्त्रिया (स्त्रीत्वस्य) अपरिभाषितत्वात् (स्त्रीत्वलक्षणादर्शनात्) लोके च "खट्वा"ऽऽदिषु स्त्रीव्यवहाराभावात् । लौकिकस्त्रीव्यक्तिग्रहणे तु खट्वादौ स्तनकेशरूपस्य स्त्रीत्वस्याव्याप्तेः स्त्रीत्वभिन्ने भ्रूकुंसे चातिव्याप्तेः सद्भावात् । खट्वादिषु शास्त्रेऽस्मि स्त्रीत्वतया पठितेषु पुंस्त्वभिन्नेऽपि च दारशब्दवाच्यार्थे अथवा दारशब्द एव च पुनः पुंस्त्ववैशिष्ट्ये दृष्टे खट्वादारभ्रूकुंसादिशब्देषु लौकिकस्त्रीत्वादि लिङ्गग्रहणं लौकिकस्त्रीव्यक्तिग्रहणं वाऽसङ्गतम् ।

अपि चोक्तदोषसद्भावे जातिरूपस्य खट्वादिसाधारणस्य भ्रूकुंसादिव्यावृत्तस्य स्त्रीत्वस्य गोत्वादिवद् ग्रहणे तु गोत्वादौ यथा मत्वर्थीयसम्बन्धेन सास्नादि नित्यैकानेकानुगतसामान्यरूपावयवसन्निवेशविशेषव्यङ्ग्यत्वे सति सामान्यविशेषरूपत्वमाकृतिग्राह्यरूपत्वं वास्ति । तद्विह खट्वाशिंषपा नगर्यादिषु मिथो विसदृशेषु विभिन्नाकारेषु सत्स्वपि विभिन्नावयवसन्निवेशविशेषव्यङ्ग्यत्वे च सति तत्र सामान्याकृतिग्राह्यत्वाभावात् स्त्रीत्वादिजातिरूपलिङ्गविशिष्टद्रव्यत्वं स्वीकर्तुं न शक्यते ।

अर्थाद् यथा सास्नादि रूपं गोत्वनिमित्तं नित्यमेकमनेकानुगतमाकृतिसामान्यं यथाऽनेक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोव्यक्तिषूपलभ्यते, न तथा खट्वाशिषपानगर्यादिषु व्यक्त्यन्तरेषु विसदृशावयवसन्निवेशविशेषव्यङ्ग्येषु नित्यमेकमनेकानुगतमाकृतिसामान्यरूप स्त्रीत्वादिजातिनिमित्त किञ्चिदुपलभ्यत इति भावः।

अथवा गोत्वाश्वत्वादिना विरुद्धजातीयेष्वपि चेतनव्यक्त्यन्तरेषु स्तनकेशकलापादीनां सदुपव्यञ्जनानामाकृतिसामान्यतया स्त्रीत्वाद्याश्रयाणां सत्त्वात् "स्तनकेशादिसम्बन्धः" इत्यादि पूर्वोक्तलक्षणेष्वाद्यलक्षणत्रयानुसारमपि स्त्रीत्वादिलिङ्गावगतिः सङ्गच्छते।

किञ्चाचेतनद्रव्यवाचकेषु खट्वाशिषपानगर्यादिषु चेतनद्रव्यवाचकदारादिशब्देषु च "स्तनकेशवती" ति भाष्योक्तवार्तिकव्याख्यानरूपं "स्तनकेशादिसम्बन्धो विशिष्टा वा स्तनादय" इति हरिकारिकोक्तं लौकिकलिङ्गलक्षणद्वयं त्वसङ्गतमस्त्येव! परं स्त्रीत्वादिजातिरूपकल्पनापि पूर्वोक्तदोषबाहुल्यादसङ्गतैवेति "हस्तिन्यां बड़वायाञ्च स्त्रीति बुद्धेः समन्वयः। अतस्तां जातिमिच्छन्ति द्रव्यादि समवायिनी" मित्यादिना जातिरूपलिङ्गलक्षणविवेचनावसरे स्फुटं वक्ष्यते।

अर्थाद् यथासास्नादिमत्त्वं गोत्वं सकृदाख्यातं सर्वासु गोव्यक्तिषु ग्रहीतुं शक्यते, न तथा विभिन्नसंस्थानविशेषव्यङ्ग्येषु खट्वाशिषपादिषु स्त्रीलिङ्गेषु व्यक्त्यन्तरेषु स्त्रीत्वजातिर्ग्रहीतुं शक्यते।

यतो हि जातिव्यक्त्योः समवायाभ्युपगमाज्जातेश्चाकृतिसामान्यतया ग्राह्यत्वात् स्त्रीत्वादिजातिः खट्वाशिषपानगर्यादिषु स्त्रीव्यक्त्यन्तरेषु सामान्याकृतिमत्त्वाभावाद् ग्रहीतुं न शक्यते। तथात्वे च सकृदाख्यातनिर्ग्राह्यापि न भवति।

एवञ्च सर्वथापि खट्वाशिषपानगर्यादिषु स्त्रीत्वस्य सकृदाख्यातनिर्ग्राह्यत्वादिजातिलक्षणाभावात्। स्त्रीत्वादेर्जातिरूपत्वमसङ्गतम् तथा चैतेनैव पूर्वोक्तहरिकारिकानुसारं प्रतिपादितेषु सप्तमु लिङ्गलक्षणेषु ह्याद्यं लक्षणत्रयं भाष्ये लोकत इत्यादिना पूर्वपक्षतया यथासम्भवं वा स्वीकृतमपि नहि सर्वथा निर्दुष्टमिति वेदितव्यम्।

अथैवमज्ञातेऽपि स्त्रीत्वपदार्थे तज्जिज्ञासायां 'स्त्रिया"मित्यत्रोक्तसौत्रविभक्त्याश्रयणे (सप्तम्याश्रयणे) तु ज्ञातस्त्रीत्वसामान्यतया स्त्रीव्यक्तिविशेषविषयकजिज्ञासात्मकः प्रश्नो मा भूदित्यतो वस्तुतत्त्वावगतये प्रातिपदिकार्थमात्रइत्यादि शास्त्राच्च प्रथमान्तेन भाष्ये प्रश्नः का स्त्री नामेति, तत्रोच्यते स्त्री, पुमान्, नपुंसकमित्येते शब्दाः स्त्रीत्वादिजातिविशिष्टार्थाभिधायित्वेन

"लोक्यते येन शब्दार्थो लोकस्तेन स कथ्यते।
व्यवहारोऽथवा साक्षाद् व्यवहर्तृपरम्परे"॥

ति हर्युक्ते र्लोकतो व्यवहारतो वृद्धव्यवहर्तृपरम्परातो वा प्रसिद्धाः ख्यातिङ्गताः। अर्थाद् व्यवहारे व्यवहर्तरि (व्यवहर्त्रा जनेन) वा "यल्लोके दृष्ट्वैतदि"ति पूर्वोक्तभाष्ये यदिति सर्वनामनिर्दिष्टं स्तनकेशादिकं स्त्रीत्वादिनिमित्तमुपलभ्य निमित्तवत्यर्थे सत्त्वगते 'इयं स्त्रीत्यादि प्रत्याय्यते। तदेव निमित्तं स्त्र्यादिशब्दवाच्यम्। निमित्तयोगाच्च द्रव्यगतो द्रव्यविशेषणीभूतो निमित्तवानर्थोऽपि स्त्रीत्वादिलिङ्गं स्त्र्यादिशब्दवाच्यो भवति।

अर्थाद् यथा शुक्लोऽस्तीत्यत्र मत्वर्थीयप्रत्ययलोपे शुक्लत्वविशिष्टोऽपि पदार्थो गुणगुणिनोः समवायाच्छुक्लत्वाभिन्नः शुक्ल इत्युच्यते, तद्वद् दर्शनावसायरूपं यन्निमित्तमुपलभ्य निमित्तवत्यर्थे प्रत्यय उपजायते तत्स्त्र्यादिशब्दवाच्यम्। तथा चोद्योते श्रीनागेशो निमित्तवदर्थरूपं स्त्र्यादिशब्देन प्रत्याय्यते "इय स्त्री"त्यादि। किञ्च द्रव्ये संख्याकर्मादिषु बहुष्वर्थेषु सत्सु किं तन्नि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मित्तवदर्थरूपं यदीयोऽयम् "इयं स्त्री"त्यादिह्यवसायाकारः। तत्रोच्यते स्तनकेशादिकं स्त्रीत्वादि लिङ्गम् ।

अर्थाद् "यल्लोक" इतिभाष्ये यच्छब्दपरामृष्टं" स्तनकेशादिकं स्त्रीत्वादि लिङ्गं विशेषणं दृष्ट्वा विशेष्यभूतस्य द्रव्यस्य इयं स्त्रीत्यादि निश्चयो भवति लोके, अतो लोके प्रसिद्ध एवार्थोऽत्र स्वीकर्तव्य इत्याशयेन पूर्वपक्षतया स्वोक्तं प्रमाणयितुमथवा लोकप्रसिद्धलिङ्गलक्षणज्ञानार्थञ्च "स्तनकेशवती स्त्री स्या"दिति वार्तिकमुपन्यस्तम् ।

तत्र च निमित्तवदर्थरूपस्त्रीत्वादिलिङ्गानां स्त्र्यादिशब्दवाच्यानां लिङ्गिनां द्रव्याणाञ्च विशेषणविशेष्यभावेनापि मिथः समवेतत्वात् समवायिकारणाश्रयलिङ्गिकथनपूर्वकं लिङ्गलक्षणं कृतं वार्तिककारेण। इममेवाशयं हृदि निधाय ब्रूते कैय्यटोऽपि लिङ्गे पृष्टे लिङ्गिकथनं लिङ्गप्रतिपत्तिपरं लिङ्गज्ञानतात्पर्यकम् ।

एतेन स्तनकेशादिकं तद् दर्शनावसायरूपं निमित्तम्, अथवा तद्योगाच्च "एतदि"ति भाष्योक्तनिमित्तवदर्थरूपं स्त्र्यादिशब्दवाच्यं स्त्रीत्वादिकमपि लिङ्गम् तदेव पुनः स्त्रीत्वपुंस्त्वनपुंसकत्वभेदभिन्नं त्रिविधं भवति। समवायसम्बन्धेन च पुनस्तद्ग्राहकं द्रव्य (सत्त्वं) मपि स्त्री पुमान् नपुंसकमिति त्रिविधमेव भवति। तस्य च पुनस्त्रिविधस्यापि लिङ्गस्य लौकिकलिङ्गलक्षणवार्तिकानुसारं प्रत्येकं परिष्कृतं लक्षणमित्थं वेदितव्यम्—

"सातिशयस्तनकेशवत्वं स्त्रीत्वं" भूमनिन्दाप्रशंसास्विति मतुप्, एवञ्च "लोमादिपामादिपिच्छादिभ्यः शनेलचे"त्यनेन लोमशब्दान्मत्वर्थीये 'श' प्रत्यये कृते सातिशयलोमशत्वं (लोमवत्त्वं) पुंस्त्वम्। स्त्रीपुंस्त्वाभावे सति लिङ्गवत्तयोभयोः सादृश्यं नपुंसकत्वम् ।

अत्र स्त्रीत्वलक्षणे स्तनकेशग्रहणञ्च प्रसिद्धत्वादन्यस्यापि स्त्रीप्रतिपत्तिनिमित्तस्य कुमार्यादिगतस्य स्त्रीमात्रगतस्य वा योन्यादेरुपलक्षणम्। एवञ्च पुरुषादावपि स्तनकेशसत्त्वात्तत्रातिव्याप्तिवारणाय सातिशयग्रहणं कुमर्यादौ च सातिशयस्तनकेशवत्त्वाभावात्तदुपलक्षितस्य योन्यादे र्ग्रहणमित्युक्तमेव। एवमेव च सातिशयलोमग्रहणं प्रसिद्धत्वादन्यस्यापि पुरुषप्रतिपत्तिनिमित्तस्य कुमारादिगतस्य पुरुषमात्रगतस्यैव वा शिश्नादेरुपलक्षणार्थमिति ज्ञेयम् ।

इतश्च भवति समुदायः समुदायिनः सदृशस्तेन मयूरीकुक्कुटादीनां स्त्रीपुंससमुदायानां नपुंसकत्वं माभूदित्यतो नपुंसकत्वलक्षणे स्त्रीपुंस्त्वाभावे सतीति सत्यन्तं विशेषणम्, अथवा समुदायस्य परवल्लिङ्गतातिदेशादप्रसङ्गो नपुंसकत्वस्य तत्रेति चेद् वस्तुस्वरूपनिरूपणपरमेतद्विशेषणमित्यभ्युपेयम्। अव्ययाऽऽख्यातार्थानामसत्त्वभूताना (मद्रव्याणाम्) मपि नपुंसकत्ववारणाय च लिङ्गवत्तया सादृश्यमिति दलं निवेश्यते ।

इत्येवं स्त्रीपुंसनपुंसकत्वलिङ्गलक्षणानि लौकिकानि भवन्तीति लौकिकलिङ्गलक्षणनिर्वचनं यथासम्भवमुपादेयतया पूर्वपक्षतया वा विधायापि शब्दनिष्ठस्त्रीत्वपुंस्त्वादिलिङ्गज्ञानेऽथवाऽर्थनिष्ठस्त्रीत्वादिलिङ्गज्ञानेपूर्वोक्तं लौकिकलिङ्गलक्षण सर्वत्र न घटते। इत्याक्षिपति ।

आक्षेपवार्तिकञ्च पूर्वोक्तमेव "लिङ्गात्स्त्रीपुंसयोर्ज्ञाने भ्रूकुंसे टाप् प्रसज्यते" अर्थात् लौकिकलिङ्गस्तनकेशादिनिमित्तरूपात् स्त्रीपुंसयो र्ज्ञाने भ्रूकुंसेऽतिव्याप्तिष्टापः प्रसक्तिश्चेतिदोषसद्भावः पूर्वोक्तः ।

स्त्रीत्वभिन्ने भ्रूकुंसेऽपि स्तनकेशवत्त्वात् स्त्रीत्वं वाच्यं भवति। एवञ्चाजादिगणपठितानामकारान्तस्य च शब्दस्य वाच्यं यत् स्त्रीत्वं तत्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्योत्ये 'अजाद्यतष्टा" ४।१।४ बित्यनेन टाप् स्यादेवेति टाब्विधायकानुशासनात् स्तनकेशवत्त्वरूपस्त्रीत्ववाचकेऽकारान्ते भ्रूकुंसशब्देऽपि 'टाप्' प्रसज्यते। ननु स्तनकेशवतीत्यत्र नित्ययोगे मतुब् विज्ञानाद् "भ्रूकुंस" शब्दस्य स्त्रीत्वाभाव इति चेन्न प्रतिपत्तृणां सामाजिकानां नित्यलिङ्गदर्शनात्। नाटकादौ तस्य सदैव स्त्रीवेषधारिण एव दर्शनादिति भावः।

एवमेव नापितगृहं "खरकुटी" उच्यते तत्र चेवार्थे संज्ञायां चे" ५।३।९७ ति कनि लुम्मनुष्य ५।३।९८ इत्यनेन च लुपि खरकुटीशब्दस्य मनुष्यवाचकत्वान्मनुष्यस्य च लोमशत्वात् पुंस्त्वे सति "खरकुटीः" पश्येति वाक्ये खरकुटीरिति द्वितीयाया बहुवचनान्तपदे शसः सकारस्य "तस्माच्छसो नः पुंसी ६।१।१०३ त्यनेन नत्वं प्राप्नोति। इत्थमेव चञ्चेव मनुष्यचञ्चा वर्ध्रिकेत्यत्रापि संज्ञायां कनि लुपि च कर्मणि बहुत्वे विवक्षिते "चञ्चाः पश्य" 'वर्ध्रिकाः पश्ये' त्यत्रापि नत्वं प्राप्नोति। अथवा यद्धि "लोमशत्वं" लोके दृष्टं वैतदवसीयत अयं पुमानिति। अस्ति तल्लोमशत्वं वर्ध्रिकादिष्वपीत्यतस्तत्रापि पुंस्त्वमभ्युपगम्य कर्मणि बहुत्वे नत्वं स्यादित्येत एव दोषा न प्रत्युत लौकिकलिङ्गलक्षणाभ्युपगमेऽन्येऽपि दोषाः सन्तीत्यतः पुनरपि "खट्वा वृक्षौ न सिध्यत" इति वार्तिकान्तरमुपन्यस्य खट्वावृक्षयोः शब्दसाधुत्वार्थं क्रमशः स्त्रीपुंस्त्वाभ्युपगमस्याऽऽवश्यकत्वेऽपि तत्र स्त्रीत्वादिलिङ्गप्रत्यायकस्तनकेशाद्युपव्यञ्जनाभावात्तयोरपि लिङ्गं न सिध्यति।

अथवा "नापुंसकं भवेत्तस्मिन्" 'तदभावे नपुंसकमित्यादिना नपुंसके वस्तुनि भवं नापुंसक लिङ्गमिति व्युत्पत्या नपुंसकत्वं स्यात्। अर्थात् स्त्रीत्वपुंस्त्वयोरभावात् स्त्रीत्वपुंस्त्वसादृश्यात् सत्त्वभूतस्यार्थस्य लिङ्गसंख्यारहितत्वाभावाल्लिङ्गवत्त्वेन सत्त्वरूपाच्च खट्वावृक्षयां र्नपुंसकत्वं स्यादित्युच्यते चेन्न तथात्वेऽपि खट्वादौ टावादिकार्यालाभादित्यतः खट्वावृक्षयो स्तदिरेष्वचेतनद्रव्येषु च स्त्रीत्वादि लिङ्गमभ्युपगन्तु "स्तनकेशवती स्त्री स्या" दिति वार्तिकानुसारं "स्तनकेशादिसम्बन्धः" अर्थात् "स्तनकेशकलापप्रजननाद्युपव्यञ्जनै रवयविनः सम्बन्धः संयोगसमवायलक्षणो लिङ्गम्" अथवा "अवयविनि द्रव्ये संयोगसमवायाख्यसम्बन्धविशिष्टाः स्तनादय एव लिङ्ग" मिति द्विविधेऽपि लौकिक लिङ्गलक्षणेऽव्यापकत्वादुपेक्षिते "तदुपव्यञ्जनाजाति" रिति हर्युक्तेः स्तनाद्युपव्यञ्जनाभिव्यक्तविशेषा स्त्रीत्वपुंस्त्वनपुंसत्वरूपाजातिर्लिङ्गम्" इति तृतीयं लक्षणं तैर्थिकमतभेदेनाऽऽश्रीयते। लिङ्गलक्षणेऽस्मिन्नादि ग्रहणाद् यथायथं विशिष्टमेवोपव्यञ्जनं ग्राह्यम्। क्रमशः

शुभ कामनाओं के साथ

* इन्डो फॉरेन एजेन्सीज् *

२३, सर फिरोजशाह मेहता रोड़,

बम्बई – १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"वसन्तचर्या"

ले० वैद्य-श्रीबदरीप्रसादशर्मा शास्त्री, राजकीय औषधालयः तूंगा-जयपुरम्

"मधुमाधवौ वसन्तः" अर्थाच्चैत्रवैशाखमासद्वयमासाद्य वसन्तर्तुः प्रवर्तते। कविभिरयं "ऋतुराज" शब्देन व्यवह्रियते। गीतायामपि-भगवता श्रीकृष्णेन "ऋतूनां कुसुमाकर" इत्यभिहितमासीत्।

प्रकृत्या कालेऽस्मिन् समस्तपादपाः विविधा लताश्च नवपल्लविताः सपुष्पाः प्रफुल्लिताश्च भवन्ति। सहकारपादपेषु मत्ताः-मधुकरा गुञ्जन्ति पिकाश्च कूजन्ति। सत्यं हि वसन्तकाले समस्तो हि लोको विशिष्टमानन्दमनुभवति।

किञ्चायुर्वेदोऽयमुपदिशति-यत् सर्वेपि ऋतवो यद्यपि स्वे स्वे काले सुखावहाः सन्ति, किन्तु "सुखसंज्ञकमारोग्यं विकारो दुःखमेव च" इत्युक्त्या सुखं तदेव भवति यदारोग्याय कल्पते। अतो बुद्धिमता पुरुषेण सदैवारोग्याय प्रयतितव्यम्।

समागतेषु सर्वेष्वेव ऋतुषु सप्ताहादर्वाक् ऋतुसन्धिकालो भवति। अतः ऋतुसन्धिकाले पूर्वर्तुकालीनौ यौ चाहार विहारौ सेवनीयौ स्याताम्, तौ च विहाय प्राप्तऋतुकालीनावेवाहाराविहारौ सेवनीयौ, यतो हि ऋतुसन्धिषु विविधा रोगाः प्रादुर्भवन्ति।

उक्तं हि शतपथे—"भैषज्यं यज्ञ वा एते ऋतुसन्धिषु व्याधिर्जायते, तस्मात् ऋतुसन्धिषु प्रयुज्यन्ते"

प्रकृत्या—शिशिरे ऋतौ [माघफाल्गुनमासयोः] श्लेष्मणश्चयोभवति। स च श्लेष्मा वसन्ते भगवतो भास्करस्य प्रखरमयूखैर्द्रवीभूतः पूर्वं जाठराग्निमुपहत्य प्रतिश्यायकासश्वासपार्श्वशूलमसूरिकादिरोगान् जनयति। अतः येनोपायेन पूर्वं कफक्षयो भवेत्तदेवाचरितव्यम्।

दन्तशोधनम्—

प्रातरुत्थाय शौचादिकृत्यं विधाय निम्बकाष्ठेन वब्बूलकाष्ठेन वा दन्तशोधनं कुर्यात्। अथवा सुण्ठीमरिचपीप्पलीसैन्धवलवणस्फरिकाचूर्णै र्दन्तशोधनं कर्तव्यम्। केषांचित् दशनेषु यदि शीतबाधा भवेत्तर्हि हिंग्वष्टकचूर्णेन दन्तान् विशोधयेत्। दन्तशोधनेन सह जिह्वाया अपि शोधनमतीवावश्यकम्।

नस्यम्—

"नासिका हि शिरसो द्वारं तेन तद् व्याप्य तिष्ठति" इतिवचनात्-समुद्भूते प्रतिश्याये चापकः श्लेष्मा शिरस्थोऽहर्निशमतीव पीड़ामुत्पादयति, तदा तदुपशमो नस्येनैव भवति। कट्फलचूर्णे स्तोकं कर्पूरं सम्मेल्य तत् नासिकया पुनः २ सेव्यम् येन शिरस्थः श्लेष्मा पक्वीभूय नासिकया बाहरायाति।

वमन-विरेचने—

केषांचित् गले कफवृद्धया गलशोथो (टांसिलाइटिस) भवति तदुपशान्तये सैन्धवलणसोड़ावाईकार्व—स्फरिकापिप्पलीचूर्णानां प्रत्येकं माषमितमादाय सुखोष्णेन जलेनाकण्ठपूर्णं (गरगरा) कुर्यात्, येनावश्यं गलामयाः शाम्यन्ति।

अथवा मधुयष्टिसैन्धवलवणचूर्णं सुखोष्णेन जलेन पातव्यं येन वमनद्वारा कफशान्तिर्भविष्यति।

आप्तोपदेशानुनुसारं प्रतिवर्षमाश्विने मासि चैत्रमासे वा वमनविरेचनद्वारा कोष्ठं विशोधयेत्। प्रतिवर्षं कोष्ठशुद्धया सहसा नरं रोगाः नाक्रामन्ति। प्रायस्त एव नरा रोगिणो भवन्ति ये च काले शरीरं नोविशोधयन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विरेचनार्थमेरैण्डतैलं चतुःपञ्चतोलकमितं कवोष्णे मधुरपयसि निक्षिप्य प्रातः पिबेत् । अथवापरणेषु तरुणीकुसुमाकरचूर्णमादाय माषषट्कमुष्णोदेकेन सेवनीयम् । येन सम्यक् कोष्ठशुद्धिर्भवति । विरेचनान्ते मुद्गतण्डुलकृशरा सेव्या ।

स्नानम्—

सकासे प्रवृद्धे कफे अतिश्याये च प्रातः स्नानं नाचरेत् यतो हि प्रातः स्नानेन प्रतिश्यायस्य प्रकोपोऽधिको भवति । यदि च स्नानमावश्यकं स्यात्तर्हि सुखोष्णजलार्द्रपटेन शरीरं प्रोञ्छयेत् निवातप्रदेशे । प्रातः कफकोपे च तैलाभ्यङ्गो नाचरणीयः ।

भ्रमण-व्यायामौ—

"वसन्ते भ्रमणं पथ्यम्" इत्युक्त्या कालेऽस्मिन् भ्रमणमत्यावश्यकम् । समयेऽस्मिन् व्यायामोऽपि चावश्यं कर्तव्यः । प्रातः व्यायामात्पूर्वं न चाभ्यङ्ग उचितः । स्नानमपि व्यायामान्ते हितकरम्, न च व्यायामात्पूर्वम् ।

भोजनम्—

भोजने लघुरूक्षकटुकषायरसानां प्रयोगोऽधिको विधेयः । भोजनादौ कफक्षयार्थं सदा लवणाद्र कपिष्टिः (चटनी) सेव्या । मुद्गादिसूपेषु चार्द्रकहिङ्गुकृष्णमरिचानां प्रयोगः सदैव कार्यः । भोजनान्ते च द्राक्षारिष्टबब्बूलारिष्टकनकासवानां सेवनं हितकरं भवति । मधु च जले निक्षिप्य सदा पेयम् । स्थूलदेहानां कर्षणाय जलमिश्रितो मधुप्रयोगः श्रेयस्करो भवति ।

प्रवृद्धे प्रतिश्याये च पिप्पलीचूर्णं मधुना सेव्यम् । तथा तालीसादिचूर्णस्य लक्ष्मीविलास रसस्य चार्द्रकरसस्य च मधुना सह सेवनेन कासप्रतिश्यायादीनां शान्तिर्भवति ।

वसन्तरोगः—

वसन्तकाले प्राणिनां विशेषेण बालानां वसन्तरोगः (चेचक) प्रादुर्भवति । वसन्तकालात् ग्रीष्मकालपर्यन्तं रोगोऽयं बालकानुत्पीड़यति । रोगोऽयं पित्तकृत्कटुवम्लतीक्ष्णवस्तूनां सेवनेनैवाविर्भवति, अतस्तानि त्याज्यानि । अयं हि रोगिगात्रसंसर्गात् सर्वत्र प्रसरति । अतः वसन्तरोगिणः नान्यैः सह सम्पर्क उचितः ।

आयुर्वेदमतेनास्य रोगस्य प्रसारो विषयुतानां पुष्पाणां गन्धेन भवति ।

उपचारः—

वसन्तरोगोत्पत्तिनिरोधाय सफलश्चैकः प्रयोगः पुरस्तात् प्रस्तूयते–प्रयोगमिममापणेष्वादाय जलेनापिष्य मटरप्रमाणा गुलिका विधेयाः । ततः सर्वेभ्यो गृहस्थेभ्यो बालकेभ्यो गुलिकैका प्रातः सायं शीतलजलेनैव प्रदातव्या । अनेनोपचारेण वसन्तरोस्योगत्पत्तिरेव नैव भविष्यति ।

औषधप्रयोगः—

(१) निंबनवपल्लवाः	३	त्रयो माषाः
(२) कृष्णमरीचिकाः	३	,,
(३) अपक्वा निशा (कच्चीहल्दी)	३	,,
(४) कर्पूरम्	,,	,,
(५) गैरिकमृत्	,,	,,

अपथ्यं—

वसन्तकाले – गुर्वम्लमाषदधि—दिवानिद्रादीनि कफकराणि द्रव्याणि च त्याज्यानि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ श्रीशिवराज्योदये महाकाव्ये

३८ तमः सर्गः

महाकविः डॉ० श्रीधरभास्करवर्णेकरः. डी.लिट्, नागपुरम्

अथाध्वानमतिक्रम्य दीर्घं घोरं सुदुर्गमम् ।
कृतार्थतां शिवो मेने समुद्रमिव मारुतिः ॥१॥

प्राच्यामरुणिमानं च फुल्लाम्बुजसहोदरम् ।
आलोक्योद्गच्छदरुणप्रभवं विजहर्ष सः ॥२॥

निरीक्ष्य परितः सह्यं परीतं वनराजिभिः ।
अधित्यकाभिरात्मानं गोपयन्तं तुतोष सः ॥३॥

ततः कलकलो भ्राम्यत्खगानां वनवासिनाम् ।
भीतिजन्य इवाकस्मात् परितः शुश्रुवे वनम् ॥४॥

ससम्भ्रमं प्रधावन्ति वृन्दानीतस्ततस्तथा ।
कपीनां च मृगाणां च व्यलेक्यन्त समन्तत. ॥५॥

आक्रन्दमार्तं विद्धानां चित्रकाणां विजृम्भितम् ।
दूरादपि स शुश्राव तत्प्रतिध्वनिमेदुरम् ॥६॥

स तर्ककुशलो धीमान् सहसैवान्वमन्यत ।
लिङ्गैराकस्मिकैरेतैर्भयस्थानमुपागतम् ॥७॥

निजानुयात्रिकान् कांश्चित् स हि तत्कालमादिशत् ।
वृक्षाग्रेषु समारुह्य परितो दृश्यतामिति ॥८॥

अखण्डजागरवलेशकषायितविलोचनैः ।
जैर्नातिनिकटे दृष्टमश्वानीकं प्रवेगवत् ॥९॥

अश्वानीकमिति ज्ञात्वा वाजिराजिधुरन्धरः ।
शिवराजं प्रणम्याह स्वामिनिष्ठोचितं वचः ॥१०॥

स्वामिन्नन्वेषयन्तोऽस्मान् रुद्धदुर्गविनिर्गतान् ।
प्रधावन्तीत एवेमे संक्रुद्धा रिपुसैनिकाः ॥११॥

अस्मन्निर्गमनं तेषां विदितं चेत्सुनिश्चितम् ।
क्षुधार्तेवापतेदत्र समग्रारिवरूथिनी ॥१२॥

निमेषलेशलक्षांशोऽप्यधुनाऽत्र प्रतीक्षितुम् ।
जानात्येव महाराजः समयो नावशिष्यते ॥१३॥

न प्रार्थनार्थं समयः कुतस्तत्पुनरुक्तये ।
तद् यद् ब्रवीति दासोऽयं तत् सर्वं प्रतिमान्यताम् ॥

प्रास्ताविकमपीदं मे नूनमक्षणभाषणम् ।
अज्ञस्य हि विशेषज्ञः स्वामी तत्क्षन्तुमर्हति ॥१५॥

त्वत्सान्निध्यातिलुब्धोऽपि प्रार्थये नतमस्तकः ।
इतो दूरं प्रयाहीति क्षणेऽस्मिन्नेव कुत्रचित् ॥१६॥

यमाश्रयितुकामस्त्वमाप्रयाणक्षणादसि ।
असौ विशालदुर्गस्ते नातिदूरे व्यवस्थितः ॥१७॥

तमाक्रम्य प्रवेगेन ध्वंसयित्वा विरोधकान् ।
शतघ्नीध्वनिभिर्वार्तां मामावेदय चात्मनः ॥१८॥

तावद् विचूर्णयाम्येतानरातीनाततायिनः ।
उच्चैरापततो वेगात् पयोदानिव पर्वतः ॥१९॥

स्वामिनिष्ठैकशीलस्य वचस्तस्य निशम्य तत् ।
प्रसन्नोऽपि विषण्णोऽभूत् सुहृत्स्नेहमयः शिवः ॥२०

आपत्सु धर्मो भृत्यानां स्वामिसंरक्षणं यथा ।
तथैव भृत्यसंत्राणं स्वामिनोऽपि स तत्त्वतः ॥२१॥

मदर्थमयमात्मानं संग्रामे होतुमिच्छति ।
कथमानृण्यमेतस्य प्राप्नुयामिह जन्मनि ॥२२॥

निष्कृतिः शक्यते कर्तुं त्यागानां विविधात्मनाम् ।
हौतात्म्यरूपत्यागस्य न सम्भवति सा क्वचित् ॥

अभिधेयं विधेयं वाऽवसरेऽस्मिन् कथं नु किम् ।
इत्यशक्तः स निर्णेतुं प्रेम्णा सुहृदमैक्षत ॥२४॥

मनसा भक्तिसान्द्रेण निध्यायञ्जगदीश्वरम् ।
व्याकुलः प्रार्थयामास मित्रकल्याणधीः शिवः ॥२५

मृत्युञ्जय ! महाकाल ! घोरेऽस्मिन् राष्ट्रसंकटे ।
दैत्यसंहारसामर्थ्यं तवाधेहि सुहृत्सु मे ॥२६॥

निष्कामराष्ट्रसेवोत्थं यत् पुण्यं मयि किञ्चन ।
संक्रामयस्व तत् सर्वं सुहृत्स्वेतेषु मेऽधुना ॥२७॥

शस्त्रेष्वापात्यमानेषु रिपुभिर्मत्सुहृद्गणे ।
साधुत्राणचणाऽसौ ते करुणा कवचायताम् ॥२८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अल्पसंख्या इमे वीरा असंख्येयाश्च ते द्विषः ।
सहस्रगुणमेतेषां प्रत्येकं वर्धतां बलम् ॥२९॥

स्वातन्त्र्यसमरस्यास्य मयि धूर्निहिता त्वया ।
तन्निर्वाहाय देहोऽयं रक्षणीयः कथञ्चन ॥३०॥

त्वदीयायैव कार्याय जिजीविषुरहं प्रभो ।
कृच्छ्रादितः प्रयास्यामि न कलेवरलोभतः ॥३१॥

श्रद्दधे सर्वभूतानां हृद्देशे तिष्ठसीति हि ।
विदांकरोषि तन्नूनं भावना मम हृद्गताः ॥३२॥

क्षम्यतामपराधो मे करुणाधन सर्वथा ।
रणान्निर्गच्छतः कृच्छ्रे विहायैतान् सुहृज्जनान् ॥

इत्यशब्दं हृदि ध्यात्वा बाष्पाविलविलोचनः ।
सुहृदं बाजिमालिङ्ग्य क्षणाद् वेगेन निर्ययौ ॥३४

षट्शतानां प्रवीराणां शिवमन्वगमंस्तदा ।
बाजिवागनुसारं हि त्रिशतं शिवसैनिकाः ॥३५॥

शेषैश्च नरशार्दूलैः शत्रुध्वंसविशारदैः ।
दुर्गमं गह्वराध्वानं रोद्धुं बाजिः प्रचक्रमे ॥३६॥

बृहत्तमाश्च ग्रावाणः शतशोऽथ सहस्रशः ।
सञ्चिताः सहसा सर्वैर्भेत्तुं मुण्डानि विद्विषाम् ॥३७

शाखाः करिकराकारा पादपानामनेकशः ।
विच्छिन्ना मुसलीकर्तुं द्विषन्निष्पेषणोचिताः ॥३८

यद् यदालक्षितं किञ्चिद् वन्यं संहारसाधनम् ।
तत् तत् सपदि तैर्वीरैः सहसा सञ्चितं तदा ॥३९

बाजिराह तदा सर्वान्निजादेशवशंवदान् ।
उच्चैरुद्दीपयंस्तेषां वीर्यं वायुरिवानलम् ॥४०॥

बान्धवा जीवितेऽस्माकं पुण्यकालोऽयमागतः ।
यत्स्वातन्त्र्यमहादेवं त्रातुं युध्यामहेऽधुना ॥४१॥

विच्छिन्ने दक्षिणे पाणौ पुनः सव्येन युध्यताम् ।
उभयोरपि विच्छेदे शिरोघातं च युध्यताम् ॥४२॥

विरुग्णे दक्षिणे पादे सव्ये स्थित्वैव युध्यताम् ।
रुग्णयोः पदयोर्जान्वोः समुत्थाय प्रयुध्यताम् ॥४३

युद्धमेतन्न योद्धव्यं बाहुभ्यामेव केवलम् ।
प्रत्येकमङ्गुली चापि यततामरिमर्दने ॥४४॥

पिपासा चेत्प्रबाधेत रिपोः पिबत शोणितम् ।
बुभुक्षायां प्रदीप्तायां मांसं खादत शात्रवम् ॥४५॥

किं ब्रवीम्यधुना प्राप्ताः शत्रवस्ते पुरस्सराः ।
प्राणेष्वपि प्रयातेषु युद्धचन्तां कुणपानिनः ॥४६॥

सहस्रं द्विषतामत्र प्रत्येकं घातयेम चेत् ।
त्रिशतं चापि भूयास्म लक्षत्रयमिता वयम् ॥४७॥

गणयित्वा शिरांस्येव गण्यास्ते पामरा नराः ।
वीराः परन्तु सङ्ग्रामे खण्डितै रिपुमुण्डकैः ॥४८॥

तदल्पसख्यतामूलं कातर्यं माऽस्तु नोऽधुना ।
शिवकार्यधुरीणानामशिवं तत् कथं स्पृशेत् ॥४९॥

विवेकविधुरो मृत्युर्ग्रसेतापि वपूंषि नः ।
ग्रसितुं न समर्थोऽसौ यशांसि तु हुतात्मनाम् ॥५०

अस्माकं विद्धकायानां रुधिरैरभिषिञ्चितः ।
तीर्थीभवेदयं नूनं निगूढः कन्दरापथः ॥५१॥

आत्मानं विजुहूणामाहवे राष्ट्रहेतवे ।
अपि सिद्धदशारूढाः कलं नार्हन्ति षोडशीम् ॥५२॥

वषतीत्थं तदा तस्मिन् ज्वलद्वीररसायनम् ।
आक्रान्तं म्लेच्छमातङ्गकदम्बैस्तत्र गह्वरे ॥५३॥

स्वामिभक्तिमहाज्योतिर्भूतामल्पीयसीं चमूम् ।
अमूं निर्वापयन्तीव ववृधे रिपुवाहिनी ॥५४॥

पुरः प्रक्षिप्यमाणं हि प्रत्येकं चरणं रिपोः ।
निमिषे निमिषे छिन्नमदृश्यत रणाजिरे ॥५५॥

प्रसर्पतोऽग्रतो वेगाद् मस्तकं द्विष उच्चकैः ।
सपद्येव विनिष्कृत्तं न्यपतद् धरणीतले ॥५६॥

यो यः शस्त्रधरो बाहुरीषदुच्चैरदृश्यत ।
न्यपात्यत स्फुरत्खड्गाघातेन स स भूतले ॥५७॥

समूहशोऽग्रतः सतुं यतमाना द्विषद्गणाः ।
बृहच्छिलाघनाघातैर्विलुठन्तोऽपतन्नधः ॥५८॥

उच्चैरारोढुमध्वानं नाशक्नोत् स द्विषद्गणः ।
प्रोच्छलन्नपि वेगेन प्रवाह इव पर्वतम् ॥५९॥

अलिप्सया तया चम्वा कुण्ठितारिवरूथिनी ।
बभासे दीपभासेव विनिरुद्धा निशीथिनी ॥६०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स प्रापदरिसंमर्दो वैक्लव्यं भूरिमर्दनैः ।
भार्गवस्य शराघातैः क्रौञ्चवानिव मार्दवम् ॥६१॥
क्षिप्ता म्लेच्छगणैर्वेगात् तस्मिन् वीरगणे लघौ ।
शस्त्राघाता वृथाऽभूवन्नलाता इव पल्वले ॥६२॥
अशक्ताः पुरतः सतुं प्रादेशान्तरमप्यमी ।
अवाच्यवादैरन्योन्यमनिन्दन्नरयो भृशम् ॥६३॥
प्रस्कन्द्यमानामात्मीयामवलोक्य वरूथिनीम् ।
म्लेच्छसेनाधुरीणानामन्तर्भीत्याऽतिजग्रसे ॥६४॥
असृग्लोहितसर्वाङ्गं विद्युद्दीप्तविलोचनम् ।
भ्राम्यत्खड्गयुगं बाजिं कालाग्निं मेनिरेऽरयः ॥६५
उद्दीपयन्त्यः स्वान् वीरांस्तदुदीर्णा हि घोषणाः ।
धीराणामपि शत्रूणां हृदयानि व्यदारयन् ॥६६॥
सर्वात्मनाऽरिविध्वंसे बाजिर्व्यग्रोऽपि सन्ततम् ।
शतघ्नीध्वनिमेकं तं श्रोतुमैच्छत् क्षणे क्षणे ॥६७॥
तत्रार्पितावधानत्वात् सङ्ग्रामकुशलोऽपि सः ।
कुतस्त्येनापि बाणेन हन्त मर्मणि निर्हतः ॥६८॥
सहस्रव्रणनिस्तष्टसर्वगात्रः स वीर्यवान् ।
विद्धस्तेनेषुपातेन पतितो बत भूतले ॥६९॥
निपातमात्मनो दृष्ट्वा निर्धैर्या मा स्म भूच्चमूः ।
इति प्रोच्छुष्ककण्ठोऽपि जगर्ज रणघोषणाः ॥७०
तं तथाभूतमालोक्य केचित् तदनुयायिनः ।
उत्सृज्य शत्रुसंहारं परितस्तस्थुराकुलाः ॥७१॥
शेषास्तु बाजिसन्देशं स्मारं स्मारं पदे पदे ।
असंख्यारिसमाक्रान्ता अप्ययुध्यन्त सन्ततम् ॥७२॥

तेषु प्रत्येकमाहत्य शतानि शिवविद्विषाम् ।
विच्छिन्नसर्वगात्रोऽपि न विश्रमितुमैहत ॥७३॥
समुत्थातुमशक्तोऽपि स बाजिर्विलुठन् भुवि ।
भृशं प्रायततोत्थाय पुनः संग्रामकेलये ॥७४॥
उवाच क्षामकण्ठोऽसौ सुहृदः परितः स्थितान् ।
क्लिन्ननेत्रान् खिन्नवक्त्रांस्तदवस्थाविलोकनैः ॥७५॥
एष आह्वयते मृत्युः परलोकाय मामितः ।
असमाप्य तु कर्तव्यं न त्यजेयं कलेवरम् ॥७६॥
स्वामिनः कुशलावेदी शतघ्नीध्वनिरुच्चकैः ।
यावत्कर्णपथं नेयान्न त्यजेयं कलेवरम् ॥७७॥
नैवेदानीमलं भूयात् तव मृत्योऽखिलं बलम् ।
मम प्राणानितो हर्तुं स्वाम्यर्थं हि जिजीविषोः॥७८
रुधिरक्लिन्नमेतन्मे कायमत्तुमिहागताः ।
गृध्रा गच्छत वृत्तान्तं ज्ञातुं मे स्वामिनो द्रुतम् ॥
स्वामिनः कुशलं श्रुत्वा स्वयं जह्यामिदं वपुः ।
युष्माकमेव तृप्त्यर्थं न मे प्रीतिः कलेवरे ॥८०॥
न हि शस्त्रव्रणैरेतैरल्पीयस्यपि मे व्यथा ।
ध्वनिप्रतीक्षया किन्तु सैवात्यन्तगरीयसी ॥८१॥
निःश्वासा यात रे दूरं वायुवेगेन सत्वरम् ।
शिवराजशुभोदन्तं मामावहत बान्धवाः ॥८२॥
इत्थं प्रतिक्षणमसावतिविह्वलात्मा
विच्छिन्नमूर्तिरशृणोत् सहसा ध्वनिं तम् ।
कर्तव्यपूर्तिसुखमात्मनि तेन विन्दन्
शैवं पदं हि शिवमग्नमना जगाम ॥८३॥

इति श्रीशिवराज्योदये महाकाव्ये ३८ तमः सर्गः समाप्तः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाराजा श्री उम्मेद मिल्स लिमिटेड़

पाली – मारवाड़

★

❀ उल्लेखनीय उत्पादन ❀

– वस्त्र –

सुन्दर व आकर्षक
कोर्स, मीडियम व सुपर फाइन में
मर्सराइज्ड़, ब्लीच्ड़, डाइड व प्रिन्टेड़
* लट्ठे * चद्दरें * पॉपलिन
* केम्ब्रिज * लॉन * वायल
* धोती आदि

– सूत –

कार्डेड़, कोम्ब्ड़, मर्सराइज्ड़
१ काउन्ट से १४० काउन्ट तक
हैंको में, कोनों पर
व
साइज़ किया हुआ
बीमों पर

रिटेल शॉप : **लक्ष्मी मार्केट, पाली मारवाड़**

तार : उम्मेदमिल्स

फोन : ३३, ३७ व पी. बी. एक्स– ६७, ८०, १५० } बीस लाइनें

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रससिद्धान्तपरिशीलनम्

काळूरि–श्रीहनुमन्तरावः, हैद्राबादः

पूर्वाऽनुवृत्तम्—

एष रसविषये भरतस्याभिप्रायः। तेन रसनिष्पत्तेः बृहत्काव्येष्वेवावकाशः प्राप्तः, खंडकाव्येषु मुक्तकेषु चावकाशः अल्प आसीत्। अपि तु रसगङ्गाधरकारो मुक्तकेष्वपि रसनिष्पत्तिं निरूपयामास। किं च विभावानुभावव्यभिचारिणां सर्वेषां सम्मेलनं विनापि क्वचित् क्वचित् केवलविभावैः केवलानुभावैः केवलव्यभिचारिभिर्वा रसो निष्पद्यते इति समर्थयामास। पश्यतेदं पद्यम्—

"परिमृदितमृणाली म्लानमंगं, प्रवृत्तिः
कथमपि परिवार प्रार्थनाभिः क्रियासु
कलयति च हिमांशो र्निष्कलंकस्य लक्ष्मी-
मभिनवकरदंतच्छेदपांडुः कपोलः ॥

(मलतीमाधवम्) अस्मिन् पद्ये वैवर्ण्यस्तम्भौ केवलानुभावावेव निबद्धौ। तथापि रसाभिव्यक्तिरस्ति। इदं भरतरससिद्धांतानुगुणं नास्ति। इमे अपरे पद्ये दृश्येताम्—

"This is the way the world ends
Not with a long but a whimper".
(T. S. Eliot)

"करुणार्थं मम भिक्षुकस्य करः
प्रसारितो मया मृत्युघोषमपि विस्मृत्य
शून्यप्रदेशे शुष्कवृक्ष इव
उन्नमितः कर उन्नमित एव कृशोऽभूत्।"
(कृष्णपक्षम्। आंध्रकाव्यम्। छाया।)

अत्र प्रथमपद्ये World विभावः, Whimper अनुभावः। द्वाभ्यामेवाभ्यां पदाभ्यां शोकः स्थायी भवति करुणरसोऽपि निष्पद्यते। एवमेव द्वितीये कवि विभावः, करप्रसारणमनुभावः, करुणरसो निष्पन्नः। स्थायी राज्ञा, विभावानुभावव्यभिचारिणः परिवारेण च भरतेनोपमिताः। अनयोः पद्ययोस्तु शोकस्थायिनो नरेन्द्रस्यैकमेवानुभावसेवकं विना परिवार एव नास्ति। तेन हि "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" इति भरतस्याभिप्रायः निरुपपत्तिको वर्तते।

शृङ्गारशोकादय इति नवया वा दशया वा मानवचित्तवृत्तीनां स्थूलविभागकरणमसांप्रतम्। मनुष्यस्य स्वभावे अनेकानि आंतर्याणि भवन्ति। प्रतिभाशाली कविः तान्यांतर्याणि सम्यग्रीत्या अवगाह्य विशदयति। भारतीयसाहित्यवेत्तृभिरयं विषयो न ज्ञात इति न। नवरसा एव न, तत्तद्रसानामाधारभूता भावा अपि काव्यत्वं लभन्ते इति तैरुक्तम्। किंतु सम्यक् पुष्टो रसः। यथा रसाः सहृदयहृदयावर्जकास्तथा तदाधारभूता भावा नेति तेषामभिप्रायः।

अयुक्तोऽयमभिप्रायः। प्रतिभावान् कविः कमपि भावं प्रगृह्य उत्तमसाहित्यं सृजति। Hamlet नाटकं तस्य महन्निदर्शनम्। ततः काव्यनिबन्धने योग्यतमानां मानवचित्तवृत्तीनां रसा इति नियतविभागो निर्देशश्चानुचितः, असहजश्चेति दृश्यते।

भारतीयसाहित्यवेत्तारः तथा पाश्चात्यविमर्शकाः कवित्वादानन्दो जायते इत्यवदन्। काव्याद्रसानन्दो जायते, स ब्रह्मानंदादीषदून इति प्राचीनालंकारिणामभिप्रायः। "रमणीयार्थप्रतिपादकः शब्दः काव्यम्; रमणीयं नाम लोकोत्तराह्लादजनकत्व" मित्युवाच जगन्नाथः। "पुत्रस्ते जातः," "धनं ते दास्यामि" इत्यादिवाक्यैर्जन्यं सुखं लौकिकम्, काव्यानंदः अलौकिक इति। विषादसन्निवेशा अपि काव्ये आनंदमेव जनयन्तीति पाश्चात्यसाहित्यविमर्शकैरप्यु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कम् । Aristotle Tragedy लक्षणमेवमुवाच—

"Tragedy is an imitation of an action that is serious, complete, and of a certain magnitude, in language embellished with each kind of artistic ornament, the several kinds being found in separate parts of the play, in the form of action, not of narrative; through pity and fear effecting the proper Katharsis, or purgation of these emotions ... .Tragedi excites the emotions of pity and fear—kindred emotions that are in the breasts of all men—and by the act of excitation affect a pleasurable relief." Several kinds of embellishments पद्यगेयादीनीत्यनंतरमुवाच । Epic poetry इवादितः अन्तपर्यन्तमेकमेव च्छंदो न, नाटके छन्दोवैविध्यमस्त्विवति तस्याशयः । Katharsis इति पदं निश्चयेन यस्मिन्नभिप्राये उपयुक्तमिति ज्ञातुमाधारः तत्कृते Poetics ग्रन्थे वा, इतरग्रन्थेषु वा न दृष्टत्वात् बहुभिर्बहुधा तस्यार्थ ऊहित इति आंग्लसाहित्यविमर्शका वदन्ति । Katharsis, Purgesis इति वैद्यपारिभाषिकपदे । तस्मात् क्षालनमित्यर्थे ते उपयुक्ते इत्यूहायां न प्रमादः स्यात् । एतावता विषादांतनाटकमानंदयुतोपशमन (Pleasurable relief) मावहतीति तेनोक्तमिति लक्षितव्यम् ।

Tragedy इत्यांग्लपदस्य विषादांतनाटकमिति पदं न समानार्थकम् । विषादमयं यद्वा-विषादभरं नाटकमिति सदृशं स्यात् । Tragedy इति पदं Aristotle एतस्मिन्नेवार्थे प्रायुंक्त । बाहुल्येन विषादमयदृश्यवत् नाटकं Tragedy भवति, तद् विषादेनैवावसितव्यमित्याग्रहो नास्ति । तेन ति रामायणभारतकाव्ये Tragic Poctry भवतः । किंतु प्रायेण Tragedies विषादावसितानि सन्ति । तस्मात् मध्ययुगे अयमर्थः प्रस्तुतार्थे परिणत आसीत् । सर्वाणि मृतनायकनाटकानि Tragedies इति, जीवन्नायकानि सर्वाणि Comedies इति परिगणनं भ्रमः । उदाहरणाय Macbeth नाटके अन्ते Macduff विजयते, Macbeth हन्यते यतस्तत् Tragedy भवति; तदेव यदि Macbeth एव विजयेत, Macduff च हन्येन, Comedy भवेदिति न मन्तव्यम् । वास्तवेन यदि Macbeth अन्ते विजयेत नाटके साहित्यं भग्नं स्यात् ।

प्रस्तुते चर्चनीयः अंशः सुखमयसन्निवेशवर्णनं वा दुःखमयेतिवृत्तवर्णनं वा काव्यं पठितरि आनंन्दमेवोत्पादयतीति । "रस आस्वादने रस्यते आस्वाद्यते इति रसः" इति रसशब्दव्युत्पत्तावेवांतर्निविष्टोऽस्ति अभिप्रायोऽयम् । किंतु अस्मदनुभवविरुद्धोऽयम् । शोकमयसाहित्यपठनवेलायां सानुक्रोशपरिप्लुते मनसि नेत्राभ्यामश्रुपातः अस्माकमनुभवः । न दुःखाश्रूण्येतानि, आनन्दबाष्पाणीति साहित्यशास्त्रज्ञा वदन्ति । अत एव क्रौंचपक्षिहननाद् जनितो वाल्मीकेः शोक एव श्लोकरूपं प्राप्त इति ध्वनिकारस्य वाक्यमभिनवगुप्तो लोचनव्याख्याने एवं व्याचख्यौ—

'न तु मुनेः शोक इति मन्तव्यम् । एवं हि सति तद्दुःखेन सोऽपि दुःखित इति कृत्वा रसस्यात्मतेति निरवकाशं भवेत् । न च दुःखसंतप्तस्यैषा दशेति । एवं चर्वणोचितशोकस्थायिभावात्मककरुणरससमुच्चलनस्वभावत्वात् स एव काव्यस्यात्मा सारभूतस्वभावोऽपरशाब्दवैलक्षण्यकारकः" इति । रामायणे तु—

"तस्यैवं ब्रुवतश्चिन्ता बभूव हृदि वीक्षतः
शोकार्तेनास्य शकुनेः किमिदं व्याहृतं मया" ॥

इति स्वयमेव शोकार्तः सवृत्तोऽहमिति कवौ वदति, न हि न हि कविना करुणरसास्वादनरूपः अलौकिकानन्दः अनुभूत इति लोचनव्याख्याता निराधारं भाषते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं प्राचीनपाश्चात्यसाहित्यशास्त्रज्ञैः सर्वैः काव्यपठनादानन्द एवानुभूयते इति घोषिते केवलनाट्यदर्पणकर्तारौ तु रसान् द्विधा विभज्य तेषु शृंगारहास्यवीराद्भुतशान्ताः पञ्च सुखात्मकाः, करुणरौद्रबीभत्सभयानकाश्चत्वारो दुःखकरा इति ऊचतुः ।

"अत एव भयानकादिभिरुद्विजते समाजः । न नाम सुखास्वादादुद्वेगो घटते । यत् पुनरेभिरपि चमत्कारो दृश्यते स रसास्वादविरामे सति यथावस्थितवस्तुप्रदर्शकेन कविनटशक्तिकौशलेन । विस्मयन्ते हि शिरश्छेदकारिणापि प्रहारकुशलेन वैरिणा शौंडीरमानिनः" । इति तयोरभिप्रायः । रसगंगाधरे काव्यगतं दुःखवर्णनं पठितुर्दुःखजनकमाहोस्वित् सुखजनकमिति चर्चितम् ।

"नन्वेवमपि रतेरस्तु नाम दुष्यन्त इव सहृदयेऽपि सुखविशेषजनता, करुणरसादिषु तु स्थायिनः शोकादेर्दुःखजनकतया प्रसिद्धस्य कथमिव सहृदयाह्लादहेतुत्वम् । प्रत्युत नायक इव सहृदयेऽपि दुःखजनकस्यैवोचितत्वात् । न च सत्यस्य शोकादेर्दुःखजनकत्वं क्लृप्तं न कल्पितस्येति नायकानामेव दुःखम्, न सहृदयस्येति वाच्यम् । रज्जुसर्पादिर्भयकम्पाद्यनुत्पादकतापत्तेः । सहृदये रतेरपि कल्पितत्वेन सुखजनकतानुपपत्तेश्चेति चेत् । सत्यम् । शृंगारप्रधानकाव्येभ्य इव करुणप्रधानकाव्येभ्योऽपि यदि केवलाह्लाद एव सहृदयहृदयप्रमाणकस्तदा कार्यानुरोधेन कारणस्य कल्पनीयत्वाल्लोकोत्तरकाव्यव्यापारस्यैवाह्लादप्रयोजकत्वमिव दुःखप्रतिबन्धकत्वमपि कल्पनीयम् । अथ यद्याह्लाद इव दुःखमपि प्रमाणसिद्धं तदा प्रतिबन्धकत्वं न कल्पनीयम् । स्वस्वकारणवशाच्चोभयमपि भविष्यति । अथ तत्र कवीनां कर्तुं, सहृदयानां च श्रोतुं, कथं प्रवृत्तिः ? अनिष्टसाधनत्वेन निवृत्तेरुचितत्वात् । इति चेत्; इष्टस्याधिक्यादनिष्टस्य च न्यूनत्वाच्चन्दनद्रवलेपनादाविव प्रवृत्तेरुपपत्तेः । केवलाह्लादवादिनां तु प्रवृत्तिरप्रत्यूहैव । अश्रुपातादयोऽपि तत्तदानंदानुभवस्वाभाव्यात् । न तु दुःखात् । अत एव भगवद्भक्तानां भगवद्वर्णनाकर्णनादश्रुपातादय उपपद्यन्ते । नहि तत्र जात्वपि दुःखानुभवोऽस्ति" ।

क्रमशः

गिरने से पहले उनकी रक्षा करें

बालों और दाँतों की नियमित देखभाल और उनका पोषण आवश्यक है। क्यों न फिर उनके गिरने से पहले उनकी रक्षा की जाय ? इसके लिए उदयपुर का गाय छाप ब्राह्मी आँवला तैल और काला दन्त-मन्जन सर्वोत्तम है। इन आयुर्वेदिक उत्पादनों से आपके बाल

इलाज से बचाव बेहतर है।

गाय छाप

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुभ कामनाओं सहित

डालमिया सिमेंट (भारत) लिमिटेड

डालमियापुरम् (तमिलनाडु)

"राकफ़ोर्ट" मार्का, डालमिया पोर्टलैण्ड एवं पोज़ोलाना सिमेंट
तथा
डालमिया रिफ्रैक्टरीज़ के निर्माता।

उड़िसा सिमेंट लिमिटेड

राजगंगपुर (उड़िसा राज्य)

"कोणार्क मार्का", डालमिया पोर्टलैण्ड एवं पोजोलाना सिमेंट
हर प्रकार और आकार की रिफ्रैक्टरीज़, आर० सी० सी० स्पन पाइप्स तथा
प्रीस्ट्रैस्ट कंक्रीट सामान के निर्माता।

DALMIA ENTERPRISES

मुख्य कार्यालय :
४-सिंधिया हाउस, नयी दिल्ली-१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलिकौतुकम्

आचार्यः—श्रीविश्वनाथमिश्रः, श्रीशार्दूलसंस्कृतविद्यापीठं, बीकानेरः ।

पूर्ववृत्तम्

अष्टमं दृश्यम्

स्थानम्—आरण्यको मार्गः,

(मनुष्यवेशे तक्षकस्य प्रवेशः)

तक्षकः—स्वपितुरवमानिने परीक्षिताय ऋषिपुत्रः शृंगी शापं दत्तवानस्ति । प्रयुक्तश्च तेन महामंत्रः, तत्प्रभाववशीभूतोऽहमिदानीं मनुष्यरूपं धारयित्वा सत्यं विधातुं ऋषिपुत्रशापं गच्छन्नस्मि । श्रूयते जनमेजयेन कृतः कश्चित्प्रयत्नः मम प्राणान्तं कर्त्तुमुद्यतोऽसौ नक्तं दिवं जागरूकोऽप्यस्ति । स्यात् किमपि परं राजा तु मया दष्टः सन् मरिष्यत्येव । असाधारणी खलु शापशक्तिः ।

सा वै कथं मार्जयितुं हि शक्या या भाग्यरेखा लिखिता विधात्रा । कार्यं मयापीह तदेव कार्यं विधेर्विधानं कथमन्यथा स्यात् । गच्छानि तावत् अद्य सन्ध्यां यावत् दशनकर्म समापनीयम् । प्राणान् अविगणय्य साधनीयञ्चेदं कार्यम् (परावर्त्य) अये, कोऽयं पश्चात् मामनुसरन् आगच्छति ? पृच्छामि तावदेनम् ।

(झोलिकाहस्तस्य काश्यपस्य प्रवेशः ।)

काश्यपः—नमो नमः भगवन् !

तक्षकः—नमस्ते महाशय, नमस्ते ! को भवान् कुत्र च वर्तते गच्छन् ?

काश्यपः—काश्यपनामा विषवैद्योऽहम् । आवश्यकं कार्यमेकमधिष्ठाय राज्ञः परीक्षितस्य सकाशं गच्छन्नस्मि ।

तक्षकः—किं भवानेव विषवैद्यः काश्यपः ? अहो, पुण्यं मे दिनमद्य यदा भवादृशस्य ख्यातनाम्नः विषवैद्यस्य दर्शनं जातम् । भगवन्, किन्ताद् वर्तते विशेषं कार्यं यद्वशात् परीक्षितसकाशं गम्यते भवता ?

काश्यपः—किं अद्यापि न श्रुतं किमपि रहस्यं भवता ?

तक्षकः—न हि भगवन्, न श्रुतं किमपि रहस्यम् । पारिवारिकप्रपंचपतितः बाह्यजगतो वृत्तान्ततः शून्य एव भवामि । तावद् भवतैव प्रतिपाद्यताम् किमिदं विशिष्टं रहस्यमिति ?

काश्यपः—शमीकस्य महर्षेः पुत्रः शृंगी कुपितः सन् परीक्षितमशीशपत् यत् सप्तमेऽहनि दष्टा त्वां तक्षको हि महाविषः ।

तक्षकः—भगवन्, कथमेवं दारुणः शापः ?

काश्यपः—कलिना वञ्चितः परीक्षितः अज्ञानवशात् निक्षिप्तवान् एकं सर्पं शमीकस्य गले । तेनैव हेतुना कुपितः ऋषिपुत्रः ।

तक्षकः—ततस्ततः ।

काश्यपः—तस्य शापस्य हि अद्य अन्तिमो दिवसः । राजा तु अद्य सर्पेण दष्टः सन् मरिष्यति, परन्तु वर्तते ह्यसौ प्रजापालकः धर्मनिष्ठः इति तमहं अमोघेन औषधेन मन्त्रेण च पुनरुज्जीवयिष्यामि । इदं च मे धर्म्यं कार्यम् ।

तक्षकः—किं भवान् तक्षकस्य हालाहलग्रस्तं चराचरम् अवितुं सामर्थ्यम् उद्वहति । तक्षको महाशक्तिः, श्रूयताम्—

विषस्य वेगेन जलं स्थलं वा
महाविषो धक्ष्यति तक्षकोऽसौ ।
फूत्कारमात्रेण जगत्समग्रं
प्रकम्पितं स्यादचिरेण तस्य ॥

काश्यपः—अहन्तु मन्त्रौषधप्रभावेण शेषनागमपि स्तम्भयितुं शक्नोमि को मे पुरतः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वराकः तक्षकः ? त्वयापि श्रूयताम्—

एकः सुसाधितो मंत्रः सुप्रयुक्तो मया पुनः ।
संविधाय नवां सृष्टिं तक्षकं भक्षयिष्यति ।।

तक्षकः—एवम् ! एतावान् साहसः ? अस्तु तर्हि एष खल्वहं दंक्ष्यामि एकं वृक्षकं पुनरुज्जीवय त्वं यदि शक्तोऽसि जानेऽहं तदा तव सामर्थ्यम् ।

काश्यपः—अये त्वं खलु मनुष्योऽसि । कथं त्वं वृक्षं दंक्ष्यसि ?

तक्षकः—त्वमिव अहमपि सर्वं साधयितुं क्षमः । दशनकर्म तु मम वामहस्तखेलायितमेवास्ते ।

काश्यपः—(क्रुद्धः सन्) कोऽपि त्वं प्रच्छन्नवेषः गूढाभिचारिन् ? शीघ्रं स्पष्टमभिधेहि । अन्यथा मम क्रोधाग्नौ पतितः अचिरादेव यमलोकातिथिः सम्पत्स्यसे ।

तक्षकः—(भीतः सन्) महाराज ! क्षमस्व मेऽपराधम् । अहमेवास्मि तक्षकः । इदानीं मनुष्यवेशमाकलय्य गच्छन्नस्मि राज्ञः सकाशम् । तदेतत् शोभनमेव जातं श्रीमतां दर्शनम् ।

काश्यपः—अरे काकोदर ! दास्याः पुत्र ! तक्षक ! वद इदानीं त्वां कां दशां नयामि ? मामेव च वञ्चयितुं उद्यतोऽसि ?

तक्षकः—(हस्तौ सम्मेल्य) भगवन् ! कथमेव ज्ञानिनोऽपि भवन्तो विप्रवाक्यमन्यथा कर्तुं तत्पराः वर्तन्ते ? मयि मृते सति विप्रवाक्यं निश्चितं मोघं स्यात् । तच्च खल्वसाम्प्रतम् ।

काश्यपः—नाहं ऋषीणाम् मुनीनाम् च वाक्यमन्यथा कर्तुमिच्छामि । परन्तु परीक्षितो हि लोकानुरञ्जकः मर्यादापालकः परमधार्मिको हि राजा मया सर्वतोभावेन रक्षणीय एव । यतो हि

"हते तस्मिन् हताः लोकाः
रक्षिते हि सुरक्षिताः" ।

तक्षकः—(सप्रश्रयं) भगवन् जानेऽहं काश्यपूर्वा खलु शक्तिस्त्वयि वर्तते । अप्रतिमं तेजः बिभर्ति भवान् । अघटितमपि घटयितुं क्षमस्त्वं कस्य नासि अभिनन्दनीयः । परन्तु स्वयमेवालोच्यताम् यदनेन तव कर्मणा एकस्य महर्षेः महिमापचीयते, तपः प्रभावो हीयते, किं बहुना सर्वम् अब्रह्मण्यं सम्पद्यते ।

काश्यपः—(विमृश्य) युक्तमेवोच्यते त्वया बिभर्म्यहं सामर्थ्यं मृतं जीवयितुं शुष्कं च हरितयितुम्, निर्बलं सबलयितुं निरुत्साहिनश्चोत्साहयितुम्, परन्तु यदि ममैतेन कर्मणा ब्राह्मणत्वमुपहस्यते, ऋषेर्महिमापचीयते, तपःशक्तिस्तिरस्क्रियते तर्हि एष अहं परावर्ते । गच्छ त्वं यथेष्टं समाचर । (परावर्तते)

तक्षकः—अहो सौभाग्यम् । अपगतो मे प्रत्यवायः । महान् प्रचण्डशक्तिश्चायं ब्राह्मणः अस्मिन् वर्तमाने तत्र मया किमपि कर्तुं न पार्येत । शोभनं तदीयमितो गमनम् । परं कथं सम्पत्स्यते मे प्रवेशः परीक्षितसकाशम् । तत्र वर्तते महान् प्रबन्धः । (विचारयति) अहो अयं सम्प्राप्तः मालाकारः । नूनमनेनापि तत्रैव गन्तव्यम् । अतो मयाऽपि कीटरूपतामापाद्य पुष्पभाण्डे प्रविश्य पुष्पैः सह तत्र गन्तुं शक्यत एव ।

(पटाक्षेपः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिपासाया मरुभूमौ महाकविः शेली

मूललेखकः—श्रीइलाचन्द्रजोशीमहाभागः, अनुवादकः—विद्याभूषणः श्रीगणेशरामशर्मा, डूँगरपुरम्

पूर्वाऽनुवृत्तम्—

अस्मिन्नेवान्तराले द्वे तथाविधे दुर्घनेऽघटतां याभ्यां शेली किलात्यन्तं विचलितो बभूव। तथा हि मेर्या एकान्या (विमातुः पुत्री) भगिन्यासीद्, यस्या अभिधानं फेनी-इमले-इत्यासीत्। सातीव भावुकहृदयाऽन्तर्मुखी मौनमातिष्ठन्ती विक्षिप्तेव किशोरी समभूत्। सा प्रारम्भत एव शेलिकविमेकान्ततः प्रणयभावेन निभृतमभिवाञ्छितुमारेभे। शेली च स्वस्वभावानुसारं तया सहापि स्नेहेन सौहार्देन च वार्तालापान् कुर्वाणोऽभूत् तस्य तेषां वार्तालापानामर्थं फेनी नन्वन्यथैव बुबुधे। पश्चात् सावजगाम यच्छेली तां नहि, वरञ्च तस्या भगिनीं मेरीमेव प्रीणयन्नास्त इति। तथापि सा शेलिना साकं पत्रमाध्यमेन निरन्तरं सम्यक् सम्पर्कं साधयन्ती तस्थौ, तथा स्वान्तर्हृदि निगूढा मिथ्या कल्पनाः पत्रेषु तेषूद्गिरन्ती बभूव। शेली तां द्रवति स्म, मध्ये-मध्ये सान्त्वनापरिपूर्णानि पत्राणि च विलिख्य तां प्रति प्रहिण्वन् संतस्थे। एकदाऽकस्माच्छेली शुश्राव यद्धि फेनी बतात्महत्यां चकारेति। सः स्तम्भितः स्तब्धश्च बभूव। अथ च १५ दिसम्बरदिने तस्य प्रकाशकस्य हुकहममहाशयस्यैकेन पत्रेण स विज्ञातवान् यद्धैरियटबालापि च सर्पेंटाइनायाम् नद्यां निपत्य स्वात्महत्यां चक्र इति।

मरण-समये हैरियटबाला गर्भवती बभूव। कस्य वा सम्पर्कादसौ गर्भो बभूव?—विषयेऽस्मिन्नानुमानान्यक्रियन्त। कश्चन कथयामास यदेकः सैन्याधिकारी तस्याः प्रणयी बभूवेति, तथान्यः प्रोवाच यत्केनापि रथवाहेन साकं तस्याः सम्बन्धो बभूवेति। शेली स्वयमेकस्मान्मासात्पूर्वं तया समं मिलितुं प्रयेते परन्तु स तामन्वेष्टुं न पारयामास। कियत्कालपूर्वं यावत् सा स्वपित्रा तथा स्वभगिन्या एलिजया साकमासीत् परन्तु स्वल्पसमयानन्तरमेव तत्पिताऽपराधादस्माद्धेतोस्तां स्वगृहाद्बहिश्चक्रे, यत्सा कस्यचिद् व्यक्तिविशेषस्योपपत्नीत्वेन निवसन्ती बभूव। गच्छति काले स जनोऽपि तां गर्भावस्थायां तत्याज, तदा संभवतो दुःखक्लेशावनुभवन्ती स्वात्महत्यां चकार।

शेलिकवेः पक्षे नानाविधा निर्दोषतास्तस्य सुहृदः प्राचीकटन् तथापि च तत्पक्षपातिनां न्यूनता नास्ति, परं शेली स्वमनसि सुनिश्चितमिदमित्थं सम्यग्जजान यद्धैरिटबालाया दुर्गतये (नो चेत् पूर्णतस्तथापि पर्याप्तं महान्तं सीमानं यावत्) दोषभाग्वर्तत इति। सोऽल्पवयस्कामेकां सरलातिसरलस्वभावां मुग्धां किशोरीं स्वस्य स्वतन्त्रैर्विचारैर्भ्रामयामास तथा गच्छति कालेऽतीव क्षुद्रैः कारणान्तरैस्तां तत्याज। शेली स्वयमात्मनो मित्रं पीकाकमहाशयं कथयामास—"हैरियटबाला सुहृदया ससुदारचेता भव्या भद्रा कल्याणी किलैका नारी समभूत्। परन्तु सा मे जीवन-सहचरी भवितुं योग्यानासीद्यतः सा न तु काव्यबोधे सक्षमासीन्न च जीवन-दर्शनं बुबुधे।"

शेली हाॅगमहाशयं प्रति स्वपत्रे किलैकस्मिँल्लिलेख यत्तस्य वैवाहिकं जीवनं निष्प्राणं मृततुल्यमिव संजातमास्ते तथा च स काव्यस्यैकस्य पङ्क्तिद्वये तमिमं भावमभिव्यञ्जयामास—तदिदं बतैकस्य तादृशस्य जनस्य भूगर्भसमाधेरन्धकारे पिधाय बन्दीकरणमिवास्ते, यो हि स्वतन्त्रे वातावरणे, प्रोन्मुक्ते चाकाशे जीवन् वर्तते।

परन्तु स्वविचारेषु, स्वात्मनः काव्येषु च यो जनो नार्या मुक्तेस्तत्स्वातन्त्र्यस्य च पाठं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाठयंस्तस्थौ, स एव हि स्वपत्न्या दुर्गतेः कारणं बभूव, सैषा ग्लानिः शेलिकविमन्तपर्यन्तं व्यथयन्ती बभूव।

परं च हैरियटबालाया आत्महत्या-सम्बन्धे महत्त्वपूर्णमिकमन्यत्तथ्यमपि च ध्यानगम्यं कर्तुमावश्यकमास्ते। तच्चेदं, यद्धैरियटबालाया मानसिकतायामारम्भत एव कानिचित्ताहशानि तत्त्वानि वर्तमानान्यासन् यानि तां वारम्वारमात्महत्यां प्रति प्रेरयन्त्यासन्। यदा तस्या जीवनस्य, परिवेशस्य च परिस्थितयोऽपेक्षाकृतं सामान्या आसंस्तदापि सा मध्ये-मध्ये स्वात्मघातस्य विषयं चिन्तयन्ती बभूव तथा च तद्विषयिणीं चर्चामपि सात्मनः परिचिताङ्गनान् प्रत्यन्तरान्तरा कुर्वाणा बभूव। शेलिना सह प्रथमपरिचयानन्तरं यदा सा तस्य घनिष्ठं सम्पर्कमाससाद, तथा च तद्विवाहे विविधा विघ्नव्यूहा उत्पेदिरे, तदापि सा स्वात्महत्याविषयगतां वार्तां चिन्तयन्ती बभूव—तदेतत्तथ्यं शेलिकवेरेव पत्रेणैकेन प्रमाणितं भवति।

विवाहात् स्वल्पदिनानन्तरमेव हैरियटबाला हॉगमहाशयेन साकं वार्तालापप्रसङ्गे कथयामास यत्तस्या आत्महत्यावृत्तिस्तदन्तःकरणे भूयो भूयो मामण्ड्यत इति। अथातिथीनां समुदायमध्येऽपि च सा प्रायेण स्वात्मघातविषयिणीं चर्चां कुर्वाणाऽभूत् तथा च हसन्ती सा खल्वेवं वदति स्म—

"अहमवश्यमेवैकदा स्वात्महत्यां करिष्ये। किमर्थम्, कदा, कथञ्चेति नाहं जाने।"

यद्वा तद्वास्ताम्, हैरियटबालाया मृत्योरनन्तरं शेलिकवेरवचेतना भूतानां, प्रेतात्मनां च भयात् पीड्यमानाभूत्। निखिलां रात्रिं यावद् भयावहाः कल्पना दुःस्वप्नाश्च तच्चेतनां पीडयामासुः।

अथ शेली हैरियटबालाया बालकान् स्वसंरक्षणे रक्षितुं विनिश्चिक्ये तथा च तं निश्चयं कार्यरूपे परिणेतुं प्रयत्नेषु न किमप्युपायान्तरमत्रशेषयामास, किन्तु तत्र मनागपि साफल्यं नो लेभे। हैरियटबालायाः पिता वेस्टब्रुकमहाशयो न्यायालये विषयेऽत्र विरोधं चकार। परिणामोऽसौ बभूव, यद्द्वावपि च बालकौ—इयान्थे तथा चार्ल्सशेलो च—न्यायालयस्य निर्णयानुसारं डाक्तरह्यूमनामकस्य जनस्य संरक्षणे संस्थापितौ।

क्लेयरबाला १२ जून, १८१७ ई० दिने कन्यामेकां सुषुवे या बायरनस्य संयोगादुद्भूतासीत्। क्लेयरसुन्दरी तस्याः सांस्कृतिकं, साहित्यिकं च नामकरणं—एलेग्रा—इति चक्रे। शेली बायरनं प्रतिलिलेख।-तदुत्तरे बायरनो लिलेख यदत्र तस्य कोऽप्यपराधो नास्ति, यतः क्लेयरबाला तं परिपीडयन्ती तं विवशं बाध्यं च चकारेति। सत्यप्येवं सः (बायरनः) तां कन्यां स्वस्य संरक्षणे रक्षणाय ययाचे। क्लेयरबाला तां स्वसमीप एव रक्षितुं ववाञ्छ। विषयोऽयं बहूनि दिनानि प्रचचाल। अन्ते शेलिकवेः प्रयत्नात् सा कन्या बायरनसविधे वेनिसनगरं प्राहीयत।

हैरियटबालाया मरणादेकमासानन्तरमेव मित्राणामाग्रहाच्छेली 'गिरिजागृहे' सविधिविधानं मेरीं परिणीतवान्। धर्मसम्प्रदायस्य, गिरिजागृहस्य, विवाहप्रथायाश्च परमविरोधी, मुक्तप्राणोऽसौ कविः शेली सांसारिकेषु जालपाशेषु तथा निकृष्टतयोद्ग्रथितो बभूव यत् स त्रयाणामप्येषां (धर्मसम्प्रदायस्य, प्रार्थनामन्दिरस्य, विवाहप्रथायाश्च) दासत्वं स्वीकर्तुं बाध्यो बभूव।

अस्मिन्नेव कालखण्डे—इंगलैंडे शेलिकवेरेकतस्तस्य दुःस्वभावस्योच्छृङ्खलतायास्तथा च 'चरित्रहीनताया' हेतोर्निन्दावादाः प्रसरन्तोऽभूवंस्तथान्यतश्च तस्य कवितास्वपूर्वस्याः शक्तिशालिन्याश्च प्रतिभायाः परिचयः पाठकालोचकेभ्य उपलभ्यमानोऽभूत्। परमधुना शेलिकवेर्मनःइंगलैंडात् पूर्णतयापरञ्जितं बभूव। विशेषतो लन्द-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नगरस्य कृत्रिमाज्जीवनात्तथा तत्रत्यानां धार्मिकाणां, सामाजिकानां, राजनैतिकानां च नेतॄणां रूढिवादिनो दृष्टिकोणात् सः समुद्विजितो बभूव। स हि स्वकीयायामेकस्यां काव्यरचनायां लिलेख-'नरको नाम तादृशमेकं नगरमास्ते यल्लन्दनेन पूर्णतया सदृशं वर्तते।' १८ मार्च, १८१८ दिवसे स मेरी-क्लेयराभ्यां सार्द्धं पुनर्विदेशयात्रार्थं प्रतस्थे। अस्मिन्नेवान्तराले मेरी प्राणिनमेकमन्यं सुषुवे। तां च बालिकां स्वेन सार्कं नीत्वा ते फ्रांसदेशं गच्छन्त इटालीं प्रापुः। कितिचिद्दिनानन्तरमेव तत्र तस्याः कन्यकाया मृत्युर्बभूव।

कानिचिद्दिनानि मिलाननगरे तथा लेगहार्नस्थाने च निवासादनन्तरं ते क्लेयरबालायाः प्रेरणया बायरनसविधे गन्तुं वेनिसनगरं प्राप्तुं विनिश्चिक्युः। बायरनः पूर्वत एव तदिदं सूचितवानभूद्यदि च क्लेयरबाला वेनिसनगरमागच्छेत्तदा सः स्वयं तत्कालं ततोऽपव्रजिष्यतीति। अत एव हि क्लेयरबालाया विषये शेली तदिदं मृषा व्यजिज्ञपद्यत् सा पादुआस्थानमधिवसतीति। शेलिना भूयो भूयो भृशमवबोधितो बायरनो विषयेऽस्मिन् सहमतो बभूव, यत् स बालिकां एलिग्रां-किञ्चित्समयार्थं क्लेयरसन्निधौ पादुआस्थानं प्रहास्यतीति। स च तां प्राहिणोत्। परन्तु कतिचिद्भ्यो दिवसेभ्योऽनन्तरमेव सा कन्या 'कुमारी-गृहं' एकं प्रति प्रेषिता। तत्र च सा रुग्णा बभूव, ममार च।

इटाली-प्रवासे शेलिकविः स्वकीयाः सर्वतोऽधिकं सुप्रसिद्धाः कविताः प्रणिनाय। तासु सर्वाभ्यो महत्त्वपूर्णं 'प्रॉमीथियस-अनबाउण्ड' इत्याख्यं खण्डकाव्यं बभूव। अस्मिन् काव्ये तस्य पुरातना विचारा नवीने शक्तिशालिनि च रूपे व्यक्ता बभूवुः। त इमे विचारा आसन्—बन्धनग्रस्तस्य मानवात्मनश्चिर-मुक्तिस्तथा तच्चिरमुक्तये किलैकया सामूहिकया क्रान्त्या मानवं प्रति मानवस्यात्याचाराणां, भ्रष्टाचाराणां चोन्मूलम्।

इटालीदेशस्यानेकेषु स्थानेषु कमपि-कमपि स्वल्पं-स्वल्पं समयं यावन्निवासानन्तरमन्ततस्ते स्पेत्सियारवातस्य तटे विद्यमानमेकं प्राचीनं दुर्गं 'कासामाग्नो' इत्याख्यं प्रापुस्तथा-एडवर्ड विलियम्सनामकेनैकेन शेलिकवेः प्रशंसकेन सार्कं न्यवसन्। तत्र विलियम्समहाशयस्य पत्नी जेननाम्नी स्वसौन्दर्येण संगीतेन च शेलिकविं मोहयामाश। मेर्या मनसि जेनायै नन्वीर्ष्योत्पेदे। तथापि सा मौनमास्थात्। अतः पूर्वं तस्या एकमात्रस्य पुत्रस्य मृत्युर्बभूव। इदानीं सा सान्त्वनाप्तये गिरजागृहं गन्तुमण्यारेभे। पित्रा च भर्त्रा च शिक्षिता तस्याः सर्वापि च नास्तिकता समय-परिवर्तेऽन्तर्दधे।

जेनमहिलातीव सुन्दरं गायति स्म। शेलिकविस्तां सम्बोधयन् कवितायामेकस्यां लिलेख-'गीयताम्, गीयताम्; तद्गीतं गीयताम्! यस्य स्वरोऽस्माकम् नीरसाद्बीभत्साच्च संसारात् परतो बहोर्दूरान्निर्गत्यागच्छेद्, यत्र चन्द्रिका, संगीतमन्तर्वेदनाश्च मिथो मिलन्त्यो नन्वेकाकारा भवेयुः।"

अस्यां प्रणयपूर्णस्य नवजागरणस्य मनोद्रशायां शेली प्रतिदिनं सुन्दरेभ्यः सुन्दरतराणि काव्यानि लिखन् विलिन्नासीत्। तावदेव स एकदा रुग्णो बभूव। रुग्णावस्थायां सः स्वात्मानं सर्वतो भूत-प्रेत-पिशाचादीनां दृश्याणि द्रष्टुमारेभे। यदा स रोग-मुक्तो बभूव तदापि तेन (जागरणावस्थायामपि) प्रेतात्मानस्तच्छायाश्चादृश्यन्त। एकदा गृहच्छदौ भ्रमन् सः स्वयं स्वकीयं छायात्मानं ददर्श तथा तमित्थं ब्रुवाणं शुश्राव-'त्वं कियत्पर्यन्तं जीवनस्य परिस्थितिष्वेतासु जीवितुं संतोषं चानुभवितुमाशासानोऽसि?' जेनमहिला विलियममहाशयोऽपि च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विचित्राः समाचाराः

संग्रहीता—विद्याभूषणः श्रीगणेशरामशर्मा, डूंगरपुरम्

विद्यार्थी शिक्षकश्चापि

शर्मण्यदेशे कश्चनैकश्छात्रो विधिशास्त्राध्ययनेन साकमेवैकं नवीनं विषयं स्वयमेवाध्यापयितुमारब्धवान्। तस्य सायङ्कालीनायां पाठशालायां किशोर्यः किशोराश्च स्वमाता-पित्रोर्मनोविज्ञानबोधस्य विद्यां शिक्षितुं पारयन्ते।

—❀—

चमत्कारकमौषधम्

बेल्जियमनगरस्य छात्रेषु कूर्च-केशानां वर्धनस्य प्रचलनमधुनैतावद्वृद्धिं गतमास्ते। यदेकः सज्जनः 'कूर्च-वृद्धिकरं खाद्यम्' विक्रेतुमारभत। तस्येदं 'चमत्कारकमौषधं' महत्या-तीव्रगत्या विक्रीयते स्म यदेको रसायनज्ञो विश्लेषणं कृत्वा विज्ञातवान् यत्तत् सत्यमेवेदं खाद्यौषधं-अश्वशकृत् वर्तत इति।

—०—

न तु पुरुषो वरञ्च महिला

फारमोसा-सैन्यस्यैको 'हवलदार'-महाशयो, यो ह्येतावत्कठोरं व्यवहरति स्म यत्तं सैनिका यमदूतमतीव निर्दयमूचुः, विश्रामवृत्तिग्रहणादनन्तरं समसूचयद्, यदहं नास्मि पुरुषो वरं च स्त्री वर्ते। सोऽकथयद्यद्धि कठोरानुशासनार्थं महिला एव नियोक्तव्या यतः पुरुषेषु राज्यशासनं तासामेव स्वायत्तं स्वाधीनं चास्त इति।

—❀—

ऋतुज्ञातारः

अमरीकायामृतुवेदिनां संस्था पर्याप्तं विचार-विमर्शानन्तरं स्ववार्षिकगोष्ठीसम्मेलनार्थमादर्शं दिनं निश्चिकाय। परन्तु तद्दिने प्रातः कालादेव मूशलधाराप्रवाहं जलं वर्षन्नासीत्।

—:०:—

शिष्याध्यापिकयोर्विवादः

पश्चिमशर्मण्यदेशे किलैकविंशतिवर्षवया वुल्फगाङ्गनामा जनः स्वकीयां भूतपूर्वमिकचत्वारिंशद्वयसमध्यापिकां परिणेष्यति। अनयोः प्रणयस्येतिहासो वर्षषट्कपूर्वं तदारभत, प्रणयिनी वधूर्मारिया लीटर-इत्याख्या वुल्फगांगं खल्वितिहास विषयमध्यापयितुमारभत।

—: :—

शकटं ननु क्व गतम् ?

शिकागो-समाचारपत्रस्यैकः प्रतिवेदकः स्वस्य सर्वाद्यं सर्वान्तिमं च कार्यं कर्तुं मरुत्वरयानानां भञ्जकमेकं कर्मशाला-भवनं स्वकर्मशालाया यानेन मरुत्वरेण ययौ। स भ्रान्त्या स्वमरुत्वरयानमनुचिते स्थाने समस्थापयत्। यदा स व्यवस्थापकस्य साक्षात्कारं कृत्वा निरवर्तत तदाऽद्रासीद्यत्तस्य मरुत्वरयानं खण्डशो भग्नमासीदिति।

—०—

तच्छायात्मानं ददृशतुः—समुद्विग्नं तथाऽज्ञाताद्भयात् संत्रस्तं छायात्मानम्।

अथ १ जुलाई १८२२ दिने शेली विलियम्ससहितः स्वमित्रं लेहण्टनामानं मिलितुं लेगहार्नस्थानं जगाम। इतो मेरी कारणैरनेकैरुद्विग्नेव संतस्थे रुदती सा शेलिनमुवाच—यदि च त्वं शीघ्रं न निवर्तसे तदाहं पीसां गमिष्यामीति। तदिदं तयोर्द्वयोरन्तिमं मिलनमभूत्।

क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मत्स्यानां जाले टोपिका

सिसलीदेशे कश्चन युवको यदा समुद्रे मत्स्यान् गृह्णन्नभूत्तदा सः स्वकीयां टोपिकां मत्स्यानां जालेऽवरुद्धां लेभे, या षड्वर्षपूर्वं क्वचिद्विगलिताऽभूत् । तस्यां टोपिकायां तस्य प्रतिवेशिनोऽभिधानं लिखितमासीत् ।

—०—

विश्रामगृहे द्वन्द्वयुद्धम्

एकस्मिन् विश्रामगृहेऽभूतपूर्वं द्वन्द्वयुद्धं बभूव । पाब्लो महाशयस्य पत्न्यास्तस्या भगिन्याश्च मिथो वाग्वादो बभूव । ततः पाब्लोमहाशयः स्वविश्रान्तिगृहे तयोर्द्वयो र्द्वन्द्वयुद्धमायोजयत् । तत्रोपस्थिता दर्शकास्ताभ्यां द्वाभ्यामपि महिलाभ्यां नवीनानि वस्त्राणि प्रार्पयन् परन्तु पाब्लोमहाशयोऽपराधरूपायास्मै—उत्पाताय सर्वकारस्य दण्डभाग्बभूव ।

—+—

वायुना चलन्त्या घटिकाया आविष्कारः

महाराष्ट्रप्रदेशस्य—आकोलामण्डलान्तर्गतस्य कारञ्जा—इति स्थानस्य निवासी श्रीवाणीमहाशयस्तथाविधामेकां यन्त्रघटिकां निर्ममे, या केवलं वायुना चलति । स स्वाविष्कारस्य राजेष्टीकरणं विदधानोऽस्ति । सैषा घटिका केवलमेकस्मिन् स्तूपस्तम्भे निहिता सती गतिशीला भवति ।

घटिकाया अस्याः पृष्ठभागे लोहप्रस्तरस्यैकं व्यजनं संलग्नमास्ते, यद्वायुना प्रचलति, तेन च घटिकान्तर्वर्तमाना यन्त्रावयवा गतिशीला भवन्ति । व्यजेन संयोजित एको दीर्घो दण्डो विद्यते यस्य साहाय्येन घटिकायां कुञ्जी-पूरणं भवति ।

—×—

टिक—टिकध्वनिः

यदा स सामुद्रिकात् सेवानियोगाद् विश्रामवृत्तिमासाद्य स्वगृहं न्यवर्तत तदा ददर्श यत्तस्याः पत्नीदानीं यावदपि चोर्णावस्त्रपरिधानं (स्वेटर) वयन्तो वर्तत इति । स हि वयनस्य शलाकानां 'टिक—टिक' ध्वनिना तावदुद्विविजे यत् स तत्कालमेव ततोऽपवव्राज ।

—÷—

चटकाया नीडेऽङ्गुलीयकम्

फिनलेण्डदेशस्यारक्षिविभाग एकस्य हीरकजटितस्याङ्गुलीयकस्यान्वेषणेऽसमर्थो बभूव, यद्धि सन् १९४६ ई० वर्ष एकस्माद्गृहाद्रहस्यमयरूपेणान्तर्दधे । परन्त्वेको भवननिर्माता तदङ्गुलीयकं चटकाया एकस्या नीडेऽन्वेषितवान् ।

—×—

स्वप्नजन्या आघाताः

चिलीदेशस्य सेन्टिआगो—नगरस्यैका धनसम्पन्ना विधवा डोलोरस—लिजाना रात्रावेकस्यां स्वप्ने ददर्श यत् साऽश्वजवद्यूतस्य प्रतियोगितायां भागं गृह्णाना दीव्यति तथा निरन्तरं जेगीयमानास्त इति । अथान्येद्युरेव सा स्वकीयां समस्तामपि सम्पदं विचिक्राय तथा तद्धनं समग्रमपि चाश्वजवप्रतियोगितायां पणरूपं नियुयोज । अस्य परिणामोऽसौ बभूव यदिदानीं सा गृहे—गृहे भिक्षमाणापमानाघातान् सहमाना बम्भ्रमीति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

दीनानाथत्रिवेदी मधुपः, सहसम्पादकः

संस्कृतस्य विकास आवश्यकः

दिल्ल्यां श्रीलालबहादुरशास्त्रि-राष्ट्रिय-संस्कृतविद्यापीठस्य द्वितीयदीक्षान्तसमारोहस्योद्घाटनमाचरता शिक्षाराज्यमन्त्रि-श्रीभक्तदर्शन-महानुभावेन भणितं यदस्माक राष्ट्रस्य समुत्थानाय विज्ञानेन सहैव सर्वतः प्राचीनाया अस्माकं संस्कृतेरुत्तमाङ्गानां विकासोऽपि परमावश्यकः । अनया दृष्ट्या च संस्कृतमेव केवलमतिशोभनं माध्यमं विद्यते, यद्धि अस्माकमुज्ज्वलेनेतिहासेन सहास्मान् संयोजयति । अतः संस्कृतविकासस्यापि परमावश्यकत्वं स्फुटं भवति ।

प्राचीनसंस्कृतपाण्डित्यस्य रक्षणमावश्यकम्

किञ्चोक्तविद्यापीठे शास्त्रार्थपरिषदः समुद्घाटनं कुर्वन् प्रशासनसुधारायोगसदस्यो डा० श्रीत्रिभुवननारायणसिंहः समभाषत यत्प्राचीन-परम्पराप्राप्तस्य संस्कृतवैदुष्यस्यापि परिरक्षणमावश्यकं विद्यते इति । सहैव सभापतिर्वाराणसेय-संस्कृतविश्वविद्यालयीयशोधसंस्थानस्य निदेशक आचार्य-श्रीबदरीनाथशुक्लमहोदयः समवोचत् यत् सेयं शास्त्रार्थप्रणाली ह्यस्माकं ज्ञानकोषस्य संरक्षणस्य सर्वतोऽनुत्तमा विद्यते प्रणाली । एषा ह्येकतो ज्ञानस्य गाम्भीर्यं यावत् प्राप्नोति तथा परतश्च तर्कानुष्ठानस्य शक्तिमाविर्भावयतीति ।

अन्ते च विद्यापीठस्यास्य निदेशकः श्रीमण्डनमिश्रमहोदयः प्रतिपादितवान् यदस्याः संस्थायाः समुद्देश्यं वर्तते प्राचीनशास्त्राणां संरक्षणम् । अतयैव दृष्ट्या चात्र शास्त्रचर्चाणां सञ्चालनं भवतीति ।

वस्तुतः कालप्रभावेण यथा यथा संस्कृतस्य महापण्डितानामाभावो जायमानो वर्तते, तथा तथा प्राचीनस्य संस्कृतविषयकस्य पाण्डित्यस्यापि ह्रास एव प्रतिदिनं समेधमानः प्रत्यक्षी क्रियते इत्यपि प्रत्यक्षमेव प्रेक्षावतां तत्र भवतां भवताम् । सम्प्रति च संस्कृतमधीयानानां छात्राणां या दशा वर्तते, साप्यस्ति, नूनमतिशोच्यैव । अतो येऽपि महानुभावाः संस्कृतस्य कल्याणं कर्तुं कामयन्ते तैः सर्वात्मना सर्वविधोऽपि सहयोगः प्राचीनस्य संस्कृतपाण्डित्यस्य संरक्षणात्मकेऽस्मिन् पुण्ये कर्मणि प्रदेयः ।

आकाशवाण्याः कार्यक्रमेषु संस्कृतस्याप्युपयोगः आवश्यकः

रा० सं० साहित्यसम्मेलनस्य बीकानेरस्थशाखायाः सचिवेन श्रीमता अम्बिकादत्तशास्त्रिणा सूचना-प्रसारणमन्त्रालयं प्रत्यनुरोध एष कृतो यत् संस्कृतस्य विकासाय नभोवाण्याः कार्यक्रमेषु संस्कृतभाषायाः कृतेऽपि पर्याप्तः सहयोगः परमावश्यकः इति ।

वस्तुतो यदि विचारः क्रियेत तर्हि सुनिश्चितमेवेदं यत् संस्कृतस्य प्रचार-प्रसारात्मके कर्मणि नभोवाण्याः कार्यक्रमेषु संस्कृतस्य प्रवेशः प्रधानं स्थानमावहति । अतोऽत्राधारिभिर्विशेषतयावश्यं ध्यानं देयम् इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिव-स्मारिका

सम्पादिका श्रीमती कुसुमलता गोस्वामी
शिवानन्दपुरी, महापुरा

विदितमेवेदं तत्र भवतां विदुषां यज्जयपुरात् पश्चिमायां दिशि पञ्चगव्यूतक्रोशमिते दूरे महापुरा (महापुरा) संज्ञको विद्यते ग्रामः यत्र आत्रेयगोत्रीयो ब्राह्मणपरिवारो निवसतीति। परिवारस्य चास्योद्भवो भारतस्य दक्षिण-दिग्भागे द्रविडदेशस्य शिवकाञ्चीनाम्न्यां नगर्यां पेणानद्यास्तटे स्थितात् पाणस्पट्टनगराद् वर्तते। एते हि पूर्वमविद्यन्त षडङ्गवेदादिशास्त्रेषु परम-निष्णाता आन्ध्रदेशीया ब्राह्मणाः। एषु च श्रीशिवानन्दगोस्वामिमहाभागस्य नाम विशेष-तयोल्लेखनीयमास्ते; यो हि १७ शताब्द्याम् आमेरनरेश-श्रीविष्णुसिंह (विशनसिंह) महा-राजतो लब्धसम्मानोऽत्र महापुराग्रामे वसतिं कृतवान्। अस्य वंशजाः प्रायः सर्वेऽपि प्रति-भासम्पन्ना मन्त्रतन्त्रकोविदा धर्मनिष्ठा विद्वांसः आसन्। तथा चोक्तमत्र विषये—

देशोऽस्ति दक्षिणदिशि द्रविडाभिधानः
काञ्चीति यत्र वसतिः स्मरशासनस्य।
पुण्या पुरी पुरनिषूदन भागधेय
सौभाग्यदन्तुरितकीर्तिरचञ्चलश्रीः॥

पेणामद्यास्तीरे पाणंपट्टेति नाम नगरवरम्। जगदुत्तंशो वंशो द्रविडानां तत्र दाक्षिणात्यानाम् गोस्वामि-श्रीशिवानन्दमहानुभावस्यैव तस्य वर्तते वंशजः सोऽयं सहायक निदेशकः **श्रीघनश्याम गोस्वामि**महोदयः। अत एवात्र तस्य महा-विदुषो नामोद्दिश्य शिवानन्दपूर्याः समुद्घाटन-महोत्सवो राजस्थानस्य राज्यपाल-सरदार-श्रीहुकमसिंहमहोदयस्य करकमलाभ्यां समप-द्यत।

एवञ्चात्र श्रीशिवानन्दगोस्वामिनं तथा तदीयं वैदुष्यादिकञ्चाधिकृत्य संस्कृतशिक्षा-निदेशक-**श्री. के. माधवकृष्णशर्ममहोदयै**-र्लिखितो विशिष्टो लेखः प्रकाशितो विद्यते। एवमन्यैरपि विद्वद्भिश्च लिखितैः पाण्डित्य-पूर्णैः सठनार्हैं लेखैः समलंकृता विविधैश्चित्रै-श्चित्रिता च सेयं स्मारिका संस्कृतसाहित्यसेविनां महते लाभाय मनोविनोदाय चालं भविष्यतीति शम्।

दी अवध शूगर मिल्स लिमिटेड

प्रधान कार्यालय :–
इण्डस्ट्री हाउस
१५९ चर्च गेट रिक्लेमेशन
बम्बई–१

मिल्स :–
हरगांव
जिला–सीतापुर
उत्तरप्रदेश

निर्माता :–
शुद्धा, श्वेता, कणवती शर्करा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृतीयोऽध्यायः

'ॐ' ऋषिरुवाच ॥१॥	ऋषि बोले १
निहन्यमानं तत्सैन्यमवलोक्य महासुरः । सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथाम्बिकाम् ॥२॥	सेना महिष की सारी नष्ट भ्रष्ट निहार के। सेनानी चिक्षुर क्रुद्ध देवीको मारने चला ॥२॥
स देवीं शरवर्षेण ववर्ष समरेऽसुरः । यथा मेरुगिरेः शृङ्गं तोयवर्षेण तोयदः ॥३॥	रणमें वह देवीपै बाण यों वर्सने लगा। मेघ ज्यों जलधाराएं वर्सता मेरुशृंगपै ॥३॥
तस्यच्छित्त्वा ततो देवी लीलयैव शरोत्करान् । जघान तुरगान् बाणैर्यन्तारं चैव वाजिनाम् ॥४॥	लीलासे ही अम्बिकाने उसके बाण काटके। मारे तुरग बाणोंसे गिराया और सारथि ॥४॥
चिच्छेद च धनुः सद्यो ध्वजं चातिसमुच्छ्रितम् । विव्याध चैव गात्रेषु छिन्नधन्वानमाशुगैः ॥५॥	तत्काल धनुको काटा गिराया ध्वज उच्च भी। सर्वत्र देहमें बींधा शरोंसे चाप हीन को ॥५॥
स च्छिन्नधन्वा विरथो हताश्वो हतसारथिः । अभ्यधावत तां देवीं खड्गचर्मधरोऽसुरः ॥६॥	रथ चाप तथा अश्व और सारथि हीन हो। खड्ग चर्म लिए दौडा देवी की ओर दानव ॥६॥
सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्धनि । आजघान भुजे सव्ये देवीमप्यतिवेगवान् ॥७॥	सिंहको शिरपै मार तेजधार कृपाण से। देवी के वामभुज में चोट को वेगवान ने ॥७॥
तस्याः खड्गो भुजं प्राप्य पफाल नृपनन्दन । ततो जग्राह शूलं स कोपादरुणलोचनः ॥८॥	देवीके भुजपै आया खड्ग टूट गया नृप!। तब उसने लिया शूल कोपसे लाल दृष्टि हो ॥८॥
चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः । जाज्वल्यमानं तेजोभी रविबिम्बमिवाम्बरात् ॥९॥	शूलको भद्रकालीपै फैंका प्रबल वेगसे। तेजसे दीप्त रविका बिम्ब ज्यों नभमें चला ॥९॥
दृष्ट्वा तदापतच्छूलं देवी शूलममुञ्चत । तेन तच्छतधा नीतं शूलं स च महासुरः ॥१०॥	स्वशूल छोडा देवीने अति दानव शूलपै। उससे चूर्ण शतधा हुवा वह कुदैत्य भी ॥१०॥
हते तस्मिन्महावीर्ये महिषस्य चमूपतौ । आजगाम गजारूढश्चामरस्त्रिदशार्दनः ॥११॥	पराक्रमी महिषके सेनानी के मरे पुनः। देवतापी गजारूढ चामरासुर आगया ॥११॥
सोऽपि शक्तिं मुमोचाथ देव्यास्तामम्बिका द्रुतम् । हूंकाराभिहतां भूमौ पातयामास निष्प्रभाम् ॥१२॥	उसने भी शक्ति छोडी देवीपै, अम्बिका उसे। हूंकार से प्रभाहीन कर भूपर डाल दी ॥१२॥
भग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः । चिक्षेप चामरः शूलं बाणैस्तदपि साच्छिनत् ॥१३॥	टूटी पडी शक्ति देख क्रुद्ध चामर ने वहां। त्रिशूल छोडा, देवीने उसेभी काट ही दिया ॥१३॥
ततः सिंहः समुत्पत्य गजकुम्भान्तरे स्थितः । बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा ॥१४॥	तब ऊंचा उछलके सिंह आ गज कुम्भपै। उस चामर से युद्ध बाहुओं से किया वहां ॥१४॥
युद्ध्यमानौ ततस्तौ तु तस्मान्नागान्महीं गतौ । युयुधातेऽतिसंरब्धौ प्रहारैरतिदारुणैः ॥१५॥	लडते फिर दोनों ही गजसे भूमि आगये। लडे क्रोधभरे घोर प्रहारोंसे परस्पर ॥१५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततो वेगात् खमुत्पत्य निपत्य च मृगारिणा ।
करप्रहारेण शिरश्चामरस्य पृथक्कृतम् ।।१६।।

वेगसे नभमें कूद उच्छलते मृगेन्द्रने ।
शिर चामर का दूर किया तलप्रहार से ।।१६।।

उदग्रश्च रणे देव्या शिलावृक्षादिभिर्हतः ।
दन्तमुष्टितलैश्चैव करालश्च निपातितः ।।१७।।

उदग्र को भवानीने मारा वृक्षशिलादिसे ।
दन्त मुष्टि तलों से ही दिया मार करालको ।।१७।।

देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतम् ।
बाष्कलं भिन्दिपालेन बाणैस्ताम्रं तथान्धकम् ।१८

गदा से मार देवीने चूर्ण उद्धत का किया ।
भिन्दिपालसे बाष्कल को बाणोंमे ताम्र अंधको १८

उग्रास्यमुग्रवीर्यं च तथैव च महाहनुम् ।
त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी ।।१९।।

महाहनु तथा उग्र वीर्य-उग्रास्य को वहीं ।
त्रिनेत्रा परमेशीने मारडाला त्रिशूलसे ।।१९।।

बिडालस्यासिना कायात्पातयामास वै शिरः ।
दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयम् ।।२०।।

बिडालका शिर गिरादिया काट कृपाण से ।
बाणों से यमके गेह भेजे दुर्धर दुर्मुख ।।२०।।

एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः ।
माहिषेण स्वरूपेण त्रासयामास तान् गणान् ।।२१

यों क्षीण होती सेनामें महिषासुर दुष्टने ।
गणोंको त्रासित किया महामहिषरूप से ।।२१।।

कांश्चित्तुण्डप्रहारेण खुरक्षेपैस्तथापरान् ।
लाङ्गूलताडितांश्चान्याञ्छृङ्गाभ्यां च विदारितान् ।।२२।।

तुण्ड प्रहार से कोई कोई को खुर घातसे ।
सीगोंसे पुच्छघातों से किये व्याकुल शीघ्र ही ।।२२

वेगेन कांश्चिदपरान्नादेन भ्रमणेन च ।
निःश्वासपवनेनान्यान् पातयामास भूतले ।।२३।।

वेगसे और औरोंको नादसे भ्रम से तथा ।
निःश्वासों के पवन से गिराए भूमिपै कई ।।२३।।

निपात्य प्रमथानीकमभ्यधावत सोऽसुरः ।
सिंहं हन्तुं महादेव्याः कोपं चक्रे ततोऽम्बिका ।२४

गिरा यों मुख्य सेनाको दौडा वह महासुर ।
देवी के सिंहवध को तब क्रुधा हुई शिवा ।।२४।।

सोऽपि कोपान्महावीर्यः खुरक्षुण्णमहीतलः ।
शृङ्गाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च ।।२५।।

वह भी दैत्य क्रोधी हो खुरोंसे खोदता मही ।
सींगों से ऊर्ध्व नागों को फेंकता गर्जता रहा ।।२५

वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत ।
लाङ्गूलेनाहतश्चाब्धिः प्लावयामास सर्वतः ।।२६।।

उसके वेग भ्रमसे रोंदी भूमी विशीर्ण थी ।
पुच्छप्रहार से सिन्धु फैलता सब ओर था ।।२६।।

धुतशृङ्गविभिन्नाश्च खण्डं खण्डं ययुर्घनाः ।
श्वासानिलास्ताः शतशो निपेतुर्नभसोऽचलाः ।।२७।।

खण्ड खण्ड हुए मेघ घूमते शृङ्ग युगमसे ।
श्वासाहत हुए नाना नभमें से गिरे गिरि ।।२७।।

इति क्रोधसमाध्मातमापतन्तं महासुरम् ।
दृष्ट्वा सा चण्डिका कोपं तद्वधाय तदाकरोत् ।।२८।।

क्रोधसे यों उछलते दैत्यको देख चण्डिका ।
तब कोपाविष्ट हुई उसके बधके लिए ।।२८।।

सा क्षिप्त्वा तस्य वै पाशं तं बबन्ध महासुरम् ।
तत्याज माहिषं रूपं सोऽपि बद्धो महामृधे ।।२९।।

देवीने फैंकके पाश बांधा समरमें उसे ।
दैत्यने भी बद्ध होते छोडा महिष रूपको ।।२९।।

ततः सिंहोऽभवत्सद्यो यावत्तस्याम्बिका शिरः ।
छिनत्ति तावत्पुरुषः खड्गपाणिरदृश्यत ।।३०।।

सद्यः सिंह हुआ यावत् चण्डिका उसका शिर ।
काटती तब तो दीखा खड्गपाणि मनुष्य है ।।३०।।

तत एवाशु पुरुषं देवी चिच्छेद सायकैः ।
तं खड्गचर्मणा सार्धं ततः सोऽभून्महागजः ।।३१।।

फिर जल्दी पुरुषको देवोने बिद्ध बाणसे ।
किया, खड्ग ढाललिए; वह मातङ्ग हो गया ।।३१।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

करेण च महासिंहं तं चकर्ष जगर्ज च ।
कर्षतस्तु करं देवी खड्गेन निरकृन्तत ॥३२॥

ततो महासुरो भूयो माहिषं वपुरास्थितः ।
तथैव क्षोभयामास त्रैलोक्यं सचराचरम् ॥३३॥

ततः क्रुद्धा जगन्माता चण्डिका पानमुत्तमम् ।
पपौ पुनः पुनश्चैव जहासारुणलोचना ॥३४॥

ननर्द चासुरः सोऽपि बलवीर्यमदोद्धतः ।
विषाणाभ्यां च चिक्षेप चण्डिकां प्रति भूधरान् ॥३५

सा च तान् प्रहितांस्तेन चूर्णयन्ती शरोत्करैः ।
उवाच तं मदोद्धूतमुखरागाकुलाक्षरम् ॥३६॥

देव्युवाच ॥३७॥

गर्ज गर्ज क्षणं मूढ मधु यावत्पिबाम्यहम् ।
मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशु देवताः ॥३८॥

ऋषिरुवाच ॥३९॥

एवमुक्त्वा समुत्पत्य साऽऽरूढा तं महासुरम् ।
पादेनाक्रम्य कण्ठे च शूलेनैनमताडयत ॥४०॥

ततः सोऽपि पदाऽऽक्रान्तस्तया निजमुखात्ततः ।
अर्धनिष्क्रान्त एवासीद् देव्या वीर्येण संवृतः ॥४१

अर्धनिष्क्रान्त एवासौ युध्यमानो महासुरः ।
तया महासिना देव्या शिरश्छित्त्वा निपातितः ॥४२

ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत् ।
प्रहर्षं च परं जग्मुः सकला देवतागणाः ॥४३॥

तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः ।
जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ॥४४॥

इति श्रीदुर्गासप्तशत्यां तृतीयोऽध्यायः ।

सूंडसे सिंहको खूब खींचता गर्जता रहा ।
खींचते सूंडको देवी खड्गसे काटही गई ॥३२॥

फिरसे उसने देह धार मानुष का लिया ।
पूर्ववत् क्षोभित क्रिया चराचर त्रिलोक को ॥३३॥

तब क्रुद्धा जगन्माता चण्डिका दिव्य पान को ।
पीती हुई बारबार हँसी अरुणलोचना ॥३४॥

गरजा वहभी दैत्य बलवीर्यमदोद्धत ।
देवीके प्रति सींगों से फेंकता बहु था गिरि ॥३५॥

वह देवी स्वबाणों से गिरियों को विचूरती ।
बोली उसे, मदोद्धत व्याकुलाक्षर वाक्य यों ॥३६॥

देवी बोली ॥३७॥

गर्ज गर्ज अरे मूढ पिऊं मैं जबतक मधु ।
तेरे मरमिटे पोछे गर्जेंगे देवता यहीं ॥३८॥

ऋषि बोले ॥३९॥

यों बोलती उछलके जा चढी उस दैत्य पै ।
दबाके पदसे, कण्ठ छेद डाला त्रिशूल से ॥४०॥

वहभी हो पदाक्रान्त अपने मुख से बहिः ।
आधा निकलता देवी-तेजसे रुद्ध होगया ॥४१॥

आधा प्रकट भी दैत्य देवोसे लडता रहा ।
खड्ग से उस देवीने शिर काट गिरा दिया ॥४२॥

तब हाहा उचरती दैत्यसेना सभी भगी ।
प्रमोद को प्राप्त हुए सबही देवतागण ॥४३॥

देवों ने स्तुतियां गाईं महर्षिगण संग आ ।
गन्धर्वोंने गान, नृत्य, अप्सरागण ने किया । ४४॥

श्रीहरिशास्त्रिकृत हिन्दी दुर्गापाठ में तीसरा
अध्याय पूर्ण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपयोगी लघुकथा

श्रीगिरिराजशर्मा शास्त्री, जयपुरम्

महावीरस्वामी (जिनेश्वरः)—प्रायः सार्धद्विसहस्रवर्षेभ्यः पूर्वं बिहारप्रदेशस्य क्षत्रियकुण्डनामकं स्थानं सिद्धार्थकुमारस्य पाटनगरमासीत्। तस्य महाराज्ञी त्रिशलादेवी आसीत्। चैत्रशुक्लत्रयोदश्यां तिथौ तस्याः गर्भात् महावीरस्वामी जन्म लेभे। बाल्यकाले तस्य नाम 'वर्द्धमानः' इत्यासीत्। स्वबाल्यावस्थायां तेन क्षत्रियोचिता शस्त्रशिक्षा गृहीता।

बाल्यकालादेव तस्याभिरुचिस्त्यागे तपश्चर्यायाञ्चासीत्। राजकुमारोचिते जीवने सुखोपभोगे च तस्याभिरुचिर्नासीत्। दीनदुःखिजनानां सेवाकार्येषु तेभ्यः अन्नवस्त्रादिप्रदाने च तस्य सर्वाधिकाभिरुचिरासीत्। यदा स त्रिंशद्वर्षवयस्कोऽभूत् तदा तस्य मातापितरौ दिवङ्गतौ, तदनन्तरं स गृहं विहाय दीक्षा गृहीत्वा वनं गतवान् तत्र च तपश्चर्यामारभत।

द्वादशवर्षपर्यन्तं तेन कठोरं तपः कृतम्। तेन षण्मासिकं निर्जलं व्रतं बहुवारं कृतम्। अनेके मासाश्च तेन अनुपावेष्टेन एव व्ययिताः। तस्मिन् सुदीर्घे काले स नैवोपाविशत् नैव च शयनमप्यकरोत्। इतस्ततः संचारोऽपि च तेन तस्मिन् कालखण्डे निरुद्धः कृतः। सार्धद्वादशवर्षात्मके सुदीर्घे कालखण्डे तेन केवलं चतुस्त्रिंशद्वारं आहारो गृहीतः। तपश्चर्यायाः समये वन्यपशुभिः विषाक्तकीटकैः मधुमक्षिकाभिश्च स बहुवारं दंशितः पीडितश्चासीत्। दुष्टजनैः स ताडितः, तस्य पादौ अग्निना दाहितौ तस्य च कर्णयोः काष्ठकीलकौ प्रवेशितौ। उग्रप्रकृतिकैः

महावीर स्वामी (जिनेश्वर):—प्रायः ढाई हजार वर्ष के पूर्व बिहार प्रदेश का क्षत्रियकुण्ड नामक स्थान सिद्धार्थ कुमार की राजधानी था। उसकी महारानी त्रिशला देवी थी। चैत्र शुक्ला त्रयोदशी के दिन उसके गर्भ से महावीर स्वामी ने जन्म लिया। बाल्यकाल में उसका नाम 'वर्धमान' था। अपनी बाल्यावस्था में उनने क्षत्रियोचित शस्त्र-शिक्षा ग्रहण की थी।

बाल्यकाल से ही इनकी अभिरुचि त्याग और तपश्चर्या में थी। राजकुमारोचित जीवन में और सुखोपभोग में इनकी अभिरुचि नहीं थी। दीन-दुखीजनों के सेवाकार्य में उनको अन्न-वस्त्रादि देने में उनकी सर्वाधिक अभिरुचि थी। जब वे तीस वर्ष के हुए तब उनके माता-पिता दिवङ्गत हो गए और तत्पश्चात् वे घर छोड़कर दीक्षा लेकर वन में गए और वहां तपश्चर्या प्रारम्भ की।

बारह वर्ष तक उनने कठोर तप किया। उनने ६ मास के निर्जल व्रत अनेक बार किए। अनेक मास उन्होंने खड़े रह कर ही व्यतीत किए। उस लम्बे समय में न वे बैठे और न शयन ही किया। इधर-उधर संचार करना भी उन्होंने इस अवधि में रोक दिया। बारह वर्ष के लम्बे समय में उन्होंने केवल चौतीस बार आहार ग्रहण किया।

तपश्चर्या के समय में वन्य पशुओं द्वारा, विषाक्त कीड़ों से और मधुमक्खियों से भी अनेक बार दंशित और पीड़ित किए गए। दुष्टजनों ने उन्हें पीटा, उनके पावों को अग्नि से जलाया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवैरपि स ताडितः तर्जितश्चाऽभूत् । तस्य शरीरे वारम्वारं जलवृष्टेस्तुषारपातस्याप्याक्रमणमभूत् किन्तु स महापुरुषः शान्तः सन् सर्वं कष्टसमूहं असहत कस्मिन्नपि कष्टकारके जोवे स क्रुद्धो नाऽभूत् । स पर्वतसदृशः स्थिरः शान्तश्च सन्नवस्थितोऽभूत् । तस्य धैर्यं विलोक्य देवराजेन इन्द्रेण स 'महावीर' इति नाम्ना उद्घोषितः । तस्मात्कालादारभ्य स 'महावीर' इति नाम्ना प्रख्यातोऽभूत् ।

सार्धद्वादशवर्षाणां कठोरेण तपसः प्रभावेण सहनशीलतया च तस्यान्तःकरणं सर्वथा दोषमुक्तमभूत् । महावीरस्वामी सर्वज्ञः महासिद्धश्चाऽभूत् । तदनन्तरं तेन संसारस्य हिताय धर्मोपदेशः कृतः । तत्कालीनाः बहवो विद्वांसः नरेशाश्च तस्य शिष्या अभूवन् ।

महावीरस्वामी जैनधर्मस्यान्तिमो तीर्थङ्कर आसीत् । तस्योपदेशा एव जैनधर्मस्य मुख्याधारभूताः सन्ति । त्रिंशत्वर्षपर्यन्तं धर्मप्रचारं कृत्वा द्व्युत्तरसप्ततिवर्षात्मके वयसि कार्तिककृष्णामवस्यातिथौ पावापुरीनगर्यां निजं पाञ्चभौतिकं शरीरं तेन त्यक्तम् ।

महावीरस्वामिनः मुख्या उपदेशाः सन्ति "मानवजीवनं त्यागाय, तपश्चर्यार्थं, तितिक्षासंयमेन्द्रियनिग्रहेण च परमार्थसिद्धये प्राप्तमस्ति" । अहिंसा, दया, परोपकारश्चैते सन्ति परमधर्माः ।

गोरक्षनाथः—श्रीगोरक्षनाथस्य विषये एका अत्यद्भुता कथा प्रचलिताऽस्ति । अयोध्यायाः समीपे जयश्रीग्रामे सद्बोधनामकस्य ब्राह्मणस्य सद्वृत्तीति नाम्नी पत्नी आसीत् । एकदा योगी मत्स्येन्द्रनाथस्तस्य गृहे आगतवान् । सद्वृत्त्या पुत्रलाभस्य मनीषा तस्य सम्मुखे

और उनके कानों में काष्ठ के कोले ठोके । उग्रप्रवृत्ति के देवों ने भी उन्हें ताड़ना दी और डराया । उनके शरीर पर बार-बार जल वृष्टि एवं तुषारापात के आक्रमण हुए किन्तु उन महापुरुष ने शान्त रह कर सब कष्ट सहे । किसी भी कष्ट देने वाले जीव के ऊपर वह क्रुद्ध नहो हुए । वे पर्वत के समान स्थिर और शान्त रह कर डटे रहे । उनके धैर्य को देखकर देवराज इन्द्र ने उन्हें 'महावीर' इस नाम से उद्घोषित किया । उस समय से ही वे महावोर इस नाम प्रख्यात हुए ।

साढ़े बारह वर्ष के कठोर तप के प्रभाव से और सहनशोलता के कारण उनका अन्तःकरण सर्वथा दोषमुक्त होगया । महावीर स्वामो सर्वज्ञ और महासिद्ध थे । तदनन्तर उन्होंने संसार के हित के लिये धर्मोपदेश किया । उस समय के बहुतसे विद्वान् और नरेश उनके शिष्य हो गए ।

महावोर स्वामो जैन धर्म के अन्तिम तीर्थङ्कर थे । उनके उपदेश हो जैन धर्म के मुख्य आधार हैं । तीस वर्ष तक प्रर्म प्रचार करके बहत्तर वर्ष को उम्र में कार्तिक कृष्णा अमावस्या के दिन पावापुरी नगरी में अपना पाञ्चभौतिक शरीर उन्होंने त्याग दिया ।

महावीर स्वामी के मुख्य उपदेश हैं "मानव जीवन त्याग के लिए तपश्चर्या के लिए तितिक्षा-संयम-इन्द्रिय निग्रह द्वारा परमार्थ सिद्धि हेतु प्राप्त है ।"

अहिंसा-दया-परोपकार ये परमधर्म हैं ।

गोरक्षनाथः—श्री गोरक्षनाथ के विषय में एक अद्भुत कथा प्रचलित है । अयोध्या के समीप जयश्रीग्राम में सद्बोध नाम के ब्राह्मण के सद्वृत्ति नाम की पत्नी थी । एकबार योगी मत्स्येन्द्रनाथ उनके घर में आए । सद्वृत्ती ने पुत्र लाभ की मनीषा उनके सम्मुख व्यक्त की ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकटीकृता मत्स्येन्द्रनाथेन तस्यै विभूतिः प्रदत्ता। सद्वृत्त्या च अश्रद्धया सा विभूतिः अवकरपुञ्जे पातिता। द्वादशवर्षानन्तरं श्रीमत्स्येन्द्रनाथः पुनः तत्र आगतवान्। स सद्वृत्तिं पुत्रस्य विषये पृष्टवान्, सद्वृत्त्या सत्यं कथितम्। श्रीमत्स्येन्द्रनाथः अवकरपुञ्जस्य समीपं गत्वा "अलख" इति गर्जनामकरोत्। तस्मिन् एव समये "आदेश" इति गर्जनां कुर्वन् एको बालयोगी प्रकटोऽभूत्। स एव गोरक्षनाथ आसीत्। गोरक्षनाथो महान् योगी, ज्ञानी सिद्धपुरुषश्चासीत्। बङ्गप्रान्ते नैपालराज्ये पञ्जाम्बुप्रदेशे, गुजरप्रान्ते, महाराष्ट्रादिषु प्रान्तेषु च गोरक्षनाथस्य मठानि विद्यमानानि सन्ति। नैपालराज्ये मत्स्येन्द्रनाथस्य गौरक्षनाथस्य चोपासना भवति।

"अयं हठविद्यया प्राप्तैश्वर्यः सिद्धपुरुषः" इति हठयोगप्रदीपिकायां निर्दिष्टम्। एतदुपदिष्टानि योगप्रकरणानि गोरक्षसंहितायां वर्तन्ते। तत्र आसनप्राणसंरोधप्रत्याहारधारणाध्यानसमाधयः एते षट् योगाङ्गानि उक्तानि। शिवोपासकानां 'कण फट्' इति नाम्ना ख्यातानां योगिनां गुरुर्गोरक्षनाथ एव धर्मप्रयोजको वर्तते। एते शैवयोगिनः एनं शिवावतारं गुरुं मन्यमाना एतत्प्रवर्तितं हठयोगमभ्यस्यन्ति।

मत्स्येन्द्रनाथ ने उसको विभूति दी। सद्वृत्ती ने अश्रद्धा से उस विभूति को कूड़े के ढेर पर डाल दिया। बारह वर्ष के पश्चात् श्रीमत्स्येन्द्रनाथ पुनः वहां आए। उन्होंने सद्वृत्ती से पुत्र के विषय में पूछा। सद्वृत्ती ने सत्य कथन किया। श्रीमत्स्येन्द्रनाथ कूड़े के ढेर के समीप गए और 'अलख' यह गर्जना की। उसी समय 'आदेश' यह गर्जना जरते हुए बालयोगी प्रगट हुए। ये ही गोरक्षनाथ थे। गोरक्षनाथ महान् योगी, ज्ञानी और सिद्ध पुरुष थे। बङ्गाल राज्य में, नेपाल राज्य में, पञ्जाब प्रदेश में, गुजरात प्रान्त और महाराष्ट्र आदि प्रान्तों में गोरक्षनाथ के मठ विद्यमान हैं। नैपाल राज्य में मत्स्येन्द्रनाथ और गोरक्षनाथ की उपासना होती है।

'ये हठविद्या द्वारा प्राप्तैश्वर्य सिद्ध पुरुष हैं, यह हठयोग प्रदीपिका में निर्दिष्ट है। इनके द्वारा उपदिष्ट योगप्रकरण गोरक्ष संहिता में हैं। वहां आसन प्राणायाम प्रत्याहार धारण ध्यान समाधि ये छै योगाङ्ग बताए हैं। शिवोपासकों के 'कण फट' इस नाम से प्रख्यात योगियों के गुरु गोरक्षनाथ ही धर्मप्रयोजक है। ये शैवयोगी इन्हें शिवावतार गुरु मानते हुए इनके द्वारा प्रवर्तित हठयोग का अभ्यास करते हैं।

भारती के कतिपय प्रकाशन

१.	अम्बिकासूक्तम्	मूल्यं २.५०
२.	गल्पकल्पलतिका (बालोपयोगी)	१.५०
३.	सरलसंस्कृत शिक्षणोपायः (बालोपयोगी)	१.५०
४.	गोलनवांकुर	१.२५
५.	चित्र द्वारा संस्कृतशिक्षा (बालोपयोगी)	१.५०
६.	सुवर्णलक्ष्मी नक्षत्र माला	०.५०
७.	आयुर्वेद विशेषांक	५.००
८.	आरोग्यांक विशेषांक	२.५०

भारती के ग्राहकों को २५% वर्तन दिया जायगा यदि सम्पूर्ण पुस्तकें एक साथ मंगायें।

व्यवस्थापक

भारती संस्कृत मासिक

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारणमुच्यताम्

बुधाः! मनोविनोदाय भवतामत्र साम्प्रतम्।
न तु बुद्धेः परीक्षार्थं श्लोक एष प्रकाश्यते॥
"अक्रान्तश्चैकदाऽशेषः काकेनेह महान् वटः।
नावशिष्टं क्वचित्स्थानं तद्धेतुः कृपयोच्यताम्॥"

नामरूपे तु मिथ्यैव

दार्शनिकः— कश्चिद् दार्शनिको विद्वान् सम्पादकमभाषत।
सर्वेषां लेखकानान्तु कृतं नाम्नां प्रकाशनम्॥
ममैव केवलं नाम पत्रे किं न प्रकाशितम्?।

सम्पादकः— भवानेतत्तु जानाति दर्शनशास्त्रतत्त्ववित्॥
यदेते नामरूपे तु मिथ्याभूते यतः स्मृते।

भिक्षां याचे

धनिकः— याचमानः सदा भिक्षां भिक्षो! त्वं किं न लज्जसे?
भिक्षुकः— भवन्तं केवलं भिक्षां याचे, शिक्षां न साम्प्रतम्॥

कीदृशः पशुः

साहित्य-सङ्गीत-कलाविहीनः
साक्षात्पशुः पुच्छविषाणहीनः।
साहित्य-सङ्गीतकलायुतो यः
स किं पशुः पुच्छविषाणयुक्तः॥

विनीतो
दीनानाथत्रिवेदी मधुपः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

(अनृतमुद्दिश्य)

आशुकवि–श्रीहरिशास्त्री, सम्पादकः

अयथार्थं सत्यहीनं
छलयुग्वचनं नृणाम् ।
अनृतं प्रोच्यते विद्भि-
स्तन्न वाच्यं शुभेच्छुभिः ।।१।।

जो वचन यथार्थ न हो सत्य ही न हो छल युक्त हो उसे विद्वान् लोग अनृत (झूठ) कहते हैं। ऐसा वचन शुभ चाहने वालों को कभी नहीं कहना चाहिये ।।१।।

एकमप्यनृतं वाक्यं
मूलं पुण्यस्य कृतन्ति ।
यः सदाऽनृतवादी स्यात्
तस्य किं कथ्यतामहो ।।२।।

शास्त्रों में लिखा है कि एक वार भी कहा हुआ झूठ (अनृत वाक्य) वक्ता के पुण्य का मूल काट देता है जो मनुष्य सदा ही झूठ बोलते रहते हैं उनके विषय में क्या कहा जाय यह समझ में नहीं आता है ।।२।।

अनृतं वदतां तेजो
यशश्च परिहीयते ।
प्रतिष्ठा गलतीवात्र
वारि भिन्नघटादिव ।।३।।

झूठ बोलने वालों का तेज और यश क्षीण हो जाता है यह देखी हुई बात है। और उसकी (झूठ बोलने वाले की) प्रतिष्ठा क्षीण हो जाती है जैसे फूटे घडे से पानी चू जाता है ।।३।।

तस्माद्बालैस्तथा
छात्रैर्युवभिश्चापि सर्वदा ।
अनृतं नैव वाच्यं स्यात्
हेयं विषमिवाऽनिशम् ।।४।।

इसलिए बालकों विद्यार्थियों जवान पुरुषों को कभी झूठ बोलना नहीं चाहिए, इस झूठ को विष के समान सदा त्याग देना चाहिए। झूठे आदमी की कहीं प्रतिष्ठा नहीं होती है ।।४।।

मिथ्या त्यागाद्धि वचसि,
तेजः सत्यं बलं तथा ।
पावनत्वं निश्चयेन
वर्द्धते दिवसेऽर्कवत् ।।५।।

मिथ्याभाषण के त्याग से निश्चय ही वाणी में तेज सत्य और बल एवं पवित्रता प्रभाव बढता है, जैसे दिन में सूर्य बढता है, यह निश्चय समझिए ।।५।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. No. L 7
Licence No. PP. 6
"Licenced to Post
Without Prepayment"

एक राष्ट्रीय उत्पादन

३५००० से अधिक श्रमिकों को काम देने वाला

श्रेष्ठतम सामग्रियों से निर्मित

मेंगलूर

गणेश बीड़ियां

धूम्रपान करने वालों की अति प्रिय

प्रधान कार्यालय

मेंगलूर गणेश बीड़ी वर्क्स

विनोबा रोड़ : मैसूर-१

दूरभाष : ४२१

तार : AROMA

प्रकाशक:—जयबहादुरसिंह पता : भारती भवन, गोपालजी का रास्ता, जयपुर। दूरभाष : ७५४६६
राधेश्याम शर्मा द्वारा श्री हनुमान प्रिं० प्रेस, चौड़ा रास्ता, जयपुर में मुद्रित। फोनः ६३१५६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

9-6-

भारती

संस्कृतमासिकस्य



दाता दीनदयालु–
धंनी शरण्यो विशां वरेण्यश्च ।
आर्यो मृदुरनुकार्यो
विरला युगलाभिधो जयति ॥१

वार्षिकमूल्यं सप्तमुद्राः ७.००

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्यमेव जयते

राष्ट्रपति भवन, नई दिल्ली-४.
Rashtrapati Bhavan,
New Delhi-4.

17 May, 1969

प्रिय श्रीगिरिराज शर्मा,

६ मई, १९६९, का आपका पत्र प्राप्त हुआ, धन्यवाद। मुझे यह जानकर प्रसन्नता हुई कि श्रीयुगलकिशोर जी विड़ला की स्मृति में परिषद् द्वारा एक स्मारिका के प्रकाशन का आयोजन किया जा रहा है। इस अवसर पर परिषद् परिवार को मैं बधाई देता हूँ और स्मारिका की सफलता के लिये अपनी शुभ कामनायें भेजता हूँ।

आपका,

व. वे. गिरि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दामोदर व्यास,
गृह मन्त्री

जयपुर
राजस्थान

क्रमांक २४६५/गृ०मं०/६६

दिनांक १५ मई, १६६६

प्रिय महोदय,

मुझे यह जानकर प्रसन्नता हुई कि संस्कृत प्रचार परिषद् राजस्थान की ओर से दानवीर स्व० श्री युगलकिशोर जी बिरला की स्मृति में उनकी दूसरी पुण्य-तिथि के अवसर पर एक स्मारिका प्रकाशित की जा रही है।

स्व० श्री युगलकिशोर जी बिरला धार्मिक प्रवृत्ति के समाजसेवी व्यक्ति थे। गरीब तथा असहाय लोगों की आर्थिक मदद के लिए वे अपने जीवन में सदैव तत्पर रहते थे। अनेक धार्मिक संस्थाओं के वे आजीवन संरक्षक रहे। ऐसे दानवीर मनस्वी की पुण्यतिथि मनाने का सही तरीका यही है कि हम भी सेवा-भावी तथा उदारमना बनने का प्रयत्न करें।

विनीत,

दामोदर व्यास

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हीरालाल देवपुरा,
राज्यमन्त्री, जन सम्पर्क, पर्यटन एवं गृह

जयपुर
राजस्थान

संख्या २७०/निस/रामे/गृह/६६

दिनाङ्क १४ मई, १९६९

प्रिय सम्पादकजी,

प्रसन्नता का विषय है कि संस्कृत प्रचार परिषद् स्वर्गीय श्रीजुगलकिशोरजी बिड़ला की स्मृति में एक स्मारिका प्रकाशित कर रही है। मैं स्मारिका की सफलता की कामना करता हूं।

विनीत,

हीरालाल देवपुरा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीयुगलकिशोरबिडला-स्मारिकायाः

विषय-सूची

क्र० सं०	लेखाः	लेखकाः	पृष्ठसंख्या
	सन्देशाः		क-ख
१.	मङ्गलम्	श्रीहरिशास्त्री, सम्पादकः	१
२.	धर्मात्मा युगलकिशोरः	श्रीकन्हैयालालमुन्शी, बम्बई	२
३.	सुगृहीतनामधेयः	श्रीहरिबक्षजोशी, कलकत्ता	५
४.	पुण्यस्मृतिः	श्रीभाईशङ्करपुरोहितः	७
५.	आर्यसंस्कृतेरुन्नायकः	श्रीबलदेव उपाध्यायः	८
६.	तस्याक्षयिणी	श्रीरघुनाथसिंहः	११
७.	आध्यात्मिकजीवनस्य महान् पथप्रदर्शकः	श्रीनित्यानन्दः	१४
८.	आधिभौतिकताया आध्यात्मिकतायाश्च धनी	श्रेष्ठी श्रीगोविन्ददासः	१६
९.	निर्वैरः सर्वभूतेषु	श्रीभगीरथः कानोडिया	१९
१०.	विरलामहोदयस्यात्मगोपनप्रवृत्तिः	श्रीअचलानन्दः	२१
११.	महामनामालवीयो युगलकिशोरविरला०	श्रीपद्मकान्तमालवीयः	२५
१२.	विष्णुसायुज्यं प्राप्तः श्रीविरलामहोदयः	श्रीहरिदत्तशास्त्री	२९
१३.	पद्मपत्रमिवाम्भसा	श्रीप्रकाशवीरशास्त्री	३१
१४.	हिन्दुसमाजस्य भविष्य-निर्माता	श्रीहरिदयालुदेवगुप्तः	३३
१५.	वाराणस्यै विरलामहोदयस्य दानम्	श्रीकन्हैयालालमिश्रः	३५
१६.	प्रेरणाप्रदं व्यक्तित्वम्	श्रीराधाकृष्णः कनोडिया	४१
१७.	गुण-स्मरणम्	श्रीहरिभाऊ-उपाध्यायः	४३
१८.	ऋषिकल्प आर्यपुत्रः	श्रीदीनदयालुरुपाध्यायः	४५
१९.	भक्तिनम्रं हृदयं प्रति	श्रीगोपीनाथकविराजः	४७
२०.	उदारं चरितमुदात्तं व्यक्तित्वं च	भिक्षु-श्रीचमनलालः	४८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्र० सं०	लेखाः	लेखका०	पृष्ठसंख्या
२१.	पुरुषपुङ्गवः	श्रीप्रभुदत्तब्रह्मचारी	४६
२२.	श्रीयुगलकिशोरः स्मर्यते	दीनानाथत्रिवेदी मधुपः, जयपुरम्	५२
२३.	पुण्यश्लोको भ्रातृवर्यः	श्रीहनुमानप्रसादपोद्दारः	५३
२४.	महान् पुमान्	श्रीदीनानाथत्रिवेदी मधुपः	५५
२५.	हिन्दु-जीवन-यज्ञस्याध्वर्युः	श्रीश्रीप्रकाशः	५६
२६.	वन्दे त्वां महापुरुष !	श्रीअटलबिहारी वाजपेयी	५८
२७.	आदानं हि विसर्गाय	श्रीसीतारामः सेकसरिया	५६
२८.	सुकृती: सुजनः	श्रीजयदयालुडालमिया	६१
२६.	कानिचित् पुण्यानि संस्मरणानि	श्रीवियोगी हरिः	६२
३०.	नम्यताम्	मधुपः	६४
३१.	प्रेरणाप्रदं तपस्वि-जीवनम्	श्रीगजाधरसोमानी	६५
३२.	प्रेरणायाः स्रोतोवाही	श्रीप्रभुदयालुः	६७
३३.	वर्तमानयुगस्य भामाशाहः	श्रीघनश्यामसिंहगुप्तः	६६
३४.	भवन्तु बहवो भुवि	दीनानाथत्रिवेदी मधुपः	७०
३५.	नित्यं स्तुत्यश्च विद्यते	मधुपः, सहसम्पादकः	७४
३६.	सम्पादकीयम्	श्रीहरिशास्त्री, सम्पादकः	७७
३७.	किञ्चिन्निवेदनम्	गिरिराजशर्मा शास्त्री	७६
३८.	माधवाचार्यवर्यमहाभागानाम् प्रवचनं	अनु० गणेशरामशर्मा झालावाडः	८१
३६.	लघुकथा	श्रीगिरिराजशर्मा शास्त्री, जयपुरम्	८५
४०.	सूक्तिसुधा	आशुकवि-श्रीहरिशास्त्री, सम्पादकः	८७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्देशाः

शास्त्राणामेकमात्रनिष्कर्षस्य—'आत्मा वै जायते पुत्रः' इत्यस्यानुसारं राजाबलदेवदासविरलामहोदये दिवं गते सति, तस्य ज्येष्ठः श्रेष्ठश्चात्मजः श्री युगलकिशोर विरलामहाशयः स्ववंशपरम्परानुसारं पितृदायभागं समुवाह। तस्य दान-शीलता, निष्काम-कर्मशीलता, सदाचार—गरिमा, विवेकशीलता, निरभिमानिता तथा च जितेन्द्रियतेत्यादयो गुणाः खल्वद्वितीया आसन्। स हि राष्ट्रस्य, धर्मस्य समाजस्य च कवचरूपो बभूव। तस्य गोलोकं प्रति प्रस्थानात् काश्या विद्वत्समाजोऽनाथ इव ज्ञायते। गोलोकवासिनो धर्मप्राणस्य विरलामहोदयस्य प्रथमायां वार्षिक्यां पुण्यतिथौ श्रीकाशी विद्वत्परिषत् स्वकीयं श्रद्धाञ्जलिं समर्पयति।

—राजनारायणशास्त्री
मन्त्री, काशी—विद्वत्परिषद्, वाराणसी

•

स्वर्गीयः श्रीयुगलकिशोरमहोदयो युगपुरुषो महात्मासीत्। हिन्दुत्वाय नवजीवनं प्रदातुं स जनिं लेभे, तथा तत्कार्यं परिपूर्णम् विधाय स लोकान्तरं जगाम। तस्य कीर्तिस्तावदजराऽमरा च शश्वत् स्थास्यति।

—छोटेलालः कानोडिया,
कालिकता

•

श्रीविरलामहोयस्य जीवनमादर्शमयमभूद्—यस्यानुसरणं वयं सर्वे विदध्याम।

—रामकुमारो भुवालका
कालिकता

•

स्वर्गीयस्य श्रीयुगलकिशोरविरलामहाशयस्य हिन्दुत्वं प्रति यो हि गम्भीरो व्यापकश्चानुरागोऽभूत्तत्कृते मम मनसि सदैवादरोऽभूत्। सोऽनुरागेणानेन प्रेरितः सन् या अनेकाः संस्थाः प्रोद्घाटितवांस्तथा चानेकासां संस्थानामनेकासां व्यक्तीनां च साहाय्यं चक्रे, तदेव तस्य जीवन्ति जाग्रन्ति च संस्मरणानि वर्तन्ते।

—स्व० सम्पूर्णानन्दः
भूतपूर्वो राज्यपालो, राजस्थानराज्यम्, वाराणसी

•

श्रीयुगलकिशोरमहाशयो नेदानीं जीवन्नास्ते। सामाजिकेषु कार्य—कलापेषु तस्य सम्मतीनामधुनाऽनुपलब्धेः कश्चनावरोध उत्पद्यते। तस्य सम्मतिस्तस्य सहयोग स्तस्य विश्वासश्चाधुना कस्मादुपलभ्येरन्! धनवन्तो जनास्तु बहवो हि विद्यन्ते, परन्तु भारतदेशस्यास्य हितचिन्तनं कुर्वाणस्तदर्थमेव जीवन्निदानीं को नु खलु दृश्यते। अहं तु तानि दिनानि संस्मरामि, यदाहं किमपि कार्यमादाय विरलामहोदयस्य समीपमगच्छम्। स तदा कियत्स्नेहनिर्भरं मिलति स्म, कियदधिकं सम्मानं प्रयच्छति स्म, तथा च देशस्य, समाजस्य च गतिविधीनां ज्ञानं प्राप्य परामर्शान् सम्मतीश्च प्रददातिस्म। यस्मै प्रयोजनाय सः प्रार्थ्यते स्म, स तत् तत्कालमेव परिपूरयतिस्म। नायमनुभवः केवलं मामकीन एवापितु भारतदेशस्यास्यानेकेषां कार्यकर्तॄणामपि चास्ते।

श्रेष्ठिवर्यस्यास्य हिन्दुधर्मे किलास्था तथा भगवद्भक्तान् प्रति तस्य श्रद्धाभावस्तु सर्वविदितोऽस्ति। गुणिजनेभ्यो, विद्वद्भ्यः, साधु महात्मभ्यः समाजसेवकेभ्यो, धर्म—प्रचारकेभ्य स्तथा च कलाकारेभ्यस्तस्माद्धि प्रोत्साहनं सम्मानश्च समुपालभ्येताम्, तावभूतपूर्वावास्ताम्।

प्रभो! त्वमस्मभ्यं शक्तिं प्रयच्छ यद्वयं तस्य पदचिह्नान्यनसतुं पारयेमहि। अस्मिन्नेव हिन्दुसमाजस्य कल्याणमन्तर्निहितमस्ति।

—हंसराजो गुप्तः
महापौरो, देहली—नगर—निगमः

•

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्भवतो भारतदेशस्यास्य जनसाधारणः स्वर्गीयं युगलकिशोरमहाशयमेकस्य धनिकस्य परिवारस्य व्यक्तिरूपमेव जानाति। तमेकं महान्तं वदान्यं, धार्मिकप्रवृत्तिमन्तं तथा सर्वेषामेव धर्माणां सम्माना-दरकर्तारं व्यक्तिविशेषरूपमतीवाल्पसंख्यका लोका जानन्तः स्युः किन्तु भारतभूभागाद्बहि र्जापानदेशस्य तथा पौरस्त्यगोलार्द्धस्यान्येषां बौद्धधर्मानुयायिनां देशानां जनतास्तमेकं महान्तं भारतीयात्मस्वरूपं जानन्ति—सर्वेषामेवधर्माणां तीर्थस्थानेभ्यो देवालय-मन्दिर-मठादिभ्यश्च दानानुदानानि प्रदत्तवान्। सोऽयमेव हि विचारः पाश्चात्यदेशानामपि च तद्वि-षयेऽवर्तत। विश्वस्यास्य सर्वेषामेव देशानां धार्मिका नेतारस्तं सम्मेनिरे। स किल कलियुगीनः कर्ण इवा-सीत्। तत्सकाशान्न कोऽपि च याचको रिक्तहस्तोऽप-जगाम इयमेव हि तस्य सर्वतो महती विशेषताऽभूत। तस्य पुण्यतिथिप्रसङ्गेऽहं स्वश्रद्धाञ्जलिं समर्पयामि।

—सत्यनारायणसिंहः
केन्द्रियो मन्त्री, भारत-सर्वकारो, नवदेहली

●

स्वर्गीयो विरलामहोदयः समस्तं हिन्दु-समाजं सुसंघटितं कर्तुं तथा सिक्ख-जैन-बौद्ध-सनातनधर्मा-दीनां सर्वानपि च सम्प्रदायानेकतासूत्र आबद्धुं जीवनपर्यन्तं प्रयासांश्चक्रे।

—विजयकुमारोमलहोत्रा
मुख्यः कार्यकारीपार्षदो, देहली-नगर-निगमः

●

श्रद्धेयो युगलकिशोरबिरलामहोदयोऽस्माकं देशस्य महाविभूतिष्वासीत्। स खल्वतिशयेन नम्रो, व्यवहारकुशलः, प्रगतिशीलो विचारकस्तथा च मान-वोचितैः सर्वैर्गुणैः सम्पन्नो व्यक्तिविशेषोऽभूत्। तस्यार्जवं, सारल्यं च श्रद्धास्पदमास्ताम्। तस्य प्रथमायां पुण्यतिथावहमात्मनो हार्दं श्रद्धाञ्जलि-मर्पयामि।

—सीतारामो जयपुरीयः
संसत्सदस्यः स्वदेशी हाउस, कानपुर

●

भव्ये प्रासादे खल्वेकस्य साधोरिव जीवनं व्यतियन् भ्रातृवर्यः श्रीयुगलकिशोरमहोदयः स्वभ्रातॄणां जीवन-क्रमात् पृथग्भूतमेकं साधारणमिव हैन्दवं, सनातनं च जीवनं व्यतियन् बभूव।

स हि स्वजीवनस्य प्रत्येकं क्षणं हिन्दुत्वस्य कल्याणायोपयुयोज—वास्तवेऽर्थे स एष भ्रातृवर्य एको महान् धर्मात्माभूत्। एवंविधं महान्तमेकं क्रियाशीलं, कर्मठं सहृदयं च धर्मात्मानं प्रति वय-मात्मनः श्रद्धाञ्जलिं समर्पयामः।

—पदमपत सिंहानिया
कमला टावर, कानपुर

●

स्वर्गीयं श्रीमन्तं श्रेष्ठिवर्यं युगलकिशोरबिरला-महाशयं प्रति श्रद्धामभिव्यङ्क्तुं दृशा तत्स्मृतिसन्दर्भ-ग्रन्थस्य प्रकाशनं नामात्यन्तमौचित्यपूर्णमास्ते। ग्रन्थेऽस्मिन् पाठका नन्वेतादृशीं सामग्रीमुपलभेरन्, यया तस्य महतो व्यक्तित्वस्य सत्रैं यथार्थः परिचयः प्राप्येत तं प्रति विनम्रसमादरस्य भावो जाग्रत्स्यात्तथा धनवतां धन-वियोगस्य सम्बन्धे स्वकर्तव्य-बोधोभूत्वा तेषामाचरणे समुचिता श्रेष्ठता प्रकटिता भवेत्।

राष्ट्रिय-स्वयंसेवक-सङ्घे तस्य निःसीम प्रेमाभूत्। तत्मृतौ त इमे केचन शब्दा लिखिताः सन्ति। तदेत-ज्जानानोऽपि यत्तस्य महत्तां जानतो ममैते 'शब्दा अतितुच्छा वर्तन्ते, तस्य निष्कपटं स्नेहं प्रति कृतज्ञता व्यक्तीकरणदृष्ट्या तमिममुपहारं समर्पयामि। 'पत्रं पुष्पं फलं तोयम्' इतिरूपं तदिदं मन्यमान इदमेव भवन्तं प्रार्थयमानोऽस्मि। स्वर्गतं श्रीमन्तं श्रेष्ठिवर्यं युगलकिशोरबिरलामहाशयं प्रति श्रद्धा-भिव्यक्तेरवसरं भवन्तः प्रायच्छंस्तदर्थं भवद्भ्यः कृतज्ञतापूर्वकं धन्यवादं ददामि। इतिशम्।

—मा. स. गोलवलकरः
सरसंङ्घ सञ्चालकः रा. स्व. से. सङ्घः, नागपुरम्

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः
आशुकवि-कविभूषण-
श्रीहरिशास्त्री
•
सहसम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
साहित्यालङ्कारः

भारती

प्रबन्धसम्पादकः
सहसम्पादकश्च
गिरिराजशर्मा
•
भारती-भवनम्,
गोपालजी का रास्ता,
जयपुरम्

लेखैरुपष्टुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

वर्षम् १९ | वैशाखः, विक्रमाब्दः २०२६ (मई, १९६९) | अङ्कः ७

मङ्गलम्

आशुकवि–श्रीहरिशास्त्री, सम्पादकः

तापत्रयं हृदयजाड्यतमश्च सर्वं
विद्रावयत्यरमरं निजसेवकानाम् ।
मूकानपि द्रुतकवीन्प्रकरोति या, सा
ताराम्बिका वितनुतां मम सुप्रभातम् ॥१॥

मासावतरणम्

तापं सूर्यकरेषु वर्द्धयति यः सख्यं नृणां वारिभिः ।
कान्तासु प्रबलं रयं मदनजं हारेष्वलं हारिताम् ।
वैमुख्यं प्रति दीपतामपि च प्रायः करोत्येव भोः
वैशाखः समुपागतः सहृदयैरासेवितुं चन्द्रिकाम् ॥१॥

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्मात्मा जुगलकिशोरः

कन्हैयालाल मुन्शी, कुलपतिः भा० वि० भवन, बंबई

१९६७ ख्रिस्ताब्दस्य जूनमासे २३ दिनाङ्के **श्री जुगलकिशोर** श्रेष्ठिनां भौतिको देहऽस्तमयात्। बिरलाभ्रातृषु ते ज्येष्ठा आसन्। परिवारे सुहृत्सु च ते 'भाईजी' इति नाम्ना प्रथिता अभूवन्। ८५ वर्षात्मके वयसि ते दिवं प्रस्थिताः।

सर्वतः प्रथममहं १९४२ ख्रिस्ताब्दे तेषां परिचितोऽभवम्। ततः परं आ आत्मनिवासलाभं तेषां प्रासाद एवाहं देहल्यामवसम्। तेषां हार्दमातिथ्यं सुखं स्मर्यते।

बिरलागृहं भव्यः प्रासादः। तत्प्रसाधनं परमां सुषमामावहति। अद्यतनेऽपि तस्मिन्न निरर्थको विलासः संलक्ष्यते।

बिरलाप्रासादेन तन्निर्माणकालादेवार्वाचीनभारतस्य निर्मातॄणामातिथ्यगृहायितम्। तत्रातिथ्यसुखमनुभजत्सु **लाला लाजपतरायः, मालवीयः, महात्मा गांधी, सरदारः, गोविंदवल्लभ पंत** श्चान्यतमा अभूवन्। वस्तुतः आस्वातंत्र्यलाभं स्वातंत्र्यनेतारः बिरलाप्रासादे संभूय महत्त्वपूर्णान्निर्णयांश्चक्रुः।

अथापि, प्रासादे तस्मिन्नेकः प्रकोष्ठोऽनितरसाधारण आसीत् तत्र न प्रसाधनोपकरणानि, नापि विभवदर्शकानि साधनान्यासन्। प्रवृत्तिकलकलायिते बिरलागृहे न कोऽपि खंडस्यास्याकृत्रिमतां तन्निवासिन एकान्तप्रियतां वा भङ्क्तुमुत्सहते स्म।

प्रकोष्ठे तस्मिन् न्यवसन् 'भाईजी' महोदयाः। अन्ये बिरलाभ्रातरोऽर्वाचीनेन पथाऽवर्तन्त। किन्तु 'भाईजी' स्वीयामेव जीवनधोरणीं पर्यपालयन्। सदा ते शिरत्रमवहन्। भोजनकालेऽपि न तदपाकुर्वन्। मरुभूमिपरिपाट्या तेषामधरीयं वस्त्रं किञ्चिदेव जानुतो निम्नमभूत्। तेषां चक्षुषी दीप्तिमातनुताम्। विनोदवृत्तिरपि तदा तदा पदमकरोत् तेषु। अल्पभाषिणस्ते जीवनादर्शप्रकाशकान्येव वचांसि अब्रुवन्। हिन्दुषु भक्तेः नवजागर्तेश्चोज्जीवनमेव तेषां जीवनोद्देशः।

१९२९ ख्रिस्ताब्दे तेषां पत्नी दिवं प्रस्थिता। अपुत्रा अपीमे न पुनः पाणिग्रहणमरोचयन्त। ग्रीकपुराणपुरुष 'एटलास' इवेमे हिन्दूसमाजस्य भारमवहन् किन्तु न तेभ्यःप्रवृत्तिप्रकत्थनमरोचत। आत्मकृतीनां प्रशसनं नाकामयन्त।

तेषां जीवनं सरलं पवित्रञ्चासीत्। ध्येयतत्परास्ते। बुद्धिमतां वरिष्ठ उद्योगपतिरयमिति न द्रष्टॄणां प्रतीतिक्षममासीत्।

तारुण्य एव ते वाणिज्यकर्मणि प्रविष्टाः। तदा तेषां पितृपादाः सर्वं कार्यजातमवालोकयन्। न च तदा तेषां व्यापारः अद्येव वृद्धिंगतोऽभूत्। अष्टादशवर्षस्का इमे कालिकतां गत्वा तत्र वर्षद्वय एव विवर्धिष्णुं व्यापारकार्यालयमारभन्त। ते स्फूर्तिमन्तः प्रज्ञावन्तः सत्यवन्तश्च स्वीयामद्भुतां मेधां जीवनादर्शैरयोजयन्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलकत्तायां व्यापारारम्भसमये तैराङ्गलैः स्पर्धा कर्तव्याऽभवत् । तदात्वे भारतीयो वस्त्रव्यवसायः मांचेष्टरीयैः स्वायत्तीकृत आसीत् । 'भाईजी' एशियादेशीयैः संमिल्य जापानवस्त्रोत्पादकैः सह वाणिज्यसंबंधानकल्पयन् ।

चीनदेशस्तदा रहस्यमय आसीत् । अद्यापि सः प्रकारान्तरेण तथैवास्ते । श्रेष्ठिनस्तत्रदेशे प्रतिनिधिद्वयं संप्रेष्य वाणिज्यमारभन्त ।

तेषु दिनेषु तैलधान्यानां विदेशेषु विक्रये 'आर्जेन्टिना' देशः परमां स्पर्धामातनोत् । अथापि 'भाईजी' विदेशेषु इदंप्रथमतया तैलधान्यानि प्रैषयन् ।

तैः कियद्धनमर्जितमिति नाहं जाने किन्तु ते कियद्द्रव्यं धर्मस्य मानवानां च श्रेयसेऽयुञ्जन्निति किञ्चिदिव जानामि । तद्धनं कोटिभिरेव संख्यातव्यं भवति ।

श्रीजुगलकिशोरश्रेष्ठिनो रूढिबद्धा अपि अस्पृश्यतां हिन्दूसमाजघातिनीममानुषीं चामंसत । गांधीमहात्मनोऽपि पूर्वं श्रेष्ठिभिरस्पृश्यतानिवारणाय प्रायत्यत । तदङ्गत्वेन तैः हरिजनेभ्यः शाला मंदिराणि कूपाश्च निरमीयन्त ।

तैः बिरलाजनकल्याणरिक्थं' अस्थाप्यत । रिक्थमिदं जीर्णान् देवालयान् नवीकर्तुं साह्यमकरोत् । तैः 'आर्यधर्मसेवासंघ' संस्थाप्य तद्द्वारा धर्मोपदेशका विदेशेषु प्रेषिताः येन तत्र वसन्तो हिन्दवो धर्मचेतनामनुभवेयुः ।

तैर्निर्मितानां पुनर्नवीकृतानां च देवालयानां संख्याऽसंख्या विद्यते । अथापि एतानि सर्वथा प्रसिद्धानि भवन्ति—१. देहलीस्थं लक्ष्मीनारायणमंदिरम्, २. मथुरायां श्रीकृष्णमंदिरम्, ३. वाराणस्यां काशीविश्वनाथमंदिरम्, ४. देहल्यां मुबय्यां च बुद्धमंदिरे, ५. पिलान्यां सरस्वतीमंदिरम्, ६. कुरुक्षेत्रे गीतामंदिरम्, ७. हरद्वारे वेदमंदिरम्, ८. कल्याणे विठोबामंदिरम्, ९. भोपाले लक्ष्मीनारायणमंदिरम्,

१०. ब्रजराजनगरे शिवमंदिरञ्चेति द्वित्रिशताब्देषु भाईजीसदृशी मंदिरनिर्माणे सर्वतोमुखं त्यागं कर्त्री एकैव व्यक्तिः स्मर्यते सा च महाराज्ञी **अहल्याबाई** । सा किल अष्टादशख्रिस्तशताब्द्यां नैकानि जीर्णानि मंदिराणि नवीनीकृतवती ।

एतैर्निर्मितानि मंदिराणि विशिष्टां सुयोजनामादधति । एतेषां रचना सुसंपादिता वर्तते । स्वच्छता व्यवस्थाचादर्शभूते भवतः ।

नवदेहल्यामेतदीयं लक्ष्मीनारायणमंदिरं विशिष्टं भवति । तत्रोपवनं धर्मशाला च वर्तेते । बालगोपालकृष्णस्थाने चक्रधरस्य श्रीकृष्णस्य विग्रहोऽत्र विराजते । न कुत्रापि भारते तादृशो विग्रहो दृष्टचरः ।

मंदिराणां विचारकाले प्रसंगमेकं स्मरामि । देहलीमंदिरे कानिचनैतिहासिकानि दृश्यानि आलेखितानि वर्तन्ते । तेष्वेकत्र रक्तदुर्गस्य (लालकिला) स्वायत्तीकरणवेलायां विजयित्वेन प्रविशन् 'जाटः' आलिखितो विद्यते । एतद् दृष्टवा असांप्रदायिकताभक्तेन केनचित् गांधीमहात्मभ्यः तद्दूरीकरणाय न्यवेदि । किन्तु महात्मनोत्तरितं यत् 'जुगलकिशोरस्यात्मप्रेरणां नाहं प्रतिरोद्धुमुत्सहे' इति । महात्मभिश्च पत्रस्य तस्य प्रतिलिपिः श्रेष्ठिभ्योऽपि प्रेषिताऽभवत् ।

श्रेष्ठिनः पुण्यश्लोकानां मदनमोहनमालवीयानां परमसुहृदोऽभूवन् । अत एव तेषां वचसा श्रेष्ठिभिः हिन्दूमहासभाप्रवृत्तिभ्यो भूरि धनं व्ययितमासीत् । नवदेहलीस्थं सभाभवनं तेषामौदार्येणैवात्मानमलभत । पंजाबे जातीयकलहेन विपन्नेभ्यो हिन्दूभ्यः साह्यमाचरितुं श्रेष्ठिभिर्गोस्वामिगणेशदत्तेभ्यः प्रभूतं द्रव्यं समर्प्यत ।

एते खलु हिन्दूशब्दस्य व्यापिनीं व्याख्यामकुर्वन् । जापानस्थैः सख्यमापाद्य नैकेषां बौद्धग्रंथानामेतैः जापानभाषायामनुवादाः संपा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिताः। जापानस्य भारतीयानां च बौद्धसाधूनां परस्परं संपर्कोऽपि संसाधितः।

बेंगकोकवासिस्वामिसत्यानंदसाह्येन थाईलेंडस्य भारतस्य च धर्मसंबंधः संपादितः। हिंदूग्रंथानां थाईभाषायां, थाईग्रंथानामाङ्ग्लभाषायां चानुवादः कारितः थाईलेंडछात्राणाञ्च भारतमागत्याध्ययनाय सौविध्वं समपाद्यत।

श्रेष्ठिन इमे चीन-जापान-कांबोज-भारतानां मिथः सौहार्दमभिवर्धयितुमुद्यमम् आस्थिषत। विदेशेभ्योऽत्रागच्छतां बौद्धानां कृते च धर्मशालानां निर्माणमकुर्वन्। अमर्यादं तेषामौदार्यम्। न कोऽप्यभ्यागतस्तदङ्गनान्निराशं निवृत्तः। दिवंगतायाः पत्न्याः स्मृतावेतैः कलकत्तायां गृहविज्ञानविद्यालयः मारवाडीसहायकसंघश्च स्थापितौ। कविवरस्य **ठाकुरस्य** जापानयात्रार्थं द्रव्यव्यवस्थाप्येतैरकारि।

अथापि एतासां पुण्यप्रवृत्तीनां न तैः सघोषं ख्यापनं कृतम्, न कदापि स्वौदार्यदर्पोऽनुभूतः। न कस्मादपि कर्मणो यशोलिप्सा तानचोदयत्। सदैव ते पृष्ठस्थितिमरोचयन्त। हिन्दूधर्मस्य पुनः-स्फ़ूर्तिरेव तेषां परमं साध्यमभूत्। न च साध्यादस्मात्ते कदापि विचलिता अभूवन्।

अहं हिन्दूरितिविषये न कदापि ने लज्जामन्वभवन्। हिंदूधर्मे परमामास्थां वहन्त इमे पुनरपि धर्मोऽयं पुरेव चेतनापूर्णः शक्तिमांश्च भविष्यतीति ते दृढं श्रद्धावन्त आसन्।

यदि नाम लक्ष्यपरायणता, निःस्वार्थसेवा, आयोजनानामनुष्ठानप्राप्तिक्षमता—एते गुणा महत्त्वलक्षणं भवन्ति तर्हि 'भाईजी' सुनिश्चितं महान्त एवासन्।

जीवने प्रतिक्षणमेते हिन्दूधर्ममद्यतनं प्राणवन्तं च धम कर्तुमयतन्त।

वस्तुतस्ते कर्मभिः धर्मात्मान अभूवन्।

भारतवर्षवर्णनम्

अग्निरुवाच।

उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्। वर्षं तद् भारतं नाम नवसाहस्रविस्तृतम् ॥१॥
कर्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम्। महेन्द्रो मलयः सह्यः शुक्तिमान् हेमपर्वतः ॥२॥
विन्ध्यश्च पारियात्रश्च सप्तात्र कुलपर्वताः। इन्द्रद्वीपः कसेरुश्च ताम्रवर्णो गभस्तिमान् ॥३॥
नागद्वीपस्तथा सौम्यो गान्धर्वस्त्वथ वारुणः। अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः ॥४॥
योजनानां सहस्राणि द्वीपोऽयं दक्षिणोत्तरात्। नव भेदा भारतस्य मध्यभेदेऽथ पूर्वतः ॥५॥
किराता यवनाश्चापि ब्राह्मणाद्याश्च मध्यतः। वेदस्मृतिमुखा नद्यः पारियात्रोद्भवास्तथा ॥६॥
विन्ध्याच्च नर्मदाद्याः स्युः सह्यात्तापीपयोष्णिका।
गोदावरीभीमरथीकृष्णावेण्यादिकास्तथा ॥ ७ ॥

मलयात्कृतमालाद्यास्त्रिसामाद्यामहेन्द्रजाः। कुमाराद्याः शुक्तिमतोहिमाद्रेश्चन्द्रभागका
पश्चिमे कुरुपाञ्चालमध्यदेशादयः स्थिताः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुगृहीतनामधेयः

श्री युगलकिशोरजी बिडला

प्राणाचार्यः कविराज श्रीहरिबक्षजोशी, काव्यसांख्यस्मृतितीर्थः, कलकत्ता

मर्त्यधर्मिणि मनुष्यलोके को वा गृहीतजन्मा परलोकं न यातः। ध्रुवोऽयं नियमः जातस्य हि ध्रुवो मृत्युः, तथापि कदाचित् सौभाग्यवशात् जगतोऽथवा परमकारुणिकस्य भगवतोऽहैतुक्या कृपया जगतः कल्याणाय केचन महापुरुषा गृहीतजनुषो लोकोपकारायैवावतरन्ति, यावज्जीवं लोकसेवापरायणाः सर्वभूतहितेरता एवंभूताः सत्पुरुषाः सफलतनुभृतोऽभिगण्यन्ते। श्रीयुगलकिशोरविरलामहोदयोऽपि तेष्वन्यतमः। वैश्यकुले समुत्पन्नोऽपि राजन्योपाधिधारिणः श्रीबलदेवदासमहाभागस्य न केवलं जन्मना ज्येष्ठः सुतः अपितु गुणैरपि ज्येष्ठ आसीत्। वित्तवन्तो हि पुरुषाः प्रायो भोगैकव्रताः भवन्ति, परन्तु योगभ्रष्टाः पुरुषाः शुचीनां श्रीमतां गेहे जाता अपि पूर्वाभ्यासेन ह्रियमाणायोगेष्वेव प्रवर्तन्ते न भोगेषु, अस्य महाभागस्य धर्मपत्नी युवावस्थायामेव स्वर्गं गता स्वीयैर्बहुधाऽभ्यर्थमानोऽपि न द्वितीयोद्वाहं स्वीकृतवान्। चितामारुरुक्षवोऽपि धनिनः काञ्चित् षोडशीं पाणिगृहीतीं कृत्वैवारोहन्ति, परन्तु अय महाभागः पत्नीवियोगानन्तरे धृतब्रह्मचर्य्यव्रतो गुरुदत्तमन्त्रैकजपपरो लोकसेवायां धर्मसेवायामेव सर्वदा धर्मरक्षणे जागरूको धनञ्च धर्मैकफलमुपार्जयन् निखिलमेव जीवनं धनञ्च हिन्दुसंस्कृतिरक्षायै समर्पयाञ्चकार। कलकत्तामहानगर्यामेकदा हिन्दुमहासभाया अधिवेशनमभूत् स्वर्गीय सावरकरमहोदयस्य सभापतित्वे तस्मिन् काले मालवीयमुञ्जेस्वामिश्रद्धानन्दप्रभृतयः सर्वे हिन्दुनेतारः समागताः महामना मालवीयः स्वीयभाषणमध्ये युगलकिशोरस्य हिन्दुधर्मसेवां वर्णयन्नवोचत्—यदेक एव युगलकिशोरो भारतवर्षे समुत्पन्नो यदि चतसृषु दिक्षु चत्वारो युगलकिशोराः समुत्पन्ना अभविष्यन् तदा हिन्दुसंस्कृतिः स्वरक्षायै सहायान्तरापेक्षिणी नाभविष्यत्। अयं महाभागः स्वयं यदुपार्जयत्तत्सर्वं परोपकारायैव नात्मभोगार्थं, महामनसा मदनमोहनमालवीयेन वाराणस्यां हिन्दुविश्वविद्यालये श्रीविश्वनाथमन्दिरस्य निर्माणार्थं स्वीयान्तिमेच्छाऽस्य महाभागस्य पुरः प्रकटिता किञ्चिद् द्रव्यमपि स्वजीवनकाले मन्दिरनिर्माणार्थं संगृहीतं तत् प्रदायैनमवोचत् एतन्निर्माणस्य सर्वोभारस्त्वया वोढव्यः, प्रचुरतरं द्रव्यं व्ययीकृत्य निर्मितं तन्मन्दिरं द्वयोरेव महानुभावयोः कीर्तिं गायद्गगनचुम्बिना स्वशिखरेण स्वर्गीयान् देवगणानपि प्रमोदयति, उत्तराखण्डे उपह्वरे गिरीणां सङ्गमे नदीनां ये तपस्विन एकान्ते तपस्तपन्ति तेषां कृते भोजनाच्छादनयोः प्रबन्ध एतेन महानुभावेन कृत इति तद्देशयात्रायामस्माभिः सम्यग्ज्ञातम्। मथुरायां यवनैराक्रान्तां श्रीकृष्णजन्मभूमिं महता प्रयासेनाच्छिद्य तत्र श्रीकृष्णमन्दिरं भागवतमन्दिरञ्च निर्मितं भवत्यधुनापि तस्य विशालमन्दिरस्य कार्यं सञ्चलति तस्मिन् स्वयं तु पुष्कलं धनं दत्तवानेव परन्तु अन्येऽपि धार्मिका दानिनो जयदयालडालमियाप्रभृतयो महान्त निर्माणव्ययभारं वोढुं प्रवर्तिताः एतेनैव महानुभावेन। प्रतिदिनमयं प्रातः कृतसन्ध्यावन्दनादि नित्यक्रियः कोष्ठ्या बहिर्भागे (वरामदा) समागत्य आसन्दिकामासीनो बहुभ्यः प्रान्तेभ्यः नानाविधानां संस्थानां व्यक्तीनां समागतानि पत्राणि शृणोतिस्म, प्रायः पत्राणि तानि द्रव्ययाञ्चापराण्येवाभूवन्। तेभ्यः सर्वेभ्यः पत्र-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लेखकेभ्यो यथोचितं द्रव्यं तदुत्तरञ्च प्रतिदिनमेव प्रेषयत्—समागतेभ्यो दीनेभ्योऽपि पूर्वपरिचित-मित्रवत्सत्कारं भाषमाणो भूरिदानमदात् । मया बाल्ये कस्यचित् कवेरेकः श्लोकः पठितः ।

विरला जानन्ति गुणान्
विरलाः कुर्वन्ति निर्धने स्नेहम् ।
विरलाः परकार्यरताः
परदुःख दुःखिता विरलाः ॥१॥

मन्ये केनचिद्भविष्यवेत्ता विदुषा श्रीयुगल-विरलामहोदयमुद्दिश्यैव लिखित इव आसीत्, एतेन महाभागेन सह मदीया मैत्री नासीत्स्वार्थानुबन्धा अपि तु गुणानुबन्धा एवासीत्—गुणनिधेरस्य महाप्रयाणानन्तरं काष्ठमौनमतीव-दोषावहं "वाग्जन्मवैफल्यमसह्यशल्यं गुणाधिके वस्तुनि मौनिता चेत्, इति मनसि स्मृत्वा तस्य गुणानां किञ्चिद्दिग्दर्शनं कृतम् ।

गायत्रीनिर्वाणम्

अग्निरुवाच ।

लिङ्गमूर्त्तिं शिवं स्तुत्वा गायत्र्या योगमाप्तवान् ।
निर्वाणं परमं ब्रह्म वसिष्ठोऽन्यश्च शङ्करात् ॥ १ ॥

नमः कनकलिङ्गाय वेदलिङ्गाय वै नमः । नमः परमलिङ्गाय व्योमलिङ्गाय वै नमः ॥२॥
नमः सहस्त्रलिङ्गाय वह्निलिङ्गाय वै नमः । नमः पुराणलिङ्गाय श्रुतिलिङ्गाय वै नमः ॥३॥
नमः पाताललिङ्गाय ब्रह्मलिङ्गाय वै नमः । नमो रहस्यलिङ्गाय सप्तद्वीपोर्ध्वलिङ्गिने ॥४॥
नमः सर्वात्मलिङ्गाय सर्वलोकाङ्गलिङ्गिने । नमस्त्वव्यक्तलिङ्गाय बुद्धिलिङ्गाय वै नमः ॥५॥
नमोऽहङ्कारलिङ्गाय भूतलिङ्गाय वै नमः । नमः इन्द्रियलिङ्गाय नमस्तन्मात्रलिङ्गिने ॥६॥
नमः पुरुषलिङ्गाय भावलिङ्गाय वै नमः । नमो रजोर्द्धलिङ्गाय सत्त्वलिङ्गाय वै नमः ॥७॥
नमस्ते भवलिङ्गाय नमस्त्रैगुण्यलिङ्गिने । मनोऽनागतलिङ्गाय तेजोलिङ्गाय वै नमः ॥८॥
नमो वायूर्द्ध्वलिङ्गाय श्रुतिलिङ्गाय वै नमः ।
नमस्तेऽथर्वलिङ्गाय सामलिङ्गाय वै नमः ॥९॥
नमो यज्ञाङ्गलिङ्गाय यज्ञलिङ्गाय वै नमः । नमस्ते तत्त्वलिङ्गाय देवानुगतलिङ्गिने ॥१०॥
दिश नः परमं योगमपत्यं मत्समं तथा । ब्रह्म चैवाक्षयं देव ! शमञ्चैव परं विभो ! ॥
अक्षयन्त्वञ्च वंशस्य धर्मे च मतिमक्षयाम् ।

अग्निरुवाच ।

वसिष्ठेन स्तुतः शम्भुस्तुष्टः श्रीपर्वते पुरा । वसिष्ठाय वरं दत्त्वा तत्रैवान्तरधीयत ॥
इत्यादि महापुराणे आग्नेये गायत्रीनिर्वाणवर्णनं नाम सप्तदशाधिकद्विशततमोऽध्यायः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीजुगलकिशोरपुण्यस्मृतिः

रचयिता—श्रीभाईशंकर पुरोहितः

कर्तव्यैकरतिः, सदाहितमतिः, धर्माभिवृद्धौ धृतिः,
साधूनां चरणस्थितिः, जनमनः संशोधयित्री कृतिः ।
हिन्दूनां नवजागृतावहरहः संकल्पयत्नस्थितिः,
इत्येषा गुणसततिस्त्वहह रे ! नष्टात्वयि प्रस्थिते ॥१॥

विख्याते धनिनां तथा च गुणिनां विरलेति वंशे जनिः,
वाणिज्ये ननु धर्मसंस्कृतिविधौ निष्ठा परा यस्य वै ।
बलदेवस्य सुतः किशोरसहितं जुगलेत्यभिख्यान्वितः,
सोऽयं मन्दिरमूर्तिनिर्मितिपटुर्हा ! स्वर्गलोकं गतः ॥२॥

श्रूयते खलु लोकेऽस्मिन् बहुरत्ना वसुंधरा ।
न नूनं सर्वरत्नानि कौस्तुभानीति निश्चितम् ॥३॥

[पुण्यचरितस्य श्री जुगलकिशोर बिरलामहोदयस्य स्वःप्रयाणात् त्रयोदशाहे भारतीय विद्याभवने मुंबापुरीस्था नैके विद्वांसो वैदिकाश्च निमन्त्रिताः सत्कृताश्चाभूवन् । सविकृतिवेदध्वनिपूरिते तस्मिन् प्रसंगे पठितमासीदिदं प्रशस्तिकाव्यम्]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

* आर्यसंस्कृतेरुन्नायकः *

आचार्यः श्रीबलदेव उपाध्यायः

संस्कृतस्यैकस्मिन् प्राचीने पद्ये यस्यपदार्थ-त्रयस्योपलब्धेर्निमित्तं भगवान् प्रार्थितोऽस्ति तेषु 'वैभवं दानशक्तिश्च' इत्येतयोर्द्वयोर्महत्त्वपूर्णोऽस्त्युल्लेखः। द्वयोरनयोर्विरोध एवाधिकम् दृष्टि-गोचरो भवति। द्वयोरनयोर्मंजुल-समन्वयस्य सत्ता भगवतोऽलौकिक्या अनुकम्पाया एवामृत-फलं भवति। माननोये श्रेष्ठिवर्ये युगलकिशार-विरलामहोदये विषयेऽस्मिन् वस्तुतो भगवतो महतो खल्वनुकम्पासीत्। सोऽपारया सम्पत्त्या सहैवाद्भुताया दानशक्त्या अधिकारी समभूत्। तस्मादेव भारतीया जनता तं 'दानवोरः' इत्यु-पाधिनानेन विभूषयामास। अपारलक्ष्म्या अने-के जनाः स्वामिनः सन्ति, परन्तु तेषां हस्तेन कपर्दिकैकापि च न कदापि दाने प्रदीयते। 'लाभाल्लोभः प्रवर्तते' इत्युक्त्यनुसारं लाभा-ल्लोभ एव विवर्द्धते, न तु त्यागः। भोगोवर्द्धते, न च पात्रे दानम्। परन्तु विरलामहोदयोऽस्य विरोधाभासस्य सजीवं प्रतीकमासीत्। तस्यैकं घनिष्ठं मित्रं यथार्थमेवोक्तवान्–'श्रेष्ठिनोऽस्य वामहस्तोऽपि नाजानात् यत्तस्य दक्षिणहस्तः कदा कियद्दानं कस्मै सुपात्राय प्रदत्तवान्। सैषा दानवीरताभिधीयते !!!'

आर्य-संस्कृतेरुन्नायकस्य विरलामहोदयस्य 'हिन्दु'-शब्दतोऽधिकम् 'आर्य'-शब्दः प्रेयानासीत्तथा तन्मानसस्य पुरतः 'कृण्वन्तोविश्वमार्यम्' इत्य-स्या वैदिक्याः प्रार्थनायाः साकारं रूपं सदैव प्रेङ्खोलत् संतस्थे। स तस्य मंगल-प्रभातस्योद-यप्रतीक्षापरोभूद्, यदा समस्तस्य विश्वस्य मान-वानां कण्ठाद् 'हरे राम', 'हरे कृष्ण', 'हरे बुद्ध' इत्यस्य मनोरमा वाणी प्रस्फुटेत्। अस्यै किल भावनायै साकारं रूपं प्रदातुं सः कायेन, मनसा, धनेन च यान् श्लाघनीयानभ्युपायान् विधाय प्रादर्शयत्तेऽस्मत्कृते तथा च भविष्यन्तीनां पुरुषपरम्पराणां कृते सत्कारस्यादरस्य च पात्र-त्वमावहन्ति। विरलामहोदयोऽस्यैवोद्देश्यस्य पूर्तेः कामनयाऽस्मन्मित्रं द्राक्तरभीखनलालात्रेय-महाभाग समस्ते विश्वे-हिन्दु-संस्कृतेः सन्देशं प्रापयितुमनेकवारं यूरोपं, जापानं तथामरीकां प्रेषयामास। विषयमिमं भारतेऽपि च द्रढयितुं स बहुव्ययसाध्यानां रमणीय-मन्दिराणां तथा साकमेव धर्मशालानां निर्माणमकारयत्। स हि सम्यगजानात् यन्निराकारस्य ब्रह्मण उपासना पण्डितजनेभ्योऽपि सुलभा नास्ते, सामान्यज-नानां संकोऽचिन्तनीयो व्यापारोऽस्ति। भगवान् सर्वशक्तिमान्विद्यते। स एकस्मिन्नेव काले निराकारो-निर्गुणश्च भवितुमर्हति तथा सगुणः-साकारोऽपि च स हि योगवासिष्ठस्य तथ्येऽस्मिन् पूर्णामास्थां दधे यद्धि 'बालकानामक्षरज्ञानमा-पादयितुं यथा स्थूलस्य पाषाणस्य गोलाकाराः खण्डाः प्रदीयन्ते, तथैव शुद्धस्य, बुद्धस्य भगवतः समुपलब्धेर्निमित्त काष्ठस्य, मृदः (पार्थिव-पूजनं) तथा पाषाणनिर्मितानाम् (शालिग्रामादीनां) पूजाया उपदेशः प्रदीयते।' तथा हि—

अक्षरावगमलब्धये यथा
स्थूल-वर्तुल-दृषत्-परिग्रहः।
शुद्ध-बुद्ध-परिलब्धये तथा
दारु-मृण्मय-शिलामयार्चनम्॥

अस्यैव सिद्धान्तस्यकृते स देहल्यां लक्ष्मीना-रायणमन्दिरस्य तथा काश्यां विश्वनाथमन्दि-रस्य निर्माणमकारयत्। तानीमानि मन्दिराणि केवलसुपासनागृहाणि न सन्त्यपि तु भारतीय-संस्कृतेर्जीवन्ति, प्रभाव-प्रकाश-विकिरन्ति, पवित्राणि संस्थाकानि वर्तन्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्धृदयमतिशयमुदारमासीत् । संकीर्ण-तायाः सर्वथा निर्मुक्तं यत्समक्षमार्यधर्मस्य तद्विशालं रूप सदा सन्नद्धं सन्तिष्ठते स्म। यस्मिन् वैदिकधर्मानुयायिभिः साकमेव बुद्धस्यो-पासकानामपि च समुचितं स्थानमासीत्, 'श्रीम-द्भगवद्गीतया' 'साकं' 'धम्मपद' मपि मननी-यस्य, श्रद्धेयस्य च साहित्यस्याविभाज्यमङ्गं बभूव। स हिन्दुभिः सहैव बौद्धानामपि मंगल-साधने सर्वदा संलग्नोऽवर्तत । प्राचीने युगे वैदिका आर्याः स्वसंस्कृतेः सभ्यतायाश्च प्रचाराय नवीनानुपनिवेशान् स्थापयामासुः । उपनिवेशा-नामेतेषां स्थापनाया लक्ष्यं नवीनेषु देशेषु स्वात्मनोराज्यस्य स्थापनं नासीत्, प्रत्युतात्मनः सांस्कृतिकं विजयं प्रस्तोतुमासीत् । तेषाममीषां ब्राह्मणानामुद्योगेनाद्यतने 'बृहत्तरे भारते' (अथवा 'द्वीपान्तरे') हिन्दु-धर्मस्य, संस्कृतभाषा-यास्तथा च संस्कृतसाहित्यस्य विपुलः प्रचारो बभूव, यस्य मुद्राद्यापि च देशानामेतेषां जनजी-वने प्रचुरमात्रायामुपस्थिता वर्वर्ति । संस्कृत-वाण्यत्रत्या राष्ट्रभाषाभूत्तथात्रत्या हिन्दु-राजानः स्वशिलालेखेष्वस्या एव भाषायाः प्रयोगं कृत-वन्तः। तथ्यस्यास्य पुष्टये एको-द्वौ वा दृष्टान्तौ पर्याप्तौ स्याताम् ।

बृहत्तरभारतस्थ नानादेशेषु भगवतः शङ्क-रस्योपासनाया भूयान् प्रचारोऽभूदत्त एव हि देशानामेतेषां नृपतिभिरनेकानि शिवलिङ्गानि स्थापितानि तथा च तेषां भक्ति-भाव-पूरिताः कमनीयाः स्तुतयः शिलासूत्कीर्णा विद्यन्ते ।

शङ्करस्य स्तुतिबोधक तदेतन्मालिनीच्छन्द-स्तावत् कियत् सरलं सरसं च वर्तते:—

जयति जितमनोजो ब्रह्मविष्णवादिदेव-
प्रणतपदयुगाब्जो निष्कलोऽप्यष्टमूर्तिः ।
त्रिभुवनहितहेतुः सर्व-सङ्कल्पहारी
परपुरुष इह श्रीशानदेवोऽयमाद्यः ॥

महादेवस्य स्वरूपं वाण्या अगोचरमास्ते । अपरिमेयत्वात् सः सदैव विदुषां बुद्धिं चम-त्कुर्वाणो भवति । यथार्थरूपेण तज्ज्ञाता जनो जगति न कोऽपि च वर्तते । तथ्यस्यास्य वर्णनं कियत्या स्वच्छतया पद्येऽस्मिन् विहितमास्ते—

ऐश्वर्यातिशयप्रदो मखभुजां यस्तप्यमानस्तपः;
कन्दर्पोत्तमविग्रह-प्रदहनो हेमाद्रिजायाः पतिः ।
लोकानां परमेश्वरत्वमसम यातो नदद्वाहनो,
यायातथ्य-विशारदास्तु जगतामीशस्य नो सन्तिहि

पद्येऽस्मिन् विद्यमानस्य विरोधस्य चम-त्कारस्तु दृश्यताम् । शिवः स्वयं तु कस्मा-अप्यर्थाय तपस्तप्यति, परन्तु देवेभ्य ऐश्वर्यस्यो-त्कर्षं प्रददाति । स हि पार्वत्याः पतिर्वर्तते, परन्तु कामदेवं भस्मसाच्चक्रे ! तद्वाहनं तु वृषभोऽस्ति, परन्तु सः संसारस्य परमपदं दधाति । धन्योऽस्ति शिवः शङ्करो, यस्मिन्नेतेषां विरुद्धानां गुणानां सङ्घट्टः सदैव युगपत् सह-वर्तमानः सन्तिष्ठते । महाकविः कालिदासोऽपि च तदिदमेव तथ्यमुवाच—"न सन्ति याथाथ्य-विदः पिनाकिनः"—शिवस्य यथार्थरूपस्य गुणानां ज्ञाता कोऽपि च प्राणी जगति न वर्तते ।

बृहत्तरभारतस्य देशेष्वेषु न केवलं संस्कृत-काव्यानामेव निर्माणं विशेषरूपेण भवतिस्म, परन्तु मीमांसादीनां षण्णामपि दशनशास्त्राणाम् तथा बौद्धागमस्याध्ययनमत्र न्यूनं नासीत् । काशिकया साकं व्याकरणे निपुणतापादकानां विदुषां विशेष उल्लेखः समुपलभ्यते । अत्र त्रिविधा-आश्रमा बभूवुः-वैष्णवाश्रमो, ब्राह्म-णाश्रमस्तथा सौगताश्रमश्चेति । एषु संस्कृत-स्याध्यापनं कार्यतेस्म । तथा चैकस्य विशिष्टस्य पुस्तकालयस्य स्थापना प्रत्येकस्मिन्नाश्रमे कृतो-पलभ्यते; यत्र द्वौलेखकौ, द्वौ पुस्तक-स्थापकौ तथा षट्पत्रकारकाण्यवसन् । पत्रकारकाणां कार्यमासीन्नवीनानां ग्रन्थानां हस्तलेखसाधनम् । पुस्तक-संग्रहस्याभिधानमभूत् 'पुस्तकाश्रमो' यद्धि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अद्यत्वे प्रचलितस्य पुस्तकालयशब्दस्यापेक्षया सविशेषं सुन्दरो मनोरमश्च वर्तते। मम कथनस्य सारांशोऽयं वर्तते यन्न केवलं भारतवर्ष एव, प्रत्युत बाह्यप्रदेशेषु तथा च द्वीपेष्वपि च संस्कृत-भाषाया अध्यापनाय तथा संस्कृत-साहित्यस्य समृद्धये तत्रत्यानां शासकानामुद्योगोऽद्यापि चास्माकं श्लाघादरयोर्भाजनमास्ते। तेषाममीषां सुदूरदेशानां जनता संस्कृतमात्मनोराजभाषा-मवगच्छति स्म तथा तस्याः सम्वर्धनाय सदोद्यता संतिष्ठते स्म।

स्वर्गीयो बिरलामहोदय आर्यसंस्कृतेः सार्व-भौमेनानेन स्वरूपेण पूर्णतया परिचितो बभूव, ततोस्याः पुनरुद्धारकार्यं तस्य जीवनस्य महनीयं व्रतमभूत्। अस्य व्रतस्य परिपालने सोंऽशतः सफलो बभूव। तद्वाराऽऽरोपितं बीजमार्य-संस्थानरूपेऽद्यापि च जाग्रद्वर्तते तथा भविष्य-त्कालेऽपि तज्जागरूकं स्थास्यति। अहं व्यक्तिगत-रूपेण श्रीविरलामहोदयस्य महनीयेषु गुणेष्वार्य-धर्मस्योन्नायक-स्वरूपमधिकं महत्त्वपूर्णं मन्ये। स हि स्वरूपेऽस्मिन् यशः शरीरेणाजरामरोऽस्ति, स चास्मभ्यं सर्वेभ्यः प्रेरणां प्रदास्यन् स्थास्यति। स खलु प्रत्येकं भारतीयमार्य-लक्षण-गुणैः सम्पन्नं द्रष्टुमकामयत। स हि महाभारतोक्ते लक्षणेऽस्मिन् सदैव बलमर्पयामास यद्धि स एवार्यो भवति, योहि शांतं वैरं न कदापि जागरयति, न च गर्वायते। कथमपि पराजयं न स्वीकुरुते तथा प्राप्तायामपि च विपत्तौ कदापि-चाऽकार्यं न कुरुते—

न वैरमुद्दीपयति प्रशांतं,
न गर्वमारोहति नास्तमेति।
न दुर्गतोऽपीति करोत्यकार्यं
तमार्यशीलं मुहुराहुरार्याः॥

अहं पूर्णतया विश्वसिमि यद्वयं विरला-महोदयस्य तामिमां समुदारां भावनां चरितार्थां विधातुं पूर्णं प्रयत्नं करिष्यामह, इति। तथास्तु।

ब्रह्मज्ञानम्

अग्निरुवाच।

यज्ञैश्च देवानाप्नोति वैराजं तपसा पदम्। ब्रह्मणः कर्मसन्यासाद् वैराग्यात् प्रकृतौ लयम् ॥१॥
ज्ञानात् प्राप्नोति कैवल्यं पञ्चैता गतयः स्मृताः।
प्रीतितापविषादादेर्विनिवृत्तिर्विरक्तता ॥ २ ॥
सन्न्यासः कर्मणां त्यागः कृतानामकृतैः सह।
अव्यक्तादौ विशेषान्ते विकारोऽस्मिन् निवर्त्तते ॥ ३ ॥
चेतनाचेतनान्यत्वज्ञानेन ज्ञानमुच्यते। परमात्मा च सर्वेषामाधारः परमेश्वरः ॥ ४ ॥
विष्णुनाम्ना च देवेषु वेदान्तेषु च गीयते। यज्ञेश्वरो यज्ञपुमान् प्रवृत्तै रिज्यते ह्यसौ ॥ ५ ॥
निवृत्तैर्ज्ञानयोगेन ज्ञानमूर्तिः स चेक्ष्यते। ह्रस्वदीर्घप्लुताद्यन्तु वचस्तत्पुरुषोत्तमः ॥ ६ ॥

शेषं १३ पृष्ठे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

-* तस्याऽन्वयिणी *-

श्रीरघुनाथसिंहः

अस्मिन् भूतले प्राणिन उदयो भवति, सोऽस्तं च गच्छति। सांसारिकाणां प्राणिनां सेयमेव गतिर्वर्तते। सोऽयंक्रमः पादपानां, वनस्पतीनामृतूनां, संवत्सराणां च विद्यते। क्रमादस्माज्जडपर्वताश्चापि न स्वतन्त्रा भवन्ति। तरलः समुद्रोऽपि न स्वाधीनो भवति। स एषः क्रमो निरन्तरं प्रचलन् संतिष्ठते। कदापि न च विरमति। तस्यादेवैतज्जगदित्यभिधीयते।

केचन जन्म-मरणयोः कारणं कर्म मन्यन्ते। केचिद् वक्रतमामनन्ति। अन्ये तन् मानवस्य प्रथम पतनं मन्यन्ते। अस्मिन् क्रमे, ऋतावस्मिन्नेकमद्भुतं तथ्यमास्ते। तच्चास्ते खल्वेका समता। जरायुजाः, पिण्डजाः, अण्डजाः, उद्भिज्जादयश्च, कामं केनापि किंविधमपि जीवनमस्मिञ्जगति किं न धृतं स्यादेकसमता तेष्वविरलमुपलभ्यते। सास्ति चेतना। अस्याश्चेतनाया लोपस्यार्थोऽस्ति जडता।

तथापि सैषा चेतना, सर्वस्मिन् देहे, सर्वस्मिन् शरीरे, नन्वेकसदृशं कार्यं न करोति। शरीर-यन्त्राण्येकसदृशं न हि सञ्चालयति। पंच-ज्ञानेन्द्रियाणि, पञ्च-कर्मेन्द्रियाणि चैकसदृशं न परिचालयति। अत्र कारणं भवति प्राणिषु विषमता।

यमल-सन्ततयः किलैकसार्द्धमेकस्मिन् नक्षत्रे, काले खल्वेकस्मिञ्जनन्या गर्भाज्जनिं लभन्ते। तास्वेका महामेधाविनी, द्वितीया च मूर्खा सन्ततिर्भवति। एका महाधनवती तथा चान्या कणायापि च सतृष्णा म्रियते।

स एषः क्रमः पशुषु, पक्षिषु, पादपेष्वपि च दृश्यते। एकस्या एव कुक्कुर्याश्चत्वारः शिशवश्चतुर्विधा भिन्नवर्णा भवन्ति। चतुर्विधास्तेषां प्रकृतयो भवन्ति। कश्चिच्चपलो भवति। कश्चनालसो भवति। कश्चित् कातरो भवति। कश्चन पालितपशुरिव सरलो भवति। अथैकाकुक्कुटी चतुरोऽण्डान् सूते। कस्माच्चिदुत्पन्नोऽर्भकोब्रूते। कश्चन नैव ब्रूते। कश्चिदुत्पन्न एव तत्कालम्म्रियते। कश्चन विकलाङ्गो दुःखं भुङ्क्ते। चत्वारः पादपा एकस्मादेव बीजादुत्पन्नाश्चतुर्षु स्थानेष्वारोप्यन्ते। एको जलेन खाद्येन पोषितोऽपि शुष्यति। अन्यो-जल-खाद्य विरहितोऽपि वर्धते। तृतीयः शनैः शनैः क्षीयते। चतुर्थो गगनचुम्बी भवति।

सोऽयमेकः प्रश्नोऽस्ति। प्रश्नस्यास्योत्तरमनेकैः प्रकारैर्वैज्ञानिकाः प्रयच्छन्ति। दार्शनिकाः प्रकारैरनेकैः स्पष्टीकरणं कुर्वन्ति। प्रत्येकं प्राणी स्वरीत्या कल्पनां कुरुते। विचारं विधत्ते। स्वप्रश्नानां स्वयमुत्तरं दातुं प्रयासं करोति।

भारतीया बुद्धिरस्योत्तरं प्रदत्तवती। तच्चास्ति कर्मवादः। भारतीयान्यास्तिकानि किं वा नास्तिकानि दर्शनानि, भक्ताः किं वा योगिनः सर्वेऽपि चात्रैकस्मिस्तथ्ये सहमता वर्तन्ते। वैदिकीं मान्यतां न मन्वानो भगवान् बुद्धोऽपि च कर्मवादस्य मान्यतां मेने।

प्राणिनः कर्मानुसारं जन्म गृह्णन्ति। कर्म तेषामाचरणानां, व्यवहारस्य चैकरूपतां विधत्ते। तेषां संस्कारं निर्माति। स एषः संस्कारो मृत्योरनन्तरं प्राणिनः प्राणैः सहानुगच्छति। नानायोनिषु, नानारूपेषु च जन्म-प्रदानस्य हेतुर्भवति। तदेतत् पूर्व-संगृहीतं कर्म, तत्फलानि च केचन जना भाग्य-संज्ञयाऽथवा दैवसंज्ञयाभिदधति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घटना घटन्ते—कस्यचित्कर्मणः कारणेन। एवमेव मनुष्यस्य जीवने घटना घटते-कस्यचित् कर्मणः कारणेन मनुष्यो रूपं धत्ते—कस्यचित् कर्मणः कारणेन। प्राणी फलमाप्नोति—कस्यचित् कर्मणः कारणेन। अस्मिन् परिप्रेक्ष्ये विचारकरणं संगतं स्यात्।

कापि चैवंविधा वार्ता युगलकिशोरमहोदयस्य सम्बन्धेऽपि प्रोच्येत। ते चत्वारो भ्रातर आसन्। एकैव मातासीत्। एक एव पिता बभूव। एकमेव वातावरणमभूत्। एक एव हि समाजो बभूव। किन्तु ते सर्वे भिन्ना आसन्। तेषां कल्पना भिन्नाभूत्। तद्विचारा विभिन्ना अभूवन्। तेषां धारणा भिन्ना आसन्। सैषा भिन्नता प्राकृतिकी वर्तते। सैषा वैज्ञानिकी विद्यते।

अस्मिञ्जगति किलैकरूपौ द्वौ प्राणिनौ नाद्यावधि नैवोत्पेदाते। यमलौ बालकावपि नैकसदृशावुत्पद्येते। विषयेऽस्मिन् यमले यम-यमी चेति द्वे समुत्पन्ने, ययोरेकः पुरुषस्तथान्या स्त्री बभूव; ऋग्वेदे तयोर्महान् खलूत्तमः सम्वादो वर्णितोऽस्ति। तत्रास्या भिन्नताया उत्तरमुपलभ्यते कर्मवादस्य दर्शने।

यथेदं जगत् कस्यचित् कल्पनास्ते। यथा रेलगन्त्री कस्यचित् कल्पनास्ते। यथा ऽट्टालिका कस्यचित् कल्पनास्ते। यथा किमपि नगरं कस्यचिद्योजनायाः कल्पनास्ते। तथैव मनुष्यः कस्यचित् कल्पनास्ते। अथवा स्वयमात्मनः कल्पना विद्यते।

यथा कोऽपि सङ्कल्पः साकारं रूपं गृह्णाति। यथा कस्यचित् संकल्पस्तं मूर्तिमन्तं कर्तुं स्वयं सहायको भवति। तेनैव प्रकारेण प्राणो चापि सङ्कल्पस्य साकारं रूपमास्ते।

यस्मिन् कल्पनाभवेद्, यस्मिन् सङ्कल्पःस्याद्, यस्मिन् संस्कारो भवेत्, स एव हि तानेतान् दातुमपि शक्नुयात्। एतेषां त्रयाणामपि च यत्र सन्तुलितः सङ्गमो भवेत्तत्रैव मानवता विकासमोयात्। स एष विकासोऽन्येषामपि विकास-साधने सहायको भवेत्।

यदि च कल्पना मानसिकी भवेत्तदा सा स्वप्नमात्रमास्ते। यदि च सङ्कल्पः साकारो न भवति, तदा स मनसो विकारमात्रमस्ति। यदि संस्कारो-जीवन-रूप-प्रदाने सहायको न बभूव, तदा स छायामात्रमास्ते।

श्रीयुगलकिशोरमहोदयस्य भारतीयं धर्मं प्रति कल्पना, भारतीय तत्त्व-प्रसारस्य संकल्पस्तथा भारतीयं संस्कारं प्रति रुचिस्तमेकस्मिन्नेतादृशे स्तरे प्रापयति, यत्र स एकस्य महतो दातूरूपं प्रपद्यते। तस्मिन्नक्षयिण्याः (सम्पत्तेः) समानमसीम भाण्डागारमभूत्। यन्न कदापि च क्षयगामि समभूत्तथा तस्मिञ्जगत्यस्मिन्न विद्यमानेऽपि च नहि क्षीणं भावि।

तदिदं भाण्डागारं लक्ष्मीर्न पूरयामास। लक्ष्म्या भण्डागारं चञ्चलं भवति। सैषा चञ्चलता सीमानमेकं यावन्नयति। तत्त्यैलोक्यस्यातिक्रमणं कुर्वाणं स्यात्।

तद्दानं तस्य कल्पनासीत्। एतद्दानं तस्य सङ्कल्पोऽभूत्। द्रव्यदानस्याधारे तस्य मूल्याङ्कनकरणं तस्यात्यन्तं क्षुद्ररूपे-उपस्थापनं भवेन्नाम।

तन्निर्मितानां मन्दिराणां शृङ्खला, भित्तिषु रचितानि चित्राणि, शिलासूत्कीर्णानि मूर्त्यादीनि, तेष्वङ्कितानि सुभाषितानि चाबालवृद्धं यावदनुप्राणयन्ति। किमपि ददानानि सन्तिष्ठन्ते।

पठितोऽपि तस्मात् किमपि गृह्णात्यपठितोऽपि चादत्ते। शिक्षितोऽपि किमप्यादत्ते ऽशिक्षितोऽपि गृह्णीते। मूकोऽपि किमपि गृह्णाति, वाचालोऽपि च किमप्यावर्जयति। बधिरोऽपि किमप्यादत्ते, पापश्चापि किमपि विन्दते, पुण्यात्मापि किमपि गृह्णीते। प्रददानः स तृप्तिं नानुभवति। गृहीतापि गृह्णन्न तृप्यति। तदेतन्न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिश्रमणमपरितृप्तिरेव हि जीवनस्य विकास-क्रमोऽस्ति।

प्रतिग्रहीतुर्हस्तो, न हि प्रसारशीलस्येव मनो मलिनीकरोति, न हि स्वात्मनि लीयते, नाधो निपतति। मनस्तापस्य पात्र न भवति। प्रफुल्लितो भवति। सोऽनु-स विकासं व्रजति। भवति यत् सः स्वजीवने सञ्चययोग्यं किमपि सञ्चितवानास्त इति।

स्वस्यार्थे प्रयतनं नाम मनुष्यस्य प्रकृति-रास्ते। अन्यस्यार्थे किमपि करणं, परेषामूर्ध्वो-त्थापनस्य कल्पना, मनुष्यं देवानां पङ्क्तावुपवे-शयति। योऽन्येषां कृते जीवति, योऽन्येषां कृते किमपि करोति, योऽन्यानुत्थापयति, सः स्वयं जीवन् वर्तमानोऽस्ति। सः स्वयमुत्तिष्ठते।

पिलानी-स्थानस्य सरस्वती-मन्दिरमस्य तथ्यस्यैकं ज्वलदुदाहरणमास्ते। तस्मिन्मन्दिरे स देवतानां मूर्तिभिः सह बुद्धं, महावीरमीषुं, दयानन्दस्वामिनं, विवेकानन्दं, गान्धिं, लेनिनं, केनेडीत्यादीनस्य जगतः प्रोदात्तकल्पनाकर्तॄन्नि-धाय स्वात्मनः कियत उदारान्निरपेक्षान् विचा-राञ्जगतः सम्मुखं निदधे। अपि सुयोग्याः पाठकाः कल्पनामस्य कर्तुं प्रभवेयुः?

एकः प्रश्नोऽस्ति अप्यस्मिञ्जगति, धर्मम-न्दिरे कोऽपि कदाप्येवंविधं सङ्कल्पं कृत्वा, तं साकारं कृत्वा, सहिष्णुतायाः, मानवतायाः, धर्मस्य वास्तविकस्य संस्कारस्य च जगति स्वाख्यानकरणस्य कल्पनां चक्रे?

यदाहं काशी-विश्वविद्यालये तथा तेन निर्मितेष्वन्येषु मन्दिरेषु, मानवमात्रं, केवलं मानवस्वरूपं विनाभेदभावं गच्छत् पश्यामि, नानि सुभाषितानि कर्णदेषुलिखामि, तानि पठा-मिपश्यामि, तथा मननशीलस्तान्नि पश्यामि च तदैतदेव वक्तुमिच्छामि सैषा वास्तविकेऽर्थे-ऽक्षयिणी (सम्पद्) वर्तते या न कदापि क्षयं यास्यतीति। तस्मै कर्त्रे शत-शतसंख्यकाः प्रणामाः।

(पृष्ठस्य १० शेषः)

तत्प्राप्तिहेतुर्ज्ञानञ्च कर्म चोक्तं महामुने!। आगमोक्तं विवेकाच्च द्विधा ज्ञानं तथोच्यते ॥७॥
शब्दब्रह्मागममयं परं ब्रह्म विवेकजम्। द्वे ब्रह्मणी वेदितव्ये ब्रह्मशब्दपरञ्च यत् ॥८॥
वेदादिविद्या ह्यपरमक्षरं ब्रह्मसत्परम्। तदेतद्भगवद्वाच्यमुपचारेऽर्चनेऽन्यतः ॥९॥

सम्भर्त्तेति तथा भर्त्ता भकारोऽर्थद्वयान्वितः।
नेता गमयिता स्रष्टा गकारोऽयं महामुने! ॥१०॥

ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना ॥११॥

वसन्ति विष्णौ भूतानि स च धातुस्त्रिधात्मकः।
एवं हरौ हि भगवान् शब्दोऽन्यत्रापचारतः ॥१२॥

उत्पत्तिं प्रलयञ्चैव भूतानामगतिं गतिम्। वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति ॥१३॥

ज्ञानशक्तिः परैश्वर्य्यं वीर्य्यं तेजांस्यशेषतः।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥१४॥

(शेषं १५ पृष्ठे)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आध्यात्मिक जीवनस्य महान् पथ-प्रदर्शकः

श्रीनित्यानन्दः कानूनगो

सैष मत्कृतेऽतीव दुर्भाग्यस्य विषयोऽभूद्, भविष्यति च यद्धि स्वर्गीयेण युगलकिशोरबिरलामहाशयेन सह ममात्मनो जीवनस्योत्तरभागे सम्पर्को बभूव, सोऽपि चातीवाल्परूपे। तेन मम जीवनं कथमिव प्रभावितमभूदत्राहं विशिष्टरूपेण प्रकाशं निःक्षेप्तुं न पारये। स्वयुगस्य भारतस्य महद्भिर्जनैः सहात्मीयं सम्पर्कमासादयितुं मया विरला एव सौभाग्य-प्रसङ्गाः अप्राप्यन्त। आम्, गान्धिर्महात्मा मामवश्यमेव हि सर्वतोऽधिकं प्रभावयामास, यथा सः कोटि-कोटिसंख्यकान् भारतवासिनः प्रभावयामास तथा चागामिनः पुरुषान् प्रभावयन् भविष्यति। तस्योपदेशैर्वयं स्वयुगस्य महतोजनान्, विगतान् महापुरुषांश्चावबोद्धुं साहाय्यमलभामहि। अन्ये लोका इवाहमपि चाध्यात्मिकतायास्तथा ततोऽप्यधिकं धर्माद्विरुद्ध आसम्। यत्किमप्यहं पुस्तकीयं ज्ञानमुपार्जयम्, तस्य मे गर्वोऽभूत्तथा पाश्चात्या देशा भौतिक्यां सभ्यतायां यद् यशो वव्रिरे तत् स्वसमाजेऽपि च प्राप्तुं प्रबलेच्छाया अहं प्रशंसकोऽभूवम्। सत्स्वपि च गान्धेरुपदेशेषु विनम्रता मयि सरलतया प्रवेष्टुं न पारयामास तथा कदाचिदस्मिञ्जीवने न कदापि च प्रविशेदपि, परन्तु जीवन-सुखस्य चिरन्तनस्य स्थायित्वस्य, मूल्यस्य च सूक्ष्मं दर्शनमहं कृतवान्।

अस्य क्रमिकाऽऽविर्भावस्य क्रमे स्वर्गीयेण युगलकिशोरमहाशयेन निर्मितानां मन्दिराणां विषये किमपि ज्ञातुमहमवसरमलभे। भारतस्य शिल्पसौन्दर्यस्य पुनरुत्थानस्य दिशि स यन्मार्गदर्शनं चकार, तस्यत्वहं कमपि सीमानंयावत् प्रशंसकोऽप्यभूवम्, तस्य हिन्दुधर्मस्य, हिन्दोः पूजनविधेस्तद्रीति-नीतेः प्रकाराश्चमे सर्वथा नाभ्यरोचन्त। मम जीवनस्य तत्कालीनायामवस्थायामहं तथान्वभूवम् यत्तस्यायं पदक्रमः समाजमतीतस्यान्धकारे निपातयन्नास्त इव तत्समयस्यासौ घोषो य द्धर्मं धनिनो मानिनो लोका अहिफेनमिव मादकमौषधं साधयितुं व्यवहरन्ति, मम कर्णयोर्गुञ्जन्नासीत्। गच्छति काले सोऽयमन्यथाबोधो मम मनसोऽपसर्तुमारेभे तथा चाध्यात्मिकतायाः सौन्दर्यस्य, महत्त्वस्य चानुभवो मे भवितुमारभत। अहं विरला-परिवारस्यान्येषां सदस्यानामौदार्यस्य प्रशंसामकरवम्, ये हि शिक्षा-क्षेत्रे, मानव-संकटानां निवारणार्थं तथा राष्ट्रियहितस्य रक्षणाय किमपि बह्वधिकं चक्रुः। तत्परिवारस्यान्ये सदस्या यानि कार्याणि चक्रुर्युगलकिशोरमहोदयस्य कार्याणि भिन्नान्यासन्।

तस्य प्रथमसाक्षात्कार एव मयि विनम्रताया भावनाऽभ्युदियाय, यामहं कियन्त्यपि च पुस्तकान्यधीत्य तथा कियतामपि च लोकानां सम्पर्कमासाद्यापि च नाप्तुमशक्नवम्। स मितभाषो बभूव; किन्तु तस्य प्रथमः साक्षात्कार एव मयि ज्ञानदीपं प्रज्वालयामास तथा तस्मात् समयादेवाहमाध्यात्मिकताया मूल्यं, हिन्दुजीवनस्य रीति-नीति-पद्धतीनां तथा हिन्दुधर्मस्य महत्त्वं ज्ञातुमारेभे। तदन्तरं मम तेन साकं हिन्दुधर्ममन्यदेशेषु, यत्र हिन्दवो वसन्ति तथा ये भारतेन सम्पर्कं स्थापयितुं न प्रभवन्ति, प्रचारयितुं वार्तालापा बभूवुस्तथा बह्वीषु योजनास्वपि च विचारविमर्शा अभूवन्। स हि मां मनोयोगेन, ध्यानेन, सुरुच्या च (स्वाभिप्रायम्) अश्रावयत्तथा मम विचारेषु या भ्रान्तिरासीत्तां प्रतिभद्रतया सङ्केतं करोति स्म। त विचारं प्राप्तुं सोऽधिकं सरलं सुबोधं च प्रकारं निरदिशत्तथा सदैवोत्साहं व्यवर्द्धयत्। ममेत्थं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिभाति यत् स्वात्मनो ममाध्यात्मिकस्य जीवनस्य सर्वतो महान्तम् पथप्रदर्शकमहमपाहापयम्। तेन (विरलामहाशयेन) मम सैषानुभूतिर्भवितुमारेभे यद्धि-आध्यात्मिकं ज्ञानमप्राप्यं किं वा संसारादस्मात् परतर नास्तीति। जीवनं प्रत्येकं कार्यं तथा प्रत्येकस्मिन् क्षेत्रे खल्वाध्यात्मिकमुद्देश्यपूर्णं च विधातुं शक्यते। अयं मम विश्वासोऽस्ति यदहमिवान्ये जनाश्चापि तस्य विचारैस्तत्कार्यैश्चोपदेशान् ग्रहीष्यन्तीति। यदा हिन्दू-धर्मस्य लोपो जायमानोऽभूत्तथा सर्वतोऽस्यां दिशि न्यूनता स्तब्धता चाच्छाद्यमानेऽभवतां, युगलकिशोरमहोदया हिन्दु-धर्मस्य सिद्धान्तानां पुनः प्रतिपादनायाविश्रान्तं प्रयासं चक्रे। सोऽस्यां दिशि मादृशेभ्योऽनेकेभ्योऽथ सर्वेभ्योजनेभ्यः प्रकाशं प्रादर्शयत्।

(पृष्ठस्य १३ शेषः)

खाण्डिक्यजनकायाह योगं केशिध्वजः पुरा।
अनात्मन्यात्मबुद्धिर्या आत्मस्वमिति या मतिः ॥१५॥
अविद्याभवसम्भूतिर्बीजमेतद् द्विधा स्थितम्। पञ्चभूतात्मके देहे देही मोहतमाश्रितः ॥१६॥
अहमेतदितीत्युच्चै, कुरुते कुमतिर्मतिम्। इत्थञ्च पुत्रपौत्रेषु तद्देहोत्पादितेषु च ॥१७॥
करोति पण्डितः साम्यमनात्मनि कलेवरे। सर्वदेहोपकाराय कुरुते कर्म मानवः ॥१८॥
देहश्चान्यो यदा पुंसस्तदा बन्धाय तत्परम्। निर्वाणमय एवायमात्मा ज्ञानमयोऽमलः ॥१९॥
दुःखज्ञानमयोऽधर्मः प्रकृतेः स तु नात्मनः।
जलस्य नाग्निना सङ्गः स्थालीसङ्गात् तथापि हि ॥२०॥
शब्दास्ते कादिका धर्मास्तत् कृता वै महामुने।
तथात्मा प्रकृतौ सङ्गादहंमानादिभूषितः ॥२१॥
भजते प्राकृतवान् धर्मान् अन्यस्तेभ्यो हि सोऽव्ययः।
बन्धाय विषयासङ्गं मनो निर्विषयं धिये ॥२२॥
विषयात् तत् समाकृष्य ब्रह्मभूतं हरिं स्मरेत्। आत्मभावं नयत्येनं तद्ब्रह्मध्यायिनं मुने ॥२३॥
विचार्य्य स्वात्मनः शक्त्या लौहमाकर्षको यथा। आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः ॥२४॥
तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते। विनिष्पन्दः समाधिस्थः परं ब्रह्माधिगच्छति ॥२५॥
यमैः सनियमैः स्थित्या प्रत्याहृत्या मरुज्जयैः। प्राणायामेन पवनैः प्रत्याहारेण चेन्द्रियैः ॥२६॥
वशीकृतैस्ततः कुर्य्यात् स्थितं चेतः शुभाश्रये। आश्रयश्चेतसो ब्रह्म मूर्त्तञ्चामूर्त्तकं द्विधा ॥२७॥
सनन्दनादयो ब्रह्मभावभावनया युताः। कर्मभावनया चान्ये देवाद्याः स्थावरान्तकाः ॥२८॥
हिरण्यगर्भादिषु च ज्ञानकर्मात्मिका द्विधा।
त्रिविधा भावना प्रोक्ता विश्वं ब्रह्मं उपास्यते ॥२९॥
प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम्। वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥३०॥
तच्च विष्णोः परं रूपमरूपस्याजमक्षरम्। अशक्यं प्रथमं ध्यातुमतो मूर्त्तादि चिन्तयेत् ॥३१॥
मद्भावभावमापन्नस्ततोऽसौ परमात्मना। भवत्यभेदो भेदश्च तस्याज्ञानकृतो भवेत् ॥३२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आधिभौतिकताया आध्यात्मिकताया धनी

श्रीश्रेष्ठी गोविन्ददासः

स्वर्गीयो युगलकिशोरविरलामहोदयो भारतस्य तासु विरल-विरलासु विभूतिष्वासीद्या जीवनस्य चरमाणि लक्ष्याणि प्राप्तुं प्रयेतिरे। न केवलमेतदेव, ताभिरुपलब्धिभिः स्वात्मानं समृद्धमपि चक्रे, यदर्थं मनुष्यः प्रयतते, यच्च तस्य लक्ष्यं भवितुमर्हति।

स्वार्थः परमार्थश्चेत्यनोः शब्दयोर्द्वयोः सृष्टेः सारः समाविष्टो वर्तते। पशु पक्षिणः, कीट-पतङ्गाः सर्वेऽपि च स्वार्थेन प्रेरिता भवन्ति, स्वार्थस्य वशीभूताः सन्तिष्ठन्ते। केनापि प्राकृतिकरूपेणैव मनुष्योऽप्यस्य स्वार्थ-भावस्य सहचरो भूत्वा जीवनपर्यन्तम् बम्भ्रम्यमाणस्तिष्ठति। अन्ये प्राणिन इव सोऽपि च क्षुधा, पिपासया तथान्याभिर्वासनाभिः पीडितः सन् व्याकुलो भवति। स्वात्मनो व्याकुलतायाः शांतये तच्छमनाय च योऽप्यवलम्बस्तस्मा उपलभ्यते, तेन स आत्मनः स्वाथ-पूर्ति कुरुते। अन्येषु प्राणिषु मनुष्ये चान्तरं केवलमेतावदेवास्ते, यच्च बहु गरीयोऽस्ति, यदन्येषां प्राणिनां वासना यत्रैकतः क्षुत्पिपासे, कामवासना यावदेव सीमिता भवन्ति, तत्र मनुष्यस्य वासनानां क्षेत्रमसीमं वतते। किन्तु साकमेवानेन यत्रान्येषां प्राणिनां वासनानां क्षेत्रं संकुचितं सीमितं च विद्यते, तत्र तेषां शक्तिः सामर्थ्यमपि च सीमिते स्तः। परन्तु नैतत्तथ्यं मनुष्येण सह वर्तते। निसर्गो मनुष्याय विवेकं प्रदत्तवान्, येन स न केवलं स्व वासनानां पूर्तये तत्परो भवति, वरञ्च स (विवेकी) स्वेन साकं परहितस्य भावे परिवर्त्य तान् (मनुष्यान्) लोकहितकारिणो विधत्ते।

मनुष्ये तिस्रः प्रमुखा वासनाः सन्ति, यास्तस्य चित्तवृत्तिरूपं दधति। ताश्च तिस्रो वृत्तयः पुत्रैषणा; वित्तैषणा तथा लोकैषणा इति भवन्ति। यदि वयं दूरगामिन्या दृष्ट्या पश्येम तदेमास्तिस्रोऽपि च वृत्तयो भिन्नतातीताः सन्ति तथा तिसृणामप्यासां वृत्तीनां चरमा परिणतिः किंवा गन्तव्यमेकमेव वर्तते। यो हि वैयक्तिकात् स्तरादुत्थाय लोकहितकारी भवति तथा व्यष्टिभावेन विकासमाप्य सः समष्टिमूलको भवति। उदाहरणार्थं कापि च पुत्रवती माताथवा पिता तदिदं नोऽभिलषेद्यत्तयोः पुत्रः कुपथगामी भवेदथवापयशोऽर्जयेदिति। एवमेव महतो महीयान् धनिको वा समृद्धिशाली जनः समृद्धेः सर्वोच्चं शिखरं प्राप्यापि चास्य विषयस्येच्छुको न कदापि भवितुमर्हति यल्लोकास्तं क्षुत्क्षामं, नग्नं, दरिद्रं च वदेयुः। न केवलमेतावदेव, सोऽस्मादेवापवादादात्मानं त्रातुं, कामं सः स्वभावात् कियदपि कृपणः किं न स्यात्, स्वात्मनो यशः प्रसिद्धये तादृशानि कर्माणि कुरुते, यानि तस्य समृद्धिमूलिकायाः प्रतिष्ठाया अनुरूपाणि स्युः। स दानानि वितरति, वृत्तिहीनेभ्यो वृत्तिं प्रयच्छति, धर्म-पुण्यानां कार्याणि करोति, यैस्तस्य यशः प्रसरेत्। यदि वयमितिहासे दृक्पातं कुर्याम, तदास्माभिरेतज्ज्ञायेत, यन्महद्भ्योऽपि महीयांसः सत्तालोलुपाः साम्राज्यवादिनोऽपि यदि स्वसत्ता-विस्ताराय युद्धानि युयुधिरे, नरसंहार सदृशानि जघन्यानि पापानि चक्रुस्तदा तान्यपि च स्वसत्तामात्मनः पृष्ठमारोप्य स्वेन सह नेतुं नैव, वरं च स्वयशोऽभिवृद्धय एव। कथनस्य तात्पर्यमेतद्यद्धि पुत्रैषणा, वित्तैषणा चेति द्वयोरप्यनयोर्लक्ष्यं, गन्तव्यं चैकमेवास्ते, तच्चास्ते लोकैषणा नाम।

अथ लोकैषणातो मुक्तापि चैकास्थितिरास्ते, यास्माकमाध्यात्म्ये गुणातीतस्य स्थितप्रज्ञस्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थितिः प्रोक्तास्ते। अस्याः स्थितेरधिकारिणो-ऽरण्यवासिनोऽथवा संसारे निवसन्तोऽपि तस्मा-दपि च सर्वथैवासंस्पृष्टा अलिप्ताश्च त एव महान्तो जना भवितुमर्हन्ति, येषां साधनायाः प्रकाशेनाद्यापि च स्थितिः प्रकाशिता सुप्रतिष्ठिता च वरीवर्ति। साधारणस्य तथासाधारणस्यैव किम्, स सांसारिकस्य कृते तु सेयं स्थितिरद्यतने युगे दुष्करैव वर्तते।

युगलकिशोरविरलामहोदयो मे सम्बन्धी समभूत्तथा युगलकिशोर एव किं, तस्य समग्रः परिवारोऽस्माभिः सहानेकैः सम्बन्धैः सम्बन्धा-न्तरैश्च ग्रथितो वर्वर्ति। अत एवैकस्य सम्बन्धि-नोऽल्पे यावन्निकटतया तद्दर्शनस्य तदवबोधस्य च ममावसरोऽलभ्यत, कदाचित्ततोऽधिकस्याव-सरस्याशा न कर्तुं शक्यते। अद्याहं तानि दिनानि संस्मरामि, यदा स दक्षस्य व्यवसायि-नो रूपे स्वकार्ये संलग्नोऽभूत्। स हि स्वात्मनो दूरदर्शिन्या कुशाग्रया व्यवसायिक्या च बुद्धया, कर्मकौशलेन परिश्रमेण, तद्युगे भारतदेशस्य व्यवसायिवर्गे न केवलं धनमुपार्ज्य स्वप्रतिष्ठां, प्रभावं च समस्थापयद्, वरञ्चातीवशीघ्रं, प्रत्येक-दृष्टया देशस्यास्य व्यवसायिके क्षेत्रे तन्नामग्रहणं कर्तुमारभ्यत साकं समयेन दिनानुदिनमस्मिन् क्षेत्रे तत्प्रतिष्ठा, सफलता, प्रभावश्च वर्द्धितुमारे-भिरे। स च विरलापरिवारस्य सुदृढ़ः स्तम्भो बभूव।

श्रीयुगलकिशोरमहोदयस्य वैशिष्ट्यं गुणा-तिरेको वा धनार्जने तथा कार्यकलापानां वर्द्धने नासीत्। धनं तु तस्मात् पूर्वं बहुभिरर्जितमासी-त्तथाद्यापि चार्जयन्ति, तथा धनोपार्जनस्य सोऽयं क्रमो न कदापि च समाप्तिं गमिष्यति। परन्तु तस्य वैशिष्ट्यमासीद्धनस्यार्जनं तथा च तस्य समुचितो विनियोगः। गान्धिर्महात्मा प्रोक्त-वान्–"धनिकवर्गः स्वात्मानमर्जितायाः सम्पत्ते-र्न्यासरक्षकं भावयेयुः।" राष्ट्रपितुरस्य सिद्धान्त-स्यानुसारं न्यासरक्षकरूपेण स्वात्मनैवार्जितायाः सम्पत्तेः सम्बन्धे व्यक्तिविशेषेण सततं जागरू-कतया तदिदं द्रष्टव्यं भवति यत् सः सम्पत्तेः कियन्तमंशं कस्मिन् कार्ये व्ययं कुर्यात्, तां कथं सुरक्षितां विदध्यात्तथा तत्प्रवाहोऽवरुद्धस्तु न भवतीति।

युगलकिशोरमहोदयस्तिसृभिराभिर्दृष्टिभि-रात्मानं न्यासरक्षकं मत्वा स्वेनैवार्जितायाः सम्पत्तेः सर्वसाधारणस्य कृते समानं सन्तुलितं च सम्यगुपयोगं कृतवान्। स हि यदुपार्जयत्तत् सदैव सुरक्षितं विदधे। नैतदेव, तदुपार्जनं स्वपरिश्रमेणाग्रे विवर्द्धयामास, साकमेवानेन सर्वसाधारणस्य कल्याणाय सोऽगणितानां लोकोपकारिणीनां संस्थानां निर्माणमकारयत्। जीवनस्यैवंविधं किमपि क्षेत्रं न भवितुमर्हति, यस्मिन् युगलकिशोरमहोदयः पीडितायै मानव-तायै मुक्तदानं न कृतवान् भवेत्। तद्द्वारा कृतस्य धन-संचयस्य गणना तु कर्तुं शक्यते, किन्तु सर्वसाधारणानां कृते सेवाभावेन विहितानां तस्य कार्याणां गणना कठिनास्ते। भारतस्य विभिन्नेषु प्रदेशेषु निर्मितानां देवालय-मन्दिरा-णाम्—यानि विरला-परिवारस्याधिभौतिकस्य क्षेत्रस्योपलब्ध्या साकं तस्याध्यात्मिकस्य क्षेत्रस्य प्रीतेः प्रज्वलत् प्रमाणमास्ते–मूलाधारे, तत्प्रा-चीरेषु, प्रकोष्ठेषु तथा प्रतिष्ठितासु देवमूर्तिषु प्रधानरूपेण युगलकिशोरमहोदयस्यात्मनः प्रेम समाविष्टं वर्तते। देहल्या एव भव्यं सुविशालं च विरला-मन्दिरं युगलकिशोरमहोदयस्याध्या-त्मप्रेम्णः प्रमाणमास्ते।

पुनर्युगलकिशोरमहोदयस्य तदेतत् कार्यं केवलं मन्दिराणि यावत् परिसीमितं न तस्थौ, स हि भारतीयायाः संस्कृतेराध्यात्म्यस्य च प्रचाराय सुदूरं विदेशेष्वपि महतो जनान् प्राहि-णोत्, तेषां साहाय्यं चकार तथास्माकं सांस्कृतिके चादानप्रदाने योगदानं विदधौ। युगलकिशोर-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महोदयोऽधुनातनस्य भारतस्यैकः संस्कृति-निष्ठः पुरुषस्तथातीव दानशीलो जनो मन्यते स्म। तत्समीपं गत्वा कोऽपि च याचको रिक्तहस्तो न प्रतिन्यवर्तत। स महानेव विनयशीलः समुदारो भविष्यचेता जनोऽभूत्। तद्द्वारा संरक्षितानि, प्रदत्तसाहाय्यानि, संस्थापितानि चानेकानि सांस्कृतिकान्याध्यात्मिकानि च संस्थानानि तस्योच्चां मनोवृत्तिमेवमेव भव्यं व्यक्तित्वं च परिचाययन्ति च विद्यन्ते। स हि व्यावसायिके प्रौद्योगिके च क्षेत्रे यत्किमप्यर्जयामास, तस्मिन्नद्यत्वे तस्य पारिवारिकाणां जनानां स्वामित्वमास्ते, किन्तु तद्द्वारा संरक्षितेषु, प्रदत्तसाहाय्येषु संस्थापितेषु चैषु संस्थानेषु सर्वसाधारणस्याधिपत्यं वर्तते। स्वार्थ-परमार्थयोः क्षेत्रेऽस्तोऽधिकम् सफल-साधनाया एकस्य जनस्य जीवनात् काऽऽशा कर्तुं शक्येत। आधिभौतिके चाध्यात्मिके च क्षेत्रे द्वयोरपि युगलकिशोरमहोदयस्य जीवनस्य सैषोपलब्धिर्व्यक्तेः स्वार्थस्य परमार्थस्य च चरमा परिणतिर्विद्यते। तथा चैष्वेवार्थेषु तस्य जीवनस्य चरमा सफलतापि वर्तते।

भारतस्यार्थिके, सामाजिके, सांस्कृतिके तथाध्यात्मिके क्षेत्रे युगलकिशोरमहोदयस्य यद्धि योगदानमास्ते तन्नो विस्मर्तुं शक्यते। तेन भाविनी पुरुषपरम्परानुप्रेरिता, अनुप्राणितास्तथा सदैवात्मगर्विताः स्थास्यन्ति।

Electric Construction & Equipment Company Ltd.,

(Secretaries & Treasures : Birla Brothers Private Ltd.)

Registered Office :
9, Kali Prasanna Singhee Road,
CALCUTTA-2.

Central Office :
27-B, Camac Street,
CALCUTTA-16.

Manufacturers :

ECE

Transformers, H.T. & L.T. Switchgears, H.T. Metering Sets, C.ts & P.Ts, Kiosks, Lifts, Air Break Switches, Electric Motors & Pumping Sets, Starters, Switches, Energy Meters etc.

SALES OFFICE FOR RAJASTHAN :
Kshir Sagar Building, Motilal Atal Road, JAIPUR-1.

Gram : **ELCONSTCO**

Phone : **75277**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्वैरः सर्वभूतेषु

श्रीभगीरथः कानोड़िया

श्रद्धेयस्य बाबूमहाशयस्य (स्वर्गीयस्य युगलकिशोरविरलामहोदयस्य) कुलपरम्परयाऽस्माकमतीव प्राचीनः सम्बन्धो बभूव, परन्तु सन् १९११ ई० वर्षे यदाहं सर्वादौ कालिकातामागच्छम्, तदा तं समीपतो द्रष्टुमवसरोऽलभ्यत। बाबूयुगलकिशोरमहोदयः प्राचीन-नवीनानां सद्गुणानामेको मूर्तः समन्वयोऽभूत्। यत्र यच्छ्रेष्ठं तत्त्वमुपालभ्यत, स तज्जग्राह, कामं तत् सनातनधर्मगतं स्यात् किंवाऽऽआर्यसमाजसम्बद्धम्। हिन्दुसमाजे या हि पुराणी रूढिवादितासीत्तथा यस्याः कारणेन समाजे नानादोषाः कृतपदा आसन्, स तेषां सदैव विरोधं चक्रे। मारववणिजां समाजे सामान्यतस्तु समये-समये लघुमहान्ति नानान्दोलनानि जायमानान्यभूवन्, परन्तु मुख्यानि त्रीण्यान्दोलनानि बभूवुः—विधवाविवाह-सम्बद्धं, विदेश-यात्रा-सम्बन्धि, सनातन-धर्म-आर्यसमाज विषयकञ्चेति। त्रिष्वप्येष्वान्दोलनेषु बाबूमहोदयः स एषः सुधार-पक्षस्य सम्पूर्णं साहाय्यं चक्रे। धर्मनीत्योः सम्बन्धे स श्रीमद्भगवद्गीतामात्मनो लक्ष्य-ग्रन्थं मेने। बाबूयुगलकिशोरमहोदयः किलैकोऽत्यन्तं विनम्र-स्वभावः, सरलप्रकृतिकः, समुदारमनाश्च पुरुषोऽभूत्। स्वस्य व्यापारकौशलाद् दूरदर्शितया च स पर्याप्तं धनमर्जयामास। परन्तु यया तत्परतया स धनार्जनं चक्रे, ततोऽप्यधिकया तत्परतया तस्य सत्कर्मसूपयोगं चकार।

स खल्वेतावानुदाराशयोऽभूद्यद्यदि कदाचित् कोऽपि जनः कस्यचिच्छुभकार्यस्य सम्पादनार्थं तत्सकाशात् सहायतामाप्तुं न गच्छति स्म, तदा स काममपि च व्याकुलतामिवानुभवति स्म। न स केवलं दानमेव प्रददौ, वरञ्च समाजे दान-प्रदानस्य परिपाटीमचालयत्। लोकेभ्यः स विषयेऽत्र निरन्तरं प्रेरणां प्रददानस्तस्थौ यद्धि भगवान् युष्मभ्यं यदि धनमुपार्जितं प्रयच्छति, तर्हि तस्मिन् सर्वेषां भागांशं मन्यध्वम्, दीनानां दुःखाक्रान्तानां सेवामाचरतेति। तस्योदारतां स्मरन्तस्तथा तस्य स्वर्गमनात् स्वात्मानमनाथमिवानुभवन्तोऽद्यत्वे लक्षाधिका जना विद्यमानाः सन्तिः। अथानेकाः संस्थाश्चापि तथाविधा वर्तन्ते, यासां कृते स एवैकमात्रमालम्बनं बभूव। नाहं कदापि च तत्समक्षमागतं जनं नैराश्यभावमाश्रित्य निवर्तमानमद्राक्षम्। ये विरुद्धविचारा जना आसँ स्तथा च ये तस्यानिष्टमपि कर्तुं प्रयेतिरे, तेऽपि च यदा कष्टं गतास्तत्सकाशं साहाय्यं याचितुमुपगतास्तदा बाबूमहोदयस्तावत्तैव स्नेहेन सम्मानेन च तेभ्यः साहाय्यं प्रददौ, यावद्भूयां स्नेहसम्मानाभ्यां स्वात्मीय इत्यभिदधानाय स्वजनाय प्रयच्छति स्म। तस्य स्वभावस्यासौ गुणविशेषोऽभूद्यत् स न कदापि कमपि च वैरिणं मेने। "निर्वैरः सर्वभूतेषु" तथा "सर्वभूतहिते रतः" तस्य जीवनस्य मूलमन्त्रा आसन्। तस्य स्वभावे दया, करुणा चाकण्ठमापूरिते बभूवतुः। सार्वजनिके क्षेत्रे कार्यकर्तृभ्यो जनेभ्यस्तस्मात् सदा प्रोत्साहनमाशीर्वादाश्चोपलभ्यन्ते स्म। बाबूयुगलकिशोरमहोदयस्य स्वर्गमनं बत देशस्य समाजस्य चैका तादृशी क्षतिरास्ते, यत्पूर्तिर्न हि भवितुं शक्यते। अहं तच्चरणेषु परःशताञ्छ्रद्धाञ्जलीन् समर्पयामि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



सेंचुरी रेयॉन—हमेशा आपके साथ

जब आप सूट, साड़ियाँ, कमीजें या पोशाकें पहनते हैं, सेंचुरी रेयॉन आपके साथ होता है। जब आप अंडरवियर या होजियरी की चीजें पहनते हैं, यहाँ तक कि जब आप स्लीपरों और हैंडबैगों का इस्तेमाल करते हैं, सेंचुरी रेयॉन आपके साथ होता है। चादरों, तकियों के गिलाफ़ों, कम्बलों, गालीचों, तौलियों, नेपकिनों, रूमालों और नेकटाइयों का इस्तेमाल करते समय भी सेंचुरी रेयॉन आपके साथ रहता है। अपने घर के लिये परदे तैयार करें या उसे फ़र्नीचर से सजाएँ...अपनी कार के लिये, रेलगाड़ियों के लिये या हवाई और समुद्री जहाज़ों के लिये अपहोलस्ट्री का सामान लें...सेंचुरी रेयॉन तब भी आपके साथ होगा।

हवाई जहाज़ से सफ़र करें या बस से, कार से सफ़र करें या स्कूटर से, या साइकिल से... ट्रैक्टर से अपनी जमीन जोतें या एक्सकैवेटर से ज़मीन की खुदाई करें, जब भी आप किसी ऐसी चीज़ का इस्तेमाल करें जो टायरों पर चलती हो...या जब भी आपको मशीनों को चलाने के लिये पट्टों की ज़रूरत हो...सेंचुरी रेयॉन हमेशा आपके साथ होगा।

Century Rayon

जी हाँ! यह बिल्कुल सही है कि सेंचुरी रेयॉन के सूत और टायरकॉर्ड बिल्कुल हमेशा आपके पास हैं। आप कुछ भी हों, कहीं भी जा रहे हों, सेंचुरी रेयॉन हमेशा आपके साथ है और आप हमेशा सेंचुरी रेयॉन के साथ है।

सेंचुरी रेयॉन इंडस्ट्री हाउस, चर्चगेट रिक्लेमेशन, बम्बई-१

SAS CRJ HW

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विरलामहोदयस्यात्मगोपन-प्रवृत्तिः

श्रीअचलानन्दः

युगलकिशोरविरलामहोदयः स वारिवाहोऽभूत्, यो हि गर्जनं विनैव वर्षति। रामरावणयोः संग्रामप्रसङ्गे रावणस्य गर्जनंतर्जनं भगवतो रामस्य सम्मुखं बभूव। श्रीराघवेन्द्रो लङ्केशेन कृतां स्वयं तन्मुखादात्मनः श्लाघां श्रुत्वा त्रिविधानि मानव-रूपाणि प्रोक्तवान्—

संसारमध्ये पुरुषास्त्रिविधा:पाटलरसालपनस-
समा एक सुमनप्रद, एक सुमनफल, एक फलइ
केवल लागहीं एककहहिं कहहिं करहिं अपर
एक करहिं कहतन बागहीं

प्रथम प्रकाराः पुरुषाः पाटल-पादपा इव भवन्ति, ये केवलं कथयन्ति (न कुर्वन्ति)। द्वितीयप्रकारा आम्रवृक्षसमानाः पुष्पफलवन्तो भवन्ति, ये कथनेन साकमेव कृत्वापि च प्रदर्शयन्ति। तृतीयप्रकाराः पलाशसदृक्षा एव वर्तन्तेऽर्थात्ते केवलं कर्तव्यपरायणा भवन्ति, स्वस्य सत्कर्माणि न प्रशंसन्ति, प्रत्युत भूयांसि महान्ति कर्माणि कृत्वापि च तच्छ्लाघातो बहुदूरं तिष्ठन्ति।

श्रद्धेयो बाबूमहोदयस्तृतीय-प्रकारो महामानवोऽभूद्यो हि सत्य-शिव-सुन्दराणां कर्मणां सर्वतोभावेन नियन्ता, निर्माता सन्नपि स्वयमात्मानं विश्वात्मनः सर्वशक्तिमतः परमात्मनोऽकिञ्चनं सेवकमात्रमवगच्छति।

आत्मगोपन-प्रवृत्तिशीले मानवे खल्वेकः सद्गुणः प्रकाशते, स चास्ति-कृतज्ञता। बाबूमहोदये साकारां जायमानां कृतज्ञतामहं स्वयमद्राक्षम्। गतवर्षे जनवरीमासस्य प्रथमे सप्ताहे सम्मान्यपण्डितप्रवरस्य देवधरमहोदयस्य सूचनायां प्राप्तायामहं देहलीं प्राप्तवम्। सायंकाले बाबूमहोदयेनामिलम्। तस्मिन् समये सोऽत्यधिकमस्वस्थोऽभूत्। तथापि मुखाकृतौ सहजा प्रसन्नता प्रसृताऽभूत्। मिलनाकाङ्क्षिणाम् जनानां संख्याः समधिकत्वात् स्वल्पसमयान्तर एव स्वर्गाश्रमस्थैः सर्वै र्महात्मभिस्तथा कार्यकर्तृभिः प्रेषितानि शुभकामनानां, स्वास्थ्यकामनानां च प्रसूनानि तस्य हस्तयो र्दत्वाहमपश्यम् स गद्गदकण्ठो बभूव तथा हस्ताञ्जलिं बध्वा सर्वान् साधून्महात्मनश्च ववन्दे तथा च तस्य स्वभावानुसारं (तेषां सर्वेषां) सेवादेशः प्रादीयत। तस्यात्यधिकं सम्पर्कमातिष्ठतां लोकानामेतत् कथनमास्ते यद्बाबूमहोदयो जीवन्मुक्तोऽभूदिति। बहुधाहमपि च तद्दर्शनानां सौभाग्यमलभे। तस्य समन्दस्मितं, निसर्ग-प्रसन्नं तथा साकमेव गाम्भीर्य-प्रस्फुटितं च मुख-मण्डलं वीक्ष्य स्थित-प्रज्ञस्य लक्षणानां दृश्यं साक्षाद् भवति स्म।

प्रश्नोऽयमभ्युत्तिष्ठते, अपि च प्रसन्नता-गाम्भीर्ये सहभावेन युगपत् स्थातुं पारयतः? आम्, समुद्रेऽगाधता भवति, परमुच्चता न भवति। पर्वते प्रोच्चता भवति, परमगाधता न भवति। परन्तु महामानवेऽगाधतोच्चता च द्वे चापि विद्यमाने भवतः। विरलामहोदयो विभिन्नानां सद्गुणानां सामञ्जस्यरूपो बभूव। स हि गृहस्थ-वेशे वीतरागः साधुरासीत्।

आंग्लभाषायामेका लोक्तिरास्ते, यस्याः शब्दार्थोऽस्ति 'सम्भवति यत्सूचीच्छिद्रादुष्ट्रो निर्गच्छेत् परन्तु धनवतः स्वर्गे प्रवेशः कदापि न सम्भवति।'

तदिदं लोकोक्तीनां सत्यं जनसामान्ये घटितं भवितुमर्हति, न तु विशेषज्ञेषु, यतः कर्म स्वाभाविकस्य बन्धनस्य हेतुर्भवति। परं यदा तदेव कर्म प्रभु-सर्मपितं भवति, लोकहितार्थं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवति; तदा तद्दिव्यतां प्रति नयति तथा तस्य पर्यवसानं प्रभोः प्राप्तौ भवति। अत एव प्रबुद्धा जनाः स्वात्मनः कर्माणीश्वराय समर्प्य निश्चिन्ताः सन्तिष्ठन्ते। बाबूमहोदयस्य मुख-मण्डले नैसर्गिकी प्रसन्नता नामास्यैव तथ्यस्य द्योतिनी बभूव।

तदिदमश्रूयत, यद्धि बाबू महोदयस्य पुरतः खल्वेतादृशा बहवः प्रसङ्गाः समाययुर्येषु तस्मै महतो महीयांस उपाधयः प्रादीयन्त, परन्तु सः सहजेन भावेन तद्ग्रहणे निषेधं चक्रे। अत्र किमपि बोध-तत्त्वं हि निहितमास्ते। कामनाशीलः सामान्यो जनः स्वल्पानां लघुलघूनां प्रलोभनाम-वसरे परिस्खलति, परन्तु यो हि विचारशीलो जनो महद्वस्तु प्राप्तवान् भवति, तेन लघूनि वस्तूनि स्वत एव परित्यज्यन्ते, तथा तस्मिन् परोपकारपरायणानां महात्मनां दिव्या गुणा जागृता भवन्ति। ते स्वगुणान्निशम्य सङ्कोच-मनुभवन्ति, परन्त्वन्यस्य गुणश्रवणस्य यदाऽव-सर आयाति; तदा महत्या रुच्या शृण्वन्ति। समता-शीलता-न्यायानां न कदापि परित्यागः, सरलः स्वभावः, सर्वेभ्यः प्रीतिः, जप-तपो-व्रत-दमाः संयम- नियमौ, गुरुगोविन्दयोर्ब्राह्मणेषु च श्रद्धाभावः, क्षमा, मैत्री, दया, मुदिता च प्रभो-श्चरणेषु निष्कपटं प्रेम तथा वैराग्य, विवेको, विनयो, विज्ञानम् (परमात्मनस्तत्त्वज्ञानम्) तथा च वेदपुराणानां यथार्थं ज्ञानमेव दम्भेनाभि-मानेन मदेन च रहितो भूत्वा प्रभुलीलानां श्रवणं श्रावणमन्येषां हितसाधने तत्परत्वमेते सर्वे सुर-मुनि-वेद-वन्दिता दिव्याः सद्गुणास्तेषु स्वतः प्रकटिता-बोभूयन्ते। गोस्वामिनस्तुलसी-दासस्य शब्देषु—

निजगुन श्रवण सुमन सकुचाहीं।
परगुन सुनत अधिक हरषाहीं॥
सम शीतल नहि त्यागहिं नीती।
सरल सुभाउ सबहि सन प्रीती॥
जप तप व्रत दम संजम नेमा।
गुरु गोविन्द विप्र पद प्रेमा।
श्रद्धा क्षमा मैत्री दाया।
मुदिता सम पद प्रीति अपाया॥
विरति विवेक विनय विज्ञाना।
बोध जथारथ वेद पुराना॥
दम्भ मान पद करहि न काऊ।
भूमि न देहिं कुमारग पाऊ॥
गावहिं सुनहिं सदा मम लीला।
हेतु रहित पर हित रत सीला॥
मुनि सुनु साधुन्ह के गुण जेते।
कहि न सकहिं सारद श्रुति तेते॥

स्वर्गीयो युगलकिशोरविरलामहोदयो गीतो-क्तस्य कर्मयोगस्य मूर्तिमत् स्वरूपमासीत्। कर्म-योगी स्वात्मनः स्वार्थाय किमपि न करोति, तस्य सम्पूर्णं कर्म प्रभुसमर्पितत्वात् स्वार्थ-शून्यं, लोकहितार्थं च भवति। कर्मण्यभिनिवेशस्या-भावात् स आशा-ममता-सन्तापैर्विरहितो भूत्वा कर्म कुरुते, यतः प्रभुसमर्पितः कर्म-बन्धनरहितः स भवति।

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर॥ (गीता)

भगवदर्पणकृतात् कर्मणोऽतिरिक्तं कर्म बन्धनहेतुकं भवति। भगवतः श्रीकृष्णस्याज्ञास्ते-भोः! मानव! आसक्ति-रहितो भूत्वा तस्य परमेश्वरस्य निमित्तं सम्यक्प्रकारेण कर्माचरणं कुरुष्व—

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा।
निराशी निर्ममो भूत्वा युध्यस्व विगतज्वरः॥
(गीता)

अध्यात्मचित्तेन सम्पूर्णानि कर्माणि मयि परमात्मनि समर्प्याशादिभि र्विरहितो भूत्वा युद्धं (कर्म) कुरु। विरलामहोदयोऽस्य कर्म-योगस्य मर्मज्ञोऽभिज्ञातासीत्। अत्र तस्य लोक-विख्यात कर्मैव प्रमाणं वर्तते। लक्ष्मीनारायण-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्दिरम् (देहल्याम्) गीतामन्दिरम् (मथुरायाम्), श्रीकृष्ण-जन्मस्थानं (मथुरायाम्), विश्वनाथ-मन्दिरं (वाराणस्याम्) इत्यादीनां स्थानानां निर्मातापि सन् स कियत्सरलस्तथा विनम्रोऽभूत् ।

वस्तुतस्तस्मिन् भक्तिर्ज्ञानं कर्म चेत्येतेषां त्रयाणामपि संगमोऽभूत् ।

नवम सरलसबसनछलहीना ।
मम भरोस हिय हरषत दोना ॥
ज्ञानमान जहं एकहु नाहीं ।
देखत ब्रह्म समान सब माहीं ॥
शमदमशील विरति बहु कर्मा ।
निरत निरन्तर सज्जन धर्मा ॥

श्रुति-स्मृति-प्रतिपादितास्ता एताः क्रमशो भक्ति-ज्ञान-कर्मरूपिण्यो गंगा-सरस्वती-यमुनानां धाराः श्रद्धास्पदे बाबूमहोदये प्रवहन्ति स्म । तुलसीदासस्य शब्देषु—

राम-भगति जहं सुरसरिधारा ।
सरसइ ब्रह्म विचार प्रचारा ॥

बाबूमहोदयो हिन्दुधर्मस्य तु सर्वस्वमेवाभूत् । यदा कदापि च क्वचिदुच्चकोटिकेन साधकेन वा सिद्धमहात्मभिः साकं स मिलति स्म, तदेमामेव हि जिज्ञासामभिव्यनक्ति स्म यद्धिन्दु-धर्मस्य प्रतिष्ठा कदा भविष्यति ? तथा चैतदर्थं सः सदैव प्रयत्नशीलस्तस्थौ ।। प्रायः सर्वाश्चापि धार्मिक्यः संस्थास्तस्मात् साहाय्यं लभन्ते स्म । संस्कृतस्य प्रचारे प्रसारे च तस्य हार्दिकी सहानुभूतिरासीत् । स जज्ञे यत् संस्कृतभाषाया ज्ञानं विना हिन्दु-संस्कृते र्वास्तविको बोधो न सम्भवति । अतः संस्कृतस्य प्रचाराय तस्मात् संस्कृतपाठशालाः सदार्थिकं सहयोगं लभमाना आसन् ।

स्वर्गाश्रमदेयनिधेः (बाबाकृष्णकम्बलवता श्रीआत्मप्रकाशमहाभागैः सम्बद्धस्य) सोऽयं बाबूमहोदयः परमाध्यक्षो बभूव । अत्र प्रत्येकं सम्प्रदायस्य साधक-सिद्धा निवसन्ति । एवं विधाया बहुमुख्याः संस्थायाः प्रबन्धाय परमयोग्यं, प्रतिभा-सम्पन्नम् श्रीदेवधरशर्मसदृशं कार्यकुशलं जनं वरिष्ठोऽसौ बाबूमहोदयो नियुक्तवान् । शर्ममहाभागस्यास्य तत्त्वावधाने स्वर्गाश्रमनिधि र्दिने द्विगुणं रात्रौ च चतुर्गुणमभ्युन्नतिपथेऽग्रेसरो बोभूयमानो वर्वर्ति । यदापि कोऽपि चैवं विधां प्रमादालस्यजनितामापत्तिं कुरुते स्म यत् साधवो जनाः परमेश्वरं न भजन्ति, तदेत्थं विधानां साधूनामाश्रमाधिवासस्य को नामास्त्यधिकारः ? तदा श्रुतमस्माभिर्यद्धि बाबूमहोदयः किलोदारतया कथयति स्म—'यदि चैकोऽपि साधुर्भगवद्भजनं साधनां वा करोति, तदा तदाधारेणान्येषामप्याश्रमनिवासस्याधिकारो भवति'। धन्योऽस्त्येवं विधो गुणग्राही महामानवः ! —"परगुणपरमाणून् पर्वतीकृत्य नित्यं, निजहृदि विकसन्तः सन्ति सन्तः कियन्तः" अर्थादन्यस्य स्वल्पानपि गुणान् बहून् मत्वा हृदयेन प्रसन्नतामनुभवज्जनः संसारेऽस्मिन् कोऽपि विरल एव भवति ।

श्रद्धेयो विरलामहोदयो यदा यदा स्वर्गाश्रमे पदं निदधे, तदा-तदा नैतत् सर्वथा भावयितुमवकाशं प्रदत्तवान् यद्धि सः स्वर्गाश्रमदेयनिधेरध्यक्षो वर्तत इति । एतावत्पर्यन्तं यत्र सामान्यानामतिथीनां स्वागतं विधीयते तथा स्वर्गाश्रमनिधे दर्शनीयं पीठमास्ते, स तदुपान्तिकं न कदापि जगाम । इत्थंविधा नन्वनेका घटना विद्यन्ते या युगलकिशोरविरलामहोदयस्यात्मगोपन-प्रवृत्तेः साक्षित्वमावहन्ति ।

स हि वास्तविकेऽर्थे सज्जनोऽभूत्, परोपकारपरायणः साधुश्चासीत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुभ कामनाओं सहित

डालमिया सिमेंट (भारत) लिमिटेड

डालमियापुरम् (तमिलनाडु)

"राकफ़ोर्ट" मार्का, डालमिया पोर्टलैण्ड एवं पोज़ोलाना सिमेंट
तथा
डालमिया रिफ़्रैक्टरीज़ के निर्माता ।

उड़िसा सिमेंट लिमिटेड

राजगंगपुर (उड़िसा राज्य)

"कोणार्क मार्का", डालमिया पोर्टलैण्ड एवं पोजोलाना सिमेंट
हर प्रकार और आकार की रिफ़्रैक्टरीज़, आर० सी० सी० स्पन पाइप्स तथा
प्रीस्ट्रैस्ट कंक्रीट सामान के निर्माता ।

DALMIA ENTERPRISES

मुख्य कार्यालय :
४-सिंधिया हाउस, नयी दिल्ली-१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महामना मालवीयो युगलकिशोरविरलामहाशयश्च

पण्डित-श्रीपद्मकान्तमालवीयः

येन प्रकारेण राजनीत्यां महात्मनो गान्धे-रेकान्तनिष्ठोऽनुयायी स्वर्गीयो यमुनालालबजाज-महाशयोऽभूत्तेनैव प्रकारेण धार्मिकीणां, सामाजिकीनां च सेवानां क्षेत्रे महामनसो मालवीय-महाभागस्य निष्ठावाननुयायी स्वर्गीयो युगल-किशोरविरलामहाशयो बभूव। विरलामहाशयस्य व्यक्तित्वं, कृतित्वं चापूर्वं बभूव। तस्याः परम्परायाः पुरुषानुक्रमस्यान्तो बभूव, ययोः सञ्चालकः, संवाहकश्च पूज्यो महामना मालवीय-महाभागः, पञ्चाम्बुकेसरी लाजपतरायस्तथा च स्वामी श्रद्धानन्दमहोदयोऽभूत्।

उपर्युक्तानां तिसृणामपि विभूतीनां जीवन-दर्शनेन युगलकिशोरमहाशयस्य व्यक्तित्वं निर्मितं बभूव। स्वर्गीयं महामनसं मालवीयमहाभागं धनबलेन स्वाश्रितं कर्तुं सर्वथाऽसम्भवमासीत्। स हि यौवनस्य प्रथमे प्रभात एव श्री-कीर्त्योः, पदप्रतिष्ठयोश्च मोहं त्यक्त्वा 'कामये दुःखतप्तानां प्राणिनामार्तिनाशनम्' इतीदं स्वस्य जीवनस्य सिद्धान्तं विधाय देशस्य, धर्मस्य, समाजस्य च बहुमुखीं सेवां जीवनपर्यन्तं चक्रे। अत्र सन्देहो नास्ति, यत्तस्यार्षचरित्रं, प्रोदात्तं ब्राह्मणत्वं च युगलकिशोरमहाशयं प्रभावयामासतुराचकर्षतुश्च। पूज्यो मालवीयमहाभागो—युगलकिशोराय जीवन-पर्यन्तं पुत्रायेव स्नेहं प्रददौ।

स्वर्गीयो युगलकिशोरमहाशयः संस्कारवान्, प्रतिभावांश्च व्यवसायो बभूव। स्वयौवनकाल एव स स्वात्मनो व्यावसायिक्याः प्रतिभायाः सफलतायाश्चेत्थं परिचयं प्रददौ यत्तात्कालिकाः प्रमुखा भारतीया उद्योगपतयो व्यावसायिका एव न; वरं च ब्रिटिशशासनमपि च तस्य मौलिकया व्यवसायनीतेस्तथा राष्ट्रिय-भावनायाः प्रभावं मेने।

युगलकिशोरमहाशये यौवनस्योषःकालादेव धर्म-समाजयोरुन्नयनस्य, परिष्कारस्य च भावना निहितासीत्। मालवीयमहाभागस्य सम्पर्के समागमनात्तस्यास्याः प्रवृत्ते रुत्तरोत्तरं विकासो बभूव। हिन्दु-धर्मस्य, समाजस्य चोन्नयनाय विकाशाय च सर्वादौ स हि सार्वजनिके मञ्चे, काश्यां सम्पन्ने राष्ट्रिय-हिन्दु-महासभाया अधिवेशने सम्मिलितो भूत्वा सक्रियं योगदानं प्रदत्तवानभूत्। सोऽयं युगलकिशोरमहोदयः स्वायुःक्रमेऽनुभवे, विद्यायाम्, यशसि च मालवीय-महाभागस्तस्य प्रच्छन्नां प्रतिभां पर्यैक्षत तथा च सभामञ्च एव तस्मात् प्रत्येकं प्रस्तावे, प्रत्येकं समस्यायां च परामर्शं गृह्णानोऽभूत्। मालवीय-महाभागस्यापेक्षया न्यून्यातिन्यूनोऽभूत्, तथापि मालवीयमहाभागो व्यक्ते रुच्चताया गरिम्णश्चातीव महान् परीक्षकोऽभूत्। सः स्वयं सम्मान-निरपेक्षो बभूव, किन्त्वन्येभ्योऽत्यधिकं सम्मानं प्रयच्छन्नासीत्। ऋषितुल्येन तस्य स्वभावेनाचरणेन च युगलकिशोरमहाशयो नन्वेतावदभिभूतोऽभूद्यत्तं स्वगुरुं मत्वा तं प्रति श्रद्धामास्थां च दधानोऽभूत्तथा मालवीयमहाभागः सदा तस्मिन् वात्सल्य-भावं ररक्ष। गच्छति काले हिन्दु-धर्मस्य, हिन्दु-समाजस्य चोत्थानाय युगलकिशोरमहाशयो मालवीयमहाभागस्य पूरको बभूव।

सोऽयं युगलकिशोरमहाशयः पूर्वं पूर्णत-आर्यसमाज-विचारधारामनुगामी बभूव। लाला-लाजपतरायेन तथा स्वामिश्रद्धानन्दमहाभागेन सह शुद्धि-कार्यार्थमार्यधर्मस्य प्रचाराय, हरिजनोद्धाराय च स मुक्तहस्तमगणितं च धनव्ययं कुर्वन्नासीद्यस्य लेखोल्लेखौ गणितपञ्जिकासु कदाचिदेव स्याताम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मालवीयमहाभागस्य स्नेहस्य, सङ्कल्पस्य च प्रभावाद् विरलामहाशयस्य श्रद्धास्था विशुद्धं सनातन-वर्णाश्रम-धर्मं प्रति वर्द्धितुमारेभे । पूज्यस्य मालवीयमहाभागस्येष्टदेवो भगवाञ्छ्रीकृष्णोऽभूत्तथा च श्रीमद्भागवते तस्यागाधा श्रद्धा, निष्ठा चाभूताम् । मालवीयमहाभागस्य सेयमास्था विरलामहाशयं भगवन्तं श्रीकृष्णं प्रत्याचकर्ष । स हि निराकारात् साकारस्योपासको बभूव तथा च भगवाञ्छ्रीकृष्ण एव तस्य जीवनस्येष्टदेवः समाराध्यश्च बभूव, यदा देहल्यां लक्ष्मीनारायणमन्दिरस्य मूलाधारस्य शिलान्यासो बभूव । अस्य मन्दिरस्य निर्माण-संकथापि च रहस्यपूर्णास्ते ।

मालवीयमहाभागो देशस्य, धर्मस्य, समाजस्य च हिताय योजना रचयति स्म, ताभ्यो रूपाकारौ प्रयच्छति स्म, ततस्तासां सञ्चालन-भारमन्येषां सुयोग्यानां जनानां स्कन्धयोः समर्पयति स्म ।

कालाकांकरस्थानात् प्रकाश्यमानाद् 'हिन्दुस्तान'—पत्रात् त्यागपत्रं दत्त्वा पृथग्भावग्रहणादनन्तरं मालवीयमहाभागो देशेऽत्र तथाविधानां समाचारपत्राणामावश्यकतामनुबभूव, यानि राष्ट्रस्यान्तर्ध्वनेः समर्थनं प्रसारं च कर्तुं प्रभवेयुः । प्राप्त एवावसरे स देहल्यां 'हिन्दुस्तान-टाइम्स' इत्यस्य पत्रस्य तथा च प्रयागात् 'लीडर'-नामकस्य पत्रस्य स्थापनां चक्रे तथा तयोः सञ्चालन-भारं सुयोग्यानाम् जनानां हस्तेषु समर्प्य स्वयं पृथग् बभूव ।

नवदेहल्या निर्माणं सञ्जातमभूत्तस्या विकासश्चोत्तरोत्तरं जायमानोऽभूत् । तत्रांग्लानां चर्च-संज्ञकानि प्रार्थना-गृहाणि निरमीयन्त, मोहम्मदीयानां मस्जिदनामकानि च निरमीयन्त, किन्तु हिन्दूनां देवालयस्याभावो मालवीयमहोदयं तुतोद । स हि वायसरायाद्धिन्दु-मन्दिरस्य कृते भूमिमवाप्तुमनुमतिं जग्राह, ततः पुनर्गणेशदत्तं गोस्वामिनमाजुहाव । तमुवाच-गोस्वामिन्, कीदृग्भवान् सनातन-वर्णाश्रम धर्मानुयायी वर्तते नु ? देहल्यामेकमपि सनातनधर्मिणां हिन्दूनां स्वकीयं मन्दिरं नास्ति । अस्माकमियमिच्छास्ते यदेकमेतादृशं मन्दिरं निर्मितं भवेद् यस्मिन्, सर्ववर्गीया हिन्दवो गत्वा भगवद्दर्शनं कुर्युः । एवमुक्त्वा मालवीयमहाभागो मन्दिरस्य मान-चित्रं तथा तस्य सम्पूर्णाया योजनायाः पूर्णं प्रारूपं गोस्वामिनः पुरतो निदधे । यदा गोस्वामी तदिदं ददर्श यत् सैषा योजना पञ्चाशल्लक्षमुद्रा व्ययसाध्यास्ते, तदा स स्तब्धो बभूवोवाच च—"महाराज, नैतत् कार्यं मम वशे ।" तदा धैर्यं प्रयच्छन्मालवीयमहाभागोऽभ्यधात्कार्यमारभताम् । भगवति विश्वास आधीयताम् ।

अथ गोस्वामिवर्यः कार्यारम्भमकारयत् । सः स्वयं कियल्लक्षरूप्यकाणि संजग्राह, तथापि कार्यमग्रे प्रगतिं नासादयितुं शशाक । सर्वमपि तेन संगृहीतं धनं मूलाधारनिर्माण एव समाप्तिं जगाम । समुद्विग्नो गोस्वामिमहाशयो मालवीयमहाभागस्यान्तिकमाजगाम । मालवीयमहोदयस्तं पुनर्धैर्यमाबन्धयत्तथा चैकदा सः श्रेष्ठिवर्यं युगलकिशोरविरलामहाशयमभ्युपेत्योवाच—"युगलकिशोरमहाशय, गोस्वामी गणेशदत्तमहोदयो मन्दिरमेकं निर्मापयन्नास्ते, तद्गत्वा दृश्यतां तु तावत्, कीदृगिव निर्मीयते तत् ? कीदृशं तद्भवितुमर्हतीति सम्मतिरपि प्रदीयताम् । तदिदं मन्दिरमेकस्य बहोर्महतोऽभावस्य पूर्त्या साकं हिन्दु-समाजस्योत्कर्षस्य साधनं भावि ।"

अथैकदा श्रेष्ठिवर्यो युगलकिशोरविरलामहाशयः पर्यटनस्य व्यपदेशात्तत्र जगाम । मन्दिरस्य मूलाधारं तन्मान-चित्रं च दृष्ट्वा स गोस्वामिनमुवाच—"गोस्वामिन् ! किमर्थं हिन्दुधर्मस्य नासावच्छेदं कारयन् वर्तते भवान्, किमेतादृशमेव मन्दिरं भविष्यति ?"

गोस्वामिमहोदयोऽवादीत्—"मालवीयमहाराजो मामत्र कर्मणि प्रसह्य पाशबद्धमिवाकरोत्, तदधुना तु यथा-तथा निर्माण्यमेव ।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"साधु, श्वो मयामिलतु भवान्"—इत्यभि-धाय युगलकिशोरमहाशयस्ततोऽगात् तथा च यदा गोस्वामिवर्यस्तेन मिलितु जगाम, तदा स तमु-वाच यद्वयं भवतो, मालवीयमहाभागस्य चेच्छा-पूर्ति करिष्यामहे। अस्माकमप्येकोऽभिलाषोऽस्ति यत्तदिदं मन्दिरमस्मत्पितुर्नाम्ना निर्मीयेतेति। गोस्वामिवर्येण तदिदं सर्वात्मना स्वीकृतम्, यदा च मालवीयमहाभागाय रुचितं तदा माल-वीयमहोदयेनोक्तम्:—"युगलकिशोरोऽयमद्वितोयः पुरुषोऽस्ति, तस्य सङ्कल्पः सर्वथोचितोऽस्ति। भवांस्तदिदं कार्यं तस्मै समर्पयतु।" इत्थं तदिदं श्रीलक्ष्मीनारायणमन्दिरं यदद्यत्वे विरला-मन्दिरमिति नाम्ना विख्यातमास्ते, निर्मितं बभूव तथा च तन्निर्माणे, तच्छिल्पे, पूजन-प्रव-चनादिषु, विधाने तथा व्यवस्था-प्रबन्धप्रभृतिषु युगलकिशोरमहाशयस्य प्रतिभा चास्था च पूर्ण-रूपेण प्रस्फुटिते बभूवतुः ततस्तु पुनर्युगल-किशोरमहाशय उत्तरोत्तरं सनातन-धर्मस्य प्रमु-खेषु तीर्थेषु मन्दिराणाम् धर्मशालानां च निर्माणं कारयित्वाऽक्षय्यां कीर्तिं प्राप्तवान्। साकमेव भगवन्तं श्रीकृष्णं प्रति तस्य श्रद्धाऽऽस्थापि चोत्तरोत्तरं वर्द्धितुमारेभे। मालवीयमहाभागस्य प्रस्तावानुसारं सः प्रतिदिनं गीतायाः पाठपा-रायणं करोति स्म। श्रीकृष्णस्य भगवतः पूजनं कुरुते स्म।

युगलकिशोरमहाशयोऽस्य समयस्य कर्णो मन्य-मानोऽभूत्। न हि याचकेभ्यस्तस्य किमप्यदेय-मासीत्। स हि कस्यापि याचनां निष्फलां न कर्तुं सङ्कल्पमिव कृतवानासीत्। विरला-बन्धूनां नाम्नां विभिन्नेषु क्षेत्रेषु यत्कोटिशो रूप्यकाणां दानं बभूव, तस्याधिकांशो युगलकिशोरमहाशय-स्यैव दानरूपो बभूव। स सदैव स्वाभिधानं गोपायंस्तस्थौ। कस्मा अपि किमपि किंविधमपि च साहाय्यं दत्वा तस्मात् प्रतिदानस्याकाङ्क्षा तस्मिन्न कदापि बभूव। स हि विशुद्धः सात्त्विको दानी बभूव। राजनीत्या साकं तस्याधिकः सम्बन्धो वा प्रयोजनं किमप्यभूताम्।

मालवीयमहाभागो हिन्दु-धर्मस्य, हिन्दु-तीर्थानां, हिन्दु-जातेश्चाभ्युत्थानायोद्धाराय च यत्किमपि कार्यं करोति स्म, तत्र सर्वत्र-सर्वे-ष्वपि कार्येषु विरलामहाशयस्य गुप्तो वा प्रकट-रूपो वा सहयोगोऽवश्यं भवति स्म। यदा मालवीयमहाभागो मथुरास्थितायाः श्रीकृष्णस्य जन्म-भूमेरुद्धारं कर्तुम् सङ्कल्पं चकार, तदा युगलकिशोरविरलामहाशयोऽस्मिम् कार्ये तस्य दक्षिणहस्तो बभूव। अद्यत्वे सैव जन्मभूमिः श्रीकृष्ण-जन्मस्थान-सेवासङ्घन्यासान्तर्गता देश-विदेशानां लोकैर्दृश्यते परिचीयते च। तत्र कैश्चिल्लक्षाधिकै रूप्यकैः श्रीमद्भागवत-भवनं निर्माप्यमाणमास्ते। तस्यैव जन्मस्थानस्य मुख-पत्रं "श्रीकृष्णसन्देशः" इति वर्तते, यस्य प्रवर्तकः स्वर्गीयो युगलकिशोरबिरलामहाशयोऽस्ति तथाद्य तस्यैव पुण्यतिथावनेन सेवासङ्घेन तस्य दिवङ्ग-तात्मानं प्रति श्रद्धाभिव्यक्तये सोऽयं स्मृति-सन्दर्भ-ग्रन्थः प्रकाश्यमानो वर्तते।

श्रद्धा विषयकं प्रकरणमाजगाम ततो भग-वतो वाक्यमेतत् स्मृतिपथमवततार "योयच्छ्रद्धः स एव सः।" इति। भगवतोऽस्य कथनस्य प्रत्य-क्षानुभवो मे तस्मिन् समये बभूव, यदा पूज्यस्य महामनसो मालवीयमहाभागस्य प्राणाः कण्ठ-गता अवरुद्धा आसन्। यत्र तच्छय्यासीत्तस्याः सम्मुखमेव हिन्दु-विश्वविद्यालये निर्माप्यमाणस्य विश्व-नाथ-मन्दिरस्य काष्ठप्रतिरूपं संस्थापित-मभूत्। मालवीयमहोदयस्य दृष्टिस्तस्मिन्नेव प्रतिरूपे संस्थिताऽभूत् दिनद्वयपर्यन्तं त निरन्तरं यमयुद्धं कुर्वाणं दर्शं दर्शं वयमेतदेव चिन्तयाना आस्म यत् सोऽयं पितास्माकं बाबू-महाभागो नियमेन हि भगवतः सकाशादनायासं मृत्युं कामयानस्तथा जीवनपर्यन्तं स्तोत्र-प्रार्थनाः कुर्वंस्तस्थौ, तदा पुनः किमर्थमस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राणाः प्रयाणं न कुर्वन्तीति। नास्माक बुद्धौ कोऽपि बोधोऽवकाशं लेभे। तृतीये दिनेऽकस्माद् युगलकिशोरमहाशयस्तत्रागतः। तं दृष्ट्वैव मालवीयमहाभागस्य चेतना पुनः प्रास्फुरत् तथा युगलकिशोरमहोदयस्तस्य मनोभावाँस्तत्कालं बुध्वोवाच—"महाराज, अहं प्रतिजाने यद् विश्वनाथ-मन्दिरं भवदिच्छानुकूलं निर्मितं भविष्यति। भवन्तः शांतिपूर्वकं प्रस्थानं कुर्वन्तु।" एतच्छ्रवणसमकालमेव मालवीयमहामागस्य मुखाकृतावपूर्वाभाऽद्भुतशान्तेश्चालोकश्च व्यद्योतेताम् तथा युगलकिशोरमहोदयस्य प्रस्थानानन्तरमिष्टमन्त्राञ्जपन् स गोलोकवासी बभूव।

पूज्यस्य महामनसो मालवीयमहामागस्य तथा स्वर्गीयस्य श्रेष्ठिवर्यस्य युगलकिशोरविरलामहोदयस्य च मिथः सम्बन्धः श्रीकृष्णार्जुनयोरिव संतस्थे। युग-युग-पर्यन्तं तयोः कीर्तिपताकापि च तथैव प्रस्फुरन्ती—दोधूयमाना—संस्थास्यति।

कोटचक्रम्।

ईश्वर उवाच।

कोटचक्रं प्रवक्ष्यामि चतुरस्रं पुरं लिखेत्। चतुरस्रं पुनर्म्मध्ये तन्मध्ये चतुरस्रकम् ॥१॥
नाडीत्रितयचिह्नाढ्यं मेषाद्याः पूर्वदिङ्मुखाः। कृत्तिकापूर्वभागे तु आश्लेषाग्नेयगोचरे ॥२॥
भरणी दक्षिणे देया विशाखां नैर्ऋते न्यसेत्। अनुराधां पश्चिमे च श्रवणं वायुगोचरे ॥३॥
धनिष्ठाश्चोत्तरे न्यस्य ऐशान्यां रेवतीं तथा। वाह्यनाड्यां स्थितान्येव अष्टौ ह्यृक्षाणि यत्नतः ॥४॥

रोहिणीपुष्यफल्गुन्यः स्वाती ज्येष्ठा क्रमेण तु।
अभिजिच्छततारा तु अश्वनी मध्यनाड़िका ॥५॥

कोटमध्ये तु या नाडी कथयामि प्रयत्नतः। मृगश्चाभ्यन्तरे पूर्वं तस्याग्नेये पुनर्वसुः ॥६॥
उत्तराफाल्गुनी याम्ये चित्रा नैर्ऋतसंस्थिता। मूलन्तु पश्चिमेन्यस्योत्तराषाढ़ान्तु वायवे ॥७॥
पूर्वभाद्रपदा सौम्ये रेवती ईशगोचरे। कोटस्याभ्यन्तरे नाड़ी ह्यृक्षाष्टकसमन्विता ॥८॥
आर्द्राहस्ता तथाषाढ़ाचतुष्कश्चोत्तरात्रिकम्। मध्ये स्तम्भचतुष्कन्तु दद्यात् कोटस्य कोटरे ॥९॥

एवं दुर्गस्य विन्यासं वाह्ये स्थानं दिशाधिपात्।
आगन्तुको यदा योद्धा ऋक्षावान् स्यात् फलान्वितः ॥१०॥
कोटमध्ये ग्रहाः सौम्या यदा ऋक्षान्विताः पुनः।
जयं मध्यस्थितानान्तु भङ्गमागामिनो विदुः ॥११॥

प्रवेशभे प्रवेष्टव्यं निर्गमभे च निर्गमेत्। भृगुः सौम्यस्तथा भौम ऋक्षान्तं सकलं यदा ॥१२॥
तदा भङ्गं विजानीयाज्जयमागन्तुकस्य च। प्रवेशर्क्षचतुष्के तु सङ्ग्रामश्चारभेद् यदा ॥१३॥

तदा सिद्धयति तद्दुर्गं न कुर्य्यात्तत्र विस्मयम् ॥१३॥

इत्यादि महापुराणे आग्नेये कोटचक्रकथनं नामाष्टाविंशत्यधिकशततमोऽध्यायः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विष्णु-सायुज्यं प्राप्तः श्रीविरलामहोदयः

द्राक्तरः श्रीहरिदत्तशास्त्री

स जयति गोकुल-सदनः,
सरसिजवदनः शिशुर्घनश्यामः।
पद-नख-रुचि-जित-मदनः
कृत-खल-कदनः कृपाजलधिः ॥१॥

"वत्स, भक्तिश्च मुक्तिश्चेत्यनयोर्द्वयोस्ते कतरदभीष्टम् ?" भगवता तदेतत् पृष्टे सति भक्तबालको विष्णुस्वामी प्रोवाच "प्रभो, भक्तिमहं कामये, न तु मुक्तिम्।" तस्यास्य भक्तिवरणस्य विषये निर्णयस्य 'भक्तिनिर्णय' इत्यस्मिन् ग्रन्थे लिखितमस्ति—

सैव प्रौढा विरक्तिः सुचरितरचना
सम्प्रयुक्तिः प्रसिद्धा,
सैवान्तःसंशयादिक्षयकृदुपनिषत्तत्त्व-
विद्याप्रसक्तिः।
बोधव्यक्तिश्च सैव प्रकटितपरमानन्द-
सर्वस्वभुक्तिः,
सैवाद्वैता च मुक्तिः कथमपि कमला-
कामुके या तु भक्तिः॥

भक्तिशब्दस्यार्थः केवलं सेवाकरणमात्रं नास्ते यदि च प्रोच्येत, यद् 'भज्' धातोरर्थः श्रवणमननादिभिः सहितः सेवाविशेषोऽस्तीति, तदेत्थं सतोऽपि धात्वर्थे कल्पना-गौरवस्यापत्तिः स्यात्। अत ऐहिकेषु वाऽऽमुष्मिकेषु वस्तुषु वैराग्यपूर्वकं भजनीये-इष्टदेवे मनोवृत्तेर्योजनमेव हि 'भक्ति' वर्तते। वस्तुतो भक्तिरेव हि मुक्तेर्द्वारमास्ते। नवधा वैकादशधा भेदयुक्ता भक्तिरिवाते। मुक्तेरपि चैकधा वा चतुर्धा भेदाः सन्ति। एकवादी जगद्गुरुः शंकराचार्योऽस्ति तथा चातुर्विध्यवादिनो वैष्णववेदान्तसम्प्रदायस्य प्रवतका विभिन्ना आचार्याः सन्ति। आचार्यो रामानुज ईश्वरो जीवः प्रकृतिश्च-इत्येषां त्रयाणां तत्त्वानां नित्य-सत्तां मन्यते। अत एव हि तस्य मतं 'विशिष्टाद्वैतमित्युच्यते, यदनुसारं विशिष्टस्य वाऽचिद्विशिष्टस्य ब्रह्मतत्त्वस्याऽभेदः स्वीकृतोऽस्ति—

"विशिष्टयोरद्वैतं विशिष्टाद्वैतम्।"

द्वैताद्वैतमतस्य प्रवर्तकस्य दार्शनिकस्य निम्बार्काचार्यस्य मतेन "जीवे भोक्तृत्वमेव भवति नियन्तृत्वं न तथा चेश्वरे नियन्तृत्वमेव भवति भोक्तृत्ववं न, प्रकृतिर्भोग्यैवास्ते, तदिदं तत्त्वत्रयं नित्यम्।" द्वैताद्वैतस्यार्थो धर्म-धर्मिणोर्भेदाभेदोऽस्ति—यथा सूर्यः प्रकाशादभिन्नोऽस्ति, प्रकाशस्वरूपोऽस्ति तथा प्रकाशाश्रयत्वाद् भिन्नोऽपि चास्ते। द्वैताद्वैतसम्प्रदाये भोग्यं तत्त्वं (अचित्) त्रिविधं वर्तते प्राकृतम्, अप्राकृतम्, कालश्च। सांख्यशास्त्रोक्तानि चतुर्विंशति-तत्त्वानि प्राकृतानि विद्यन्ते। भगवतो मुखमण्डलं सर्वतो वर्तमानं तेजोमण्डलं, भगवतो लोकस्तथा च तस्य शंखादयोऽलङ्कारा अप्राकृताः सन्ति, कालोऽपि चैकोऽचित्पदार्थोऽस्ति पृथक्। नियन्तुर्भगवतश्चत्वारे व्यूहा विद्यन्ते—वासुदेवः, संकर्षणः, प्रद्युम्नोऽनिरुद्धश्चेति। मोक्षमार्गः प्रपत्तिः किं वा शरणागतिर्वर्तते।

पुष्टिमार्गस्य मतमास्ते यज्जगति सद्रूपमस्ति, जीवे सत्तथा चैतन्यरूपमास्ते, ब्रह्मणि सत्, चित्, आनन्दश्चेति त्रीण्यपि रूपाणि वर्तन्ते। आर्यसमाजस्य प्रवतक ऋषिर्दयानन्दमहाभागोऽपि चैतत्तत्त्वत्रयमामनुते, ब्रह्मणस्त्रिभ्यो धर्मेभ्य एकैकस्य तिरोभावो जायमानो भवति, नैतन्मन्यते। सम्भवतो मथुरायां निवासाद् गुर्जरब्राह्मणत्वाच्च तस्मिन् स एष प्रभावो निपतितः स्यात्। श्रीवल्लभाचार्यः शुद्धाद्वैतवादी वर्तते। अस्य मतेन ज्ञानं, कर्म चेति द्वेऽपि च मोक्षस्य साधनेस्तः। अस्यापि समर्थनमृषिर्दयानन्दः करोति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वल्लभाचार्यस्य पुष्टिमार्गो विष्णुस्वामिनः परम्पराया वर्तते।

"कृष्ण! तवास्मि" अस्य पञ्चाक्षरी-मन्त्रस्य दीक्षां स्वयं भगवान् कृष्णो वल्लभाचार्याय प्रददौ। पुष्टिमार्गानुसारं विष्णोरथवा कृष्णस्य दर्शनमेव मुक्तिरास्ते। तेनैव साकं वैकुण्ठे निवासः 'सालोक्या' मुक्तिरस्ति, तस्य पार्षदोभूत्वा तत्सेवासाधनं 'सामीप्य'-मुक्तिरस्ति। भगवद्विग्रहस्य धारणं, तद्गुणानामात्मीयकरणं 'सारूप्या' मुक्तिरास्ते तथा च यं विना भगवानपि सुखं न विन्देत, यस्यावधानं सोऽपि रक्षेद्, एवं विधो भक्तः सायुज्य-मुक्ति प्राप्तोऽभिधीयते। समानस्यैश्वर्यस्य प्राप्तिः 'सार्ष्टि'-मुक्तिर्भवति। ऋग्वेदस्य—

द्वा सुपर्णा सयुजा सखाया,
समानं वृक्षं परिषस्वजाते॥

मन्त्रे सयुजा-शब्दः 'सायुज्य-मुक्ति' प्रतिसङ्केतं कुर्वाणोऽस्ति किन्तु 'सायुजस्यार्थ ऐक्यं नास्ते। यतः श्रीवेंकटनाथाचार्यः 'तत्त्वमुक्ताकलापे' लिलेख यद्धि—

सालोक्यादिप्रभेदा ननु परिपठिताः
कापिमोक्षस्य नैवम्,
सायुज्यस्यैव तत्त्वात्तदितरविषये
मुक्तिशब्दस्तु भाक्तः।
तस्मिंस्तेऽपि त्रयः स्युस्तदपि च
सयुजोर्भाव इत्यैक्यरम्यं
युक्साम्यं लोक साम्यादिवदपरधियां
तावतैक्यस्य मोहः।

—तत्त्वमुक्ताकलापः २.६७

अर्थात् प्रोक्तासु पंचप्रकारास्वपि मुक्तिषु सायुज्यमेव हि मुक्तेर्वास्तविकं रूपं वर्तते। अन्याश्चतस्रस्तु साम्यमात्रत्वाद् गौणरूपा भवन्ति। अत्रैतदपि च ज्ञातव्यं भवति यत् 'सयुक्'-शब्दो नन्वेकत्ववाचको नास्ति। श्रीमद्भागवतस्य—

सालोक्य-सार्ष्टि-सामीप्य-सारूप्यैकत्वमायुत।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः॥

—श्रीमद्भागवतम् ३.२९.१३

अस्य श्लोकस्य टीकां कुर्वाणः श्रीधरस्वामी 'एकत्व'—पदात् सायुज्यभक्तेरेवार्थं जग्राह तथा 'सार्ष्टि'—भेदं संयोज्य स मुक्तेः पञ्चभेदान् मेने। परन्तु मम मतेऽत्रापि 'एकत्व'—पदस्यैकरूपता-अर्थाद् भगवत्साम्यं मन्तव्यम्। एवं 'सार्ष्टि' पदं सह आसम् तत्र ऋष्टिः 'सृष्टिः' भोगैश्वर्याणां यत्र सा मुक्तिः, स मोक्षो वा 'सार्ष्टिः' अनेन प्रकारेण विग्रहं कृत्वा समानैश्वर्यवाचकं मन्तव्यं भवति। इत्थं सार्ष्टि पदमपि सायुज्यपरकं मन्तुं शक्यते। यतो मुक्तेश्चत्वारो भेदा एवाधिकं प्रसिद्धाः सन्ति, न तु पञ्च। शास्त्रानुसारं यो हि जनो मन्दिर-निर्माणस्य कार्यं कारयति, स निष्पापो भवति:—

देवागारं करोमीति मनसा यस्तु चिन्तयेत्,
तस्य कायगतं पापं तदह्ना विप्र नश्यति।
कृते नु किं पुनस्तस्य प्रासादे विधिमेव तु॥

—श्रीहयशीर्षपांचरात्र

तथा च यो हि जीर्णमन्दिरस्योद्धारं कारयति, स विष्णु-सायुज्यं प्राप्नोति।

पतितस्य च यः कर्ता पतमानस्य रक्षिता।
विष्णोरायतनस्येह स नरो विष्णुलोकभाक्॥

—श्रीविष्णुरहस्यम्

भवेद् बहुविधं तस्य वेश्म तत्र स्वशक्तितः।
शास्त्रानुसारतः कुर्यादेव वासोचितं प्रभोः॥

—श्रीहरिभक्तिविलासः

उक्तस्य शास्त्रस्य प्रमाणानुसारं तदिदमसंदिग्धमास्ते यत् स्वर्गीयः श्रीयुलकिशोरविरलामहाशयो निष्पापो निष्कलङ्को भगवद्भक्तोऽभूत्। मन्दिराणां निर्माणं कारयित्वा, प्राचीनमन्दिराणां जीर्णोद्धारं च कारयित्वा स मानवजीवनस्य लक्ष्यं सायुज्य-पदं प्राप्तवान्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

—: पद्मपत्रमिवाम्भसा :—

श्रीप्रकाशवीरशास्त्री

राज्यं तु स्वकीयं बभूव । शासन-सूत्र-परिपालकेषु जनेषु हिन्दूनां संख्याप्यधिका वर्तते । परं हिन्दु-राज्यं न बभूव । इमे ते शब्दा आसन्, यन्मृत्यो: कतिचिद्दिनेभ्यः पूर्वं श्रीयुगलकिशोरविरलामहाशयो महता विषादयुक्तेन मनसोवाच । एवं ब्रुवाणस्य तस्य कण्ठो गद्गदः सन् समवरुरोधेव । स पुनरुवाच—"आम्, केवलमियमेव केवलमेकेच्छा जीवनेऽवाशिष्यत । अधुना तु भवन्त एव तदिदं द्रक्ष्यन्ति । हिन्दु-सभ्यता, संस्कृतिश्च कथं व्यापके विधीयेताम् ? अमीषामेव विषयाणां चिन्तने तस्य जीवनस्यैकैकः क्षणो व्यतीतो भवति स्म । हिन्दूनामाघातस्य चर्चां क्वचित् स शृणोति स्म तदोद्विग्नो विषण्णश्च भवति स्म । परन्तु तेषामुन्नतेरभ्युदयस्य च समाचाराञ्छृणोति स्म, तदोत्फुल्लः सन् मोऽतीव हर्षमनुभवति स्म । एकवारमिण्डोनेशियातः पत्रमेकं तत्समीपमाजगाम, यस्मिल्लिखितमभूद्यत्तत्र पञ्चाशत्सहस्रसंख्यका लोका हिन्दुधर्मस्य दीक्षां जगृहुरिति । तेन मिलितुं यः कोऽपि तत्समीपं गच्छति स्म, शीघ्रमेव हि तत्पत्रं तं श्रावयति स्म, कथयति स्म च यदनयैव गत्या हिन्दु-धर्मस्य प्रचार-कार्यं चलेदिति ।

महामनसः पण्डितमदनमोहनमालवीयमहाभागस्य प्रभाव-मुद्रा तज्जीवने, विचारेषु च स्पष्टं दृग्गोचरोभवति स्म । यथा मालवीयमहाभागो हिन्दुमात्रमेकं ध्वजमधः संस्थापयितुमियेष, सैव कल्पना युगलकिशोरमहोदयस्याप्यभूत् । देहल्याः श्रीलक्ष्मीनारायणस्य मन्दिरस्य निर्माणमपि सोऽनयैव भावनयाऽकारयत् । मन्दिरस्यास्य पृष्ठभागे तेषां वीरपुरुषाणां प्रस्तर-प्रतिमाः सन्ति, ये देशस्यार्थे, धर्माय च स्वबलिदानं चक्रुः । श्रीलक्ष्मीनारायणस्य मन्दिरसमीपं भगवतो बुद्धस्यापि चैकं भव्यं मन्दिरं निर्मितमास्ते । मन्दिरेऽत्र जैनतीर्थङ्कराणां, साधूनां सतां महात्मनां च तदादीनामादर्शवाक्यान्यपि दृष्टयानयैव सोऽलेखयत् । बौद्ध-धर्मस्यारम्भो भारतादेव बभूव । विश्वस्यानेकेषु देशेष्वद्यत्वे तस्य प्रसारो विद्यते । बुद्ध-मतस्यानुयायिनो भारतं स्वमतस्योद्गम-स्थानं मन्यन्ते । श्रीयुगलकिशोरविरलामहोदयोऽत्रापि च पर्याप्तं प्रयत्नशीलोऽभूद्यत्कथमपि बौद्धाश्चापि स्वात्मानं हिन्दु-धर्मस्यैवैकमभिन्नमङ्गं मन्येरंस्तथास्यां शृंखलायां क्वचिद्दौर्बल्यमागतमास्ते, सापि दृढतां नीयेतेति एतदर्थम् स कांश्चन सुयोग्यान् विदुषस्तथा दक्षान् प्रचारकांश्चापि प्रेषयामास । अर्थ-सम्पन्नेषु जनेषु प्रायेणैवं विधा भावाः स्वल्पाल्पा एव दृश्यन्ते । परन्तु स तत्रापवादरूपोऽभूत् । कियद्दिनेभ्यः पूर्वं स कुतोऽप्येतदजानात् यदण्डमान-निकोबारद्वीपयोर्न किमपि हिन्दु-मन्दिरमास्त इति । तस्मादेव तत्रैषोर्धर्मसम्प्रदायानुयायिन आंग्ला जनाः स्वकीयं भ्रमजालपाशमनायासं वितन्वानाः वर्तन्ते । ततस्तु पुनर्वक्तव्यमेव किमासीत्, स हि तत्कालमेव तत्र देव-मन्दिर-निर्माणार्थं तत्कालीनं पुनर्वासमन्त्रिमहोदयं श्रीमहावीरत्यागिनं लिलेख । नेफानागालैण्डप्रभृतिषु सीमाक्षेत्रेष्वपि स कांश्चन निष्ठावतः प्रचारकान् प्रेषयितुं व्यापके स्तरे चिन्तयन् बभूव । कार्यं चाप्यत्र कापि प्रगतिरप्यभूत् ।

भारते स स्वसङ्कल्पेन यानि कानि च धर्म-मन्दिराणि निरमापयत्तेषामाकार-प्रकार एव हि पृथग्विधो वर्तते । तेषां शिल्प-रचनामालोक्यैव तदिदं सरलतयाऽवबोद्धुं शक्यते यन्मन्दिरेष्वेतेषु श्रेष्ठिवर्यस्य युगलकिशोरविरला-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महोदयस्य धनमुपायोज्यतेति । अथ चांग्लशासन-समये भूपाल-हैदराबादावितीमे द्वे तथाविधे केन्द्रे ऽभूताम्, यत्र हिन्दूनां स्वस्य धार्मिक-कृत्यानां सम्पादने पर्याप्तं विघ्नबाधाः समुपास्थाप्यन्त । परन्तु तयो र्द्वयोरपि राज्ययोर्भारते विलयादनन्तरं स्थिति मनाक् परिवर्तनमासादयत् । ततस्तु पुनः किमभूत्, स हि प्रोक्तयो-स्तयोर्द्वयोरपि च नगरयोः सर्वोच्चयोः स्थानयोः प्रोत्तुङ्ग-भव्य-मन्दिरयोर्निर्मापणस्य सकल्पं चक्रे । भूपाले तु तन्निर्माणं भूत्वा परिपूर्णतामपि जगाम । हैदराबादनगरेऽपि च भूपाल इवैवैकस्यां पर्वताधित्यकायामुच्चायां तथाविधमेकं मन्दिरं निर्मातुमुद्युक्तोऽभूत् । भारतेऽत्र कोऽपि चैक एव जनः खल्वेतावति बृहति प्रमाणे धर्ममन्दिराणां निर्माण-सूत्र-जालं विस्तारितवान् भवेत्, स युगलकिशोरविरला-महाशय एवासीत् ।

अयोध्यायां बर्बरनाम्ना यवनशासकेन मर्यादापुरुषोत्तमस्य भगवतः श्रीरामचन्द्रस्य जन्म-स्थानं मस्जिदरूपे परिवर्तितमकारि । परन्तु कतिचिद्भ्यो दिनेभ्यः पूर्वं तत्र पुनर्भक्त-जनानां केषांचित् प्रयासेन मूर्ति-स्थापना सम-भूत् । स हि सम्वादेनानेन यत्र संतोषं लेभे, तत्र मथुरानगर्यां श्रीकृष्णस्य भगवतो जन्म-स्थाने-ऽवरङ्गजेबद्वारा निर्मितं मस्जिदं दर्शं दर्शं स दुःखमप्यनुभवंस्तस्थौ । सोऽनेकबारमकथयत्—तद्दिनं कदा नु खलु भविष्यति, यदैतदैतिहासिकं धर्मस्थानं तस्यैवात्मनोऽनुयायिनामधिकारान्त-र्भुक्तं स्यात् ?

दानोत्सर्गेऽपि तस्यात्मनः ख्यातिर्देशेऽना-द्वितीयासीत् । परन्तु दानात् पूर्वं स पात्रकुपा-त्रयोः परीक्षणमवश्यमेव कर्तुं ववाञ्छ । न स कदाचिदप्युपयोगिनि कार्ये धनत्यागाद्विरतो बभूव । परन्तु यदा-कदा केचिज्जनास्तस्य दान-वीरताया अनुचितमपलाभमपि चावर्जयन्ति-स्म । इतिहासो मध्ययुगे वर्तमानं तमिमं स्वस-दृशमद्भुतं दानवीरं न कदापि च विस्मर्तुं पारयेन्नाम । देहल्या विरला-भवनं यत्र विगतं कमपि समयं यावद्राजनीतिकानां गतिविधीनां केन्द्रमभूत्, तत्र श्रीयुगलकिशोरविरलामहोदयस्य निवासस्थानत्वात् तद्धि सांस्कृतिकानां गति-विधीनामपि च केन्द्रं तस्थौ । लक्ष्मीपुत्रोऽपि सन् स जले कमलमिवात्र जगति निवसन् सदा धार्मिकेषु, सामाजिकेष्वेव कार्येषु रुचिमाददे । श्वेतवस्त्रवेशोऽसौ साधुश्चिराय देशस्येतिहासेऽज-रामरः शाश्वत स्थास्यति ।

शुभ कामनाओं के साथ

* इन्डो फॉरेन एजेन्सीज् *

२३, सर फिरोजशाह मेहता रोड़,

बम्बई – १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिन्दू-समाजस्य-भविष्य-निर्माता

श्रीहरिदयालोदेवगुरणः

स्वर्गीयेन श्रेष्ठिवर्येण युगलकिशोरविरला-महोदयेन साकं मिलनस्य, विचारविनिमयस्य च केवलं वारद्वयमेवाहमवसरमासादयम्। अस्मिन् स्वल्प-परिचये- एवाहमन्वभवम्, यत् स न केवलमुद्योगपतिरेवापि त्वेको हिन्दुत्वाभिमानी स्वधर्मस्य संस्कृतेश्च सेवायां समर्पितो जनश्चापि बभूवेति। इदं मे प्रतीतम् यत् सम्भवतो धनार्जने तस्य तावती रुचिर्नासीद्यावती विषयेऽस्मिन् बभूव यद्धिन्दु-समाजः सङ्घटितोभवच्छक्तिशाली भवेत्तथा चापहापितं गौरवं पुनः प्राप्नुयात्। तस्य कायो मनो धनं चास्यैव ध्येयस्य साधनायां समर्पितमभूत्। स खलु सुदृढोऽविचलश्च राष्ट्रवादी हिन्दुरासीत्। तस्यासौ धारणाभूद् यद्वर्तमानभारतं हिन्दु-राष्ट्रं मत्वा, हिन्दु-धर्ममस्य राज्य-धर्मं घोषितं कुर्युर्देशवासिन इति। वीरः सावरकर इव तथा च डाक्तर हैडगेवार इव सः सनातन-वर्णाश्रमधर्मानुयायिनः आर्यसामजिकाञ्जैनान्, बौद्धान्, सिक्खाँश्च हिन्दु-समाज स्यैवाङ्गं मेनेऽत एव हि तानेतान् सर्वान् हिन्दुत्वस्य मणिमालायाः स्वर्णसूत्रे सुगुम्फितान् द्रष्टुं ववाञ्छ। हिन्दु-समाजस्य सङ्घटनस्योद्देश्येन कार्यं कुर्वद्भिस्तस्योदारं समर्थनं सदैव प्राप्यमाणमभूत्। स हि राजनीत्यां सक्रियं भागं नो जग्राह, परन्तु धार्मिके तथा सांस्कृतिके क्षेत्रे सदैवाग्रणीस्तस्थौ। विगतेषु पञ्चाशद्वर्षेषु कदाचिदेव हिन्दूनामेवंविधो धार्मिकः, सामाजिकः, सांस्कृतिकश्च प्रयासः स्याद्यत्र विरला-परिवारस्य, विशेषतो दिवङ्गतस्य श्रीयुगकिशोरविरलामहोदयस्य प्रमुखं योगदानं न भवेत्। देशस्य प्राचीनानां धर्मस्थानानां जीर्णोद्धारः, आदर्शभूतानां धर्मसंस्थानानां निर्माणं, शिक्षा-केन्द्राणां स्थापनाऽस्पृश्याणामुद्धारः, शुद्धिः, सङ्घटनं तथा धर्मप्रचारश्च तस्यापूर्वाया निःस्वार्थायाश्च हिन्दुत्वसेवाया जीवन्ति जाग्रन्ति चोदाहरणानि वर्तन्ते।

सिक्खेषु तथा सिक्खेतरेषु हिन्दुषु च वैमत्ये दृष्टे सति तन्मनो व्यथमानं भवति स्म तथा च यदि कोऽपि हिन्दुर्दुष्प्रभावाद्वा प्रलोभनाद्वा हेतो र्विधर्मीभवति स्म, तदा तु तस्योद्विग्नतायाः सीमान्त एव नावशिष्यते स्म। वनवासिनो, दलितजातीश्च शो धर्मसम्प्रदायानुयायिनां जालपाशादभिरक्षितुं स 'अखिल-भारतीय-आर्य-(हिन्दु) धर्म-सेवा-सङ्घ' संस्थापितवान् तथा च विदेशीयान्, बालकांश्च हिन्दुत्वस्य वास्तविकं स्वरूपमवबोधयितुं विशिष्टानि पुस्तकानि रचयामास। तथा विधानि सुन्दराणि, भव्यान्याकर्षकाणि च मन्दिराणि प्रतिष्ठापयास यदन्तर्गतानां केवलं हिन्दूनामेव धर्मं प्रति श्रद्धाभावो न विवर्धते, प्रत्युत विदेशीयाश्चापि हिन्दुत्वात् प्रभावग्रहणाद्विना न तिष्ठन्ति। यत्र तस्यासौ प्रबलेच्छासीद्यद्धिन्दवः स्वधर्मस्य, संस्कृतेश्च वास्तविकं स्वरूपं परिचिनियुस्तथा च तदनुरूपमाचरणं विदध्युस्तत्रैव धर्मेणानेन, संस्कृत्या च समस्तं संसारमेव प्रभावयितुं महत्त्वाकाङ्क्षामपि पुपोष। हिन्दूनेकं समानाधिकारं मञ्चमधिष्ठापयितुं तथा निखिलेऽपि विश्वस्मिन् हिन्दुधर्मस्य महत्तायाः शंखनादं कर्तुमुद्दे श्यात् सोऽनेकवारं विश्व-हिन्दु-सम्मेलननामायोजनाय प्रेरणां प्रददौ किं वा सक्रियं योगदानं प्रादात्। सम्मेलनेष्वेतेषु यत्र संसारस्यानेकेषु भागेषु विकीर्णेषु हिन्दुषु बन्धुत्व-भावनाया निर्माणं बभूव, तत्र प्राच्यावाच्य-एशियाभूभागस्य बौद्धैः सह भारतीयानां हिन्दूनां घनिष्ठतापि च व्यवर्द्धत। तस्यैयं महती खल्वाकाङ्क्षाभूद्यद्भारतस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिन्दूनां तथैशियाभूभागस्य बौद्धानां संसारे किलैकं शक्तिशालि सङ्घटनं संस्थापितं भवेदिति।

हिन्दूनां भविष्यस्य तस्य कियती चिन्ता बभूवेत्यस्य गम्भीराभासोऽपि च द्वयोः संक्षिप्तयोः साक्षात्कारयोरेव समभूत्। सन् १९६१ वर्षस्य जनगणनायाः संख्याङ्कैर्यदैतदज्ञायत यद्धिन्दूनामपेक्षयेतरधर्मावलम्बिनां संख्या-वृद्धिरनुपाततोऽधिकं व्यवर्द्धत, तदा स चिन्तितो बभूव। अनेनैव कारणेन स परिवार-नियोजनादपि विरुद्धोऽभूत्। तस्य कथनमासीद्यत् परिवार-नियोजनस्य प्रभावः केवलं हिन्दुषु भविष्यति, न त्वितरधर्मावलम्बिष्विति। विषयस्यास्य स्पष्टीकरणं कुर्वाणः स सावधानतायाः सूचनां प्रयच्छंस्तस्यौ "यदि चेयमेव दशाभवेत्तदा शत-द्वि-शतप्रायेषु वर्षेष्वतीतेषु स्वदेश एव हिन्दवोऽल्पसंख्यका भविष्यन्ति तथा च भारतीयता विनंक्ष्यति।" अहं बुध्यामि, यत्तस्यासौ सूचना निराधारा नासीत्।

अहं दुःखमनुभवामि, यद्धिन्दुत्वस्यैतावान् महान् सेवकोऽद्यास्माकं मध्ये नास्ति। आशास्ते, विरला-परिवारस्य कोऽपि महानुभावस्तत्पदं ग्रहीष्यति।

FOR SECURITY & SERVICE

RUBY GENERAL INSURANCE COMPANY LIMITED.

Year	Nett Premium Income	Nett Claims Paid	Capital & Funds	Assets.
1967	Rs. 3,26,55,000	Rs. 1,66,02,000	Rs 2,84,29,000	Rs. 5,98,19,000

BUSINESS TRANSA TED;

FIRE MARINE MOTOR ACCIDENT AVIATION MACHINERY

AND

ERECTION ETC ETC.

BRANCHES & AGENCIES IN ALL IMPORTANT TOWNS IN INDIA & ABROAD

Head Office & Registered Office :

"RUBY HOUSE"

8, India Exchange Place, CALCUTTA-I.

Delhi Office: 2I, Daryaganj, Delhi.

Managing Director, Shri K. P. Modi, J.P., A.F.I.I.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाराणस्यै बिरलामहोदयस्य दानम्

श्रीकन्हैयालालमिश्रः

विश्वस्मिन् समये-समये केषांचिदेतादृशानां विशिष्टानां महापुरुषाणामवतरणं बोभूयते, ये हि देश-विदेशानां तथा च काल-विशेषस्य परिधि यावत् सीमिता न भवन्ति तथा च स्वार्थमय्या भावनाया उपर्युत्थाय निरन्तरं परोपकार्येषु-निरताः सन्तो मानव-समाजस्य विकीर्णाः सांस्कृतिकी धार्मिकीस्तथा नैतिकीः शृङ्खलाः पुनः शृङ्खलाबद्धाः कुर्वन्ति। एवं विधैवैका महती विभूतिः स्वर्गीयः श्रीयुगलकिशोरविरलामहोदयो बभूव, यो हि देशस्यास्य धार्मिके सांस्कृतिके च गगने सूर्य इव प्रकाशमानो भूत्वा सुप्तात्मानं देशवासिनां स्फूर्त्योत्साहेन च परिपूरयामास।

तस्यापूर्वस्त्यागोऽभिमानशून्यः स्वभावो, दानवीरता, धर्मनिष्ठा, कर्तव्य-परायणता तथा च संयमिता, कर्मनिष्ठं च जीवनं तमुच्चश्रेणिं प्रापयामास। पृथिव्या आकाशे स शांतेः शरच्छशी समभूत्। स यत्रागच्छत्तत्र शांतितारकाः पर्यस्ता अभूवन्। यदा सोऽन्नूत तदा मौनं मुखरितं समभूत्। निश्चयेन स युगस्यास्य महती विभूतिरवर्तत। देशस्यास्य महतः सुपुत्रस्य कार्य-कलापानां गणना नामैकं दुःसाध्यं कार्यमास्ते। तद्द्वारा निर्मिता विविधाः संस्था देशे विदेशेषु च तद्विजयवैजयन्तीं संस्फोरयन्त्यो वर्तन्ते।

भारतीयायाः सनातन-संस्कृतेर्ध्वजैराच्छादितानां मन्दिराणां शिक्षालयानां च नगरी काशी चाप्यस्य महतः साधोरधमर्णत्वभारभुग्नास्ते। अत्र वाराणस्यां स रचनात्मकानि कार्याणि यानि कृतवांस्तानि तस्य दानवीरताया धर्मपरायणतायाश्च ज्वलन्ति प्रमाणानि वर्तन्ते। यावत्तस्य स्थानीयानां कृतीनां विषये मदीयं ज्ञानमास्ते, तेषु प्रकाशक्षेपणं मे काश्यधिवासस्य सम्बन्धात् सामयिकं भवेत्।

काशी-हिन्दु-विश्वविद्यालयः

काश्यां तस्य सर्वतो महत्त्वपूर्णं योगदानं काशी-हिन्दु-विश्वविद्यालयेनोपलब्धम्। विश्वविद्यालयस्य प्रारम्भ-काले, यदा देशोऽयं स्वतन्त्रो न बभूव, तस्मिन् समये विश्वविद्यालयायेव राष्ट्रिय-संस्थायै विदेशीयात् सर्वकाराद्द्रव्याप्तिः कठिनासीत्। महामनामालवीयसदृशोऽनुपमोऽद्वितीयः, साहससम्पन्नश्च जनः कथमपि, येन केन प्रकारेण, विश्वविद्यालयार्थं धनराशिं प्राप्तं कृत्वा विश्वविद्यालयं संस्थापितवान्, किन्तु मालवीयमहाभागस्य मनोरथं परिपूरयितुम् यथासौ विरलामहोदयो यद्विधमुदारं दानं प्रददौ, तदतीव प्रशस्यमास्ते। यदापि च मालवीयमहाभागोऽर्थसंकटे पतति स्म, तदा तद्दृष्टि-र्विरलामहोदये पतति स्म तथा स समुदारेण दानेन साहाय्यं कुरुते स्म। वास्तविकं तथ्यं त्वेतदास्ते, यदि मालवीयमहाभागस्य साहाय्यकर्तृभ्यो विरलामहोदयोऽपवाद्य पृथक् क्रियेत, तदा तत्कार्यक्रमाणां पूर्णत्वे सन्देहोऽभविष्यत्।

विरलामहोदयो हिन्दु-धर्मस्य प्रचाराय, प्रसाराय, तदुत्थानाय च यावत्कार्यजातं चक्रे तावदस्यां शताब्द्यां न कोऽपि च कर्तुं पारयते। तं हिन्दु-धर्मस्य सदुपदेशानामल्पताऽत्यर्थं तुतोद। तामेतां न्यूनतां दूरीकर्तुं स विश्वविद्यालयाय ७५००० रूप्यकाणां धनराशिं प्रददौ, यस्य माध्यमेन स इयेष यदत्र हिन्दु-धर्मस्यैवंविधाः प्रशिक्षका विधीयेरन्, ये देशे विदेशेषु च हिन्दु-धर्मस्य प्रचारं कुर्युः। तदन्तर्गत एव 'सेन्ट्रल-हिन्दु कालेज' इत्याख्ये महाविद्यालये भारतीया-धर्मस्य, दर्शनशास्त्रस्य च विभाग उद्घाटितः। अस्य महाविद्यालयस्य प्रारम्भिके काले च्छात्रेभ्यः समुचिता छात्रवृत्तिरपि प्रदीयते स्म। अद्यापि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च भारतीय-धर्मस्य तथा दर्शन-शास्त्रस्य विभागो भारती-महाविद्यालये प्रचलति। यस्य भूतपूर्वं महाविद्यालयाध्यक्षं द्वावतरवर्यं श्रीभीषमलाला-त्रेयमहाशयं स धर्म-प्रचाराय स्वव्ययेन विदेशान् प्रेषयामास।

गीता-समितिः

गीता तस्य प्रियं पुस्तकमासीत्। तज्जीवनं गीतामयं बभूव। स हि गीतायाः प्रचाराय प्रसाराय चार्थराशिं दत्त्वा काशी-हिन्दु-विश्वविद्यालये गीता-समितिं संस्थापयामास। वर्तमान-समये स राशिर्द्वादशसहस्राधिकमेकलक्षमुद्रामितो वर्तते। अस्य धनराशेर्माध्यमेन विश्वविद्यालये तथास्माद् बहिर्गीता-धर्मस्य प्रचार-कार्यं सम्पद्य-मानमास्ते। मुख्यरूपेण प्रतिरविवारमत्र विशिष्टानां विदुषां प्रवचनानि भवन्ति। भारतीयां संस्कृतिं, धर्मं तथा दार्शनिकान् विषयान-धिकृत्य भाषणानि भवन्ति। अतोऽतिरिक्तं गीता-परीक्षाश्चापि भवन्ति। विश्वविद्यालया-द्बहिरपि चानेकानि केन्द्राणि वर्तन्ते। प्रोच्चस्त-रीयाः परीक्षा भवन्ति। कुलपतिद्वारोत्तीर्णेभ्यो-जनेभ्यः पुरस्कारास्तथा प्रमाण-पत्राणि प्रदीयन्ते।

षोडशरूप्यकमिता मासिक्य एकविंशति-च्छात्रवृत्तयः परीक्षाधारे योग्यतमेभ्यो विद्यार्थिभ्यः प्रतिवर्षं देदीयन्ते। अनेनोपायेन च्छात्रेषु गीतां प्रत्यनुरागो ववृधे।

संस्कृत-महाविद्यालयः

संस्कृतभाषां प्रति तस्यासीमः स्नेहोऽभूत्। सोऽस्या आर्यभाषायाः प्रसारस्य, तथा विकासस्य चाकङ्क्षी बभूव। अतः सन् १९४६ ई० वर्षे काशी-हिन्दु-विश्वविद्यालयेऽष्टनवलक्षरुप्यकाणां व्ययेन संस्कृतमहाविद्यालयस्य भवनं निर्मापयामास। तदिदं विद्यालय-भवनं सुन्दर्या भारतीयायाः शिल्पकलायाः परिचायकमास्ते। अस्य भित्तिष्वङ्किताः संस्कृतस्य श्लोकाः 'सर्वेषामेव दानानां विद्यादानं प्रशस्यते' इत्यस्या उक्तेः साक्षात् प्रतिबिम्बरूपमासाद्य भवनस्यास्य निर्मातुर्जयध्वनिमिव कुर्वन्ति। विद्यालयस्यास्य च्छात्रेभ्यश्छात्रवृत्तिप्रदानस्यापि च व्यवस्थाऽऽस्ते।

बिरला-छात्रावासः

छात्राणामावासस्य कठिनतां दृष्टिपथे रक्षन्नसौ सार्द्धत्रिलक्षरूप्यकाणां धनराशिं व्ययीकृत्य बिरला-छात्रावासस्य निर्माणं कारयामास यस्मिन् सर्वाभिरपि सुख-सुविधाभिः सहिताश्चतुः शत-प्रायाः कक्षाः सन्ति। सन् १९२६ ई० वर्षे स 'राजपूताना-होस्टल' इत्याख्यं छात्रावासं तथा महिला-छात्रावासस्य भागविशेषमपि च निर्मापितवान्।

विश्वनाथस्य मन्दिरम्

हिन्दु-धर्मं प्रति तस्य प्रगाढास्था बभूव। धर्मेणैव हि समाजो मर्यादितो भवति, तथा धर्म एव समाजस्य मार्ग-निदर्शकोऽस्त्यनेनैव भावेन प्रेरितः सन् धर्मप्राणाया हिन्दु-संस्कृतेः पूजा-राधनतत्परः श्रीबिरलामहोदयः देशे विदेशेषु च देवमन्दिराणां निर्माणमकारयत्। अथ विश्व-विद्यालये महामनसो मदनमोहनमालवीयमहा-भागस्याभिलाषपूतये तथा तस्य जीवनस्यान्त-समये कृतायाः प्रतिज्ञायाः पालनहेतोश्च स्वर्गीयो बिरलामहोदयो विश्वविद्यालयस्य क्षेत्रे विश्वनाथ-मन्दिरस्य निर्माण-कार्यं बहुलक्षरूप्यकाणां व्ययं कृत्वा पूर्णतां निनाय। अद्यत्वे तदिदं मन्दिर-मद्वितीयं वस्तु समसिद्ध्यत्, यद्धि प्रत्येकमाग-न्तुकाय जनाय प्रतिज्ञा-पालनस्य सन्देशमागामीनि परः सहस्राणि वर्षाणि यावद्विश्वस्य कोणे-कोणे प्रसारयत् संस्थास्यते। तदेतन्मन्दिरं भारतीयायाः कलायाः प्रोत्कृष्टमेकमुदाहरणमास्ते। मन्दिरमिदं- मूर्तिकलायाश्चित्रकलायाः, भवन-निर्माण-कलायाः सर्वासामेतासां कलानां प्रति-बिम्बमिवास्ते। अस्य स्थापत्यकला मोहिनी वर्तते। अस्य मन्दिरस्य २५२ फुटमितं प्रोच्चं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिखरं, यद्धि देहल्याः 'कुतबमीनार' इत्याख्या-दपि १६ फुट प्रमाणमुच्चतरं वर्तते, स्वात्मनोऽपूर्वया कलाकृत्या साकमध्यात्मोद्घोषं प्रकरोति। भित्तिषु वेदानां, शास्त्राणामेवमेव च महापुरुषाणां वचनानि तथा सम्पूर्णा भगवद्गीता चाङ्किता वर्तन्ते। मन्दिरेऽत्र 'नर्मदेश्वरः, पञ्चमुखो-हनुमान्, पार्वती, गणेशो, हनुमान्, ध्यानावस्थितः शिवः, शांताकारो लक्ष्मीनारायणस्तथा सिंह-वाहिनी दुर्गा चेत्येषां देवानां प्रतिमा द्रष्टव्या विद्यन्ते। उपरिभागे प्राकृतिकाः कलशा दर्शनीयाः सन्ति, यत्र कलशानामोंकारस्य च रेखाः स्वतः प्रस्फुटिता वर्तन्ते। अत्र वाटिकापि भव्यास्ते। मनोमोहकानि जलधारायन्त्राणि दर्शकानामभिषेकं कुर्वन्ति। एकतो विश्रामशाला तथा परतो यज्ञशालास्ते यत्र नित्यं हवनहोमा-दिकं भवति। विनापि च केनापि जातिगतेन भेद-भावेनात्र सर्वेषां प्रवेशोऽस्ति। तदिदं मन्दिरं वास्तविकं तन्मन्दिरं वतते, यत्र भक्ताः परमेश्वरस्य प्रार्थनायां लोनाः सन्तः स्वसम्प्रदाया-ग्रहं संसार च विस्मरन्ति।

संगीतविद्यालयस्तथान्ये विभागाः

विश्वविद्यालयस्य संगीतमहाविद्यालयस्य यद्विकसितं रूपमद्य वर्तते, तदस्य बीजारोपणम् दिवङ्गतो युगलकिशोरविरलामहोदयोऽतोऽनेक-वर्षेभ्यः पूर्वं पण्डितशिवप्रसादगायनाचार्यं तथा-न्यानध्यापकांश्च नियोज्य कृतवानासीत्। अतोऽतिरिक्तं काशी-हिन्दु-विश्वविद्यालयस्य मुद्रणा-लयस्य तथाऽऽयुर्वेदानुसंधानशालायाः स्थापना-यामपि च तस्य योगदानमभूत्। शिवराजहर्म्ये व्यायाम-शिक्षकेभ्यो वेतनमपि च स्वर्गीयोऽयं विरलामहोदयः प्रददाति स्म। कामाख्या स्थाने शिक्षक-प्रशिक्षण-विद्यालयश्चापि तस्यैव दानमास्ते।

छात्रवृत्तयः

स खलु साधन-विहीनानां दीनानां छात्राणा-मवलम्बोऽभूत्। विश्वविद्यालयस्य प्रारम्भिके काले पञ्चदशरूप्यकाणां प्रतिमासं शतच्छात्र-वृत्तीर्विभिन्नेषु विद्यालयेष्वधीयानेभ्यो निर्धनेभ्य-श्छात्रेभ्योऽनेकानि वर्षाणि यावत् प्रददानोऽसौ विरलामहोदयोऽन्न-वस्त्रादिभिश्चापि विद्यार्थिभ्यः सहायतां प्रदत्तवान्।

मालवीयमहाभागस्य कृते प्रतिमासं जाय-मानस्यैकसहस्रसंख्यकानां रूप्यकाणां व्ययस्य भारमपि स एवावहति स्म। यदा महामना-मालवीयमहाभागो राजनीतिगतकार्यार्थमिङ्ग्लैण्डं जगाम, तदा तत्रत्यमपि समस्तं धनव्ययं स एवोवाह।

विश्वविद्यालयादतिरिक्तं स नगरेऽपि चोल्लेखनीयानि कार्याणि चक्रे। स तेषु महा-प्राणेषु पुरुषेष्वासीद्येषां कार्यं सुस्थिरं सुदृढं च भवति। तथा ये स्वनाम्नः कार्यस्य च विज्ञापनं न कुर्वते। स कस्मिन्नपि च निर्माण-कार्ये स्वनामाङ्कनं न कारयामास। वस्तुतः स वीतरागो बभूव। स निष्कामं कर्माचचार, न तु कीर्तये। नगरे तस्येमा मुख्याः कृतयो विद्यन्ते।

विरलाऽऽयुर्वेदिकश्चिकित्सालयः

आयुर्वेदं प्रति तस्य गम्भीरा निष्ठासीत् तथास्यां चिकित्सा-प्रणाल्यां तस्याविचलो हि विश्वासोऽभूत्। अतः स निर्धनानामसहायानां च लोकानां चिकित्साहेतोर्मत्स्योदरी, वाराणसीतिक्षेत्रे सन् १६४१ ई० वर्षे विरलायुर्वेदिक-चिकित्सालयस्य निर्माणं कारयामास, यस्योद्-घाटनसंस्कारो महामनसः पण्डितमदनमोहन-मालवीयमहाभागस्य करकमलाभ्यां सम्पेदे। चिकित्सालयस्यास्य भित्तिषु चरकसंहितायाः श्लोका अङ्किताः सन्ति। आयुर्वेदस्य प्रधानस्या-नुभवशालिनश्च चिकित्सकस्य पण्डितवंशीधर-जोशिमहाभागस्य निर्देशने सोऽयं विभागः प्रारम्भादेवास्य स्थापनाकालादुत्तरोत्तरमभ्युन्नति-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पथे प्रगतिशीलो वर्तते। प्रतिवर्षमशीतिसहस्र-संख्यका रोगिण आयुर्वेद-चिकित्सया लाभान्विता भवन्ति। अत्र शल्य-चिकित्सायाश्चापि व्यवस्थास्ते। अक्षि-कर्ण-नासादीनां चिकित्सातोऽतिरिक्तमत्र सफलाः शल्यचिकित्साश्चापि भवन्ति। रोगिणां निःशुल्कमावास-चिकित्सा-भोजन दुग्धादीनां व्यवस्थापि च चिकित्सालय-द्वारा भवति।

मणिकर्णिका-विश्रामस्थलम्

मणिकर्णिकाघट्टः काश्या मुख्यः श्मशानोऽस्ति। काश्यां मरणादनन्तरं मोक्ष-प्राप्तिर्भवतीति सर्वसाधारणानां विश्वासोऽस्ति। अतः काश्या बहिर्निवसन्तो लोकाश्चापि स्वस्यान्तिमसमये मुमूर्षयात्रागत्य निवसन्ति मोक्ष-प्राप्ति च कुर्वन्ति। इत्थमत्र मृत्युं गच्छतां जनानां संख्या समधिकास्ते। चतुर्विंशघण्टास्वेकोऽपि क्षणस्तथा विधो न भवति, यदा घट्टेऽस्मिन् प्रज्वलच्छवो नोपलभ्येत। तैरेभिः शवैः साकं तेषामात्मीयानां जनानामागमनम् स्वाभाविकमेव, किन्तु तत्र स्थाने किमप्येतादृशं स्थलं न बभूव, यत्र लोकाः प्रहरप्रायं समयं यावन्निषण्णा वर्षातपशीतेभ्यो रक्षणं कर्तुमपारयिष्यन्। अस्मिन् स्थाने खल्वावश्यकतां दृष्टिगतां निधाय स्वर्गीयोविरलामहोदयोऽत्र धर्मशालामेकां निरमापयद्याहि शवेन सहयात्रिणां विश्राम-स्थलमास्ते।

बेनियाप्रसूतिगृहम्

वाराणस्यां निरन्तरं जनसंख्यायामभिवृद्धिर्जायमानास्ते। तेन नगरे प्रसूति-गृहस्यैकस्य न्यूनतातीव तुदति स्म। नगरस्य केचिद्गण्यामान्याश्च जनास्तेनामिलंस्तथा तामिमामावश्यकतां प्रति तद्ध्यानमाचकर्षुः। फलस्वरूपं सन् १९४० ई० वर्षे बेनियास्थाने स्वमातुर्नाम्ना 'राज्ञीयोगेश्वरी देवी विरलामातृमन्दिरम्, इत्याख्यमेकं प्रसूति-गृहं निर्मापयामास।

आर्यसमाजभवनम्

स्वर्गीयो युगलकिशोरविरलामहोदय आर्यधर्मावलम्बी बभूव। तस्यार्यधर्मः स धर्मोऽभूद्यस्मिन् सनातनवर्णाश्रमधर्मानुयायिनो, बौद्धा, जैनाः, सिक्खा, आर्यसामाजिकाः सर्वेऽपि सम्मिलिता आसन्। तस्य विचाराणामनुसारं त इमे सर्वेऽपि आर्य- (हिन्दु) धर्मस्याङ्गीभूताः सन्ति। स हि जीवनपर्यन्तमेतेषां सर्वेषां सङ्घटनाय, तस्य (आर्य-धर्मस्य) सर्वेषामेवाङ्गानां विकाशाय्भ्युत्थानाय च कार्यं चकार। अनयैव दृष्ट्या नगरस्य प्रख्याते मार्गे बुलानाला इत्याख्ये-आर्यसमाज-भवनस्य निर्माणं कारयित्वा व्यवस्थां कर्तुमार्यसामाजिकेभ्यः प्रददौ। भवनमेतदतीव सुन्दरमाकर्षकञ्चास्ते। अत्रैव सुविशालः सभाकक्षोऽस्ति। तत्र सत्संग-प्रवचनादीन्यायोजितानि भवन्ति। भवनस्यास्य हट्टा विद्यन्ते, यैरार्यसमाजस्यायो महान् भवति।

डाक्तरभगवानदासस्य पुस्तकालयः

काश्यां भारतमातु विख्यातस्य मन्दिरस्य समीपं, काशीविद्यापीठान्तर्गतं डाक्तरभगवानदासपुस्तकालयस्य भवनं निर्मापयामास तथा भारतमातुर्मन्दिरम् सर्वतो हि सुरक्षादृष्ट्या प्राकारनिर्माणमकारयद्यस्मिन् सहस्राण्यनेकानि रूप्यकाणां व्ययं जग्मुः।

बौद्धाश्रमः

भारतमातुर्मन्दिरं निकषैव सिगरा स्थाने स बौद्धाश्रमस्य निर्माणमकारयद्यस्मिन् भगवतो बुद्धस्योपदेशा अङ्किता वर्तन्ते। एकोऽतीवाकर्षकः सभा-कक्षोऽस्ति तथा छात्रावासादीनां सुव्यवस्थास्ते।

काशीमुमुक्षुभवनसभा

स्वर्गीयस्य युगलकिशोरविरलामहोदयस्य साधु संन्यासिषु प्रगाढास्था बभूव। तेषां निवास हेतोर्निर्मापितस्य भवनस्य कृते तस्य योगदानम-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विस्मरणीयमस्ति । अस्मिन् संन्यासिनामावास-स्याहारस्य, दुग्धादीनां व्यवस्थां संस्था विदधाति । दण्डिस्वामिभ्यो ऽतिरिक्तमत्रैवंविधानां सद्गृहस्थानामावासस्यापि व्यवस्थास्ते, ये गार्हस्थ्याद्विरक्ताः सन्तो भगवद्भजनं कर्तुमिच्छन्ति । वृद्धानां महिलानामावासायातिथिशाला वर्तते । अस्यान्तर्गता वेदवेदाङ्गसंस्कृतपाठशाला विद्यते, यस्या विकसितस्य स्वरूपस्य श्रेयोभाग् विरलामहोदय एवास्ते । तस्यैव प्रेरणया विद्यालयाय प्रायेणाष्टसहस्ररूप्यकाणां वार्षिकी सहायता सुलभा सम्बभूव । सामान्यतो यदा कदापि च संस्थैषार्थिकं संकटमनुबभूव, विरलामहोदयः समुदारतया सहयोगं प्रददौ ।

काशीनागरीप्रचारिणीसभा

हिन्दीभाषायाः प्रचारे, प्रसारे तद्विकासस्य च कार्येषु संलग्नाया, देशस्य सुप्रसिद्धायाः संस्थायाः काशीनागरीप्रचारिण्याः सभायाश्चापि विरलामहोदयोऽसौ शोभनामार्थिकीं सहायतां चक्रे । अध्यात्मदर्शनस्य योगशास्त्रस्य सर्वोत्तमाय ग्रन्थाय पुरस्कारप्रदानस्य व्यवस्थां स विदधे । सभान्तर्गताय सत्यज्ञाननिकेतनायापि चार्थराशिं प्रददौ ।

विरलाधर्मशाला (सारनाथस्था)

सारनाथस्तावदैतिहासिक्या दृष्ट्या देशस्यास्य प्रमुखं स्थानं वर्तते । साकमेव बौद्ध-धर्मस्य दृशापि चास्य बहुमहत्त्वमास्ते । भगवान् बुद्धोऽत्र स्वोपदेशं प्रददौ । देश-विदेशेभ्यः परश्शता-जनाः स्थलस्यास्यावलोकनार्थं नित्यमागच्छन्तो भवन्ति । स्थानस्यास्य महत्त्वं पश्यन्, जनसुविधाया दृष्ट्या तथा च विश्रामस्थलस्य नितान्तमावश्यकतामनुभूय स तत्र सुविशालाया विरला-धर्मशालाया निर्माणमकारयद्या सर्वाभिराधुनिक-सुखसुविधाभिः सुसज्जितास्ते । न केवलं देशस्यैवापितु विदेशानां यात्रिणोऽपि तामिमां धर्म-शालामध्युष्य सुखानुभूतिं कुर्वन्ति । अस्या निर्माणं कारयित्वा तामिमां महाबोधिसभाया व्यवस्थान्तर्गतामकार्षीत् परमद्यापि च तस्या जीर्णोद्धारस्य, वर्णसुधालेपनाश्च कार्यमस्यैव देयनिधिद्वारा क्रियते ।

दन्तचिकित्सालयः

प्राक्काश्यां दन्त-चिकित्सायाः कापि च व्यवस्था न बभूव । यदा विशिष्टनागरिकाणामेकं शिष्ट-मण्डलं तत्साक्षात्कारं कृत्वा तमिममभावं प्रति तद्ध्यानमाचकर्ष, तदा सन् १९२७ ई० वर्षे शिवप्रसादगुप्त चिकित्सालये कबीरचौरा इति स्थाने वर्तमाने दन्तचिकित्सार्थं भवनमेकं निर्माप्य शासन-व्यवस्थायै प्रार्पयामास ।

मारवाड़ी-महिला-निवासो, नीलकण्ठः

काशीवासदृष्ट्या राजस्थानादागतानां महिलानां निवास-हेतोः स्वमातुर्नाम्ना सन् १९५० ई. वर्षे नीलकण्ठवसतिपरिसरे विरलामहोदयो भवनस्यैकस्य निर्माणमकारयद्यस्मिन् वृद्धामहिलाः स्वनिवासमुपकल्पन्ते ।

राणामहलचौसठीघट्टः

दशाश्वमेधघट्टस्य समीपं चौसठीघट्टे उदयपुरशासकानां राणासंज्ञकानां क्षात्रराजानां प्रासादस्तत्थानेकानि भवनान्यासन् । तेष्वेव भवनेष्वेकं भवनं चौसठीमठ इत्युच्यते । सैषा सम्पत्तिर्यदा राजस्थानस्य सर्वकारस्य हस्तगताऽभूत्, तदा स तामिमां सम्पदं विक्रेतुमारभत तथा तद्भवनमपि विचिक्राय, यत्र दण्डिस्वामिनो न्यवसन् । स्वामिनः स्वात्मनो भाविन आवासस्य कष्टं प्रतीक्षितं कुर्वाणाः पत्रमेकं विरलामहोदयं प्रति लिखितवन्तः । तत्कालं विरलामहोदयस्तेषामावास-व्यवस्थामादिदेश तथैकोनविंशतिशत-रूप्यकाणां मूल्येन राणामहलस्य भागमेकं क्रीत्वा स्वामिनामावासस्य व्यवस्थां चकार ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घट्टानां जीर्णोद्धारः

काशीनगरी स्वस्य मनोरमैर्घट्टैः सुप्रसिद्धास्ते। प्रायः सर्वेषामपि घट्टानां निर्माणं राजभिर्महाराजैश्चाक्रियत। क्रमशो घट्टा इमे जीर्णतामुपच्छन्तो विद्यन्ते। सर्वकारोऽत्र किमपि ध्यानं प्रार्पयत्। अतः पूर्वमनेकेषां घट्टानां दयनीयां दशां दृष्ट्वा तज्जीर्णोद्धारं विरलामहोदयोऽकारयद्येषु तुलसीघट्टो, बूँदीघट्टो, मणिकार्णेकाघट्टस्तथा च लालंघट्ट इत्येते समुल्लेखनीयाः सन्ति।

उपर्युक्तेभ्यः प्रोल्लेखनीयेभ्यः कार्येभ्योऽतिरिक्तमन्यानि बहूनि प्रशस्यानि कार्याणि तेन मनीषिणा युगलकिशोरविरलामहोदयेन कारितानि। अनेकेषां मठ-मन्दिराणां जीर्णोद्धारो विहितो येषु काश्याः सुप्रसिद्धं दुर्गादेव्या मन्दिरं, पाण्डेयघट्टस्योच्चशिखरं, बालामन्दिरं तथा लालघट्टस्य गौरीशङ्करमहादेवस्य मन्दिरमपि च सम्मिलितमास्ते। साकमेवानेन काश्यां निर्धनब्राह्मणानां निःशुल्कमावासहेतोर्भवनानां निर्माणमकारयत्। तद्द्वारानेकेषां साधु-संन्यासिनां, दीनजनानां च पालनं भवति स्म। तदाश्रिता निर्धना जनास्त्वेतत् कथयन्तः श्रूयन्ते यन्मृते हि बाबूमहोदये निर्धन-वर्गस्तु जीवन्नपि मृत इति। स्वामि-सुखानन्द-औघडबाबा-मौनीबाबादीनां काश्या महात्मनां भिक्षाया दुग्धपानस्य च व्यवस्था तद्द्वारैव भवति स्म, याद्यापि च तेनैव क्रमेण प्रवर्तमानास्ते।

स्वर्गीयस्य विरलामहोदयस्य गौरव-गाथा काश्यामथवा पत्र-पत्रिकाणां पृष्ठेष्वेव केवलं जीवन्ती न विद्यते, वरञ्च देशे विदेशेषु च तद्द्वारा निर्मितानाञ्च मन्दिराणां, धर्मशालानां, विद्यालयानां तथा च चिकित्सालयानां रूपे भूम्यामप्यङ्किताःस्ते। तस्य जीवनं प्रकाशस्तम्भरूपं विद्यते। न केवलं स्वदेश एवापि तु नयपाले, हिन्द-एशियाभूभागे, वर्मादेशे, श्रीलङ्कायां, जापानदेशे तथान्यान्येषु देशेष्वपि तन्नामग्रहणं सादरं क्रियते जनैः।

एवंविधस्य महापुरुषस्यावतरणेन धन्यास्तेऽसौ धरा। सत्यं-शिवं-सुन्दरमित्यस्य तन्मूर्तरूपमस्माकं मध्ये न वर्तते, परन्तु तस्य वरदेतिहासोऽजरामरोऽस्ति। तस्यादर्शं चरित्रं शाश्वतं सत्यमिव जाज्वल्यमानमास्ते। स हि स्वात्मानमन्वागमिष्यन्त्याः पुरुष-परम्परायाः कृते जीवन्तीनां प्रेरणानां प्राणवन्तं सन्देशं समादिदेश, यमनुसृत्य मानवः स्वात्मनो विश्वस्य च कल्याणं सम्पादयितुं शक्नोति।

धरणीमाता स्वात्मनोऽस्य सुपुत्रस्य गौरवगीतानि गायन्ती वर्तते, भूयोऽपि च गायन्ती स्यात्।

दी अवध शुगर मिल्स लिमिटेड

प्रधान कार्यालय :–
इण्डस्ट्री हाउस
१५९ चर्च गेट रिक्लेमेशन
बम्बई-१

मिल्स :–
हरगांव
जिला-सीतापुर
उत्तरप्रदेश

निर्माता :—
शुद्धा, श्वेता, कणवती शर्करा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रेरणाप्रदं व्यक्तित्वम्

श्रीराधाकृष्णः कानोड़िया

पूज्यो बाबू युगलकिशोरविरलामहोदयोऽत्यन्तं तीक्ष्ण-बुद्धिर्दूरदर्शी, परोपकारी च पुरुषोऽभूत । सुविख्यातस्य विरला-परिवारस्य वरिष्ठ-सदस्य-रूपोऽयं न केवलं व्यापारवाणिज्यस्य, तथौद्योगिके क्षेत्र एव ख्यातिं प्राप्तवानपि तु हिन्दु-धर्मस्य, संस्कृतेश्च पुनरुत्थानायापि च तथा विधानि सुदृढानि, सुस्थिराणि च कार्याणि चक्रे, यानि कदापि च विस्मतुं न शक्यन्ते । भारतीय-संस्कृतेः कल्याण-कारिणीनां परम्पराणां सः सुद्रढीयान् समर्थकोऽभूत् । हिन्दु-धर्मस्य लोक-हितकारिणामादर्शाणां प्रचाराय प्रसाराय च स देशस्य विदेशानां च संस्थाभ्यो विमुक्तहस्तं दानानुदानानि प्रददौ । स हि स्थाने-स्थाने नवीनानाम् देवालयानां मन्दिराणां च निर्माणमकारयत् तथा च परः शतानां जीर्ण-शीर्ण-मन्दिराणामुद्धारं चक्रे ।

बाबू युगलकिशोरविरलामहोदयेन साकमनेकाः प्रेरणास्पदं स्मृतयः संयुक्ता वर्तन्ते । तस्य व्यापारिकं ज्ञानमद्भुतमासीत् । अन्यान्य-व्यापारेभ्योऽतिरिक्तं स विनिमयव्यवसायेऽत्यर्थं पटुरासीत् । विनिमयस्य व्यापारगतोऽर्थोऽस्ति—कस्यचिदेकस्य वस्तुनः स्थानविशेषे विक्रयस्तथापरस्मिन् स्थले वस्तुविशेषस्य क्रयः । इत्थं विधाभ्यां क्रय-विक्रयाभ्यां लाभ-प्राप्तये तदिदमावश्यकमास्ते, यद्धि सम्बद्धो व्यापारी तदिदं जानानः स्याद्यत्तस्य तस्य वस्तुनो विनिमयगता मूल्य-भावा ननु विश्वस्य केषु केषु स्थलेषु कदा क नु कस्मिन् काले कीदृशा वर्तन्त इति, येन भावानां यदन्तरं भवेत्तत् स लाभरूपे ग्रहीतुं पारयेत् । विरलामहोदयस्तदिदमजानात् यद्धि वस्तुविशेषोऽस्माकं देशे, विश्वस्मिंश्च कुत्र कुत्रोत्पद्यते, तद्गुणे कियदन्तरं भवति, तथा तन्मूल्य-भावाश्च के के वर्तन्त इति । अथ कस्मिंश्चतुं विशेषे क्वचन त इमे भावाः प्रोच्चतां स्पृशेयुः, क्व च निम्नताम्, तथ्यानामेतेषां स हि पूर्णमवधानं ररक्ष, तदानीं स तद्वस्तु स्थले खल्वेकस्मिन्-चिक्राय तथान्यत्र समयानुसारं (प्रतिज्ञानुसारं) एव विचिक्रिये । एकस्यैव वस्तुनो युगपद् क्रयाद् विक्रयाच्च वाणिज्यान्तर्गतं भयमतीवाल्पं भवति स्म । एकत्र यदि हानिर्भवति स्म, तदान्यत्र लाभो भवति स्म । यत्र मूल्य-भावा निम्नतरा भवन्ति स्म, तत्र स समयेन वस्तु-क्रयमकरोत्, यत्र भावा प्रोच्चतराः सन्तिष्ठन्ते स्म, तत्र तद्वस्तु समयेन व्यक्रीणात् । तथा च यथा समयं ये भावा यत्र यथा भवितुमर्हन्ति स्म, ते प्रायेण तथैव भवन्ति स्म । एवं स येषां येषां वस्तूनां विनिमय-व्यापारमकरोत्, प्रायः सर्वत्रैव विना कस्मादपि भयात् धनमुपार्जयति स्म । यदा स विदेश एवैकस्मिन् स्थाने क्रयं करोति स्म तथा तत्रैव क्वचिदन्यत्र स्थले विक्रीणीते स्म । परिसमाप्ते हि क्रय-विक्रय-प्रसङ्गे विदेशाद्धनमाप्यते स्म ।

विनिमय-व्यापारात् सोऽयं युगलकिशोर-विरलामहोदयो विदेशेषु बहु ख्यातिमर्जयामास । तत्रत्या लोका नन्वाश्चर्यचकिता अभूवन्, यद्धि कोऽपि च जनो विनैव भयमेतावद्धनं कथमिवोपार्जयतीति । विदेशीयाः प्रायेणाकथयन् यद्युगलकिशोरस्यैव सुतीक्ष्णा व्यापारिकी बुद्धिरतीव विरलेषु जनेषु भवेदिति ।

तदानीं समयेऽस्माकं देशे गौराङ्गशासकानामेकच्छत्रं राज्यमासीत् । यावद्व्यापारो बभूव, तस्मादधिकांशो ब्रिटेनदेशेन सम्बद्धो बभूव । बह्वायातोऽपि च ब्रिटेनदेशाद्भवति स्म । श्रीयुगलकिशोरमहोदयस्तदिदमनुबभूव, यद्ब्रिटेनवासिनो गौराङ्गा अत्र राज्यशासनं तु कुर्वन्त्येव,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यापारमपि ते स्वहस्तगतं स्वायत्तं च चक्रुः। यदि च येन केनापि प्रकारेण यूरोपमपहाय—एशियाभूभागस्य देशैः साकं व्यापारिकाः सम्बन्धाः संस्थापयितुं शक्येरंस्तदा श्रेयस्करं स्यादिति। एवं विचिन्त्य स जापानदेशाद्वस्त्रायातं कर्तुं विनिश्चिकाय। विरलामहोदयोऽस्मद्देशस्य सर्वप्रथमो जनोऽभूद्यो हि जापानदेशाद्वस्त्रायातं कर्तुमारेभे। स हि जापानदेशीयं वस्त्रं लोकप्रियं विधातुं परिपूर्णं प्रयत्नं चक्रे तथा जापानवासिनोऽकथयद्यद्धि हिन्दुस्थाने धौत्रमतीव महत्यां मात्रायां विक्रीयते, ततस्ते धौत्रवस्त्राणि निर्मीयुः। विरलामहोदय इतो धौत्रवस्त्राणाम् वर्णिकाः प्रेषयामास। जापानदेशे निर्मितानि धौत्रवस्त्राण्यस्मद्देशं भारतमाययुः किन्तु तानि श्रेष्ठविधानि नासंस्ततोऽत्र तानि निम्नमूल्यभावैविक्रेयाणि बभूवुः। फलतो विरलामहोदयोहानिं सोढुं बाध्योऽभूत् किन्तु स हतोत्साहो न बभूव। स हि विविधविधानां विदेशीयानां धौत्रवस्त्राणां वर्णिकाः सम्प्रेषयंस्तस्थौ तथा जयपानाद्धौत्राणि समानयामास तथा तत्समये हानिं सहमानस्तस्थौ, यावज्जापानोत्पादितानां धौत्रवस्त्राणां स्तरो यावदपेक्षितो न बभूव। अन्ततः श्रेष्ठप्रकाराणि धौत्राणि भवितुमारभन्त तथा तन्मूल्यमपि चातीवाल्पमभूत्। परिणामोऽयं बभूव यद्ब्रिटिशदेशेन प्रतिस्पर्द्धार्थमागन्तव्यमभूत्तथास्माकं देशेऽत्र भारते जापान-निर्मितानां धौत्रवस्त्राणां पर्याप्तं प्रचलनं बभूव।

विरलामहोदयोऽसौ युगलकिशोरः प्रारम्भतएवात्यन्तं दयावान् धार्मिकप्रवृत्तिकश्च जनोऽभूत्। कस्यापि किमपि च कष्टं भवति स्म, तदा स तदपाकर्तुं प्रयतते स्म। अनेन तत्ख्यातिर्देशस्य कोणे-कोणे प्रससार। 'मारवाडी-रिलीफ-सोसाइटी' इति संस्थाया अस्या अभिधानं को नाम न परिचिनोति? अस्याः सुप्रसिद्धायाः संस्थायाः स्थापना विरलामहोदयद्वारैव समभूत्। इतः ५५ वर्षेभ्यः पूर्वं कालिकत्तानगरस्य सूतापट्टीति वसतावेकं गृहं निर्मीयमाणमभूत्, तत्रैको जनः स्खलनान्नीचैर्निपपात, स च बह्वधिकं व्याधातापक्षतो बभूव। कियन्तो हि लोका विरलामहोदयस्य समीपं तस्य मल्लिकस्ट्रीट इति वसतौ स्थितं व्यापारपीठासनं जग्मुस्तथा तस्य निपतितस्य जनस्यापक्षतेः सूचनां प्रयच्छन्तोऽब्रुवन् यत्तस्य चिकित्सायाः न कोऽपि च प्रबन्धो भवितुमशक्य इति। यतस्तत्र स्थानस्य तस्य समीपं सर्वतः किलैवंविधा न कापि च व्यवस्थाऽभूत्। विरलामहोदयस्तत्कालमेव तस्याहतस्य जनस्य चिकित्सोपचारौषधादीनां प्रबन्धमकारयत्। साकमेवानेन सः स्वमित्रसुहृद्भिरत्र विषये विचार-विमर्शश्चकार तथा च मारवाड़ी-सहायतार्समितिरितिनाम्नौषधालयमेकमुद्घाटयामास। स एवौषधालयोऽद्यत्वे 'मारवाडी-रिलीफ-सोसाइटी' त्यनेन भव्येन रूपेण प्रतिष्ठितो विद्यते। स हि तस्यौषधालयस्य गतिविधिप्रवृत्तीनां पूर्णतयावलोकनं निरीक्षणं व्यवस्थां च सम्पादयंस्तस्थौ। यद्यपि विगतेभ्यः कियद्भ्यो वर्षेभ्यः सः 'सोसाइटी'—संस्था प्रत्यक्षरूपेण द्रष्टुं न पारयामास, तथापि तद्विषयेऽस्मान् सततं परिपृच्छन्नासीत्, कार्यकर्तृभ्यः परामर्शान् प्रददानस्तस्थौ तथार्थिकीं सहायतां प्रददानो बभूव। स कथयन् बभूव यदर्थाभावे सोसाइटीसंस्थाया अस्याः कार्यं न कदापि चापूर्णं स्यादिति।

विरलामहोदयः स्वजीवने संख्यावतामौषधालयानां च निर्माणमकारयत्। सोऽत्यन्तं सरलो दयालुस्वभावश्चासीन्। तस्य संदैवेयमिच्छाभूद्यन्न कोऽपि दुःखभाग्भवेदिति। यदा स गृहात् कार्यालयमगच्छत्तदा यन्त्रनिःश्रेणीमारोढुं पङ्क्तिबद्धं तिष्ठन्तो जनास्तत्कृते पश्चादपगता अभवन्, परन्तु सः स्वयमन्येन सामान्येन सोपानमार्गेणोपरितनं खण्डं प्राप्नोत्तथा न कमपि च पङ्क्ते र्दूरमपगन्तुमनुमेने। इत्थंविधासीत्तत्सरलता।

(शेषं ४७ पृष्ठे)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुण-स्मरणम्

श्रीहरिभाऊ-उपाध्यायः

अस्माकमत्र शब्दत्रयं प्रचलितमास्ते-आधिर्व्याधिरुपाधिश्चेति। मनसोऽभ्यन्तरं विजातीयस्य द्रव्यस्य प्रभावं वा तदुपस्थितिं वाऽऽधिमाहुः। शरीराभ्यन्तरं प्रविष्टं, प्रजनितं वा विजातीयतत्त्वानां प्रकोपं तत्प्रभावं वा व्याधि प्रचक्षते। एवमेवास्माभिः स्वस्य सुखभोगायार्जितां सामग्रीं चोपाधिमिति प्राहुः।

उपाधिर्मुख्यतोऽस्माकमुपलब्धिरास्ते। सामान्यतः कस्यापि च व्याधेर्वयमेवोत्तरदायिनः, परन्तु 'उपाधिस्तु' तावदस्माकमेव स्वात्मने प्रदत्तं स्वस्यैव दानमस्ति।

मुख्यतो द्वाभ्यामेवोद्देश्याभ्यां मनुष्यः साधनसामग्रीं संगृह्णीते। एकं तु स्वसुख-निमित्तमन्यच्च परोपयोगित्वनिमित्तमिति। द्वयोरपि नैकमपि चोद्देश्यं, प्रयोजनं वा नावाञ्छनीयमास्ते, परन्तु सीमानमेकमतिलङ्घ्य ते द्वेऽपि चैते हानिकरे भवतः।

आत्मनः सुखभोगो मनस आनन्दप्रदानस्य स्थाने नित्यमेव नवनवायामापत्तिपाशश्रृङ्खलायां निगडयति, तदेतल्लक्षणं 'जाते' रस्ति। वयमत्र सावधाना भवेम।

परार्थस्य कृते साधन-सामग्री-संचयेऽतीव दुःखं भवति, मनोऽशांतं भवति, क्रोधकोपयोर्मनसि प्रभावो भवितुमारभते, तदा वयं जानीमः, यद्वयं मार्ग-विभ्रान्ताः स्म इति।

यदि च मनुष्याद्याच्ञास्त्यशोभना, तदा किमर्थं वयं 'भगवते' याचनं श्रेष्ठं मन्येमहि, पुनश्चान्नपानादेः, सुख-समृद्धेश्च याचनं भगवतोऽनादरः किम्वा भगवच्छक्तेस्तिरस्कारो नास्ते?

अथ शांतेरानन्दस्य, कल्याणस्य, मंगलस्य च याचना बोधगम्या भवति। जीवो बिन्दुरूपोऽस्ति, भगवांश्च सिन्धुस्वरूपः। एकोऽल्पोऽन्यपरश्च महान् वर्तते। अतोऽल्पस्य महान्तं प्रति नम्रत्वं तूचितमस्ति, परमधमत्वस्य, पापित्वस्य, पतितत्वस्य, दुरात्मत्वस्य, नराधमत्वस्य च मान्यता कियत्पर्यन्तमुचितं समर्थनीयं वा भवितुमर्हति? स्वयमात्मनात्मानं पतितं मत्वा भगवतः समक्षं विलपनं किं 'भगवत' एवास्तित्वस्यास्वीकारो नास्ति?

एवं सति प्रार्थनायाः कोऽर्थः, कश्चोपयोगः?

प्रार्थनोपासनाराधना-वन्दनार्चना-त इमे शब्दाः पर्यायवाचका मन्यन्ते तथाप्येतेषु सर्वेषु सूक्ष्ममन्तरं विद्यते।

कस्मादपि चोद्देश्यविशेषाद् 'भगवन्तं' प्रति याचना 'प्रार्थना' भवति। भगवद्गुणानां चिन्तनं तदनुकरणं चाथवा तेषां प्राप्तेः प्रयत्नो नाम 'उपासना' वर्तते।

विलपनमाराधना, तं प्रति नत्वा प्रणामस्तुतिकरणं, वन्दना तथा तस्मै किमप्यर्पणं निवेदनमिति 'अर्चना' भवति।

सर्वेष्वेतेषूपासकः सर्वश्रेष्ठोऽस्ति। वस्तुतस्तु सर्वेषामेतेषामन्तिमं फलं भगवत्प्राप्तिः किञ्च भगवत्स्वरूपासादनमेवास्ते, तथाप्येतेषूपासना चरमोऽस्ति सोपानः?

परमात्मनः स्तुति-वन्दना-प्रार्थनानां स्थाने तद्गुण-स्मरणं, तन्नामग्रहणमेव पर्याप्तमास्ते। स्तुतौ केवलं भगवतो गुणानां, नाम्नां च स्मरणं भवति यदा प्रार्थनायां किमपि याच्यतेऽपि च।

नामैकलमेव न तिष्ठति वरञ्चास्माकं सम्पूर्णं व्यक्तित्वं तत्र समाविष्टं भवति 'रामस्य' 'शिवस्य' वा नामग्रहणसमकालमेव कस्यचिद् रमणशीलस्य किं वा कल्याणकर्तुर्व्यक्तिविशेषस्य वा मनुष्यस्य बोधो न भवति, ताविमौ शब्दौ राम-शिवयोः समस्तेन व्यक्तित्वेनास्मत्समक्षमुपतिष्ठेतेऽस्मन्मनसि च स्वप्रभावं निक्षिपतः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

in any language, it's sweet



In old French it was called ZUCHRE. In Arabic and Persian it is SUKKAR and SHAKAR respectively. It is SHARKARA in Sanskrit and SAKKHARON in Greek.

One does not have to be a scholar to notice the evident phonetic resemblance of the words. It is perhaps not surprising, since all of them mean the same thing—SUGAR, the universal sweetening agent which in some form or other has been known to mankind from the neolithic age.

Today SUGAR usually means crystalline sucrose—the kind you use in your home every day. It is an essential item in your diet with a high energy value of 1,794 kilocalories per pound. There is no other satisfactory substitute for sugar.

Issued by:

- UPPER GANGES SUGAR MILLS LTD.
- THE OUDH SUGAR MILLS LTD.
- NEW INDIA SUGAR MILLS LTD.
- THE NEW SWADESHI SUGAR MILLS LTD.
- BHARAT SUGAR MILLS LTD.
- GOBIND SUGAR MILLS LTD.

Managing Agents:

BIRLA BOMBAY PVT. LTD.

Industry House, 159, Churchgate Reclamation, Bombay-1

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

-: ऋषिकल्प आर्यपुत्रः :-

स्व० श्रीदीनदयालुरुपाध्यायः

दानवीरस्य श्रेष्ठिवर्यस्य युगलकिशोरविरलामहोदयस्याभिधानं तु बाल्यकाल एवाहं शृण्वन्नभूवम्, किन्तु तद्दर्शनस्य सौभाग्यं सन् १६३५ ई० वर्षेऽलभ्यत । दिनेषु तेष्वहं पिलानी-महाविद्यालयस्य विद्यार्थी समभूवम् । शीततौः प्रारम्भ एव बभूव । एकदा प्रातःकाले पर्यटन् स विरला-छात्रावासमाजगाम । सहसा वयं तं परिचेतुमपि नापारयाम । मारवाडी-शैलीकमुष्णीषं लम्बं कञ्चुकं च परिदधानः सरलवेशो विनैव काममपि पूर्वसूचनां सः समाययौ सहसा वयं तं परिचेतुमपि न प्राभवाम । किन्तु सम्वादं प्राप्य यदा च्छात्रावासस्याधीक्षकः श्रीयाज्ञिकमहोदयो धावं-धावं त्वरितं तत्राजगाम, तदानुमानं बभूव यदस्माकं कुशल-क्षेममध्ययनस्य च प्रगतिं गतिविधींश्च पृच्छन्नसौ सज्जनो नान्यः कोऽपि विद्यते, वरञ्च युगलकिशोर एवास्त इति । अन्यैर्वार्तालापान्तरैः साकं सः प्रत्येकं छात्रमिदमपि च पप्रच्छ—व्यायामः क्रियते न वेति । यस्मात् स 'आम्' इति स्वीकार-सूचकमुत्तरं लेभे, तस्य पृष्ठं सन्ताड्य श्लाघावादान्दातुमारेभे । तत्समये ते लोका ग्लानिमन्वभूवन् ये नियमितरूपेण व्यायामं नाचेरुः । एवं विधस्य वार्तालापस्य समाप्तेरनन्तरं श्रीविरलामहोदयो याज्ञिकमुवाच—"अध्यापकमहोदय, बालका अतितरां दुर्बलाः प्रतीयन्ते । शीततौ दिवसा आसते । एभ्यः पौष्टिकः कश्चनाहारो लभेत ।" अन्येद्युरौषधैर्निर्मिता मोदकाश्छात्रावासमागताः । प्रत्येकं विद्यार्थिने मासमेकमुपभोग्याः पञ्चदश-मोदका व्यतीर्यन्त । अर्द्धो मोदकोऽर्द्ध प्रस्थमितं दुग्धं च प्रतिदिनमनुपानमासीत् । ये दुग्धार्थं धनं प्राप्तुं न पारयन्ते स्म, तेषां कृते दुग्धस्य व्यवस्थापि च विरलामहोदयद्वारैवाक्रियत ।

व्यायामं तथा शक्तिवर्धनं प्रति तस्यैतावलक्ष्यमभूद्यन्नागपञ्चमीदिने सः प्रायेण पिलान्यामेवोपस्थितो भवति स्म । यो हि व्यायामक्षेत्रमवततार, कामं स पुनर्विजयताम् पराजितो-वा भवेत्, स पुरस्कारमवश्यं लभते स्म । किन्तु पुरस्कारोऽसौ सद्यो मुद्रारूपो न भूत्वा घृतरूपो वा फलादि 'मेवा'-रूपो वा भवति स्म ।

विद्यार्थि-जीवने तस्य सहृदयतायाः, शालीनतायाश्च या प्रभाव-मुद्रा मयि निपपात, सा यदा यदा तद्दर्शनस्यावसरः समाययौ, तदा-तदा गम्भीरैव जायमानाऽभूत् । स हि देशस्यैकः प्रमुखो धनपतिस्तथा च ख्यातनामा दानवीरोऽभूत् । किन्तु स किलैतावान्निरहङ्कारो विनयशीलश्चासीद्यत् स्वस्य श्रीसम्पन्नताया आभासमपि न कदापि प्रायच्छत् । भारतीय शास्त्राणामनुसारं धनस्याभावः प्रभावश्च द्वावप्येतौ धर्मं नाशयतः । श्रेष्ठिवर्यस्य युगलकिशोरमहोदयस्य सविधेऽपारं धनमासीत् किन्तु तत्प्रभावो नाभूत् । सोऽर्थेनानर्थं न कदापि सेहे । न तु सोऽर्थानामासक्तिं सिषेवे न चार्थेन मानवताया मूल्याङ्कनं चक्रे । आचार्यस्य कौटिल्यस्यानुसारं लक्ष्यमर्थस्य 'तीर्थेषु प्रतिपादनम्' विद्यते । विरलामहोदयोऽसौ स्वात्मनः पुरुषार्थेन प्रोद्योगेन च कोटिशो रूप्यकाण्युपार्जयामास, कोटिशश्च मुक्तहस्तं दाननिमित्तमुत्ससर्ज । यतोऽस्यत्वे विषयेऽत्र न कोऽपि तत्तुलनां कर्तुम् प्रभवति । स हि कवेस्तामिमामुक्तिं पूर्णतश्चरितार्थीं चकार—

नैया में पानी बढ़े, घरमें बाढ़े दाम ।
दोऊ हाथ उलीचिये, यहि सज्जन को काम ॥

श्रीयुगलकिशोरविरलामहोदयो द्रढीयान् हिन्दुरवर्तत, किन्तु तस्य हिन्दुत्वं संकुचितं न सद् विशालं बभूव । हिन्दुत्वे स तान् सर्वान्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पथः सम्प्रदायांश्च सम्मिलितान् कुरुते स्म, येषामुद्गमस्रोतो भारतमास्ते। वैदिकानवैदिकान् सर्वानपि मतविशेषान् प्रति स सहिष्णुः श्रद्धावांश्चासीत् तस्याऽयं समन्वयकारी दृष्टिकोण एव हिन्दुत्वस्य वैशिष्ट्यं विद्यते।

हिन्दु-समाजस्य कल्याणस्य तस्यैतावत् संलग्नत्वमभूद्यद्धिन्दुजीवनस्य किमपि क्षेत्रम् तथा तस्य सुधारस्य किमप्येतादृशं कार्यं न स्याद् यस्य साहाय्यं तेन न कृतं भवेत् यदापि कोऽपि तेन-मिलति स्म, तदा स हिन्दु-संघटनस्यावश्यकतायाः प्रतिपादनमवश्यमेव कुरुते स्म। जीवनस्यान्तिमेषु दिवसेष्वपि, यदा स रोगशय्यामधिशयानोऽभूदहं तेन मिलनायागच्छम्। तदानीमपि तस्यास्वस्थताया नैव, किन्तु हिन्दु-समाजस्य स्वास्थ्यस्यैव समधिकं तच्चिन्ता बभूव। अन्तिमश्वासोच्छ्वासपर्यन्तं स हिन्दु-हितस्यैव विचारं कुर्वंस्तस्थौ। अद्य तु तस्य स्वर्गस्थ आत्मा तदिदमेव कामयानः स्याद् यद्वयं सर्वेऽपि देशवासिनः स्वात्मनः सर्वामपि शक्तिं प्रयोज्य हिन्दु-समाजं शक्ति-सम्पन्नं, चैतन्यशालिनं, वैभवपूर्णं च विदध्महीति। तस्मिन्नेव हिन्दु-समाजे श्रेष्ठिवर्यस्य युगलकिशोरविरलामहोदयस्यात्मावतीर्य सततोद्योगस्यानवरतदानस्य च परम्परामग्रे सम्वर्द्धयिष्यति। ऋषिकल्पस्य विरलामहोदयस्य कृतित्वमेव तस्य पुण्य-स्मारकमास्ते। स हि पुण्यश्लोकोऽभूत्, पुण्यात्माभूत्। तस्य पुण्यस्मृतावहमात्मनः प्रणतिपूर्वकं श्रद्धाञ्जलिमर्पयामि। ऋषिकल्पार्यपुत्र, तुभ्यं प्रणामाः!

गिरने से पहले उनकी रक्षा करें

बालों और दाँतों की नियमित देखभाल और उनका पोषण आवश्यक है। क्यों न फिर उनके गिरने से पहले उनकी रक्षा की जाय? इसके लिए उदयपुर का गाय छाप ब्राह्मी आँवला तेल और काला दन्त-मन्जन सर्वोत्तम है। इन आयुर्वेदिक उत्पादनों से आपके बाल [illegible] मजबूत रहेंगे।

इलाज से बचाव बेहतर है।

[illegible]

गाय

छाप

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भक्तिनम्रं हृदयं प्रति

महामहोपाध्यः पण्डित–श्रीगोपीनाथः कविराजः

भारतीयाकाशे प्रोज्ज्वलमेकं नक्षत्रं स्वकिरणं संहृत्य सदा-सर्वदार्थं तिरोदधे। श्रद्धेयस्य श्रेष्ठिवयस्य श्रीयुगलकिशोर-विरलासदृशस्य महापुरुषस्य परलोकगमनाद्देशस्य, समाजस्य तथा धर्मस्य च वस्तुतो या हानिबभूव तत्पूर्तिः शीघ्रमेव भवेदिति सम्भावना नास्ते। विरलामहोदयस्य व्यक्तिगतं जीवनं तथा सर्वविद्यासम्पत्तिर्विभिन्नप्रकाराणां दीन-दरिद्राणां सहायतायै, साधुपुरुषाणामात्मविकासानुकूलं सम्पादनाय, विभिन्नैरभ्युपायैः प्राचीनसंस्कृतेः संरक्षणस्योद्देश्याद् विद्यार्थिनां विद्याराधनस्य सुविधायै, भगवद्भक्तेः प्रचाराय, तत्परिपुष्टये च सर्वसमर्पितं बभूव। ततमादेवाद्य तस्य विमला कीर्तिप्रभा शुभ्रोर्ध्वगामिज्योतिः स्तम्भसदृशी दिग्दिगन्तपर्यन्तं व्याप्य निरन्तरमूर्ध्वं प्रचलन्ती वर्वति। "कीर्तिर्यस्य स जीवति" तदेतदत्यन्तं सत्यमस्ति, तस्मादेवाद्यत्वे तस्य यशः शरीरमजरामरमास्ते।

तस्य स्मरणे संजाते कृतज्ञतया केवलं सूक्ष्मे चक्षुष्यार्द्रे भवतः। न केवलमेतावदेव, तस्य भक्तिनम्रं हृदयं प्रति भक्तेरकृत्रिमा उच्छ्वासा जाग्रति।

तस्य हृदयेऽनुदारभावो न तस्थौ। तद्दृष्टौ शिव-शक्त्योर्भेदो न बभूव, तथैव शिव-विष्ण्वोर्भेदो नाभूत्तथा स्मशानवासिन्याः श्यामाया यत्स्थानमासीत् तथैवैश्वर्यमय्याः सर्वशक्तेरधिष्ठात्र्या जगन्मातुस्त्रिपुरायाश्चापि तदेव स्थानं बभूव।

अद्य विरलामहोदयः प्रारब्धकर्मणामवसानाद्धेतोः कालस्य परिणामशीलं दुःखबाहुल्यं राज्यं विहाय, महाकालस्य राज्यमतिक्रममाणो नित्यं प्रेममयस्य श्रीकृष्णस्य नित्यलीलामये परमधाम्नि स्थानं प्राप्तवान्। स हि श्रीकृष्णरूपिणः स्वेष्टदेवतायाः प्रेमराज्येऽद्य सानन्दं विहरन्नस्ति।

(पृष्ठस्य ४२ शेषः)

बाबूयुगलकिशोरविरलामहोदयस्य पार्थिवं शरीरं मध्येऽस्माकं न विद्यते किन्तु तस्य ख्यातिस्तथा तस्य सत्कार्याणि च सदैवास्मभ्यं तत्स्मृति प्रयच्छन्ति भविष्यन्ति तथा तज्जीवनाद्भाविन्यः पुरुष-परम्पराः पदे प्रेरणाश्चोपलप्स्यन्ते।

कला कौशल्य का कलश

सैंचुरी मिल्स के प्रसिद्ध फैशन फैब्रिक्स

जो हरएक कला प्रेमियों की पसंद है।

"परमसुख धोती" छपी हुई "लेक्सब्यूटी" मलमल "सैंचुराईज्ड" (प्रीश्रंक) शर्टिंग और पापलीन, लट्ठा, चादरें, तौलिया, कम्बल इत्यादि।

निर्माता :

दि सैंचुरी स्पीनिंग एन्ड मैन्युफैक्चरिंग कम्पनी लिमिटेड

सैंचुरी भवन, डा॰ एनीबिसेन्ट रोड़,

बम्बई–२५ डी डी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उदारं चरितमुदात्तं व्यक्तित्वं च

भिक्षु-श्रीचमनलालः

अहं निरवच्छिन्नं ४५ वर्षाणि यावन्निरन्तरं श्रेष्ठिवर्यस्य युगलकिशोरविरलामहोदयस्य प्रीतिपात्रत्वस्य गौरवं प्राप्तवानस्मि। तमिव सरलताप्रियं, सत्याचरणमुदारमनसम् सुसंस्कृतमन्यं कमपि व्यापारिणं नाहं दृष्टवान्। स हि दानवीरः श्रेष्ठिप्रवरो युगलकिशोरविरलेति नाम्ना सम्बोध्यते स्म, नात्र कापि चातिशयोक्तिर्वर्तते। स हि महान् समाज-सुधारकोऽभूत्तथा हिन्दु-समाजस्यार्यजनानां च जातिभेदं न मेने। स सत्य आर्य आसीदर्थात्तस्य रोम-प्रतिरोम सर्वाङ्गं महद् बभूव। अहं शताधिकवारं तेनामिलम्। स च मामनेकवारं दूरमतिदूरं यात्रत् पर्यटनाय निन्ये। तत्र पर्यटनप्रसङ्गे "प्राचीन-अमरीकायां हिन्दु-प्रभावः" इति विषयकाणि मामकीनानि विवरणानि महता मनोयोगेन शृणोति स्म।

स हि परः सहस्राणां भारतीयानां, विदेशीयानां च साहय्यं चक्रे। सहायतार्थं कृतायाः कस्याश्चाप्येतादृश्याः प्रार्थनाया याचनायाश्च सम्बन्धे नाहं जाने, यां श्रेष्ठिवर्योऽयं न स्वीकृतवान्। घण्टामात्रसमयान्तरे स न केवलं रूप्यकाणां सहस्राणि, वरञ्च लक्षाधिकानि रूप्यकाणि दानरूपे प्रदत्तवान्। विदेशीयेभ्यः सः सदा-सर्वदा छात्रवृत्तीर्दत्त्वा साहाय्यं कुर्वाणोऽभूत्।

त्रिंशद्वर्षेभ्यः पूर्वं डाक्तर-इवान्स-वेंजनामको लब्धप्रतिष्ठो लेखको मामनुरुरोध यदहं तस्य परिचयं श्रेष्ठिवर्येणानेन कारयेयमिति। तदानीं युद्ध-कालोऽभूत्तथा तत्समये विदेशेभ्यो वित्तसम्बन्धिनी सहायता दुर्लभासीत्। श्रेष्ठिमहोदयोऽसौ विरलामहोदयस्तस्मै (प्रोक्ताय लेखकाय) यूरोपगमनाय मद्द्वारा त्रिसहस्ररूप्यकाणि प्रेषयामास। डाक्तरो वेंजमहाशयस्त्रिविष्टपदेशस्य विषये बह्वधिकं किमपि लिलेख। युद्ध-समये जूडिथटा-इबर्गनाम्नी किलैकामरीकादेशीयाच्छात्रा संस्कृतमध्येतुमियेष। सहायतार्थमहं श्रेष्ठिमहोदयमलिखम्। स तस्यै न केवलं संस्कृताध्ययनार्थंवापि तु सम्पूर्णस्य भारतस्य यात्रार्थमपि चोदारतापूर्वकमार्थिकीं सहायतां प्रददौ, साकमेव काञ्चन शाटिकाश्चापि प्रददौ। समयेऽस्मिन् सैव च्छात्रामरीकायाः सांस्कृतिकस्य जगतो प्रभावशालिनी नेत्री विद्यते तत्र च सैकमाश्रममपि सञ्चालयति।

भारत-स्थिताय प्रथमाय-अमरीकाया राजदूताय डाक्तर फिलिप्समहाशयाय विरला-मन्दिरे (देहल्यां वर्तमाने) महता समारोहाडम्बरेण प्रस्थान-मङ्गलोत्सवोऽनुष्ठितोऽभूत्। अस्मिन् प्रस्थान-मङ्गल-महामहोत्सवे दूतावासस्य सर्वेभ्योऽप्यधिकारिभ्यः पत्रकारेभ्यश्च षट्सहस्ररूप्यकेभ्योऽप्यधिकधनस्योपहाराः प्रादीयन्त।

विरलामहोदयो विदेशीय-दूतावासानां निमित्तमेकं पृथक् सांस्कृतिकं विभागमुद्घाटितवानासीत्। भारतीयविषयाणामध्ययनार्थं स बाली-गायना-ट्रिनिडाड-फीजी-जापान-चीन-थाईलैंडादिभ्यो ऽनेकेभ्यो देशेभ्योऽनुदानमार्थिकं प्रदानोऽभूत्। प्रतिमासं विदेशेषु परःशतानि पुस्तकान्यपि च निःशुल्कं प्रहिणोति स्म। तस्य सौम्ये गम्भीरे मुखमण्डले सदा सर्वदैवैको मधुरो मन्दहासः कन्नं क्रीडन् वर्तते स्म। स चोदारचरितोऽप्योदारव्यक्तित्वपूर्णः पुरुषो बभूव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरुषपुङ्गवः

श्रीप्रभुदत्त ब्रह्मचारी

जन्म-कर्म-वयो-रूप-विद्यैश्वर्य-धनादिभिः ।
यदि यस्य न भवेत् स्तम्भस्तत्रायं मदनुग्रहः ॥

—श्रीमद्भागवतम्

विधिके सुनिके बचन कहैं हरि हँसिके बानी ।
ब्रह्मन, तुम सरवज्ञ वेदवित् पण्डित ज्ञानी ॥
जनम, करम, ऐश्वर्य, अवस्था अरु सुन्दर तन ।
विद्या धन ये सब हि प्रशंसित जगमें हैं गुन ॥
इन सबमें मद रहतु है, धनमदअति हि प्रबलतम ।
धनमद में उन्मत्तनर, नेत्र रहित हैं अन्त सम ॥

—भागवतचरितम्

सर्वेऽपि धर्मशास्त्रकारा, नीतिकाराश्च विद्या-मदं, धन-मदं च गर्हितमाहुः। विद्या विवादाय न विवेकाय तथा धनं मदाय न परोपकारायोचित उत्तमे चा मन्येताम् । यदि च कोऽपि धनं प्राप्यापि मदान्धो न भवेद् विनम्र एव सन्तिष्ठेत, तदा ज्ञातव्यम् यत् स भगवतः सविशेषं कृपापात्रमास्त इति ।

अस्माकमसौ श्रीयुगलकिशोरविरलामहोदय-स्तेष्वेव भगवत्कृपापात्रेषु पुरुषपुङ्गवेष्वेकोऽभूत् । सत्यमेव हि स विरल एवासीत् । एवंविधानि पुरुष-रत्नानि युगयुगान्तरेष्वेव कदाचित् क्वचिदुत्पद्यन्ते । तेन साकं मम सम्पर्कोऽतीवपुराणोऽभूत् । मम मनसि तस्य कृतेऽत्यधिक आदरभावोऽभूत् स चापि मया साकमत्यन्तं स्नेहभावं रक्षन्नासीत् । देहल्यां स्वर्गीयस्य लालासूर्यनारायणस्य भवने, यत्राहं प्रायेणास्थाम्, स मामुक्तवानभूत्-'ब्रह्मचारिमहाभागो यदाप्यागच्छेद्, दूरभाषेण अहं प्रोच्ये, ममागमनस्य समाचारश्रवणसमकालमेव स तत्कालमागच्छति स्म । यदि च कस्यचिदन्यस्य सामान्यस्य निर्धनस्य गृहमध्यतिष्ठम् तदा तत्रापि स निःसङ्कोचमागच्छति स्म तथा दीर्घकालं यावद्वार्तालापान् कुर्वाणः सन्तिष्ठते स्म । तस्य वार्ताविषयो नन्वेक एव भवति स्म—'देशेऽत्र धर्मराज्यं कदा भावि ?' धर्मराज्यात्तस्याऽभिप्रायोऽभूद्धिन्दु-जातेरभ्युत्त्थानम्, विद्यालयेषु धर्म-शिक्षा, गोब्राह्मण-साधुमहात्मनां सम्मानो, देवालयानां प्रतिष्ठा तथा सदाचार-सद्गुणानां विकासश्चेति । यदाप्यहममिलम्, स मामपृच्छत्—'अपि भवन्तः किमप्यन्वभवन्, कियत्पर्यन्तं धर्मराज्यं भविष्यति ? समाधौ भवतां कापि प्रतीतिर्बभूव, भगवान् भवतः किमप्युक्तवान् ? हिमालये भवन्तः कमपि संसिद्धं सन्तं महात्मानमासादयन्, तेन समं भवतां के के वार्तालापा अभूवन् ?' इत्यादि ।

जीवन-पर्यन्तं तमेकैव चिन्ता व्यग्रं कुर्वाणाभूत्—'हिन्दु-जातेरुद्धारः कथं स्यात् !' इति । हिन्दुषु क्वचिदत्याचारस्योदन्तं शुश्राव तदा श्रुत्वैव स तथा विव्यथे यथा जलं विना मत्स्यः । कश्चन तमश्रावयद् यदमुकस्थाने किलैतावन्तो जना विधर्मं ग्राहिताश्चापि पुनः स्वधर्मे न्यवर्तन्त, तदा सोऽपारं हर्षमन्वभूत् । सोऽनाथविधवादुःखिनीनां स्त्रीणां विधर्मीकरणादत्यन्तं दुःखमन्वभत् । वनवासिनो लोकान् विदेशीया धर्मप्रचारका नानाप्रलोभनानि दत्त्वा खल्वीशु धर्मानुयायिनो विदधति, सोऽनेनात्यन्तं चुक्षुभे । रांचीनगरेऽस्यावरोधाय स किलैकां संस्थामपि प्रत्यतिष्ठिपत् । यैर्यैरभ्युपायैः प्रयत्नैश्च हिन्दु-जातेरभ्युत्त्थानं भवेद्, हिन्दुत्वस्य रक्षा भवेत्तदर्थं सः सततं प्रयत्नपरस्तस्थौ, कार्येष्वेवंविधेषु सः कोटि-कोटिरूप्यकाणां व्ययं कुर्वाणो बभूव । स्थाने-स्थाने सुविशाल-मन्दिराणां निर्माणं, साधु-महात्मनां कृतेऽन्नक्षेत्राणामुद्धाटनं, दीन-दरिद्राणां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृतेऽन्न-वस्त्र-भोजनानां, रुग्णानामातुराणामौषधादीनां प्रबन्ध-सम्पादनं तथा विद्यार्थिनां हिताय विद्यालयानां निर्माणमध्ययनशुल्कस्य, पुस्तकादीनां प्रबन्ध-विधानमित्यादीनि तस्य सहजानि स्वाभाविकानि च कार्याण्यासन्। विदेशेष्वपि यत्र यत्र हिन्दवो निवसन्ति तत्र तत्र देवालय-मन्दिराणां निर्माणं तस्य जीवनस्य लक्ष्यमिव संतस्थे। अनेकवारं स मामवोचद्–'भवन्तो विदेशेषु स्वकीयान् प्रचारकान् प्रहिण्वन्तु। विदेशेषु लोकाः स्वधर्मं विस्मरन्तो वर्तन्ते।' अस्मादेव विदेशेष्वपि महती ख्यातिरासीत्, ते हि लोका 'विरला महात्मा' इति नाम्नाऽजानन्। श्रूयते, यत्तस्य सर्वेभ्योऽपि कनिष्ठो भ्राता खल्वेकदा जापानं जगाम। केचिज्जनास्तत्र तं पप्रच्छुः-'अपि भवास्त विरलाख्यं महात्मानं जानीते, यो हि भगवतो मन्दिराणि निर्मापयन् वर्वति ?' कनिष्ठो विरलामहोदयः साश्रुनयनमवोचत् "स हि मम पूज्यो ज्येष्ठो भ्रातैवास्ते।"

सत्यमेव हि स महात्मैवासीत्। एवं मे प्रतिभाति, यथा ध्रुवः पूर्वजन्मनि महांस्तपस्वो महात्मा बभूव तथैकेन राजकुमारेण सह स्नेहसद्भावात् क्षणार्थं तन्मनसि राजकुमारत्वे वासनोत्पेदे, यत्परिणामतः स राजकुमारो भूत्वा जन्म लेभे तथा पञ्चवर्षात्मकेऽल्पवयस्येव स षाण्मासिकया साधनया भगवत्साक्षात्कारं विदधे। एवमेव श्रीयुगलकिशोरविरलामहोदयः पूर्वजन्मनि कोऽपि च योगभ्रष्टो महात्माऽभविष्यतथा तन्मनसि धर्माचरणस्य वासनाऽभविष्यत्तत एव हि स नन्वेतावति श्रीमति गृहेऽजायत तथा च दान-धर्म-दया-मन्दिरनिर्माणादीनां सदिच्छाः पूर्णतां निनाय।

अथ च तस्य पूज्यः पिता बहुभ्यो वर्षेभ्यः काशी-वासं कुर्वन्नासीत्। स हि विदुषां ब्राह्मणानां भक्तो महानभूत्तेभ्यो दानं निरन्तरमेव प्रददानोऽभूत्। स हि स्वात्मनः पुण्य-प्रतापस्य फलस्वरूपं श्रीयुगलकिशोरसदृशं योग्यं श्रेष्ठं ज्येष्ठं च सुपुत्रं प्राप्तवान्। पितुरसौ स्वाभाविकी खल्विच्छा भवति यत्तत्पुत्रस्ततोऽपि महान् यशस्वी च भवेदिति। श्रीयुगलकिशोरः स्वपितुस्तामिमामिच्छां परिपूर्णां चकार। सोऽयं युगलकिशोरमहोदयः साधु-महात्मनाम् सविशेषं प्रेमी भक्तश्चाभूत्। स हि यत्र कुत्रापि श्रेष्ठस्य साधोरागमनमशृणोत्तद्दर्शनायाधावत् तथा यथा सम्भवं तत्सेवा-सपर्यामकरोत्। स हि (हृषीकेशतीर्थे) स्वर्गाश्रम-न्यास-सभायाः सभापतित्वं तस्मादेव स्वीचकार यतस्तत्र परश्शतेभ्यः साधुमहात्मभ्यो नित्यमेव भोजनं प्रदीयते। भोजनदाने स महान्तमानन्दमन्वभूत्। यथा शास्त्रवचनमास्ते:—

दातृत्वं प्रियवक्तृत्वं धीरत्वमुचितज्ञता।
अभ्यासान्नैव लभ्यन्ते चत्वारः सहजा गुणाः॥

अर्थाद् दानवितरणोत्साहो, मधुरभाषणं, धीरता तथा चौचित्यज्ञानमितीमे चत्वारः सद्गुणा अभ्यासान्नोपलभ्यन्ते वरञ्च जन्मजाता, निसर्गप्रदत्ता भवन्ति। विरलामहोदये त इमे चत्वारो गुणाः सहज-सुलभा आसन्।

इतः कतिचिद्भ्यो वर्षेभ्योऽवकाशग्रहणात्तस्य व्यापारिको लाभायो न कोऽपि चावाशिष्यत। एकदा वार्तालाप-प्रसङ्गे स मामुवाचः—'महाराज! मयेदानीं वाणिज्य-व्यापारचरणं परित्यक्तमस्ति। यदि चाहं भ्रातॄन् वदेयं तदा ते सर्वस्वमपि प्रदद्युः, परमहं तान् वक्तुं नेच्छामि। केचन दातव्यनिधि-न्यासा वर्तन्ते, तेभ्य एव तन्नियमानुसारं किमपि किमपि स्वल्पं वाधिकं वा ददामि प्रदापयामि वा।' त इमे दातव्यनिधि-न्यासाश्चापि तद्द्वारैव संस्थापिताः सन्ति। एवं विधस्योदारमनसो जनस्य सविधे स्वात्मतः स्वकीया सम्पत्तिर्नहि भवितुमर्हति 'परोपकाराय सतां विभूतयः।' स हि सर्वप्रियः सर्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हितैषी च बभूव । स हि सामान्यात् सामान्ये-नापि जनेन साकमपि महता स्नेहभावेन वार्तालापं विधत्ते स्म, तस्य सुख-दुःखादिकं शृणुते स्म तथा यथाशक्ति तत्सहाय्यं करोति स्म ।

कश्चनैकः सुप्रतिष्ठितः सज्जनः कथामेकां प्ररोचनीं मामश्रावयत् । तथा हि एकदा स एष बाबूयुगलकिशोरविरलामहोदयः कचिद् गच्छन्नासीत् । मार्गे खल्वेकस्योपानत्कारस्य तस्य च ग्राहकस्यैकस्य मध्ये मिथो वाद-विवादो जायमानो बभूव । स हि तत्कालमेव तत्र स्थितवानुपानत्कारं च पप्रच्छ तदा सोऽब्रूतः—'श्रेष्ठिवर्य, अहमस्योपानहमसीव्यम् । अष्टावाणकाः पारिश्रमिकं निश्चितमभूत् परन्तु सोऽयमधुनाऽऽणकचतुष्टयमेव प्रयच्छति ।' आकर्ण्यैतद् विरलामहोदय उवाच—'साधु, त्वमस्योपानहि यावत् सीवनमकरोस्तद्विदार्यास्मा उपानहं निवर्तस्व तथेदमेकं रूप्यकं गृहाण ।' एवमुक्त्वा स तस्मा उपानत्काराय रूप्यकमेकं प्रदत्तवान्, स्वसमक्षमेवोपानहं विदार्य ग्राहकाय निवर्तयामास ।

विरलामहोदयस्य प्रत्येकस्मिन् कार्ये दानशीलता, दीन-वत्सलता तथा च धर्मपरायणता सन्निहितास्तस्थुः । एवं विधानि नर-रत्नानि यदा-कदैवोत्पद्यन्ते । तरुणावस्थायामेव तस्य धर्मपत्न्याः स्वर्गवासो बभूव । लोकास्तं द्वितीयं विवाहं कर्तुं बहु कथयामासुः परन्तु नैव स्वीचक्रे, तथा शेषं सम्पूर्णं जीवनमेकः सदाचारी, संयमी संन्यासीव व्यतीयाय । एतच्छ्रूयते, यत् सः स्वकक्षं प्रवेष्टुं कामपि स्त्रियं नानुमेने । स्वभगिनीः, पुत्रीर्वधूजनांश्च, यास्तं प्रणम्याशीर्वादं ग्रहीतुमभ्युपागमन्, ताभिश्चापि यथा सम्भवं स्वकक्षाद्बहिरेव मिलति स्म । स किलैतावत्सु धर्म-वैभवेषु सत्स्वपि च जले कमलमिव निर्लेप एव तस्थौ । तज्जीवनमतीव सरलं बभूव । एकं मरुत्स्वरयानं, सेवकं चैकं स ररक्ष, शुद्धं, सात्त्विकं च स्वल्पाहारं चक्रे तथा स्वाध्यायतत्परस्तस्थौ । धनमदस्तं विचालयितुं न शेके । मन्ये, तमेतमेवोद्दिश्य भगवान्, श्रीमद्भागवते लिलेखेव—

मानस्तम्भनिमित्तानां जन्मादीनां समन्ततः ।
सर्वश्रेयः प्रतीपानां हन्त मुह्येन्न मत्परः ॥

जे जन सब कछु त्यगि सरन मेरी महँ आवें ।
ते तजि सब अभिमान निरन्तर मम गुन गावें ॥
जाति वरन अभिमान करें नहिं धन महँ ममता ।
परहित में नित निरत तजैं सब मद उद्धतता ॥
त्यागि मान मद सबनि महँ, निरखें श्रीभगवान हैं ।
सब अनर्थ के मूल ये, मिथ्या ही अभिमान है ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वर्गत-श्रीयुगलकिशोरविडलामहोदयः सादरं स्मर्यते

(१)

जगति सुमुनिवृत्तिर्यो गृहस्थोऽपि शश्वत्,
मनसि निरभिमानः सम्पदाढ्योऽपि योऽभूत्।
अधन-जन-हितार्थी स्वार्थगन्धेन हीनः।
स इह **युगलकिशोरो** वन्दनीयो न केषाम्?॥

(२)

धर्मार्थं जनताहिताय च सदा देशे विदेशेष्वपि
यो निर्मापयितुं विशाल-मन्दिरकुलं सद्धर्मशालास्तथा।
जीर्णोद्धारविधौ च यो विहितवान् द्रव्यस्य दानं महत्,
यो दीनेषु दयापरः स विरलावंशाग्रणीः स्वर्गतः॥

(३)

नानावस्तुप्रदानैः क्षुधितजनकुलं रक्षति स्मानिशं यः,
धर्म्ये कृत्येऽपि दत्तं धनमधिकमहो सादरं येन नित्यम्।
धनो मान्यो वदान्यः सकलगुणनिधि र्दानवीराग्रगण्यः
श्रद्धे यो यो गतः स्वः, स हि **युगलकिशोरो** मया स्मर्यतेऽद्य॥

विडलापरिवाराय शुभाशीः

(४)

सन्त्यन्येऽपि सहस्रशोऽत्र भुवने लोका धनाढ्या अपि
दातारस्तु न ते, तथा स्वयशसे यच्छन्ति केचिद् धनम्।
न्यायोपार्जितसम्पदां वितरणं पात्रेषु ये कुर्वते,
धन्यास्ते विडलास्तु सन्ति विरला लोकोपकारव्रताः॥

सतां मानैर्ऽथिनां दाने तथा धर्मस्य पालने।
विडलाश्रेष्ठिभिस्तुल्यो नान्योऽस्ति जगतीतले॥५॥

सत्कारः क्रियते येन विदुषां प्रतिवत्सरम्।
सान्वयः स चिरञ्जीव्यात् श्रेष्ठी **श्रीव्रजमोहनः**॥६॥

विनीतः
दीनानाथत्रिवेदी मधुपः,
भारती-सहसम्पादकः, जयपुरम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुण्यश्लोको भ्रातृवर्यः

श्रीहनुमानप्रसादपोद्दारः

पार्थ ! नैवेह नामुत्र विनाशस्तस्य विद्यते ।
न हि कल्याणकृत्कश्चिद् दुर्गतिं तात गच्छति ॥
प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥
—गीता ६/४०-४१

स्वनामधन्यः श्रद्धेयः पूज्यो भ्रातृवर्यं एवं-विधो ह्येको महान् पुण्यकर्मा 'योगभ्रष्ट' आदर्श-पुरुषोऽभूत । तस्मिन् युगपदेवैताहशानां विलक्षणानां साधुजनस्पृहणीयानां च सद्गुणानां समूहो विद्यमानोऽभूत्तथा केषां चित्ताहशानां परस्परं विरोधिनामिव परिदृश्यमानानां सद्भावानां सुन्दरः समन्वयोऽभूद् यमालोक्य महामहिममहोयांसोऽतिश्रेष्ठाश्चापि सुधीजना आश्चर्यचकिताः श्रद्धावनताश्च बभूवुः । स हि श्रीकृष्णस्य भगवतो भक्त आसीत्, परन्तु यावदाकर्षणं तस्यानन्तविजयिनोऽसुरोद्धारकस्य धर्मरक्षकस्य तथा गीतागायकस्य रूपं प्रति बभूव तावद् व्रजवासिनो नृत्य-गीत-मधुरिममयं मुरलीमनोहरं प्रति नासीत् । तस्मिन्-श्रीकृष्णस्य दिव्या प्रज्ञा-तथा विलक्षणा राजनीतिर्भगवतो बुद्धस्य प्रतिभा, भगवतो महावीरस्याहिंसा, गुरुगोविन्दसिंहस्य धर्मरक्षार्थं बलिदान-भावना, साधु-महात्मनामादर्शस्त्यागो, देशाय प्राणोत्सर्गं कृतवतां वीराणां वीर-भावः, कर्णस्योदारता, शिविनृपतेरिव शरणागतवत्सलता, रन्तिदेवस्येव दया, प्रह्लादस्येव परमविश्वासपूर्णास्तिकताऽर्जुनस्येव निष्ठा, भीष्मस्येव विश्वासस्तथा च हरिश्चन्द्रस्येव धर्म-प्रियता युगपदेव दृश्यते स्म ।

स हिन्दुः, सनातन-वर्णाश्रमधर्मा चासीत्, परन्तु तस्य 'हिन्दुत्वं' 'सनातनधर्मश्च' वस्तुतो-विशाल 'आत्मधर्मो' बभूव । यथैकस्यैव विशालस्य वटवृक्षस्याऽसंख्याः शाखा भवन्ति, यथैवैकस्य नित्यस्य सनातनधर्मस्यात्मधर्मस्यैव विभिन्नाः शाखा-प्रशाखा जैनबौद्धादयोवर्त्तते । तस्मादेव श्रीयुगलकिशोरमहोदयद्वारा निर्मितेषु यत्र भगवतो लक्ष्मीनारायणस्य, शङ्करभगवतश्च मूर्तयो विद्यन्ते, तत्र बुद्धभगवतो महावीरस्वामिनो, गुरुनानकप्रभृतीनां मूर्तयोऽपि च वर्तन्ते तथानेन सम्बन्धेन स विश्वस्य सर्वान् बौद्धदेशान् हिन्दुदेशान् मेने तथा तथैव तैः साकमौदार्यपूर्णं व्यवहार-वर्तनं कर्तुमियेष, कुर्वाणश्चासीत् ।

श्रीअरविन्दोमहात्मा देशभक्ते र्व्याख्यां कुर्वाणो लिलेख यद्धि 'देशात्मबोध' एव हि देशभक्तिरास्ते—देशेन साकं सर्वथैकात्म्यम् । अनेनैव प्रकारेण श्रीयुगलकिशोरमहोदयस्य हिन्दुधर्मेण साकं तादात्म्यं बभूव । युगलकिशोरोऽर्थाद्धिन्दुधर्मो, हिन्दुधर्मोऽर्थाद्युगलकिशोरविरलामहोदयः । तस्य जन्म, जीवनं, जीवनस्य सर्वेऽपि च कार्यकलापा धर्मायैव बभूवुः—धर्मरूपा एव बभूवुः ।

'दानं भोगानाशस्तिस्रो गतयो भवन्ति वित्तस्य ।' सर्वोत्तमा गति'दान' मास्ते । श्रीयुलकिशोरमहोदयो दानायैव धनमुपार्जयत्, वरं च सत्यं तथ्यं त्विदमास्ते यत्तस्य प्रत्येक विचारः, प्रत्येकं चिन्तनं, प्रत्येकं कर्मस्वभावतो हिन्दुधर्मार्थमेव भवति स्म । धनं नाम तस्य स्वकीयं वस्तुमात्रमेव नासीत् । तदुपार्जितं भवति स्म हिन्दुधर्मार्थम् । स हिन्दुधर्मस्य सजीवा प्रतिमेवासीत् ।

सर्वादावहं सन् १९०८ ई० वर्षासन्नं कालिकातायां तस्य दर्शनमकार्षम् । तस्मिन् समये वयं केचन बालका देशस्यार्थे किमपि कार्यं कर्तुमवाञ्छाम । तस्मिन् कार्ये वयं द्वाभ्यां महानुभावाभ्यां महतीं प्रेरणामलभामहि । तयोरेको-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऽभूत्—पिलान्या एव महामनाः सत्पुरुषः श्रीलक्ष्मीराममुरोदियामहोदयस्तथापरः श्रद्धेयः श्रीयुगलकिशोरमहोदयः। काली-गोदाम-स्थानस्य प्रथमे खण्डे तस्य पीठासनं बभूव। तत्र काली-गोदाम-स्थानस्य सर्वोपरि खण्डेऽस्माकं 'हिन्दु-क्लब' इत्याख्यं क्रीडामन्दिरमासीत्, यस्मिन् सेवार्थं बलप्राप्तये, रक्षार्थं च व्यायामाभ्यासोऽक्रियतैवमेव देशसेवार्थं चान्यान्यप्रकाराः प्रेरणाश्च प्रादीयन्त। तत्र श्रीयुगलकिशोरमहोदयस्य सक्रियमाशीर्वादः प्राप्तोऽभूत्।

तत आरभ्यान्तपर्यन्तं श्रीयुगलकिशोरमहोदयेन साकं मे स्नेह-सम्बन्धो ह्युत्तरोत्तर प्रगाढतां गच्छन्नभूत्। अथ सन् १९१६ ई० वर्षे 'भारत-रक्षा-नियमानुसारं केचन मारवाडीयुवानः सर्वकारेण निगृहीताः। तेष्वहमपि चासम्, तस्मात्कारणान्मम प्रायेण पादोनं वर्षद्वयं यावद् बाँकुड़ा–मण्डलस्य शिमलापालनाम्नि स्थाने दृग्बन्ध-बन्दित्वेन स्थातव्येनापतितम्। तदानीं समये सर्वकारस्यातङ्को महान् समाजे विजृम्भमाणो बभूव, तथास्माद् युगलकिशोरमहोदयस्तटस्थ इव स्थातुं बाध्यो बभूव। सन् १९१८ ई० वर्षेऽहं बंगीय सवकारद्वारा बंगप्रान्तत्यागस्यादेशमासादयम् तथा चाहं राजस्थानमतिक्राम्यन् मोहमयीमगच्छम्। ततस्तु श्रीयुगलकिशोरमहोदयेन साकं ममात्मीयतायाः सम्बन्धो वर्द्धितुमारेभे तथा च गोरक्षपुरमागत्य गीतामुद्रणालयस्य कार्यारम्भादनन्तरं सम्बन्धो विशेषं ववृधे। स मे श्रद्धेयस्त्वासीदेव। इदानीं तु सः सत्यमेव मे ज्येष्ठो भ्राता बभूव। मम निरीक्षणं संरक्षणं च कर्तुमारेभे। समये–समये तस्मादहमतीव शोभनां सत्प्रेरणां लब्धुमारभे। यदा यदाहं देहलीं समगच्छं, तदा तदा तद्दर्शनमकार्षम्। ततस्तु मां प्रति तस्य ममत्वमेतावत्पर्यन्तं ववृधे। स्वयं मम, कार्यस्य च सम्बन्धे स श्चिन्तयितुमारेभे तथा तस्य सा ऽऽत्मीयता तथा रूपं प्रत्यक्षं प्रकटिता भवति स्म यद्दर्शकानामाश्चर्यं भवति स्म।

यदा यदाहं तस्य सविधेऽगच्छम्, स मां हिन्दु-धर्मस्य विषये पप्रच्छ। स कथयति स्म—"अपि कोऽपि साधु–महात्मा वाऽमिलत्, हिन्दु-धर्मस्य भविष्यद्विषये सः किमप्युवाच किम्? हिन्दु-धर्मस्य किं भावि"? इत्यादि। एकैव चिन्ता–एकमेव संलग्नत्वम्। स स्वयं तु हिन्दु-धर्मस्याऽऽजीवनमप्रतिमां सेवां चकारैव, किन्तु विविधैः प्रकारैरसंख्याञ्जनान् हिन्दु-धर्मं सेवितुं प्रेरयामास। यदि च सत्यं कथ्येत, तदैतत्कथनेऽपि चात्युक्ति र्नास्ते, यतस्तन्मया स्वयमात्मना ज्ञातं सत्यं तथ्यं वर्तते, यद्देशस्यास्य महतो महद्भ्यो नेतृप्रवरेभ्यो हिन्दु-धर्मस्य सेवार्थं तद्द्वारा प्रबलाऽनिवार्या च प्रेरणोपलभ्यमानासीत्।

मत्कृते तस्य यो हि स्नेहोऽभूतस्यापि प्रधानं कारणमेतदेवासीद्यन्मद्द्वारा हिन्दु-धर्मस्य कापि सेवा क्रियमाणास्ते। स हीत्थं मन्यते स्म, तथा समये–समये मां बहु प्रोत्साहयति स्म, तथा यदाकदा कस्यामपि त्रुट्यां जातायां सत्यां स मे मधुरभाषयोपालम्भमपि प्रददाति स्म। गीतामुद्रणालयं प्रत्यपि कारणेनानेव हि तस्यागाधः स्नेहभावोऽविद्यत। स वारम्बारं गीता-मुद्रणालयस्य स्थिते विषये पृच्छन्नभूत्तस्योन्नतये प्रैरयत्। कस्माच्चित् कालात् पूर्वं स गीतामुद्रणालयस्य विषये शुश्राव यत्तत्र हानिर्जायमानास्ते तथा च काश्चन बाधा आपतन्त्यः सन्तीति, तदा सोऽतीव चिन्ताकुलो बभूव। स मे सन्देशं प्राहिणोत्। अस्माकं निधेर्न्यासस्य मन्त्रि-महोदयः कालिकातायां पृष्टस्तद्द्वारा तथा सहयोग–प्रस्तावोऽपि च प्रास्तूयत। अहं तेन देहल्याममिलम्, तदा मां बह्वीर्वार्ताः पप्रच्छ, स्वसम्मतिमपि प्रददौ। तत्समये स उवाच—"हनुमन्, (स्नेहात् स मामनेनैव सम्बोधनेन सम्बोधयति स्म) यदि चार्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यवस्था यान्यूनत्वाद् गीतामुद्रणालयस्य कार्ये कापि बाधा भवति, तदा स्वोपनिधेर्न्यासदस्यान् पृच्छ। यदि तेऽभिवाञ्छेयुस्तदा मुद्रणालयस्य व्यवस्थायास्तथा च तत्रावश्यकस्य धनराशेर्वि-नियोगस्य सर्वमपि कार्यमस्मत्तत्त्वावधाने प्रदीयताम्। गीता-मुद्रणालयस्य नीतेरनुसारं भवद्भिः स्वीकृतस्य साहित्यस्य प्रकाशनं जायमानं भविष्यति, 'कल्याणं' च प्रचलिष्यति"। मया कृतज्ञतया स इदमेव प्रोक्तः—'नास्त्येव तादृशी कापि च बाधा, भवदाशीर्वादं कामये, यो हि सदा सम्प्राप्त एवास्ते।"

श्रीयुगलकिशोरमहोदयस्य स्मृतिः पुण्यमयी वर्तते। यदा यदा मयि तस्य स्मृतिर्जागर्ति, तदा तदाहं तस्यामेकस्य पवित्रस्य हिन्दु-धर्मस्य ज्योतिषः पुण्यदर्शनं करोमि। अद्य तस्य नश्वर-देहस्य परित्यागादनन्तरमपि तत्स्मृतिस्तथैव पुण्यमयी विद्यमानास्ते—पुनरधुना तु सातीव पुण्यरूपा भूयो भूयोऽभ्युदिता मे सात्त्विकीं शक्तिं, प्रेरणां च प्रददाना सन्तिष्ठते। अहं सदैव तस्य भक्तोऽस्थामधुनापि चास्म्येव तथा सदैव तेनैव प्रकारेण तस्मै श्रद्धाञ्जलिमर्पयामि।

महान् पुमान्

युगलकिशोरसुरद्रु र्यदैवान्तरितोऽभूदितो लोकात्।
तदैव सुखदा सेयं भूतदया-च्छायापि लीना ॥१॥
यस्य धर्मस्तथाऽऽचारो भारतीयः सदाऽभवत्।
शिक्षा-दीक्षापि यस्याऽभूद् भारतीया सदा तथा ॥२॥
वेष-भूषा तथा भाषा भारतीया सदोत्तमा।
भारतीयैश्च संस्कारैरात्मा यस्य च भावितः ॥३॥
भारतीयजनक्लेशाच्चिन्तितो योऽभवद्भृशम्।
श्री युगलकिशोरः स भारतीयो महान् पुमान् ॥४॥

—दीनानाथत्रिवेदी मधुपः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिन्दु-जीवन-यज्ञस्याध्वर्युः

श्रीश्रीप्रकाशः

अद्यतने भारते विरला-परिवारस्तेष्वङ्गुलि-पर्व-गण्येषु परिवारेष्वास्ते, यस्य पर्याप्तं प्रशंसनमतीव कठिनमास्ते। नानाप्रकाराणामुद्योगानां समारम्भं कृत्वा, तांश्च महत्या कुशलतया, सफलतया च सञ्चाल्य परिवारस्यैतस्य सदस्यैर्देशस्यार्थिकोत्कर्ष-साधने महत् साहाय्यामुपालभ्यत। एतेषां यन्त्र-कार्यालयेषु-कर्मशालासु-बहूनामेताहशानां वस्तूनामुत्पादनं जायमानमास्ते, येषां कृते प्राग्वयं विदेशानामाश्रिता आस्म। साकमेवानेन स एषः परिवारो व्यक्तिगतस्य, कौटुम्बिकस्य चा जीवनस्य श्रेष्ठतरमादर्शमस्माकं सर्वेषां पुरत उपस्थितं कृतवान्। राजा बलदेवदासर्विरलामहोदयस्तेषु सौभाग्यशालिषु सत्पुरुषेषु बभूव, यः स्वयं दार्घायुः प्राप्य स्वजीवनान्ते सुपल्लवितं पुष्पितं फलितं च कुटुम्बमत्र लोकेऽवाशेषयद्यो हि सर्वप्रकारेण सुसम्पन्नस्तस्थौ, यस्य च सदस्याः स्व-स्व-क्षेत्रे सद्यशः कीर्तिं चार्जयन्।

राजाबलदेवदासर्विरलामहोदयादनन्तरं श्रीयुलकिशोरविरलामहाशयः परिवारस्यास्य सर्व-श्रेष्ठः सदस्यो बभूव। मम पितृचरणा द्राक्तरभगवानदासमहोदयास्तमिमं युगलकिशोरमहोदयं प्रति बह्वीं प्रीतिमादर-सम्मान-भाव च ररक्षुः। यदा युगलकिशोरमहाशयः काशीमागच्छति स्म तदा स मे पितृचरणैः साकमवश्यमेव मिलति स्म, श्रवणयोग्या च शास्त्रचर्चा, धर्मचर्चा च भवति स्म। सोऽयं श्रीयुगलकिशोरविरलामहोदय आर्याणां धर्मस्य-अर्थाद् हिन्दु-धर्मस्यातीव पोषको महान् बभूव तथा च तस्य ह्रासं दर्शं दर्शं बहु दुःखमनुभवन्नासीत्। हिन्दुष्वात्मसम्मान-भावं जागरयितुं तथा च तान् धर्मं प्रति प्रवर्तयितुं सः सर्वैः प्रकारैः सर्वदा समुद्यतस्तस्थौ। अस्यैवोद्देश्यस्य सिद्धये सोऽनेकाभ्यः संस्थाभ्यस्तथा च व्यक्तिविशेषेभ्यः साहाय्यं प्रददानोऽभूत्तथा स्थाने-स्थाने सुन्दराणि, सुविशालानि च मन्दिराणि निर्माय जनसाधारणमाजुहाव येन त ईश्वरं, स्वधर्मं, संस्कृतिं च न विस्मरेयुस्तथा तदभिमानं धृत्वा पुनर्जीवनमापादयेयुः स हि हिन्दु-जीवन-यज्ञस्याध्वर्युर्बभूव।

व्यापारेऽस्य विरलामहोदयस्याद्भुतो हि प्रवेशोऽभूत्। संसारस्याखिलस्य गतिविधीन् व्यापारगतान् स जजान, बुबोध च। मध्ये-मध्येऽहमपि तं समागच्छन्नासम् तथा तस्य सुविस्तृतेन ज्ञानेन, व्यवसायेन च चकितो भवन्नस्थाम्। तस्य जीवनमतीव सरलमनाडम्बरं च बभूव। यद्यपि विरला-वंशस्यानेकेऽन्ये सदस्या सुविशालेषु नव्यशैल्या सुसज्जितेषु भवनेषु न्यवसन्, सर्वेषु स्थानेषु, सर्वास्वपि चावस्थासु महत्या तत्परतया, कौशलेन च स्वकीयं सर्वं कार्यजातं समपादयन् परन्तु सः स्वयं सरलेन प्रकारेण यत्र कुत्रापि च निवासं ववाञ्छ। एकदाहं कार्यवशात् काश्यां तस्य गृहमगच्छम्। स हि भूमावास्तीर्णे पीठे निषण्णः समभूत्। तं परितः सर्वतोऽपि तडित्सस्वादपत्राणि तार-संज्ञकानि विकीर्णान्यासन्। तदानीं सः स्वव्यापार-सम्बन्धिषु कार्येषु व्यापृतो व्यस्तसमस्तश्च बभूव तथा तेषां तारपत्राणां समुचितान्युत्तराणि प्रदापयन्नासीत् मदर्थमपि स कांश्चन क्षणान्निष्कासयामास।

पश्चाद्वर्तिनि काले सोऽस्वस्थो भूत्वा देहलीमध्युवास। कस्यांचिद् दुर्घटनायां तस्य पादे व्याघातो महान् बभूव, बहूनि दिनानि यावद् पट्टिकाबद्धः संस्तस्थे। तस्मिन्नेव समयेऽहं तद्दर्श-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाय गतोऽभूवम् । स हि रोगशय्यामधिशयानो-ऽभूत्तथा धर्येण पोडां सहमानो बभूव । उत्तरो-त्तरं निरन्तरं च सोऽशक्तो जायमानोऽभूत् । तत एकवारमेव तद्दर्शनस्याहमवसरमलभे, यदा स देहल्यां विरलाभवने क्वचिदेकत्र निषण्णो बभूव ।

यदि सः स्वोद्यमात् कोटिशो रूप्यकाणां धनराशिमर्जयामास तर्हि कोट्यधिकानि रूप्य-काणि दानरूपेऽपि च प्रददौ । परन्तु तस्य सर्व-मपि दानं, कामं तत् संस्थाभ्यो वा व्यक्तिविशे-षेभ्यो वा स्यात्, गुप्त-दानरूपमेव बभूव । सः स्वात्मनः प्रदर्शनं न कदापि कर्तुमैच्छत्, न चास्य गर्वमपि चक्रे यदत्राहमेतद्दत्तवान्, तत्र-तद्वा प्रदत्तवानिति । राज्यपालस्याधिकारेणाहं भ्रामं भ्रामं कियत्स्वपि प्रदेशेषु विविधासु संस्थासु चाहं विज्ञापितो यद्विरलामहोदयस्यास्य युगलकिशोरमहोदयस्यैवोदार्यस्य परिणामस्वरूप-ममुकं कार्यं सम्पद्यमानमास्तेऽमुकं च सम्पन्न-मिति ।

तस्य देहावसानस्य समाचारात् संख्यावन्तो जना दुःखमनुभूतवन्तः स्युः । कियन्तश्च स्वात्मानमनाथं भावितवन्तो भवेयुः । तस्य लघुभ्राता सुप्रसिद्धः श्रीघनश्यामदास विरला-महोदयो मम सम्वेदना-पत्रस्योत्तरे मामलिख-द्यद् भ्रातृवर्यस्य मृत्योरनन्तरमिदानीं मे देहली-गमनं न रोचत इति । वस्तुतस्तस्य निधनाद्देश-स्यैका विभूति र्लोपं जगाम । परन्तु सः किलैकं मुन्दरमुदाहरणं संस्थापयामास, येन सर्वेऽपि लोकाः शिक्षां ग्रहीतुं पारयन्ते । कामं तदभि-धानं समाचारपत्रेषु तेन प्रकारेण नागतं भवेद्यथा कियतामप्यन्येषामागच्छति, परन्तु ये तं जानन्ति, परिचिन्वन्ति स्म, तेषां हृदये स निरन्तरं निवसन् सन्तिष्ठेत तथाहमपि चाद्य सर्वै मित्रैः, सहवर्तिभिः, कुटुम्बिजनैः साकमेव तस्य पुण्य-स्मृतौ श्रद्धाञ्जलिमर्पयाम्याशासे च यत्तद्यशो निरन्तरं प्रसरणशीलं भविष्यति तथा तस्मात् प्रेरणां प्राप्य वयं सर्वेऽपि देशस्य, समाजस्य, धर्मस्य च सेवायां संलग्ना भविष्यामः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वन्दे त्वां महापुरुष !

श्रीमान् अटलबिहारी वाजपेयी

श्रेष्ठिवर्योऽयं सत्येष्वर्थेषु साधुपुरुषोऽभूत्। तस्य विद्या ज्ञानाय, तस्य सम्पत्तिर्दानाय, तथा च तस्य शक्तिः परदुःखनिवारणायाभूवन्। लक्ष्मीदेव्या असीमायामनुकम्पायां सत्यामपि तं मदो वाहङ्कारो वा न मनागपि पस्पर्श। राजसिके वंशे जन्म गृहीत्वापि तस्य वृत्तिः सात्विकी बभूव तथा तस्य सम्पूर्णं जीवनं धर्मार्थं, समाजार्थं, देशार्थं च समर्पितमासीत्।

यदा-यदा श्रेष्ठिवर्येण युगलकिशोरविरलामहोदयेनाहममिलम्, तदा-तदा तस्य हृदये हिन्दुत्वस्य प्रखरं वह्निं जाज्वल्यमानमद्राक्षम्। उपरितो हिमाच्छादितो हिमालय इवाभ्यन्तरतो देशस्य वर्तमानां दुर्दशां दृष्ट्वा वडवानल इव श्रेष्ठिवर्यः स दन्दह्यमानो बभूव। स्वनिकटमागतवन्तं प्रत्येकं जनं स स्वात्मनो निर्धूमेन वह्निनालोकितमनुप्राणितं च कुर्वाणोऽभूत्। हिन्दु-धर्मस्य संरक्षणाय, सम्बर्द्धनाय च तथा हिन्दु-संस्कृतेः प्रचाराय प्रसाराय च श्रेष्ठिवर्यो युगलकिशोरविरलामहोदयो यत्किमपि विदधे, तत्तद्द्वारा निर्मितानां मन्दिराणां पाषाणेषु न किन्तु तेभ्यो मन्दिरेभ्यः प्रेरणां प्राप्नुवानानामगणितेषु हृदयेष्वपि च शाश्वतं चिरायाङ्कितं स्थास्यति। स्वधर्माद्वियुक्तान् बन्धून् पुनः कण्ठेनाश्लेषितुं तथाऽभावाज्ञानाभ्यां स्वधर्माद्विमुखीभवतो जनान् निरोद्धुं सः सुदृढानि कार्याणि चक्रे। प्रकाशस्य चाकचक्याद् दूरे वर्तमानः स कृतौ विश्वासमादधनोऽभूत्तथा मन्दिराणां कलशस्थाने न भूत्वा तेषामाधारशिलान्यासस्थाने कार्य-सम्पादने स्वात्मनोऽहोभाग्यं मेने।

हिन्दु-समाजान्तर्गतेभ्यः सर्वेभ्योऽपि च सम्प्रदायेभ्यो मत-मतान्तरेभ्यः प्रतिष्ठां प्रदातुं सः पक्षपाती बभूव तथा साम्य-भावेन तेषां विकाशाय प्रयत्नशीलस्तस्थौ। पंचापप्रदेशस्यान्दोलन-दिनेषु साकं तेन यदा यदा मिलनस्यावसरो बभूव, श्रेष्ठिवर्योऽसौ सदैव तथ्येऽस्मिन् बलं प्रार्पयद्यत् सिक्खाश्चापि हिन्दवो वर्तन्ते तथा राजनीतिगतैर्मतभेदैर्वयं न कदापि च हिन्दु-समाजस्यैकतां स्वदृष्टितोऽन्तर्धातुमनुमन्येमहीति। बौद्धाञ्जैनान् प्रत्यपि तस्यायमेव हि दृष्टिकोणो बभूव। स्थाने-स्थाने बौद्धविहाराणां निर्माणं तथा जैन-मुनीनां सम्माने समायोजिताः कार्यक्रमाश्चाप्येतत् प्रदर्शयन्ति यच्छ्रेष्ठिवर्यस्यास्य हिन्दुत्वं सुविशालं, सर्व-संग्राहकम्, समन्वयवादि चासीत्। हिन्दुधर्मस्य ध्वजं विदेशेषु प्रस्फुरन्तमवलोकितुं स सदैव व्यग्रोऽस्थात्। अनया दृष्ट्या तत्प्रयत्नाः सदैव स्मरणीया भविष्यन्ति।

जीवनस्यान्तिमेषु दिनेषु तद्दर्शनं कृत्वाऽहमकस्माच्छरशय्यामधिशयानं भीष्मपितामहमस्मरम्। मन्ये, स मृत्युं मुष्टौ निबध्नन् जीवनप्रसूनं भगवच्चरणेषु समर्पयितुमिव सन्नद्धो भवन्नासीत्। मृत्योः कतिपयदिनेभ्यः पूर्वं स सरसङ्घ-सञ्चालकं पूज्यं गुरुमहाभागं द्रष्टुमिच्छां प्राचीकटत्। समाचारं लब्ध्वा श्रीगुरुमहाभागोऽविलम्बं देहलीमाजगाम तथा श्रेष्ठिवर्यमिमं मिलितुं वायु-यानस्थानाद् विरला-भवनमगात्। द्वयोरप्यनयोर्मिलनस्य दृश्यं ये ददृशुस्ते तत्र कदापि विस्मर्तुं पारयेयुः।

श्रेष्ठिमहोदयः स्वर्लोकं जगाम। जीवनस्य प्रच्छदं प्रयत्नेन परिधार्य यथापूर्वरूपं निधाय सोऽस्मत्तः प्रतस्थे। किन्तु हिन्दु-समाजमेकीकृत्य सङ्घटनस्य, हिन्दु-धर्मं दशसु दिक्षु जोघुष्यमाणं कर्तुं तस्य जीवनोद्देश्यमधुनाप्यपूर्णमास्ते। यत्र श्रेष्ठिवर्यस्यास्योत्तराधिकारिणामेतत् कर्तव्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'आदानं हि विसर्गाय' यज्जीवनध्येयं बभूव

श्रीसीतारामः सेकसरिया

सन् १९११ ई० वर्षेऽहं कालिकातामागतो-ऽभूवम्। १८, मल्लिक स्ट्रीट, कालीगोदाम इति स्थाने न्यवसम्, तत्र च बहूनि दिनानि यावद-स्थाम्। तेषां प्रसङ्गानामद्य सप्तपञ्चाशद्वर्षाणि व्यतीयुः। दिनेषु तेषु कालीगोदाम-वसतौ बल-देवदासयुगलकिशोर-नाम्नाद्यतनानां विरलाब-न्धूनां संयुक्तवाणिज्यपीठमासीत्। श्रीयुगलकि-शोरमहोदयोऽस्य पीठस्य सञ्चालनं कुर्वन्नभूत् तथा कालीगोदामस्थानमेवाध्युवास। सर्वादावहं तत्रैव तस्य दर्शनस्य सौभाग्यमलभे। परिचय-स्तदानीं न बभूव' यतस्तत्समये स स्वात्मन्येको विशिष्टः पुरुषोऽभूदहं तु सामान्योऽपदार्थ इवैवा-सम्। परन्तु कालीगोदामस्थाने तथा समाजे तस्य चर्चासीत्। तेषु दिनेषु स मारवाड़ी व्यापारिषु नो बभूव, परन्तु तस्य विचाराः, औदर्यं, नम्रता, सरलताऽऽडम्बरराहित्यं, स्नेह-शीलतेत्यादीनां निरन्तरं चर्चा जायमाना बभूव। तस्य समयस्य कल्पनामद्यतनो जनो न हि कथमपि कर्तुं पारयते। एकां लघुतमां संकथां कथयामि यद्धि कालीगोदामस्थाने यानि पीठान्यभूवंस्तैः साकं 'बासा' अर्थाद् भोजनपानादीनां प्रबन्धोऽपि च भवति स्म। तत्र बासाख्ये भोजनालये भोज-नस्य मासिको व्ययो दशतो द्वादशरूप्यकाणां बभूव। तत्समये विरलाबन्धूनां पीठस्य भोजना-लयोऽभूत्। स च कालीगोदामपरिसरे सर्वश्रेष्ठो-ऽमन्यत। तत्र यद्भोजनं भवति स्म, तत्तत्रत्येभ्यः सर्वेभ्योऽपि च भोजनालयेभ्यः श्रेष्ठं भवति स्म। अहमेकामपरामपि वार्तां, याऽद्यत्वे कथनात् कीदृश्यपि प्रतीयेत, वक्तुमिच्छामि। बासाख्ये-भोजनालये तत्र किलैको मण्डलविशेषो भवति स्म। तत्र भोजनकाले तन्मण्डलं ग्वालाख्यो भृत्यो, यो हि पात्रशुद्ध्यादि कार्यं कुरुते स्म, स्प्रष्टुं न भवति स्म। यदि च भुञ्जानेभ्यो जनेभ्यः कोऽपि च भोज्यपदार्थः प्रदीयते स्म, तदा तन्मण्डलं न स्पृष्ट्वा हस्तेन लघीयस उच्चतो निपात्यते स्म। परन्तु बाबूयुगलकिशोरमहोदयो नेत्थमाचचार। स ग्वालं तं नत्वस्पृश्यं मेने न च तेन साकं तथा व्यवजहार। स तद्धस्तेन शाकपात्रं स्थाल्यां न्यधापयदथवा स्वयमेव तद्ध-स्तात्स्वहस्तेन जग्राह। विषयस्यास्य चर्चा कालीगोदाम वसतौ प्रचलति स्म यद्युगलकिशोर-महोदयस्तं ग्वालं भृत्यमस्पृश्यं न मन्यतेऽर्थात्त-त्स्पृष्टं भोजनमश्नातीति। सेयं संकथाद्यत्वे परि-हासयोग्येव प्रतिभाति परन्तु यदि तज्जीवनस्य दृश्यानामभ्यन्तरं पश्येम चेत्तदा तत्कालीनाया-मस्यामल्पीयस्यां संकथायां स हि तथाविधो दृश्यते, यो गच्छति काले हरिजनान्दोलनेऽथवा स्पृश्यास्पृश्ययोः किं वाऽवर्णसवर्णयो विचारेषु प्रकटीबभूव। तं समयं यावद् बंगीय-ससाजे ब्रह्म-समाजस्य स्थापना बभूव तथा तत्प्रभावो बंगप्रदेशे पर्याप्तं विवर्धमानोऽभूत्। एवमेवार्य-समाजस्य विचाराणामपि प्रभावः पञ्चाम्बुप्रान्ते तथा चोत्तरभारते विवर्द्धमानो बभूव। श्रीयुग-किशोरमहोदय आर्यसमाजस्यैकस्या धाराया, या हि हिन्दुषु समाजसुधारात्मिकाभूत्, प्रभावो निपपात। आर्यसमाजस्य मूर्ति-पूजा-निषेधस्य तथान्यासां वार्तानां प्रभावस्तस्मिन्नासीत्। तस्मिन् समये-आर्यसमाजस्य, सनातन-धर्मस्य च मिथः

मस्ति यत्ते तां पूतां परम्परामग्रे वर्द्धयेयु-स्तत्र देशवासिनामप्यसौ धर्मो वर्तते यत्ते तस्या-पूर्णं कार्यं पूर्णतां नेतुं प्रयत्नशीला भवेयुः।

श्रीयुगलकिशोरमहोदयोऽस्याः शताब्द्या महापुरुषो बभूव। अहं दिवङ्गतस्य तस्य महा-पुरुषस्य पुण्य-स्मृतौ तस्य वन्दनां करोमि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सङ्घर्षो महानासीत्। श्रीयुगलकिशोरमहोदयः प्रत्येकं शुभस्य तथ्यस्य, श्रेष्ठस्य च पुरुषस्य सम्मानं कुरुते स्म। औदार्य-विनययोस्तु सः साक्षान्मूर्तिरेवाभूत्। अहं तस्य पितामहस्यौदार्यकथामश्रौषम् तस्यौदार्यकथां त्वहं श्रुतवां दृष्टवांश्चास्मि नूनम्। सम्भवति सः स्वपितामहात् पितुश्च संस्कारान् गृहीतवान् भवेत्, परन्तु तस्मिन्नेका तथाविधा विचित्रतासीद्यद्दाने न प्रदत्ते सति तन्मनो विव्यथे। यस्मिन् समये तस्य व्यापार-कर्मणि धनलाभो भवति स्म, तदा स लोकानाहूय रूप्यकाणि वितरति स्म। स खलु शतहस्तमुपार्जयति स्म, सहस्रहस्तं च वितरति स्म धनम्। तस्यादानं विसर्गायैव बभूव। द्वि-चतुष्प्रायाण्युदाहरणानि तु मम समक्षं वर्तन्ते तादृशानि यत्र याचकाः कल्पितुमपि न प्रबभूवुर्यत्ते श्रेष्ठिवर्यादस्माद्युगलकिशोरमहोदयात् तावद्याञ्चातोऽप्यधिकमलप्स्यन्त, इति। स हि 'चन्दा'-याचकमथवा व्यक्तिगतां धनसहायतां कामयानं जनं पृच्छति स्म यद्धि कियन्मात्रेन धनेन तस्य कार्य-निर्वाहः स्यादिति। याचकेन धनराशौ निरूपिते स कथयतिस्म-कथमेतावता धनेन कार्यनिर्वाहो भवितुमर्हति? ततोऽधिकं धनं व्ययं गच्छेदिति। तदेतत् सर्वं तस्य व्यक्तिगतानां गुणानां किं वा स्वाभावस्य विशिष्टानि तथ्यानि विद्यन्ते। एकं सुदीर्घं यावत् सोऽस्माभिः सहोवास, तथा स्वौदार्येण, सद्भावनया च समाजस्य हित-साधनं चक्रे। एतत् सर्वमपि चादानं विसर्गाय भवति स्म।

देहल्यां विरला-मन्दिर-निर्माणस्य किं वान्येषां देवालयानां जीर्णोद्धारादीनां संकथास्तु प्रायः सर्वेऽपि जानन्ति, तथा चेमानि सर्वाणि तथ्यानि तस्य दानशीलतां प्रथन्ते। परन्तु मनुष्यः स्वजीवनस्य सामान्यैर्लघुभिः प्रसङ्गैरेवान्तर्जीवने सत्यं यथार्थं च जीवनं जीवति। तस्यान्तर्जीवनं, यद्बाह्या लोकाः प्रायो न जानन्ति, किं वाज्ञातुं न शक्नुवन्ति, तदेव तस्य वास्तविकं जीवनं भवति यथार्थतः। श्रीयुगलकिशोरमहोदयस्य तज्जीवनस्य स्वल्पाधिकं चछविदर्शन ये प्राप्तवन्तस्ते जानते यत्तज्जीवने स कियन्महानासीदिति। तस्य दानस्य बह्वधिको भाग एकस्तथाविधोऽपि च भवति स्म, यं दक्षिणो हस्तः प्रदद्यात्तदा वामहस्तो न जानीते। परः सहस्राणां तथाविधानां जनानामापद्विपत्सु स साहाय्यं चकार, यान् केवलं स एव जानाति स्म। विरलामहोदय इव विरला एव केचनोत्पद्यन्ते तथा चैतादृशानां लोकानां स्थानं रिक्तं भवति, तदा तत् समाजस्य स्थायिनो क्षतिर्भवति। समाजस्य, व्यक्तीनां च तदिदं कर्तव्यमास्ते यदेवंविधानां सज्जनानां जीवनाच्छिक्षाम् गृह्णीयुस्तथा तेषां गुणाननुसर्तुं प्रयतेरन्। अयमेव हि तान् प्रति सत्यः श्रद्धाञ्जलिर्भवितुमर्हति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुकृती सुजनः

श्रीजयदयाल-डालमिया

श्रीयुगलकिशोरविरलामहोदयस्य दर्शनानां सौभाग्यं ममानेकेष्वसरेषु बभूव। मादृशस्य सामान्यस्य जनस्य तदर्शनावसरो यदा लभ्यते स्म, यदाप्यहं तच्चरणस्पर्शाय प्राणमम्, तदा सः कथयति स्म—"राम, राम, किमिदं कुरुषे? मैवं कुरुष्व।" तस्मिन्नेतावन्निरभिमानिता बभूव। न कदापि सः स्वात्मानं महान्तं मेने। आयुःक्रमे, ज्ञाने, पदे च ज्येष्ठः श्रेष्ठोऽपि स सदा स्वात्मानं साधारणं व्यक्तिमात्रं मन्वानोऽभूत्। एतदस्ति तस्य 'तृणादपि सुनीचेन.....' इत्यस्योदाहरणम्।

यदा कोऽपि जनस्तेन मिलितुमागच्छत्तदा कस्यापि च विषयस्य चर्चायां प्रवृत्तायां स सर्वदा तस्यैव सम्मतिं पप्रच्छ। सामान्यात् सामान्यायापि च जनाय स सम्मानं प्रददाति स्म। आत्मनि लघुतादर्शनं, परस्मिन्: महत्तावलोकनं तस्य सहजः स्वभावो बभूव। इदमस्ति तस्य 'अमानिता मानदेन' इत्यस्योदाहरणम्।

विद्वत्सु, विरक्तेषु, गुणिषु च तस्याविचला श्रद्धाऽऽसीत्। प्रतिक्षणं तस्य देशस्य, समाजस्याभ्युन्नतिसाधनस्य, तत्परिष्कारस्य च चिन्ता बभूव। तदिदमास्ते तस्य 'वयं राष्ट्रे जागृयामः' इत्यस्य निदर्शनम्।

यद्यपि स गतव्यथोऽभूत्, किन्तु राष्ट्रस्य ह्रासोन्मुखं चरित्रं तं प्रतिक्षणं व्यथयति स्म। स हि देशं शीलयुक्तं, संयमवन्तं, सदाचारं, शिष्टाचार-सम्पन्नं च द्रष्टुमियेष तथा जीवन-पर्यन्तं तानेवैतान् मानवीयान् गुणान् विततान् विस्तृतांश्च विधातुं चेष्टमानस्तस्थौ। एतदस्ति तस्य-'आचारः प्रथमो धर्मः' इत्यस्योदाहरणम्।

स हि यन्निस्सीमं दानं प्रददौ, तज्ज्ञानमतीव परिसीमितमास्ते, यदा सः प्रायेणात्मनः सर्वमपि चोपार्जितं द्रव्यं परोपकारायैवोत्ससर्ज। स न कदापि स्वदानस्य, सत्कर्मणश्च विज्ञापनं चक्रे, नन्वेतावद्यत्तत्समीपं निवसन्तो जनाश्चापि पूर्णतया तत्परिचयमाप्तुं न पारयन्ति स्म। एतदस्ति, तस्य 'परोपकाराय सतां विभूतयः' इत्यस्योदाहरणम्।

ममैवमनुभवो बोभूयमानोऽस्ति यत्तस्य तिरोभावाद्धर्मश्च संस्कृतिश्चानाथे बभूवतुः। न जानेऽस्य क्षतिपूर्तिः स्यान्नवेति। स हि सुकृती, सुजनो, महापुरुषश्चासीत्। तस्य पुण्य-तिथावहं तस्मै स्वश्रद्धाञ्जलिं समर्पयामि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कानिचित् पुण्यानि संस्मरणानि

श्रीवियोगी हरिः

श्रद्धेयस्य बाबूयुगलकिशोरविरलामहोदयस्यानेकानीत्थं विधानि संस्मरणानि सन्ति यैः सदा प्रेरणोपलभ्यमाना भविष्यति। अत्राहं केवलमेतादृशान्येव कानिचित् संस्मरणानि लिखामि, येषां सम्बन्धोऽस्पृश्यतानिवारणेन, हरिजनोत्थानेन च साकं बभूव।

अतः प्रायेण चत्वारिंशत्यश्च चत्वारिंशद्वर्षेभ्यः पूर्वं राजस्थानप्रदेशे हरिजनानां सामाजिको स्थितिरत्यन्त शोचनीया बभूव। गच्छति काले शनैः शनैस्तेषां स्थितौ सुधारो भवितुमारेभे। परन्तु शेखावाटी-क्षेत्रं त्वद्यापि च सामाजिक्या दृशा पश्चात्पतितमिव वक्तुं शक्यते।

तदानीं बहुधा प्रोच्चैरुच्यमानानां जातीनां लोकाः पदयो राजतं कटकं परिदधति स्म। पदे स्वर्ण-भूषणं तु त एव परिधातुं पारयन्तिस्म, येभ्यो महाराजाः पुरस्कारस्वरूपं प्रयच्छन्ति स्म। परन्तु न कश्चनापि हरिजनः—तदानीमस्पृश्यः—राजतं कटकं पदयोः परिधातुं शशाक। स रथमारोढुं नापारयत्। केवलमुष्ट्रमारोढुमपारयत्। युगलकिशोरमहोदयस्तमिमं सामाजिकमन्यायं सोढुं न शशाक। स द्वयोश्चर्मकारयोः पदयो राजते वलये परिधापयामास तथा च तौ रथमारोप्य ग्रामेऽभ्रामयत्। तदानीमिदमतीव साहसिकं कार्यमभूत्तदानीन्तने रुढिग्रस्ते समाजे तथा तादृशस्य सामन्तवादिनः शासनस्य पुरतः।

हरिजना लोका—महत्तर पदवाच्याः—कूपस्य समीपवर्तिनि जल-कुण्डे, यत्तत्र 'खेल' इति प्रोच्यते, पात्रे जलमापूर्यानयन्। तस्मिन् कुण्डे वर्तमानं जलं खल्वाविलं पशवोऽपिबन्। युगलकिशोरमहोदयस्तमिमममानुषं व्यवहारं सोढुं न प्रबभूव, ततः स महत्तरेभ्यः कूपान्निर्मापयामास।

अस्पृश्योद्धारस्य कार्याणां कृते स लालालाजपतरायाय तथा स्वामिने श्रद्धानन्दाय च मुक्तहस्तं सहायतास्तत्समये प्रददौ। लालामहोदयस्तस्मादेव केन्द्रियायां व्यवस्थापिकायां सभायामुवाच—"अस्पृश्योद्धारस्य यावत्कार्यं श्रीयुगलकिशोरविरलामहोदयः कृतवानास्ते, कुर्वाणश्च वर्तते, तावत् सर्वकारोऽपि न चकार"।

देहल्यामस्माकं हरिजन-निवास-भवने रक्तपाषाणैर्निमितो यो हि भव्यो धर्म-स्तम्भो विद्यते, तन्निर्माणमार्य-संस्कृतेरुपासकस्तत्प्रचारकश्च सोऽय श्रीयुगलकिशोरविरलामहोदयएव सम्बत् २००० विक्रमवर्षे कारितवान्।

श्रीयुगलकिशोरमहोदयः सम्बत् १९९७ वर्षे श्रीठक्करबापामहोदयं प्रोक्तवान्—"राजन्यपथात् पूर्वस्यां दिशि स्थिते हरिजननिवासे (लोक प्रचलित गान्धेराश्रमनाम्नि) अहमेकमेवविधं प्रस्तर-स्तम्भं स्वनिधे र्धनेन निर्मातुमिच्छामि, य आर्य-संस्कृतेः सनातन-सिद्धान्तानामुद्घोषं शतशो वर्षाणि यावत् कुर्वाणः सन्तिष्ठेतां स्वयं बापामहाभागस्तथा च हरिजन-सेवक-सङ्घः प्रस्तावस्य तस्यास्य सहर्षं स्वागतं चक्रे।

एतच्छ्रुत्वा यद्धरिजन-निवासे गान्धिस्तम्भस्याथवा 'गान्धिलाट' इत्याख्यस्यारोपणं निश्चितमस्ति, स्वयं गान्धिमहात्मने न रुरुचे। किन्त्वेतत् स्पष्टीकृते यदसौ स्तम्भस्तन्नाम्ना नारोप्यमाणोऽस्ति, स आपत्ति न चक्रे। यदा स्तम्भो, यन्नामकरणमस्माभिः 'धर्म-स्तम्भः' इति विहितः समारोपितो बभूव, तदा तं दृष्ट्वा पप्रच्छ 'अहो! अयमेव हि स स्तम्भो वर्तते ? सुन्दरोऽ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्ति। अस्य चत्वरस्य, यस्मिन्नसौ स्तम्भोऽवतिष्ठते, क उपयोगो भवति ?' 'अत्र वयं ग्रीष्मर्तौ प्रातः कालीनां, सायन्तनीं च प्रार्थनां कुर्महे'। इति निवेदितम्, तदा स उवाच—'तदाशोभनम्'। इति।

सङ्घस्य कार्यालयस्य तथा प्रार्थना-मन्दिरस्य च मध्येऽयं धर्म-स्तम्भोऽवतिष्ठते। स्तम्भोऽसौ रक्तवर्णैः पाषाणै विनिर्मितोऽस्ति। तदधश्चत्वरं चत्वारिंशत्फुटमितो वर्गाकारो विद्यते। सर्वतोवेष्टनो विद्यते तथोपरिगमनाय सर्वतः सोपानाधिरोहिणी वर्तते। अस्मिन्नेव चत्वरे स एषः स्तम्भोऽवतिष्ठते। मूलभागोऽस्य चतुष्कोणोऽस्ति। प्रत्येकं प्रस्तर-पटलं ७'–९" प्रमाणं लम्बमास्ते (दीर्घं) तथाधस्तनो भागः ९' तथोर्ध्वभागः ८' विस्तृतो विद्यते। चतुष्कोणस्य मूलभागस्योपरि स्तम्भोऽयमष्टकोणोऽस्ति संजातो यस्मिश्चतुश्चतुः सोपानानि विद्यन्ते। सर्वाधः सांस्कृतिकानि प्रतीकान्युत्कीर्णानि सन्ति। पूर्वस्यां दिशि 'चर्खा-चक्रम्', उत्तरस्यां हंसः, पश्चिमायां दिशि भारतवर्षस्य मानचित्रं तथा च दक्षिणस्यां दिशि मङ्गल-घटोऽस्त्युत्कीर्णो यस्मिन्नाम्रपल्लवाः सन्ति तथा पल्लवेषु दीपज्योतिरास्ते। चतुर्षु कोणेषु चार्द्धचक्राणि समङ्कितानि वर्त्तते तथा चक्राणां मध्ये स्वस्तिकानि विद्यन्ते।

अतश्चोपरि स्तम्भोऽसावावर्ताकारमासादयति। द्वि-द्विफुटप्रमाणाः सप्तदशगोलाकाराः प्रस्तरखण्डा, ये नीचैरुर्ध्वभागं प्रति क्रमशो गोलार्द्धं लघुरूपतामासादयन्, एकोपर्यन्ये संस्थापिता विद्यन्ते। एकः प्रस्तरखण्डोऽन्येन प्रस्तरखण्डेन स्थूलाकारया लोहशलाकया संयुक्तोऽस्ति।

अतः ऊर्ध्वं शीर्षभागोऽस्ति, योऽधोमुखमुत्फुल्लकमलाकृतिको वर्तते।

कमलोपरि स्थितः फुटत्रयोर्ध्वश्चतुष्कोणः प्रस्तरखण्डोऽस्ति, यस्योपरि भारतीय-संस्कृतेरुत्कृष्टानि प्रतीकान्युत्कीर्णानि विद्यन्ते-पूर्वस्यां दिशि 'चर्खा-चक्र', मुत्तरस्यां विकसितं कमलं तथा तस्मादभ्युदयन्तः प्रकाश-किरणाः, पश्चिमायां भगवतो बुद्धस्य धर्मचक्रं तया दक्षिणस्यां धेनुः।

अस्मिंश्चतुष्कोणे प्रस्तर-खण्डे शिखरमास्ते। चत्वरस्योपरितः समग्रस्य स्तम्भस्योच्चता ५८ फुट ९ इञ्च प्रमाणा वर्तते तथा चत्वरस्योच्चतां संयोज्य भूतलात् सोऽयं स्तम्भः ६२ फुट'९ इञ्चप्रमाणमुच्चोऽस्ति।

धर्म-स्तम्भस्यास्य निर्माणस्य मूले भारतीयसंस्कृते भव्या भावना निहितास्ते। अतः स्वाभाविकमिदमभूद्यदस्य स्थापत्ये भारतीयसंस्कृतेर्द्योतकान्युत्तमानि प्रतीकानि, सूक्तीश्च विचित्याङ्कयेरन्। भगवतो बुद्धस्य धर्म-चक्रं प्रगतिमत्या धर्म-भावनाया द्योतकमस्ति। अस्माकं गणराज्यं तदिदं चक्रं स्वराज्य-चिह्नं स्वीचकार, तदेतद्वर्षस्य विषयोऽस्ति। कमलं नाम मानवस्य विकसितं हृदयमास्ते, ज्ञानस्य किरणाः खल्वस्मादेव कमल-कोषात् प्रस्फुटन्ति। धेन्वां धर्मार्थयोः समन्वय साधना समाहितास्ति, तथाऽस्याः साधनाया आश्रयाद्वयं स्वरूप-दर्शनं कुर्महे यदध्यात्म–ज्ञानस्यान्यतमं ध्येयमस्ति। कदाचिदस्मादेवोपनिषदस्तुलना गवा सममक्रियत। चर्खा-चक्रं किलाहिंसामूलायाः सम्यगाजीविकायाः सर्वोच्चं साधनरूपं प्रतीकमास्ते। गान्धिमहाभागस्यार्थशास्त्रीयं चर्खा–चक्रमेवैकं सुविशदं भाष्यं वर्वर्ति।

मूलभागस्य प्रस्तर-पटलेषु धर्मस्य सनातनाः सूक्तयः प्रोत्कीर्णा विद्यन्ते–पूर्वभागे गान्धेर्महात्मनः सूक्तान्युत्तरभागे गीता–तत्त्वसारः, पश्चिमभागे बुद्ध-वाणी तथा दक्षिण उपनिषद्रत्नावलिः।

कियत्समयानन्तरं श्रीयुगलकिशोरमहोदयेन मथुरायाः सुप्रसिद्धस्य गीतामन्दिरस्य प्राङ्गणेऽस्यैव धर्म-स्तम्भस्य वर्णिकासदृशः सुन्दरः स्तम्भो निरमायि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्य श्रेष्ठिवर्यस्य केषुचिद्विषयेषु गान्धिना साकं मतभेदोऽभूत्, परन्तु हरिजनानां कार्यस्य कृते तस्य सदैव समर्थनं योगदानं चोपालभ्येताम्। स हि स्वविचारेषु द्रढीयान् तथातीव सुस्पष्टो बभूव। स गान्धिमहाभागं कथयति स्म- 'बापो! अहं भवतः कथनमेकस्य महात्मनः कथनरूपं मन्ये, परन्तु नेतृरूपे न मन्ये। गान्धिमहाभागं प्रति तस्य गम्भीरायाः श्रद्धायाः एकमुल्लेखनीयम् संस्मरणमास्ते—

बहुभ्यो वर्षेभ्यः पूर्वतनीयं वार्तास्ते। एकदा प्रातःकाले सः स्वभ्रातरं श्रीघनश्यामदासबिरलामहोदयमुवाच-'अहं रात्रावेतादृशमेकं स्वप्नमपश्यम् यन्महात्मा कस्यचित् कार्यस्य कृते मां रूप्यकाणि ययाचे, परमहं विस्मृतवानस्मि यत्तस्मै कियन्ति रूप्यकाणि प्रेषयेयम्। 'विषयेऽत्र सगान्धिमहोदयं प्रति पत्रमेकं लिलेख। महात्मोत्तरं प्रेषयामास-'इयं तु स्वप्नगता वार्तास्ति। किमप्ययाचे।' परन्तु युगलकिशोरमहोदयस्तु वचनं दत्तवान् बभूव, कामं तज्जाग्रदवस्थायां प्रदत्तं भवेद्वा स्वप्ने। ततः पुनः स पर्याप्तं महान्तं धनराशिं स्वप्ने प्रदत्तस्य वचनस्यानुसारं गान्धिं प्रति प्रेषयामास।

नम्यताम्

(१)

श्रीमति **युगलकिशोरे** धर्मात्मनि तस्मिन् दिवं प्रयाते।
धर्मो भूमावधुना सत्यं स निराश्रयो जातः॥

(२)

कर्मणा मनसा वाचा प्रभूतेन धनेन च।
वस्तुतः स महाभागो वाञ्छति स्म जगद्धितम्॥

(३)

शक्तिर्दीनजनावनाय समभूद्यस्यानिशं भूतले
त्यागायैव धनञ्च यस्य विपुलं, ज्ञानाय विद्या सदा।
यस्याऽऽसीच्च तथा परोपकृतये सम्पत्समग्राप्यतो,
धन्यः सद्विरलान्वयाब्जतरणिः स स्वर्गतो नम्यताम्॥

—दीनानाथ त्रिवेदी मधुपः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रेरणाप्रदं तपस्वि-जीवनम्

श्रीगजाधर-सोमानी

परमादरणीयः पूज्यश्च श्रीयुगलकिशोरबिरलामहोदयो वस्तुत एको विशिष्टो महापुरुष आसीत्, यस्य दीर्घकालीनस्य जीवनस्यात्र परिमितैः शब्दैर्लेखनं न सम्भवति !

हिन्दु-समाजस्य तु स एकस्तादृशो दृढीयान् स्तम्भस्वरूपोऽभूद्यस्याभावस्य पूर्तिरिदानीं कठिनास्ते। हिन्दु-जातेः सर्वाङ्गीणाय विकासाय स यत्किमपि चक्रे, तस्येतिवृत्तं बहु दीर्घमास्ते। सामान्यतस्तु विरलापरिवारस्य दानशीलता समस्ते देशेऽत्र सुप्रसिद्धास्ते, परन्तु श्रद्धेये युगलकिशोरमहोदये हिन्दु-जातिं प्रति सेवा-भावना स्वकीयमेकं विशिष्टं स्थानं रक्षति। आर्यसंस्कृतेर्विकासार्थम् सः स्वजीवने कोटिशो रूप्यकाणां दानानि प्रददौ, तदेतत् सर्व-विदितमास्ते। साकमेवानेन तद्धृदयेऽहर्निशं हिन्दु-जातावुत्पन्नस्य दौर्बल्यस्य, निरन्तरं जायमानस्य ह्रासस्य च लक्षणैः सदा पीडा भवति स्म। तस्य धार्मिको दृष्टिकोणोऽतीव व्यापको महान् बभूव। स हि वर्णाश्रम-सनातन-धर्मस्यार्यसमाजस्य, सिक्ख-बौद्धादीनां सर्वेषां धर्माणां, सम्प्रदायानां च समन्वयार्थं सदैव प्रयत्न-शीलस्तस्थौ, येन सर्वैरपि सम्प्रदायैर्धर्मैश्च व्यापकस्य हिन्दु-समाजस्य मूलभूतानामादर्शानां तथा सिद्धान्तानाम् पोषणं सम्भवेत्।

'सरलं जीवनमुच्चविचाराः' इत्यस्यादर्शवाक्यस्य तु स प्रतिमूर्तिरभूत्। अनन्तसम्पत्तेस्तथैश्वर्यस्याधिपोऽपि सन् सोऽभिमानाद् सर्वथा दूरं तस्थौ। स्वस्य मधुरभाषणार्थं मिलनसारितार्थं च स सुप्रसिद्धोऽभूत्, अथ सम्पूर्णस्य देशस्यास्य विभिन्नेभ्यो भागेभ्यो नित्यमेवासंख्यानि पत्राणि तत्सविधे समागच्छन्ति स्म, येषु हिन्दु-समाजस्य विभिन्नेष्वङ्गेषूत्पन्नां कठिनतां दुर्बलतां च दूरीकर्तुं प्रार्थनादिकं भवति स्म। स किलार्यसंस्कृतेर्विकाससम्बद्धानां सर्वासामपि योजनानां पूर्तौ यथासम्भवं सहयोगदाने कदापि च न मनागपि सङ्कोचं चकार—कामं नव्य-मन्दिराणां निर्माणकार्यं भवेत्, कामं पुरातन-देवालयानां जीर्णोद्धारादिकं भवेत्, कामं विधर्म-मङ्गीकुर्वाणानां हिन्दूरक्षाप्रश्नो भवेत् कामं भारतीयसंस्कृतेः सम्बद्धस्य कस्याप्यन्यस्य कार्य-क्रमस्य प्रश्नो भवेत्, तस्यौदार्यमित्थंविधेषु सर्वेष्वपि च कार्य-क्रमेषु सहायकत्वेन संतस्थे।

सोमाणी-परिवारस्य तेन साकं पर्याप्तं निकट-सम्बन्धो बभूव। विशेषतो मम पूज्याः पितृचरणाः श्रीहजारीमल्लमहोदया यदा कालिकातायां व्यापार-वाणिज्यं चक्रुस्तदा तेषां नित्यमेव हि सायङ्काले तद्दर्शनस्य कार्य-क्रमो भवति स्म। व्यवसाय-वाणिज्यगतया वार्तया साकमेव श्रद्धेयो युगलकिशोरमहोदयः सदैव हिन्दु-जातेर्विभिन्नानामङ्गानां विकास-चर्चां तैः सह कुर्वाणः संतस्थे। सेयं संकथा रिवर्त्रिंशद्वर्षेभ्यः प्राक्तनी वर्तते, ययानुमातुं शक्यते, यत् स प्रारम्भादेव स्वव्यापारेण साकमेव सार्वजनीने कार्ये कथमिव प्रयत्नशीलोऽभूदिति। मम पूज्याः पितृचरणा यदा व्यापारान्निवृत्ता भूत्वा श्रीवृन्दावनधामनि संवस्तुमारेभिरे, तदा पूज्यो युगलकिशोरमहोदयः स्वव्यापारक्षेत्रं कालिकातां विहाय देहलीमध्युषितुमारब्धवान्। तदापि पत्र-व्यवहारेण तयोर्द्वयोर्मिथः सम्पर्कोऽविच्छिन्नो बभूव। अथैकवारं मम पूज्यस्य पितुर्वैकुण्ठवासात् स्वल्पदिनेभ्यः पूर्वमेव हि श्रीवृन्दावनस्य सुप्रसिद्धस्य श्रीरंग-मन्दिरस्य जीर्णोद्धारविषये पितृचरणानां युगलकिशोरमहोदयेन साकं पत्र-व्यहारो जातः। किमपि कार्यं प्रति तस्याध्यव-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सायस्य तथा पूज्यपितृचरणान् प्रति तस्य स्नेहभावस्यैतत् फलमासीद्यत्तस्याम् जीर्णोद्धारसम्बन्धिन्यां प्रार्थनायां ध्यानं दत्त्वा स त्वरितमेव लक्षद्वयप्रायाणि रूप्यकाणि संग्रहीतुं योजनां समपादयद्यया श्रीरङ्गमन्दिरस्य जीर्णोद्धारस्य विशेषावश्यकं कार्यं पूर्णं बभूव। तामिमामतीव सामान्यां घटनामत्र प्रसङ्गोपात्तामुदलिखम्। वस्तुतः सार्वजनिके सेवा-क्षेत्रे सः कोटिशो रूप्यकाणि दानरूपे प्रददौ, तज्ज्वलदुदाहरणं देहल्यां, वाराणस्यां, मथुरायां, पिलान्यादिषु देशस्यास्य सुप्रसिद्धेषु नगरेषूपलभ्यते नाम नूनम्।

श्रद्धेयो युगलकिशोरमहोदयो वस्तुत एक आदर्शः कर्मयोगी समभूत्। सुधारवादमाश्रयन्नपि स भारतीय-संस्कृतेर्मूलभूतेषु सिद्धान्तेष्वविचलं विश्वासमादधानो बभूव। स तपस्विनां महात्मनां साधूनां चान्वेषणं कुर्वाणोऽभूत्। एवमेव तीर्थेष्वपि स महतीं श्रद्धामास्थां च दधौ। अयोध्यायां, मथुरायां च यत्र भगवन्तौ राम-कृष्णाववतेरतुस्तत्र भगवतो जन्म-भूमेरैतिहासिकानां स्थानानां पुनरुद्धाराय तथा च तेषां विकासाय स वास्तविकेन रूपेणैतिहासिकान् प्रयत्नान् कृतवान्। तस्य जीवनस्यैवंविधानि परश्शतानि सत्कार्याणि वर्तन्ते, यानि जनतानां, जनार्दनस्य च सेवाया अभिन्नान्यङ्गानि विद्यमानानि सन्ति।

पूज्यो युगलकिशोरमहोदयो मां प्रति बहुं स्नेह-भावं रक्षन्नासीत्। यदाप्यहं तत्सेवायामुपस्थितेरवसरमासादयम्, तदा सात्त्विकस्य जीवनस्य तथा भारतीय-संस्कृतेर्विकासस्य प्रयत्नं कर्तुमहं तस्मात् प्रेरणां लभमानोऽभूवम्। एवंविधस्य महतः साधुपुरुषस्य राजर्षेस्तपस्विजीवनं महत्प्रेरणा-प्रदायकमास्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

* प्रेरणायाः स्रोतोवाही *

श्रीप्रभुदयाल-हिम्मतसिंहका

श्रीयुगलकिशोरविरलामहोदयस्य जन्म धर्मोद्धाराय बभूव-तदिदं कथनं तेन जीवन-पर्यन्तं कृतं धर्मभ्युदयस्योत्थानस्य कार्यकलापैः प्रमाणितं संसिद्धयति। धर्म एव हि तस्य जीवनसर्वस्वं बभूव। अथ सन् १९११-१२ ई० वर्षयोर्यदाहं कालिकातायामधीयानोऽभूवम्, तत एव हि मे विरलामहोयदस्यास्य निकट-सम्पर्कप्राप्तेः सौभाग्यं बभूव। अनासक्तेन भावेन कर्मयोगीव स कालिकातायां वाणिज्य-व्यवसायं कुर्वन्नभूत्। समृद्धिशाली, कीर्तिशाली तथा परिवारादतिरिक्तः स्वभावेन, व्यवहारेण च स साधुपुरुषोऽभूत्तस्मादेव समाजे तस्य महोच्चं पदं बभूव। न किमप्येतादृशं सार्वजनिकं कार्यम-भूद्यस्मिंस्तस्य सहयोगो नाभूत्। तत्समये यावतीनामपि सार्वजनिकानां संस्थानां मूलाधारशिला-न्यासा बभूवुस्तासां सर्वासां स तन्वा, मनसा, धनेन च साहाय्यं चक्रे।

'मारवाडी-रिलीफ-संस्था'ऽद्यत्वे देशस्यास्य प्रमुखासु सार्वजनिकासु संस्थास्वेका वर्तते तथा महान्ति सेवा-कार्याण्यनया सम्पाद्यमानानि विद्यन्ते। विरलामहोदयोऽस्याः संस्थायाः संस्था-पकोऽभूत्तथा तस्यैव कल्पनास्यां संस्थायां साकारा बभूव।

'मारवाड़ी-रिलीफ-सोसाइटी' संस्थायाः स्थापनया साकमेकस्या लघ्व्या घटनायाः सम्बन्धो विद्यते। सन् १९१२ ई० वर्षस्येयं संकथास्ते। कालिकाताया 'बडाबाजार'-नामके क्षेत्रे कश्च-नैको जनश्छदितो निपत्याहतो बभूव। अथेदानीं तस्य चिकित्सा क नु कुतो वा भवेदिति, समस्या समक्षमाययौ। ये चौषधालयादयस्तदानीं समये-ऽभूवस्तेषु पर्याप्तं स्थानं न बभूव। श्रीयुगल-किशोरमहोदयस्यासौ प्रेरणा जजागार यत्कस्या-श्चाप्येवं विधायाः संस्थायाः स्थापना क्रियेत, यस्यां रुग्णानां, दुर्घटना-ग्रस्तानां लोकानां चिकित्सायाः परिचर्यायाश्च समुचिता व्यवस्था भवेत्। तामेव कल्पनां मूर्त-रूपां विधातुं पञ्च-दशप्रायान् सदस्यानादाय सामान्येन प्रकारेण कार्यारम्भोऽक्रियत, यस्य विस्तारोऽद्यत्वे सर्व-विदितोऽस्ति।

त्रस्तानां, दीनानां, दुःखाक्रान्तानां च मान-वमात्राणां कृते तस्य हृदयं सदैव दयापूर्णं बभूव। स कस्यापि कष्टं द्रष्टुं न शशाक, न च तत् सोढुं पारयामास। दुःखग्रस्तानां दुःखस्य दूरीकरणाय स सदैव प्रयत्नपरस्तस्थौ। स्पृश्या-स्पृश्यतां, जातिपङ्क्ति-प्रभृतीनां भेद-भावान् स हिन्दु-समाजस्य कलङ्कं मेने, तांश्च दूरीकर्तुं स सदैव प्रयत्नशीलो बभूव। स हि यावन्ति मन्दिराणि, धर्मशालाश्च निर्मापयामास, तत्र हिन्दु-मात्रस्य प्रवेशो निरवरोधं भवति।

हिन्दु-धर्म तथा हिन्दु समाजं प्रति श्रीयुगल-किशोरविरलामहोदयो विशेषं प्रणयं पुपोष। तस्य कालिकातायां निवास-समयेऽनेकानि घट-नान्तराणि तत्पुरत आजग्मुर्येषु परित्यक्ताः पथभ्रष्टाश्च हिन्दु-कन्यका अबलाश्रमस्यानुपलब्धे-र्हेतोर्मोहम्मदीयै विटैः सह पलायनं कुर्वन्ति स्म, विधर्मिण्यश्च भवन्ति स्म। अज्ञानवशाज्जाताभिः काभिश्चनाथ भ्रान्तिभिर्या भगिनी हिन्दु-समाज-स्तिरस्कारपूर्वकं पादाघातैस्त्यजतिस्म, ता यदि विधर्मिण्यो न भवेयुश्चेत्तदा तासामन्या का गतिः? तासां वेदनाः श्रीयुगलकिशोरविरलामहोदयस्या-न्तस्तलं प्रापुः। इत्थं विधाभ्योऽबलाभ्यः शरणं दातुं श्रीविरलामहोदयः कालिकातायामेकं कक्षमादाय 'हिन्दु-अबलाश्रमोऽनाथालयश्च' इति नाम्नैकां संस्थां सन् १९२१-२२ ई० वर्षे संस्था-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पयामास, यस्या अध्यक्षोऽहमभूवम् । प्रारम्भे कन्यायै-एकस्यै-आश्रयः प्रादीयत । गच्छति काले सैषा संस्था पञ्चशतसंख्यकाभ्योऽप्यधिकानामाश्रयस्थानं बभूव । यद्धि लघुतम स्थान गृहीत्वा कार्यारम्भोऽक्रियत, तन्नेदानीं पर्याप्तमभूत् । तस्मादेवासौ संस्था लिलुआ-नामके स्थाने स्थानान्तरिताऽक्रियत । श्रेष्ठिवर्यो रामगोपालमोहतामहोदयो लिलुआ-स्थाने विद्यमानं स्वकीयं सुविशालमुद्यानमेतत्कार्यार्थं महोदारतापूर्वकमस्मभ्यं समर्पयामास । त्रिंशद्वर्षाणि यावत् संस्थेयं कार्यं सम्पादयन्तो तस्थौ । परःसहस्राणि नारीणां तथानाथबालकानामत्र संस्थायां शरणमापुस्तथा च तान् सर्वान् समाजस्योपयोगीन्यङ्गान्यापादयितुं चेष्टा व्यधीयन्त । बहूञ्जनान् सादर-सम्मानं जीवनयापन-सक्षमान् चकारासौ संस्था । श्रीयुगलकिशोरमहोदयस्येदं सदाश्वासनं भवति स्म यन्न क्वापि च महिला धनव्ययस्याभावे परावर्तेत । धनव्ययार्थं या न्यूनता भवेत्, सा तस्मात् पूर्णा विधीयेतेति तस्य मुक्तादेशोऽभूत् । अस्याः संस्थायाः सञ्चालनाय सदैव तस्य साहाय्यमुपलभ्यमानमासीत् । इदानीमसावाश्रमो बंगीयसर्वकाराय समर्पितोऽस्ति ।

देशस्यास्यानुन्नतजातिषु—आंग्ल धर्म-सम्प्रदायस्य प्रचाराद्धर्मपरिवर्तनस्य घटनाः प्रागपि च भवन्ति स्माद्युनापि भवन्ति । श्रीविरलामहोदयः पूर्णतया प्रयत्नशीलोऽभूद्यदनेन प्रकारेण धर्म-परिवर्तनं माभूदिति । असमप्रदेशे 'खासी'—जातिषु तथा संन्थालमण्डले सन्थाल-लोकेषु ता इमाः समस्याः प्रति पूर्णतो हि जागरूकोऽभूत् । सन्थाल-मण्डले 'सन्थाल पहाड़िया-सेवा-मण्डलम्' इतीमां संस्थां स्थापयित्वा दलितानामरण्यवासिनां च सर्वविधाः सेवाः कर्तुमारभ्यन्त । सैषा संस्थाऽधुनापि कार्यनिरतास्ते । शिलांग क्षेत्रे, चेरापूंजी-क्षेत्रेऽपि चैवंविधानां कार्याणां कृते श्रीविरलामहोदयः साहाय्यं चकार तथा तत्रत्यानां लोकानां हिन्दु-धर्मं श्रद्धामास्थां च विवर्धयितुं स मन्दिराणि तथा बौद्ध-विहारांश्चापि निर्मापयामास । स केवलमार्थिकीं सहायतां दत्त्वैव न विरराम, वरञ्च तासां संस्थानां कार्यकलापानां, गतिविधिप्रवृत्तीनां विषयेऽपि पूर्णतयाऽवदधानोऽस्थात् ।

श्रीविरलामहोदयो हिन्दु-समाजं सर्वाङ्गसुन्दरं द्रष्टुमियेष । तस्यासावभिलाषोऽभूद्यद्धिन्दु-समाजः शक्तिशाली, ज्ञानवांश्चरित्रवांश्च भवेदिति । समाजं स्वस्थं, शक्तिशालिनं च विधातुमुद्देश्यात् सः स्थाने-स्थाने व्यायामशाला, व्यायामरंगस्थलानि च प्रत्यतिष्ठिपत् । स वीरान् बहु सम्मेने । अत एव हि स स्वमन्दिरेषु भारतीयेतिहासस्य वीराणां, वीराङ्गनानां च चित्राण्यङ्कयामास ।

श्रेयस्करेषु कर्मसु धनस्य लाभादप्यधिकं व्ययकरणं तत्स्वभावो बभूव । यदा कदा वयं तं कथयन्तोऽभूम यद्याचकरूपे समागतैरपवञ्चकैः प्रतायते भवानिति । तस्योत्तरं तदेदं बभूव-सम्भवति, तेषु केचन वञ्चकाश्चापि स्युः परन्तु केषांचित्तपकारो भवत्येव । केषांचिदपवञ्चकानां कारणेन दयापात्राणि दानाद्वञ्चनमपि तु न शोभनमास्ते ।" एवं निर्मला तस्य वृत्तिरासीत् ।

तद्विषये यावल्लिख्येत, तदल्पीयः । तस्य सेवा न वर्णयितुं शक्यन्ते । तस्यादर्शः सर्वैऽप्यनुकरणीयोऽस्ति । विशेषतस्तथाविधाः पुरुषाः, ये लक्ष्मीदेव्याः कृपापात्राणि सन्ति, ते विरलामहोदयस्य जीवनतो बह्वीः शिक्षा ग्रहीतुं शक्नुवन्ति, यद्धनस्य वास्तविक उपयोगः कोऽस्ति तथा केन वा प्रकारेण तदुपयोगात् स्वात्मनो विश्वस्य च कल्याणं मङ्गलं च भवितुमर्हत इति तथा चेहामुत्र सुखं भवेदिति । स हि सत्प्रेरणायाः स्रोतो बभूव । तस्य समीपमुपविश्यैकाऽपूर्वा पवित्रता स्वत एवोत्पद्यते स्म, मनः शांतिमधिगच्छति स्म ।

विरलामहोदयस्य सेवाभिर्देशोऽसौ बहूपकृतो बभूव ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

– वर्तमान-युगस्य भामाशाहः –

श्रीघनश्यामसिंहगुप्तः

श्रीयुगलकिशोरविरलामहोदयोऽमृतरूपिण्याः श्रीमद्भगवद्गीतायाः सुधीर्भोक्ता बभूव । गीतोक्तं स्थितप्रज्ञत्व साधयितुं सः सदैव प्रयत्नपरस्तस्थौ । स खल्वाहारविहाराणां, कर्मणां च गुणदोषान् विविच्य समयानुकूलं शयन-जागरणादि कर्माणि स्वजीवने कुर्वाणोऽभूत् । किन्तु सर्वतोऽधिकं यत्तथ्यमहं स्मरामि, तद्गीतोक्तरस्यास्तद्द्वारा परिपालनमस्ति—

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे, काले, च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥

स हि लक्षाधिकानि रूप्यकाणि ददाति स्म, परन्तु स सदैवेदमवधत्ते स्म यत्तेनोत्सृष्टं दानं देशस्य, धर्मस्य च हिताय सत्पात्रस्य हस्तगतमेव भवेदिति ।

अहं स्मरामि यत् १९३९ ई० वर्षे मई-जून मासयोः समये, हैदराबाद-राज्यस्य तत्कालीनेन शासकेन निजामसंज्ञकेन कृतानामपराधानां प्रतिरोधायार्यसमाज आन्दोलनं-सत्याग्रहं चकार, तदासौ विरलामहोदयोऽस्मभ्यं सर्वविधं साहाय्यं प्रदत्तवान् । तदानीमहं सार्वदेशिक-आर्य-प्रतिनिधि-सभायाः प्रधानोऽभूवम् । अहमेतदपि च स्मरामि यत् स मामेवंविधेषु धार्मिकेषु, देशहित-सम्बन्धिषु कार्येष्वेव संलग्नत्वाय, तथा च व्ययादेर्निमित्तं प्रायेण विंश-लक्ष-रूप्यकाणि प्रदातुं प्रस्तावं चक्रे किन्तु तथाकरणे स्वात्मनोऽसमर्थतां तं प्रत्यवोचम् ।

हैदराबादस्यास्माकं पूर्णविजय-सम्बन्धिनी या विराट्सभा २८-८-३९ दिवसे बभूव, तस्यां पञ्चविंशति-त्रिंशत्सहस्रप्राया जना आसन् तस्यां सभायां श्रेष्ठिवर्योऽयं श्रीयुगलकिशोरमहोदयोऽपि चोपस्थितो बभूव, तथा च यद्यहं भ्रान्तिं न करोमि तदैतदपि चास्ते, यत् सोऽस्माकं कार्य-कलापेषु सहानुभूतिमपि च प्रदर्शितवानासीत् ।

ममैतदपि च स्मरणं भवति यत्तदानीं लोकसभार्थं द्वौ त्रयो वा प्रत्याशिनः स्व-स्व क्षेत्रेभ्यो निर्वाचनेऽभ्युत्थानायैच्छन्, परन्तु तेषां सविधे व्ययं कर्तुं पर्याप्तं धनं नासीत् एतादृश्यां विषमायां स्थितावहं स्वर्गीयविरलामहोदयेनामिलम् तथा तं धन-साहाय्यं प्रदातुं न्यवेदयम् । तत्स्वीकृतिमुपलभ्याहं तान् सुहृदो विरलामहोदयस्य साक्षात्कारं विधातुमकथयम् । ते मामवोचन्यद्यावद्धनं तेऽकामयन्त, ततोऽप्यधिकं धनं स तेभ्यो मित्रेभ्यः प्रादात्तस्मादेव ते निर्वाचने पूर्णरूपेण साफल्यमवापुरिति । अद्यापि च ते लोकसभायाः प्रमुखेषु सदस्येषु वर्तन्ते । सैषा विरलामहोदयस्य तस्य योग्यानां सज्जनानां परीक्षणस्य मनीषा बभूव तथावश्यकतानुसारं दानवितरणस्य प्रवृत्तिश्चासीत् ।

सिन्ध-प्रदेशस्य तात्कालिकेन मुस्लिमलीग-शासनेन सन् १९४४–४५ ई० वर्षे यदा महर्षि-दयानन्देन प्रणीतस्य 'सत्यार्थप्रकाशस्य' त्रयोदशे समुल्लासे नन्वेतदर्थं प्रतिबन्ध आरोपितोऽभूद्यत्तत्र मोहम्मदीयधर्माद्विरुद्धं कट्वालोचना वर्तते, तदापि चार्यसमाजद्वारा तत्प्रतिरोधाय यो हि सत्याग्रहः कृतोऽभूत्तथा च यो हैदराबादस्य सत्याग्रह इवैव पूर्णतया साफल्यं वव्रे, तस्मिन्नपि कार्ये श्रीविरलामहोदयस्य परिपूर्णः सहयोगो बभूव ।

आर्य–(हिन्दु)–धर्मस्य रक्षार्थं स सदा प्रयत्नशीलस्तस्थौ तथानेकेभ्यो वास्तविकेभ्यः साधु-महात्मभ्यः प्रोन्मुक्तहृदयं दानानि प्रददानस्तस्थौ । एवंविधासु पाठशालासु तथा विद्यालयेषु च यत्र धार्मिकी शिक्षा प्रदीयमानासीत् तथा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्र संस्कृतभाषाया अध्यापनमपि च भवति स्म, स एष श्रेष्ठिवर्यो युगलकिशोरविरलामहोदयो दानानि प्रददानो बभूव।

स हि स्वात्मनः सर्वाणि कार्याणि परमेश्वराय समर्पयितुं प्रयतमानस्तस्थौ तथा नरकस्य यानि त्रीणि द्वाराणि सन्ति, यैरात्मनो विनाशो भवति, अर्थात् कामः क्रोधस्तथा लोभः—तानेतांस्त्रीन पि च परित्यक्तुं स प्रयतमानोऽभूत्तथा स्वजीवनस्यान्तसमयेऽपि च स भगवतः श्रीकृष्णस्येदं कथनं चरितार्थयामास—

अन्तकाले च मामेव स्मरन् मुक्त्वा कलेवरम्।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः॥

भगवते श्रीकृष्णाय प्रणामाञ्जलिं निवेद्य स परमधाम प्राप।

भवन्तु बहवो भुवि

यस्यासीद् वसुधा सर्वा कुटुम्बं प्रियमात्मनः।
तस्माद् भारतरक्षां स स्वकर्तव्यममन्यत॥

आचार्याः साधवो धीरा मुनयो गुणिनः सदा।
मान्या यस्याभवन् सर्वे स्वर्गे स सेव्यते सुरैः॥

देशोऽयं संकटापन्नः प्रभो! कुरु कृपामतः।
विरला-सदृशा लोका भवन्तु बहवो भुवि॥

—दीनानाथत्रिवेदी मधुपः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्प्रदाय-निरपेक्षो युगलकिशोरविरलामहोदयः

आचार्यः-श्रीकिशोरीदासवाजपेयी

श्रद्धास्पदस्य प्रातः स्मरणीयस्य विरला-महोदयस्याभिधानं वयमत्र 'स्वर्गीय' इति विशेषणेन साकं नोल्लिखामो, यतः 'कीर्तिर्यस्य स जीवति'-अर्थात्-स जीवन् वर्तते, यस्य कीर्तिः संसारेऽस्ति। अन्ये लोकास्तु केवलं श्वासोच्छ्वासानेव गृह्णन्ति, ये केवलमुदरदरीपूरणमात्रमेव जानन्ति तथास्य जगतो भाररूपा भवन्ति। अत एव हि 'स्वर्गीयः पण्डितमदनमोहनमालवीयः' किं वा 'स्वर्गीयोलोकमान्यो बालगंगाधरस्तिलकः' इत्येवं विधाः प्रयोगा न क्रियन्ते।

मम वयसस्त्रिसप्ततितमो वर्षो व्यतीयन् विद्यते तथा यदा चाहं षोडशवार्षिकोऽभूवम्, तत एव समाचार-पत्राणि पठन् वर्तमानोऽस्मि। दिवसेष्वेतावत्सु हिन्दु-जातये बलप्रदायका ये ये परः शता महान्तो व्यक्तिविशेषाः सम्मुखमाजग्मुस्तेषु द्वौ सर्वोपरि वर्तेते—प्रथमः पण्डितोमदनमोहनमालवीयमहाभागस्तथान्यः श्रेष्ठी युगलकिशोरविरलामहाशयः। मालवीयमहोदयः 'पण्डितः' आसीत् स च स्वकीयं पाण्डित्यं हिन्दु-जातेः सेवायां पूर्णतयोपयुयोज। देश-स्वातन्त्र्यं, हिन्दीभाषाया अभ्युत्त्थानं, ता इमाः सर्वाः प्रवृत्तयो-हिन्दुजातेरेव सेवार्थमासन्।

महर्षे र्मालवीयमहाभागस्य जीवनस्य प्रत्येकं क्षणं हि हिन्दुजातेः कृते बभूव। स हि कांग्रेस-सभायामादितोऽन्तपर्यन्तं हिन्दुजातेरुत्कर्षं साधयितुमेव तस्थौ। स एष देशो हिन्दुजातेरेवास्ते। यद्यप्यन्ये लोकाश्चापि वसन्ति, परन्त्वेतद् 'हिन्दुस्थानं' विद्यते। 'बाहुल्येन व्यपदेशाः' इत्यनुसारं ज्ञायतामथवा तत्त्वतोऽवबुध्यतामस्तीदं 'हिन्दु-स्थानम्'। सबलायां हिन्दुजातौ, हिन्दुस्थानं सबलं तथा निर्बलायां तस्यां हिन्दुस्थानं निर्बलमास्ते।

श्रद्धेयस्य विरलामहोदयस्य धर्मसेवामहं बाल्यादेव शृण्वन्नभूवम् तथा सन् १९३२ ई० वर्षे यदा मम 'तरङ्गिणी' प्रादुर्बभूव, तदा तत्रैकमेतद्दोहापद्यमप्यवततार:—

'दान' नाम से सम्पदा, देते फूंक अनेक।
खोले थैली देश-हित, कोई बिरला 'एक'॥

'तरङ्गिण्यां' मालवीयसदृशानां महानेतॄणां वन्दनास्ते, परं श्रीमांस्तत्र केवलं 'विरला' एव वन्दितोऽस्ति। ये जना मे प्रकृति-प्रवृत्तीः परिचिन्वन्ति, तेऽनेन दोहाच्छन्दसैव बुध्येयु र्यद्धि तावत्पर्यन्तं मन्मनसि तस्य कृते का भावना कृतास्पदाऽभूदिति। तदनन्तरमपि चोत्तरोत्तरं तत्सेवाः पठन्-शृण्वंश्चासम् तथान्तर्मनस्यैव तमिमं श्रीमन्तं सन्तं प्रणमन्नस्थाम् तथा च जीवन-पर्यन्तं त प्रणमन्नेव सन्तिष्ठेय।

धर्मवीरो युगलकिशोरविरलामहोदयः पूर्णतः सम्प्रदाय-निरपेक्षोऽभूत्। 'धर्म-निरपेक्षः' इति कथनं तु बतैका गाली वर्तते। धर्म-निरपेक्ष-इत्यस्यार्थो भवति 'अधर्मी'। स धर्म-परायणोऽभूत्। अहिंसा, सत्यं, दानं, दया, सदाचारादीनि धर्मस्याङ्गानि वर्तन्ते। तानीमानि सर्वाणि तत्त्वानि तस्मिन्नासन्। परन्तु धर्मस्यामीषां सर्वेषामङ्गानां पालनं विचारेण भवति। सर्वत्र 'अहिंसा' धर्मो न भवति, दानमपि सर्वत्र नो धर्मः। देशस्य शत्रूणां विध्वंस एव हि धर्मो भवति तथा दुष्टेभ्यो दानमपि चाधर्मः। एतत् सर्वं धर्मवीरो विरलामहोदयः सम्यग् बुबोध।

परिश्रमं कृत्वा धनार्जनं पुनरुपार्जितं धनं स्वसुखानन्दसाधनेऽनुपयोज्य समस्ताया जातेरभ्युत्थानाय तदुपयोगः कियन्महत्तपः। अयमेव हि तु कर्मयोगोऽस्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विरलामहोदयः सम्प्रदाय-निरपेक्षो बभूव। सर्वाण्यपि मतानि सम्प्रदायाश्च तत्कृते समाना आसन्—वैदिकोऽवैदिकः, शैवो, वैष्णवः, शाक्तो, जैनो, बौद्धः सिक्खादयः सर्वेऽपि सम्प्रदायास्तस्य समाना आसन्। स हि सम्प्रदाय-भेदस्य कलहेभ्यो दूरं संतस्थे। एकस्यां जातौ (राष्ट्रे) अनेके सम्प्रदाया भवितुं शक्यन्ते। परमन्यस्यां कस्यामपि जातौ (राष्ट्रे) एतादृशी समुदारता नोपलभ्येत यादृशी हिन्दु-जातौ-हिन्दुस्थान-राष्ट्रे वा देशे वर्तते। अरबदेशे मोहम्मदीयाः स्वभ्रातॄन् 'यहूदी' जनान् द्रष्टुं न पारयन्ते। परन्तु हिन्दुस्थाने हिन्दु-जातौ। सर्वेषामेव सहावस्थानमास्ते।

आम्, यदि भेदोऽस्ति तदा सः राष्ट्रियतायाः अर्थाज्जातीयतायाः। भारतीयता नाम भारतीयानां प्राणा वर्तन्ते। ये भारतीयभाषायां स्वनामापि न रक्षन्ति, भारतीयाः सन्तोऽपि (भारते जन्म लब्ध्वा तथात्रैव पालिताः पोषिताश्चापि) ये जना देशस्यास्य भाषायां स्वसन्ततेर्नामकरणमपि न विदधति, तैः सहास्माकं तादृशो गम्भीरः सम्बन्धो न सम्भवति-तदिदं मादृशानां जनानां मतमास्ते। कामं कोऽपि जनः स्वाभीष्टं सम्प्रदायं मन्यताम्, परन्तु भारतीयतां तु मापजहातु। येषां जीवनं पूर्णतया बाह्यवर्णरञ्जितमास्ते, तेभ्योऽपि वयमीषद्दूरं तिष्ठामः। धर्मवीरोविरलामहोदयोऽपि च तदेतद् भयं मन्यते स्म। अर्थाद् ये पूर्णतया भारतीया न सन्ति, तैः साकं तस्य सम्बन्धो नाभूत्। स हि निर्मलो राष्ट्रवादी बभूव तथा च तामिमामात्मनो राष्ट्रभक्तिं स प्रभोरर्चनां मेने। स सत्यो वैश्यजनोऽभूदत एव हि धनोपार्जनं, तस्य च पूर्णतः सदनुष्ठाने विनियोजनं स्वधर्मं मेने। स हि सिद्धिमवाप, 'स्वकर्मणा च तपसा सिद्धिं विन्दति मानवः।' तस्मै सते शतशः प्रणामाः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुलं पवित्रं जननी कृतार्था

गोस्वामी द्राक्तरो गिरिधारीलालशास्त्री

स्वर्गीयस्य विरलामहोदयस्य जन्म, कर्माणि च लोकोत्तराण्यासन्, स हि लोकोत्तरान् गुणानादायोत्पेदे। तज्जन्म, निधनं द्वेऽपि च तं युगपुरुषं, महापुरुषं च प्रमाणयतस्तथा चास्यान्तरङ्गं साक्ष्यं वयं तस्य जन्म-कुण्डलीतः प्राप्नुमः। तस्य जन्मकालीनानां ग्रहाणां स्थितिस्तथा च पञ्चाङ्ग-विवरणमित्थंविधं वर्तते—

तिथिः ज्येष्ठ-कृष्णा प्रतिपद्, बुधवारः संवत् १६४०, जन्मस्थानम् पिलानी (राजस्थानम्) अक्षांशाः २८/१२ रेखांशाः ७५/३२ पलभा ६/२३ तिथिः १ घ० ७/४४ प० ज्येष्ठानक्षत्रम् घ० ४८ प० ५ सिद्धियोगः घ० ४० प० १६ कौलवकरणं घ० ७ प० ४४ जन्मसमयः ८ वादनोपरि २८ मिनटप्रमाणम् प्रातः काले जन्मेष्टघटीपलानि ७/१४ लग्नम् मिथुनम् अंशाः २० घ० १५ दशमो मीनः अंशाः ८ घ० २५ लग्नस्य होरा कर्कः, दृष्काण-सप्तमांशौ तुला, नवमांशो मेषः, द्वादशांशः कुम्भः, त्रिंशांशो मिथुनम्। इत्थंविधायां लग्नपरिस्थितौ सूर्यः वृषभे अंशाः ९ घ० २३, चन्द्रमा वृश्चिके अंशाः २० घ० ३६, मंगलः मेषे अंशौ २ घ० २८, बुधः वृषे अंशाः २८ घ० २, बृहस्पतिः मिथुने अंशाः ११ घ० १७, शुक्रः मेषे अंशाः ७ घ० ४६, शनिः वृषे अंशाः ७ घ० ३५, राहुः तुलायां अंशाः १८ घ० २, केतुः मेषे अंशाः १८ घ० २। आंग्लतारिका २३, मई १८८३। तदनुसारम्—

जन्माङ्गचक्रम्



नवांश चक्रम्



चन्द्र-कुण्डली



आसां तिसृणां कुण्डलीनामाधार एव हि फलादेश-कथनस्य सिद्धान्तं महर्षयो निरूपितवन्तः। अस्य श्रीयुगलकिशोरविरलामहोदयस्य कुण्डल्यां सर्वतो महान् योगः कर्मेशस्य, सप्तमेशस्य च बृहस्पतेः केन्द्रस्थस्य लग्नेऽवस्थानमास्ते। सोऽयं योगस्तमिमं महापुरुषं धर्मकार्येषु सर्वोपरि दानवीरं प्रकटयति। बृहस्पतिः पुण्यकार्यस्य, धर्मस्य, सदाचारस्य, त्यागस्य, तपसश्च स्वामी वर्तते। तस्मादेवास्य जनुषः सदाचारो दानं तपश्चानुकरणीयानि बभूवुः। समृद्धिशाली, सम्पत्तिशाली सन्नपि युवावस्थायामेव स्वपत्न्यां दिवं गतायामपि पुनर्विवाहस्य न करणं, दीनानां, दुःखिनामनाथानां तथा विधवानां च पालन-पोषण-करणं, धर्म-संस्कृत्योः, साहित्यस्य राष्ट्रस्य च बहुमुखीमभ्युन्नतिं कर्तुं सततमुद्योगपरायणत्वं, स्वस्य समस्तायाः सम्पत्ते र्लोकोपकारे समुत्सर्जनं, मनसा, वचसा, कर्मणा च केवलं पुण्यकार्याणामनुष्ठानमेव यस्य जीवनचर्या

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सीद्-एते सर्वे दिव्यगुणाः कर्माणि च तं पूर्व जन्मनि योगिनं संसाधयन्ति ।

अथ चन्द्र-कुण्डल्यां षष्ठे सप्तमेऽष्टमे च स्थानेषु सर्वेषां ग्रहाणां स्थितिर्महतश्चन्द्राधियोगान् प्रकटयति । ज्योतिषशास्त्रानुसारम्:—

चन्द्राधियोगे बहुशास्त्रकर्ता
विद्याविनीतश्च बलाधिकारी ।
मुख्यस्तु निष्कापटिको महात्मा
लोके यशोवित्तगुणान्वितः स्यात् ॥

तदनुसारं निश्चितमेव चन्द्राधियोगे समुत्पन्नो विरलामहोदयः शास्त्रस्य, धर्मस्य च रहस्यानां वेत्ता, विनीतः, प्रभावशाली, समुदारचरितो महात्मा, लोकप्रियो गुण-शील सम्पन्नो महापुरुषो बभूव । तं प्रसूय विरला-परिवारः पवित्रो बभूव, तज्जननी माता योगेश्वरीदेवी तस्याः कुक्षिश्च कृतार्थतां जग्मतुः ।

नित्यं स्तुत्यश्च विद्यते

श्रीयुगलकिशोरस्य तस्य धर्मात्मनः सदा ।
चित्ते शुभेयमेवासीद् वाञ्छा केवलमुत्कटा—
"सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुःखमाप्नुयात्" ॥
न्यायोपार्जितवित्तस्य परदुःखापनुत्तये ।
नित्यं त्यागः कृतो येन स धन्यो धरणीतले ॥
विडलापरिवारोऽयं सर्वोऽपि वस्तुतोऽधुना ।
सतां मान्यो वदान्यश्च नित्यं स्तुत्यश्च विद्यते ॥

—मधुपः, जयपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वर्गीयस्य श्रीयुगलकिशोरविरलामहोदयस्य विचाराणाम् अन्तर्यामीनि सूत्राणि

१-एकं सद्विप्रा बहुधा वदन्ति

बहुधा भावे स्वीकृते सहिष्णुताया जन्म भवति। हिन्दु-जाति हिन्दु-धर्मश्च सहिष्णुतायाः प्राणवायुना जीवतः।

२-समाना हृदयानि वः

आर्य-हिन्दुत्वस्य प्रधाना विशेषता समन्वय-भावना वर्तते। 'वसुधैव कुटुम्बकम्'—इत्यस्या भाव-पद्धतेः संज्ञा 'समन्वयो' ऽस्ति।

३-ऋतस्य पथा प्रेत

आर्य-हिन्दु-संस्कृते धार्मिकी स्वतन्त्रता, सामाजिकी स्वतन्त्रता तथा च व्यक्तिगता स्वतन्त्रताऽवश्यमेवाभीष्टास्ते, किन्त्वस्या उपभोगः सत्यस्य मार्गे चलितुं, सत्यस्य साक्षात्कारं कर्तुं च भवितुमर्हति।

४-ऊर्ध्वं तिष्ठन्ति सत्वस्थाः

स्वात्मनः केन्द्रान्मानसिके जगति ऊर्ध्वमुत्थानं नाम हिन्दूनां जीवन-दर्शनमास्ते।

५-त्याग एव हि रक्षणम्

स्वचित्तं स्थिरीकर्तुं तच्च लोकहिताया-बद्धुं, तस्मिन्नुदात्त-भावान् परिपूरयितुं च त्यागभावनायाः सामाजिके स्तर उत्तारणम्-आर्य-हिन्दु-जातेर्जीवन-पद्धतिर्वर्तते।

६—न हि कश्चित् क्षणमपि जातु तिष्ठत्य-कर्मकृत्

हिन्दूनां जातीय-जीवनस्यावश्यकं लक्षणं कर्म विद्यते। विना कर्म जीवनस्य स्थितिर-सम्भवास्ते, किन्तु धर्मं विना कर्मापूर्णं भवति।

७—धारणाद्धर्म इत्याहुः

हिन्दु-संस्कृतेराग्रहस्य विषयो धर्मस्य जीवनस्य च समन्वयोऽस्ति। धर्मस्य तथा सर्वोच्चस्य चैतन्यस्य च धरातलमेकमास्ते।

८—श्रद्धावान्-लभते ज्ञानम्

ऋतं, सत्यं, धर्मो, ब्रह्म, चैतन्यं चेतोमानि परस्परमभिन्नानि सन्ति। अमोषां सत्ता सर्वोपरि विद्यते। एतेष्वखण्डा निष्ठा, श्रद्धा च हिन्दु-संस्कृतेर्विषयस्तथा च हिन्दु-जातेर्जीवनस्य लक्ष्यं वर्तते।

तमेव विदित्वातिमृत्युमेति

अध्यात्म-साधना हिन्दु-संस्कृतेराग्रहस्य विषयोऽस्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तुम्हाला ठाऊक आहे काय ?

तुम्हीं पाठवीत असलेल्या तारेच्या पत्त्यांत पांचपेक्षां जास्त शब्द असल्यास त्याबद्दल काळजी करूं नका. आम्हीं आतां त्यांतले जादा ५ पर्यंत शब्द विनामूल्य पाठवतो.

त्याचप्रमाणें टपाल-वटवडयाचा क्रमांकहि लिहा. त्यालाही पैसे पडत नाहींत.

संपूर्ण आणि बिनचूक पत्त्यामुळें तुमच्या तारा निश्चितपणें लवकर पोंचतात.

विना मूल्य

भारतीय टपाल व तार खातें

davp 68/682

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीहरिशास्त्रीदाधीचः, भारती प्रधानसंपादकः

भगवतो महामहेश्वरस्य विहारस्थलेऽस्मि-न्भारते वर्षे बहुविधा मानवा जायन्ते म्रियन्ते चानुदिनम् । परं बलिनः क्षमावन्तः, तपस्विनः उपकारपराः, दानिनोऽविकत्थनपराः, धार्मिका दंभरहिताः विद्वांसो गर्वरहिता धनिनो दाननिरताः प्रायशोऽङ्गुलीमात्रगण्या एव प्रादुर्भवन्तीति नातितिरोहितं सज्जनानाम् ।

तेष्वंगुलीगण्येषु साम्प्रतमेव महामना महोदारः सरलः कारुणिकः विद्वान् परदुःखासहः भगवतो विभूतिरिवैकः प्रसिद्धो विरलाकुलकमलाकरः प्रादुर्रासीत् युगलकिशोरनाम्ना महाभागः। स हि शैशवत एव स्निग्धमधुराकर्षकवचाः कोमलाशयः, तीक्ष्णमतिः सौम्यः सरलस्वभावः सर्वेषां जनानां मनस्सु कृतस्थानो लब्धप्रेमा क्रमादुन्नतिमाप्तः शीघ्रमेव व्यापारकौशलं लब्धवान् । विश्वप्रसिद्धे विरलाकुले लब्धजन्मायं बहुतरं सरलोऽप्युदारश्च सुविख्यातिं प्राप्तवान् । अतुलं च धनं समुपार्जितवान् । स्वोपार्जितस्य धनस्य दानमेव रक्षणं मन्यमानेनानेन महाशयेन उपार्जितानां वित्तानां दान (त्याग) मेव हि रक्षणमिति नीतिपथं चरितार्थीकृतम् इति न सन्देहः। एष हि महोदयः श्रेष्ठी, परदुःखमपाकर्तुं प्राप्तदीक्ष इव बुभुक्षितानां क्षुधापनोदने बद्धव्रत इव विदुषां सत्कारे कृतसंकल्प इव शरणागतरक्षणनिश्चितमतिरिव समस्तेऽस्मिन् भारते एव किं विदेशेष्वपि लब्धसुयशाः अभूत् इति सार्वजनीनम् ।

गवां ब्राह्मणानां दीनानां रोगिणां चान्येषामपि स्वद्वारि प्राप्तानां मनीषितपूरणाय मुखप्रापणाय पीडापनयनाय साहाय्यं कुर्वन्नेवासीत् । एतस्य महानुभावस्य इयं नीति सूक्तिर्मानसपटले बाढं कृतस्थानासीत्—दातव्यं दातव्यं सति विभवे संचयो न कर्तव्यः। पश्येह मधुकरीणां संचितमर्थं "हरन्त्यन्ये" इति।

परमियमुदारता ईदृशी बुद्धिः एष उत्साहः अयं स्वभावः असौ साहसः ईदृशी क्षमता इदं तेजः एष च प्रतापः परमेश्वरस्य कृपादृष्टिं विना नोपलब्धव्य इति मन्यमानैरनेकशो जनैः स हि महात्मा युगलकिशोरः मानवतो विभूतिरेव प्रकटिताऽत्र भारते वर्षे इति ससंमानं स्वीकृतो बहुमतश्च । वस्तुतः स्तन्महापुरुषस्य लक्षणैः स्पष्टमिव प्रतीयते-सोयं महाभागः दानवीरोऽपि धर्मवीर इवाभाति स्म। स हि भारतेऽस्मिन् हिन्दुराज्यं आर्यसंस्कृतेरभ्युदयं यज्ञयागानां पुनः प्रवृत्तिं सत्य-सनातनधर्मस्य सुतरां सर्वत्र-प्रसारं गोवंशरक्षणं हिन्दीभाषासाम्राज्यं च भारते द्रष्टुमाकांक्षमाणो हि तत्तदुक्तार्थसम्वृद्ध्यै यतमान एव कस्मात् शीघ्रमेव भुवं विहाय दिवमवाप्तवान् इति महत्ती क्षतिरुपाजायत भारतस्य कृते। दैवस्य दुर्ललितमेवेदं यदीदृशमहापुरुषस्य सत्तां त्वरितमेव विलोपितवान्। हन्त एतावद्गुणगणसंभृतोऽपि सर्वं कर्तुं जगदुपकर्तुं सुक्षमोऽपि क्षणभंगुरत्वं प्राप्तवान् सत्यमेव तद्गुणान्स्मरतः सहस्रशो जना विह्वलीभूताः। स हि सत्यं स्वर्गे गतः इति निश्चयं कृतवती इयं सूक्तिः श्रूयताम्—"स एव स्वर्गसंस्थानः स एवामरतांगतः । गायन्ति यद्गुणांल्लोकाः संस्मरन्ति कृतादराः ।" इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहुला ईदृश्यः संस्था लघ्व्यो वा वृहत्तराः सन्ति भारते यत्र युगलकिशोरविरलाकृतं दानं फलितं पुष्पितमिव प्रतिभाति ।

स हि आत्मनि विश्वस्तः हिंदुशब्दं विशालाशयं मन्यमानः हिन्दुस्थानेऽस्मिन् भारते जायमानं सर्ववर्गस्थमपि मानवं हिन्दुत्वेन पूर्णं पश्यति स्म । ईदृशः कोपि प्रख्यातो नेता वा राष्ट्रीय उद्योगो वा आन्दोलनं वा नैवास्तेऽत्र, यो विरलावंशावतंसस्य युगलकिशोरमहानुभावस्यावलम्बं न प्राप्तवान् । प्रायः प्रसिद्धा योगा आयोजना उद्योगा अस्यैव दानेन पुष्टाः पालिताः संचालिताश्च सन्ति ।

स हि महानुभावः हिन्दुत्वस्य विस्तृत्यर्थं हि जापानचीनाभ्यां सह व्यापारिकं सम्पर्कं संस्थापितवान् सुतरां समचालयच्च तम् । अनेन महाभागेन बौद्धानां बहुषु स्थानेषु तन्मन्दिराणां निर्माणे समुद्धारे च योगं दत्तवताऽपि नैका धर्मशालास्तदुपयोगाय निर्मापितास्ता अद्यापि तस्य सुमञ्जुलं यशोगानं कुर्वन्त्य इव भ्राजन्ते ।

भगवद्गीतायाः एतस्याः सूक्तेः—"शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभि जायते" स हि विरलाकुलकमलहंसो युगलकिशोरमहोदयो ज्वलदुदाहरणं प्रतिभाति स्म नात्र सदेहः स हि अजातशत्रुरेवाभूत् । स हि परोपकारं पुण्यमिति परपीडनं पाप इति, सन्मत्रणामुपदेश इति दीनानां रक्षणं पालनं पोषणं यज्ञमिति विद्या प्रदापनं यशः इति जनतायाः सेवा जनार्दनसेवामिति मन्वान एवानवरतं सद्भावनाभावित एव दिनानि वियापितवान् सर्वैश्वर्यसम्पन्ने विरलासदने स महात्मा विदेह इव न्यवसत् । सकलं जीवनं उच्चा विचाराश्च तस्याद्यापि तत्स्मर्तॄणां मनांसि मोहयन्तीव । भारतीयधर्मस्य हिन्दु-संस्कृतेश्च संरक्षणाय यावत् दानं सहाय्यं सदुपयोगः प्रसादश्च तेन महात्मना कृतम् तावत् नाद्यावधि कोप्यन्यो महानुभावो विशांवरो वा नृणां वरो वापि कर्तुं नापारयत् । अग्रेऽपि कश्चन करिष्यति न वेति संशय एव ।

तादृशा हि महानुभावा पुण्योदयं विना न जायन्ते न मिलन्ति न दृश्यन्ते इति निश्चप्रचमेव वेद्यं सुधीभिः । एतादृशा हि उदाहरणार्थं जना महामनसो विनयादिगुणान्विताः भगवता प्रेष्यन्ते भूतले लोकशिक्षणार्थमनुसरणार्थं च । एवं तमुदाहरणीकृत्य बहवोऽन्येपि महाशयाः व्यापारिणः स्वजीवनं तादृशं निर्मापयेयुस्तमनुसरेयुश्चेद्भारतं सर्वदेशानामग्रणीर्भवेदेव सन्ति चापि बहवो वैश्याः स्वकुलावतंसा पुण्यवंशा अपि उदाराः यशस्विनो मनस्विनः प्रभूतधनवन्तोऽपि तादृक्सर्वगुणानां दयादाक्षिण्यपावनत्व—सरलत्वश्रमत्व—उदारत्वलोकसेवकत्वादीनां एकत्र समवायवन्तो न दृश्यन्ते तदर्थं महामहेश्वरः परात्परः प्रभुः प्रार्थ्यते यद् त्वरितमेव स भारतेऽस्मिन् तादृशान् व्यापारपटून् प्रवीणान् धनिनो मान्यान् स्वपस्विनो वदान्यान् सर्वलोकसेवकान् दीनोद्धारपरायणान् पतितपावनाञ्जनान् प्रकटयतु । स हि भगवान् पूरयिष्यति शुभाभिलाषमस्माकमिर्ममिति मन्वानोहं भारती परिवारसमवेतः श्रेष्ठिश्रीयुगलकिशोरविरलामहोदयस्य सेवायां सादरं सप्रणयं श्रद्धाञ्जलिं समर्पयन् तदर्थं प्रार्थयामि भगवन्तं महेश्वरं स हि दिवं गताय तस्मै देवस्वरूपाय मानवमौलिकरत्नाय शाश्वती—शान्तिप्रदानं करोतुतराम् । तत्परिवारे च तादृशं तदनुकारिणं पुरुषरत्नं च प्रकटयितुं च मुहुर्मुहुः निवेदयामि च ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

* किञ्चिन्निवेदनम् *

विगते २०२४ तमे वर्षे आषाढमासेऽस्माकं देशस्य धर्मप्राणः सुप्रसिद्ध उद्योगपतिर्धर्मस्य संस्कृतेस्तथा हिन्दुसमाजस्य चानन्यो हितचिन्तकः परमोदारः श्रेष्ठिप्रवरः **श्रीयुगलकिशोरबिरलामहोदयो** दिवं गतः ।

अद्य देशेऽत्र तादृशानां शताधिकानां महापुरुषाणामावश्यकतासीत्, तदा तस्येदानीं संकटापन्नं समाजं सहसा परित्यज्य लोकान्तरगमनं देशस्य समग्रस्य समाजस्य च कृते अपूरणीयैका महती क्षति वर्तते। स्वदेशे तथा विदेशेषु च तेन निर्मापितानामनेकेषां मन्दिर-मठानां शिक्षणालायानामेवं धर्मशालाश्च कारणात् तदीयो यशोराशिश्चिरमाकल्पान्तं स्थास्यति ।

अहं विगतैकोनविंशतिवर्षेभ्यः, 'भारती' संस्कृतपत्रिकायाः प्रकाशनात्मकं कार्यं कुर्वाणोऽस्मि। अतो मम श्रद्धेय-बाबू-श्रीयुगलकिशोरमहोदयेन सह बहुवारं साक्षात्कारो जातः। स्वर्गीय-श्रीविडलामहोदयस्य संस्कृतंप्रति समासीदनन्तोऽनुरागः। अत एवास्यै भारतीपत्रिकायै प्रारम्भादेव सहयोगं प्रदाय तेनास्या नियमितरूपेण प्रकाशनेऽपि योगदानमपूर्वमक्रियत ।

तस्य श्रीविडलामहोदयस्यानेनाकस्मिकनिधनेन शोकाकुलो भारतीपरिवारस्तथास्याः सञ्चालनकर्त्री संस्कृतप्रचारपरिषच्च तदीये सम्माने श्रद्धाञ्जलेः कतिचन इमानि शब्दप्रसूनानि समर्पयितुमात्मनः कर्तव्यं मत्वा इमां 'श्रीयुगलकिशोरविरला-स्मारिकाम्' प्राकाशयताम् ।

मम सर्वप्रथमं श्रद्धेय-श्रीयुगलकिशोरविडलामहोदयेन सह साक्षात्कारः १९४३ तमेऽब्दे रा० स्व० संघस्य शिक्षणवर्गस्य समारोहे मेरठनगरे समभूत्। तदानीं तत्र स श्रीविरलामहोदयोऽध्यक्षरूपेण वर्गेऽस्मिन् समागतः, तत्रैव चैतद् विदितमभूद्यत् तस्य हृदये हिन्दुत्वस्य समुत्थानार्थं कियती अदम्या प्रेरणासीदिति ।

पुनश्च १९५२ तमे वैक्रमेऽब्दे दिल्ल्यां विडलाभवने तस्य महापुरुषस्य साक्षात्कारो मयाकृतः। तथा च १९५२ वर्षे चाहं यदा वाराणसीं गत आसम्, तदा तत्र श्रीबलदेवदासविडलामहोदयस्य सभायामुपस्थितोऽभूवम्। स हि महानुभावः प्रत्यहं सायं कतिचन पण्डितान् समाहूय तैः सह शास्त्रचर्चां करोति स्म। ततश्च सर्वेभ्योऽपि समागतेभ्यः पण्डितेभ्यः कतिपयरजतमुद्राः समर्पयति स्म यदाहं तस्मै भारतीपत्रिकायाः परिचयः कारितास्तदा स अतिप्रसन्नो जातः प्रोक्तवांश्च यत् कलिकातां गत्वा ममात्मजाय वृत्तान्तोऽयं भवता कथनीयः, स अवश्यमत्र विषये सहयोगं करिष्यतीति। ततस्तदानीमपि स भारतीपत्रिकायै विशिष्टां सहायतां कृतवान्। अथ च तत्कथनानुसारं दिल्ल्यामहं यदा श्रेष्ठिवर-श्रीयुगलकिशोरमहोदयस्यान्तिकमागतस्तदा स महत्या प्रसन्नतया सर्वमपि वृत्तजातं श्रुत्वा श्रीब्रजमोहन-विडलामहोदयं प्रति पत्रमेकं विलिख्य दत्तवान्। ततश्च लब्धावकाशोऽहं यदा कलिकातां गत्वा तत्पत्रं प्रादर्शयम्। ततः श्रीलक्ष्मीनिवास-विडलाद्वारा तदाप्रभृत्येव नियमितरूपेण भारतीपत्रिकायै विज्ञापनं दीयमानं वर्तते। एवमेव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीकृष्णकुमार-श्रीब्रजमोहनविडलाप्रभृतिभिरन्यैरपि बिडलापारिवारिकैर्महानुभावैः सदैव सहयोगो विद्यते दीयमनः ।

एकदा ५५ तमे वर्षेऽथवा ५६ तमे वर्षे कलिकातायां श्रीबाजोरियाचिकित्सालये श्रीबाजोरियाप्रतिमायाः समुद्घाटनसमारोहः श्रीविडलामहोदयस्यैवाध्यक्षतायां सम्पन्नोऽभूत् । तत्र स्व० श्रीविडलामहानुभावस्य तस्य हृदयोद्गारा मया श्रुताः । तदा ईशामतानुयायिभिर्धर्मप्रचारकैः आसामप्रान्ते क्रियमाणेन हिन्दूनां धर्मपरिवर्तनात्मकेन कुकर्मणा महद् दुःखमनुभूतवान् सः । एवञ्च ईशामतानुयायिभ्यस्तदितरसमाजविरोधितत्त्वेभ्यश्च समाजस्य धर्मसंस्कृत्योश्च संरक्षणे सवर्द्धने च स सदैव बद्धपरिकरोऽस्थात् ।

किञ्च १९६२ तमेऽब्दे च यदा दिल्ल्यां राजस्थान-पंजाब-हरियाणा-जम्बू-कश्मीर-हिमाचलप्रदेशानां सङ्घशिक्षावर्गः साल्वानविद्यालये प्रचलन्नासीत्, तदा तत्र पूज्यगुरुजी (गोलवलकरजी) महोदस्य शुभागमने श्रीविडलामहोदयो वर्गेऽस्मिन् समागच्छेत्-इत्यतो मया जयपुरतः पत्रमेकं लिखितम् । स्व० श्रीविडलामहोदयस्तस्मिन्नवसरे तत्र समागतोऽभूत् । पूज्यगुरुजीमहोदयैः सहापि एकहोरात्मकं कालं यावत् देशस्यास्य विभिन्नासु परिस्थितिषु विविधो विचारो विमर्शश्चाभूत । पुनश्च वर्गे तस्मिन् राजस्थानस्य प्रत्येकमण्डलस्य प्रमुखनगराणां तत्रोपस्थितान् जनान् दृष्ट्वातिप्रसन्नश्च भूत्वोक्तवान् स श्रीविडलामहोदयो यत्-इदानीन्तु संघस्य माध्यमेनैव स्वदेशस्योद्धारो धर्म-संस्कृत्योश्च संरक्षणं भविष्यतीति । अन्ते च स महानुभावः सर्वैः सार्धं विधाय प्रार्थनां प्रात्यागतवान् श्रीविडलामहोदयः ।

किञ्च यदाहं चतुर्भ्यः पञ्चभ्यो वा वर्षेभ्यः पूर्वं भूंभुनूनगरं गतवानासम्, तदा तत्र वर्तमानात् श्रीमक्खनलालखेतानमहोदयात् भूंभुनूदुर्गं कथं ते जना श्रीविरलामहोदयस्यैव साहाय्येन धर्मद्रोहिणामाक्रमणाद् रक्षितुं प्राभवन्-इति वृत्तान्तमेकं श्रुत्वा ततस्तद्दुर्गं प्रत्यक्षरूपेण द्रष्टुमहमगच्छम्, यत्र भग्नं हनुमतो मन्दिरं पुनर्निर्मापितं जातमासीत् । तस्मिन् क्षेत्रे समुद्भवस्य प्रबलपराक्रमस्य श्रीशार्दूलसिंहस्य प्रतिष्ठापिता प्रतिमामपि विलोक्य मम महान् हर्षः समजनि । तथा चित्तौडदुर्गे धर्मशालानिर्माणादेर्बहवो घटनाः सन्ति तादृश्यो या भाविनः समाजस्य कृते स्फूर्तिं ददानाः सहस्रं वर्षाणि यावत् स्थास्यन्ति ।

अपि च संस्कृतप्रचार-परिषदो भारतीयपरिवारस्य च पक्षतो वयं यत् पत्र-पुष्परूपेण शाब्दिककुसुमानि देववाण्यां ग्रथितानि तस्मै दिवंगताय पवित्रात्मने समर्पयाम इति शम् ।

—गिरिराजशर्मा शास्त्री

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माघ-शुक्ला १४ तः फाल्गुणकृष्णा २ पर्यन्तम् विहितानां

पूज्यपादश्रीमाधवाचार्यवर्यमहाभागानाम्

श्रीसीतारामम्मन्दिरे भाषण-प्रवचनानां सारसंक्षेपः

भाषणानां प्रारम्भ एव केचन लोकाः कांश्चन प्रश्नानपृच्छन् । तथा हि—

१—अपि नाम मनो निग्रहः कर्तुं शक्यते ?

२—ग्रीक-रोमन-संस्कृतय इव भारतीया संस्कृतिश्चापि लोपं तु नापगच्छेत् ? इत्यादयः ।

प्रश्नानामेवंविधानामुत्तरे स्वामिमहाभागैः प्रोक्तम्—

विज्ञानं द्विविध भवति । सैद्धान्तिकम् विज्ञानम्, प्रयोगात्मकं विज्ञानञ्चेति । सैद्धान्तिकानां तत्त्वानां यावत् प्रयोगान् कृत्वा परीक्षणं न क्रियेत, तावत्पर्यन्तं विज्ञाने विश्वासो न भवति ।

संस्कृतेर्ह्रासः संस्काराणामभावेन भवति । भारतीयसंस्कृतेर्ह्रासस्याप्येतदेव हि कारणमास्ते ।

संस्कृतौ द्विविधे तत्त्वे-पदार्थौ वा-अन्तर्निहिते भवतः । एकं संस्कृतमपरञ्च प्राकृतमिति । यत्तत्त्वं, वस्तु, पदार्थो वा संस्कारैः परिशुद्धं भवति, तत् संस्कृतमित्युच्यतेऽर्थादुत्तमैः संस्कारैः सुसंस्कृतमिति । अपरं वस्तु प्राकृतं प्रोच्यते । परमेश्वरस्य या हि कार्यरूपा शक्तिरास्ते तस्याः संज्ञाभिधानं प्रकृतिरस्ति । ईश्वरेण रचितानां पदार्थानां प्राकृत इति संज्ञा वर्तते खलु । मनुष्यै न्यूनाधिकं संशोध्य परिमार्ज्य च पदार्थेषु येष्वन्तरमापाद्य किमपि रूपान्तरं गुणान्तरं स्वभावान्तरं च विहितमस्ति ते पदार्थाः संस्कृता इत्यभिधीयन्ते । अर्थात् प्राकृताः पदार्थाः संस्कृत्य-संस्कृत्योपयोगिनो विधीयन्ते । उदाहरणार्थं यथा नदीनां प्रवाहं कुल्यारूपं विधाय तदुपयोगः क्रियेत तदा सः संस्कृतो भवति । पुनर्यथा कार्पासः प्राकृतो भवति तथा च वस्त्रं संस्कृतम् । यावज्जडचेतनपदार्थानां समूहः संस्कृतो न विधीयते, स चोपयोगी न भविष्यति । तस्मादेवोक्तम्—

"जन्मना जायते शूद्रः संस्काराद्द्विज उच्यते ।" इति ।

संस्कारा विशेषरूपेण त्रयो मुख्या वर्तन्ते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्वादयो धर्मशास्त्रकाराः षोडशसंस्कारान् मन्यन्ते। संस्कारत्रयेष्वाद्यो दोषमार्जनम्, द्वितीयो गुणाधानम्, तृतीयश्च हीनाङ्गपूर्तिरिति। सुवर्णमग्नौ निक्षिप्य तस्य दोषमार्जनं क्रियते, किन्तु तावन्मात्रेण तदुपयोगी न भवति। तत्स्वर्णं स्वर्णकारसमीपमुपनीतं मुकुटकङ्कणमुद्रिकादिरूपे परिवर्तितं गुणाधानमाप्नोति। ततः पुनस्तद्धीरकमणिमाणिक्यैः खचितं सद्भगवतोऽलङ्काराथमुपयोगितां गतं हीनाङ्गपूर्णं भवति। एवमेवान्यत्रापि बोध्यम्। जातकर्मादयः संस्कारा दोषमार्जनाय भवन्ति, तदनुचूडाकर्मोपनयनादयः संस्कारा गुणाधानहेतवो भवन्ति तथा च विवाहादयः संस्कारा हीनापूर्तिहेतो विधीयन्ते।

मनुष्यस्य चरमं लक्ष्यम्

ब्रह्मत्वप्राप्तिरेव हि मनुष्यस्य चरमं लक्ष्यमास्ते। अथ पुनः संस्काराः कमुपयोगमर्हन्ति? ये जनाः परमार्थपथपथिकाः सन्ति–मोक्षमार्गेऽग्रेसरा वतन्ते, तेषां कृते संस्काराः किलैकं पौष्टिकं स्फूर्तिप्रदं च पाथेयमस्ति। ते तत्साहाय्येन तस्मिन् परमार्थमार्गे निर्विघ्नं गतिशीला भवितुं प्रभवन्ति। अर्थान्मोक्षस्य मार्गे साधकाः सुगमतयाऽग्रे गन्तुं शक्नुवन्ति।

अथेदानीमेतद्द्रष्टव्यं भवति यद्धि ये संस्कारहीनाः सन्ति, तेषां विषये वेदस्य क आदेशो भवति? संस्कारविरहिता जनाश्चापि मुमुक्षवो भवन्ति, तेषां कल्याणं कथमिव सम्पद्येत? वेदस्तावदुपायत्रयमादिशति–१-दानम्, २-सत्सेवा, ३–सत्सङ्गश्चेति। दानम् विनान्तःकरणं न शुद्ध्यति। संक्षेपतः सुपात्रे दानं नाम सर्वोत्तमं दानम् भवति। यदि च पात्रापात्रयोः परिचितिर्न भवेत्तदा कूपारामनिर्माणादिभिः प्राणिनां सेवा कर्तव्या।

सर्वेऽपि च प्राणिनस्त्रिविधदुःखेभ्य–आधिभौतिक आधिदैविक–आध्यात्मिक — संज्ञकेभ्यो निवृत्तये संचेष्टमानाः सन्ति। तेषाममीषां त्रिविधानां दुःखानां कारणं खल्वज्ञानं वर्तते। ब्रह्मविद्यां विना किलाज्ञानस्य निवृत्ति र्न भवतीति सुनिश्चितमेव। एवं सति ब्रह्मविद्याया अभ्युदयो ननु कथं भवेन्नाम? स च साधूनां, सतां, महात्मनां कृपयैव सम्भवति। सतां कृपां विना सैषा ब्रह्मविद्या-प्राप्तिरसम्भवास्ते। यावन्तोऽपि फलप्रदातारो विद्यन्ते तेषु सर्वश्रेष्ठाः फलदातारः सन्तो भवन्ति। सन्तो महात्मानो महापुरुषा लोकोत्तरा भवन्ति। तेषां संसारेऽवतरणं लोकानुग्रहहेतोरेव भवति। तेषामाचरणान्यपि च लोकोत्तराणि भवन्ति। न हि तेषु सत्सु महात्मसु विधि–निषेधव्यवहारोऽपि च भवति।

आनन्दः सुखं च

अथैकवारं प्राप्त आनन्दो न हि नश्यति यतः स (आनन्दः) बाह्यो न भवति। सुखं तावद्बाह्यत्वान्नश्वरम् वर्तते। यथाग्नेरुष्णत्वमस्य बाह्यकारणमास्ते। सुखं तावज्जीवनस्य बाह्यम् लक्ष्यं मन्तव्यम्। यतः सुखं यदि नोपलभ्यते, तदा तदभावे युष्मासु न कापि क्षतिर्भवति। परन्तु यदि चानन्दो न प्राप्तस्तदा वेदो वक्ति सैषा महती हि विनष्टिरास्त इति। ऋतम्भरया प्रज्ञया दृष्टे सति सेयं वैज्ञानिकी-अपसन्धानात्मिका प्रगतिरनर्गला प्रतीयते। सूर्यस्तावद्बाह्यं तमो निवर्तयितुम् कुशलोऽस्ति परमान्तरिकस्यान्धकारस्य भेदने सन्तं महात्मानं विना न कोऽपि च समर्थो भवति। यज्ञस्य, भक्तानां हरिकथानां चाभावे नारदो मुनिः सत्यपीन्द्रस्याग्रहे स्वर्गवासाय नो जगाम।

कलियुगेऽस्मिन् सत्या वास्तविकाः सन्तः कथम् परिचीयेरन्? यदि च सतां परिचयो नास्ति तदा माता-पित्रोः सवां समाचरन्तु भवन्तः किं वा दीना हीना जनाः संसेव्यन्ताम्। मातृसेवातीव शीघ्रं फलदायिनी भवति। मातुः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सेवया कलिकालेऽस्मिन् द्रुततरमेव सांसारिका-दुःखान्निवृत्ति र्भवति ।

मनोनिग्रहस्योपायाः

मनो-निग्रहस्य के नु खल्वुपायाः सन्ति ? प्राणानां नियन्त्रणं विना मनश्चाञ्चल्यं नाव-रुध्यते। मनश्चाञ्चल्यावरोधने प्राणायामस्य बह्वधिकं महत्त्वमास्ते। प्राणायामेन साकमेव किलाभ्यासेन, वैराग्येण तथा च दृढया भगव-द्भक्त्याऽ(भगवन्निष्ठया) पि च मनो निगृहीतुं शक्यते ।

अष्टौ पाशाः

मनसः स्ववशेकरणमेकं वस्तु, मनसोऽ वरो-धस्तावद्वितीयं तथा च मनोनाशो वा मनोनिरो-धस्तृतीयं वस्तु विद्यते। यदि च वयं मनोनाशं कर्तुं न प्रभवेम तदा न्यूनान्न्यूनं न मनोवशं नेतुं तु समर्था एव। अष्टपाशान् दश कर्माणि चाशु-भान्यपाकृत्य वयं मनो वशीकर्तुं शक्नुमः। यथा चोक्तम्—"पाशयुक्तः पशुः प्रोक्तः पाश-मुक्तः सदाशिवः।"

१—मोहो नाम महातमोरूपो भवति ।

२—लज्जा, लज्जा-पाशान्मुक्तिसाधनायैव, श्रीकृष्णचरिते भगवता श्रीकृष्णचन्द्रेण वस्त्र-हरणलीलां विधाय गोपिका लज्जापाशान्मुक्ता अक्रियन्त। अत्रेदमवधेयम्—प्रत्येकस्य शब्दस्य-आध्यात्मिकः, आधिदैविकस्तथा चाधिभौतिक-श्चेति त्रिविधोऽर्थो भवति। 'वस्त्र-हरण' स्य प्रसङ्गेऽपि चैवमेव बोध्यम्। भागवतं पुराणं नाम पारमहंसी संहितास्ते, महामुनिः शुकदेवश्च नितान्त वीतरागो महात्मासीत्। बुद्धिश्च द्विविधा वर्तते—सन्मार्गगामिनी कुमार्गगामिनी चेति। कुब्जा बुद्धेः प्रतीकमास्ते तथा च कंसो-ऽहङ्कारस्य-प्रतीकम्। कः सुखस्य, तथा सः नाशकर्तु रहङ्कारस्य द्योतकौ विद्येते। कुब्जा-रूपिणी बुद्धिः किलाऽहंकाररूपिणं कंसं त्यक्त्वा यावदात्मरूपं श्रीकृष्णं न वृणोति तावत् सा सन्मार्गगामिनी न भवति ।

३—भयम्-भय-त्यागादेव मनोवशे भवितु-मर्हति। भवसिन्धोः पारंजिगमिषोः कृते भयं त्याज्यमेव ।

४—शङ्का-भगवद्भजनादिषु सत्कर्मसु लोका-नाम् प्रवृत्तिर्न भवति। यतो गुरुशास्त्रादिविष-येषु तथा च गृहस्थेन योगाभ्यासो विधेयो नवे-त्यादिषु शङ्का बाधते। अतोऽनुसन्धाय शुभा भावनाः सत्सङ्कल्पांश्च कृत्वाऽग्रे सर्तव्यम्। सत्यमेवोक्तम्-'संशयात्मा विनश्यति।' इति यथा यथा साधकोऽग्रेऽग्रे गतिशीलतामासादयन् भविष्यति तथा तथा संशयो विनंक्ष्यति ।

५—कुलाभिमानः-स हि ब्रह्मत्वं मोक्षं वा नाप्नोति यो हि कुलाभिमानं धत्ते। यथा चन्दन-वृक्षान् सर्वतो वर्तमानाः कङ्कोलनिम्बकुटजादयो वृक्षाश्चापि सर्वे चन्दनमेव भवन्ति परन्तु वंश दण्डाश्चन्दनतां नोपयान्ति स्ववंशाभिमानात्। वंशेषु पर्वग्रन्थयो विवरादयश्च दुर्गुणा भवन्ति ।

६—शीलाभिमानः-स्वचारित्र्याभिमानः शीलसौजन्याभिमानश्च मुमुक्षुणा परिहर्तव्यः ।

७—जुगुप्सानिन्दापाशः-साधुपुरुषाणां पाख-ण्डित्वेन भावनमथवान्येषां निन्दाचरणमपि चैको जटिलोऽस्ति पाशः। सोऽयं पाशोऽपि विवर्ज्यताम्। साधूक्तम् केनचित्—

"यदीच्छसि वशीकर्तुं जगदेकेन कर्मणा ।
परापवादसस्येभ्यो गां चरन्तीं निवारय ॥१॥"
इति ।

८—वित्तशाठ्यम्-धनाभिमानो वित्तशाठ्य-मित्युच्यते। धनगर्वोऽपि च बन्धनकारको महान् पाशोऽस्ति। यावत्प्रभूतं वित्तं स्यात्तावदेव धना-भिमानो विवर्द्धते। ततः सर्वथासौ धनगर्व-स्त्याज्यो मुमुक्षुणा।

एवमेतेषामष्टपाशानां परिवर्जनान्मोक्षो भवति। अतोऽतिरिक्तं दश दुर्गुणाश्चापि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्याज्या भवन्ति मोक्षाप्तये। ते च दुर्गुणाः कायिका वाचिका मानसिकाश्चेति त्रिविधा निरूप्यन्तेऽधस्तात्—

कायिकाः—१-चौरकर्म, २-व्यभिचारः ३-हिंसा चेति। हिंसापि च त्रिविधा भवति-अ-कृता ब-कारिता स-अनुमोदिता चेति।

वाचिकाः—पैशुन्यमम्-परनिन्दा, परापवादो वा परदोषवर्णनं, परच्छिद्रान्वेषणमिति पैशुन्यमुच्यते।

परुषभाषणमर्थात् कठोरवचनोच्चारणम्।
मिथ्याभाषणमनृतवचनोच्चारणम्।
अनावश्यकः प्रलापोऽर्थाद्वृथाभाषणम्।

मानसिकाः—शरीरमेवात्मानं मत्वा व्यवहरणम्। यथा चार्वाकादिभिर्देहात्मवादिभिरपसिद्धान्तितम्—

"यावज्जीवेत् सुखंजीवेद्दणं कृत्वा घृतं पिबेत्।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः ?" इति।

अन्यायेन धन-सञ्चयः।

वधकरणस्य चान्यस्यानिष्टापादने प्रवृत्तिः।

एवमेतेभ्यो दशदोषेभ्योऽष्टपाशेभ्यश्च। पृथक् स्थित्वा सदाचरणान्मनुष्यस्य मनोनिरोधोऽवश्यं भवति।

व्यष्टिबन्धनं तथा च समष्टिबन्धनम्

केचनाचार्या अविद्याया मायाया अज्ञानस्य चैकमेवार्थं व्युत्पादयन्ति परन्तु त्रयाणामप्यमीषामर्थभेदोऽस्ति। व्यष्टेः (व्यक्तेः) बन्धनस्य कारणं खलु अविद्यास्ते तथा समष्टेः (समुदायस्य, समाजस्य वा जातेर्देशस्य राष्ट्रस्य) बन्धनस्य कारणं माया वर्तते। बन्धनयोरनयोर्द्वयोर्विनष्टयोः सतोरेव मनःस्थिरं भवति।

गीता-सारः

सम्पूर्णा गीताऽस्माकं शरीरे घटते। वस्तुतो गीता-कर्म-ज्ञान-भक्तीनां शास्त्रं नास्ति वरञ्च धर्मशास्त्रं विद्यते। धर्मशब्दो धर्मस्य ज्ञानस्य, च बोधनस्य समन्वयोऽस्ति। तदिदं शरीरं राष्ट्रं वर्तते। मनो राजास्ते योऽन्धो धृतराष्ट्रोऽस्ति। दैवीनामासुरीणां च सम्पदां संघर्षः कौरवपाण्डवसङ्घर्षोऽस्ति। तत्रात्मनो विजयो भवति।

सरलो मार्गः

येषामेतेऽष्ट पाशा दशदोषाश्च बुद्धिग्राह्या न भवेयुस्ते परेभ्यो दुःखप्रदानस्य भावनां त्यजेयुस्तदा शीघ्रमेव मनः खल्वेकाग्र भवितुमारभेत। भगवद्रूपनिष्ठापि चैकोऽमोघोऽस्त्युपायो येन मनसि तन्मयता भवति।

उपक्रमोपसंहारादीनां षड्लिङ्गानां मननाद् गुरोः शास्त्राणां च विषयको भ्रमः सन्देहश्च निर्गच्छतः। सर्वैरपि गुरुर्विधेयो विशेषतश्च स्त्रीभिः।

गुरोर्माहात्म्यम्

योऽज्ञानान्धकारं निवर्तयेत् स गुरुरिति शास्त्रोक्तं नास्ति। अथर्ववेदे निरूपितमास्ते—'यो हि संसाररूपं भारं लघूकरोति तथा च यः संसार-सागराच्छिष्यं पारं नेतुमुद्योगं करोति, स गुरुः।' इति। इति। 'गिरति शिष्यो दक्षिणाकरेण गुरुमन्त्रामृतं सिञ्चति स एव गुरुः।' 'गृणाति ब्रह्मतत्त्वमुपदिशति', 'स्वयं जानाति परान् विजानाति', इति। गुरुवत् पतिर्वन्दनीयोऽस्ति, सम्माननीयोऽस्ति, 'पतिरेव गुरुः स्त्रीणाम्' इत्ययमर्थो नास्त्युचितः। यथा मातापितरौ, ब्राह्मणादयो भवन्ति पूज्यास्तथैव पतिरपि पूज्यो भवति स्त्रियः। परन्तु शब्दानामर्थविधाने प्राचुर्यावधारणयोस्तथा चाप्यर्थसमुच्चयादिभ्य 'एव' कारस्य तृतीयोऽर्थ एवात्र समीचीनो भवति। भवसागरात्तरणार्थं गुरुर्विधेयः। पत्यौ तत्सामर्थ्यं नास्ते।

—अनु० गणेशरामशर्मा झालावाडः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपयोगी लघुकथा

श्रीगिरिराजशर्मा शास्त्री, जयपुरम्

श्रीशंकराचार्यः—केरलस्थ-कोचीनमण्डलान्तर्गतः कालटीति नामको ग्रामो वर्तते । तत्र ईस्वीये ७७८ सम्बत्सरे वैशाखशुक्लपञ्चम्यां तिथौ नम्बूद्रीब्राह्मणकुले आद्यशङ्कराचार्यस्याविर्भावोऽभूत् । नम्बूद्रीब्राह्मणकुलमिदं वैदिकसंस्कृत्यै विशुद्धचारित्र्याय च प्रसिद्धमस्ति । श्रीशंकराचार्यस्य पिता 'शिवगुरु' माता च आर्याम्बा आसीत् । तेन च स्वस्यायुषः षोडशे वर्षे चतुर्वेदानां तथा अन्येषां च तत्कालीनानां शास्त्राणां दर्शनानां चाध्ययनं समाप्ति नीतम् ।

श्रीगोविन्दभगवत्पूज्यपादेतिशब्देषु तेन श्रीशङ्कराचार्येण स्वपूज्यगुरुदेवस्य स्वग्रन्थेषु निर्देशः कृतः । अध्ययनसमाप्तेरनन्तरं स वेदविरुद्धानां पाखण्डपूर्णमतानां खण्डनार्थं सम्पूर्णभारतवर्षस्य च परिभ्रमणमकरोत् । अस्मात् पूर्वविख्यातेन मीमांसकेन श्रीकुभारिलभट्टेन अवैदिकानां मतानां खण्डनस्थ कार्यं कृतमासीत् । श्रीशङ्कराचार्येण कर्मकाण्डवादस्य ज्ञानकर्मसमुच्चयवादस्य अन्येषामपि च सर्वेषां युक्तिहीनानां वादानां तथा बेद्ध-जैनादि-वेदप्रतिकूलमतानां स्वयुक्तिवादैः खण्डनं सम्पाद्य वैदिकज्ञानमार्गः संस्थापितः । तेन निजसिद्धान्तानां प्रतिपादनं गीता-ब्रह्मसूत्रेश-केन-कठाद्युपनिषत्सु अलौकिकं भाष्यग्रन्थं रचयित्वा-कृतम् ।

'ब्रह्मसत्यं जगन्मिथ्या' जीवो ब्रह्मैव नापरः इत्येवं रज्जुविषये अज्ञानात् भासमानः सर्प इव जगन्मिथ्या अस्ति । शरीरे व्यक्तश्चैतन्यांशो जीव

श्री शङ्कराचार्य—केरल के कोचीन प्रान्त में कालटी नामक एक ग्राम है । वहाँ ७७८ ई० सन् में वैशाख शुक्ल पञ्चमी तिथि को नम्बूद्री ब्राह्मण कुल में आद्य शङ्कराचार्य का प्रादुर्भाव हुआ था । यह नम्बूद्री-ब्राह्मण परिवार वैदिक संस्कृति के लिए तथा विशुद्ध चरित्र के लिए प्रसिद्ध है । श्रीशङ्कराचाय के पिता 'शिवगुरु' तथा माता आर्याम्बा थी । तथा उन शङ्कराचार्य ने अपनी आयु के १६वें वर्ष में चारों वेदों का तथा अन्य तत्कालीन शास्त्रों का एवं दर्शन शास्त्रों का अध्ययन समाप्त कर लिया था ।

'श्री गोविन्दभगवत्पूज्यपाद' शब्दों में उन्होंने अपने पूज्य गुरुदेव का अपने ग्रन्थों में निर्देश किया है । अध्ययन समाप्ति के अन्त में उन्होंने वेद विरुद्ध पाखण्डपूर्ण मतों का खण्डन करने के लिए सम्पूर्ण भारतवर्ष का भ्रमण किया । इनके पूर्व विख्यात मीमांसक श्रीकुमारिलभट्ट ने अवैदिक मतों के खण्डन का कार्य किया था । श्री शङ्कराचार्य ने कर्म-काण्डवाद, ज्ञानकर्म-समुच्चयवाद और अन्य सभी युक्तिहीन वादों का तथा बौद्ध-जैन आदिकों के वेदप्रतिकूल मतों का अपनी युक्तियों के द्वारा खण्डन करके वैदिक ज्ञानमार्ग की स्थापना की । अपने सिद्धान्तों का प्रतिपादन-गीता, ब्रह्मसूत्र, ईश, केन, कठ आदि उपनिषदों पर अलौकिक भाष्यग्रन्थ लिखकर-शङ्कराचार्य ने किया ।

ब्रह्म ही सत्य है, जगत् रज्जू में भासमान सर्प के समान मिथ्या है । जीव (शरीर में व्यक्त

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एव ब्रह्म अर्थात् सच्चिदानन्दस्वरूपोऽस्तीति प्रतिपादितम् । अस्मिन् वाक्ये श्रीशङ्कराचार्यस्य तत्त्वज्ञानं संक्षेपेण प्रतिपादितमस्ति ।

ततः श्रीशङ्कराचार्येण दक्षिणभागे शृङ्गेरीमठं, पश्चिमे द्वारकापीठं उत्तरभागे बद्रिकाश्रमपीठं, पूर्वभागे च जगन्नाथपुरीपीठं संस्थाप्य एषु चतुर्षु वैदिकधर्मपीठेषु स्वस्य चतुर्णां शिष्याणां प्रतिष्ठापना कृता (स्मरणं भवेत्-यद् इदानीं जगन्नाथपुरीपीठे श्रीशङ्कराचार्य-निरञ्जनदेवतीर्थस्वामिनो विराजन्ते) एतेषां पीठादेशानां परिपालनं वैदिकधर्माभिमानी समग्रो हिन्दूसमाजः विगतशताब्दीभ्यः शिरोधार्यं मन्यते ।

वैदिकधर्मस्य प्रतिष्ठापनाया इदम् अद्वितीयं कार्यं ३२ द्वात्रिंशद्वर्षात्मके स्वल्पतम आयुषि सम्पूर्णं विधाय अन्ते श्रीशङ्कराचार्यो हिमालये गुहां प्रविश्यावतारसमाप्तिं कृतवान् ।

होने वाला चैतन्यांश) ब्रह्म याने सच्चिदानन्द-स्वरूप है । इस वाक्य में श्री शङ्कराचार्य का तत्त्वज्ञान संक्षेप से प्रतिपादित किया गया है ।

दक्षिण में शृंगेरीमठ, पश्चिम में द्वारकापीठ, उत्तर में बद्रीकाश्रमपीठ और पूर्व में जगन्नाथ-पुरीपीठ को स्थापित करके शङ्कराचार्य ने इन चारों वैदिक धर्मपीठों पर अपने चार शिष्यों की प्रतिष्ठा की थी (स्मरण रहे—इस समय जगन्नाथपुरीपीठ पर श्रीशङ्कराचार्य निरञ्जन-देवतीर्थस्वामी विराते हैं) । इन पीठों के आदेशों का पालन करना वैदिकधर्माभिमानी सारा हिन्दूसमाज सदियों से शिरोधार्य मनता है ।

वैदिक धर्ममत की प्रतिष्ठापना का यह अद्वितीय कार्य ३२ साल की अल्प आयु में पूर्ण कर अन्त में श्रीशङ्कराचार्य ने हिमालय में गुफाप्रवेश कर अवतार समाप्ति की ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वर्गीय-श्रीयुगलकिशोरविरलामहोदयस्य

चित्रावलि-परिचयः

यशोधन्यो धनी धीरः प्रसन्नमुखमण्डलः।
श्रीयुगलकिशोरोऽयं दानवीरो निरीक्ष्यताम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



श्रीयुगलकिशोरोऽयं मध्येऽस्ति पुत्रपौत्रयोः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिल्ल्यां विरलामन्दिरोद्याने लङ्कायाः सांस्कृतिकमण्डलस्य प्रतिनिध्योर्मध्ये
श्रेष्ठो श्रीयुगलकिशोरमहोदयः

श्रीयुगलकिशोरविरलामहोदयः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

श्रीयुगलकिशोरः स चित्रेऽत्र त्रिदिवंगतः। सभायां जैनसाधूनां भाषमाणो विलोक्यताम् ॥

Digitized by Arya Samaj Foundation Chennai and eGangotri



वीरगतिं प्राप्तवतां भारतीयवीराणां कृते श्रद्धाञ्जलिमर्पयितुं समयोजिते
गुरुग्रन्थसाहबस्याखण्डपाठे भाषमाण: श्रीविरलामहोदय:

धन्य: श्रेष्ठिवरश्रिमत्रे श्रीविरलामहोदय:,
स्वस्य व्यायामशालायाः व्यायामप्रतियोगिता-
जये लब्धपुरस्कारैर्मल्लै: सार्धं विराजन्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मदनलाल आनन्दः श्रीमान् वामेऽत्र वर्तते,
संलपन् दक्षिणे श्रीमान् सिन्हा सत्यनारायणः ।
मध्येऽयं दृश्यतां श्रेष्ठी श्रीविरलामहोदयः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिल्ल्यामेकत्र सांस्कृतिकसमारोहे तदानीन्तन–लोकसभाध्यक्ष–सरदारश्रीहुकुमसिंह–केन्द्रीयमन्त्रि–श्रीसत्यनारायणसिंहमहोदयाभ्यां श्रद्धोपहारमर्पयन् श्रीविरलामहोदयः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जनतोपकृतिं कृत्वा दत्त्वा दानं यशोऽमलम् ।
विस्तार्य, विरलाश्रेष्ठी चिरनिद्रामवाप्तवान् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

(देवानुद्दिश्य)

आशुकवि-श्रीहरिशास्त्री, सम्पादकः

मातरः पितरो गावो
विज्ञाः सन्तश्च साधवः ।
आचार्या गुरवश्चेति
देवा शास्त्रेषु कीर्तिताः ॥१॥

माता पिता गौ विशिष्टविद्वान् सन्त साधु आचार्य गुरु इन्हें शास्त्रों में देव कहा है ॥१॥

इमे देवा हि भूस्थाना
दिविष्ठा वृत्रहादयः ।
ते विलम्बोपकर्तिनो
ह्येते चाशुप्रसादनाः ॥२॥

ये देव पृथ्वी पर रहने वाले हैं। स्वर्ग में रहने वाले इन्द्रादि देव हैं। वे विलम्ब से प्रसन्न होते हैं ये देव शीघ्र ही प्रसन्न हो उपकार कर देते हैं ॥२॥

इमान्देवान् मनुष्यो यो
विधिना सेवनादिभिः ।
उपाचरेत्तस्य सर्वाः
वशमायान्ति सिद्धयः ॥३॥

इन देवों का जो जन विधान पूर्वक सेवा से उपाचरण करता है, उसके सभी सिद्धियां वश में हो जाती हैं ॥३॥

एतान्प्रसादयन्तो हि
जना विद्यां यशो बलम् ।
धनमायुश्च विख्याति
लभन्ते स्वास्थ्य मप्यहो ॥४॥

इन भूस्थान देवों को प्रसन्न करने वाले मनुष्यों को विद्या, यश, बल, धन आयु और ख्याति (प्रतिष्ठा) तथा नैरोग्य भी प्राप्त होता है इसमें सन्देह नहीं है ॥४॥

तस्मादेतान्सुरान्मत्वा
सेवन्तां सर्वशो जनाः ।
तेन स्वस्वाभीप्सितानि
लप्स्यन्त इति मे मतम् ॥५॥

इसलिए इनको देव मानकर सभी लोग पूजें ध्यावें सेवें तो सभी को सर्व अभीष्ट लाभ होगा। ऐसा मेरा निश्चित मत है ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. No. J 7
Licence No. PP. 6
"Licenced to Post.
Without Prepayment"

एक राष्ट्रीय उत्पादन

३५००० से अधिक श्रमिकों को काम देने वाला

श्रेष्ठतम सामग्रियों से निर्मित

मैंगलूर

गणेश बीड़ियां

धूम्रपान करने वालों की अति प्रिय

प्रधान कार्यालय

मैंगलूर गणेश बीड़ी वर्क्स

विनोबा रोड़ : मैसूर–५

दूरभाष : ४२१

तार : AROMA

प्रकाशक:—जयबहादुरसिंह पता: भारती भवन, गोपालजी का रास्ता, जयपुर। दूरभाष: ७५४९६
राधेश्याम शर्मा द्वारा श्री हनुमान प्रि० प्रेस, चौड़ा रास्ता, जयपुर में मुद्रित। फोन: ६३१५८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतमासिकस्य

२५-६-६९
पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

...मुसंस्कृतिरक्षकोऽयं खड्गे न खण्डितखरोग्रतरप्रतापः ।
...नीतिपटुः प्रवीरो धीरश्चिरं विजयतां शिवराजवीरः ॥

वार्षिकमूल्यं सप्तमुद्राः ७.००

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

एकप्रतेः सप्ततिपणाः ०.७०

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान–मध्यप्रदेश–गुजरात–महाराष्ट्र–मद्रास–आंध्र–उत्तरप्रदेश–
बिहार–पञ्चनद–सर्वकारैः स्वीकृता—

विषय-सूची

क्र० सं०	लेखाः	लेखकाः	पृष्ठसंख्या
१.	मङ्गलम्	आशुकवि–श्रीहरिशास्त्री, जयपुरम्	२६९
२.	अष्टाध्याय्यां प्रयुक्ता इच्छार्थकाः केचन शब्दाः	श्रीजानकीप्रसादद्विवेदः वाराणसी	२७०
३.	श्रीजाकिरहुसैनो दिवंगतः	दीनानाथत्रिवेदी मधुपः, सहसम्पादकः	२७७
४.	शिबिका	अनु० कालूरि-श्रीहनुमन्तरावः, हैदराबादः	२८०
५.	कलिकौतुकम्	आचार्य–श्रीविश्वनाथमिश्रः, बीकानेरः	२८१
६.	कालिदासस्य काव्यकौशलम्	श्रीशङ्करसिंहझाला, जयपुरम्	२८३
७.	रससिद्धान्तपरिशीलनम्	कालूरि–श्रीहनुमन्तरावः, हैदराबादः	२८७
८.	श्रीलक्ष्मणशास्त्रिणां जीवनचरितं तत्काव्यानि च	श्रीरत्नलालमिश्रः, नागौरः	२८९
९.	मनोविनोदकणिका	मधुपः, जयपुरम्	२९१
१०.	महात्मा गान्धिर्गोरक्षा च	श्रीगणेशरामशर्मा डूंगरपुरम्	२९३
११.	पिपासाया मरुभूमौ महाकविः शेली	अनु० गणेशरामशर्मा डूंगरपुरम्	२९८
१२.	अथ श्रीशिवराज्योदये महाकाव्ये, ३९तमः सर्गः	महाकविः डॉ० श्रीधरभास्करवर्णेकरः, नागपुरम्	३००
१३.	सम्पादकीयम्	'मधुपः' सहसम्पादकः	३०५
१४.	दुर्गासप्तशती	श्रीहरिशास्त्री, सम्पादकः	३१०
१५.	लघुकथा	श्रीगिरिराजशर्मा शास्त्री, जयपुरम्	३१४
१६.	कः किं जानाति	श्रीराधेश्यामशास्त्री भिवानी	३१८
१७.	सूक्तिसुधा	आशुकवि–श्रीहरिशास्त्री, सम्पादकः	३१९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः
आशुकवि-कविभूषण-
श्रीहरिशास्त्री

सहसम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
साहित्यालङ्कारः

भारती

प्रबन्धसम्पादकः
सहसम्पादकश्च
गिरिराजशर्मा

भारती-भवनम्,
गोपालजी का रास्ता,
जयपुरम्

लेखैरुपष्टुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

वर्षम् १९ | ज्येष्ठः, विक्रमाब्दः २०२६ (मई जून, १९६९) | अङ्कः ८

मङ्गलम्

आशुकवि-श्रीहरिशास्त्री, सम्पादकः

या पञ्चदेवमयसुन्दरपीठनिष्ठा
सौन्दर्यसिन्धुरमलाब्जदलायताक्षी ।
बालारुणद्युतिरुदग्रदयैकराशिः,
श्रीसुन्दरी प्रदिशतान्मम सुप्रभातम् ॥१॥

मासावतरणम्

प्रालेयाचलपत्तनानि बहुधा नैनीमसूर्यादिका—
न्यूष्मत्रस्ततनूञ्जनान्धनवतस्तूर्णं समासादयन् ।
हर्म्याणामपि पृष्ठकेषु निशि च प्रस्वापयन्मानवान्
मासोऽयं सलिलावगाहसुभगो ज्येष्ठाभिधः प्राप्तवान् ॥१॥

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अष्टाध्याय्यां प्रयुक्ता इच्छार्थकाः केचन शब्दाः

जानकीप्रसादद्विवेदः, व्या० आ०, विद्यावारिधिः पी एच्०डी०, वा० सं० विद्यालयः, वाराणसी-२

[प्रस्तुतेऽत्र लेखे विद्वद्वरेण श्रीद्विवेदमहोदयेन सामान्यविशेषेच्छावाचकानां शब्दानां विषये यो विचारः समुपस्थापितः, स नूनं मननार्हः पठनार्हश्च वर्तते। किञ्च लेखोऽयं विदुषां मनोविनोदाय तथा व्याकरणमधीयानानां विद्यार्थिनाञ्च महते लाभायाप्यलं भविष्यतीति। सहैव एतदपि सविनयं निवद्यते यदेवमेव सर्वेऽपि संस्कृतपण्डिता भवन्तः समये-समयेऽवश्यं लेखसामग्रीमुचितां भारत्यां प्रकाशनार्थं प्रेषयन्त्विति—मधुपः]

अष्टाध्याय्यां महर्षिपाणिनिनाऽनेकेभ्यः शब्देभ्यः इच्छार्थे नानाप्रत्ययाः कृताः। केचन सामान्येच्छार्थे केचन च विशेषेच्छार्थे। इच्छा क्वचिच्छब्दोच्चारणेन विज्ञायते क्वचिच्च कार्येण परिलक्ष्यते, साऽपि कस्यचित् पुरुषस्य बलवती भवति कस्यचिच्च सामान्यरूपैव, अत्र किञ्चिदेतादृशं कारणं भवति येनेच्छायां प्रकर्षोऽपकर्षश्च जायते। तच्च कारणं स्वभाव एवेति वक्तुं शक्यते।

प्रकृतेर्जायमानमिदं विश्वं स्वप्रकृत्यनुरूपमेव तत्तद्विषयिणीमिच्छां क्रियाञ्च निर्वर्त्तयति, तदुच्यते—

"सदृशं चेष्टते स्वस्याः प्रकृते र्ज्ञानवानपि"—
(श्रीमद्भग० ३।३३) इति।

ज्ञानेच्छाक्रियारूपेण क्रमेण पूर्वं ज्ञानं तदन्विच्छा तदनन्तरञ्च कृतिर्जायते इत्यवगम्यते इच्छा=भावः सङ्कल्पो वा। बुद्धीन्द्रियाणां कर्मेन्द्रियाणाञ्च या हि प्रवृत्तिर्भवति सैवेच्छेति कथ्यते। सा च मनसः संयोगेनाऽभिव्यज्यते इतीच्छाधिष्ठानं मन उच्यते। एवमिन्द्रियाणां प्रवृत्तिभेदादिच्छाऽनेकविधा जायते। क्वचित् सा फलविषयिणी क्वचिच्चोपायविषयिणी दृश्यते। दुःखस्यात्मप्रतिकूलरूपत्वान्न दृश्यते कस्यचिद्दुःखविषयिणीच्छा किञ्च सुखविषयिणी दुःखाऽभावविषयिणी चेति। यथाऽध्ययनेन सुखमनुभूय यदि कश्चिद् विद्वानन्यमुपदिशति—अध्ययनेन यज्ज्ञानमुत्पद्यते तेन निरतिशयं सुखमुपलभ्यते इति, तच्छ्रुत्वा सोऽध्ययनजन्यसुखस्य ज्ञानं करोति, तदनन्तरमिच्छति-अध्ययनजन्यसुखं मया प्रापणीयमिति। निरन्तरं दुःखमनुभवन् यदि कश्चित् प्राणी ततः पूर्वं सुखमनुभूतवान् ज्ञातवान् वा तदा स दुःखनिराकरणायेच्छति। अयमाशयः—फलेच्छां प्रति फलज्ञानं कारणम्, फलज्ञानाऽभावे च न तद्विषयिणीच्छा जायते। उक्तञ्च—

'निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते'
(भाषापरि०, का० १४६) इति।

फलप्राप्तये इच्छां विधाय तत्फलप्राप्तौ यानि साधनानि (उपायाः) अपेक्ष्यन्ते तद्विषयिणीच्छा क्रियते सा च तदैव सम्भवति यदि पूर्वमिदं ज्ञानं निश्चयो वा स्यात्-अनेनोपायेनेष्टसिद्धिरवश्यं निष्पत्स्यते इति। तदुच्यते—

'इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि'
(भाषापरि०, का० १४६) इति।

या हीच्छा प्रवृत्तिरूपा भवति सा चिकीर्षेति नाम्ना व्यवह्रियते। प्रवृत्ति र्न कस्यचित् प्रतिकूलफले प्रसज्यते, प्रतिकूलता च द्वेषभावेन विज्ञायते इति चिकीर्षायां प्रतिकूलफलज्ञानं प्रतिबन्धकमुच्यते। यथा—मधुविषसम्पृक्तान्नभोजने न कस्यचिच्चिकीर्षा दृश्यते। यथोच्यते—

'बलवद्द्विष्टहेतुत्वमतिः स्यात् प्रतिबन्धिका'
(भाषापरि०, का० १४८) इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवमिच्छाविषये किञ्चिदुक्त्वा इच्छायाः स्वभावानुकूलत्वात् 'स्वभावो मूर्ध्नि वर्तते' इति व्याहृतिमनुस्मरतार्थनिर्धारणं शब्दस्वभावादेव क्रियते इति हेतोश्चेहाऽष्टाध्याय्यां प्रयुक्तानां स्वभावद्योतकानामिच्छार्थकानां केषाञ्चिच्छब्दानां संक्षेपेण विचारः प्रस्तोष्यते। तत्र यद्यपि प्रशंसा-पूजार्थाभिधायिनां शब्दानां विचारो नितान्तमपेक्ष्यते तथापि "पाणिनीय-व्याकरण का अनुशीलन" इत्याख्ये ग्रन्थे श्रीरामशङ्करभट्टाचार्यैस्तच्छब्दानां वस्तुतत्त्व-परीक्षणपुरःसरं यादृशो यावांश्च रमणीयो विचारः प्रस्तुतस्ततोऽधिकं विचारं कर्तुमात्मानं नितान्तमसमर्थं मन्यमानेन तदीयो विचारः परित्यक्तः, जिज्ञासुभिस्तत्रैव द्रष्टव्यम्।

लेखेऽस्मिन् सर्वप्रथमं स्वभावार्थकः 'शील' शब्दो विचारितः, तदनु इच्छार्थकानां शब्दानामुपन्यासः कृतस्तत्र भागत्रयं वर्तते। केचन शब्दाः सामान्येच्छाभिधायिनः, यथा—इच्छा, मतिः, कामः, कामप्रवेदनम्, आशंसा, श्रद्धाप्रतीघातश्च। इतरे एतादृशा यत्रेच्छाया निर्धारणे सत्यपि विषयस्याऽनिर्धारणमेव दृश्यते, यथा—ईप्सा, लिप्सा, वीप्सा, ज्ञीप्सा, परीप्सा, आचिख्यासा, अनुज्ञैषणा, सम्मतिः, प्रलम्भनञ्च। अपरे चैतादृशा यत्रेच्छायां विषयस्यापि निर्धारणं कर्तुं शक्यते, यथा—हर्षः प्रहासः, प्रीतिः, आलेखनम्, अपह्नवः, प्रसहनम्, शालीनीकरणञ्चेति।

शीलम्

शीलम्=स्वभावः। यादृशो यस्य स्वभावो भवति स तादृशमेवेच्छति, इच्छानुरूपमेव कार्यञ्च करोति, उच्यते चाऽपि—

"सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि" (श्रीमद्भग० ३.३३) इति।

यथा यस्य धर्मकार्ये विशेषतः प्रवृत्तिर्दृश्यते तत्रेदमनुमीयते तस्य स्वभाव एवैतादृशो यो हि धर्मकार्यकरणाय पुरुषं प्रेरयति। एवमेव कश्चिदलङ्कारप्रियः कश्चिच्च भोजनप्रियो भवति यो ह्यावश्यकमपि कार्यं परिहायाऽलङ्कारैरात्मानं भूषयितुं प्रवर्तते, भोजनार्थमेव सततं चेष्टते च। महर्षिपाणिनिनाऽनेके एतादृशा अपि तद्धित-प्रत्ययाः कृत्प्रत्ययाश्च कृता यैरपूपभक्षणादेः पुरुषस्य शीलं (=स्वभावः) परिज्ञायते। यथा—'आपूपिकः' (अपूपभक्षणं शीलमस्य) इत्यत्र ठक् प्रत्ययः, 'छात्रः' इत्यत्र णप्रत्ययः (छत्रं शीलमस्य, छादनावरणाच्छत्रम्, गुरुकार्येष्ववहितस्तच्छिद्रावरणप्रवृत्तश्छत्रशीलः शिष्यश्छात्रः—काशिकावृत्तिः ४।४।६२), 'अलङ्करिष्णु' रित्यत्र इष्णुच् प्रत्ययः, 'जिष्णुः' इत्यत्र क्स्नुप्रत्ययः, शमी, प्रमादी, उन्मादीत्यादौ घिनुण्प्रत्ययः, 'निन्दकः' इत्यत्र वुञ् प्रत्ययः, 'श्रद्धालुः' इत्यत्र आलुच् प्रत्ययः, 'जागरूकः' इत्यत्र ऊकप्रत्ययः, 'भीरुः' इत्यत्र क्रुकन्प्रत्ययः, 'यायावरः' इत्यत्र वरच् प्रत्ययः, एवमन्येऽपि सूत्रेषु विज्ञेयाः।

सामान्येच्छार्थाभिधायकाः शब्दाः

१. इच्छा—इच्छार्थकात्तौदादिकाद् 'इषु' धातोर्भावे शप्रत्यये यगभावे च निपातिते इच्छा शब्दो निष्पद्यते। इच्छाया इष्टाऽनिष्टविषयात्मकत्वाद् द्वैविध्यमवगम्यते। यद्यपीच्छा चेतनेषु वर्तते तथापि कूलं पिपतिषतीत्यादिप्रयोगदर्शनादचेतनवृत्तिरपि सा दृश्यते। वार्त्तिककारेणाऽऽशङ्कार्थे सन् प्रत्ययो निर्दिष्टः, महाभाष्यकारेणेच्छायाः प्रवृत्तित उपलब्धिमङ्गीकुर्वता यदुक्तं तेन कूलस्य पतनेच्छा विज्ञायते, यथा—

"योऽप्यसौ कटं चिकीर्षुर्भवति नासावाघोषयति—कटं करिष्यामीति। किन्तर्हि ? सन्नद्धं रज्जुकीलकपूलपाणिं दृष्ट्वा तत इच्छा गम्यते। कूलस्यापि पिपतिषतो लोष्टाः शीर्यन्ते भिदोपजायते, देशाद्देशान्तरमुपसङ्क्रामति" (म० भा० ३।१।७) इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयं भावः—यदि वचसा स्वीयभावस्य प्रकाशनेनैवेच्छाया अवगमः स्यात्तदैव नियमत इच्छा चेतनवृत्तिरिति वक्तुं युज्यते, परं क्वचित् कार्येणापीच्छाऽनुमीयते। यथा-कस्यचिद् ग्रन्थस्य विपरिवर्तनमाचरन्तं छात्रं दूरत एव संवीक्ष्य तेन वचसाऽप्रकाशितायामप्यध्ययनेच्छायां दर्शकोऽनुमिनोति—नूनमयमध्ययनं कामयते इति। कार्यन्तु अचेतनेष्वपि दृश्यते, तेन कूले स्वस्थानं परित्यज्येतस्ततः प्रकीर्णान् लोष्टानवलोक्य प्राकृतोऽपि जनोऽनुमातुं शक्नोति—कूलमिदं पतितुमिच्छतीति। अनुमातरि कूलपतनस्याशङ्का (सम्भावना) जायते, आशङ्कायाः प्रयोक्तृधर्मत्वात्। तथा कूलस्य पतनेच्छा विज्ञायते।

'कंसकाः' (कंस इव प्रतिकृतयः) सर्पन्ति, ऋषिः (=वेदः) पठति, 'शृणोत ग्रावाणः' इत्यादिप्रयोगदर्शनेन कंसकाद्यचेतनेषु पदार्थेषु सर्पणादिक्रियाया असम्भवात् सर्वेषामपि पदार्थानां चैतन्यमङ्गीक्रियते, अन्यथा उक्तप्रयोगा न स्युः। तदवस्थायां कूलादेरपि चेतनावत्त्वादिच्छा चेतनवृत्तिरिति कथनं न दोषावहम्। महर्षिपाणिनिना इच्छार्थे सन्नादयः प्रत्यया विहिताः—"धातोः कर्मणः समानकर्तृकादिच्छायां वा" (अ० ३।१।७) इत्यादिसूत्रैः। यथा-कर्तुमिच्छति चिकीर्षतीत्यादि।

अर्थबोधार्थमेव शब्दस्य प्रयोगः क्रियते, यथोक्तं भाष्यकारेण—

"अर्थं सम्प्रत्याययिष्यामीति शब्दः प्रयुज्यते" (म० भा ३।१।७) इति। अत एकदा यस्मिन्निच्छार्थे सन्प्रत्ययः कृतस्तदर्थे एव सन्प्रत्ययः पुनर्न विधीयते, तेन चिकीर्षितुमिच्छतीत्यर्थे सनोऽभावः। अयं भावः—एकेन प्रत्ययेन योऽर्थ उक्तस्तदर्थस्यैव बोधनाय पुनः प्रत्ययकरणं नोपयुज्यते—उक्तार्थानामप्रयोगात् तदुच्यते—"सन्नन्तान्न सनिष्यते" इति। सन्नन्तात् सरूपः सन्प्रत्ययो नेष्यते इत्यन्वयः। सारूप्यशब्देनात्र सादृश्यं गृह्यते, सादृश्यञ्चार्थद्वारकमितीच्छासनन्तादिच्छासन्न भवतीत्यर्थो गम्यते। तेन स्वार्थे यः सन् क्रियते तदन्तादिच्छार्थकः सन्प्रत्ययो भवत्येव, यथा—जुगुप्सिषते, मीमांसिषते इति।

अत्राशङ्क्यते—'इषु' धातुरिच्छार्थकस्तस्मादिच्छार्थे सन्प्रत्ययो नावश्यकः—इच्छाया इच्छा न भवतीत्यनुभसिद्धत्वात्। तत्रोदीर्यते-कश्चिदालस्याद्युपहतोऽध्ययनादिविषयामिच्छामेवेच्छति, तदभिप्रायेणेच्छार्थकाद् 'इषु' धातोः सन् क्रियते एव-एषितुमिच्छति एषिषिषतीति।

इदमपि विचार्यते—यो हि ग्राममेव गन्तुमीहते तस्य ग्रामो गमनञ्चेत्युभयमपीप्सितम्, तेन गमनकर्तुरिच्छाया उभयमेव कर्म सम्पद्यते, ग्रामो गमनञ्चेति। एवं ग्रामस्येषेः कर्मत्वेन गतिकर्मत्वाभावाद् "गत्यर्थकर्मणि द्वितीया-चतुर्थ्यौ चेष्टायामनध्वनि" (अ० २।३।१२) इत्यस्याप्रवृत्तौ ग्रामं गच्छति, ग्रामाय गच्छतीत्युभयं रूपं साधुतां नोपेयात्। एवमपि दृश्यते कश्चिद् गमनमेवेहते तच्च ग्रामे एव स्यादिति नाऽपेक्षते, तेन यदीषेः कर्म गमनं गमनस्य च कर्म ग्राम इति स्वीक्रियेत तह्युक्तप्रयोगे दोषनिरासः स्यात्, परम्—'इष्यते ग्रामो गन्तुम्' इत्यत्र 'इषु' धातोर्जायमानेन लकारेण ग्रामो नाऽभिहितो भवति, तस्मात्तत्र प्रथमा कर्त्तुं न शक्यते इति तत्रेष्टस्य प्रथमा-विधानस्योपपादनाय ग्रामो गमेः कर्म इति स्वीकरणीयम्। सामान्यतस्तु इषेरेवोभयं कर्मेति ध्येयम्।

कर्तुमिच्छतीत्यस्य योऽर्थः 'किञ्चित्कार्यं विधातुं कामयते' इत्येवंरूपस्तस्य 'इच्छन् करोति' इति वाक्यस्याऽर्थेन सह साम्याऽभावान्न तत्र सन्प्रत्ययो जायते। कर्तुमिच्छतीत्यर्थे इच्छन् करोतीति लोके न प्रयुज्यते।

२. मतिः— "मति-बुद्धि-पूजार्थेभ्यश्च" (अ० ३।२।१८८) इति सूत्रे महर्षिपाणिनिना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मतिशब्द इच्छार्थकः प्रयुक्तः। यथा-राज्ञां मत इति, राज्ञामिष्ट इत्यर्थः।

"अस्ति-नास्ति-दिष्टं मतिः" (अ० ४।४।६०) इत्यत्र मतिशब्देन विचारपूर्विका बुद्धिरित्यर्थो गृह्यते। यद्यपि सर्वेषामेव चेतनप्राणिनां सा यत्किञ्चिद्विषयात्मिका भवितुं शक्यते, तथाप्यत्र परलोकस्य दैवस्य च विषये मतिशब्दो व्यवहृत इति वेदितव्यम्। यथा-आस्तिकः, नास्तिकः, दैष्टिक इति। अत्रोच्यते व्याख्याकारैः—मतेः सत्तामात्रमत्र नावगन्तव्यम्, चौरेऽपि मतेः सत्वात् सोऽप्यास्तिकशब्देन व्यवहार्यः स्यात्, किञ्च नास्तिकशब्देनाऽचेतनस्तृणादिरिति। तस्मात् परलोकोऽस्तीति यस्य मतिरस्ति स आस्तिकः, तद्विपरीतो नास्तिकः, दिष्टम्=दैवम्, तद्विषया मतिर्यस्य स दैष्टिक इति लोके यदर्थे एषां शब्दानां प्रसिद्धिस्तदर्थे एव प्रत्ययो भवतीति बोध्यम्।

३. कामः—'कमु' धातोर्भावे घञ्। कामः, इच्छा, अभिलाष इत्यनर्थान्तरम्। यथा काशिकाकारेणोक्तम्—

"इच्छामि भुञ्जीत भवान्, इच्छामि भुङ्क्तां भवान्, कामये, प्रार्थये" (काशिकावृत्ति ३।३।१५७) इति। एतेन यद्यपि काम इच्छैव तथापि तत्रेच्छायाः प्रकर्षोऽपेक्ष्यते। विशेषपदार्थविषयिणी या इच्छा सा कामशब्देन कामनाशब्देन वा व्यवह्रियते पाणिनिनाऽप्युक्तम्—

"धन-हिरण्यात् कामे" (अ० ५।२।६५) इति।

यथा—धनको देवदत्तस्य, हिरण्यको देवदत्तस्येति। अत्र कामार्थे धन-हिरण्यशब्दाभ्यां कन्प्रत्ययो जायते। सूत्रेऽस्मिन् कामशब्देन इच्छाया एवाभिधानं न तु कामयते यः स काम इति कामयितृवाचकस्य। न खलु 'धनको देवदत्तः' इत्यादि प्रयुज्यते, तेन धनकामोऽस्येत्यर्थे कन्प्रत्ययो नोपपद्यते इति महाभाष्यकारादयः।

कामत्रत्यर्थे कामशब्दः "वत्सांसाभ्यां कामबले" (अ० ५।२।९८) इति सूत्रे प्रयुक्तः। यथा—वत्सलः स्वामीति। स्नेहवानित्यर्थः। अयमर्थो लच्प्रत्ययेनैव विवक्षितो न तु मतुप्प्रत्ययेन, तेन 'वत्सवती गौः' इत्यत्र तदर्थाऽभावो गृह्यते।

४. कामप्रवेदनम्—कामः=स्वाभिप्रायः, इच्छा, अभिलाषो वा, तस्य यत् प्रवेदनं प्रकाशनं तत् कामप्रवेदनमित्युदीर्यते। अत्रापि कामशब्देन बलवतीच्छा बोध्यते। तस्याश्च प्रकाशनं कामार्थकशब्दस्य प्रयोगेणैव कर्तुं शक्यते। पाणिनिनोक्तम्—

"कामप्रवेदनेऽकच्चिति" (अ० ३।३।१५३) इति।

यथा—कामो मे भुञ्जीत भवान्, अभिलाषो मे भुञ्जीत भवान् इत्यादि। यत्र कर्त्ता स्वयमिच्छार्थकशब्दान् प्रयुङ्क्ते तत्र स्वाभिप्रायस्य प्रकाशकमेवावगम्यते, यत्र स्वयं न प्रयुङ्क्ते तत्र स्वाभिप्रायस्य प्रकाशनाऽभावान्निर्दिष्टविधिर्नोपपद्यते। यथा-इच्छन् करोतीत्यादौ लिङ्लोटोर्विधानं मा भूदित्येतदर्थं वार्त्तिककारो ब्रूते—

"कामप्रवेदनं चेत्" (म०भा० ३।३।१५७वा०) इति।

मन्ये प्रयोक्तुर्यत् स्वाभिप्रायस्य प्रकाशनं तस्य विधिरूपत्वादेव लिङ्प्रत्ययस्य विधानं क्रियते। कच्चिच्छब्दस्य प्रयोगे तु स्वाभिप्रायस्य प्रकाशनं पराभिप्रायस्यावबोधार्थं क्रियते इति स्वाभिप्रायप्रकाशनस्याऽप्राधान्याल्लिङ्विधिर्निषिध्यते। यथा—

'कच्चिज्जीवति ते माता कच्चिज्जीवति ते पिता,
माराविद ! त्वां पृच्छामि कच्चिज्जीवति पार्वती"
—(द्र०-काशिकावृत्तिः ३।३।१५३) इति।

यत्राचरणेन स्वाभिप्रायस्य प्रकाशनं क्रियते तत्र प्रकाशनमित्येव शब्दः पाणिनिना प्रयुज्यते, यथ—"प्रकाशनस्थेयाख्ययोश्च" (अ० १।३।२३) इति। तिष्ठते कन्या छात्रेभ्य इत्यादि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्राचरणेनाभिप्रायस्य प्रकाशने प्रकाशनशब्दस्य प्रयोगमङ्गीकरोति कातन्त्रकारोऽपि, सूत्रञ्च तदीयम्—"प्रतिज्ञा- निर्णय--प्रकाशनेषु स्थाः" (३।२।७६-१३) इति । अत्राहुर्व्याख्याकाराः—"तिष्ठते कन्या छात्रेभ्यः । तथा तिष्ठति= अवस्थानं करोति येनाऽभिप्रायस्तस्या ज्ञायते इति" (कात० वृ० टी० ३।२।७६-१३) इति ।

५. आशंसा—आशंसनमाशंशा, अप्राप्तस्य प्रियार्थस्य (अभिमतार्थस्य) प्राप्तुमिच्छेत्यर्थः । यद्यपि कश्चित् पुरुषो यदा किञ्चिदिच्छति तदा वर्त्तमान एव कालो भवति तथापि यद्विषये तदीयेच्छा जायते तद्विषयस्य भविष्यत्काले सम्पत्स्यमानत्वादिच्छापि भविष्यत्कालिकीति व्यपदिश्यते तत्र यद्यपि भविष्यदथस्यैवाऽभिधायकाः प्रत्ययाः करणीयास्तथापि महर्षिपाणिनिना तत्र भूतवद् वर्तमानवच्चापि प्रत्यया अनुशिष्टाः—"अशंसायां भूतवच्च" (अ० ३।३।१३२) इति ।

यथा—उपाध्यायश्चेदागमत्, आगतः, आगच्छति, आगमिष्यति वा वयं व्याकरणमध्यगोष्महि, अधीतवन्तोऽधीमहे, अध्येष्यामहे वेति । अत्रेदं बोध्यम्—यद्यप्याशंसा भविष्यत्कालिकी प्रोक्ता—अप्राप्तपदार्थस्य प्राप्तुं या इच्छा तद्रूपत्वात् । तथापि तस्या भूतकालिके वर्तमानकालिके चाऽपि विषयेऽतिदेशं विधाय तत्कालिकाः प्रत्ययाः कर्तुं शक्यन्ते । सम्भवे एव विषयेऽतिदेशो युज्यते कर्तुम् । यथा गुरोरागमनमध्ययनञ्च कदा यत्सम्पन्नं तदेव कालान्तरे यदि कश्चित् स्मरति कथयति वा तदा स आशंसाविषयस्तस्य कृते भूतकालिको जायते इति भूतसामान्यवाचकाः प्रत्ययाः क्रियन्ते । इच्छारूपाया आशंसायाश्च वर्तमान एव काले जायमानत्वात्तदुद्देश्येन तद्विषये वर्तमानार्थाभिधायिनः प्रत्यया निर्दिश्यन्ते । आशंसा न केवलं कारणयोग्यतावशाच्छक्यप्राप्तिविषये एव भवति किञ्चाऽशक्यप्राप्तिविषयेऽपि । सम्भावनन्तु कारणयोग्यतावशाच्छक्यप्राप्तिविषये एवेत्या शंसा-सम्भावनयोर्भेदो विज्ञेयः । यथा 'शतं जीवतु भवान्, अपि गिरिं शिरसा भिन्द्यात्' इत्यत्रेष्टार्थस्य यदाशंसनं क्रियते तच्छक्यमेवेति न निश्चितम् । यत्राशंसावाचिनः शब्दस्यैव प्रयोगस्तत्र तद्विषयस्य कालान्तरेऽतिदेशासम्भवेन न सर्वकालिकाः प्रत्यया निर्दिश्यन्ते किञ्च लिङ् प्रत्यया एव—"आशंसावचने लिङ्" ।

(अ० ३।३।१३४) इति ।

यथा—उपाध्यायश्चेदागच्छेदाशंसे युक्तोऽधीयीय, अवकल्पये युक्तोऽधीयीय इत्यादि ।

६. श्रद्धाप्रतीघातः—श्रद्धा=बलवती इच्छा तस्याः प्रतीघातः=शान्तिर्निवृत्तिर्वा श्रद्धाप्रतीघातः । यस्य पुरुषस्य जलपाने दुग्धपाने वा बलवती इच्छा भवति स तत्पदार्थोपस्थितो तथैव प्रयतते यथा तस्येच्छाया निवृत्तिः स्यात् । बलवत्यामिच्छायामवश्यमेव गतिर्भवतीत्यभिप्रायेणैव मन्येऽभिलाषातिशयार्थकयोः 'कणे-मनस्' इति शब्दयोर्गतिसञ्ज्ञा पाणिनिना कृता—

'कणे-मनसी श्रद्धाप्रतीघाते'

(अ. १।४।६६) इति ।

यथा—कणेहत्य पयः पिबति, मनोहत्य पयः पिबतीति । यावत्पानकर्तुरभिलाषातिशयस्य निवृत्तिर्न जायते तावत् स पिबतीत्यर्थः । 'कणे-मनस्' इति शब्दयोरभिलाषातिशयार्थकत्वाभावे न गतिसंज्ञा क्रियते, तेन कणे हत्वा गतः, मनो हत्वा गत इत्येव प्रयोगो भवतः ।

अनिश्चितविषयका इच्छार्थबोधकाः शब्दाः

१. ईप्सा—आप्तुमिच्छा ईप्सा सा चाऽनुकूलस्यैव (आत्मनो हितकरस्य) पदार्थस्य सम्भाव्यते । ईप्सायां यदा प्रकर्षो विवक्ष्यते भवति तत्र द्वितीया प्रकर्षाभावे तु भवति पञ्चमी विभक्तिः । "कर्तुरीप्सिततमं कर्म" (अ. १।४।४९)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यनेनेप्सिततमस्य कर्मसञ्ज्ञकत्वात्, "वारणार्थानामीप्सितः" (अ. १।४।२७) इत्येनेनेप्सितस्याऽपादानसंज्ञकत्वात्। अत्र प्रकर्षः क्रियापेक्षो गृह्यते। दृश्यते च किञ्चित्फलप्राप्त्यर्थमादौ कर्ता काञ्चित् क्रियामभीप्सतीति फलार्थमिष्यमाणत्वात् सा क्रिया ईप्सिता भवति, तत्रैव प्रकर्षे सति तत्सम्बद्धपदार्थेऽपि प्रकर्षः परिलक्ष्यते। यथा 'माषेभ्यो गां वारयति' इत्यत्र वारयितुर्द्वयमपीप्सितम्—गौर्माषाश्चेति। परञ्च वारणक्रियया स गामेव प्राधान्येनाप्तुमिच्छतीति तत्र कर्मसंज्ञा, वारणक्रियया प्रतीयमाना या हि वारयितुर्माषानाप्तुमिच्छा सा च सामान्यैवेति भवति तस्य (माषशब्दस्य) अपादान संज्ञा। परकीयस्यापि जनस्य माषा ईप्सिता भवन्ति, अन्यथा स माषेभ्यो गोर्वारणं न कुर्यात् तेनेदं नाशङ्कनीयम्—परकीयस्य जनस्य भावा नेप्सिता इति न तस्याऽपादानसंज्ञा शक्यते कर्तुमिति। तथा चाह भाष्यकारः—

'भवेद् यस्य माषा न गावस्तस्य माषा ईप्सिताः स्युः। यस्य तु खलु गावो न माषाः कथन्तस्य माषा ईप्सिताः स्युः? तस्याऽपि माषा एवेप्सिताः। अतश्चेप्सिता यदेभ्यो गा वारयति" (म० भा० १।४।२७) इति।

माषा एवेप्सिता इत्यत्रैवकारो भिन्नक्रमः, माषा ईप्सिता एवेत्यन्वयः कार्यः। अत्रोच्यते—माषाणां विनाशादधर्मावाप्ती राजभीतिश्च मा भूतामिति गो वारयिता माषानीप्सति, तत्तु सत्यमेव, परमन्धसम्बन्धे न कूपस्य विनाशो न च राजभीतिः, कथन्तर्हि कूपः कस्यचिद् वारयितुरीप्सितः स्यात्तदभावे 'कूपादन्धं वारयति' इत्यत्र कूपस्याऽपादानसज्ञा न भवितव्येति। तत्रेद विज्ञेयम्—यो ह्यन्धः कूपाभिमुखं प्रयाति स कूपं सम्प्राप्यावश्यमेव क्षयमेष्यतीत्यवधार्याऽयमन्धः कूपं मा प्रापदित्येतदर्थं यस्तं वारयति तस्य कूपोऽपीष्ट एवेति जायतेऽत्राऽपादानतेति।

दृश्यते हीप्सितपदार्थस्य रक्षणं तद्विघातकपदार्थानां वारणेनैव सम्भवति, वारणञ्च रक्षोद्देश्येनैव क्रियते इति। तेन रक्षण-वारणयोः परस्परं साकांक्षशब्दत्वोदकत्रैव पौर्वापर्येण स्थितिः सम्भवति, अत एव कातन्त्रे वारणार्थानां धातूनां रक्षार्थेष्वेव धातुषु समावेशः क्रियते, सूत्रञ्च तदीयम्—

ईप्सितञ्च रक्षार्थानाम् (कात. २।४।२१५) इति।

अत्र यद्यपि रक्षा धातोर्वारणपूर्वकं रक्षणम् ण्यन्त 'वृ' धातोश्च रक्षणपूर्वकमात्मनो वारणमित्यर्थः क्रियते। तथापि वस्तुतः 'यवेभ्यो गां रक्षति' इत्यादौ वारणस्यैव तात्पर्यसत्त्वाद् 'रक्ष' धातोरपि रक्षणपूर्वकं वारणमेवेति धात्वर्थोऽङ्गीकार्यः। अहिभ्य आत्मानं रक्षति' इत्यादावहीनां वारणपूर्वकमात्मनो रक्षणमिति धात्वर्थः कातन्त्रकारेणाङ्गीक्रियते, तस्यापोदमेव तात्पर्यम्—अहिभ्यः सकाशादात्मानं रक्षन्नात्मानमेव वारयति, भीतस्य जनस्याऽहीनां वारणं नेप्सितमशक्तत्वादिति। अहीनामिति समीपसम्बन्धे षष्ठी, वारणात् पूर्वं वारणपूर्वमिति पञ्चमीतत्पुरुषः। तत्र 'कूपादन्धं वारयति' इत्यादौ कूपस्याऽनीप्सितत्वादपादानं क्रियते, न तु महाभाष्यकारप्रदर्शितदिशेप्सितत्वं कूपस्याऽङ्गीकृतम्—कूपसंयोगेन प्राणापहरणरूपमनिष्टमेव सम्भाव्यते इति हेतुप्रदर्शनपुरस्सरम्।

यदुच्यते—'अग्नेर्माणवकं वारयति' इत्यत्रेप्सितस्य माणवकस्य कर्माऽपादानरूपसंज्ञाद्वयप्राप्तौ यदि परत्वादपादानसंज्ञां प्रबाध्य कर्मसंज्ञा जायते तर्ह्यग्नेरपि कर्मसंज्ञा शक्यते कर्तुम्, तन्मा भूदित्येतदर्थं "कर्मणो यदीप्सितम्, ईप्सितेप्सितम्" इति वा सूत्रमपादानसंज्ञाविधानार्थं करणीयम्, तेनात्र वारयितुरीप्सितस्य कर्मणो माणवकस्येप्सितो योऽग्निस्तस्याऽपादानसंज्ञा भविष्यतीति। तत्रेदमवधेयम्—"कर्तुरीप्सिततमं कर्म" (अ० १।४।४९) इति सूत्रे इच्छा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूपप्रवृत्तिनिमित्ते प्रकर्षबोधनार्थेव तमप्प्रत्ययः कृतस्तेनात्र प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्य-धात्वर्थफलाश्रयत्वमीप्सिततमत्वमुपादीयते । अग्निसंयोगजनकव्यापाराभावानुकूलव्यापारो धात्वर्थस्तत्प्रधानीभूतो यो हि व्यापारः प्रवृत्ति-विघातरूपस्तत्प्रयोज्यः, धात्वर्थस्य प्रवृत्तिविघा-तरूपस्य यत्फलमङ्गक्षयाभावस्तदाश्रयश्चाऽग्नि-र्नास्तीति तस्य कर्मसंज्ञाया अभावादपादान-संज्ञैव भविष्यति, तेन "कर्मणो यदीप्सितम्" इति "ईप्सितेप्सितम्" इति वा सूत्रं नावश्यक-मिति । "कर्तुरीप्सिततमं कर्म" (अ० १।४।४९) इति सूत्रे तमब्ग्रहणेनैव कर्माऽपादानसंज्ञयोर्विष-यविभागो ज्ञायते । तदभावे 'अग्नेर्माणवकं वारयति' इत्यादौ कदाचिदग्नेरपि कर्मत्वम्, माणवकस्य चाऽपादानत्वमुपतिष्ठेत ।

कचिदीप्सितशब्दोऽभिप्रेतार्थे रूढः, यथा— "स्पृहेरीप्सितः" (अ० १।४।३६) इत्यत्र । स्पृहधातुप्रयोगे ईप्सितपदार्थस्य सम्प्रदानसंज्ञा जायते । यथा—पुष्पेभ्यः स्पृहयतीत्यादि । अत्र पुष्पाणि प्राप्तुमिच्छा कस्यचित् स्यान्न वा, परं पुष्पाण्यभिप्रेतानीत्येव कृत्वा प्रयोग उपपद्यते । प्रकर्षविवक्षायान्तु 'पुष्पाणि स्पृहयति' इत्येव प्रयोगो जायते ।

'पयसा ओदनं भुङ्क्ते' इत्युक्ते पयसः संस्कारकत्वेनाप्राधान्यमोदनस्य च संस्कार्यत्वात् प्राधान्यमिति पयसो न कर्मत्वम् । भोक्तुरत्र नोपकारकेषु पयोदध्यादिषु पदार्थेष्वादरः, किञ्च तत्संस्कृते ओदने एवेति । अत उच्यते प्रदीप-कारेण—

"यदि मार्दवमात्रे आदरः स्यात् पङ्कमपि भक्षयेत्, विशदमात्रादरे सिकता अपि" (म० भा० प्र० १।४।४९) इति ।

केचिद वदन्ति—'गुडं भक्षयति' इत्यादौ भक्षयितुः क्रियैवेप्सिततमा न तु गुड इति न तस्य कर्मसंज्ञा प्राप्नोतीति । तन्न युक्तम्—अत्र भक्षणाय गुडस्योपादानं क्रियते न तु गुडमव-लोक्य भक्षणं क्रियते इति भक्षणक्रियया गुड-स्यैवेप्सिततमत्वात् कर्मसंज्ञा जायते । उक्तञ्च महाभाष्यकारेण—"उभयं हि तस्येप्सितम् । आतश्चोभयं यस्य हि गुडभक्षणे बुद्धिः प्रसक्ता भवति नासौ लोष्टं भक्षयित्वा कृती भवति" (म० भा० १।४।५०) इति ।

यद्यपि क्वचित् क्रियामात्रस्यापीप्सितत्वं दृश्यते । यथा कश्चिद् राजसेवकोऽन्यं कञ्चिद् राजसेवकमाह—कटं कुर्विति स च ब्रवीति—नाहं कटं करिष्यामि घटो मयाऽऽहृत इति । अत्र प्रेष्यस्य क्रियामात्रे ईप्सितेऽपि प्रयोजकस्योभय-मपीप्सितम् । तेन कटमित्यत्र द्वितीया, आहृत इत्यत्र च कर्मणि निष्ठाप्रत्ययो जायते । अन्यथा क्रियामात्रस्येप्सिततमत्वात्तन्न स्यात् । प्रयोज-कस्योभयेप्सितत्वात् प्रयोज्यस्याप्युभयमीप्सित-मिति सयुक्तिकं भाष्यकाराभिप्रायं विशदयन्नाह प्रदीपकारः—

"प्रयोजकचित्तानुवर्त्तनं तस्य स्वार्थसिद्धये कर्तव्यम् । यदा च विशिष्टकर्मिका क्रिया तेन सम्पाद्यते तदाज्ञाऽनुष्ठिता भवतीति प्रयोजकवत् प्रयोज्यस्याप्युभयमीप्सितमिति भाष्यकारस्याऽभिप्रायः" (म० भा० प्र० १।४।४९) इति ।

—क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हन्त ! भारतस्य राष्ट्रपतिः जाकिरहुसैनो दिवंगतः

भारतीयगणतन्त्रस्य तृतीयस्य राष्ट्रपतेः डा० श्रीजाकिरहुसैनस्य मईमासस्यास्य ३ तारिकायां (दिने ११-२०) वादनवेलायां हृदय-

गतेरवरोधात् सहसा जातेन निधनेन समग्रोऽपि-देशः शोकाकुलः सञ्जातः।

अवसरे चास्मिन् विभिन्नदेशानां राष्ट्रपतिभिः प्रधानमन्त्रिभिश्च डा० श्रीजाकिरहुसैनस्यास्मिन्नसामयिके निधने महान्तं शोकमनुभवद्भिर्महती समवेदना प्राकाश्यत। एतदतिरिक्तञ्चाल्जीरिया-प्रभृतीनां देशानां राष्ट्रपतीनामेवमन्येषाञ्च देश-नेतृणां शोकसन्देशाः समागताः।

अनन्तरञ्च सायं ७ वादने सर्वेषां साधारणानामपि जनानां कृतेऽपि श्रद्धाञ्जल्यर्पणस्यावसरं दातुं राष्ट्रपतिभवनस्य दरबारभवने राजकीयसम्मानेन सह स्वर्गीयराष्ट्रपतेः शवः समस्थाप्यत।

तदानीं सर्वतः प्रथमं कार्यवाहक-राष्ट्रपति-डा० श्रीवराहवेंकटगिरिमहोदयस्ततः प्रधानमंत्री श्रीमती इन्दिरागांधीमहोदया पुनश्चोपप्रधान-मन्त्री श्रीदेशाईमहोदयः, एवमन्ये चापि नेतारः शवे पुष्पमाला अस्थापयन्। अवसरे चास्मिन् तत्र गीता-कुरान-ग्रन्थसाहब-बाइबिलप्रभृतीनां धर्मग्रन्थानां पाठः समारब्धो ऽभूत्। तथा च तदानीं डाक्तरमहोदयस्य पार्थिवशरीरस्यान्तिमं दर्शनं कर्तुं तदर्थं श्रद्धाञ्जलिञ्चार्पयितुं संख्यातीता नागरिका जनाः समुपस्थिताः समभूवन्। एवं विभिन्नराष्ट्रेभ्यः समागतैर्नेतृभिस्तथा अनेकाभिश्च संस्थाभिर्दिवंगताय तस्मै श्रद्धाञ्जलयः समर्प्यन्त।

परिचयः—डा० श्रीजाकिरहुसैनस्य जन्म १८९७ ईशवीयेऽब्दे हैदराबादे जातम्, तत्र तस्य पिता वाक्कीलकर्म कुर्वाणो बभूव। प्रारम्भिकी शिक्षा चैतदीया हैदराबादे जाता। अष्टवर्षात्मके वयस्येवास्य पिता दिवंगतोऽभूत्। अत एवास्य परिवारः स्वपूर्वजानां निवासभूतमुत्तरप्रदेश-स्थितं कायमगंजं प्रत्यागतः।

किञ्च १९०७ तमे ई० वर्षे इटावानगरस्य इस्लामिया हाईस्कूले डाक्तरमहोदयः सोऽयं प्रवेशमलभत। पुनः १९१८ ई० वर्षे च इलाहवादस्थविश्वविद्यालयात् बी. ए. परीक्षा डाक्तरमहोदयेन तेनोत्तीर्णा, वर्षद्वयानन्तरञ्च एम्. ए. परीक्षायाञ्चापि साफल्यमाप्तम्। १९२० तमे ई० वर्षे च गांधीमहोदयस्य सत्प्रेरणया राज्यसञ्चालितान् विद्यालयान् परित्यज्य स्वल्पतमं वेतनञ्च स्वीकृत्य अलीगढस्थित—'राष्ट्रियकालेज' जामिया-मिलिया-इस्लामियाभिधं प्रत्यागतवान् श्रीजाकिरमहोदयः।

अस्मिन्नेव कालखण्डे च यदाऽसहयोगान्दोलनं प्राचलत् तदा डाक्तरमहोदयोऽपि स

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्मिन् भागं गृहीतवान् । अवसरे चात्र गांधी-महोदयेन सह तस्य सुदीर्घः सम्पर्कः समजायत ।

अथ च १९२२ तमेऽब्दे चोच्चशिक्षाग्रहणाय ब्रिटेनदेशं गत्वा ततो 'डाक्टरेट' इत्युपाधिं गृहीत्वा स्वदेशञ्च प्रत्यागत्य जामियाशिक्षणा-लयस्योपकुलपतिपदमलङ्कृतवान्, स्वातन्त्र्य-प्राप्तेरनन्तरञ्च अलीगढ-विश्वविद्यालयस्योप-कुलपतिः समभूत् स डाक्तरमहोदयः ।

किञ्च संस्कृति-शिक्षाक्षेत्रेषु च स्वर्गीयजाकि-रमहोदयेन कृतां सेवामुद्दिश्य सर्वकारेण स 'पद्मभूषणं, भारतरत्नम्' इत्येताभ्यामुपाधिभ्यां सम्मानितोऽभूत् । एवञ्च १९६२ तमेऽब्दे मईमासे सोऽयं श्रीजाकिरहुसैनमहोदयो भारतस्योपराष्ट्र-पतिरूपेण निर्वाचितस्तथा १९६७ तमे वर्षे च मईमासे राष्ट्रपतिपदे निर्वाचितो भूत्वा मईमासस्य १३ तारिकायां कार्यभारञ्च गृहीतवान् । शिक्षा-शास्त्रिणा च तेन डाक्तरमहोदयेनानेके ग्रन्था अपि विरचिता आसन्-इति सर्वविदितमेव ।

परिवारः-इदानीं स्व० श्रीजाकिरहुसैनस्य परिवारे तदीया पत्नी बेगमशाहाँबानो, तदीयौ द्वौ भ्रातरौ डा० श्रीमहमूदहुसेन-यूसुफहुसैनाभिधौ च वर्तन्ते तथा जामातृद्वयं विद्यते एकः श्रीखुर्शीदआलमखां द्वितीयश्च सोफियाबानो-पतिः श्रीरहमानः योऽलीगढविश्वविद्यालये भौति-कशास्त्रस्य प्राध्यापको वर्तते । एवञ्च बेगमशाह-जहाँ महोदयायाः द्वे सुते, तिस्रः दौहित्र्यश्च सन्ति, यथा श्रीमती रेहाना, कुमारी मञ्जुः, तथा कुमारी नीलोफराख्या, तथा वर्तते चैकः दौहित्रः तलमानश्चेति ।

इत्थञ्चैतादृशस्य राष्ट्रपतेः श्रीजाकिरहुसैनस्य राजनीतिकुशलस्य सहसैव लोकान्तरगमनेन राष्ट्रस्यास्य महतीक्षतिर्जाता, यस्याः पूर्तिर्न कथ-मपि भवितुमर्हति एवञ्च राष्ट्रपतेस्तस्य निधनस्य तृतीयदिने रात्रौ सार्धसप्तवादने नमाजपठना-नन्तरम्-ओखलासमीपस्थित-जामिया-मिलिया-भिधे क्षेत्रे डा० श्रीजाकिरहुसैनस्य पार्थिवशरी-रस्य सुन्नीमुस्लिमरीत्यान्तिमः संस्कारः सम्प-न्नोऽभूत् । तस्य राष्ट्रपतेः शवयात्रा चेयं सैनिक-सम्मानेन सह लक्षाधिकेन जनसमूहेन च सार्धं राष्ट्रपतिभवनादेव प्रारब्धाभूत् ।

अवसरे चास्मिन् **प्रधानमन्त्री श्रीमती इन्दिरागांधीमहोदया** च स्व० डा० श्रीजाकि-रहुसैनाय श्रद्धाञ्जलिमर्पयन्ती प्रावोचद् यद् स्व० डाक्तरमहोदयस्य व्यक्तित्वं सुमहदासीत् । तेन च देशस्यास्याखण्डता-सुरक्षणात्मकेऽस्मिन् कर्मणि सुमहद्योगदानमक्रियतेति । तथा च रेडियोयन्त्रद्वारा राष्ट्रं प्रति प्रसारिते सन्देशे च श्रीगान्धीमहोदयाऽभाषत यत्-शिक्षाशास्त्री तथा सामाजिककार्यकर्ता स हि डाक्तरमहोदयः सर्वदा रचनात्मकेषु कार्येषु बलं दत्तवान् । स च राष्ट्रियेषु अन्ताराष्ट्रियेषु च कस्मिन्नपि पदे वर्त-मानो यमादर्शमुपस्थापितवान् स भाविवंशपर-म्परायाः कृतेऽयं मार्गप्रदर्शनं विधास्यतीति ।

श्रद्धाञ्जलिः

किञ्च वीरार्जुनसमाचारपत्रादवगतमभूद्यत्-जगदलपुर्यां (मध्यप्रदेशे) दिनेष्वेषु महामानस-यज्ञे भागं ग्रहीतुमागतैः **पुर्याः शङ्कराचार्यैः श्रीनिरञ्जनदेवतीर्थस्वामिमहाराजैः** स्वर्गत-**राष्ट्रपति-श्रीजाकिरहुसैनस्य** स्मृतौ श्रद्धा-ञ्जलिरर्पितः ।

तत्र यज्ञमण्डपे समुपस्थितं जनसमूहं सम्बोध्य श्रीशङ्कराचार्यैः राष्ट्रपतेर्निधनमुद्दिश्य एकः शोकप्रस्तावः प्रास्तूयत, दिवं गतात्मने राष्ट्रपतये च श्रद्धाञ्जलिः समर्प्यत । ततश्च रात्रौ भावी कार्यक्रमश्चापि तैर्निषिद्धः-इति ।

एवं जयपुरस्थ-महाराज संस्कृत-कालेजेऽपि कालेजाध्यक्ष-**श्रीगोविन्दनारायणशर्मनैना-यिकमहानुभावैः** स्व० डा० श्रीजाकिरहुसैन-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्याकस्मिकं निधनमुद्दिश्य शोकसभैका समायोज्यत। तत्रैकः शोकप्रस्तावश्चापठ्यत। ततः कालेजीया विद्वत्परिषच्च दिवंगताय तस्मै श्रद्धाञ्जलिमर्पयत्।

तथा च देशभक्तस्य सत्पुरुषस्य तस्य भारतराष्ट्रपतेः स्वर्गमनेन देशस्यापूरणीयां क्षतिमनुभवन् सोऽयं भारतीपरिवारः डा० श्रीजाकिरहुसैनाय राष्ट्रनायकाय हृदयेन श्रद्धाञ्जलिं समर्प्य परमात्मानं प्रार्थयते यत् स दिवंगतात्मने राष्ट्रपतये शाश्वतिकीं शान्ति तथा तदीयपरिवाराय चासह्यं दुःखमिदं सोढुं शक्तिञ्च दद्यात्।

श्रद्धांजलिः

यथा वदति यो लोकस्तथैव कुरुते सदा।
प्रामाणिकः स एवासीत्तस्य राष्ट्रपतेर्मते ॥१॥

किञ्च—
नरेणाल्पन्तु वक्तव्यं कार्यं कर्माधिकं सदा।
नात एव त्वरोचन्त तस्मै प्रमितभाषिणे ॥२॥

श्रीजाकिरहुसेनाय तत्त्वहीनानि केवलम्।
शब्दाऽम्बरदीर्घाणि भाषणानि सभास्वहो ॥३॥

लोके योऽखिलहिन्दु-मुस्लिमनृणां
सम्माननीयोऽभवत्,
शिक्षाशास्त्रिवरस्तथातिसरलो
गांधीमतोपासकः।
धर्मा यस्य मतेऽखिला अपि
सदा तुल्याः, विनम्रश्च यः,
श्रीमान् **राष्ट्रपतिः** स **जाकिरहुसेनो**
हन्त यातो दिवम् ॥४॥

वक्ता यः कुशलस्तथातिनिपुणो
राष्ट्रस्य यः शासकः,
यस्मै वस्तुत एव धर्मनिरपेक्षत्वं सदाऽरोचत।
यस्यासीज्जनतास्वपीह सहजः
स्नेहो महान् सर्वदा,
तस्मै राष्ट्रहितैषिणे गतवते
स्वर्गं प्रणामोऽस्तु मे ॥५॥

आत्मनो यापितं येन शिक्षाक्षेत्रेऽखिलं वयः।
शिक्षाशास्त्रविदे तस्मै शान्तिमीशः प्रयच्छतात् ॥६॥

विदुषे देशभक्ताय तस्मै स्वर्गगतात्मने।
श्रीजाकिरहुसैनाय श्रद्धाञ्जलिः समर्प्यते ॥७॥

समर्पकः—
दीनानाथत्रिवेदी मधुपः
भारती-महसम्पादकः, जयपुरम्

दी अवध शूगर मिल्स लिमिटेड

प्रधान कार्यालय :-
इण्डस्ट्री हाउस
१५९ चर्च गेट रिक्लेमेशन
बम्बई-१

मिल्स :-
हरगांव
जिला-सीतापुर
उत्तरप्रदेश

निर्माता :—
शुद्धा, श्वेता, कणवती शर्करा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar.

Digitized by Arya Samaj Foundation Chennai and eGangotri

❁ शिबिका ❁

आन्ध्रमूलम्—श्रीदेवुलपल्लि वेङ्कटकृष्णशास्त्री
अनुवादयिता—काळूरि श्रीहनुमन्तराव:

प्राणेश्वरेण शिबिका प्रहिता मदर्थ-
मित्येव मद्हृदयमुद्विजते प्रगाढम् ।
शुष्का वियोगपरितप्तशरीरयष्टिः
शाखाप्रवालरुचिरा सुमदाम चाभूत् ॥

हस्तौ प्रसाधनविधौ मम कम्पमानौ
अभ्राम्बराणि मिहिरोदयभूषणानि ।
हर्षोऽपि मां प्रदहतीव हृदन्तरं मे
उड्डीयमानमिव सौख्यभरेण साकम् ॥

मन्द विलोलचलनेन लता चलन्ती
पौष्पे निषद्य डयने सुममालिकाऽहम् ।
नीये हहेति शिबिकां वहतां विरावै-
र्मार्गे समस्तनगरेण निरीक्ष्यमाणा ॥

हो हो हहेति शिबिकां वहतां विरावैः
आरामरम्यपदवी प्रतिबोधिताऽऽसीत् ।
हो हो हहेति शिबिकां वहतां विरावैः
जागर्ति काननबहिर्विमलाम्बुकुल्या ॥

प्रणयविपञ्चिका शिबिका
कुसुमितवल्लिका शिबिका ।
मघवधनुर्वक्ररेखिका शिबिका
मधुरसुखस्वप्नशाखिका शिबिका ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

❀ कलिकौतुकम् ❀

आचार्यः—श्रीविश्वनाथमिश्रः, श्रीशार्दूलसंस्कृतविद्यापीठं, बीकानेरः ।

पूर्वानुवृत्तम्—

नवमं दृश्यम्

राजा परीक्षितो गंगातटे दर्भासने व्रतमाचरन् तिष्ठति । पौराः लोकाः मन्त्रिणश्च तं परिवार्य तिष्ठन्ति । राज्ञः शापवृत्तान्तं श्रुत्वा महर्षीणां तत्रागमनम् ।

परीक्षितः—भो भो पौराः सभ्याः मन्त्रिणश्च । सम्प्राप्तमधुना गंगातटम् । अपरिहार्यः खलु विप्रशापः, तद्वशाच्च ध्रुवं मे मृत्युः । यद्यपि नाहं बिभेमि मृत्योः, तथापि श्रूयते सद्गतेरन्तरायः अकालमरणम् ! अतः अल्पीयसि एतावति काले प्रस्तूयतामाचरणीयं येन न भवेत् कश्चन प्रत्यवायः (हस्तौ सम्मेल्य)

श्रीकृष्ण गोविन्द हरे मुरारे ?
हे नाथ नारायण वासुदेव !

(ततः प्रविशति द्वारपालः)

द्वारपालः—विजयतां महाराजः ! एते खलु तत्रभवन्तः सनकादयः ऋषयो भवन्तं द्रष्टुकामाः प्रतीक्षन्ते द्वारि ।

परीक्षितः—वत्स जनमेजय ! गृहीतव्रतो ऽहं सप्तरात्रं यावदुत्थातुं न प्रभवामि इति मम स्थाने त्वमेव गत्वा संपूज्य तावत् शीघ्रमानय तत्रभवतो वेदनिधीन् ब्रह्मर्षिवरान् ।

जनमेजयः—यथाज्ञापयति महाराजः ।

(जनमेजयो निष्क्रान्तः पुनः सनकादिभिः सह प्रविशति)

परीक्षितः—(उत्थाय) एष खलु पाण्डुवंश्यः परीक्षितोऽहम् अभिवादये तत्रभवतः ।

ऋषयः—वर्धतां भरतवंशराज्यम् । राजन् ? शाश्वतम् अक्षय्यं योगिभिरप्यगम्यम् पदं प्राप्नुहि । भवताच्च तव श्रेयसे तत्पदम् ।

परीक्षितः—महाभागाः ? निर्दिशन्तु मे एतादृशं पन्थानं येन गच्छतो मम स्यात् समीहितार्थसिद्धिः ।

सनकः—अस्मिन् अल्पीयसि समये श्रीमद्भागवतपुराणश्रवणात् ऋते न दृश्यते अन्यत् किमपि क्षेमंकरं साधनम् । तत्र केवलं हरिरेव गीयते, स एव कीर्त्यते श्रूयते स्मर्यते च । मन्ये तदीयं श्रवणमभीष्टसाधकं स्यात् तत्रभवतो महाराजस्य उक्तं च—तावत् पापानि देहेऽस्मिन् निवसन्ति शरीरिणः । यावन्न श्रूयते सम्यक् श्रीमद्भागवतं नरैः ।

सनातनः—वाचामगोचरं खलु माहात्म्यं श्रीमद्भागवतस्य । अतोऽवहितचेतसा तदेव श्रोतव्यं महाराजेन ।

परीक्षितः—अनुकम्पितः खलु अमुना निर्देशेन । ननु पालनीय एव श्रीमतामादेशः ।

(ततः प्रविशति द्वारपालः)

द्वारपालः—महाराजो विजयताम् । एष खलु कोऽपि अवधूतवेशः, षोडशवर्षीयः ब्राह्मणवटुः शुकनामा द्वारि समुपेतः श्रीमतां दिदृक्षया ।

परीक्षितः—वत्स जनमेजय ! याहि, शीघ्रमेवानय वैयासकिं तत्रभवन्तं शुकदेवम् । मा स्म गमः कदाप्यनवधानतां ब्रह्मर्षिवराणां सभाजने ।

(जनमेजयो गत्वा शुकं सस्वागतमानयति दृष्ट्वा च त सर्वे उत्तिष्ठन्ति)

परीक्षितः—यः स्वानुभावमखिलश्रुतिसारमेकमध्यात्मदीपमतितितीर्षतां तमोऽन्धम् । संसारिणां करुणयाह पुराणगुह्यं तं व्याससूनुमुपयामि गुरुं मुनीनाम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुकः—राजन्! परम भागवतोऽसि। तव-क्षेमं विधास्यति साक्षात् पुराणपुरुषोत्तमः।

परीक्षितः—महाभाग ? भवादृशेन परावर-ज्ञेन स्वयमेव समुपस्थाय कृतार्थीकृतश्चेत् सिद्धं मे समीहितम्। भगवन् ? श्रोतव्या मे भागवती-कथा। समुपस्थितश्च भवान् परमभागवतः। तद् व्यासासनमिदमलंकृत्यामूल्येन प्रवचनोपदे-शेन विधेहि सार्थकं मे जीवितं भगवन् ?

शुकः—तथैवास्तु।

(शुकः व्यासासने तिष्ठति सर्वे च यथास्थानमवस्थिताः)

परीक्षितः—महामान्य ? अद्यापि मे संशयो महान्, यदनिच्छतापि मया कथमपराद्धं भूदेव-विषये ? अपि नाम भविता मे निस्तारः कदाचित् ?

शुकः—राजन् ? चतुर्युगानां क्रमः स्वाभा-विकः। प्रवृत्तश्चास्ते इदानीं पापबहुलः कलिः। एतत्प्रभावादेव सर्वत्र जायते विपर्ययः। तस्मात् सामयिकं विद्धि स्वकीयं शापम्, अपाकुरु च मनसस्तापम्, कामं विनाशमेतु पाञ्चभौतिकं शरीरम्, आत्मा तु ततः पृथक् शाश्वतः अज-न्मेति बुद्ध्या वर्तितव्यं त्वया।

परीक्षितः—महानुभाव ? अपगतो मे महान् संशयः। भवदनुकम्पया अस्मि साम्प्रतं स्वस्थः।

शुकः—राजन् ? त्वया सर्वतो भावेन भग-वानेव ध्येयः, गेयश्च तन्नामसहस्रम् पेया च तस्यैव पीयूषमाधुरी कथा श्रवणपुटेन। ततस्त-द्रूपतां गतस्य ते सर्वं जगत् तन्मयं भास्यति। किं बहुना—

दशन्तं तक्षकं पादे लेलिहानं विषाननैः।
न द्रक्ष्यसि शरीरं च विश्वं च पृथगात्मनः॥
त्वं तु राजन् मरिष्येति पशुबुद्धिमिमां जहि।
न जातः प्रागभूतोद्य देहवत्वं न नंक्ष्यति॥

परीक्षितः—(हस्तौ सम्मेल्य) धन्योऽस्म्यनु-गृहीतोऽस्मि भवता। व्यपगता मे मनस्तापाः। अहो! अद्य पुण्यः सुदिवसः। तदिदानीमार-भ्यताम् ललिता सरसा भागवती कथा।

शुकः—निगमकल्पतरोर्गलितं फलं,
श्रवणपेयसुधाद्रवसंयुतम्।
पिबत भागवतं रसमालयं,
मुहुरहो रसिकाः भुवि भावुकाः।

राजन् ? अनने भागवतश्रवणेन साधितं ते समीहितम्। अतः परं किं ते भूयः प्रियं करोमि?

परीक्षितः—भगवन् ? यस्मिन् देशे समु-त्पन्ना वयम्, यत्र च स्थापित धर्मराज्यं मम तातपादैः, यत्र च सतां कल्याणाय खलानां निग्रहाय च भगवानपि काले काले ध्रुवावतारो भवति, तस्य पुण्यतमस्य भारतस्य स्यात् सार्व-त्रिकोऽभ्युदय इति मे चरमा समीहा।

शुकः—तथैवास्तु! भगवदनुकम्पया परम-सनातनोऽयं देशः सर्वतोभावेन विकासशिखर-मधिरोक्ष्यति।

(ततः सर्वे गायन्ति)

सामूहिकगानम्

आर्यजननि जय-भारतमातः!
उज्ज्वलहिमगिरिधवलितभाले,
जलधिकलितपरिधानविशाले,
कमलमुकुलनयने जय-मातः ?
आर्यजननि जय-भारतमातः॥१॥

मरकतमययमुनाजलसंगे,
निहितभगीरथकीर्तितरंगे,
सुविदित पञ्चनदे जय-मातः,
आर्यजननि जय-भारतमातः॥२॥

श्रौतविधानसनातनगीते,
रघुपतिश्रीपतिचरितपुनीते,
तत्त्वविचारपरे जय-मातः!
आर्यजननि जय-भारतमातः॥३॥

समयसमागत शिशिरवसन्ते,
वहति कृषिः परमं विभवं ते,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाकविकालिदासस्य काव्यकौशलम्

ले० श्रीशंकरसिंहः भाला, एम. ए., साहित्याचार्यः, जयपुरम्

कालिदासस्य कृतिषु संस्कृतकाव्यशैल्याः वास्तमरूपं प्रस्फुटितं भवति। कवितायाः यैः गुणैः संसारः कालिदासस्य काव्यस्य भक्तः संजातः, तेषु कवेः मौलिकता अद्वितीया। कालिदासेन स्वस्य कृतीनां कथानकानि प्राचीनाख्यानेभ्यः गृहीतानि परं च सः स्वस्य सृष्टिनैपुण्येन नीरसं सर्वप्रसिद्धकथानकं च रुचिकरं मनोमुग्धकारि च कर्तुं समर्थः। मौलिकता नूतनसृष्टिरचनापेक्षयाऽपि प्राचीनसृष्ट्यै नूतनचमत्कारप्रदाने महती भवति। कालिदासस्य सर्वाः रचनाः निकषेऽस्मिन् दोषरहिताः।

कालिदासस्य सर्वतोमुखी प्रतिभा तं विश्वसाहित्ये असाधारणस्थाने प्रतिष्ठापयति। कालिदासः महाकाव्ये, गीतिकाव्ये नाटके—सर्वासु काव्यकलासु स्वस्य प्रखरप्रतिभायाः समानरूपेण परिचयं अददात्।

कालिदासस्य लोकप्रियतायाः प्रधानकारणं वर्तते तस्य प्रसादपूर्णा, लालित्ययुक्ता, परिष्कृता च शैली। कालिदासेन स्वस्य सर्वे ग्रन्थाः वैदर्भीरीत्यां लिखिताः। उक्तं च—'वैदर्भीरीतिसंदर्भे कालिदासो विशिष्यते'। वैदर्भीरीत्याः उद्भावना कालिदासेन कृता इति दण्डिनः मान्यता वर्तते—

लिप्तामधुद्रवेणासन् यस्य निर्विविशा गिरः।
तेनेदं वर्त्म वैदर्भं कालिदासेन शोधितम् ॥

ललितपदविन्यासस्य माधुर्येण, कृत्रिमतायाः सर्वथापरिहारेण च कालिदासस्य रचना स्वाभाविकी सहजसौन्दर्ययुक्ता च प्रतिभाति। तस्य कविता सर्वत्र सरला बोधगम्या प्रसादयुक्ता च वर्तते।

कस्यापि भावस्य चित्रणं कुर्वन् कालिदासः एकस्याः विचित्रशैल्याः उपयोगं करोति। सः तं भावं स्पष्टशब्देषु कथनापेक्षया व्यञ्जनावृत्त्याः आश्रयं गृहीत्वा तं प्रति सूक्ष्मसंकेतमात्रं करोति—

एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी।
लीलाकमलपत्राणि गणयामास पार्वती ॥

अस्मिन् श्लोके एकोऽपि अलंकारः न विद्यते तथापि कविना कमलपत्रस्य गणनायाः वर्णनेन पार्वत्याः सहजलज्जाशीलतायाः, आन्तरिकप्रेम्णः आनन्दातिरेकस्य गोपनस्य प्रवृत्त्याश्च अतिरुचिरा मार्मिकी च व्यञ्जना कृता। यत्र बाणः भवभूतिश्च कस्या अपि रमणीयकल्पनायाः अतिविस्तृतवर्णनं कुरुतः तत्र कालिदासः कतिपयशब्देषु स्वकाव्यप्रतिभां प्रदर्शयति। तस्य कविकल्पना खलु नित्यनूतनचित्राणां सृष्टिकार्ये निपुणा। तस्य रसमयी रुचिररचनानां विषये 'क्षणे क्षणे यन्नवतामुपैति तदेवरूपं रमणीयतायाः' इति लोकोक्तिः चरितार्था भवति।

कोमलसुकुमारभावानां व्यञ्जनायां कालिदासः खलु अद्वितीयः। एतदर्थं प्रसन्नराघवस्य कर्ता 'कालिदासः कविताकामिन्याः विलासः' इति कथयति 'शृंगाररसस्य संयोगपक्षस्य विप्रलंभपक्षस्य च यथाविधं सूक्ष्मं मार्मिकं च उद्घाटनं कालिदासेन कृतं तथाविधं संसारस्य केनापि अन्यकविना कृतं इति विषये ननु संदेहः वर्तते।

कालिदासस्य करुणरसः हृदयद्रावी विद्यते। कुमारसंभवे रतिविलापः रघुवंशे अजविलापश्च

त्रिभुवनतृप्तिकरे जय-मातः!
आर्यजननि जय-भारतमातः ॥४॥
वीरकराञ्चित भीषणचापे,
खड्गनिवारितदानवतापे,
वीतभये सदये जय-मातः!
आयजननि! जय-भारतमातः! ॥५॥

(पटाक्षेपः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्य करुणरसस्य उत्कृष्टे उदाहरणे स्तः। पत्युः भस्मीभूतं शरीरं दृष्ट्वा रतिः विलापं करोति—

गत एव न ते निवर्तते स
सखा दीप इवानिलाहतः।
अहमेव दशेव पश्य माम-
विषह्यव्यसनेन धूमिताम् ॥

स्वस्य प्राणप्रियायाः वियोगे अजस्य दशापि करुणासिक्ता दरीदृश्यते—

विललाप स वाष्पगद्गदं
सहजामप्यपहाय धीरताम्।
अभितप्तमयोऽपि मार्दवं
भजते कैव कथा शरीरिषु ॥

विपरीतमेतद् नववध्वाः प्रेम्णः मनोरमचित्रं कविना चित्रितम्—

आत्मानमालोक्य च शोभमान-
मादर्शबिम्बे स्मितायताक्षी।
हरोपयाने त्वरिता बभूव
स्त्रीणां प्रियालोकफलो हि वेषः ॥

शृङ्गाररसस्य व्यञ्जनायां कवेः पद्यानां नादसौन्दर्यं सुकुमारवर्णविन्यासश्च सहायकौ स्तः।

अलंकाराणां प्रयोगे कविना स्वस्य सूक्ष्ममर्मज्ञतायाः परिचयो दत्तः। तस्य कविता अत्यधिकानावश्यकालंकाराणां भारेणाक्रान्ता कामिनीव मंदमन्थरगामिनी नास्ति, प्रत्युत स्फुटचन्द्रतारका विभावरीव स्वसहजसौन्दर्येण सहृदयाह्लादकारिणी विद्यते। कवेः अनुप्रासाः तस्य कवितासु अप्रयासेन समागताः, यथा—'प्रजा प्रजानाथ पितेव पासि।' शब्दालंकाराणां तुलनायां अर्थालंकाराणां अधिकप्रयोगः कविना कृतः। स्वभावोक्त्यलंकारे सः सिद्धहस्तः अस्ति। उपमोत्प्रेक्षादृष्टान्तार्थान्तरन्यासादीनां अलंकाराणां प्रयोगे तस्य बहुश्रुततायाः व्यापकदृष्टिकोणस्य च परिचयः दृश्यते।

कालिदासस्य उपमायाः विलक्षणता तु विश्वविख्याता एवास्ति—'उपमा कालिदासस्य' कालिदासस्य उपमा अनुरूपतायाः सरसतायाः अपूर्वतायाश्च दृष्ट्या अन्यतमाः सन्ति। नन्दिनी, दिलीपसुदक्षिणयोः मध्ये एवं प्रतिभाति यथा दिवसस्य निशायाश्च मध्ये संध्या—

पुरस्कृता वर्त्मनि पार्थिवेन
प्रत्युद्गता पार्थिवधर्मपत्न्या।
तदन्तरे सा विरराज धेनु-
र्दिनक्षपामध्यगतेव सन्ध्या ॥

कालिदासस्य उपमाः यथार्थगुणयुक्ताः सन्ति। स्वयम्बरसमये इन्दुमतिः यं यं नृपं त्यक्त्वा अग्रे गच्छति स स नृपः तथैव विवर्णः भवति यथा संचारिणीदीपसिखया त्यक्तः रात्रौ राजमार्गस्य भवनम्—

संचारिणी दीपशिखेव रात्रौ
यं यं व्यतीयाय पतिंवरा सा।
नरेन्द्रमार्गाट्ट इव प्रपेदे
विवर्णभावं स स भूमिपालः ॥

शास्त्रीयाः उपमाः अपि अनेकाः समवलोक्यन्ते यथा—'श्रुतेरिवार्थं स्मृतिरन्वगच्छत्।' व्यवहारयुक्ता उपमा अपि विद्यते, यथा—'दुष्यन्ताय दत्ता शकुन्तला सुपात्रशिष्याय दत्ता विद्या इव विद्यते,। सर्वाः उपमाः स्वाभाविक्यः प्रसङ्गानुकूलाश्च सन्ति यथा भोजनाचार्यो विदूषकः निशाकरं नवनीतपिण्डमिव मन्यते।

स्वस्य अद्भुतकल्पनाशक्तेः कारणात् कालिदासः शब्दचित्राणि अत्यन्तपटुतया चित्रितुमर्हति। सः मानवहृदयस्य कोमलभावनानां, तस्य उत्सुकतायाः तस्य विह्वलतायाः, तस्य विविधभावावेशानां, च सुमर्मज्ञः अस्ति। प्रकृत्याः गूढरहस्यानां, तस्याः अनुपमदृश्यानां च चित्रं कालिदासस्य काव्येषु सर्वत्र दर्शनीयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चरित्रचित्रणे अपि कालिदासः अन्यतमः वर्तते। दीपशिखातुल्या इन्दुमतिः, कृशाङ्गयष्टिः सीता, संनतगात्री पार्वती, तन्वी श्यामा यक्षपत्नी, मनोज्ञा वल्कलेनापि तन्वी शकुन्तला च अस्माकं सम्मुखे जीवितजागृतचित्राणि स्थापयन्ति।

कालिदासस्य सर्वप्रमुखविशेषता इयमस्ति यत् सः प्रेम्णः कविरस्ति। कालिदासस्य काव्यानां मूलसंवेदना प्रेम्णः आदर्शस्य संस्थापना एवास्ति। कालिदासः आदर्शप्रेम्णः अर्चको वर्तते। कुमारसंभवस्य चतुर्थसर्गे पार्वत्याः प्रेम वासनाजन्यं आसीत्। अत एव तद् क्षणभंगुरं आसीत्। कठोरतपस्यायां तप्तं भूत्वा यदा तद् पवित्रं अभवत् तदा तद् स्थायि सञ्जातम्। तदेव आदर्शप्रेम आसीत्। रघुवंशे रामस्य जीवने कर्तव्यस्य प्रेम्णश्च यः संघर्षः कालिदासेन चित्रितः तस्मिन् कर्तव्यस्य प्रधानता वर्तते किन्तु प्रेमपक्षोऽपि न क्षीणः।

कालिदासः संस्कृतसाहित्याकाशस्य जाज्वल्यमानं नक्षत्रमस्ति। तस्य काव्यकौशलं अन्यतमं विद्यते। तस्य कविता एका एतादृशी मदिरा वर्तते यां पायं पायमपि न भवति कदाचिदपि तृप्तिः।

FOR SECURITY & SERVICE

RUBY GENERAL INSURANCE COMPANY LIMITED.

Year	Nett Premium Income	Nett Claims Paid	Capital & Funds	Assets.
1967	Rs. 3,26,55,000	Rs. 1,66,02,000	Rs. 2,84,29,000	Rs. 5,98,19,000

BUSINESS TRANSA TED:

FIRE MARINE MOTOR ACCIDENT AVIATION MACHINERY
AND
ERECTION ETC. ETC.

BRANCHES & AGENCIES IN ALL IMPORTANT TOWNS IN INDIA & ABROAD

Head Office & Registered Office :

"RUBY HOUSE"

8, India Exchange Place, CALCUTTA-I.

Delhi Office: 2I, Daryaganj, Delhi.

Managing Director, Shri K. P. Modi, J.P., A.F.I.I.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुभ कामनाओं सहित

डालमिया सिमेंट (भारत) लिमिटेड

डालमियापुरम् (तमिलनाडु)

"राकफ़ोर्ट" मार्का, डालमिया पोर्टलैण्ड एवं पोज़ोलाना सिमेंट
तथा
डालमिया रिफ़्रैक्टरीज़ के निर्माता।

उड़िसा सिमेंट लिमिटेड

राजगंगपुर (उड़िसा राज्य)

"कोणार्क मार्का", डालमिया पोर्टलैण्ड एवं पोजोलाना सिमेंट
हर प्रकार और आकार की रिफ़्रैक्टरीज़, आर० सी० सी० स्पन पाइप्स तथा
प्रीस्ट्रैस्ट कंक्रीट सामान के निर्माता।

DALMIA ENTERPRISES

मुख्य कार्यालय :
४-सिंधिया हाउस, नयी दिल्ली-१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रससिद्धान्तपरिशीलनम्

काल्लूरि—श्रीहनुमन्तरावः, हैद्राबादः

पूर्वानुवृत्तम्—

एवं रसगंगाधरकारः करुणरसप्रधानं काव्यं पठितुरानन्दं जनयतीति पक्षद्वयेन चर्चितवान्। अनयोः सुरते नखक्षतादाविव करुणरसात्मकं काव्यं पठितुः परिपूर्णमानन्दमेव जनयतीति प्रथमः पक्षः सुतरामस्मदनुभवव्यतिरिक्तो वर्तते। शोकभयानकादीनि काव्यवर्णनानि तत्तदनुभूतीरेव नत्वानंदं जनयंतीत्यस्माकं मन एव प्रमाणम्। श्रव्यकाव्येभ्यो नाटकेषु, नाटकेभ्यः सिनिमासु चेयमनुभूति र्घनीभवति। श्रव्यकाव्यान्नाटकस्य, नाटकात् सिनिमायाश्च वास्तविकजीवितस्याधिकतरसदृशत्वं तस्य हेतुः। Shakespeare स्वविषादांतनाटकेषु प्रेक्षकाणां मनोविषादतीव्रतया निरन्तरविक्लबं न भवतीति तत्र तत्र प्रसह्य हास्यं प्रावेशयत्। यदि विषादसाहित्यं केवलमानन्दमेव जनयति का नामावश्यकता तथा कर्तुम् ? पठितुः साहित्यानुभूतिस्तस्य मनः परिपाकमप्याश्रयति। बाला भयानककथया वा स्तवेन बिभ्यति, विषादकथया दुःखं च प्राप्नुवन्ति। प्रौढाः प्रायः ईदृशान् मनोविकारानवष्टभ्य अविकलितमनस्काः साहित्यं पठन्ति।

काव्यं सहृदये एवानन्दं निष्पादयतीति भारतीयसाहित्यशास्त्रज्ञा वदन्ति। सहृदयो नाम कविना सदृशहृदयवान्, रसज्ञः। ततो बाला न सहृदयाः; प्रौढाः, तेष्वपि केचिदेव सहृदयाः, तैरेवानन्दः अनुभूयते इत्युच्यते चेत् मैवम्। एवं चेत् तेषां तेषां मानसिकानुभूतीरनुसृत्य साहित्यलक्षणं बालानामेकं, यूनामपरं, वृद्धानामन्यत्, विरागिणामपरं चैवमनन्तानि लक्षणानि वक्तव्यानि भवन्ति। कः सहृदय इति निर्णेतुमपि कष्टम्। ततः कानपि सहृदयान् हित्वा तेषामेव काव्यपठनयोग्यता अस्ति, तेष्वेव काव्य-पठनादानन्दो जायते इति न शक्यम् वक्तुम्। रामवनवासगमनसन्निवेशं वा, भारते स्त्रीपर्व वा पठनादस्मासु नूनं दुःखमेव जायते। A Tale of Two Cities नवलायां Sidney carton शिरश्छेदसन्निवेशपठनावसरे अस्मन्मनो भयाद् वेपते। अनुभवोऽयमस्माकम्, बालानां तथा प्रौढानाम्। अस्माभिरयं स्वानुभवः अवश्यं प्रमाणीकर्तव्यः।

अधुना रसगङ्गाधरकारोक्तं द्वितीयं पक्षं परिशीलयामः। शोककाव्यपठनावसरे किंचित् शोकः अनुभूयते इत्यभ्युपगम्य, शाणोपरि-चन्दनघर्षणक्लेशो न्यूनः, चन्दनात् प्राप्तं सुखमधिकं च यथा भवति तथा शोकः अल्पः, काव्यानन्दः अधिकः, ततः पठितॄणां काव्यपठन-प्रवृत्तिः सम्भवत्येवेत्याह। तन्न समीचीनम्। चन्दनं वस्तु। उपयुक्तं तत् सुखमावहति। काव्यं वस्तु न। कथं नाम तदुपयुज्यमानम् सुखमावहेत् ?

विषादभरां कथां पठन्तो, नाटकं वीक्षमाणाश्च, तात्कालिकं दुःखमनुभूतमपि, अनन्तरं कविनटकानां नैपुण्यं प्रशंसंति। एषा प्रशंसा। प्रशंसैवैषा दुःखकरान् रसानानन्दकरान् करोतीति नाट्यदर्पणकर्तारावूचतुः। तामेवालंकारिका रसानन्द इति व्याहरन्ति। किं त्वेषा अनन्तरानुभूतिः। विषादकाव्यपठनवेलायां यो दुःखानुभवः अस्मासु जातः तन्मानसिकानुभव एव मुख्यः। दृष्टान्तो यथा—पादकन्दुकक्रीडाप्रतियोगिता (Football match) दर्शनावसरे यदा क्रीडा महत्या स्पर्धया प्रचलति, अस्मासु औत्सुक्यं, कस्मिन् क्षणे किं परिणमेदिति अत्यन्तोत्सुकता जायते। क्रीडायामवसि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तयामियमुत्सुकता न तिष्ठति। क्रीडायाः प्रशंसास्मृतय एव शिष्यन्ते। क्रीडासमये या उद्विग्नता अस्मासु जाता सैव वास्तविकानुभूतिः, मुख्या च। अनन्तरा न मुख्याः।

तथैव काव्यपठन-नाटकवीक्षणादिभि र्ये ये सौख्यदुःखभयहास्याद्यनुभवाः तत्काले अस्मासु जायन्ते ते एव सत्याः। अनन्तराः प्रशंसादिकाः तेषां विकृतिमात्राः गौणाश्च ननु कवित्वं, पादकन्दुकक्रीडा च सदृशे किमिति प्रश्ने सदृशे न स्यातां अपितु सजातीये इति ब्रूमः। द्वे ऽपि कले। भवतु नाम प्रथममत्युत्तमकला, द्वितीया अल्पकला च। पादकंदुकक्रीडाप्रतियोगितावीक्षणावसरे औत्सुक्येन सहानन्दोऽप्यनुभूयते, तथैव काव्यपठनादिसमयेऽपि दुःखादिभिस्सहानन्दोऽपि स्यादिति चेन्न। पादकंदुकक्रीडाप्रतियोगिता क्रीडैव। काव्यं तु जीवितसुखदुःखसाफल्यवैफल्यवेदनादीनां सारांशः। तस्मात् काव्यपठननाटकसिनिमावीक्षणवेलासु अस्मन्मानसिकानुभूतीः प्रमाणीकृत्य अभिमन्युमरणं, लक्ष्मणमूर्छा, द्रौपदीपराभवः, Sidney Carton शिरश्छेदः, Lear राजस्य परिस्थितिरित्यादि दुःखकरं साहित्यमस्माकं दुःखमेव जनयति नानन्दमित्येव वक्तुं युक्तम्।

इदानीं रसगङ्गाधरकारस्य शंका अस्मानपि प्राप्नोति। तर्हि शोकमयकाव्यपठने पठकानां प्रवृत्तिः कथं भवतीति। प्रश्नस्यास्य समाधानं मनुष्ये एवास्ति। मानवहृदयं संकीर्णमगाधमपि वर्तते। शोकादपि हसितुं पारयति मानवो मनोबलेन। गतकालानुभूतकष्टानि स्मृत्वा मन्दं हसति मानवः। कष्टपरिस्थितौ वर्तमानायामपि कदाचिद् विषादसूचकं दरहासं करोति। संतोषस्य चिह्नं नास्ति तद्दरहासः, दुःखस्थाने हसनम्। चित्तस्थैर्यहीनो यस्मिन् दुःखसन्निवेशे उच्चैः रोदिति, चित्तस्थैर्यवान् मन्दं हसित्वा तूष्णीं तिष्ठेत्। कंठोद्बन्धनशिक्षां (Hanging) केचिद् धीरोत्तमा देशभक्ता मंदहासेन स्वीचक्रुः। तत्तेषां चित्तस्थैर्यमेव सूचयति। न ते कंठोद्बंधनशिक्षारसास्वादनं कुर्वन्तः आनन्दमन्वभवन्निति।

यदि लोहपथसमापत्त्या (Railway accident) केचिन्मृताः, समापत्तौ म्रियमाणानां प्रयाणिकानां, समापत्त्यव्यवहितानन्तरक्षणे रक्तसिक्तशरीरखण्डान् वीक्षमाणानां च भयं जायते। अनन्तरं तद्दृश्यानि पश्यतां शोको जायते। अनन्तरं तद्वार्तां वितन्तुद्वारा (Radio) शृण्वतां, वार्तापत्रिकासु पठतां चानुभूतिरियती गाढा न भवति। तेषां काचिद्दुर्वार्ताश्रवणमात्रमेव। ततः अनुक्रोश एव जायेत। उपाधिभेदात् कालावकाशदूराभ्यां चैकैव संघटना बहुषु बह्वीरनुभूतीर्जनयति।

साहित्यगताः शोकभयानकादिसन्निवेशाः वास्तवेन न स्वकीयाः पठितुः। अपि तु साहित्यद्वारा स्वकीयसदृशा भवन्ति। अत एव वास्तवजगतो दुःखस्य वार्तया अपेक्षया साहित्यगतं दुःखेतिवृत्तं पठितुर्मनो नितांतं सञ्चालयति। अस्वकीयानां व्यक्तीनां सुखदुःखानि साहित्यद्वारा पठिता अनुभवति। परन्तु सुखदुःखानि तानि परकीयाण्येव, याथार्थ्येन न स्वकीयानि। ततः पठिता न तथा गाढं सुखं वा दुःखं वा अनुभवति यथा स्वस्यैव सुखदुःखाभ्याम्। ततो दुःखभयात्मकं साहित्यं पठितरि दुःखभयादिकमनुत्पाद्य अनुक्रोशं वा चित्तोद्वेगं वा जनयेत्। विषादस्थाने विद्यमानं मन्दहासं वा जनयेत्। तावन्मात्रेण शोको वा भयानको वा कोऽपि साहित्यनिबद्ध आनन्दमेव पाठके जनयतीति वचनं भ्रम एव। ध्वन्यालोककारो वीरवर्णनात्मकं काव्यं पठितरि "दीप्ति" जनयतीति वक्ति। का नाम सा दीप्तिः? वीरगाथापठनजातमुत्साहं विना? ततो यस्मिन् शृङ्गारदुःखवीर्यादिकं निरूपितं तत्काव्यं पठितृषु तत्तादृशानुभूतीरेव जनयतीति युक्तं वक्तुम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीस्वामि-लक्ष्मणशास्त्रि-महाभागानां संक्षिप्तं जीवनचरितं तत्काव्यानि च

वैद्य-श्रीरतनलालमिश्रः, व्याकरणशास्त्री, काव्यतीर्थः, आयुर्वेदाचार्यः, नागौरः ।

पूर्वानुवृत्तम्—

(७) श्रीविष्णु स्तुतिः [चित्रकाव्यम्] अत्र सर्वे श्लोकाः २८ मिताः सन्ति। अत्र काव्ये अश्विन्यादिनक्षत्रविष्कम्भादियोगानां क्रमशः समुल्लेखोऽस्ति। निरीक्षणीया तावदत्रत्या खलु काव्यच्छटा—

स्ववैद्यौ या अश्विनीजौ प्रसिद्धौ,
शिष्यावेतौ यस्य धन्वन्तरे वै ।
विष्कम्भः किं नास्ति तन्नामजापो,
रोगागारद्वाः कपाटं पिधातुम् ॥१॥
उडुवरः शुभकर्मकृते वृथा,
मृगशिराः कथितो बहुधा बुधैः ।
हरिसुनामजपोऽस्त्यतिशोभनः
सकलकार्यविधेः प्रथम यतः ॥२॥
पुष्यः प्रशस्तो हि बुधै र्निगद्यते,
सर्वेषु कार्येषु विना विवाहतः ।
हरेः स्मृतिः कोटिगुणाधिका ततः,
शुभा मतेत्थं मम निश्चिता धृतिः ॥३॥

इत्थं सर्वत्र अश्विन्यादिनक्षत्राणां विष्कम्भादियोगानां च क्रमतः समुल्लेखेन भगवतो विष्णोरेव वर्णनं परिलक्ष्यते ।

वीथ्यां समापत्त्या कस्मिश्चिन्मृते सर्वे तत्र समवेता भवन्ति। भयानकमिदं दृश्यमिति न परिहरन्ति। मानवस्योत्सुकता तादृशी। इयमुत्सुकतैव पठितृ्न् शोकभयादि-साहित्यपठने प्रेरयति। जीवितसुखदुःखयो र्गभीरताः परिशील्य साहित्यनिर्मातारः साहित्यं रचयन्ति। जीवितकष्टसुखयो र्गभीरत्वानि ज्ञातुमेव साहित्यप्रियाः साहित्यं पठन्ति। साहित्यपठनेन पठितृृणां मनो मानवजीविततत्त्वस्य सम्यगवगमनात्त् सारतरं भवति ।

---

(८) "श्रीरामानुजस्तवद्वादशी" अत्र स्वामिरामानुजस्य वैशिष्ट्यवर्णनमस्ति। स्वसमये श्रीस्वामिरामानुजकृतानि यानि कानि कार्याणि सन्ति, तेषां संक्षिप्त-वर्णनं सर्वत्र पद्येषु कृतं कविवरेण। तदप्यवलोकनीयम्—

यः श्रीष्टवैष्णवपथं कलिनोपसृष्टं,
धार्योर्ध्वपुण्ड्रदरचक्रमखोपवीतम् ।
श्रीविष्णुदेवमतनोत्पुनरेवभूमौ,
भूयात्सलक्ष्मणमुनिर्भवतां भवाय ॥१॥
वैकुण्ठलोकगुरुणा हरिणोपदिष्टः,
पाखण्डमार्गनिरतान् विनिवर्तयिष्यन् ।
यः स्वीयलोकमपहाय सदावतीर्णो,
भूयात्स लक्ष्मणमुनिर्भवतां भवाय ॥२॥

इत्थ सर्वत्रवर्णनेन सह कवेर्नामापि चान्ते निर्दिष्टमस्ति। अत्र षोडशमितानि पद्यानि रामानुजस्तवषोडशीत्यभिधयैव लक्ष्यन्ते।

---

(९) श्रीहरिस्तोत्रम् [चित्रकाव्यम्] अत्र वैयाकरणसिद्धान्त-कौमुद्यनुसारेण प्रथमपद्यानुक्रमेण भ्वादि-लड्लकार-ण्यन्तप्रक्रियाप्रथमपुरुषादीनां वर्णनं विहितमस्ति। तदपि दर्शनीयं कवेः काव्यमहत्त्वम् ।

स्व**भ्वादि**वृन्दारकवृन्दवन्दितः,
सवत्र सत्त्वं घटयंस्तिङीव **लट्** ।
पाण्यन्तरोत्क्षिप्तसुदर्शनायुधो,
मल प्रणुद्यात्स न आदिपूरुषः ॥१॥
अदादिभूमध्यडुतान्तशक्तिकं,
स्वभक्तचेतोमधुलिट्श्रिताश्रयम् ।
शेषा**सनन्त**त्त्वमयं चिरन्तनं,
त्रिमूर्तितो मध्यमपूरुषं भजे ॥२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं सर्वत्र भ्वाद्यदादिगण–लडादिलकार-सूर्यादिवाराणां क्रमेण पद्येषु समुल्लेखेन सह भगवतः श्रीहरेर्वर्णनं विहितम् । यज्जपतां सर्वदा कल्याणप्रदमस्ति ।

(१०) श्रीविष्णुचतुर्विंशत्यवतारस्तोत्रम् [चित्र-काव्यम्] अस्मिन् सर्वत्र वसन्ततिलकावृत्त-निबद्ध-पद्यानि चतुर्विंशतिमितानि सन्ति । भगवतो विष्णोश्चतुर्विंशत्यवताराणां श्रीमद्भागवतस्य द्वितीयस्कन्धस्य सप्तमाध्यायानुक्रमेण वर्णनमस्ति । अत्र प्रत्येकपद्यस्य प्रत्येकपादे द्वयक्षरात्मकं यमकं विद्यते । सैषा काव्यकृतिरालोचनीया—

पातालगं क्षितितलं सुरवृन्द**पाता**,
हत्वादिदैत्यमु**दधे** नि**दधे**जलोर्ध्वम् ।
तच्च स्थिरं वि**हित**वान् नि**हित**स्वशक्त्या,
तं संश्रये **प्रथ**मम**प्रथ**मं वराहम् ॥१॥

सर्वं **जग**द्धरिमयं **जग**तीतिवाक्यं,
तथ्यं **विधा**तुमथ चित्रतनूं **विधा**य ।
स्तम्भादजा**यत** सदा **यत**चित्तवश्यः,
सोऽव्यात् त्रिचन्द्र**कलि**तः **कलि**तो नृसिंहः ।२।

प्रथमे पद्ये प्रथमावतारवराहस्य वर्णनं द्वितीये पद्ये च त्रयोदशावतारनृसिंहस्य वर्णनमद्भुतशैल्या कृतमस्ति । नात्र भाषाकाठिन्यमप्यस्ति । विद्यार्थिनां विदुषां च सर्वदाध्येतव्यमिदम् ।

(११) "श्रीतुलसीस्तवपञ्चकम्" अत्र विष्णुप्रियायास्तुलस्या वर्णनम् । भोजने सुमधुरे निष्पन्नेऽपि विना तुलसीदलेन तन्न भुङ्क्ते भगवान् स्वयमपि । प्राञ्जलभाषया सर्वं वर्णितम् । अत्र तुलसी-गुण-गण-गणना साधीयसी । एकद्वान्युदाहरणानि प्रदर्श्यन्तेऽधस्तात् । विमत्सरमनोभिर्मनस्विभि र्गुणगृह्यै रवश्यं दृष्टिपथ-पथिकानि विधेयानि ।

त्वदमल-दल-मिश्रं विष्णुपादाम्बुजाम्बु,
सकृदपि परिपीतं पापपुञ्जापहारि ।
इति निगमकदम्बै र्गीयते तत्र तत्र,
तुलसि मृदुदलां त्वां प्राञ्जलीभूय वन्दे ॥१॥

विविध-मधुरपूर्वैः षड्रसैः संस्कृतान्धो,
निजजन-निवहेनाप्यादरादर्प्यमाणम् ।
त्वदमलदल-हीनं चेत्तदा तन्न भुङ्क्ते,
तुलसि भवदधीनश्चक्रपाणिर्मुकुन्दः ॥२॥

इत्थं श्लोकपञ्चकं तुलसी-गुण-गण-गणनपरमेव कविना वर्णितम् । अत्र भाषा-प्रवाहो गङ्गौघायमानः प्रवहन् सचेतसां चेतो भृशं समाकर्षतीति । अहो ! कवे रचना–चातुरी ?

(१२) श्रीविष्णुस्तवषोडशी [चित्रकाव्यम्] अस्मिन् काव्ये कविना प्रतिपदातिथिमारभ्य अमावस्या-पूर्णिमातिथी यावत् षोडशपद्येषु निखिललोकगुरो र्भगवतो विष्णोरेव वर्णनं विहितम् । काव्यमिदं पादान्तस्थयमकैरतीव-मनोज्ञं चाभाति खलु । पठतां जनानां चेतो झटित्याकर्षत्येव । दर्शनीयं तावदस्य पद्य-मञ्जुल–निकुञ्जम् ।

विविध-वाग्रचनाभिरलङ्कृता,
कृतिरपीह महाकविना कृता ।
भवति विष्णुकथारहिता वृथा,
प्रतिपदापठनं पठतां यथा ॥१॥

संसार-तापहरणे कथिता **द्वितीया**,
विष्णुस्मृतिः सकलसज्जनसेवनीया ।
इत्थं स्वडिण्डिमरवेण विघोषयन्ति,
शास्त्राणि सर्वनिगमागमसारवन्ति ॥२॥

गीता नृता वास्य न युक्तियुक्ता,
नास्मै तृतीया प्रकृतिः प्रयुक्ता ।
देवो न दैत्यो न नरो न सिद्धः,
किन्त्वेष सर्वार्थमयः प्रसिद्धः ॥३॥

यथा बीजं सुप्तं भवति जलतो नैकगुणितं,
सुपात्रे दानं वा वितरति सुखं चित्तविहितम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रभावस्यायतो कृत-सुकृतलेशोऽपि विमलं,
स्मृतिर्विष्णोः पुंसां फलति किमनन्तं शुभफलम् ।४।
हरिं स्मरेद्योऽचलभक्तिभावतः,
सम्मानिताशेष-धृतैकसद्व्रतः ।
पुंसो ध्रुवं तस्य गताखिलव्यथा,
पूर्णा स्पृहा स्यात् तिथि पूर्णिमा यथा ॥५॥

इत्थं सर्वत्र तिथीनां समुल्लेखेन सह कविवरेण भगवतो विष्णोर्वर्णनमतिसुन्दरं कृतम् । स्वमनोज्ञ-काव्य-कलाया अपि प्रदर्शनं सरस-सरल-पद्येषु कृतम् । पुनरपि कविकृता दयालुस्तवषोडशी लघुस्तवराजटीका अन्ये गद्यलेखादयोऽपि सन्ति । प्राप्तेऽवसरे येषां वर्णनं विधास्यते । उपर्युक्तानि सरसानि काव्यानि सन्ति । संस्कृताध्यायिनां विद्यार्थिनां कृते सात्त्विकभावोदयकारीणि सन्ति । येषां भावानामस्मिन् विलासिता-प्रधानयुगे नितान्तमावश्यकतास्ति । एषां काव्यानां पठनेन संस्कृत-पठने मनोऽपि रमतेतराम् । दुरूहकाव्येभ्यो मनः पराजयते । कविना सर्वत्र यथाशक्यं सरलशब्दानां प्रयोगविधाने प्रायत्यत । अन्ते च कवेः सङ्क्षिप्तं जीवनचरितमयं पद्यमेकं लिखित्वा लेखादस्माद् विरम्यतेः—

प्राक् कर्मोदयतो मरौ समभवद् येषां शरीरोदयो,
नागौरे मधुसूदनस्य दयया विद्योदयः सद्गुरोः ।
अन्तेवासिजनेषु पाठनकृतख्यातिः प्रथामागता,
तेभ्यो लक्ष्मणशास्त्रिवर्य-सुगुरुभ्यो मे प्रणामोदयः ।१

अन्ते च निवेद्य निवेदनमिदमस्ति यत् खलूपर्युक्तानि समग्राणि संस्कृत-पुस्तकानि सर्वविध-संस्कृत-परीक्षासु पाठ्यरूपेणावश्यं निवेशनीयानि । येन संस्कृत-प्रचारो भवेत् । एषां सरस-सरल-काव्यानां पठने छात्राणां मनः सुतरां रंस्यते । इति शम् ।

मनोविनोदकणिका—

गणकं प्रति जिज्ञासुः प्राह—

कश्चित् पाणितलं विलोक्य गणको जिज्ञासुमाह द्रुतं—
विद्या तेऽस्त्यधिका त्वया भृशमतः श्रीशारदा सेव्यताम् ।
मान्यं भाग्यविदो वचस्तव, परं काले करालेऽधुना—
गार्हस्थ्यस्य सुचालनाय कथय त्वं, किं मया सेव्यताम् ?

—दीनानाथत्रिवेदी मधुपः
सहसम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुछ विशिष्ट उपलब्धियां

कृषि

राज्य के एकीकरण से पूर्व खाद्यान्नों के अभाव के फलस्वरूप इनका आयात किया जाता था, लेकिन अब उत्पादन क्षमता में वृद्धि के उपरान्त खाद्यान्नों का निर्यात देश के विभिन्न भागों में किया जाने लगा है। खाद्यान्नों का उत्पादन जो १९५०–५१ में २९.०० लाख टन था बढ़कर वर्ष १९६७–६८ में ६६.०८ लाख टन हो गया है।

बिजली

विद्युत क्षेत्र में महत्वपूर्ण प्रगति के कारण जहां प्रथम योजना के आरम्भ में ८ मेगावाट बिजली (फर्म पावर) उपलब्ध थी वह बढ़कर १९६८–६९ में २३.३ मेगावाट हो गई है। इसके अतिरिक्त इन्ही वर्षों में जिन बस्तियों में बिजली पहुंचाई गई है उनकी सख्या ४२ से बढ़कर २,१३६ हो गई है।

तकनीकी शिक्षा

तकनीकी शिक्षा के क्षेत्र में स्नातक स्तर पर प्रशिक्षण क्षमता सन् १९५०–५१, में ६० से बढकर १९६७–६८ में ७३० तक पहुंच गई है।

जन स्वास्थ्य

पिछले २० वर्षों में राजस्थान में अस्पतालों और दवाखानों की संख्या १९५०–५१, में २३४ व १५६ से बढ़कर क्रमश: १९६८–६९ में ३३५ व २२० हो गई है। इसी प्रकार इन वर्षों में रोगी शैय्याऐं ५,७२० से बढकर १२,६३१ हो गई है।

पहले केवल जयपुर में ही मेडीकल कालेज था लेकिन अब उदयपुर, अजमेर, बीकानेर व जोधपुर में भी मेडीकल कालेज है।

सहकारिता

सहकारी समितियों की संख्या १९६७–६८ में २२,४६० तक पहुंच गई है जिनकी सदस्यता १३.८७ लाख है।

कृषकों को १९६८–६९ के अन्त तक संभवतः १२ करोड़ रुपये के अल्प और मध्यकालीन ऋण बांटे जायेंगे। जबकि १९५०–५१ में यह ऋण केवल १४.३५ लाख रुपयों के दिये गये।

सिंचाई

लघु सिंचाई के अन्तर्गत सिंचित क्षेत्र सन् १९५०–५१ में ११.७४ लाख हैक्टर था। संभवतः यह क्षेत्र १९६८–६९ के अन्त तक २३.५० लाख हैक्टर तक बढ़ जायेगा।

शिक्षा

राजस्थान में ३०० या उससे अधिक आबादी वाले ग्रामों में प्राथमिक शिक्षा की सुविधाऐं उपलब्ध हैं। ६ से ११, ११ से १४ और १४ से १७ वर्ष तक की आयु के कुल बच्चों में स्कूल जाने वाले विद्यार्थियों का प्रतिशत १९६८–६९ के अन्त तक क्रमशः ५६.५, २३.३ और ११.०० हो गया है १९५१–५२ में यह प्रतिशत केवल १४.८, ५.० व १.९ था।

जलप्रदाय

सन् १९४९ में ग्रामीण जल प्रदाय योजना नहीं के बराबर थीं। सन् १९६८–६९ में १८९ योजनायें चालू हैं। लगभग समस्त शहर जल प्रदाय योजना के अन्तर्गत लाये जा चुके हैं। इन शहरी जल प्रदाय योजनाओं की संख्या १९५०–५१ में ५ से बढ़कर १९६८–६९ में ७८ हो गई है।

सड़क यातायात

राजस्थान में सड़कों की लम्बाई १९५१–५२ में १८,७४९ किलोमीटर से बढकर १९६८–६९ में ३१,३६३ किलोमीटर हो गई है।

राजस्थान सरकार द्वारा प्रसारित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महात्मा गान्धिर्गोरक्षा च

पण्डितवर—श्रीगणेशरामशर्मा, डूंगरपुरम्

भारत-सर्वकारस्य 'सूचना-प्रसारण-मन्त्रालयस्य प्रकाशन-विभाग' द्वारा हिन्दीभाषायामेका लघ्वाकारा पुस्तिका 'गान्धिर्गोरक्षा च' इत्याख्या सन् १९६७ ई० वर्षस्य-अप्रेलमासे तथा च जूनमासे-आंग्लभाषायां Gandhji on Cow-Protection नाम्ना प्राकाश्यत। पुस्तिकायामस्यां यत्र तत्र महात्मनो गान्धेर्वचनान्युद्धृतानि वर्तन्ते। तानीमानि वचनानि तथाविधेन प्रकारेणोद्धृतानि सन्ति येनेदमनुमानं भवति यदस्याः पुस्तिकायाः प्रकाशनस्योद्देश्यमेतत् प्रदर्शनं स्याद्यद्धि महात्मनो गान्धेर्विचाराः 'पूर्णतो गोवध-निरोधस्य' नियमरचनानुकूला नासन्निति।

यदि च क्षणमेकमेतन्मन्येमहि यत्कदाचिद् गान्धिमहात्मना तथाविधाः शब्दाः स्वलेखादिषु प्रयुक्ताश्चापि भवेयुर्येषामयमर्थो। भवितुमर्हति, यत् सः 'पूर्णतो गोवध-निषेधं' न ववाञ्छ, तथाप्यनेन नैतत् सिद्ध्यति यत् स महात्माऽशतोऽपि भारतेऽत्रदेशे सामान्यतः सदा-सर्वदा जायमानस्य गोवधस्य पक्षपाती बभूव, ततो गोवधनिषेधनियमस्यावश्यकता नास्तीति। महात्मा गान्धिस्तु देशस्यास्य विभाजनस्य विरुद्धमतीव कठोरैः शब्दैः स्वविचारान् प्राचीकटत् परमन्ततो देशविभाजनं बभूवैव।

पुनरत्र विषये तु स्थितिस्तस्मात् सर्वथा विपरीतास्ते। भारतदेशस्य कृते 'पूर्णतो गोवध-निषेध-नियमस्य' तत्कालमनिवार्यावश्यकता विद्यते। न केनापि मतविशेषेण वा वाक्यविशेषेणास्या आवश्यकताया निराकरणं भवितुमर्हति। ततोऽत्र विषये किमपि ब्रूमहे—

प्रोक्तायां पुस्तिकायां तस्या 'गान्धिर्गोरक्षा च' त्याख्यायां महात्मनो 'हरिजन'—पत्रस्य दिनाङ्के १९-२-३८ प्रकाशितस्योद्धृतमेतद् वाक्यं……'अन्ततो मांसविक्रेत्रापि च स्वव्यवसायः कर्तव्यः……।'

वस्तुतो वाक्यमिदं तावत् सन्धर्भ-संगतिं न भजति यावदस्य पूर्वापरः सम्बन्धो न ज्ञायते। केवलमेकस्य वाक्यस्योद्धरणान्महात्मा गान्धिर्गोवधं समर्थयते किं वा चाण्डालानां मांसविक्रय-व्यवसायं सोऽनुमोदत इति वक्तुं न सम्भवति। यतो महात्मा गान्धिमहोदयः सत्यस्याहिंसायाश्च पूजकोऽभूत्। अद्यत्वेऽधुनातन-विज्ञानस्य महत्यामुन्नतौ जातायामपि च भारतदेशेऽत्र गोवधकर्तारश्चाण्डाला यथा निर्दयतया क्रूरतया च पूज्यं गोवंशमपघ्नन्ति, तद्यदि महात्मनः समक्षमभविष्यत्तदा स नूनं दयार्द्रो निष्करुणं दुष्टमिमं व्यवसायमवश्यमेव हि तत्कालं समाप्तिमनेष्यत्।

पशुवधस्य व्यवसायः

पशून् प्रति मानवेन कृतानां क्रूरात्क्रूरतराणामनावश्यकानां कष्टानामुत्पीडनानां विचारोऽपि चातीव कष्टप्रदोऽस्ति। सत्यपीदमित्थं विषयेऽस्मिन्नस्माकं ध्यानमपि न भवति यदिमे-मूकाः पशवः स्वकष्टवेदनानामभिव्यक्तिं कर्तुं न समर्थाः वयं जीवहिंसां कुर्मस्तामपि केवलं विनोदाय। तेषां कष्टानि न विचार्य तद्वत्सान् वधस्थलं नयामो राक्षसवदतीव निर्दयतयापहन्मः। वत्सानां रक्तं शनैः शनैरपवाह्यते येन तेषां श्वेतं मासमुपलभ्येत कलकण्ठं संगीतमिव गायतां पक्षिणां बुद्धिपूर्वकमेतदर्थमन्धीकरणं क्रियते येन ते मधुरस्वरं गायेयुः। सर्पाणां पल्लीनां च चर्म तेभ्यो जीवितेभ्य उच्छिद्यते, येन तच्चर्मणि दोषो नावशिष्येत।

अस्माकमत्र देशे भारते वधात् पूर्वं पशुभिर्वर्णनातीतं कष्टमत्याचाराश्च सोढव्या भवन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतद् सर्वविदितं तथ्यं यद्येषां पशूनामुपयोगो नास्ते तैर्वधशालाया दुःखदे वर्त्मनि गन्तव्यं भवति। ते पशवोऽत्यन्तं कष्टदायकेन प्रकारेण रज्वापबन्ध्यन्ते भूमाववाङ्मुखं घर्षमाणाश्च ते वधस्थानं नीयन्ते। अग्रपादौ पश्चात्पादौ च तेषां सुदृढं बध्यन्ते तथातिशीघ्रतया तद्ग्रीवामाम्रेडचशिरो भ्राम्यते येन ते पशवः स्वसन्तुलनमपहाय निपतन्ति। अतः परं तान् पशून् क्रूरतापूर्वकमवच्छेद्य खण्डं खण्डं ते विच्छेद्यन्ते। तदिदं जघन्यं कर्मान्येषां वधार्थमानीतानां पशूनां दृष्टेः पुरतो भवति।

अतोऽतिरिक्तं वधार्थं नेष्यमाणानां स्वस्थानामपि पशूनां केषांचित् पशूनां दन्तवलीः खण्डयन्ति, केषाञ्चिच्छङ्गवलीर्भङ्क्त्वा तथा त्रोटयन्ति व्यवसायिका येन तेषां निरीक्षकस्ताननुपयोगिनः स्वीकृत्य वधायानुमतिं प्रयच्छेद्वत ! ये च पशवो गावो बलीवर्दा अजा गडुरिकाः शूकरादयो निरीक्षकेण वधार्थं नानुमन्यन्ते तान्नगरादूरं नीत्वा ग्रामेषु निघ्नन्ति चाण्डाला व्यवसायिनः। एवं नानाविधैस्त्रासैरुत्पीड्योत्पीड्यान्तेऽपहन्यन्ते पशवः।

अथ च–देहलीतः प्रकाशिते आर्योदयनामके पत्रे १६–६–१९६८ दिनस्याङ्के प्रकाशितमेकमेतद्विषयकं वर्णनमपि पश्यन्तु पाठकाः—

"देहलीदिशस्त्रिषु विशालेषु ट्रकमृत्तरयानेषु संस्थाप्यात्र (वधशालां) अजा गडुरिकाः शूकरादयः पशव आनीयन्ते। एकस्मिन् महति कक्षे ते सर्वे सम्मर्दे परिपूर्यन्ते। मृत्योः सूचना पशूनामज्ञाता न भवति, ततस्तेऽतीव भयाद्भीताः कम्पमानाश्च भित्तिमनुलग्नास्त्रस्ताश्चावतिष्ठन्ते। तेषा गमनार्थमेकं लघुद्वारं भवति। अन्तरत उत्पीड्य त्रिचतुष्प्रायाः पशवो युगपन्निष्कास्यन्ते। एको जनो विद्युत्कङ्कमुखं दीर्घाकारमादाय पूर्वतस्तत्र सन्नद्धः स्थितो भवति। स च तेन कङ्कमुखेन शूकराणां कर्णे निष्पीड्य तान्मूर्च्छितान्विधत्ते येन ते वशङ्गता अनायासमपवध्येरन् एवं कृते स पशुः करुणाकरुणमाक्रोशति, चीत्करोति तथान्ये पशवश्चापि प्रोच्चैश्चीत्कारान् कुर्वन्ति परन्तु विद्युत्कङ्कमुखेन (चिमटा) मूर्च्छितस्य पशोः पश्चात्पदयोर्लोहकण्टकमासज्यावाङ्मुखमवलम्ब्य यन्त्राणां साहाय्येन स जलकुण्डमेकं नीयते। तत्रैकस्तृतीयो जनो दीर्घया-च्छुरिकया तस्य शूकरस्य पशोः गलं विदार्य बालटिकापात्रे तद्रक्तं संचिनोति।

ततस्तं पशुमत्यन्तं तातप्यमानेन जलेन परिपूरिते कुण्डेऽवतारयन्ति येन तद्रोमाणि मार्दवं भजेयुः। क्षणादनन्तरं छुरिकया तच्छरीरमपमर्दच स्वच्छीक्रियते। एतावत्कालपर्यन्तं पशोरन्तःप्राणा वर्तमाना भवन्ति ततः स यन्त्रणया वेदनाविक्लवो भवति। ततस्तस्य शिरोऽच्छेद्यान्यत्र स्थाप्यते तदनु तदुदरं विदार्य अन्त्राणि समाकृष्य निष्कास्यन्ते।"

प्रत्यक्षदृष्टात्र प्रकरणे वर्णयति–"मम जीवने प्रथमवारं कमपि पशुमपवध्यमानमद्राक्षम्। अस्याः क्रूरताया नग्नप्रदर्शनस्य बीभत्सं दृश्यं पश्यतो मम महांस्त्रासो बभूव, वमनोन्मुखोऽभूवम् परन्तु वज्रवत् कठोरं हृदयं कृत्वा प्रत्येकां तां प्रक्रियामहमपश्यम्।"

अत्र पाठका अवदध्युर्यन्महात्मा गान्धिमहाभागोऽहिंसाव्रतपरिपालकः कथमिवैतादृशीं क्रूरतापूर्णामत्यन्तं जुगुप्सितां राक्षसानामपि हृदयोत्कम्पकारिणीं जघन्यां हिंसां समर्थयेत ?

गोवधविषये महात्मनो गान्धेर्वास्तवा विचाराः

महात्मा गान्धिमहाभागो 'यंग इण्डिया' इति पत्रे ६–१०–१९२१ दिने विषयेऽत्र लिलेख—

"पशूनामाक्रोशाभ्यर्थनाऽस्माद्धेतोरपि च श्रोतव्या भवति यत्ते स्ववेदनाभिव्यक्तावसमर्थाः सर्वथा मूकाः सन्ति जीवाः।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततः सोऽग्रे लिलेख—"यदि च विशुद्धे ना- थिकेन दृष्टिकोणेनापि दृश्येत तदा दुर्बलानां गवां व्यर्थप्रायाणां बलीवर्द्दानां च वधे विमर्शस्य नास्त्येवावश्यकता, परन्त्वेवंविधाया अर्थव्यव- स्थाया भारते स्थानं नास्ति।"

तत्रैव सोऽग्रे लिलेख—

"पशुषु निर्दयताप्रदर्शनेन समकालमेव वय- मीश्वराद्धिन्दुत्वाच्च विमुखा भवामः।"

वाक्यैरेभिरुपर्युद्धृतैर्बधिका एवंविधे क्रूरे व्यवसाये स्वोदरदरीपूरणाय नियुज्येरन्निति महात्मनो गान्धेः—योऽहिंसा परमो धर्मः इति मन्वानोऽभूत्—न कदाप्यभीष्टं भवितुमर्हति।

भारतेऽत्र गोधनस्य गवां हीना दशा किमर्थम् ?

विषयेऽत्र महात्मनो गान्धिमहोदयस्य कानि- चिद्वचांस्युद्धियन्ते यैः सूर्यप्रकाशवत् स्पष्टं भवति यत् स गावां हीनदशामालोक्यात्यन्तं चिन्ताकुलो भवति स्म—

"भारतदेशोऽसावपलज्जेत नाम नूनम् यत् प्रतिवर्षं स एष नवकोटिरूप्यकां मूल्यवन्ति मृतानां (वधशालास्वपहतानां) पशूनां चर्मणां निर्यातं करोति तथा स्वावश्यकतार्थमपि च पशून् व्यापाद्य चर्माण्यादत्ते।"

—यङ्ग इण्डिया २२।१०।२५

"दुर्भाग्यात् समग्रेऽपि संसारे हिन्दूनां पूज्यस्य पशोर्गावो हिंसनं न क्वापि चैतावत् समर्घमास्ते यावद्धिन्दूनां देशेऽत्र भारते वर्तते"।

यङ्गइण्डिया २६-१-२५

"केषांचिदयं विचारोऽस्ति यत् पशुधनं देशे भारभूतमस्ति। नाहं विचारमेतं स्वीकुर्वे"।

—हरिजनः ३०-११-४७

ऋषि-मुनीनां तपोभूमौ, भगवतो लीला- भूमौ, सतां महात्मनां भक्तानां च साधनभूमावत्र भारतेऽतीव पवित्रायां भूमौ तन्निवासिभिस्तमो- ऽभिभूतै र्मोहवशादत्यन्तविशालं 'वधभूमित्वं' 'निरीहाणां प्राणिनां हत्याभूमित्वं' परिणम- दास्त इति महानेव चिन्ताविषयोऽस्ति।

पशुषु धेनुः सर्वेभ्योऽधिकं पवित्रा वर्तते। सास्माकं पूज्या माता विद्यते, सैवाद्यत्वे परस- हस्राधिकसंख्यायां हिंस्यते, तदिदं कियद्भीषणं दुर्दैवं विजृम्भते। कियद्घोरं दुर्भाग्यं वर्तते !!

विषयेऽस्मिन्महात्मा गान्धिमहाभागो 'हरि- जन' पत्रस्य १६-६-३७ दिनाङ्के लिलेख—

"कालिकातासदृशे नगरेऽपि च दुग्धस्य पूर्तेरावश्यकतास्ते। हरियाणाप्रदेशस्य सर्व- श्रेष्ठस्य गोवंशस्य गावः कालिकातां नीयन्ते— परन्तु ता यावदेव दुर्बलतामुपयान्ति, चाण्डा- लेभ्यः विक्रियन्ते। अस्यासौ परिणामो बभूव यद्धि पञ्जापः प्रान्ते हरियाणावंशानां गावो दुर्लभा भवन्त्यो विद्यन्ते। गावस्तु जातुचिच्चाण्डा- लानां हस्तगता भवितुं न युज्यन्ते।"

यंगइण्डिया-पत्रे २६-१-२५ दिनाङ्के महात्मा गान्धिर्लिलेख—

"अहं विज्ञापितोऽस्मि यदहमदाबादसदृशे धनिके नगरेऽपि तादृशाः श्रमिका दीनदीनाः सन्ति येषां गृहिण्यः स्वबालकान् पिष्टे जलं व्यामिश्र्य पाययन्ति। अतः परं नाधिकः कोऽपि क्लेशस्य विषयो भवितुमर्हति यद्दीनजनेभ्यः पानार्थं शुद्धं श्रेष्ठं च दुग्धं नोपलभ्येत।"

गान्धेर्महात्मनो वाक्यैरेभिः स्पष्टतया ज्ञातं भवति यत् स मनसा, वचसा, कर्मणा च न कदापि गोवधं समर्थयते स्मेति।

भारतमधिवसद्भिरन्यधर्मावलम्बिभिर्विधि- विधाननियमैश्च गोवधनिषेधस्य प्रश्नः

यंगइण्डिया इति पत्रस्य ७-७-१९२७ दिनस्य अङ्के महात्मना गान्धिना लिखितमभूत्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"अहं धर्मे सर्वकारस्य किंविधमपि हस्तक्षेपं नेच्छामि। तथा च भारते गावः प्रश्न आर्थिको धार्मिकश्चेति द्विविधो वर्तते। यावदर्थ-व्यवस्थागतः प्रश्नोऽस्ति, नाहमेतत्कथने मनागपि शङ्के यदुद्देश्यस्य पशु-धनस्य रक्षणं नाम प्रत्येकस्य शासनस्य कर्तव्यमास्ते कामं तच्छासनं हैन्दवं वा भवेद्वामोहम्मदीयं वा ..."
अतोऽग्रे स महात्मा लिखति—

"हैन्दवं राज्यमपि चैतादृशं गोवधमवरोद्धुं न शक्नोति यं प्रजानां वर्गविशेषो धार्मिकं कृत्यं मन्येत यं च स्वगृहे हिन्दूनां धार्मिकीं भावनां निहन्तुं सङ्कल्पं विनाऽऽचरेत्।"

विषयेऽत्राचार्य-श्रीविनोबाभावेमहाभागोऽपि च कथयति—

"अहं मुस्लिम धर्मस्य धर्म-ग्रन्थानामपि चाध्ययनं कृतवानस्मि तथा सविश्वासमहमेतद्वक्तुम् पारये यद्गोवधस्य समर्थनं वत मुस्लिमधर्मस्यावमाननास्ते। अहं मुस्लिमधर्मस्य पक्षाद्ब्रवीमि तथा चासौ मम विश्वासोऽस्ति यद्विषयमेतमधिकृत्य न कोऽपि च मुशलमानो विरोधं करिष्यते यद्धि पवित्रे कुरानग्रन्थे नैकोऽपि चैतादृशः प्राचीनः शब्दोऽस्ति यदनुसारं गोवधः कामितो भवेत्। इयमेव वार्ता हिन्दूनां धर्मशास्त्राणां सम्बन्धेऽपि च वक्तुं शक्यते यानि हिंसां कस्यापि प्राचीनशब्दस्यानुकूलां न मन्यन्ते। हिन्दवश्च मोहम्मदीयाश्चोभयेऽपि च तावत्पर्यन्तं बुद्धिमन्तोऽभिधातुम् वास्तविकेऽर्थे न शक्यन्ते, यावत्ते धर्मस्य व्यपदेशात् पशूनां वधं न त्यजन्ति।"

—एसेज आॅन इण्डियाज केटलइकोनामी पृ. ११-१३

यदि च मुशलमान-धर्मे गोहिंसावश्यकी समभविष्यत्तदा मोहम्मदीयाः सम्राजो न कदापि च गोहत्या-निषेधस्याज्ञामादेक्ष्यन्नाम। न च प्रभोरोषो धर्मे चेत्थंविधं विधानमास्ते, कामं ते मांसाहारा भवेयुः। सत्यं तथ्यं त्वेतदास्ते यत्तेषां धर्मग्रन्थेऽपि चास्य पशोर्वधो निषिद्धोऽस्ति। निम्नाङ्कितानि वाक्यानि दृश्यन्ताम्—

For meat destroy not the work of God.

बाइबल (Romans 15/20)

अर्थान्मांसार्थं भगवतः कृतिं मा विनाशयत।

It is good neither to eat flesh nor to drink wine, nor anything whereby thy brother stumbleth, or is offended, or is made weak.

(Romans 15/21)

अर्थात्—न तु मांसभक्षणं शोभनमास्ते न च सुरापानम्; न च किमप्येतादृशं कर्माचरणं शोभनं वर्तते येनास्माकं बन्धुरुत्कम्पेत, व्यथेत वा दुर्बलो वा भवेत्।

Sacrifice and offering Thou didst desire;

Mine ears have thou opened brunt offering and sin offering Thou not required.

अर्थात्—हे भगवन्! त्वं जीवानां बलिदानं नाकामयथाः, अग्नौ तेषामाहुतिं नैच्छः। एवंविधानि पापानि न तेऽभीष्टानि वर्तन्ते। त्वं मम चेतनामजागरयः।

I will take no bullock out of Thy house, nor he goats out of Thy folds.

(Psalms 50/9)

अर्थात्—नाहं ते सृष्टे वृषभान्न चाजानपाकरिष्ये।

एवं विधान्यनेकान्युदाहरणान्युद्धर्तुं शक्यन्ते यैः प्रमाणितं भवति यज्जगतो विभिन्नधर्मग्रन्थैर्विभिन्नधर्मावलम्बिभिश्च पशुवधो-विशेषतो गोवधो-निषिद्धोऽस्ति। अत्रावश्यकतास्ते भूतदयायाः प्राणिनः प्रति सम्वेदनशीलताया द्रढीयसः सङ्कल्पस्य च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदि च भारत-सर्वकारो नियमविधानेन गोरक्षां निषेद्धुम् नेच्छति चेत्तदा महात्मनो गान्धेस्तां योजनां स्वीकृत्य तत्कालमेव तामाघोषयतु कार्यरूपे च परिणमयतु या यङ्ग-इण्डिया-नाम्नि पत्रे ७-७-१९२३ दिने प्रकाशितास्ते। सा च योजनेत्थं वर्तते—

१—सर्वकारः सर्वजनसमक्षं विक्रीयमाणं प्रत्येकं पशुं समधिकं मूल्यं दत्त्वा स्वयमेव क्रीणीयात्।

२—सर्वकारो महत्सु नगरेषु स्वतत्त्वावधाने दुग्धशालाः संस्थापयतु येन लोकाः समर्घं दुग्धं लभेरन्।

३—सर्वकारः स्वेन पालितानां पशूनां मृतानां चर्माण्यस्थीनि चोपयोजयितुं चर्मसंशोधनाय कर्मशालाः परिचालयतु तथान्यान् मृतान् पशूंश्च क्रीणातु।

४-सर्वकार आदर्शभूताः पशुशाला उद्घाटयतु तथा लोकान् प्रशिक्षयतु यत्पशवः कथं परिपाल्यन्ते तथा तद्वंशपुधारः कथं विधीयत इति।

५—सर्वकारः पशूनां कृते पर्याप्तगोचरभूमेर्व्यवस्थां विदधातु तथा पशु-पालनाय विश्वस्य विभिन्नेभ्यो देशेभ्यः श्रेष्ठतमान् विशेषज्ञान् समामन्त्र्य तद्द्वारा पशुपालनस्य वैज्ञानिकान् विधींश्च शिक्षयतु लोकेभ्यः।

६—एतत्कार्यनिमित्तं पृथगेकः सर्वकारीयो विभाग उद्घाट्येत। स एष विभागो न खलु द्रव्योपार्जनाय प्रचाल्येत वरञ्च विभागेनानेन श्रेष्ठजातीयानां पशूनां वंशवृद्धये, तत्पालने, पोषणे तथान्यान्येषु पशूनां हितकरेषु कर्मसु साहाय्यमुपलभ्येतेति।

आशास्यते, भारतसर्वकारो धर्मदृशार्थशास्त्रदृशा लोकानां योगक्षेमदृशा तथा च सर्वतोऽधिकं मूकपशून् प्रति स्वकर्तव्यदृष्टया च नेमं विषयमुपेक्षेतेति।

गिरने से पहले उनकी रक्षा करें

[illegible]

इलाज से बचाव बेहतर है।

[illegible]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिपासाया मरुभूमौ महाकविः शेली

मूललेखकः-श्रीइलाचन्द्रजोशीमहाभागः, अनुवादकः-विद्याभूषणः श्रीगणेशरामशर्मा, डूँगरपुरम्

पूर्वाऽनुवृत्तम्—

हंटमहाशयः स्वपत्न्या सह-इटालीमाययौ। स यदा शेलिनममिलत्तदा तौ द्वावपि (हंटदम्पती) ददृशतु र्यत्तस्य (शेलिनः) स्वास्थ्यमतीव शोभनमभूदिति। परन्त्वकस्माच्छेलिनो मुखात्तदेतन्निर्जगाम—"यदि च श्वो मे मृत्युर्भवेत्तदाहं स्वपितुरपेक्षयाधिके स्वायुषि मरिष्यामि, यतोऽहमेतावति स्वायुषि जीवनस्य कटु-मधुराननुभवानन्वभूवं यदधुनाहं स्वात्मानं नवतिवर्षायुषं चिन्तयामि!"

अथ हंटमहाशयं पीसा-पर्यन्तं प्रापयित्वा शेली मेर्याः सन्निधौ शीघ्रमेव गमनस्य विचारेण पुन र्विलियम्समहाशयेन सार्द्धं लेगहार्नस्थानमाजगाम। तत्र तावेकां नावमारुरुहतुः। ताभ्यामसौ सूचनादीयत यन्मध्येमार्गं झञ्झावातस्तावपबाधेत, यद्यपि तदानीं सुन्दरं शोभनं प्रशांतमृतुवातावरणमासीत्। परन्तु तौ प्रस्थानमेव विनिश्चिक्यतुः। ८ जुलाई दिने तौ नावमेकामारुह्य प्रतस्थाते। सन्ध्या-समये सहसा भीषणो ह्येको झञ्झावातः समुत्तस्थे। शेलिकवेर्घनिष्ठं मित्रं ट्रेलानी तद्दिने लेगहार्नस्थान एवासीत्। स हि शेलिनं नावमध्यारोप्य प्रस्थानमकारयत्। प्रभञ्जनोत्पातं वीक्ष्य सोऽत्यर्थं समुद्विग्नो बभूव। स खल्वतितरां प्रयेते परन्तु शेलिकवेस्तरण्याः कमपि सम्वादं नाससाद। दिनद्वयं यावत् सः समाचारमाप्तुं प्रतीक्षमाणस्तस्थौ। तृतीये दिने चिन्तितावस्थायां पीसां जगाम, यत्र बायरन महाशाय स सर्वं वृत्तान्तं कथयामास तथा चिन्तां प्राचीकटत्। श्रुत्वा च बायरनमहाशयोऽपि शशङ्के। प्रश्नकाले तस्याधरोष्ठं चकम्पे, जिह्वा च स्खलन्ती समभूत्।

इतो मेरी, जेना च स्वपत्योः कस्यापि समाचारस्यानुपलब्धेर्हेतो र्महतीं चिन्तामन्वभूताम्। यदा ते शुश्रुवतु र्यत्तयो र्द्वावपि भर्तारौ प्रभञ्जनोत्पातसमये तरण्यामारूढावास्ताम्, तदा तु तयोश्चिन्तायाः सीमा नावशिष्यत। ते द्वेऽपि च लेगहार्न-मार्गेण पीसां जग्मतुः। तत्र बायरनेन यः प्रासादो भाटकेन गृहीतोऽभूत्तं तत्र प्रापतुः। तत्रापि च न कोऽपि समाचारोऽमिलत्, तदतिरिक्तं यच्छेलो विलियममहाशयश्च तरण्या गृह गन्तुम् प्रतस्थाते, इति। ते द्वेऽपि च रात्रौ द्वादशवादनसमये पीसातो लेगहार्नं प्रति प्रतस्थाते। रात्रौ द्विवादनवेलायां लेगहार्नं प्रापतुः। प्रातः षड्वादनसमये शेलिकवे र्मित्रेण राबर्टसमहाशयेन तयोः साक्षात्कारो बभूव। सोऽपीदमेवावोचत्, यदधुनावधि शेलिनस्तरण्याः कोऽपि च सम्वादो नासादित इति। एको दूतः समुद्रस्य कूलं प्रतिकूलमनुकूलं च पर्यटन् शेलिकवेः समाचारमाप्तुम् प्रेषितः। ते द्वेऽपि च शेलिकवेरन्येन घनिष्ठेन मित्रेण तज्जीवनीलेखकेन ट्रेला निनासह स्वगृहं पुनर्न्यवर्तताम्। मार्गे वायारेजियो इति नामके स्थानेऽज्ञायत यच्छेलिकवेर्नौस्तथा तदन्तर्निहिताः सम्भाराः वहन्तः प्रवहन्तस्तत्रत्य-सिन्धु-तीरेण सहागत्याहन्यन्तापि परन्तु यात्रिणां स्थिति-विषये किमपि ज्ञानं नास्त इति।

अथ १३ जुलाई दिने ते गृहं प्रापुः। १७ तारिकां यावन्न कोऽपि च समाचारोऽलभ्यत। १८ जुलाई दिने ट्रेलानी पुनर्लेगर्हार्नं गन्तुम् प्रतस्थे। सन्ध्यासमये यदा सः प्रतिनिवृत्यागतस्तदा सः खेदखिन्नेन स्वरेणोक्तवान्—शेलिकवेः शवो वायारेजियो-स्थानस्य समीपं समुद्रस्य तटमाजगाम तथा च विलियम्समहाशयस्य शवः क्रोशद्वयदूरेऽलभ्यतेति। शेलिकवे र्निचोलस्यैकस्मिन् स्यूते सोफोक्लीजस्य (यवनदेशस्य महा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दार्शनिकस्य) ग्रन्थोऽलभ्यत तथान्यस्मिन् स्यूते कीट्सकवेः काव्यानामेकं पुस्तकमाप्यत । श्रुत्वा च शेलिकवे द्वे चापि पत्न्यौ सशिरस्ताडं, सविलापकलापं च भृशम् करुण-करुणं रुरुदतुः ।

यदा शवयोस्तयो र्भू समाधेः प्रश्नोऽभ्युत्तस्थे तदा मेरी तामिमागिच्छां प्राचीकटद्यच्छेलिकवे-र्मृतदेहो रोमदेशे तस्या बालकस्य समाधेः समीपं भूमिसात् क्रियेतेति, परन्तु दिनेषु तेषु कारंटाइनइत्याख्यः प्रतिबन्धोऽभूत् (संक्रामकानां रोगाणां प्रसाराद्रक्षार्थमांशिकोऽस्थायो च प्रति-बन्धः समभूदिति)। ततस्तौ द्वावपि च शवौ चिताग्नौ प्रज्वालयितुम् निश्चयः कृतः । अतोऽ-तिरिक्तमिदानीं तावेतौ शवौ विकृतिं गन्तुमारे-भाते । ततो वायारेजियो-स्थान एव द्वे चिते सज्जीकृते । बायरनमहाशयो हंटश्चापि त्र यथा समयं तत्र प्रापतुः । बायरन प्रस्तावं चक्रे यदस्य शेलिमहाकवेश्चिता तथैव विरच्येत यथा शेली स्वयं प्राचीनानां ग्रीकसुन्दरीणां चितानां शृङ्गार-सज्जा-वर्णनं स्वकाव्य–रचनासु कृतवानिति ।

तथैवाक्रियत । प्रथमदिने विलियम्समहा-शयस्य चिता प्राज्वाल्यत । अन्येद्युः शेलिकवेः । शेलिकवेश्चितां वायरनस्तथान्ये सुहृदश्चादौ सुगन्धिताभि र्धू पवर्तिकाभिः सज्जयित्वा प्राज्वा-लयन्, ततः पुनश्चन्दनकाष्ठैः संसज्जितायां चितायां सुरापात्राण्यवानामयन् । बायरनः स्वहस्तेनाग्निसंस्कारं चक्रे । क्षणादेव चिता-ज्वालामालाभिः सह प्रजज्वाल । मधुरो धूपगन्धः समस्तमपि वायुमण्डलं राजत्यामुज्ज्वलतायां परिणतं चकार । समुद्रस्य नीलं जलं प्रश्वेत-बुद्बुदानां मालां नीत्वा चितायाश्चरणेषु महा-कवि तं प्रणनाम तथा तस्यानन्तसौन्दर्यप्रण-यिनं निश्छलं निष्कपटं चात्मानं मङ्गलाभिषे-केनाभिषिञ्चदासीत् । महाकवेस्तस्य चितां सर्वतः स्वात्मीयाः स्वजनाः सम्बन्धिनो दर्शकाश्च चितां तां परिवार्यस्तब्धभावेन संस्थिता आसन् । एकः स्वातन्त्र्यप्रणयी किन्तु स्वलक्ष्यादपभ्रष्टश्चात्माद्य स्वलक्ष्यस्य सत्यं सरलं च पन्थानमासाद्य यथो-र्ध्वमुखं प्रकाशयुक्तं रथविमानमारुह्याव्याहतम-नन्ताकाशस्य ज्योतिषा साकं स्वान्तर्ज्योति-र्विलीनीकर्तु मिव प्रसन्नमुद्रयोर्ध्वं प्रमाणं कुर्व-न्नासीत् ।

घटनयानया बायरनः स्वस्य जीवने प्रथम-वारं वास्तविकं, मार्मिकं च दुःखमनुबभूव । स खल्वतीवाखर्वगर्वोद्दृप्तोऽभूत् । इङ्गलैंडस्य केनापि लेखकेन, कविनालोचकेन वा तस्य व्यक्तिगतं सौमनस्यं नासीत् । अत एव हि सः शेलीव सदा सर्वदा सार्वकालिकमिङ्गलैंडभूभागं परित्यज्येटालीमागत्याध्युवास । परन्तु शेलि-कविमिटाल्यां निकटत उपलभ्य तस्य मुक्त-प्रसन्नं स्वभावं, प्रकृत्या सहैकान्तप्रणयं, कल्प-नायाः प्रोच्चैः प्रस्फुरणम् प्रौढं पाण्डित्यं, साकमेव बालकानामिव क्रीडाकौतुकलोला-विलासपूर्णं चाञ्चल्यं चालोक्य बायरनमहाश-योऽनुबभूव यत् स जन्मजन्मान्तरसुहृदमुपलेभ इति । येषां तत्त्वानां स्वयम् तस्मिन् (बायरन-महोदये) अभावोऽभूत्, परं यानि तत्त्वानि तस्यावचेतना जीवनपर्यन्तमन्विष्यन्तो समभूत्ते-षामस्तित्व सः शेलिकवावुपलेभे । स हि शेलि-कविं स्वस्य वैयक्तिकात्मन एवात्यन्तमावश्यकं तथा चानिवार्यरूपेण पूरकमर्द्धांशमिव स्वीकृत्य-मन्तुमारेभे । अतः शेलिकवेराकस्मिकान्मृत्यो-स्तस्य मेरुदण्ड एवाभज्यतेव । फलस्वरूप स्वल्प-समयानन्तरमेव तस्यापि मृत्युर्ग्रीसयात्रासमये जलपोते–एव रुग्णत्वाद् बभूव ।

शेलिकवेर्मृत्योरनन्तरमपि च तस्य जीव-नस्य कट्वालोचकानां न्यूनता न बभूव । बायर-नस्तान् सर्वांल्लोकान् सम्बोधयन् महताऽऽवेशेन कथयामास—"यूयम् सर्वे लोकाः शेलिकविम-न्यथा बुध्यथ । प्रत्यकं व्यक्तीनां यमहं ममास्मि-ञ्जीवनेऽद्राक्षमजानाम् च, स शेलिकवेस्तुलनायां पशुरासीत् ।"

सन् १९६८ वर्षस्य जुलाई मासस्य "काद-म्बिनीतः" साभारम्— अनुवादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ श्रीशिवराज्योदये महाकाव्ये
३६ सर्गः

महाकविः डॉ० श्रीधरभास्करवर्णेकरः, डी.लिट्, नागपुरम्

लब्धप्रवेशोऽथ विशालदुर्गे
शीघ्रं पराजित्य हि सूर्यरावम् ।
प्रतीक्षमाणः स्वसुहृद्‌गणं तं
ददर्श चारं पुरतः शिवाजिः ॥१॥

उदन्तजातं समरस्य तस्माद्
आकर्ण्य हर्षाकुलमानसोऽपि ।
यशोऽवशेषं सुहृदं विदित्वा
वज्राहतिं सोऽनुबभूव घोराम् ॥२॥

तस्मिन् क्षणे तस्य सुहृद्वरस्य
सा मूर्तिरत्युत्कटभक्तिभाजः ।
दिव्यौजसा भूरि परिस्फुरन्ती
शिवेन सास्रं ददृशेऽन्तरङ्गे ॥३॥

वाणी तदीया विशदाक्षरा च
सुव्यक्तमन्तःश्रवणेन्द्रियेण ।
संश्रूयमाणाऽद्भुतभावरम्या
न्यमज्जयन्मोहमहाम्बुधौ तम् ॥४॥

स्वामिन्मयात्यल्पबलेन चापि
त्वद्भक्तिसंप्रेरितदिव्यशक्त्या ।
कल्पान्तवातेरितसागरोत्थ-
कल्लोलकल्पा रिपवो निरुद्धाः ॥५॥

परन्तु हा हन्त तनुर्मभेयं
त्वदन्नपुष्टाऽपि कृतघ्नभूता ।
त्वदीयकल्याणविबोधकं तं
ध्वनिं ह्यनाकर्ण्य भुवं प्रपन्ना ॥६॥

प्राणा इमे प्राप्तविमूढभावाः
भृशत्वरास्त्यक्तुमिमां तनूं च ।
निरोधिता भूरिपरिश्रमेण
मयारिसंघालवदेव देव ॥७॥

इत्थं सुकार्ये महती त्वदीये
जातः प्रमादः खलु यः कथञ्चित् ।
तत्प्रार्थये भूतलनम्रशीर्षः
क्षमस्व तं देव ममापराधम् ॥८॥

इतीरयित्वा गिरमार्तनेत्रा
तेजोमयी साद्भुतबाजिमूर्तिः ।
अर्चिष्मता दिव्यपथेन यान्ती
शिवेन भक्त्या सुचिरं ववन्दे ॥९॥

बद्धाञ्जलिर्निर्गलदश्रुनेत्रः
विलुप्तनैसर्गिकसुस्मितोऽसौ ।
मुहुः श्वसन् दीर्घतरं शिवाजिः
सुहृद्‌गणैर्दूनतरैर्व्यलोकि ॥१०॥

विशालदुर्गे कतिचिद्दिनानि
कृत्वा निवासं स यशोनिवासः ।
निजात्मजापद्‌भिरजस्रदूनां
तां मातरं द्रष्टुमना बभूव ॥११॥

महत्तमापत्तिनितान्तमग्न-
स्वपुत्रकल्याणनिमित्तमेव ।
निरन्तरं दैवतवृन्दपूजा-
व्यग्रामिमां राजगडे ददर्श ॥१२॥

प्राणप्रियं तं प्रणतोत्तमाङ्गं
प्रमोदजन्याश्रुजलार्द्रनेत्रम् ।
ददर्श पुत्रं वनवासकृच्छ्रैः
सा कर्षिताङ्गं रघुनन्दनाथम् ॥१३॥

निरस्तदुष्टारितमःप्रभावं
यशःप्रभाव्यापितदिग्वितानम् ।
तृषातुराक्ष्णा सुतमीक्षमाणा
दीपोत्सवं मूर्तमसौ ददर्श ॥१४॥

तद्दर्शनोत्फुल्लितचित्तवल्ली
सा शृण्वती पुत्रनिवेदितास्ताः ।
सङ्ग्रामकेलीर्विजयप्रसन्नाः
भाग्यं विजज्ञौ रघुनाथमातुः ॥१५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्प्रार्थयामास च देवमन्तः
नितान्तभक्त्या दृढसेवितं तम् ।
प्रभो स्वभक्तापदमुद्धरन् ते
शिवे ! कृपाच्छत्रमखण्डमस्तु ॥१६॥
तत्र स्थितो राजगडे स्वभ्रातृ-
प्रेमप्रसादापहृताखिलाधिः ।
स चिन्तयामास दिवाऽथ नक्तं
स्वराज्यशत्रुघ्नमुपायजातम् ॥१७॥
दिल्लीपतेर्मातुल उन्मदात्मा
शाहिस्तखानाभिध इद्धगर्वः ।
दिने दिने दीनजनान् विशुष्यन्
शिवान्तरुच्चैर्व्यथयाञ्चकार ॥१८॥
स चारुणाख्यं महता बलेन
च्छलेन चैकं विजिगाय दुर्गम् ।
यद्रक्षणायाल्पतमैः प्रवीरैः
नियुध्यमानैश्चकितोऽरिसंघः ॥१९॥
विजापुरेशेन निमन्त्रितोऽसौ
शिवाधिराज्यस्य विमर्दनाय ।
दुर्गं परिंडाख्यममुष्य चैव
जित्वाऽकरोत् तन्मनसः प्रकम्पम् ॥२०॥
तत्सान्त्वनार्थं प्रहितोऽग्रदूतः
शिवाजिना वीतवया डबीरः ।
स किन्तु दुर्गद्वयलाभमत्तः
तत्सामवास्यानि तिरश्चकार ॥२१॥
तस्योच्चकैर्दक्षिणदिग्जिगीषाम्
उच्छेत्तुकामो रणनीतिविज्ञः ।
पर्णालदुर्गे सततप्रवृत्तं
सङ्ग्राममाच्छेत्तुमियेष वीरः ॥२२॥
प्रागेव सन्देशहरोऽग्रदूतः
स्वराज्यमुद्राङ्कितराजपत्रम् ।
आदाय मूर्ध्ना च शिवं प्रणम्य
पर्णालदुर्गं प्रति संप्रतस्थे ॥२३॥
दुर्गोत्तमं तं रिपवे समर्प्य
राजाज्ञया निर्मदजौहराय ।
प्रत्यागतस्त्र्यम्बकभास्करोऽसौ
नातिप्रसन्नः शिवपादमूलम् ॥२४॥

प्राप्तस्तदानीं गिरिगर्भगाही
कश्चिच्चरो वृत्तनिवेदनाय ।
निर्मक्षिकं वीक्ष्य समन्ततोऽसौ
जगाद शत्रोर्नवचेष्टितानि ॥२५॥
स्वामिन्निदानीं शरदादिकाले
प्रश्यानपङ्के सुतरापगे च ।
प्लवङ्गवृन्दैरपि दुर्विलङ्घ्यं
सह्याद्रिमुल्लङ्घितुमुद्यतोऽरिः ॥२६॥
प्रोत्साहितः कोङ्कणविक्रमाय
मत्तेन दिल्लीपतिमातुलेन
अनेकवीरानुगतः प्रयाति
चमूपतिः कार्तलबाभिधानः ॥२७॥
व्याघ्रीव धीरा प्रथिता च राज-
व्याघ्रीति नाम्ना महिला बलाढ्या ।
अरण्यमार्गे तमनुप्रयाति
रक्षोगणं शूर्पणखेव नव्या ॥२८॥
अरातिसेना निबिडे च तुङ्गा-
रण्येऽधुनाऽसंख्यगजाश्वतुङ्गा ।
कृच्छ्रेण याति प्रतिपादमुच्चैः
पथा वहन्ती महतीव सिन्धुः ॥२९॥
न पानयोग्यानि जालानि तत्र
स्थली निवासानुचिताऽखिलाऽपि ।
वराहशार्दूलवृकोरगाश्च
कुर्वन्ति पीडां रिपुसैनिकानाम् ॥३०॥
वृत्तं यथावृत्तमिदं समग्रं
निवेदितं स्वामिपदाब्जमूले ।
कालोचितं निर्णयमत्र कर्तुं
कोऽन्यो भवत्तो नरदेव ! शक्तः ॥३१॥
प्रयातमात्रे हि चरेऽतिशीघ्रं
निमन्त्रितास्तत्र तदा शिवेन ।
तान्हाजिनेताजिपिलाजिमुख्याः
संग्रामलीलारसिकाः सखायः ॥३२॥
स्वयं च संग्राममहोत्सवार्थं
विधृत्य लौहं कवचं किरीटम् ।
तुरङ्गमारुह्य च वीरवर्यैः
अन्वागतो योद्धुमना बभूव ॥३३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नृसिंहसङ्घः शिवनायकोऽसौ
सद्यप्रविष्टारिमतङ्गवृन्दम् ।
विध्वंसितुं शस्त्रनखाग्रपातैः
ययौ गरुत्मत्समतीव्रवेगः ॥३४॥

प्रविश्य तं सत्वरमेव तुङ्गा-
रण्यं निलीना तरुगुल्मपार्श्वे ।
रिपुप्रवेशं परिवीक्षमाणा
निःशब्दसञ्चारमधिष्ठिताश्च ॥३५॥

दुराक्रमाध्वाक्रमणातिखिन्नाः
ते औत्तराहा यवनप्रवीराः ।
कथञ्चिदुग्रं तदरण्यमेत्य
विश्रान्तिसौख्यं क्षणमन्वभूवन् ॥३६॥

क्षणेऽपरस्मिंस्तरुगुल्मलीनः
चिरं युयुत्सुः स नृसिंहसङ्घः ।
पपात तस्मिन् रिपुसैन्यवृन्दे
कर्पासराशाविव दीप्तवह्निः ॥३७॥

तेषां प्रहारैः प्रहरार्धकाले
म्लेच्छप्रवीरैः प्रहृतासुभिश्च ।
सारण्यभूमिः सहसैव जाता
शृगालजातैः खलु भोगभूमिः ॥३८॥

शूलैः कृपाणैरिषुभिश्च भल्लैः
महाश्मभिश्चोन्नतवृक्षखण्डैः ।
अखण्डमुच्चैः परिखण्ड्यमाना
सा म्लेच्छसेना नितरां ननाश ॥३९॥

तदात्मपक्षक्षयमीक्षमाणो
ऽप्यसौ हठात् कार्तलबो युयुत्सुः ।
प्रोत्साहयन् वीरवरान् स्वसैन्ये
जगर्ज दीनदीनिति शुष्ककण्ठः ॥४०॥

वीक्ष्यात्मपक्षक्षयमेव राज-
व्याघ्री ह्यसौ प्रोषितधीरभावा ।
निरोद्धुकामा निजसैन्यनाशं
सेनापतिं कार्तलबं जगाद ॥४१॥

सेनापते नूनमसि प्रवीरः
समग्रसंग्रामजयी सदैव ।
परन्तु वीरैरपि युद्धकाले
युक्तं न दातुं सहसा विवेकः ॥४२॥

जयस्य लाभाय विहाय सौख्यं
कुर्वन्ति वीराः समरप्रयाणम् ।
स एव जायेत सुदुर्लभश्चेत्
श्रेयो हि मन्ये समरात् प्रयाणम् ॥४३॥

प्रदीप्तदावानलमध्यतोऽपि
शक्यं प्रयातुं सहसा कथञ्चित् ।
शिवाजिसैन्याक्रमणात् परन्तु
कदापि कश्चिन्न बहिः प्रयातः ॥४४॥

तस्याफझुल्लस्य बलोद्धतस्य
निःशेषसंहारमकाण्डपातम् ।
शिवाजिसैन्येन कृतं गताब्दे
जगद् विजानाति समग्रमेतद् ॥४५॥

न कातरत्वं मयि लेशमात्रं
नैसर्गिकं यत् महिलाजनस्य ।
संग्रामलीलारसिकाऽस्मि राज-
व्याघ्री न नाम्नाऽपि तु कर्मणैव ॥४६॥

नैकेषु घोरेष्वपि सङ्गरेषु
निसर्गसिद्धो मम धीरभावः ।
जानीहि नैव स्खलितः कथञ्चित्
दिल्लीन्द्रलक्ष्म्या इव केतुदण्डः ॥४७॥

पुंवत्प्रगल्भाऽस्मि रणाङ्गणेषु
वीरैरजय्याऽपि च खड्गयुद्धे ।
ख्यातप्रभावं शिवमप्यमुं च
काले निरोत्स्ये न परन्त्विदानीम् ॥४८॥

कालो ह्ययं नः प्रतिकूलगामी
निरोधिताः स्मो गिरिगर्भभागे ।
त्रातुं महत्सैन्यमिदं विपन्नं
श्रेयस्करी स्यात्च्छरणप्रपत्तिः ॥४९॥

असौ शरण्यः शरणागतानाम्
सुक्षात्रधर्मप्रणयी शिवाजिः ।
आकर्णसंकृष्टधनुर्गुणोऽपि
न क्षत्रियो हन्ति पदप्रपन्नम् ॥५०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शृण्वन्निदं स्त्रीवचनं सहेलं
सोऽपश्यदारान्निजवीरसङ्घान् ।
विखण्डिताङ्गान् प्रपलायमानान्
तृषातमरक्तान्यपि लेलिहानान् ॥५१॥

शिवाजिसैन्येन जयोन्मदेन
ह्यनुद्रुतान् खण्डितधैर्यबन्धान् ।
पदे पदे दुर्धरखड्गपातैः
निपात्यमानान् प्रतिकारशून्यान् ॥५२॥

त्रायस्व सेनाधिपतेऽधुनाऽस्मान्
केनाप्युपायेन विनाशकाले ।
शिवाजिरूपेण निहन्तुमेति
साक्षान्महाकाल उदग्रखड्गः ॥५३॥

इत्यार्तशब्दं वचनं स्वसैन्य-
धुरन्धराणां बलिनां निशम्य ।
स तत्क्षणं निर्गलिताभिमानः
शिवं प्रति स्वं प्रजिघाय दूतम् ॥५४॥

द्रागेव दूतः स च दीनमुद्रः
शिवाजिमभ्येत्य हयाधिरूढम् ।
बद्धाञ्जलिः संप्रणिपत्य मूर्ध्ना
निहन्यमानेषु दयां ययाचे ॥५५॥

वयं महाराज कृतापराधाः
वनं प्रविष्टा भवतो यदेतत् ।
कृतापराधेष्वपि दुर्जनेषु
न साधवो निष्ठुरतां भजन्ते ॥५६॥

विना जलं मीनवदेव सर्वे
हा हा वयं निर्गतजीविताः स्मः ।
दिष्ट्या भवान् दृष्टिपथं प्रपन्नः
तृषार्दितानां करुणापयोदः ॥५७॥

दया हि धर्मोऽखिलहिन्दुजातेः
अनादिकालाद् भुवने प्रसिद्धः ।
नूनं भवद्रूपधरोऽत्र लोके
स एव साक्षात् पुरतः स्थितो नः ॥५८॥

दयाभयोऽसौ जगदेकनाथः
तस्यावतारो हि भवान् मतोऽत्र ।
अभ्यर्थना तद् भवतः पुरस्तात्
कथं न्वियं निष्फलतां भजेत ॥५९॥

न स्वर्णदानं न च रत्नदानं
न धेनुदानं न च धान्यदानम् ।
न ज्ञानदानं न च राज्यदानं
प्राणप्रदानस्य तुलां बिभर्ति ॥६०॥

संग्रामशौर्येण हि निस्तुलेन
दिग्गाहिनी सा भवतः सुकीर्तिः ।
प्रदानशौर्येण हि जीवितानां
राजन् ! पुनः शाश्वततां भजेत ॥६१॥

शाहिस्तखानेन मदोद्धतेन
प्रचोदिताः स्मो वयमत्र देशे ।
फलं परप्रत्ययनेयतायाः
पर्याप्तमस्माभिरिहोपभुक्तम् ॥६२॥

दयानिधे भूरि तृषाकुलानां
त्राणाय नस्ते करुणैव शक्ता ।
सा चेन्निरस्ता भवता क्षणेऽस्मिन्
हा हन्त सर्वेऽपि वयं मृताः स्मः ॥६३॥

इत्थं वचांसि शरणागतिसूचकानि
श्रुत्वारिदूतगदितानि सगद्गदानि
निष्कोषितासिरपि शत्रुविमर्दनाय
कारुण्यसान्द्रहृदयः शिवराज आह ॥६४॥

तोयं पिबन्तु तृषिताः सरितां यथेच्छं
गच्छन्तु निर्भयतया स्वगृहाणि सर्वे ।
कृच्छ्रार्दितेषु हि रिपुष्वपि शस्त्रपातं
धर्मप्रिया वयमिमे न कदापि कुर्मः ॥६५॥

सद्धर्मरक्षणकृतेऽस्मि गृहीतखड्गः
तत्पालनं परतरः खलु मे स्वधर्मः ।
ये किन्तु धर्मरिपवः स्वजना अपि स्युः
नूनं मता मम महारिपवस्त एव ॥६६॥

अत्राक्रमद्भिरहितं विहितं भवद्भिः
यन्मे तदस्ति खलु दुर्धरदण्डनार्हम् ।
आज्ञापये तदखिलं निजवस्तुजातं
मुक्त्वेह गच्छत यथेच्छमितोऽन्यदेशम् ॥६७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युद्धं समाप्तमधुनेति शिवस्य वाणीं
निर्मथ्यमानरिपुसैनिकहर्षहेतुम् ।
प्रोद्घोषयन्त उपसैन्यगणान् निरीयुः
वार्ताहराः सपदि सर्वत एव सर्वे ।।६८।।

युद्धोन्मदैरपि समैश्च नृवीरवर्यैः
उल्लङ्घिता न हि कथञ्चन सा शिवाज्ञा ।
उच्छृङ्खलोऽपि नितरां स महाम्बुराशिः
वेलां मनागपि कदाचन नोद्विहन्ति ।।६९।।

तदनु निहतशेषा म्लेच्छयोधाः समस्ताः
गजतुरगसुवर्णाद्यं निजं वस्तुजातम् ।
दृढतरमभिमानं चापि तत्रैव हित्वा
झटिति झटिति तुङ्गारण्यतः सम्प्रयाताः ।।७०

उदकमति पिबन्तस्तेल्पनद्यास्तृषार्ताः
अपरिमितमुदश्च प्राणलाभेन तेन ।
पथि मुदितमनस्का बाढमन्योन्यमूचुः
शिव इव भुवि वीरः कोपि नान्यो दयालुः ७१

इति श्रीशिवराज्योदये महाकाव्ये ३९ तमः सर्गः समाप्तः

शुभ कामनाओं के साथ

* इन्डो फॉरेन एजेन्सीज् *

२३, सर फिरोजशाह मेहता रोड़,

बम्बई – १

भारती के कतिपय प्रकाशन

१.	अम्बिकासूक्तम्	मूल्यं २.५०
२.	गल्पकल्पलतिका (बालोपयोगी)	१.५०
३.	सरलसंस्कृतशिक्षणोपायः (बालोपयोगी)	१.५०
४.	गोलनवांकुर	१.२५
५.	चित्र द्वारा संस्कृतशिक्षा (बालोपयोगी)	१.५०
६.	सुवर्णलक्ष्मी नक्षत्र माला	०.५०
७.	आयुर्वेद विशेषांक	५.००
८.	आरोग्यांक विशेषांक	२.५०

भारती के ग्राहकों को २५% वर्तन दिया जायगा यदि सम्पूर्ण पुस्तकें एक साथ मंगायें ।

व्यवस्थापक

भारती संस्कृत मासिक

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभिनवग्रन्थपरिचयः—

डा० जाकिरहुसैन व्यक्तित्व और विचार

सम्पादकः-श्रीताराचन्द वर्मा

प्रकाशकः-चिन्मय प्रकाशन, चौडा रास्ता, जयपुर

अद्वितीयोऽयं ५०० पृष्ठात्मको महाग्रन्थो राष्ट्रियस्य तथाऽन्ताराष्ट्रियस्य च महत्त्वस्य वर्तते। एष ग्रन्थो गांधीमतानुयायिन एवं स्वतन्त्रतासंग्रामस्य दृढतरस्य सेनान्यो व्यक्तित्वं विविधविषयैः प्रकाशयन् विद्यते। शिक्षा-राजनीति-संस्कृति-प्रशासनानां तथा हिन्दुमुसलिमैकतायाश्च क्षेत्रेषु **डा० श्रीजाकिरहुसैनस्य** योगदानं विद्यार्थिनामेवं जनसाधारणस्य च कृते प्रेरणाप्रदमस्ति। ग्रन्थस्य चास्य सम्माननीयैः पाठकैः सर्वत्र सुमहती प्रशंसाक्रियत। सर्वेष्वपि चोत्तमेषु पुस्तकालयेषु ग्रन्थस्यास्य संग्रहो ऽत्यावश्यको विद्यते।

महाग्रन्थोऽयं विगते मार्चमासे (१९६९) १९ तारिकायां दिल्ल्यां राष्ट्रपतिभवने स्वर्गीय-राष्ट्रपति-जाकिरहुसैनमहोदयाय सादरं समर्प्यत, मार्चमासस्यास्य २३ तारिकायाञ्च जनतायां विक्रयार्थमुपप्रधानमन्त्रि—**श्रीदेशाईमहोदय**-द्वारास्य विमोचनं सञ्जातम्।

किञ्चास्मिन् ग्रन्थे समभिनन्दनीयस्य स्व० डा० जाकिरहुसैनमहोदयस्य जीवनेन सम्बद्धानि मनोहराण्यलभ्यानि प्रायः शतं चित्राणि सन्ति संगृहीतानि। अस्य ग्रन्थस्य कर्गद-मुद्रणावरण-सज्जादिकं सर्वमपि वर्तते प्रशंसार्हमेव। वस्तुतः प्रकाशकेनास्य प्रकाशनकर्मणि तथा सम्पादक-महोदयेनास्य सम्पादने च सातत्येन श्रमं विधाय स्तुत्यं कार्यं कृतम्। ग्रन्थस्यास्योपादेयतायास्तथा सामग्र्याः सङ्कलने एवं चयने च जायमानस्य व्ययस्य च दृष्ट्या मूल्यमिदं नगण्यमेव विद्यते। अस्य ग्रन्थस्य सफलतायाञ्च सम्पादकमहोदयस्य योग्यता, डा० श्रीजाकिरहुसेनेन सह निकटता, तथा प्रयासेनानेन च देशसेवायाश्च चेष्टा-सन्ति मुख्यानि कारणानि। किञ्चास्य महाग्रन्थस्य जनतासु प्रचारः प्रसारश्च भूयादिति हृदयेनाहं कामये— —मधुपः

विश्वहिन्दुपरिषदोऽभिनवोऽध्यक्षः

उदयपुरस्य **महाराणा-श्रीभगवत्सिह-महोदयो** वर्षेऽस्मिन् विश्वहिन्दुपरिषदोऽध्यक्ष-पदमलङ्कृतवान्। अर्थात् परिषदोऽस्याः प्रथम-संरक्षकस्य तथा १९६६ तमवर्षादध्यक्षपदे वर्तमानस्य श्रीजयचामराज-वाडियार (मैसूर) महोदयस्य स्थाने सम्प्रति महाराणामहानुभावस्य नियुक्तिः सञ्जाता।

सोऽयं श्रीमहाराणामहानुभावः ४७ वर्ष-वयस्कोऽतिसरलः सौम्यस्वभावश्च विद्यते, यस्तस्य सुविख्यातस्य सिसोदिया-कुलस्य वर्तते वंशजः, यस्मिन् राजवंशे एव श्रीबप्पा-रावलः, श्रीमहाराणा-कुम्भा, श्रीसंग्रामसिहस्तथा चिर-स्मरणीय-राणाप्रतापसिहसदृशा हिन्दुधर्मरक्षका राष्ट्रभक्ताश्च जनिं लेभिरे, ये च कदाप्याक्रमण-कारिणां समक्षे नतमस्तकाः नैव जाताः।

किञ्चोदयपुरराज्यमिदमिदानीं 'मेवाड़' (मेट-पाटः) शब्देनोच्यते। मेवाडराजवंश्या राजा-श्चात्मनः सूर्यवंशीयरामात्मजस्य कुशस्य वंश-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जान् कथयन्ति। श्रीरामो हि सूर्यवंशस्य ६० षष्टितमो राजा बभूवेति बहूनां जनानामस्ति विश्वासः। साहस-युद्धकौशलादिभिर्विशिष्टैर्गुणैर्भारतस्य क्षत्रियेष्वेतद्वंशजातानां क्षत्रियाणां वर्तते विशिष्टं स्थानम्।

वार्षिकोत्सवः कविसम्मेलनश्च

विगताप्रेलमासस्य ११ तारिकायां जयपुरस्थ-महाराजसंस्कृतकालेजस्य वार्षिकोत्सवस्तात्कालिक-राजस्थानशिक्षामन्त्रि-**श्रीबरकतुल्लखाँ**-महाभागस्य साभापत्ये समपद्यत, सहैव चात्र आशुकवि—**श्रीहरिशास्त्रिणा**माध्यक्ष्ये कविसम्मेलनमपि साधु सम्पन्नमभूत्।

सर्वतः प्रथमं वैदिकमङ्गलाचरणं श्रीचन्द्रधरशर्मणा वैदिकेन विहितम्। ततः श्रीराधाकृष्णशर्मणा स्वागतगीतिः पठिता, एवं शाहपुरास्थैः प्रज्ञाचक्षुः-पण्डितश्रीहरिश्चन्द्रशर्मभिः स्वागतपद्यान्यश्राव्यन्त। अनन्तरं न्याय-व्याकरणविषयमधिकृत्य छात्राणां मिथः शास्त्रार्थः समभूत्। **कालेजाध्यक्ष-श्रीगोविन्दनारायणशर्मनैयायिकैश्च** वार्षिकं प्रतिवेदनमपठ्यत। ततश्च योग्यतमेभ्यश्छात्रेभ्यः शिक्षामन्त्रिमहोदयेन पारितोषिकं वितीर्णम्।

ततश्च स्वभाषणे **श्रीशिक्षामन्त्रि**महोदयेन प्रतिपादितं यत्—मयाध्ययनसमयेऽनुभूतमिदं यद् भारतीया संस्कृतिस्तत्परम्पराश्च संस्कृत एव सन्ति निहिताः। तामिलभाषातिरिक्तमन्यासां सर्वासामपि भारतीयभाषाणां जननी संस्कृतमेव विद्यते। अतः कस्याश्चनापि भाषायाः यथार्थं ज्ञानमवाप्तुं प्रथमं संस्कृतस्य शिक्षणं श्रेयस्करमस्ति। ये जनाः संस्कृतं न पठन्ति, तेषां शैक्षणिकी पृष्ठभूमिस्तावती शोभना न भवति, यावती प्राप्तसंस्कृतशिक्षणस्य जनस्य भवति।

अपि चाग्रे श्रीशिक्षामन्त्रिणा भाषितं यत् सर्वकारेण संस्कृतस्याग्रे परिवर्धनाय पादः समुत्थापितो वर्तते। किञ्च मयापि संस्कृतेन विनात्मनि न्यूनतायाः कृतोऽनुभवः ततश्च संस्कृतमधीत्यैव मया देशस्य संस्कृतिः परिज्ञाता। वयं पतिता जाताः स्मः, परं संस्कृतं न तथा भूतम्।

किञ्चाहमनुभवामि यद् धनिकवर्गः स्वबालकान् संस्कृतात् सुदूरे रक्षति। अतो भवन्तः संस्कृतज्ञास्तेषां बालकानां संरक्षकान् समवबोधयन्तु। तथैव संस्कृतशिक्षायाः क्षेत्रे व्यावसायिकस्य पक्षस्य कृते महत्त्वदानं मम मते नैव शोभनम्। पारस्परिका विवादाश्च परिहरणीयाः। सम्प्रति च संस्कृतशिक्षाया आधुनीकरणमावश्यम्। सदैव संस्कृतविद्यालयानां तद्भिन्नविद्यालयानाञ्च भेदः समाप्यः। संस्कृतशिक्षायां येऽपि शोधात्मकं कार्यं विधास्यन्ति तेषां कृते सर्वकारः पूर्णतया सहयोगं दातुं प्रयतिष्यते। यावत् कालं संस्कृतशिक्षाविभागो ममाधिकारे विद्यते तावत् कालं संस्कृतस्य समुन्नतिर्भविष्यति। पुनश्चाहं निवेदयामि यत् संस्कृतेन सहान्यान् विषयान् समादायैवभवद्भिरग्रे वर्धितव्यम्, येन संस्कृतज्ञाः सर्वेष्वपि क्षेत्रेषु प्रवेशं लब्धुं प्रभवेयुः। सहैव चान्यैः सह भेदभावनापि समापनोया। किञ्च शताब्दी-समारोहस्यायोजनार्थं सर्वविधमपि सहयोगं दातुमहं सयत्नोऽस्मि। अन्यासामप्यत्र प्रदर्शितानामावश्यकतानां पूर्त्यर्थञ्चापि तद्विषयेऽधिकारिभिः सह वार्तालापं करिष्यामि। अहं संस्कृतसेवार्थं सर्वथा सन्नद्धः स्थास्यामि। अहं सर्वेषामपि तत्रभवतां भवतामाभारं बिभर्मि—इति।

अनन्तरं कविसम्मेलनं प्रारब्धम्। तत्र पूर्त्यर्थं समस्यात्रयी निर्णीतासीत्। यथा—१ सेव्यताम्, २ सा माधुरी माधुरी, ३. लोकतन्त्राधिकारः। इदानीं येषां कवीनां पूर्तयो मम सविधे समायातास्ता भारतीपाठकानां मनोविनोदायेह सम्प्रति मया प्रकाश्यन्ते—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीरामगोपालशास्त्री
धर्मशास्त्रप्रवक्ता, म० सं० कालेजः, जयपुरम्

सेव्यताम्

योऽनङ्गं विदधाति माधवसखं भालेक्षणेन क्षणं
भास्वन्नेत्ररुचा निरस्यति च यो घोरं घनाडम्बरम् ।
यः स्नेहेन सुधाकराक्षिसुधया सिञ्चन्नुमां मोदते
सोऽयं ताण्डवपण्डितस्त्रिनयनो यागेश्वरः सेव्यताम् ॥१॥

यल्लावण्यसुधानिधिं प्रविशतां तापः प्रशाम्यत्यथो
यच्छ्रुत्येव सदा यदाननसुधावर्षेऽपि हर्षं भृशम् ।
रोमाञ्चं वितनोति यन्मृदुतरस्पर्शो वचो माधुरी
चेतः प्लावयते सखे ! भव सुखी कुञ्जेषु संसेव्य ताम् ॥२॥

लोकतन्त्राधिकारः

सर्वे वैदेशिकगतिविधिध्वस्तदेशाभिमाना-
स्तिष्ठन्मूत्रा अनुकृतिरता धूम्रपानैकशीलाः ।
सन्दृश्यन्ते दिशि दिशि जनाः संस्कृतेर्हीयमानाः
किं कुर्यान्नो हितमिह तदा लोकतन्त्राधिकारः ॥१॥

वैद्य–श्रीचन्द्रशेखरशास्त्री, जयपुरम्

सेव्यताम्

नगरोपकण्ठमार्गेषु कृतनिकेतनानाम् विविधवेषभाषादिभिरलंकृतानाम्,
स्वार्थमाप्तुं स्कूटर शकटीमारुह्यागतानाम् दयितदेहोपरिबलयितबाहुलतानाम्
वायुना फुरफुरायमाणांशुकसंवृतानाम्, स्फुरच्छ्रोणिपीवरस्तनाभ्यान्वेषन्नतानाम् ।
वेणीद्वयने ग्रैवेयामादधतीनां युवतीनाम्, संयतदृग्भ्यां ललितलावण्यमुपसेव्यताम् ॥१॥

अलभताजामिलोऽपि सुगतिं प्रपन्नोचिताम्, महाव्याजतयापि केवलं नाम्नैव सहसा ।
प्रह्लादमाह्लादयितुं स्तम्भादाविरासीत्प्राक्, द्रुपदजामवलोक्य चैलं स्वयमुपाविशत्
अबुधान् गोपानवितुं गिरिवरमुज्जहार, पातुम् प्रतिज्ञाञ्च भैष्मीरथाङ्गमविन्दत ।
यत्पादरजोभिरहिल्या दिव्यलोकं गता, तत् पतितपावनस्य कथामृतं सेव्यताम् ॥२॥

"सा माधुरी माधुरी"

सद्वृत्तोपचिता सुवर्णरचिता भावोन्नता भूरिशः ।
नानालंकृतिलालिता सुबृहन्माधुर्यनिष्यन्दिता ॥१॥
ओजोभिर्ननु नन्दिता कविगिरां प्रासादतो वन्दिता ।
तन्वङ्गीव मुदं ददात्यविकल सा माधुरी माधुरी ॥२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोकतन्त्राधिकारः

चञ्चच्चन्द्राननानां, करयुगलभृतां भर्तृदेहे समन्तात्,
उत्तुङ्गोत्तुङ्गधारामरुणद्युतिभृता वारिणा यन्त्रयोगात्
उद्यत्तारुण्यतुङ्गस्तनयुगलजुषाम् श्रोणिभारान्नतानाम्
कान्तानां दृष्टिपातैर्विमल-द्युतिरभूल्लोकतन्त्राधिकारः ॥१॥

श्रीरामचन्द्राचार्यः, जयपुरम्

"सेव्यताम्"

यस्यां श्रीचतुराननस्य मुखतो वेदत्रयी निःसृता,
षट्शास्त्राणि पुराण-काव्यनिचयो यत्रैव लेभे तनुम् ।
यामाराध्य जगद्गुरुः समभवद्देशेऽत्र जातो द्विजः,
कार्याऽकार्य-विवेचनी सुमनसां सा भारती 'सेव्यताम्'

जीवात्मंस्तव पूर्वकर्मरचिते संसारवारां निधौ,
मोहाद्यैः परिपीडितस्य मकरैर्मोक्षे समीहाऽस्ति चेत् ।
ब्रह्मज्ञः करुणापरः प्रकृतिजान् दोषान्निहन्तुं क्षमः
स्वात्मानन्दरतो निरस्तविषयः सच्चिद्गुरुः 'सेव्यताम्' ॥२॥

रज्जौ सर्पवदेव विश्वमखिलं यत् श्रव्यदृश्यात्मकम्
मिथ्यैवेति विचार्य जीवपरयोरैक्यं च संचिन्तयन् ।
भोगानिन्द्रियजान्निरस्य निभृतं यन्माधुरीनिर्वृतो,
नित्ये स्वात्मनि मोदते हि पुरुषः 'सा माधुरी माधुरी' ॥१॥

यामास्वाद्य न रोचते सुरपतेः सिंहासने संस्थिति-
र्नैव श्रीपरमेष्ठिनोऽपि पदवी चित्ते समारोहति ।
वंशीं वादयतो हरेरनुपमा रूपस्य या माधुरी,
नित्यानन्दविधायिनी त्रिभुवने 'सा माधुरी माधुरी' ॥२॥

श्रीदुर्गादत्तशर्ममैथिलः व्या० प्रधानाध्यापकः, म० सं० कालेजः, जयपुरम्

सेव्यताम्

संसारार्णवतारणैकनिपुणं शान्तिप्रदं शाश्वतं
मिथ्यामोहविभञ्जकं कलिमलप्रक्षालने वै परम् ।
आपद्ग्रस्तसुरैरपि प्रतियुगं तोष्टूय्यमानं शुभं
श्रीगोविन्दपदारविन्दयुगलं भक्त्या सदा सेव्यताम् ॥

पण्डितप्रवर-श्रीसीतारामशास्त्रिणे दिवंगताय श्रद्धाञ्जलिः

सीकरमण्डलान्तर्गते गुहालाभिधे ग्रामे विगते वैशाखमासे सुप्रसिद्धः पण्डितप्रवरो विद्यावृद्धो वयोवृद्धस्तपोवृद्धश्चाशीतिवर्षात्मके वयसि वर्तमानः प्रातः स्मरणीयः श्रीसीताराम-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शास्त्री हृदयगतेरवरोधात् सहसैव शिवलोकं गतः। तत्र समायोजितायां शोकसभायां समुपस्थितैः जनै दिवं गतात्मने तस्मै भक्त्या श्रद्धाञ्जलयः समर्प्यन्त। आसां पङ्क्तीनां लेखकोऽपि तत्रोपस्थित आसीत्। तत्र पठितानि पद्यानि साम्प्रतमिह प्रकाश्यन्ते—

वेदैश्च वेदपाठैश्च होम कृत्वा त्वहर्निशम्। अनन्यां भक्तिमातन्वन् सीतारामो दिवंगतः ॥१॥
वेदविद्या न भात्यद्य काव्यं कुत्सायते खलु। कर्मकाण्डं कलाहीनं सीतारामे दिवं गते ॥२॥
सर्वगुणैः समापूर्णे वंशेऽस्मिन् श्रीमतां शुभे। पुनर्भवादृशो भूयादित्याशीर्मे ऋतायताम् ॥३॥

—तिवाडी-श्रीनन्दलालः, बबाई।

सीतारामगुणानुवादसरयूस्नानार्थमुत्कान्नरान्,
सद्वेदादिकथारसे प्रतिदिनं संस्नाप्य संस्नाप्य वै।
विद्वन्मण्डलमण्डिते मुनकुले जातो विपश्चिद् वरः
सीतारामसुधीः सदा विजयतां साकेतलोकं गतः ॥१॥
संस्मृत्य संस्मृत्य सदाशयाकृतिं सगद्गदं स्वान्तमथो मदीयम्।
याचे परेशं परमां सुशान्ति शिष्टाः सुताश्चाभ्युदयं लभेरन् ॥२॥

—श्रीगोविन्दनारायणशास्त्रिणः, नीमकाथाना

श्रद्धाञ्जलिः

विद्वद्वृन्दसमर्चितो गुणिगणे लब्धप्रतिष्ठश्च यः
यो नित्यं परमात्मनामनिरतः श्रेष्ठश्च यो याज्ञिकः।
वर्षेऽस्मिन् रसनेत्रखाक्षिसुमिते वैशाखमासेऽसिते-
पक्षे वारतिथौ स हन्त सहसा लोकादितः स्वर्गतः ॥१॥
न्याये व्याकरणे च याजनविधौ योऽभून्महापण्डितः
शास्त्रे ज्यौतिषिकेऽपि योऽतिकुशलो नित्यं तथा कर्मठः।
शिष्याः सम्प्रति यस्य सन्ति बहवो देशे विदेशेष्वपि
सीतारामसुधीः स पण्डितवरो हा हन्त! नाकं गतः ॥२॥
सम्मान्यस्य बुधोत्तमस्य गुणिनः सद्विप्रचूडामणेः
शोकेनाद्य वयं विवेकविकला नो शक्नुमस्ते गुणान्
वक्तुम्, सम्प्रति कामयामह इदं सर्वात्मना केवलं
स्वर्गे शाश्वतिकं सुखन्तु लभतामीशप्रसादाद्भवान् ॥३॥
प्यारीलालबुधोऽस्ति यस्य तनयो गोविन्दनामापरः,
श्रीनन्दश्च तृतीयकोऽथ सुसुतस्तूर्यो निवासाभिधः।
पौत्रा भ्रातृसुताश्च यस्य बहवो योग्याः कुटुम्बेऽधुना
गोपीनाथपदारविन्दकृपया ते सन्तु दीर्घायुषः ॥४॥
नित्यं शिवार्चनपराय विमत्सराय तस्मै सदाचरणपालनतत्पराय।
श्रद्धाञ्जलिं शिवपदञ्च गताय **सीतारामाय** पण्डितवराय समर्पयामि ॥५॥

समर्पकः
दीनानाथत्रिवेदी मधुपः, भारती सहसम्पादकः, जयपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ चतुर्थोऽध्यायः

'ॐ' ऋषिरुवाच ॥१॥

ऋषि बोले ॥१॥

शक्रादयः सुरगणा निहतेऽतिवीर्ये
तस्मिन्दुरात्मनि सुरारिबले च देव्या ।
तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा
वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥२॥

शक्रादिदेव, उस दुर्जन दैत्य और,
सैन्यादिको हत किया जब चण्डिकाने ।
गाने लगे विनतमस्तक हो गिरा से
हर्ष प्रफुल्ल तनुसे स्तुति अम्बिका की ॥२॥

देव्या यया ततमिदं जगदात्मशक्त्या
निश्शेषदेवगणशक्तिसमूहमूर्त्या ।
तामम्बिकामखिलदेवमहर्षिपूज्यां
भक्त्या नताः स्म विदधातु शुभानि सा नः ॥३॥

जो व्याप्त विश्वभरमें निजशक्ति से है,
जो है समस्त सुरशक्तिसमूह रूपा ।
देवर्षि पूजित हुई उस अम्बिका को
हैं भक्तिसे नत, हमें वह श्रेय देवें ॥३॥

यस्याः प्रभावमतुलं भगवाननन्तो
ब्रह्मा हरश्च न हि वक्तुमलं बलं च ।
सा चण्डिकाखिलजगत्परिपालनाय
नाशाय चाशुभभयस्य मतिं करोतु ॥४॥

पूर्ण प्रभाव जिसका भगवान् अनन्त
ब्रह्मा महेश न बखान सके न शक्ति,
चण्डी वही सब जगत्परिपालनामें
अश्रेय और भय नाशनमें धरें धीः ॥४॥

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां, कृतधियां हृदयेषु बुद्धिः ।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम् ॥५॥

जो श्रीः सुकर्मिजनके घरमें अलक्ष्मी
पापिष्ठ के, सुमति के उर बीच बुद्धि ।
श्रद्धा सुजात जनकी कुल जात को ही
देवि ! प्रणाम तुमको, तुम विश्वपालो ॥५॥

किं वर्णयाम तव रूपमचिन्त्यमेतत्
किं चातिवीर्यमसुरक्षयकारि भूरि ।
किं चाहवेषु चरितानि तवाद्भुतानि
सर्वेषु देव्यसुरदेवगणादिकेषु ॥६॥

क्या रूप वर्णन करें यह है अचिन्त्य
क्या वीर्य दैत्य लयकारि प्रभूत गावें ।
संग्राम में चरित अद्भुत क्या बखानें
मातः सभी असुरदेवगणादिकों में ॥६॥

हेतुः समस्तजगतां त्रिगुणापि दोषै-
र्न ज्ञायसे हरिहरादिभिरप्यपारा ।
सर्वाश्रयाखिलमिदं जगदंशभूत-
मव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥७॥

तू हेतु सर्वजनकी त्रिगुणाऽपि दोष-
द्वारा न जान पडती हर विष्णु को भी ।
आधार तू सकल का जग अंश तेरा
आद्या परा प्रकृति तू अविकार ही है ॥७॥

यस्याः समस्तसुरता समुदीरणेन
तृप्तिं प्रयाति सकलेषु मखेषु देवी ।
स्वाहासि वै पितृगणस्य च तृप्तिहेतु-
रुच्चार्यसे त्वमत एव जनैः स्वधा च ॥८॥

उच्चार से सुर सभी जिसके मखों में
पाते सुतृप्ति जननी वह तू स्वयं है ।
स्वाहा सुनिश्चित हुई पितृतृप्ति हेतु-
रुच्चार्य से त्वमत एव जनैः स्वधा च ॥८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

या मुक्तिहेतुरविचिन्त्यमहाव्रता त्व-
मभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः ।
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषै-
र्विद्यासि सा भगवती परमा हि देवि ॥९॥

जो मुक्ति हेतु अविचिन्त्य महाव्रता है
संसेव्य है नियत इन्द्रिय योगियों के।
मोक्षार्थी और गतदोष मुनीश्वरों से
विद्या तुम्ही भगवती परमा वही हो ॥९॥

शब्दात्मिका सुविमलर्ग्यजुषां निधान-
मुद्गीथरम्यपदपाठवतां च साम्नाम् ।
देवी त्रयी भगवती भवभावनाय
वार्त्ता च सर्वजगतां परमार्तिहन्त्री ॥१०॥

तू शब्द है विमल ऋग् यजु का विधान
ओङ्कार रम्य पद संयुत सामका भी।
तू ही त्रयी भगवती भवभावनार्थ
वार्ता समस्त जगकी परमार्ति-हन्त्री ॥१०॥

मेधासि देवि विदिताखिलशास्त्रसारा
दुर्गासि दुर्गभवसागरनौरसङ्गा ।
श्रीः कैटभारिहृदयैककृताधिवासा
गौरि त्वमेव शशिमौलिकृतप्रतिष्ठा ॥११॥

मेधा महेशि जिससे सब शास्त्र जानें
दुर्गा असङ्ग भवसागर नाव है तू।
श्री विष्णु के हृदयपद्मनिवासिनी हो
गौरी तुही गिरिश वक्षविलासिनी हो ॥११॥

ईषत्सहासममलं परिपूर्णचन्द्र-
बिम्बानुकारि कनकत्तमकान्तिकान्तम् ।
अत्यद्भुतं प्रहृतमात्तरुषा तथापि
वक्त्रं विलोक्य सहसा महिषासुरेण ॥१२॥

जो मन्दहासयुत निर्मल पूर्णचन्द्र-
जैसा सुवर्ण सम कान्तिभरा मनोज्ञ।
है आपका मुख, उसे सहसा निहार
की चोट है महिष ने, यह चित्र ही है ॥१२॥

दृष्ट्वा तु देवि कुपितं भ्रुकुटीकराल-
मुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः ।
प्राणान्मुमोच महिषस्तदतीव चित्रं
कैर्जीव्यते हि कुपितान्तकदर्शनेन ॥१३॥

मातः! अनूप मुख को विकराल भौंह-
वाला, शशाङ्क सम सुन्दर भी निहार।
तत्काल प्राण महिषासुरने न छोड़े
आश्चर्य, कौन कुपितान्तक देख जीवे ॥१३॥

देवि प्रसीद परमा भवती भवाय
सद्यो विनाशयसि कोपवती कुलानि ।
विज्ञातमेतदधुनैव यदस्तमेत-
न्नीतं बलं सुविपुलं महिषासुरस्य ॥१४॥

देवि! प्रसन्न मन हो जगके हितार्थ
तत्काल नष्ट करती कुपिता कुलोंको।
जाना अभी यह, विनष्ट किया समस्त
सद्य-प्रभूत बलभी महिषासुरीय ॥१४॥

ते सम्मता जनपदेषु धनानि तेषां
तेषां यशांसि न च सीदति धर्मवर्गः ।
धन्यास्त एव निभृतात्मजभृत्यदारा
येषां सदाभ्युदयदा भवती प्रसन्ना ॥१४॥

सम्मान्य वे जगतमें धन है उन्हीके
वे कीर्तिमान उनके हर धर्म वर्ग,
हैं धन्य वे नियत आत्मजदार वाले
हैं आप अभ्युदयदा जिनपै प्रसन्न ॥१५॥

धर्म्याणि देवि सकलानि सदैव कर्मा-
ण्यत्यादृतः प्रतिदिनं सुकृती करोति ।
स्वर्गं प्रयाति च ततो भवतीप्रसादा-
ल्लोकत्रयेऽपि फलदा ननु देवि तेन ॥१६॥

हे देवि! लोक सुकृती सब धर्म कर्म
अत्यन्त आदरभरा करता सदा ही।
स्वर्ग प्रदान करती तुम हो कृपा से
त्रैलोक्य में सुफलदा तुम हो भवानि! ॥१६॥

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।

दुर्गे तुम्ही स्मरणसे सबकी हरो भी
देती स्थिर स्मरणसे मति शोभना हो।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दारिद्रयदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता ॥१७॥

दारिद्रय दुःख भयहारिणि कौन और
सर्वोपकारकरणी करुणा रसार्द्रा ॥१७॥

एभिर्हतैर्जगदुपैति सुखं तथैते
कुर्वन्तु नाम नरकाय चिराय पापम् ।
संग्राममृत्युमधिगम्य दिवं प्रयान्तु
मत्वेति नूनमहितान् विनिहंसि देवि ॥१८॥

पावे जगत् सुख सदा बध से इन्हो के
वैसे करें नरक हेतुक पाप चाहे ।
पा युद्ध मोत सब ये सुरलोक जावें
यों जान आप ध्रुव दानव मारती हो ॥१८॥

दृष्ट्वैव किं न भवती प्रकरोति भस्म
सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम् ।
लोकान् प्रयान्तु रिपवोऽपि हि शस्त्रपूता
इत्थं मतिर्भवति तेष्वपि तेऽतिसाध्वी ॥१९॥

क्यों दैत्य भस्म करती नहि देखते ही
क्यों बैरिवृन्द पर शस्त्र प्रचारती हो ।
हो शस्त्र पूत रिपुभी सुरलोक जावें
ऐसी प्रशस्त उनमें मति आपकी है ॥१९॥

खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः
शूलाग्रकान्तिनिवहेन दृशोऽसुराणाम् ।
यन्नागता विलयमंशुमदिन्दुखण्ड-
योग्याननं तव विलोकयतां तदेतत् ॥२०॥

खड्ग प्रभा पटलकी द्युति और उग्र-
शूलाग्रकी चमक से दृग शत्रुओं की ।
फूटो नहीं, किरणवान् शशिखण्ड युक्त-
वे आपका मुख मनोहर देखते थे ॥२०॥

दुर्वृत्तवृत्तशमनं तव देवि शीलं
रूपं तथैतदविचिन्त्यमतुल्यमन्यैः ।
वीर्यं च हन्तृ हृतदेवपराक्रमाणां
वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥२१॥

है आपका सहज दुष्कृत नाशकारी
वैसे स्वरूप अविचिन्त्य अतुल्य भी है ।
वीर्य प्रणाशक सभी त्रिदशारियों का
यों आपने यह दया रिपुसंघपे की ॥२१॥

केनोपमा भवतु तेऽस्य पराक्रमस्य
रूपं च शत्रुभयकार्यतिहारि कुत्र ।
चित्ते कृपा समरनिष्ठुरता च दृष्टा
त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥२२॥

सादृश्य देवि किससे तब वीर्य का हो
है रूप शत्रुभयकारि मनोज्ञ कैसा ।
संग्राम में निठुरता मनमें कृपा भी
देखी त्रिलोक भरमें वरदे तुम्ही में ॥२२॥

त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्धनि तेऽपि हत्वा ।
नीता दिवं रिपुगणा भयमप्यपास्त-
मस्माकमुन्मदसुरारिभवं नमस्ते ॥२३॥

त्रैलोक्य रक्षण किया रिपुनाश से है
संग्राम से निहतदानव वृन्द को को ।
भेजा द्युलोक, भय दूर किया हमारा
उन्मत्त दैत्य भय, देवि ! तुम्हे नमो है ॥२३॥

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥२४॥

शूल से पाल हमको खड्ग से पाल अम्बिके !
घण्टानिनाद से पाल चापज्याघोष से तथा ॥२४॥

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥२५॥

पूर्वपश्चिमसे पाल चण्डि दक्षिण में तथा ।
निजशूलघुमाने से रक्ष उत्तरमें शिवे ॥२५॥

सोम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यर्थघोराणि ते रक्षास्मांस्तथा भुवम् ।२६

त्रैलोक्य में विचरते सौम्यघोर स्वरूप हैं ।
बचाओ उनसे देवि हमको इस भूमिको ॥२६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ।
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः ॥२७॥

ऋषिरुवाच ॥२८॥

एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः ।
अर्चिता जगतां धात्री तथा गन्धानुलेपनैः ॥२९॥
भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तु धूपिता ।
प्राह प्रसादसुमुखी समस्तान् प्रणतान् सुरान् ।३०।

देव्युवाच ॥३१॥

व्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवाञ्छितम् ।३२।

देवा ऊचुः ॥३३॥

भगवत्या कृतं सर्वं न किंचिदवशिष्यते ॥३४॥
यदयं निहतः शत्रुरस्माकं महिषासुरः ।
यदि चापि वरो देयस्त्वयास्माकं महेश्वरि ॥३५॥
संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः ।
यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ॥३६॥
तस्य वित्तर्द्धिविभवैर्धनदारादिसम्पदाम् ।
वृद्धयेऽस्मत्प्रसन्ना त्वं भवेथाः सर्वदाम्बिके ॥३७॥

ऋषिरुवाच ॥३८॥

इति प्रसादिता देवैर्जगतोऽर्थे तथाऽऽत्मनः ।
तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता नृप ॥३९॥
इत्येतत्कथितं भूप सम्भूता सा यथा पुरा ।
देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ॥४०॥
पुनश्च गौरीदेहात्सा समुद्भूता यथाभवत् ।
वधाय दुष्टदैत्यानां तथा शुम्भनिशुम्भयोः ॥४१॥
रक्षणाय च लोकानां देवानामुपकारिणी ।
तच्छृणुष्व मयाऽऽख्यातं यथावत्कथयामि ते ।ह्रींॐ।४२

श्रीदुर्गासप्तशत्यां चतुर्थोऽध्यायः पूर्णः ।
मध्यमचरित्रं पूर्णम् ।

खड्ग शूल गदा आदि शस्त्र जो आपके शिवे !
करों में हैं लिये आप उनसे रक्ष सर्वतः ॥२७॥

ऋषि बोले ॥२८॥

यों हुई स्तुत देवों से देवी नन्दन पुष्प से ।
पूजी, वह जगद्धात्री दिव्यगन्धानुलेप से ॥२९॥
भक्तिपूर्वक देवोंसे धूपों से धूपिता हुई ।
बोली प्रसादसुमुखी नमते सुरसंघको ॥३०॥

देवी बोली ॥३१॥

वरमांगो सभी देवो हमसे जो अभीष्ट है ॥३२॥

देव बोले ॥३३॥

सभी किया भगवति ! कुछ बाकी रहा नहीं ॥३४॥
मारा जो आपने शत्रु हमारा महिषासुर ।
यदि देना वर तुम्हे हमको है महेश्वरि । ३५॥
तो सुमरी हुई आप हमारी विपदा हरो ।
नर जो इन स्तोत्रों को पढें हे विमलानने ॥३६॥
उसके धनदारादि सम्पदा वृद्धि के लिए ।
प्रसन्न आप हमपै होइये सर्वदे शिवे ! ॥३७॥

ऋषि बोले ।३८॥

ऐसे तुष्ट सुरों ने की जगत् और स्वकेलिए ।
'तथास्तु' कहके देवी अन्तर्हित हुई नृप ! ॥३९॥
ऐसा कहा भूप मैंने जैसे व्यक्त हुई वह शिवा ।
देवी देवशरीरों से लोकत्रयहितैषिणी ॥४०॥
फिर गौरी देहमेंसे हुई व्यक्त यथा वह ।
मारने दुष्ट दैत्यों को और शुंभनिशुंभ को ।४१॥
लोकों का त्राण करने देवों की उपकारिणी
सुन मेरा कहा भूप ज्योंकात्यों तुझको कहूँ ॥४२॥

श्रीहरिशास्त्रिविरचित हिन्दी दुर्गासप्तशती
में चौथा अध्याय पूर्ण हुआ ।
मध्यमचरित्र पूर्ण हुआ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपयोगी लघुकथा

श्रीगिरिराजशर्मा शास्त्री, जयपुरम्

श्रीरामानुजः—दशम्यां शताब्द्यां श्रीरामानुजाचार्यस्याविर्भावोऽभूत्। अस्य पिता 'केशवभट्ट' इति नाम्ना प्रसिद्ध आसीत्। बाल्यकाले एवास्य पिता दिवङ्गतः। तदनन्तरं यादवप्रकाशनामकात् गुरोश्च अध्ययनं कृतवान् सः। अनेन वैष्णवसम्प्रदायस्य दीक्षा यमुनाचार्यात् गृहीताऽऽसीत्। काञ्चीपूर्णस्वामीति नामकात् अन्त्यजवर्णस्य सन्तात् श्रीरामानुजाचार्य उपदेशं लब्धवान्। गृहस्थाश्रमं परित्यज्य स संन्यासाश्रमे प्रविष्टोऽभूत्। विष्णुभक्तेः प्राचारार्थं तेन सर्वत्र देशे पर्यटनमारब्धम्। स्वस्य विशिष्टाद्वैतसिद्धान्तस्यानुसारं श्रीरामानुजाचार्येण 'प्रस्थानत्रयीति नाम्ना प्रख्यातानां ब्रह्मसूत्रोपनिषद्गीताग्रन्थानां उत्कृष्टा भाष्यग्रन्था लिखिताः। सामाजिकदृष्ट्या अस्पृश्यतानिवारणार्थं तेन महोदयेन सुबहु कार्यं कृतम्। परमो भगवद्भक्तः स आसीत् अतः जन्मतः कमपि पुरुषं अस्पृश्यं न अमन्यत।

चैतन्यः—अयमेव भगवांश्चैतन्यदेवो नवीनवैष्णवसम्प्रदायविशेषस्य प्रवर्तकस्तत् साम्प्रदायिकैश्चोपास्येष्टदेवत्वेनासौ परिगृहीतश्च।

स प्रभुः चैतन्यः (१४०७) सप्ताधिक चतुर्दशशकशतके कुम्भस्थे सवितरि पौर्णमास्यां तिथौ शुक्रवासरे प्रदोषसमये नवद्वीपाख्य नगर्यां प्रादुर्बभूव। अस्य पिता जगनाथमिश्रस्तु पुरा श्रीहट्टनिवासी आसीत्। कदाचित् गङ्गस्नानार्थमेव नवद्वीपमागत्य विप्रचक्रवर्तिकुलतिलकस्य

श्रीरामानुजः—दसवीं शताब्दी में श्रीरामानुजाचार्य का आविर्भाव हुआ। इनके पिता 'केशवभट्ट' इस नाम से प्रसिद्ध थे। बाल्यकाल में ही इनके पिता दिवङ्गत होगए। इसके बाद यादवप्रकाश नाम के गुरु से अध्ययन किया। इनने वैष्णव सम्प्रदाय की दीक्षा यमुनाचार्य से ग्रहण की थी। काञ्चीपूर्ण स्वामी इस नाम के एक अन्त्यज जाति के सन्त से श्रीरामानुजाचार्य ने उपदेश प्राप्त किया। गृहस्थाश्रम को छोड़कर वे संन्यासाश्रम में प्रविष्ट हो गए। विष्णुभक्ति के प्रचारहेतु उनने सम्पूर्ण देश में पर्यटन प्रारम्भ किया। अपने विशिष्टाद्वैत सिद्धान्त के अनुसार श्रीरामानुजाचार्य ने प्रस्थानत्रयी इस नाम से प्रख्यात ब्रह्मसूत्र, उपनिषद्, गीता ग्रन्थों के उत्कृष्ट भाष्यग्रन्थ लिखे। सामाजिक दृष्टि से अस्पृश्यता मिटाने को उनने बहुत कार्य किया। वे परमभगवद्भक्त थे इसलिये जन्म से ही किसी को अस्पृश्य नहीं मानते थे।

श्रीचैतन्यः—ये ही भगवान् चैतन्यदेव नवीन वैष्णव-सम्प्रदाय विशेष के प्रवर्तक उस सम्प्रदाय के लोगों द्वारा उपास्य इष्टदेव के रूप में माने गए।

ये प्रभु चैतन्य १४०७ शक शताब्दी में कुम्भ के सूर्य के समय पूर्णमासी की तिथि के दिन शुक्रवार को प्रदोष के समय नवद्वीपनाम के नगर में प्रादुर्भूत हुए। इनके पिता जगन्नाथ मिश्र तो पहले श्रीहट्ट (सिलहट आसाम) निवासी थे। कभी गंगा स्नान के लिए नवद्वीप

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नीलाम्बरशर्मणः शचीनाम्नीं कन्यां परिणीतवान्। ततो गच्छति काले अयं चैतन्यदेवः शचीगर्भात् जगन्नाथमिश्रस्य दशमपुत्रत्वेन समभवत्। प्राण्ते काले चैतन्यदेवोऽयं महामहोपाध्याय-गङ्गादासशर्म्मांणमुपाध्यायत्वेनाङ्गीकृत्य स्वल्पेनैव कालेन सर्वशास्त्रार्थतत्वज्ञः समभवत्। अस्य बुद्धिप्राखर्यमुपगम्य तदा सर्व एवैनं देवांशसम्भूतमन्यन्त। कालान्तरे वल्लभाचार्य अस्मै स्वकन्यां लक्ष्मीं सम्प्रददे। विवाहानन्तरमेवासौ छात्रानध्यापयितुं प्रवृत्तः। एतस्मिन् समये बहवो दिग्विजयिनः पण्डिताः नवद्वीपमागत्य अस्य तर्कजालैः समाच्छन्ना गतदर्पाश्च सन्तः प्रतिनिवृत्ताः। असावपि दिग्विजिगीषया पूर्वादिप्रदेशान् गत्वा तत्रस्थान् पण्डितान् विमोहयन् सुविमलं यशः प्राप्तवान्। तस्मिन्नेव काले अस्य पूर्वपत्नी पञ्चत्वं गता। चैतन्यदेवस्तु तस्या विरहेण व्याकुलितोऽपि मातुरनुरोधेनैव पुनः सनातनपण्डितस्य विष्णुप्रियानाम्नीं कन्यां द्वितीयपत्नीत्वेन स्वीचकार, परं सर्वगुणविभूषितायाः लक्ष्म्याः मरणादेवासौ संसारविरक्तः श्रीवासादिभिर्भक्तवर्गैः मिलितो हरिभक्तिरसनिमग्नः एव कालं यापयामास। अथ कदाचित् पितृलोकोद्धारवासनया गयातीर्थं गत्वा भक्तचूडामणेः श्रीमदीश्वरपुरीनाम्नो गोस्वामिनः सकाशात् हरिनामामृतदीक्षां लब्ध्वात्मानं कृतार्थं मत्वा च स्वदेशं प्रत्यावृतवान्।

में आकर विप्रचक्रवर्ती कुलतिलक की नीलाम्बर शर्मा की शचीनाम की कन्या के साथ विवाह किया। इसके पश्चात् समय बीतने पर ये चैतन्यदेव शचो के गर्भ में जगन्नाथ मिश्र के दसवें पुत्र के नाते उत्पन्न हुए। समय बीतने पर ये चैतन्यदेव महामहोपाध्याय गंगादास शर्मा को उपाध्याय बनाकर थोड़े ही समय में सर्वशास्त्रार्थ तत्वज्ञ हो गए। इनकी बुद्धि की प्रखरता को देखकर उस समय सब इनको देवांश से सम्भूत मानते थे। कुछ समय पश्चात् बल्लभाचार्य ने इनको अपनी कन्या लक्ष्मो को दे दिया। विवाह के पश्चात् ये छात्रों को पढाने में लग गए। इसी समय बहुत से दिग्विजयी पण्डित नवद्वीप में आकर इनके तर्कजालों से पराजित होकर अहंकार शून्य होते हुए लौट गए। ये भी दिग्विजय की इच्छा से पूर्वादि प्रदेशों में जाकर वहाँ के पण्डितों को मोहित करते हुए अतीव विमलयश इन्होंने प्राप्त किया। इसी समय इनकी पूर्व पत्नी दिवङ्गत हो गई। चैतन्यदेव तो उसके विरह से व्याकुल भी माता के अनुरोध से फिर से सनातन पण्डित की विष्णुप्रिया नाम की कन्या को द्वितीय पत्नी के नाते स्वीकार किया। किन्तु सम्पूर्ण गुणों से विभूषित लक्ष्मी के मरने पर ये संसार से विरक्त होकर श्रीवास आदि भक्तजनों के साथ मिलकर हरिभक्ति के रस में निमग्न होकर ही समय व्यतीत करने लगे। इसके पश्चात् एक बार पितृलोक के उद्धार को इच्छा से गयातीर्थ जाकर भक्तचूड़ामणि श्रीमद् ईश्वरपुरी नाम के गोस्वामी के द्वारा हरिनामामृत दीक्षा लेकर अपने आपको कृताथ मानकर अपने घर लौट गए।

एतस्मिन्नवसरे पाखण्डिदुराचारौ दस्युप्रवरौ जगाई माधाई चेति प्रसिद्धौ ब्रह्मबन्धू अन्यांश्च कुष्ठादिव्याधिपीडितान् महापातकिनः करुणया

इस अवसर पर पाखण्डी, दुराचारी, चोरों में श्रेष्ठ जगाई, माधाई इस नाम से प्रसिद्ध, ब्रह्मबन्धू तथा अन्य कुष्टादि व्याधिपीड़ित महापात-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हरिनामदीक्षादानेन संसारसागरात् समुधृत्य यवनजातीयकाजीप्रभृतीन् वैष्णवद्वेषिणः स्वमहिम्ना दमयामास। ततः प्रभृत्येवासौ भक्तिरसप्रधानं वैष्णवधर्मं प्रचारयितुमिच्छन् नित्यानन्दाद्वैताचार्यादिभिर्भक्तवर्गैः सह नानाजनपदेषु परिभ्रमन् बहूनेव जनान् प्रेमोन्मत्तानकरोत्। अथ १४३१ शकाब्दे उत्तरायणसंक्रान्त्यां संसारमायां परित्यज्य काटोयाख्यग्रामे केशवभारती सकाशात् संन्यासधर्मं समाश्रयत्। अथ नीलाचलमागत्य श्रीजगन्नाथदेवं दृष्ट्वा राज्ञः प्रतापादित्यस्य सभापण्डितम् वेदान्तशास्त्रपारदर्शिनं सार्वभौमं विचारेण पराजित्य वैष्णवदीक्षां प्रदत्तवान्। अथ कदाचित् गोदावरीतीरे भक्तवरं रामानन्दमवलोक्य सेव्यनिर्णयैर्धर्मालापैरात्मानं कृतकृत्यवदमन्यत। ततोऽसौ त्रिपदी–शिवकाञ्ची–विष्णुकाञ्ची–त्रिमल्लप्रभृतीन् बहून् दाक्षिणात्यजनपदान् हरिप्रेमरसेन प्लावयित्वा द्वारकातीर्थदर्शनार्थं प्रस्थितः। तत्राऽसौ कृष्णकर्णामृतं सुप्रसिद्धवैष्णवग्रन्थं लब्धवान्। अतः परं नीलाचलमागत्य श्रीजगन्नाथदेवस्य रथयात्रामहोत्सवे हरिसंकीर्तनादिकं विधाय प्रेमोन्मादप्रलापादिकं भक्तिलक्षणं दर्शयामास।

गच्छति काले वृन्दावनं जिगमिषुर्वन्येनैव पथा व्रजन् स्वभावसारल्येन व्याघ्रादीनपि हिंस्रजन्तून् भक्तिप्रेम्णा मादयित्वा वृन्दावनमुपतस्थे। तत्र श्रीकृष्णस्य विहारस्थानादिकमवलोक्य मथुरां गतवान्। मथुरातः प्रयागगमनकाले बहून पाखण्डिनो यवनान् हरिभक्तान् विधाय वाराणसीमुपस्थितः। तत्र स्वधर्मं प्रचार्य पुनर्नीलाचलमाजगाम। अत्र एवासौ स्वप्रचा-

क्रियों को करुणा करके हरिनाम की दीक्षा दान से संसार सागर से उद्धार करके यवन जाति के काजी आदि वैष्णव द्वेषियों को अपने प्रभाव से शान्त कर दिया। इसके पश्चात् ही ये भक्तिरसप्रधान वैष्णवधर्म का प्रचार करने हेतु नित्यानन्दाद्वैताचार्य आदि भक्तजनों के साथ बहुत से जनपदों में परिभ्रमण करते हुए बहुत से लोगों को प्रमोन्मत्त कर दिया। इसके पश्चात् १४३१ शकवर्ष में उत्तरायण संक्रान्ति पर संसार माया को छोड़कर काटोयाख्या ग्राम में केशव भारती द्वारा संन्यास धर्म को स्वीकार किया। तदनन्तर नीलाचल को आकर श्रीजगन्नाथदेव के दर्शन करके राजा प्रतापादित्य के सभापण्डित वेदान्त शास्त्र के पारदर्शी सार्वभौम को विचारों से पराजित करके वैष्णव दीक्षा दी। इसके पश्चात् गोदावरी तीर पर भक्तवर रामानन्द को देखकर सेवन करने योग्य निर्णय वाले धर्म विषयक वार्तालाप से स्वयं को कृतकृत्य माना। इसके पश्चात् ये त्रिपदी-शिवकाञ्ची-विष्णुकाञ्ची त्रिमल्ल आदि बहुत से दक्षिण के प्रदेशों को हरिप्रेमरस से प्लावित करके द्वारकातीर्थ के दर्शन को गए। वहां इन्होंने 'कृष्णकर्णामृत' के सुप्रसिद्ध वैष्णव ग्रन्थ प्राप्त किया। इसके पश्चात् नीलाचल में आकर श्रीजगन्नाथदेव के रथयात्रा महोत्सव में हरिसंकीर्तन आदि करके प्रेमोन्माद प्रलापादि भक्ति के लक्षणों को दिखाया।

कुछ समय के पश्चात् वृन्दावन जाने की इच्छा से वन्य मार्ग से जाते हुए स्वभाव के सारल्य से व्याघ्र आदि हिंसक जन्तुओं को भक्तिप्रेम से मस्त कर वृन्दावन पहुँचे। वहां श्रीकृष्ण के विहारस्थानादि देखकर मथुरा गए। मथुरा से प्रयाग जाते समय बहुत से पाखण्डी यवनों को हरिभक्त करके वाराणसी गए। वहां अपने धर्म का प्रचार करके फिर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रितवैष्णवधर्मस्य महात्म्यं विज्ञापयितुं स्वभक्तवृन्दान् नानातीर्थस्थानेषु प्रेषयामास ।

स्वभक्तैर्मिलितो नानाविधमहोत्सवैश्च हरिसंकीर्तनादिकं विधाय भक्तिरसस्य उत्कट-कोटिमभिगम्य विरहोन्मादादिभिः प्रगाढभक्ति-लक्षणैरन्वित आसीत् । तत एवासौ स्वभक्त-गणान् कलियुगे हरिसंकीर्तनस्य माहात्म्यादिकं श्रावयित्वा ८४ वर्षात्मके वयसि कालस्य दुरतिक्रमणीयत्वात् १४५५ संवत्सरे मानवकायं परित्यज्य अन्तर्हितवान् ।

नीलाचल आगए । यहां इनने स्वप्रचारित वैष्णवधर्म के महात्म्य को प्रकाशित करने को अपने भक्तवृन्दों को अनेक तीर्थस्थानों पर भेजा।

अपने भक्तों से मिलते हुए नानाविधमहोत्सव द्वारा हरिसंकीर्तनादि करके भक्तिरस की उत्कट कोटि को प्राप्त करके विरह उन्माद आदि प्रगाढ भक्ति लक्षणों से युक्त था। इसके पश्चात् ये अपने भक्तगणों को हरिकीर्तन के माहात्म्य आदि को सुनाकर चौरासी वर्ष की आयु में १४५५ संवत्सर में मानवकाया छोड़-कर अन्तर्ध्यान हो गए ।

आप 'भारती' के लिए क्या कर सकते हैं

१. ७) रु० भेजकर ग्राहक बनिये ।

२. अपने परिचित मित्रों को सम्मानार्ह संरक्षक, विशिष्ट संरक्षक, साधारण संरक्षक, सम्मान्य सहायक, आजीवन सदस्य अथवा स्थायी ग्राहक बनने को प्रेरित कीजिए ।

३. अपनी सुन्दर व विद्वत्तापूर्ण रचनाएं 'भारती' में भेजिए ।

४. 'भारती' में अपने व्यवसाय के लिए विज्ञापन दीजिये व दूसरों को प्रेरित कीजिये ।

५. धन भेजकर भारती को स्वावलम्बी बनने में सहायता कीजिये ।

६. 'भारती' के अभिकर्त्ता (प्रचारक) बनिए ।

७. 'भारती' की कमियां तथा सुधार के लिए हमें समय समय पर आपकी बहुमूल्य सम्मतियों से अवगत कराते रहिए ।

८. आपके नगर के विद्वानों को 'भारती' में लेख सामग्री भेजने को प्रोत्साहित कीजिए । हमें विश्वास है कि श्रीमान् एक अथवा अनेक रीतियों से 'भारती' की सहायता के लिये अग्रेसर हो रहेंगे ।

विनीत—**गिरिराजशर्मा, प्रबन्धसम्पादक**

भारती भवन—गोपालजी का रास्ता, जयपुर (राजस्थान)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'कः किं जानाति'

श्रीराधेश्यामशास्त्री, बी.ए. एलएल. बी., ह. शे. ब्रह्मचर्याश्रमः, भिवानी (हरियाणा)

जानाति सायणो वेदान् वेदान्तान् वेत्ति शंकरः ।
ज्योतिषं भास्कराचार्यो व्याकरणं पतञ्जलिः ॥१॥

निरुक्तं दुर्ग आचार्यश्छंदांसि मुनिपिङ्गलः ।
इतिहासपुराणानि वेदव्यासो महामुनिः ॥२॥

भट्टः कुमारिलो वेत्ति मीमांसाशास्त्रविस्तरम् ।
वाचस्पतिस्तु सर्वेषु दर्शनेषु विचक्षणः ॥३॥

गद्ये बाणो गतः ख्यातिं कालिदासस्तु नाटके ।
पद्ये नैषधकर्ता च काव्यं जानाति मम्मटः ॥४॥

अत्राह कश्चित्-वेदान्वेत्ति दयानन्दो नो सायणमहीधरौ ।
सत्येवं वेदवेत्तोचे सायणार्यः कथं त्वया ॥५॥

तत्रोच्यते—अविचारितरम्यं हि भाषितं मित्र वै त्वया ।
दयानन्दस्य वेदार्थो यथार्थो न कदाचन ॥६॥

ब्राह्मणश्रौतसूत्राणि न हि शीलितवानसौ ।
सायणस्य तु भाष्याणि श्रौतसूत्रानुसारतः ॥७॥

मनःकल्पनमात्रं च दयानन्दस्य भाष्यकम् ।
सायणस्यैव भाष्यं तु यथार्थं तेन कीर्तितम् ॥८॥

वच्मि निष्पक्षभावेन भवते रोचते न वा ।
दयानन्देन वेदार्थे जनितो वै महान् भ्रमः ॥९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

(दुष्टानुद्दिश्य)

आशुकवि-श्रीहरिशास्त्री, सम्पादकः

पैशुन्यमनृतं स्तेयं
मदः कपटवंचनाः ।
येष्विमे सन्ति ते दुष्टा
मानवा उदिता बुधैः ॥१॥

१—पैशुन्य चुगली (दूसरे के कान में दूसरे की बुराई) झूठ चोरी मद (नशा) कपट वंचना ये दोष जिनमें होते हैं वे दुष्ट कहलाते हैं ऐसा विद्वानों का मत है ।

उपर्युक्तेषु दोषेषु
चैकोऽपि जननाशकृत् ।
किमु यस्मिन्निमे सर्वे
सन्ति विश्वविकारकाः ॥२॥

२—ऊपर कहे हुए दोषों में किसी एक का होना भी जनका विनाश उपस्थित कर देता है और जिसमें सभी समाए हुए हो तों उसका क्या कहै वे तो विश्वका भी विगाड कर सकते हैं ।

दुष्टानां वचनं सन्धा
मैत्री संगतिरप्यहो ।
विनाशमेव कुरुते
नोपकारं कथंचन ॥३॥

३—दुष्टों की बातों में न आवें दुष्टों की प्रतिज्ञा पर भरोसा न करें । दुष्टों की मित्रता को सत् न मानें उनकी संगति में भी विश्वास न न करें ये विनाश ही करते हैं उपकार किसी तरह भी नहीं करते ।

दुष्टा हि दूरतस्त्याज्या
नैवोपास्या अपि क्षणम् ।
ते वाचापि न सन्धेया
हेया एव निरन्तरम् ॥४॥

४—दुष्ट पुरुष दूर से ही त्याग योग्य है किसी क्षण भी इनकी उपासना समीप बैठ कर नहीं करें । इन दुष्टों की वाणी से सत्कार और मेल मत करो, ये तो सदा के लिए ही हेय है ।

वरं नरकसंवासो
न खलैः सह संगतिः ।
इत्येतन्नीतिशास्त्रस्य
वाक्यं सद् वित्त सज्जनाः ॥५॥

५—नरक में रहना भले स्वीकार करलें पर दुर्जन का संग क्षणभर के लिए भी न स्वीकार करें । इस नीति शास्त्र के वाक्य का सदा के लिए सत् मानें सज्जनों से मेरी यही प्रार्थना है ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. No. J 7
Licence No. PP. 6
"Licenced to Post.
Without Prepayment"

एक राष्ट्रीय उत्पादन

३५००० से अधिक श्रमिकों को काम देने वाला

श्रेष्ठतम सामग्रियों से निर्मित

मेंगलूर

गणेश बीड़ियां

धूम्रपान करने वालों की अति प्रिय

प्रधान कार्यालय

मेंगलूर गणेश बीड़ी वर्क्स

विनोबा रोड़ : मैसूर–५

दूरभाष : ४२१

तार : AROMA

प्रकाशक—जयबहादुरसिंह पता : भारती भवन, गोपालजी का रास्ता, जयपुर। दूरभाष : ७५४६६
राधेश्याम शर्मा द्वारा श्री हनुमान प्रि० प्रेस, चौड़ा रास्ता, जयपुर में मुद्रित। फोनः ६३१५६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय हरिद्वार

भारती

संस्कृतमासिकस्य



अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।
परोपकारः पुण्याय पापाय परपीडनम् ॥
अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अभाललोचनः शम्भुर्भगवान् बादरायणः ॥

वार्षिकमूल्यं सप्तमुद्राः ७.००

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान–मध्यप्रदेश–गुजरात–महाराष्ट्र–मद्रास–आंध्र–उत्तरप्रदेश–
बिहार–पञ्चनद–सर्वकारैः स्वीकृता—

विषय-सूची

क्र० सं०	लेखाः	लेखकाः	पृष्ठसंख्या
१.	मङ्गलम्	श्रीहरिशास्त्री, सम्पादकः जयपुरम्	३२३
२.	छत्रपतिर्महाराजः शिववीरः	श्रीरत्नलालमिश्रः, नागौरः	३२४
३.	नभोमण्डलगताः केचिद्विशेषाः	श्रीसीतारामशास्त्री, बल्लारी	३२९
४.	अष्टाध्याय्यां प्रयुक्ता इच्छार्थकाः केचन शब्दाः	श्रीजानकीप्रसादद्विवेदः, वराणसी	३३३
५.	अथ श्रीशिवराज्योदये महाकाव्ये, ४०तमः सर्गः	महाकविः डॉ० श्रीधरभास्करवर्णेकरः, नागपुरम्	३३७
६.	श्रीनेहरोः प्रत्युत्पन्नमतित्वं वाग्विदग्धता च	श्रीगणेशरामशर्मा डूंगरपुरम्	३३९
७.	भारतस्य प्रथमो राजदूतो वराहमिहिरः	श्रीरमेशचन्द्रः, ग्वालियरः	३४१
८.	आवश्यका मन्त्रास्तथाक्षर-रत्नमञ्जूषा च	पण्डितवर-श्रीयमुनाधरलाटा न्यायशास्त्री, रामगढ़ः,	३४३
९.	मनोविनोदकणिका	मधुपः, जयपुरम्	३४९
१०.	धर्मरक्षणं करणीयम्	श्रीगङ्गाधरगुरुः, सम्बलपुरम्	३५०
११.	उपमा कविवंशस्य मातेव	श्रीमेवारामकटारा, लखनपुरम्	३५१
१२.	सम्पादकीयम्	'मधुपः' सहसम्पादकः	३५५
१३.	श्रीदुर्गासप्तशती ५ अध्यायः	श्रीहरिशास्त्री, सम्पादकः	३५८
१४.	लघुकथा	श्रीगिरिराजशर्मा शास्त्री, जयपुरम्	३६५
१५.	सूक्तिसुधा	आशुकवि-श्रीहरिशास्त्री, सम्पादकः	३६७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः
आशुकवि-कविभूषण-
श्रीहरिशास्त्री

सहसम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
साहित्यालङ्कारः

भारती

लेखैरुपस्कृता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

प्रबन्धसम्पादकः
सहसम्पादकश्च
गिरिराजशर्मा

भारती-भवनम्,
गोपालजी का रास्ता,
जयपुरम्

वर्षम् १६ | आषाढः, विक्रमाब्दः २०२६ (जुलाई, १९६९) | अङ्कः ६

मङ्गलम्

आशुकवि-श्रीहरिशास्त्री, सम्पादकः

श्रीमत्समस्तभुवनैकमहेश्वरी या
विद्याविवेकसुयशोऽभिमतानि दत्ते ।
यत्सेवनेन नर एति च भुक्ति-मुक्ती
साऽम्बा करोतु भुवना मम सुप्रभातम् ॥

मासावतरणम्

ग्रीष्मत्रस्तजनावनाय जलदानाकारयन्प्रेमतः,
तच्छायाभिरहःसु भूपरिगतांल्लोकान् समाश्वासयन् ।
प्रत्यग्रै र्जलवर्षणैश्च शमयन् तापं धरायाः सखे !
प्राप्तोऽयं जगदिष्टदैवतमिवाऽऽषाढस्य मासोऽधुना ॥

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राष्ट्रमुक्ते-अमरसेनानीः छत्रपतिः महाराजः शिवराजः

वैद्य–श्रीरत्नलालमिश्रः, आयुर्वेदाचार्यः, राजकीय आयुर्वेदिक औषधालयः, जोध्यासी, नागौरः

आस्माकीनायां पुण्यसलिलायां वीरप्रसविन्यां मातृभूमावस्यामङ्गुलि- गणनीयेषु वीरेषु प्रथममापतति महाराष्ट्र-कुल-भूषणस्य छत्रपतेर्महाराज-शिवराजस्य पुण्यं नामधेयम् । यो हि स्वदेशस्य स्वजातेरेवं समाजस्य च पुनरुद्धारं नवनिर्माणं च विधातुं तथा वैदेशिक-शासन-बन्धनाद् देशं समुन्मोचयितुं समस्तं जीवनमत्यवीवहत् । हिन्दू-सूर्य-महाराणा-प्रतापसिंहानन्तरं विशालं तथा शक्तिशालि यवन-साम्राज्यं धूलिसात्कर्तुमयमेव हि सक्रियं कार्यमचीकरत् ।

पुण्यश्लोकस्य श्रीशिवराजस्य जन्म १०–४–१६२७ तमेशवीये शिवनेरीनाम्नि दुर्गे समपद्यत । यस्यास्तेजस्विन्याः स्वाभिमानिन्याः नार्याः कुक्षितः शिवराजो जनिं लेभे । तस्या नाम "जीजाबाई" इत्यासीत् । यद्यहमत्र पुण्यमय्याः "जीजाबाई" इत्यस्या उच्चादर्शान् एवं महत्वाकाङ्क्षा वर्णयितुं प्रारभेय तर्हि निस्सन्देहमेष-निबन्धस्तस्याः पावनात्मनो महच्चरित्रं गृहीत्वैवावसानं समासादयिष्यतीति अत्रैयदेवालमस्ति यदस्माभिः शिवराजे ये गुणा आदितोऽन्तं यावत् परिलक्ष्यन्ते, ते सर्वे तज्जननी–जीजाबाई-कृपासम्भूताः सन्ति । यानि महान्त्युद्देश्यानि गृहीत्वैव शिवराजोऽग्रेसरो जातः ।

यो वह्निर्देशस्य जातेश्चावनतिं गृहीत्वा तन्मातुरुदरे कालान्तरं यावद् दन्दह्यमान आसीत् । स एव शिवराजाय प्रदीयमानशिक्षोपदेशेषु मूर्तिमान् समभूत् । सम्भवतो जीजाबाईः शिवराजं शिक्षयितुं तावन्नाध्यास्यद् यदि तस्या नारीत्वं पतिद्वारा तिरस्कृतं एवमभिमर्दितं नाभविष्यत् । किन्तु जीजाबाई-पितृजाधवराजस्य तस्याः पतिशाहजिनो मिथो वैमनस्य-कारणेन सा पत्युरुपेक्षा-तिरस्कार-भाजनमभवत् । येन तस्या हृदयं खण्डशो विदर्णम् । तया समस्तं ध्यानं शिवराजं शिक्षितं एवं च सुसंस्कृतं च विधातुं केन्द्रितं चक्रे । तयैव शिवराजः श्रीकृष्णवत् आवश्यकतानुसारेण सन्धिचक्राणि तथा छलयुद्धानि समाश्रयितुं समुपादेशि । इतिवृत्तं साक्षिकं यत् शिवराजः समये समये छल-बल-कौशलेनानेकानि युद्धानि जिगाय । इत्थं मातुरमूल्यानुपदेशान् गृह्णन् शिवराजो दादाजिकोण्डदेवस्य परिरक्षणे सैन्यशिक्षायां तथा राजनीतिशास्त्रे पूर्णतामाप ।

वाक् चातुर्य्यम्

पूनासूपास्थानस्य भूमेराधिपत्यं विधातुं तत्पिता शाहजी यः तस्मिन् समये बीजापुर-राजसंसदि सदस्य आसीत् । तत्राध्युष्य च नवविवाहितया दीपाबाईनाम्न्या पत्न्या सहानन्दमुपभुञ्जन् शिवराजं तत्राह्वयत् । पतिदर्शन-लोभं संवरयितुमसमर्था सा जीजाबाई अपि स्वपुत्रेण शिवराजेन साकं बीजापुरमाजगाम । किन्तु तत्र सा केवलमपमानमेवाप । मातुरपमानेन शिवराजस्य हृदयं ग्लानि-विद्रोह-पूर्णं जातम् । इत्थमशान्तमनसा यदा स बीजापुरराजसंसदि समुपस्थापितस्तदा तस्य स्वाभिमानि हृदयं तस्य विधर्मिणः सुलतानस्य सम्मुखे प्रह्वीभवितुं नोद्यतमभूत् । तस्य सुलतानस्य कृपया तत्पिता शाहजी स्वमहत्त्वं रक्षितुं तथाहङ्कारिणींप्रकृतिमङ्गीकृत्य स्वधर्मपत्नीमपि तिरस्कर्तुं तत्परोऽभूत् । तथापि मातुः शिक्षा शिवराजायावसरं बुद्ध्वा कार्यं कर्तुं क्षमतां प्रदत्तवती । अत एव स शिवराजः सुलतान-समक्षे स्थितिं विकृतां न विदधे । स तदा सुलतानं सम्बध्योचे-वार्तेयमस्ति यत् अहं भवन्तं निजपितृ-रूपे पश्यामि । अत्रत्यः संसदीयः प्रणामः आवयोरस्मिन् घनिष्ठ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्बन्धे भेदमुत्पादयतीति । अत एवाहं तथा कृत्वा निजमहतीं भावनां मलिनीकर्तुं न वाञ्छामि-इति । अत्र स्पष्टमस्ति यत् शिवराज-स्यैयं वाक्चातुरी सुलतानं तं अप्रसन्नं न चकार । किन्तु तदाप्रभृति शिवराजः संसदीय-प्रणाम-बन्धनान्मुक्तोऽभूदिति ।

गोहत्या–विरोधः

अस्मिन्नेव क्षणे शिवराजोऽचिचिन्तत् यद् बीजापुर-राज्ये गोवध-विरोधो नास्ति तथा समस्ते राज्ये गोहत्याया नग्नताण्डवनृत्यं स्थाने स्थाने बोभोति । निजामृतायमानेन दुग्धेन कान्तिमतीं बलवतीं तथा निर्मलमतिं मानवजातिं निर्मापयन्तीर्गोमातॄः प्रति वैदेशिकानां नृशंसमिमं तथा बर्बरव्यवहारं विलोक्य तस्य शिवराजस्य शोणितमुष्णमलं जातम् । गोवधं कुर्वाणाननेकान् पशुमारकान् (कसाई) स पशुमारं तथामीमरद् यथा पञ्चतामधिगताः । ततः स राजसंसद्यपि गमनं स्थगितवान् । यदा सुलतानः शिवराजस्यानुपस्थितौ तस्य पितरं पप्रच्छ-तदा शाहजिनोऽनन्यसुहृत् संसत्-सदस्यो मीरजुमलानामको यवनः तस्य सङ्कटं परिहर्त्तुकामः सुलतानं बभाषे—राजेन्द्र ! भावत्के राज्ये हिन्दुयवनावुभौ वसतः । तथा गोवधेन हिन्दूनां हृदयं दूयतेतमाम् । शिवराजोऽप्येतत्सोढुं न प्रभविष्णुः । यतो हि राजसंसदागमनक्षणे स्थाने स्थाने गोवधकर्तॄणामापणाः सन्ति । शिवराज एतादृक्स्थानं द्रष्टुमपि नेच्छति-कथं नाम गन्तुम् ? शिवराजवदन्यानपि हिन्दून् गोवध एष भृशं दुनोति, किन्तु भवद्भयात् कोऽपि किञ्चिन्न वक्ति । सुलतानस्य हृदये कथन-मेतत् सुतरामवस्थितम् । अपरस्मिन्नेव दिवसे बीजापुरराज्ये "अद्य प्रभृति गोवधः सर्वथाव-रुद्धः" इत्युदघोषि बीजापुराधीशेनेति ।

इतो गोवधावरोधेन बीजापुरीय–यवनेषु पर्याप्तोऽसन्तोषः प्रसेस्रीयितोऽभूत् । तद्धेतुना शाहजी स्वभविष्यत् तमोमयमपश्यत् । स स्वपत्नीं जीजाबाईनाम्नीं शिवराजं बोधयितुं प्रैरिरत् । यद्यपि पतिकथनेन जीजाबाई: तथा-कर्तुं समुद्यता बभूव । तथापि साऽबुध्यत यदस्य कोऽपि परिणामो न भविष्यतीति–एतदे-वाभूदपि । शिवराजो निर्भयतापूर्वकं धर्मे स्वोच्च-विश्वासान् प्राचीकटत् तथा धर्मरक्षार्थं च यथा-सम्भवमुपायानपि अङ्गीकर्तुं स्वदृढनिश्चयं व्याज्ञीत् । फलतः शाहजी शिवराजं द्रुतमेव पूनानगरं प्रति प्रातिष्ठिपदिति ।

विजयारम्भः

बीजापुरस्य किञ्चिद्दिनानां प्रवासः शिव-राजस्य हृदये विद्रोहाग्निं प्रज्वालयामास । समातृकः पूनां समागत एव स महाराष्ट्रियजन-तायां स्वदेश-प्रेम-स्वातन्त्र्य-भावांश्च भर्तुमा-रेभे । तस्मिन् काले महाराष्ट्रजनताऽपि नेतृत्व-हीनाऽऽसीत् । शिवराजरूपे तस्याः क्षतिपूर्तिर-भवत्तथा स दिवसः क्षिप्रतमं समागतः । यदा शिवराजः स्वध्वजस्याधः स्वदेश-स्वातन्त्र्ये सर्व-स्वहोतॄणां विशालमेकं समूहं समजीघटत् । व्यतीतेषु केषुचिद् दिवसेषु शिवराजस्यापूर्वा सैन्यशक्तिर्बभूव । एकदा स सहसा तोरणदुर्गं युद्धं विनाधिचकार । तस्मात् स स्वर्णभूयिष्ठं विपुलं वित्तं तदासीसदत् । यतोऽसौ दुर्गजो-र्णोद्धारेण सह सैन्यार्थं शस्त्रादीनि चिक्राय । शिवराजस्यैषा खलु प्राथमिकी सफलताऽऽसीत् । यतस्तस्य यशः सर्वत्र प्रसेस्रीयमाणं बभूव । तोरणदुर्गात् किञ्चिद्दूरं स नवीनं दुर्गं निर्ममे । यस्य स "राजगढ" इति नामधेयमास्थापयदिति ।

तोरणदुर्ग–विजयेन राजगढ़-निर्माणेन च तत्रत्या जनता शिवराजं प्रत्याकृष्टाऽभूत् । अन्ना-जिदत्तो-रघुनाथपन्त-निराजिपन्तसदृशा वीराः सहयोगिनो बभूवुः । दादाजिकोण्डदेव-निधना-नन्तरं तस्मिन्नेव काले पूनास्थित-स्वभूमेराधि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पत्यमण्यासादयामास सः। अतन्तरं शिवराजेन सूपा-चकण-इन्दरपुर-बारामती-कोडावत-पुरन्दर-पुरदुर्गा अपि स्वायत्तीचक्रिरे। शनैः शनैः शिवराजस्य नेतृत्वे महाराष्ट्रशक्तिर्वर्धमाना ऽभवत्। एकदा शिवराजस्याधिकारक्षेत्रमियद् विशालं वर्धितमासीत्—यद् बीजापुराधीशोऽपि भयभग्नमना अभवत्। तथा स सुलतानस्तं शिवराजं दमितुं शक्तिशालि यवनसाम्राज्यमभ्यर्थयामास। परन्तु शिवराजमेकं साधारण-पुरुषं मत्वा तस्मिन् क्षणे यवनसाम्राज्येन सुलतानाभ्यर्थनायां न किमपि ध्यानं ददे। फलतो बीजापुरसुलतानो महत्या सेनया सह अफजलखानं शिवराजं परारितुं प्रेषयामास। शिवराजाफजलखानयो रहसि मेलनम्। अफजलखानस्य विश्वासघातकरणम्। तथा आत्मरक्षार्थं शिवराजद्वारा व्याघ्रनखप्रयोगेणाफजलखानस्य मारणम्। इमाः सर्वा इतिहास-प्रसिद्धा घटनाः सन्ति। शिवराजस्यैष विजयस्तस्य ख्यातिं द्विगुणयामास।

अफजलखानस्य मृत्युः शिवराजायैकां शक्तिं, एकां नूतनां प्रेरणां च प्रददौ। तथा किञ्चिद्दिनानन्तरमेवासावनेकान् दुर्गानाक्रम्य जिगाय। तत्र बीजापुर-सुलतानोऽनेकशः शिवराजमभिषेणयितुं स्वशक्तिशालिनः सामन्तान् प्रजिघाय। किन्तु सर्वे ते शिवराजेन पराजिताः पराङ्मुखीभूय पलायिता रणाङ्गणादिति। अन्ते स सुलतानः शिवराजेन सह सन्धिं सन्धयामास। यदनुसारेण बीजापुराधीशः प्रतिवर्षं सप्तलक्षमितानि रूप्यकाणि शिवराजायोपायनीकर्तुं निश्चिकाय। सहैव आकल्याणात् गोआपर्यन्तमेकभागं शिवराजाय समर्पयामास।

बीजापुर-पतनानन्तरमेव यवनसाम्राज्यस्य राजसिंहासनमपि शैथिल्यमाप। तथावरङ्गजीवः शाहजादामुअज्जमं शाइस्ताखानं तथा यशवन्तसिंहं च क्रमशः शिवराजं जेतुं प्रैषयत्। किन्तु परिणामो न कोऽप्यभूत्। अवरङ्गजीवस्य समस्तः प्रयत्नो विफलः सञ्जातः। अन्तेऽसौ अवरङ्गजीवः स्वीयचालं चालयितुं विचारयामास। अत्र घटनाचक्रं पुनस्तीव्रतरं चचाल। संक्षेपत इयदेवास्ति यद् अवरङ्गजीवो मिर्जा-जयसिंहसाहाय्येन स्वचालितनीतौ साफल्यमाप। तथा जयसिंह-कथनं मत्वा शिवराजः इन्द्रप्रस्थं (देहली) आगम्यावरङ्गजीवेन सह मिमेल। यत्र राजसंसदि पञ्चसहस्रसेनाधिपतेः (पंचहजारी) मनसूबदारस्य पदं दत्त्वा तमपमेने। यतः स तमपमानं न विषेहे। ततः अवरङ्गजीवः शिवराजं कारागारे निजग्राह। शिवराजोऽनेन न व्यग्रचित्तोऽभवत्, किन्तु तस्मान्निष्क्रमितुं उपायं चिन्तयामास। स प्रतिगुरुवारं उपवासं करोति स्म। अन्ततोगत्वैकदा मिष्टान्नस्य महति वंशनिर्मिते पात्रे आत्मानं गोपायित्वा स तस्मान्निर्गत्य पलायत। ततोऽनेकानि स्थानानि पर्यट्य दक्षिणापथं प्रपेदे। गतेषु केषुचिदहस्सु स सिंहगढदुर्गमपि हस्तयामास। किन्तु सिंहगढदुर्ग-प्राप्तिकरणे शिवराजस्य महान् शुभचिन्तकः एवं सहयोगी तानाजी पञ्चत्वं गतः। तस्मिन् क्षणे तन्मुखाद्वाक्यमिदं सहसोद्गीर्णम्-सिंहगढदुर्गस्तु हस्तयितः किन्तु सिंहस्तु दूरतमं गतः।

अस्मिन् समये त्रिशत्यधिका दुर्गाः शिवराजस्याधिकारे जाताः नियमानुसारेण तस्य राज्याभिषेकोऽप्यभवत्—स च महाराज इत्युद्घोषितः। अभिषेकविधानैकसप्ताहानन्तरं माता जीजाबाई अपि परलोकं गता। शिवराजोऽपि बहुकालं यावत् राज्यं कर्तुं न पारयामास। ६।६।१६७४ ईशवीये तस्य राज्याभिषेको बभूव तथा ५।४।१६८० ईशवीये स चिरनिद्रामङ्गीचकार। इत्थं स षड् वर्षाणि यावत् राज्यमचीकरदिति। साम्प्रतं स्वतन्त्रे भारते जातेऽपि गोवधोऽनुष्ठीयमानो वर्तते, येन सर्वेषां भारतवासिनां कृते महान् कलङ्कोऽस्ति। गोवध-निरोध-सत्याग्रहे-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एणापि सर्वकारो गोवधं निरोद्धुं बाधितो भृशम्। तदपि सर्वकारेण गोवधो न निरोधितः। एतदस्माकं कृते महद् दुःखास्पदम्। सर्वेषां भारतीयानामियमिच्छा वर्तते यद् गोवध-निरोधः सर्वथा भवेदिति। एतदर्थमस्माभिः सर्वैर्भारतवासिभिर्भृशं प्रयतितव्यम्। येन भारते दुग्ध-दध्यादीनां नद्यः पूर्ववत् प्रवहेयुरिति। सम्प्रति देशे शिवराज-सदृशानां वीराणामावश्यकतास्ति। येन गोवधकर्तॄन् पशुमारं मारयेयुः। गावो हि त्रिलोक्या मातरः सन्ति। आसां वधो नोचितः। गोबलि-प्रदान-समये मन्त्रोऽयमुच्चार्यते खलु:—

सौरभेय्यः सर्वहिताः पवित्राः पुण्यराशयः।
प्रतिगृह्णन्तु मे ग्रासं गावस्त्रैलोक्यमातरः ॥१॥

पद्येऽस्मिन् गोविषये कीदृशा भावा भरिताः। यतो गावस्त्रैलोक्यमातर इति भणितम्। शम्।

Research Scholarships for Sanskrit Studies

The Government of India have decided to award scholarships to students of traditional system of Sanskrit Education to carry on Research in Sanskrit during 1969-70.

Value of each scholarship will be Rs. 200/- p. m. The award will be made on the recommendations of the Central Sanskrit Board.

Candidates must have obtained degree/diploma (other than M.A. in Sanskrit) in the highest examination in Oriental Learning conducted by a University or State Government. Those who have appeared or intend to appear at such an examination this year may also apply.

Last date for the receipt of the applications is 25th July, 1969. No application will be entertained after the expiry of this date. Further details and application forms may be had on request from the Section Officer, Sanskrit Unit, Ministry of Education (Room No. 330, C Wing, Shastri Bhawan) New Delhi. A self-addressed envelope (size 9"×4") may be sent along with the request for application form.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नभोमण्डलगताः केचिद्विशेषाः

साहित्यभूषणः, भाषाप्रवीणः पिशुपाटि श्रीसीतारामशास्त्री, बल्लारी

कालेऽस्मिन् खगोलविज्ञानमग्रतस्सरति शास्त्रज्ञस्य परिशोधनापाटवेन। शशाङ्को मृगाङ्कः सुधांशुरित्यादिविशेषणैः चित्रातिचित्रं महाकविभिर्वर्णितस्य निशाकरस्य कक्ष्यामपि प्रविश्य, शोधनं विधाय, परावर्तन्ते प्राणिसंघा निरामयाः। अणुयन्त्राण्यधिरुह्य ग्रहमण्डलं गता अपि मानवास्तत्रोषितुं न प्रभवन्ति। पार्थिवदेहधारिणामेषां ग्रहकक्ष्यासु वासं कर्तुं न समीचीनाः स्थितिगतयो विद्यन्ते। परिणिष्ठिताः पौरस्त्यपाश्चात्यविद्वांसः केचित् विषयममुमङ्गीचक्रुः।

पुरा तावत् ब्रह्मर्षयो, महर्षयो, राजर्षयश्च स्वा(?)वतपोयोगबलैरूर्ध्वलोकान् जग्मुः। अपि च तत्र यथेच्छं विचेरुः एतावदेव न मणिमन्त्रौषिद्धोस्साधयित्वा क्षुत्पिपासे विजित्य, जरामरणव्याधय अपाकृत्य, इन्द्रियातीतविषयानधिगतवन्तः, ज्यौतिषपुराणादिभिस्तान् जगति प्रख्यापयामासुः। ईदृशीनां शक्तीनां कासाञ्चिद्वा सम्पादने भूलोकवासी नभोमण्डले निवासं कर्तुमर्हतीति प्रज्ञावतामाशयः।

प्रकृतेऽत्र नभोमण्डलगताः केचिद्विषया निरूप्यन्ते।

शिशुमारचक्रोदन्तः

"दिव्यरूपमेकमस्ति शिशुमाराकारं नभोमण्डले। नक्षत्रमये तस्मिन् चतुर्दश नक्षत्राणि सन्ति"। इति मत्स्यपुराणवचनम्। अस्यैव शिशुमारचक्रस्य हृदये श्रीमन्नारायणो निवसति। पुच्छे तस्य ध्रुवनक्षत्रं स्वयं भ्रमन् सूर्यचन्द्रादिग्रहानन्यान्नक्षत्रांश्च भ्रामयति। पुराणेषु वर्णितमासीत्"-यत् एतच्चक्रं नक्षत्ररूपमहाविष्णुः, कुण्डलीभूतं महाविष्णोः दिव्यरूपं, अपि च वृश्चिकाकारं, धनुराकारं, मीनाकारमिति, वर्णनेनानेन विदितचरमस्ति-यत् "तदन्तर्गतानां मण्डलकक्ष्यादीनामधोभागेषु विशालता बलयाकाराता च भवति। क्रमेणोर्ध्वं गच्छत्सु तेषु नितरां ह्रस्वता, वक्रता च परिस्फुरति। नाऽत्र शिशून् घातयतीति यौगिकार्थः संगच्छते। अज्ञानमपहरतीत्यन्तरार्थः। चक्रमेतत् सकलदेवतात्मकं, सर्वतारारूपं, सकलतेजोमयं च वरीवर्ति। अतएवैनं स्वर्गमामनन्ति महर्षयः। इदमेव गायत्रीस्वरूपं ध्यात्वा, सन्ध्यासूपासनीयमिति वेदमन्त्रा घोषयन्ति, किं पुनः? ब्रह्माण्डस्य सकलपरिभ्रमणानां सृष्टिस्थितिलयानां च मूलकारणं भवतीति आरण्यकं पुराणानि च स्पष्टीकुर्वन्ति।

परिभ्रमणमेतदावहादिवायुसप्तकेन सिद्ध्यति। भूमेघयोर्मध्यभागे आवहः, मेघसूर्ययोर्मध्ये प्रवहः, सूर्याचन्द्रमसोरन्तरे अनुवहः (उद्वहः), चन्द्रनक्षत्रगणयोर्मध्ये संवहः, नक्षत्रग्रहयो र्मध्ये विवहः, ग्रहसप्तर्षिगणमध्ये परावहः, सप्तर्षिध्रुवयो र्मध्ये परिवहश्चापि सन्ति। एते सप्त वाता एव वहन्ति भुवनत्रयमिति कूर्मपुराणवचनम्। अनेनेदं ज्ञायते यत्—"मेघमण्डलादनन्तरं सूर्यमण्डलं, तदुपरि चन्द्रमण्डलं, ततः नक्षत्रमण्डलं, ततः ग्रहाः, सप्तर्षयः, ध्रुवश्च सन्तीति।

आस्तां तावत्—सकलजगदाधारं सकलजगत्साक्षिणं, ग्रहराजमादित्यमुद्दिश्य केचिद्विशेषाः अत्र लिख्यन्ते।

सूर्यमण्डलरथादिविवरणम्

सूर्यमण्डलस्य विस्तारः नवसहस्रयोजनानि। भूमण्डलात् लक्षयोजनमिते दूरे सूर्यमण्डलं,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्मात् लक्षयोजनमिते दूरे चन्द्रमण्डलं, ततः नक्षत्रमण्डलं चास्ति। सूर्यरथः मुहूर्तकाले अष्टशतोत्तरचतुस्त्रिंशल्लक्षयोजनमितं मार्गं गच्छति। सारथेरुपवेशनस्थलं षट्त्रिंशल्लक्षयोजनपरिमितम्। रथस्यास्य चक्रमेकमेव। अराः द्वादश। अपि च सप्तनामा अश्वः एक एव तं रथं वहति। तस्य हयस्य गायत्री त्रिष्टुबादि-सप्तच्छन्दोरूपाणि मुखानि सन्ति। तत्तत्कालानुसारेण षष्टिसहस्रसंख्याकवालखिल्यादिमहर्षयः, निखिलदेवतागणश्च परिवारो भूत्वा जगत्साक्षिणमादित्यमुपासते।

किरणवृष्ट्यादि-विवरणम्

सूर्यस्य सहस्रांशुरिति नाम। तस्मिन् किरणसहस्रे अमृतकिरणाः शतचतुष्टयम्। इमे वर्षकारकाः। हिमकारकाः अंशवः शतत्रयम्। आतपकारकाश्च शतत्रयम्। ऋतुभेदमनुसृत्य सूर्यांशुभेदो भवति। सूर्यः वायुनाड़ीमयैः तीक्ष्णैः किरणैः नदीसागरभूम्यादिस्थानेभ्य उदकमाकर्षति। सूर्यसंक्रान्तमिदमुष्णजलं चन्द्रमुपगम्य शीतलं भवति। कालक्रमेण तज्जलं धूमाग्निवायुरूपान् मेघान् नयति निशाकरः। ततो वायुप्रेरणया निर्मलमधुरजलानि मेघाः वर्षन्ति। प्रसङ्गात् प्राप्तं मेघवृत्तान्तं किञ्चिद्विलिखामि—जीमूताभिधाः जलधराः आवहवायुमाश्रित्य भूमेरुपरि योजनदूरे स्थित्वा सर्वदा वर्षन्ति। पुरा पुरन्दरः पर्वतानां पक्षांश्चिच्छेद। तदा तेभ्यः पुष्कलावर्तकनामानो मेघा उद्भूताः वाय्वाधारा एते। गर्जन्ति नितरां कठोरं भीकरं च। कल्पान्ते वर्षन्ति च। पर्जन्यो नाम मेघः वर्षर्तौ वर्षं, हेमन्ते हिमं च वर्षति। षष्ठो वायुरस्याम्बुदस्याऽऽलम्बभूतः। अमीषां गर्जनं वायुना, विद्युत्, अशनिश्च अग्निना भवति। सेचनक्रियायास्सत्वात् मिह सेचने इति धातोः मेघ इति, न भ्रंशः अस्यास्तीति अभ्रमिति च आख्ये।

द्वादशादित्येषु एकैकः एकैकमासस्याधिपतिर्भवेत्। सूर्यः सहस्ररश्मिः। अत्र सहस्रशब्दस्यानेकार्थता। प्राधान्येन सप्त वर्णाः परिगणिताः। सुषुम्नः, हरिकेशः, विश्वकर्मा, विश्वव्यथा, सन्नद्धः, सर्वावसुः, स्वराट् इत्येते सप्त किरणाः। नक्षत्रग्रहादिगतीनां मूलकारणान्येते। अमी वर्णाः (सप्त) राकेहुतू उज्झित्वा शिष्टसप्तग्रहेभ्यः विभिन्नरूपाणि कल्पयामासुः। सूर्यस्थितवर्णानामनुगुणं ग्रहकक्ष्यादयो निष्पन्नाः। वासरराशिसप्तधातुरूपफलानि, लोहादीनां सकलफलानि च अमोभिस्सप्तवर्णैः ज्ञातुं शक्यन्ते। मानवकाये विद्यमानास्सप्तधातवोऽपि तद्वर्णसम्बन्धिन एव। अत एव यो वर्णः मनुष्यशरीरे न्यूनो भवति, तमधिकृत्य तद्वर्णवतां ग्रहाणामनुग्रहः नालं भवतीति ज्यौतिषिकाः केचित् कथयन्ति। एतावदेव न, प्रकृतिवैद्याः वर्णानेतानवलम्ब्य चिकित्सन्ति च। अमी वर्णाः सर्वेऽपि श्वेतादेवोद्भवन्ति। जलसम्बन्धेन विभिन्ना वर्णा भवन्ति। एष जलसम्बन्धस्सूर्ये अस्ति। अमी सप्तवर्णा एव सूर्याश्वा इति पुराणोक्तिः।

ग्रहणरहस्यम्

सूर्याचन्द्रमसौ स्वयंप्रकाशमानौ। राहुकेतू तमोरूपिणौ। शिशुमारचक्रस्याधः सूर्यचन्द्रयोरधः सर्वदैतौ परिभ्रमतः। अनयोर्गमनमपसव्यम्। सूर्यचन्द्रयोः अन्यतरः यद्येतयोः समीपवर्ती स्यात् तर्हि तस्य राहुग्रस्तमिति वा, केतुग्रस्तमिति वा संज्ञया ग्रहणं भवति। राहुकेतुसहितनक्षत्रे सूर्यचन्द्रयोरवस्थानं यदा भवति तदैतत् ग्रहणं भवति। एतौ सर्परूपिणौ। एनयोश्छाया सर्पाकारा। ग्रहणसमये ईदृशंग्रहयोः तमश्छाया सूर्यचन्द्रतेजसी आच्छादयति। अत एव स समयः दोषभूयिष्ठः, अपवित्रश्चेति स्मृतिकारैः निर्णीतः। अपि च तद्ग्रहणदोषपरिहाराय जपहोमस्नानदानादयः करणीया इति दूरदर्शिभिः महर्षिभिरनुशासितमासीदेव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उदयास्तमये

प्रातस्सायंसन्ध्ययो रजस्तमोगुणैर्युतः अरुण-वर्णो भात्यर्कः। मध्याह्ने सत्वगुणेन सहितः श्वेतवर्णो भाति। तमसः अभावे सन्ध्याया अभावः। सृष्टेरप्यभावः। कालचक्रभ्रमणस्य ग्रहपरिभ्रमणस्य च अयमादित्य एव हेतुभूतः। अहर्दिवं, मासाः अयनानि, वत्सराणि च भानो-रेव भवन्ति। अहोरात्रेषु अस्य गमनमार्गः समानप्रमाणमेव। रात्रिन्दिवयोः वृद्धिह्रासौ राशिप्रमाणाधीनौ। अधस्तनश्लोकाः सूर्यस्य उदयास्तमये न स्त इति निरूपयन्ति—

यै र्यत्र दृश्यते भास्वान्, स तेषामुदयः स्मृतः।
तिरोभावश्च यत्रैति, तत्रैवास्तमनं रवेः॥ (२४)
नैवास्तमनमर्कस्य, नोदयस्सर्वदा सतः।
उदयास्तमयाख्यं हि, दर्शनादर्शनं रवेः॥ (२५)
शक्रादीनां पुरे तिष्ठन् स्पृशत्येव पुरत्रयम्।
विकर्णद्वौ विकर्णस्थः, त्रीन् कोणान् द्वे पुरे तथा॥

विष्णुपुराणम्–द्वितीयांशः। एवमेवान्यानि पुराणान्यपि उद्घोषयन्ति।

किञ्चैष अर्यमा मेरुगिरिं परितः परिभ्रमन् भूमण्डलस्यार्धभागं प्रकाशयति। दर्शनादर्शने वहति च। अतः दर्शनमेव दिवा इति अदर्शनमेव रात्रिरिति च निर्णायि। सकलद्वीपानां वर्षाणां च उदीच्यां दिशि मेरुगिरिरस्ति। दक्षिणायां लोकालोकाचलोस्ति। तथा च मेरुं प्रदक्षिणी-क्रियमाणं भास्करं यस्मिन् देशे जनाः पश्यन्ति स एव प्राची दिगिति विज्ञेयः। तेषां वामभाग एव मेरुस्तिष्ठति। एवं च सर्वेषां सर्वदा मेरु-रुदीच्यामेव तिष्ठति। अतः उदीच्यां दिशि सवदा निशेति, दक्षिणस्यां दिशि सर्वदा 'अहः' इति बोद्धव्यम्।

इत्थमनेकनिगूढविषयाः विष्णुपुराण–मत्स्य-पुराण–वायुपुराणादिषु सविस्तरं सुमधुरं च वर्णिताः, चर्चिताः, राद्धान्तीकृताश्च। तथापि तत्र तत्र विषयगहनता, क्लिष्टान्वयाः, पाठभेदाः, भावभेदाः, अन्यग्रन्थविरोधश्च धिषणानैशित्यस्य निकषोपलायमाना दरीदृश्यन्ते। विस्तरभियात्र केचिदेव विषयाः उपवर्णिताः गुणग्रहणलुब्धा! विज्ञा! इति विरमामि। इति शिवम्

दी अवध शूगर मिल्स लिमिटेड

प्रधान कार्यालय :–
इण्डस्ट्री हाउस
१५९ चर्च गेट रिक्लेमेशन
बम्बई–१

मिल्स :–
हरगांव
जिला–सीतापुर
उत्तरप्रदेश

निर्माता :—
शुद्धा, श्वेता, कणवती शर्करा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुभ कामनाओं सहित

डालमिया सिमेंट (भारत) लिमिटेड

डालमियापुरम् (तमिलनाडु)

"राकफ़ोर्ट" मार्का, डालमिया पोर्टलैण्ड एवं पोज़ोलाना सिमेंट
तथा
डालमिया रिफ्रैक्टरीज़ के निर्माता।

उड़िसा सिमेंट लिमिटेड

राजगंगपुर (उड़िसा राज्य)

"कोणार्क मार्का", डालमिया पोर्टलैण्ड एवं पोजोलाना सिमेंट
हर प्रकार और आकार की रिफ्रैक्टरीज़, आर० सी० सी० स्पन पाइप्स तथा
प्रीस्ट्रैस्ट कंक्रीट सामान के निर्माता।

DALMIA ENTERPRISES

मुख्य कार्यालय:
४-सिंधिया हाउस, नयी दिल्ली-१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अष्टाध्याय्यां प्रयुक्ता इच्छार्थकाः केचन शब्दाः

श्रीजानकीप्रसादद्विवेदः व्या० आ०, विद्यावारिधिः पी एच्०डी०, वा० सं० विद्यालयः, वाराणसी-२

पूर्वानुवृत्तम्

२. लिप्सा—लब्धुमिच्छा लिप्सा, प्रार्थनाऽभिलाष इत्यर्थः। लिप्सा क्वचित् स्वाभिप्रायस्य प्रकाशनेन—अहमपि भोजनार्थी समागतोऽतः कं भवन्तो भोजयिष्यन्तीति पृच्छात्मिका भवति। भोजनार्थिना बुभुक्षायाः प्राबल्यात् कालव्यवधानं सोढुं न शक्यते इति स सद्यो भोक्तुमिच्छति तेन कश्चित् स्वामिनं ब्रूते-कं भवन्तो भोजयन्तीति। भविष्यत्काले या हि भोजनक्रिया भवता सम्पादयिष्यते सा साम्प्रतमेव सम्पादनीयेति तस्याशयः। मन्ये एतदेवाभिलक्ष्य महर्षिपाणिनिना "किं वृत्ते लिप्सायाम्" (अ०३।३।६) इति सूत्रेण वैकल्पिकं लड्विधानं कृतम्। तेन भविष्यत्कालार्थे वर्तमानार्थबोधकोऽपि प्रत्ययः क्रियते। एवं भिक्षाग्रहणाय समुत्कण्ठितचेता भिक्षार्थी द्वौ बहून् वा प्रयच्छकान् प्राप्य को ह्येतादृश उदारचेता दीनबन्धुर्यो मह्यमपि किञ्चिद् दास्यतीत्यभिप्रेत्य पृच्छति—कतरो भिक्षां दास्यति, कतमो भिक्षां दास्यतीति। यदा भिक्षाया बलवती लिप्सा भवति (यत्र कालापगमोऽसह्यः प्रतिभाति) तत्र वर्तमानार्थक एव प्रत्ययः स्यादिति पाणिन्यभिमतम्। अत्र नेदमिष्टम्—यद् दातुर्दानक्रियया पुण्याऽवाप्तिर्निःश्रेयसं वा भविष्यतीति।

क्वचिच्च धार्मिकेभ्यः श्रोत्रियेभ्यो वा यत्किञ्चिद्दीयते तेन स्वर्गावाप्तिर्निश्चितैव भवतीति कश्चन दानशीलं (दातारम्) दानार्थं प्रोत्साहयति धर्मकार्यं यथाशीघ्रमेव करणीयं कालान्तरेऽन्तरायापाताशङ्कायाः सत्त्वात्। दानार्थिनमुपस्थितं भक्तमवलोक्य विलम्बो न श्रेयस्करः किञ्च सद्य एव दानं निःश्रेयसकरं सम्पत्स्यते इति तत्रापि "लिप्स्यमानसिद्धौ च" (अ० ३।३।७) इति सूत्रेण वैभाषिको वर्तमानार्थकः प्रत्ययो निर्दिश्यते। यथा—यो भक्तं (औदनम्) ददाति स स्वर्गं गच्छतीत्यादि। अत्र लिप्स्यमानाद् भक्तात् स्वर्गसिद्धिराचक्ष्यते। एतादृशोऽपि कश्चिद् भिक्षार्थी भवति यं दृष्ट्वैव लक्षणेन ज्ञायतेऽयं भिक्षार्थमुपस्थित इति। यथा हस्ते भिक्षापात्रं निधायागतो जनः किञ्चिदपि ब्रूयान्न वा किन्तु लोकः प्रत्येति मत्सकाशाद्भिक्षाप्राप्त्यर्थमेवायमुपस्थितो न तु कार्यान्तरार्थमिति। यो हि ब्राह्मणः स्रुवं हस्ते कृत्वा यजमानस्य गृहमुपैति यजमानस्तमवलोक्य संवित्ते-दक्षिणार्थमयमागत इति। अत्र हस्तस्थेन पात्रेण स्रुवेण च भिक्षाया दक्षिणायाश्च लिप्साऽवगम्यते। उच्यते च—पात्रप्रग्राहेण चरति भिक्षुः पिण्डार्थी, स्रुवप्रग्राहेण चरति द्विजो दक्षिणार्थीति। अयमाशयः—अन्यदीयस्य यस्य पदार्थस्य लिप्सा भवति स च पदार्थो भिक्षया दक्षिणयैव च यथा सारल्येन प्राप्तुं शक्यते न तथा चौर्याद्युपायान्तरेणेति। अत्रापीदं विज्ञेयम्—भिक्षाया अभिलाषः कदाचिदात्मलाभार्थं कदाचिच्च परलाभार्थं भवति। यदात्मलाभोद्देश्येन कश्चिद् भिक्षार्थं कञ्चिद् दातारमुपसरति, तत्र क्रियायामात्मनेपदस्य विधानं समीचीनं सम्भाव्य कातन्त्रे सूत्रं कृतम्—

"वा लिप्सायाम्" (कात० ३।२।७६-१८) इति।

यथा—भिक्षुको धार्मिकमुपतिष्ठते इति। यदा परस्य (स्वबान्धवादेः) कृते भिक्षार्थं धार्मिकमुपैति यदा परस्मैपदमेव सङ्गतमित्युद्दिश्यात्मनेपदविधानं विकल्पेन क्रियते, तेन परस्मैपदमपि जायते। यथा—भिक्षुको धार्मिकमुपतिष्ठतीति। पाणिनिनाऽनुक्तममुमर्थं वार्तिककारः सम्पूरयति—"वा लिप्सायामिति वक्तव्यम्" (म० भा० १।३।२४ वा०) इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३. वीप्सा—व्याप्तुमिच्छा वीप्सा। एकस्मिन् द्रव्ये या क्रिया गुणो वा दृश्यते सैव क्रिया गुणो वा यदि तादृशेष्वन्येष्वपि द्रव्येषु परिलक्ष्येत तर्हि क्रियासाम्याद् गुणसाम्याद् वा तानि सर्वाणि द्रव्याणि साम्यं भजन्ते, परञ्च तेषां सर्वेषां द्रव्यरूपार्थानां बोधो युगपन्न शक्यते कर्तुम्—एकेन शब्देनैकस्यैवार्थस्याऽभिव्यक्तेः। यथा कस्मिंश्चिद् ग्रामे या हि रमणीयता सैव तज्जनपदान्तर्गतेषु सर्वेष्वपि ग्रामेषु चेद् वर्तते तर्हि तद्बोधनायाऽयं ग्रामो रमणीयः, अयमपि ग्रामो रमणीय इत्येवं प्रकारेण बोधने क्लेशबाहुल्यं स्यात्। 'ग्रामा रमणीया' इत्येकशेषेणापि बोधने बहूनामेव ग्रामाणां बोधः स्यान्न तु सर्वेषाम्। युगपद् द्रव्याणां साकल्येनाभिधानाय वीप्सा क्रियते, सा च पौरुषेयधर्म इच्छाविशेषो विज्ञेया। उच्यते च वृत्तिकारेण—

"नानावाचिनामधिकरणानां क्रियागुणाभ्यां युगपत् प्रयोक्तुर्व्याप्तुमिच्छा वीप्सा" (का० वृ० ८।१।४) इति।

प्रदीपकारो वीप्सार्थमित्थं व्याचष्टे—

"नानाभूतमर्थं द्रव्यलक्षणं ये शब्दा ब्रुवन्ति तेषां यान्यधिकरणान्यभिधेयानि तेषां सहाऽविवक्षितानां पृथक्सङ्ख्यायुक्तानां प्रत्येकं क्रियागुणयुक्तानां प्रयोक्तुः क्रियया गुणेन वा युगपदेककाला व्याप्तुमिच्छा, सा वीप्सा" (म० भा० प्र० ८।१।४) इति। अत्र नानाशब्दोपादानेन 'व्रीहिर्यवो वा सम्पन्नः' इत्यादौ जातिशब्दस्य द्विर्वचनं न जायते। अन्यथा इदमप्याशङ्क्येत—जातिशब्देन सकलद्रव्याणां बोधो जायते इति जातिवाचकस्यापि शब्दस्य द्विवचनं करणीयमिति। परञ्च व्यक्तिभ्यो व्यतिरिक्ता, परित्यक्तभेदा व्यक्तय एव वा जातिरिति स्वीक्रियेत, उभयथापि भेदाऽभावाज्जातिलक्षण एक एवार्थो जातिवाचकशब्दस्योपपद्यते इति न तत्र द्विर्वचनम्। उच्यते च भाष्यकारेण—

"एकमर्थं प्रत्याययिष्यामीति जातिशब्दः प्रयुज्यते" (म० भा० ८।१।४) इति। वीप्सा त्वनेकेषामर्थानां प्रत्यायनार्थं क्रियते। अत्रेदमपि वेदितव्यम्—वीप्सायां द्विर्वचनं न विधीयते, किन्तर्हि यावन्तोऽर्थास्तेषां बोधनाय तावतामेव शब्दानां प्रयोगोऽपेक्ष्यते, तेषां सर्वेषां प्रयोगो न स्यात् किञ्च द्वे एव शब्दरूपे प्रयोक्तव्ये न ततोऽधिकानीति नियमः क्रियते। तेन ततोऽधिकानां शब्दरूपाणां निवृत्तिर्जायते। क्रियया गुणेन वा साम्यं प्राप्तवतामनेकेषां द्रव्याणामेकत्वादेकवचनमेवार्थे विधीयते, न तु द्विवचनं बहुवचनं वा।

वीप्सा प्रयोक्तृधर्म इच्छाविशेषो गृह्यते नाभिधेयधर्मः। यथा आबाधो गतगत इत्युक्ते प्रियस्य चिरगमनेन पीडितो वाक्यं प्रयुङ्क्ते इति प्रतिपत्तिर्जायते। अयं भावः—पृथक्संख्यायुक्तान् इतरेतरयोगमप्राप्तान् सर्वानर्थान् क्रियया गुणेन वा युगपद् व्याप्नुवन् यदा वाक्यं प्रयुङ्क्ते तदा वक्तृस्थ इच्छाविशेषो द्विर्वचनेन द्योत्यते (द्र० म० भा० प्र० ८।१।४)।

वीप्सायां द्रव्यरूपाणामनेकेषामर्थानां युगपद् व्याप्तिः क्रियते द्रव्यञ्च सुबन्तेनाख्यायते, तेन सुबन्तेष्वेव वीप्सा सम्पद्यते। आढ्यतरमाढ्यतरमानयेत्यादौ प्रकर्षपुरस्सरं वीप्सा विवक्ष्यते।

अत्र केचिद् वदन्ति—पचति पचतितरामित्यादौ पाकक्रियायां पौनःपुन्यस्य स्वापेक्षयाऽन्तरङ्गत्वात् पूर्वं द्विर्वचनं ततश्च तत्र प्रकर्षविवक्षायां तरप्प्रत्ययो यथा क्रियते तथैव 'आढ्यतरमाढ्यतरमानय' इत्यत्रापि पूर्वं वीप्सायां द्विर्वचनं ततश्च प्रकर्षद्योतनाय तरप्प्रत्ययः करणीयस्तेन 'आढ्याढ्यतरम्' इत्येवं रूपं स्यात्। अत्रेदं वक्तुं शक्यते—तिङन्ते क्रियायाः पौनःपुन्येऽतिशयस्यातिशये पौनःपुन्यस्य वान्वये कृते न कश्चिद् विशेषः प्रतीयते—उभयोरपि निरपेक्षत्वात्। परन्तु सुबन्तेऽति-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

...तो वीप्सा चेति द्वयमपि पदार्थान्तरमपेक्षते, ...द्वयो वैशिष्ट्यमवगम्यते। आनयनक्रियायां ...र्षयुक्ता एवाढ्या ईप्सितास्तेषां लब्धप्रकर्षा- ...मेव साकल्येनाभिधानं स्यादिति द्वयोर्विवक्षि- ...योर्बोधस्योपपादनाय पूर्वं प्रकर्षप्रत्ययस्ततश्च ...र्वचनं क्रियते। द्विर्वचनं विधाय तरपि कृते ...ति तदन्तस्य प्रातिपदिकत्वात् सुब्लुकि पटु- ...रित्यादाविवात्रापि प्रकारार्थः (सादृश्यम्) ...यीत न तु प्रकर्षार्थ इतीष्टार्थप्रतीतिलाभाय ...र्वं प्रकर्षयोगः तदनु वीप्सा क्रियते इति। ...र्षिपाणिनिना वीप्सायां "नित्यवीप्सयोः" (...८।१।४) इति सूत्रेण द्विर्वचनं क्रियते। ...था—ग्रामो ग्रामो रमणीयः, जनपदो जनपदो ...णीय इत्यादि। "पादशतस्य सङ्ख्यादेर्वी- ...यां बुन्लोपश्च" (अ० ५।४।१) इत्यनेन बुन् ...त्ययः क्रियते। यथा—द्वे द्वे शते ददाति ...र्तिकां ददाति, द्वौ द्वौ पादौ ददाति द्विप- ...कां ददाति-इति। "संख्यैकवचनाच्च वीप्सा- ...म्" (अ० ५।४।४३) इत्यनेन शस्प्रत्ययः ...ते। यथा द्वौ द्वौ मोदकौ ददातीति द्विशः, ...र्षापणं कार्षापणं ददातीति कार्षापणशो ...तीत्यादि। "लक्षणेत्थम्भूताख्यानभाग- ...सासु प्रतिपर्यनवः" (अ० १।४।९०) इत्यनेन ...सार्थे प्रतिपर्यनूनां कर्मप्रवचनीयसंज्ञा जायते। ...—वृक्षं वृक्षं प्रति सिञ्चतीत्यादि।

४. ज्ञीप्सा—ज्ञापयितुं बोधयितुमिच्छा ...सा। यस्मिन् यो गुणो वर्तते तं गुणं चेत्क- ...तस्मा एव बोधयेत्तर्हि तस्य गुणस्य गुणवते ...दानमेव भवतीत्यभिप्रायेणैव मन्ये ज्ञीप्स्य- ...नस्यार्थस्य सम्प्रदानसंज्ञा क्रियते—

"श्लाघ-ह्नुङ्-स्था-शपां ज्ञीप्स्यमानः" (...१।४।३४) इति। यथा-देवदत्ताय श्लाघते ...ादि। कश्चित् पुरुषो देवदत्ते वर्तमानं ...वादियोग्यं गुणं विज्ञाय तदग्रे एव तस्य श्लाघां कुर्वंस्तां श्लाघां देवदत्तमेव बोधयतीत्यर्थः। यथोक्तं काशिकाकारेण—"देवदत्तं श्लाघमानस्तां श्लाघां तमेव ज्ञपयितुमिच्छतीत्यर्थः" (का० वृ० १।४।३४) इति।

५. परीप्सा—परीप्सा=त्वरा। परिरत्र सर्वतोभावे वर्तते। यो हि पदार्थः सर्वतोभावे- नाप्तुमिष्यते तस्य प्राप्त्यर्थमवश्यमेव क्रियायां त्वराऽपेक्ष्यते, तेन चावश्यकमपि कार्यान्तरं प्रहीयते। यथा यस्य पुरुषस्य प्रातरुदयानादौ भ्रमणे मतिर्भवति स च शय्याया उत्थायैवाऽक्षि- प्रक्षालनमप्युपेक्ष्य तदर्थं प्रयाति। अत एवोच्यते- शय्याया उत्थाय धावतीति। यस्य चाऽपूपभक्षणे एव बुद्धिर्नियता भवति स भ्राष्ट्रादेवापकृष्याऽपू- पान् भक्षयति, दीयमानं भाजनमप्युपेक्षते, तदुच्यते—भ्राष्ट्रापकर्षमपूपान् भक्षयतीति। एवं 'लोष्टग्राहं युध्यन्ते' इत्यादि प्रयोगा अपि त्वरामेव बोधयन्ति, योद्धार एवं नाम त्वरन्ते यदायुधग्रहणमपि नाद्रियन्ते, लोष्टादिकं यत्कि- ञ्चिदासन्नं भवति तद् गृहीत्वैव युध्यन्ते इत्यर्थः।

'अधीष्व माणवक! पुरा विद्योतते विद्युत्' इति वाक्यमाकर्ण्य माणवकस्याऽध्ययनक्रियाया- माशुप्रवृत्तिर्जायते आशुप्रवृत्त्या च त्वरैव गम्यते। अयं भावः—आकाशे मेघमालामालोक्य मेघानां गर्जनञ्चाकर्ण्य कश्चिद् विज्ञ आसन्ने एव भविष्यत्काले विद्युद्द्योतनं सम्भाव्य माणवकं ब्रवीति—अध्ययनक्रियायामाशु प्रवृत्तिर्विधेया नो चेद् विद्युद्द्योतनमासन्नमेव परिलक्ष्यते, सति विद्युद्द्योतनेऽनध्यायवशादोप्सितमध्ययनं पूर्णं न भविष्यतीति।

६. आचिख्यासा—आख्यातुमिच्छा आचि- ख्यासा। यस्मिन् विषये किञ्चिद् वैशिष्ट्यं विद्यते तं विषयमाख्यातुं नूनमेव सचेतसः प्रवर्त्तन्ते। यथा पूर्वाचार्या अद्यतनादिकालं बहुधा परिभाषितवन्तस्तत्र सर्वाणि मतानि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोके तत्तत्स्थानेषु प्रचलितं व्यवहारमेवाधारीकृत्य प्रदर्शितानीति। महर्षिपाणिनिस्तु—यस्मिन् विषये शास्त्रकाराः सर्वथा लोकव्यवहारमेवानुसरन्ति तदर्थमनुशासनं (सूत्रप्रणयनम्) व्यथमेवेत्याकलय्याद्यतनादिकालस्य लक्षणं न कृतवान्। तज्ज्ञानार्थमुक्तं तेन—"कालोपसजने च तुल्यम्" (अ० १।२।५७) इति।

अयं भावः—लोकेऽद्यतनादिव्यवहारो यथा क्रियते तथैव शास्त्रकारैरपि लक्षणमनुक्त्वैव स्वीकर्त्तव्य इति। अतएव तदीयं व्याकरणमकालकम्=कालपरिभाषारहितं संवृत्तम्। इदञ्च कार्यं सर्वप्रथमं पाणिनिनैव कृतमिति पूर्वाचार्यव्याकरणापेक्षया कालपरिभाषाशून्यत्वं तदीयव्याकरणस्यैकं वैशिष्ट्यम्, तदाख्यातुं कस्यचिदपि विज्ञस्येच्छा जायते एवेति तदुच्यते—पाणिन्युपज्ञमकालकं व्याकरणमिति। एवमाचार्येण व्याडिना स्वीयग्रन्थे गणस्य समाप्तिद्योतनार्थं 'दुष्' इति साङ्केतिकः शब्दः प्रयुक्तः, यथा पाणिनीये 'धृत्' इति शब्दो व्यवहृतः। महर्षि व्याडेः सर्वप्रथममिदं कार्यमासीत्, तदुच्यते—'व्याड्युपज्ञं दुष्करणम्' इति। राज्ञा नन्देन सर्वप्रथमं द्रोणादीनि मानानि प्रचालितानि (प्रारब्धानि), अत एवोच्यते—नन्दोपक्रमाणि मानानीति।

उपज्ञायमानान्तस्योपक्रम्यमाणान्तस्य च शब्दस्य नपुंसकत्वमुपपद्यते यद्युपज्ञायमानोपक्रम्यमाणयोः प्राथम्यमाख्यातुमिष्यते इत्यनुशास्ति पाणिनिः—"उपज्ञोपक्रमं तदाद्याचिख्यासायाम्" (अ० २।४।२१) इति।

FOR SECURITY & SERVICE

RUBY GENERAL INSURANCE COMPANY LIMITED.

Year	Nett Premium Income	Nett Claims Paid	Capital & Funds	Assets.
1967	Rs. 3,26,55,000	Rs. 1,66,02,000	Rs. 2,84,29,000	Rs. 5,98,19,000

BUSINESS TRANSLATED;

FIRE MARINE MOTOR ACCIDENT AVIATION MACHINERY

AND

ERECTION ETC. ETC.

BRANCHES & AGENCIES IN ALL IMPORTANT TOWNS IN INDIA & ABROAD

Head Office & Registered Office :

"RUBY HOUSE"

8, India Exchange Place, CALCUTTA-I.

Delhi Office: 2I, Daryaganj, Delhi.

Managing Director, Shri K. P. Modi, J.P., A.F.I.I.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ श्रीशिवराज्योदये महाकाव्ये

४० तमः सर्गः

महाकविः डॉ० श्रीधरभास्करवर्णेकरः, डी.लिट्, नागपुरम्

...कार्तलबं वीरं पराजित्य पराक्रमी ।
...कांक्ष शिवो जेतुं रिपून् कोंकणसंस्थितान् ।१।

...रण्यमरातीनां रक्षितुं पुनराक्रमात् ।
...ग्रगण्यो नेताजिर्नियुक्तस्तत्र दुर्जयः ॥२॥

...तुरङ्गमारूढः स्फुरत्खड्गभुजार्गलः ।
...रोपितकूर्मत्वक् तरस्वी प्रययौ शिवः ॥३॥

...हाजिश्च पिलाजिश्च तथा त्र्यम्बकभास्करः ।
...रास्तमनुगच्छन्तोऽहृष्यन् वीरधुरन्धरम् ॥४॥

...ङ्घ्यमरातीनां सह्यमुल्लङ्घ्य लीलया ।
...ाढ्यपनसोद्गन्धं ते कोंकणमुपागताः ॥५॥

... दाल्भ्येश्वरं देवं समुद्रतटवासिनम् ।
...त्या परमयानर्च शिवभक्तिपरः शिवः ॥६॥

...नोन्नादितानां हि घण्टानां तत्र मन्दिरे ।
...दध्वान सर्वत्र कोंकणेषु महाध्वनिः ॥७॥

...म्पिरेऽखिलास्तत्र देवविद्रोहिणः खलाः ।
...ं मुमुदिरे चान्ये साधवो देवपूजकाः ॥८॥

...यामासिरे स्वं स्वं पदमुत्सृज्य दुर्मदाः ।
...ापुरीयसाम्राज्याधारभूताधिकारिणः ॥९॥

...राजन्यसंहारव्रतमुत्तीर्य भार्गवः ।
...पुण्यमाश्रयत् क्षेत्रं सह्यसागरमध्यगम् ॥१०॥

...सिष्ठीतीरसंस्थं तत् तीर्थं शिव उपागतः ।
...दर्शभूतं तं देवं भक्त्यार्चयितुमुत्सुकः ॥११॥

...कालकाममध्यस्थो देवः परशुभूषणः ।
...ोप पूजकं प्राप्य शिवं स्वसमविक्रमम् ॥१२॥

...सीर्दक्षिणाः प्राप्य तत्रत्या वैदिकद्विजाः ।
...ष्ट्वा ऊचुरन्योन्यं कर्णोऽसावद्य वीक्षितः ॥१३॥

...ो विजित्य सहसा नगरं संगमेश्वरम् ।
...हाजिश्च पिलाजिश्च नियुक्तौ तत्र रक्षकौ ॥१४॥

देवरुखाभिधं ग्रामं ततः स प्रययौ द्रुतम् ।
अनुकूलयितुं सूर्यरावं सुर्वेकुलोऽभवम् ॥१५॥

तस्यापकारमखिलं क्षणं विस्मृत्य दुःसहम् ।
सान्त्वप्रयोगमारेभे तद्वशीकरणोचितम् ॥१६॥

शिवसामर्थ्यमालेच्य वर्धमानं दिने दिने ।
स ययाचे सुरक्षार्थमात्मनः क्रीतपुत्रताम् ॥१७॥

अथाङ्ग्लानां हि नीचत्वं संस्मरंस्तदहर्निशम् ।
पर्णालदुर्गेऽस्त्रस्फोटैः शत्रुसाहाय्यकारिणाम् ।१८।

अत्युग्रतमदण्डोऽसौ राष्ट्रस्वातन्त्र्यविद्विषाम् ।
आंग्लान् दण्डयितुं दण्ड्यान् ययौ राजापुरं प्रति ।१९

लोलुभा वणिजस्तत्र नानादेशसमागताः ।
धनराशीनधिष्ठाय तस्थुः पन्नगसन्निभाः ॥२०॥

गरुत्मद्वृन्ददेश्येन शिवसैन्येन धर्षिताः ।
वल्मीककल्पेष्वलयन् निलयेष्वखिलाः खलाः ॥२१

शिवाज्ञयाऽत्यजन् सर्वे ममत्वं वित्तसञ्चये ।
वेला हि खलु वीराज्ञा लोकस्याम्बुनिधेरिव ॥२२॥

अनाहूता अपि प्राप्ता गोरुण्डाः शिवसम्मुखम् ।
पुण्यक्षेत्रमिवोत्तप्ताः पापप्रक्षालनेच्छवः ॥२३॥

घोरापराधदण्डार्हान् स्वसमक्षमवेक्ष्य तान् ।
सन्दुधुक्षे चिरं दान्तः शिवक्रोधहुताशनः ॥२४॥

स बभाण महातेजाः ज्वलदक्षरया गिरा ।
घक्ष्यन्निवाहितानांग्लान् स्वातन्त्र्यद्रोहकारिणः २५

बध्यन्तामखिला आंग्ला दुर्मदा श्वापदा इव ।
कारालये च रुध्यन्तामस्पृष्टरवितेजसि ॥२६॥

आचूलमूलमेतेषां द्रागगारं निपात्यताम् ।
संगृह्यतां धनं सर्वं तस्कराणां दुरात्मनाम् ॥२७॥

तदादेशमनुसृत्य गोरुण्डा दण्डमाप्नुवन् ।
यथाकालं फलन्त्येव पापानि खलु पाप्मनाम् ॥२८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रामाणि कोंकणस्थानि ततोऽन्यानि बहूनि च ।
स जित्वा क्रमशो वीरः स्वराज्यं समवर्धयत् ॥२९

सोऽयं शिवजयोदन्तो वार्ताहरनिवेदितः ।
दिने दिनेऽन्तरदहद् विजापुरनराधिपम् ॥३०॥

अपारयन्ती संश्रोतुमिमा वार्ता अरुन्तुदाः ।
सम्राण्माता च सा वृद्धा मक्कामेव विनिर्गता ॥३१

विजापुरमहीशोऽसौ कार्याकार्यविमूढधीः ।
निस्सहायमिवात्मानं मेने मर्दितबान्धवः ॥३२॥

अपरिच्छिन्नसाहाय्यो नाफझूलो न फाझलः ।
शशाक यं पराजेतुं कस्तमन्यो विजेष्यते ॥३३॥

अपश्यन् वीरमपरं समर्थं शिवमर्दने ।
सस्मार सूर्यरावं तं सुर्वेवंश्यं स्वकिङ्करम् ॥३४॥

तमादिदेश राजाऽसौ पत्रेणात्ममनोगतम् ।
अनन्यगतिकानां हि यः कोऽपि शरणास्पदम् ।।३५

कोङ्कणेषु समायातो योऽधुना गिरिमूषकः ।
निरुध्यतां सपद्येव सोऽस्मत्साम्राज्यतस्करः ॥३६॥

इति तत्पत्रसन्देशं प्राप्य दुर्दास्यमोहितः ।
सूर्यरावः स दुर्बुद्धिः शिवद्रोहपरोऽभवत् ॥३७॥

कृतघोरापराधोऽपि यः शिवेन वशीकृतः ।
हा हन्त पत्रमात्रेण सोऽप्यरीणां वशं गतः ॥३८॥

दुर्दास्यहतबुद्धीनां स्वातन्त्र्यं न सुखावहम् ।
विषयाकृष्टचित्तानां यथा श्रीहरिकीर्तनम् ॥३९॥

सहसा सूर्यरावोऽसौ निशीथे सेनयान्वितः ।
सङ्गमेश्वरमापेदे शिवराज्यविपत्तये ॥४०॥

महावीरः स तान्हाजिः ग्रीष्मसूर्यप्रतापवान् ।
उत्तस्थौ सूर्यरावस्य हन्तुं कौशिकचेष्टितम् ॥४१॥

विध्वस्ता प्रहरेणैव सूर्यरावस्य वाहिनी ।
प्रखरैः खड्गशूलनां प्रहारैवज्रदुर्धरैः ॥४२॥

दृष्टं रणाङ्गणं प्रातः सर्वतश्छिन्नमुण्डकम् ।
विकीर्णपाणि चरणं रुधिरक्लिन्नरेणुकम् ॥४३॥

शृङ्गारपुरमायातः सूर्यरावः पराहतः ।
विच्छिन्नशृङ्गस्तुङ्गाद्रौ कान्तारमिव गण्डकः ॥४४

तमन्वगादनुगदं शिवप्रतिनिधिर्द्रुतम् ।
पराभवाविलं तस्य मनः शोधयितुं पुनः ॥४५॥

पालीभूपं पराजित्य जसवन्ताभिधं तदा ।
सूर्यरावप्रतीक्षार्थं शिवः कालमयापयत् ॥४६॥

दुर्भागधेयविहतप्रज्ञोऽसौ दास्यमोहितः ।
शिवाय नात्मनो मेने शिवस्य किल दर्शनम् ॥४७॥

तेन कालविलम्बेन ज्ञात्वा तत्प्रतिकूलताम् ।
तत्याज सहसा क्रुद्धः शिवोऽपि स्वानुकूलताम् ॥४८

ससैन्यः सम्प्रतस्थेऽसौ प्रक्षोभाविललोचनः ।
कर्तुं विहतशृङ्गारं शृङ्गारपुरनायकम् ॥४९॥

सेनासञ्चारसम्भूतं धूलीपटलमम्बरे ।
आरादवेक्ष्य निर्यातः सूर्यरावो वनान्तरे ॥५०॥

तं हन्तुकामः स्वातन्त्र्यद्रोहिणं तद्गृहं गतः ।
खड्गपाणिर्ज्वलन्नेत्रः क्रोधदष्टाधरः शिवः ॥५१॥

निर्जने सदने तत्र ददृशेऽतीवसुन्दरम् ।
राजतं राजपट्टाङ्कं राजसिंहासनं महत् ॥५२॥

दृष्ट्वा सिंहासनं तस्य नीचस्य च तदुच्चकैः ।
तीव्रलत्ताप्रहारेण शिवोऽधस्तादपातयत् ॥५३॥

शिवपदविहतं पपात भूमौ
विशकलिताङ्गमदश्च दास्यपीठम् ।
वपुरिव शकटासुरस्य तस्य
हरिचरणाभिहतं विभिन्नगात्रम् ॥५४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीनेहरोः प्रत्युत्पन्नमतित्वं वाग्विदग्धता च

विद्याभूषणः श्रीगणेशरामशर्मा, डूंगरपुरम् (राज०)

स्यूत-कर्तकः

एकदोत्तरप्रदेशस्य तत्कालीनो मुख्यमन्त्री पं० गोविन्दवल्लभपन्तमहाभागो भाषमाणो बभूव। सुविशाले सभास्थले क्वचिदेकभागे रजरवकलकलो जायमानोऽभूत्। पन्तमहाभागः स्वभाषणं स्थगयामास परन्तु कोलाहलो न प्रशशाम। ततो नेहरूमहोदयो मन्दस्मितं कुर्वाणो मञ्चमाजगाम तथा जनसमूहाय मन्दमन्दया वाण्यैकां लघ्वीं सूचनां दत्त्वा तथा सर्वान् मौनमातिष्ठमाणानकार्षीद्यथा न किमपि बभूव। नेहरूमहोदयस्य तदिन्द्रजालवच्चमत्कारकं वचो नान्यत् किमप्यभूत् केवलमसौ सूचनामात्रमासीद्यद्धि-आरक्षिविभागीया (पुलिसमेन) एकं स्यूत-कर्तकं निगृह्य निन्य इति।

दुग्धपानस्य वयो नावशिष्टम्

यदा नेहरूमहोदयो मोहमयीतो निवर्तमानोऽभूत्तदा जाबालिपुरस्य रेलस्थितिस्थाने धूमशकटी विरेमे। अत्रान्तरे नेहरोः पानार्थं काचकूपिकापूर्णं केशरवर्णं दुग्धपात्रमुपतस्थे। नेहरूणा साकं तदानीं राजर्षिः पुरुषोत्तमदासटण्डनमहोदयः, श्रेष्ठिवर्यः श्रीगोविन्ददासमहाशयः, पं० केशवदेवमालवीयमहाभागः, श्रीफिरोजगान्धिस्तथा चान्ये कांग्रेसीया जनाश्चाप्यासन्। नेहरूमहोदयेनैकया प्रसन्नया हसन्त्या च दृष्ट्या राजर्षेष्टण्डनस्य दिशि समवलोकितम्, ततः शनैः सः प्रोवाच—'इदानीं दुग्धपानस्य वयो नावशिष्टम्'।

एतावत् कथयन् सः काचपात्रं पयःपूरितमेकस्मा अन्यतमाय सहयात्रिणे प्रददौ।

तदेतन्नपुंसकत्वं मङ्गलाय भूयात्

कांग्रेसमहासभाया महासमितेरजयमेरोरधिवेशन-सम्बन्धिनीयं संकथा। सभास्थले महिलानामासनार्थं निश्चितात् स्थानात् पृष्ठभागे पुरुषाणामेकः समूहो महान् स्त्रीणां दिशि कुतोऽप्याजगाम। नेहरूमहोदयो महता प्रशांतभावेन ध्वनिविस्तारकयन्त्रसमीपमाजगाम, तं पुरुषसमूहसम्मर्दं प्रीत्या ददर्शोवाच च—'भवन्तः पुरुषाः सन्तोऽपि च महिलाः प्रति गच्छन्ति? ये कामयन्ते ते तत्र प्रसन्नतया यथेच्छं गन्तुं पारयन्ते। तदेतन्नपुंसकत्व तन्मङ्गलाय भूयाद्यदि तेऽभिलषेयुः'!

अत्युष्णे फेनिले दुग्धे शीतलजलशीकरा इव निपेतुः स च पुरुषसमुदायो यथा स्थानं तत्कालमेवोपविवेश।

स्वर्ण-सिंहासनम्

नेहरूमहोदयो हास्यविनोदप्रसङ्गेष्वपि च गम्भीरां व्यङ्ग्योक्तिं कथयति स्म। विन्ध्यप्रदेशस्य यात्राप्रसङ्गे रीवाँराज्यस्य शासको महाराजस्तस्मै स्वकीये सुविशाले भव्ये च राजप्रासादे प्रीतिभोजं प्रददौ। तत्र स प्रासादस्य सुविशालहर्म्यस्य शृङ्गार-सज्जां विलोक्य स्तब्धश्चकितश्च बभूव। स रत्नखचितं स्वर्णसिंहासनमध्युषितुमनुरुद्धस्तदा स मन्दस्मितमुवाच—'राजानो महाराजास्तु गताः किन्त्वेतत् सिंहासनमधुनावशिष्यते'।

प्राचीनराज्यानां जीवनक्रमे तेषां वैभवाडम्बरे विलासप्रियतायां च तदिदं गम्भीरं व्यङ्ग्यमासीत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान में पिछले बीस वर्ष

कुछ विशिष्ट उपलब्धियां

कृषि

राज्य के एकीकरण से पूर्व खाद्यान्नों के अभाव के फलस्वरूप इनका आयात किया जाता था, लेकिन अब उत्पादन क्षमता में वृद्धि के उपरान्त खाद्यान्नों का निर्यात देश के विभिन्न भागों में किया जाने लगा है। खाद्यान्नों का उत्पादन जो १९५०–५१ में २९.०० लाख टन था बढ़कर वर्ष १९६७–६८ में ६६.०८ लाख टन हो गया है।

बिजली

विद्युत क्षेत्र में महत्वपूर्ण प्रगति के कारण जहां प्रथम योजना के आरम्भ में ८ मेगावाट बिजली (फर्म पावर) उपलब्ध थी वह बढ़कर १९६८–६९ में २३ ३ मेगावाट हो गई है। इसके अतिरिक्त इन्हीं वर्षों में जिन बस्तियों में बिजली पहुंचाई गई है उनकी सख्या ४२ से बढ़कर २,१३९ हो गई है।

तकनीकी शिक्षा

तकनीकी शिक्षा के क्षेत्र में स्नातक स्तर पर प्रशिक्षण क्षमता सन् १९५०–५१, में ६० से बढकर १९६७–६८ में ७३० तक पहुंच गई है।

जन स्वास्थ्य

पिछले २० वर्षों में राजस्थान में अस्पतालों और दवाखानों की संख्या १९५०–५१, में २३४ व १५६ से बढ़कर क्रमश: १९६८–६९ में ३३५ व २२० हो गई है। इसी प्रकार इन वर्षों में रोगी शैय्याएँ ५,७२० से बढकर १२,६३१ हो गई है।

पहले केवल जयपुर में ही मेडीकल कालेज था लेकिन अब उदयपुर, अजमेर, बीकानेर व जोधपुर में भी मेडीकल कालेज है।

सहकारिता

सहकारी समितियों की संख्या १९६७–६८ में २२,४६० तक पहुंच गई है जिनकी सदस्यता १३.८७ लाख है।

कृषकों को १९६८–६९ के अन्त तक संभवतः १२ करोड़ रुपये के अल्प और मध्यकालीन ऋण बांटे जायेंगे। जबकि १९५०–५१ में यह ऋण केवल १४.३५ लाख रुपयों के दिये गये।

सिंचाई

लघु सिंचाई के अन्तर्गत सिंचित क्षेत्र सन् १९५०–५१ में ११.७४ लाख हैक्टर था। संभवतः यह क्षेत्र १९६८–६९ के अन्त तक २३.५० लाख हैक्टर तक बढ़ जायेगा।

शिक्षा

राजस्थान में ३०० या उससे अधिक आबादी वाले ग्रामों में प्राथमिक शिक्षा की सुविधाएँ उपलब्ध हैं। ६ से ११, ११ से १४ और १४ से १७ वर्ष तक की आयु के कुल बच्चों में स्कूल जाने वाले विद्यार्थियों का प्रतिशत १९६८–६९ के अन्त तक क्रमशः ५६.५, २३.३ और ११.०० हो गया है १९५१–५२ में यह प्रतिशत केवल १४.८, ५.० व १.९ था।

जलप्रदाय

सन् १९४९ में ग्रामीण जल प्रदाय योजना नहीं के बराबर थीं। सन् १९६८–६९ में १८९ योजनायें चालू हैं। लगभग समस्त शहर जल प्रदाय योजना के अन्तर्गत लाये जा चुके हैं। इन शहरी जल प्रदाय योजनाओं की संख्या १९५०–५१ में ५ से बढ़कर १९६८–६९ में ७८ हो गई है।

सड़क यातायात

राजस्थान में सड़कों की लम्बाई १९५१–५२ में १८,७४९ किलोमीटर से बढकर १९६८–६९ में ३१,३६३ किलोमीटर हो गई है।

राजस्थान सरकार द्वारा प्रसारित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतस्य प्रथमो राजदूतो वराहमिहिरः

श्रीरमेशचन्द्र पौराणिक, उप-सचिव, संस्कृत परिषद्, महारानी कला एवं वाणिज्य महा० ग्वालियरः

सुविदितमेवैतत् यत् बृहत्संहितायाः अमरो ग्रन्थाकारः स्वकाले सर्वाधिकाम् ख्यातिम् गतः ज्योतिषज्ञ एव न, अपितु महान् राजनीतिज्ञः राज्याधिकारी च आसीत्। विक्रमादित्यस्य नवरत्नेषु कालिदासानन्तरम् मिहिरस्यैव स्थानमायाति। तथा च विक्रमादित्यस्य मंत्रिमंडले असौ भौतिक-जनहितविभागयोः विभागाध्यक्षः आसीत्। तदनन्तरम् महाराजेन विक्रमादित्येन मिहिरमहाभागाः रोमदेशस्य तत्कालीननृपैः आगस्टसमहोदयैः सह मिलितुम् यूरोपेऽपि प्रेषिताः, यत्र मिहिरमहोदयैः संभवतः भारतस्य प्रथमराजदूतस्य पदे किञ्चित्कालपर्यन्तम् कार्यम् कृतम्।

मिहिरं जनाः फारसीभाषायाः मेहरशब्दस्य अपभ्रंशत्वेन स्वीकुर्वन्ति यस्य भावार्थः सूर्यः भवति। परन्तु वराहमिहिरस्य मेहरशब्दस्य एभिः अर्थैः यदि कोऽपि सम्बन्धः आसीत् स केवलम् एष एव यत् ते तस्याः विद्यायाः आचार्याः आसन् ये स्वप्रतिभाया अस्मिन् लोके वसन्तः सन्तः अपि सूर्यपर्यन्तम् प्रेक्षणार्थम् यत्नम् कुर्वन्ति खगोलज्योतिषस्य सफल वेजारूपेण तैः भारतस्य यादृशी सेवा कृता सा प्रशंसनीया खलु।

असौ वराहमिहिरः कदा कतमञ्च भूभागं स्वजनुषा विभूषयामासेति प्रश्नोऽपि अतिशयजटिलः। परन्तु एतत् तु निश्चितमेव यत् मिहिरमहाभागैः विक्रमादित्यस्य समये स्वलोकप्रियतायां च महती ख्यातिः प्राप्ता। मिहिरमहाभागानाम् प्रसिद्धिकारणत्वादेव सम्भवतः महाराजेन विक्रमादित्येन मिहिरो मंत्रिमण्डलस्य सदस्यत्वेन निर्वाचितः। अस्मिन् मन्त्रिमण्डले मिहिरमहोदयाः भौतिकजनहितविभागयोः विभागाध्यक्षाः आसन् इति।

वराहमिहिरस्य वास्तविकं नाम वराहदास आसीत्। मिहिरमहोदयस्य जन्म अवन्तिकायाः समीपम् कपिला नाम्नीनगर्याम् सञ्जातम्। बृहत्संहितायाः पद्यमेकम् प्रमाणम् यत् वराहदासस्य पितुर्नाम आदित्यदास आसीत्। तथा च स्वप्रतिभायाः विकासाय एव ते स्वजन्मभूमि विहाय अवन्तिकाम् प्रति समायाताः। "मिहिर" इति तु तेषाम् गोत्रनाम आसीत्। अनेनैव मिहिरनाम्ना वराहदासः लोके ख्यातिम् प्राप्तः।

वराहमिहिरस्य ग्रन्थेषु सुविख्यातो ग्रन्थः बृहत्संहिता एव अस्ति न केवलम् ज्योतिषग्रन्थोऽपि तु तत्कालीनसमाजस्य प्रतिनिधिग्रन्थोऽपि वर्तते। अस्य ग्रन्थस्य वर्ण्यविषयाः भूगोल, खगोल, वायुविज्ञान, ऋतुविज्ञान, राजविज्ञान, अग्निविज्ञान, वर्षाविज्ञान, पदार्थविज्ञानदयश्च सन्ति। बृहत्संहितां विहाय एतावद्विस्तृतः सर्वविषयान्वितश्च अन्यो ग्रन्थो न मिलति।

वराहमिहिरस्य पूर्वजाः शकाः आसन् परन्तु दीर्घकालं यावत् भारते निवासत्वेन ते सर्वे पूर्णरूपेण भारतीयाः अभवन्। भविष्यपुराणे सुजिह्वनाम्नः शाकद्वीपिमगब्राह्मणस्य कन्यायाउपरि सूर्यः आसक्तः-सञ्जातः इति कथा अस्ति। अस्याम् कथयाम् सुजिह्वो मिहिरगोत्रो दर्शितः। तस्यैव सुजिह्वस्य परम्परायाम् वराहस्य अपि जन्म अभूत् इति विदुषां मतम्। विक्रमकालीनस्येतिहासस्य सुविख्याताः विद्वांस तथा च भूतपूर्वभरतपुर—राज्यस्य व्यवस्थापिका—सभायाः अध्यक्षमहाभागाः ठाकुरदेशराजमहोदयाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकस्मिन् लेखे आहु यत् नासिकगुहायाम् शकक्षत्रपनहपानस्य जामातुः उषवदातस्य यः लेखः समुपलब्धः तत्र अश्वभूतिम् यम् उषवदातेन चतुःसहस्रकार्षापरणैः क्रीतम् क्षेत्रम् भिक्षूणाम् भोजनार्थम् समर्थितम् तम् एव वराहपुत्र इत्युक्तम्। अनेन प्रबल-प्रमाणेन सिद्धयति यत् वाराहमिहिरस्य तनयः उज्जयिनीम् त्यक्त्वा पुनरपि शकानाम् शरणं आगच्छत् परन्तु जीवनम् यावत् वाराहमिहिर-महोदयाः सर्वदा एव अवन्तिकायाः राज्ञः विक्रमादित्स्य आश्रये एव वासञ्चकार एवं राज्यसंचालनकर्मणि मिहिरस्य पूर्णरूपेण सहयोगः आसीत्।

विदेशीयेतिहासज्ञानां मतमिदं यत् रोम-देशस्य राज्ञा आगस्टसमहोदयेन सह कस्यचिदपि भारतीयाधिपतेः पत्रव्यवहारः सञ्जातः। अन्वेषणेन निश्चितम् भवति यत् सः सम्राट् विक्रमादित्य एव आसीत्। तेषाम् पत्राणाम् अधुना ये लेखाः समुपलब्धाः सन्ति तेषु विक्रमा-दित्यम् "परपक्षसम्राट्" इत्युक्त्वा सम्बोधितः यत् पुरुवंशस्यैव अपभ्रंशत्वेन अनुमीयते। आगस्टसमहोदयम् प्रति लिखितानि विक्रमा-दित्यस्य पत्राणि वराहमिहिरमहाभागैः एव रोमम् प्रति प्रेषितानि इत्यस्य स्पष्टीकरणं वराहस्य "वृहत्संहितायाम्" मिलति। "मरु-कच्छसमुद्ररोमक तुषरा" नाम्नि प्रसंगे मिहिर-महोदयेन इटलीभारतयोः समुद्रीयव्यापारस्य विस्तृतम् वर्णनम् कृतम्। तेषाम् ज्योतिषशास्त्रस्य ज्ञानम् रोम्णः तत्कालीनज्योतिषशास्त्रेण प्रायशः प्रभावितम् आसीत् एवं च वैदेशिकं-ज्योतिस्य सर्वप्रथमं भारते स्थापनस्य श्रेयः मिहिरस्यैवाऽस्ति। "वृहत्संहितायाः" भौगोलिकं वर्णनम् एतस्य प्रबलं प्रमाणम् खलु यत् तत् ग्रन्थस्य कर्तुः दीर्घकालम् यावत् देशदेशान्तरस्य यात्रायाः अनुभव आसीदिति। "वृहत्संहितायाम्"—प्रचलिताः अनेके वैदे-शिकाः शब्दाः खल्वेतस्य प्रमाणरूपाः।

वृहतसंहितातिरिक्तो वाराहमिहिरस्य सर्वा-धिकख्यातिप्राप्तो ग्रन्थः सम्भवतः पंचसिद्धा-न्तिका आसीत्, किन्तु अस्य ग्रन्थस्य किमपि प्रबलं प्रमाणम् अधुना नोपलब्धम्।

भारतवर्षे ज्योतिर्विद्यावेदिनां मध्ये गुरु-परम्परातः प्रथिता, विद्वज्जनप्रशंसिता, सकल-संहितालक्षणोपेता, विविधविधानभूषिता, प्रशस्तपुरुषादिलक्षणमण्डिता वराहमिहिर-कृता वृहतसंहिता नाम इत्यस्मिन् विषये न मतान्तरम् खलु विदुषाम्। यूरोपदेशेऽपि इयं संहिता यूरोपदेशीय संस्कृतविद्याविनोदिनां विदुषाम् प्रसिद्धा जाता। एतस्याः संहितायाः प्राचीनाचार्यवचननिचयनिचता, चतुरविद्व-ज्जनमनोविनोददायिनी, सदर्थविचारचतुरी प्रपञ्चसहायिनी सद्भारते भारते चिरात् प्रसिद्धा भट्टोत्पलविरचिता संहिता विवृति-नाम्नी टीका च, परम् च विवृतिकाप्यधुना विनष्टा।

वराहस्य जन्मदेशकालविषये अनेकाः दन्तकथाः प्रचलिताः सन्ति। परन्तु वस्तुतः वराहमिहिरः नैकस्य कस्यचिदपि ग्रामस्य नगरस्य प्रान्तस्य, न वा कस्यचिदपि देशस्य विभूतिः आसीत् अपि नु सकलभूमण्डलस्य, नभोमण्डलस्य च सम्बन्धस्य शृङ्खला इव ज्यौतिषशास्त्रस्य प्रकाण्डपण्डितः भारतस्य दीपकत्वेन विश्वं प्रकाशयति चाधुना स्वनाम्ना कर्मणा च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथावश्यकमन्त्राः

लाटोपाह्व-पण्डितवर-श्रीयमुनाधरशर्मनैयायिकः, रामगढः (सीकर)

बुद्धिवर्धकं हयग्रीवस्तोत्रम्—

प्राची संध्या काचिदन्तर्निशायाः प्रज्ञादृष्टेरंजनश्रीरपूर्वा ।
वक्त्री वेदान् पातु नो वाजिवक्त्रा, वागीशाख्या वासुदेवस्य मूर्तिः ॥१॥

प्रणताज्ञानसंदोहध्वान्तध्वंसनकर्मठम् ।
नमामि तुरगग्रीवं, हरिं सारस्वतप्रदम् ॥२॥

श्लोकद्वयमिदं प्रातरष्टाविंशतिसंख्यया ।
पठतः प्रयतस्तस्य, कृत्स्ना विद्या प्रसीदति ॥३॥

दारिद्र्यं सकलं छिन्धि, कुरु सौभाग्यभाजनम् ।
शत्रून् नाशय मे वीर ! हयशीर्षन् नमोस्तु ते ॥४॥

एतदन्तिमश्लोकसम्पुटेन श्रीमद्भागवताष्टमस्कंधस्य पञ्चमाध्यायत आरभ्य द्वादशाध्याय-पर्यन्तमष्टानामध्यायानां पाठकरणेऽवश्यमेव सकलकार्यसिद्धिः ।

श्रीसरस्वतीवन्दनम्

शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं,
वीणापुस्तधारिणीमभयदां जाड्यान्धकारापहाम् ।
हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थितां,
वन्दे त्वां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥५॥

सरस्वतीमंत्रः — "ॐ श्रीं ह्रीं सरस्वत्यै स्वाहा" ।
श्रीलक्ष्मीमंत्रः — "ॐ श्रीं ह्रीं ऐं क्लीं कमलावासिन्यै स्वाहा" ।
दक्षिणामूर्तिमंत्रः — "ॐ नमो दक्षिणामूर्तये मह्यं मेधां प्रज्ञां प्रयच्छ स्वाहा" ।
गङ्गामंत्रः — "ॐ नमो गंगायै विश्वरूपिण्यै नारायिण्यै नमो नमः" ।
सूर्यमंत्रः — "ॐ ह्रां ह्रीं सूं सूर्याय स्वाहा" ।
अन्नपूर्णामंत्रः — "ॐ सहस्रा ह्रूं फट् स्वाहा भगवत्यै माहेश्वर्यै अन्नपूर्णायै नमः सहस्रा ह्रूं फट् स्वाहा" ।
श्रीगणेशमंत्रः — "ॐ नमो गणपतये" ।

येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः ।
मयूराश्चित्रिता येन, स मे वृत्तिं विधास्यति ॥७॥

एतत्संपुटितेन श्रीमद्भागवतपाठेन शोभनवृत्तिः (जीविका) प्राप्तिर्भवति ।

पत्नीप्रापकमंत्रः —
"विश्वावसुर्नाम (नामा) गन्धर्वः सर्वकन्यानामधिपतिर्मम-(मह्यं) शुभां सालङ्कारां कन्यां देहि देहि स्वाहा" ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पतिप्रापकमंत्रः—

कात्यायिनि महामाये महायोगिन्यधीश्वरि ।
नन्दगोपसुतं देवि ! पतिं मे कुरुते नमः ॥८॥

कलिनाशकश्लोक :—

कर्कोटकस्य नागस्य दमयन्त्या नलस्य च ।
ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम् ॥९॥

अथाक्षररत्नमंजूषा

शारदां मतिदां देवीं स्मृत्वा स्मृत्वा पुनः पुनः ।
श्रीगणेशं गुरुञ्चैव, नमस्कृत्य सुभक्तितः ॥१॥

प्रथमशिक्षकाणां वै, शिष्याणां ज्ञानलब्धये ।
अक्षररत्नमञ्जूषां करोति यमुनाधरः ॥२॥

हिन्दीसंस्कृतसंमिश्रां लघुरूपां सुरूपदाम् ।
बालबोधाय वक्ष्यामि, वर्णमालां सुवाक्प्रदाम् ॥३॥

अनादिसादिभेदेन वर्णमाला द्विधा मता ।
अकारादि हकारान्ताऽऽद्या पतञ्जलिसंमता ॥४॥

द्वितीया शिवढक्काया नादजा युग४भूमिता१ ।
अकारादिलकारान्ता, शिवसूत्रेषु गुंफिता ॥
तयाऽजनि कुमाराणां ज्ञानराशिः शुभावहः ॥५॥

नृत्यावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्तुकामः सनकादिसिद्धानेतद् विमर्शे शिवसूत्रजालम् ॥६॥

अनादिवर्णमालायामष्टौ वर्णाः प्रकीर्तिताः ।
सेव्यसेवककामानां लाभो हानिर्यतो भवेत् ॥७॥

अ क च ट त य श वर्गाः,
खगेश मार्जार सिंह शूनाम् ।
सर्पाखुमृगावीनां, निजपञ्चमवैरिणामष्टौ ॥८॥

अवर्गो गरुडो ज्ञेयो, बिडालः स्यात् कवर्गकः ।
चवर्गः सिंहनामा स्याट्टवर्गः कुक्कुरः स्मृतः ॥९॥

सर्पाख्यः स्यात्तवर्गोऽपि पवर्गो मूषकः स्मृतः ।
यवर्गो मृगनामास्यात्तथा मेषः शवर्गकः ॥१०॥

स्ववर्गात् पञ्चमः शत्रुश्चतुर्थो मित्रसंज्ञकः ।
उदासीनस्तृतीयश्च, वर्गभेदस्त्रिधोच्यते ॥११॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



मैं बड़ा होकर क्या बनूँगा ?

...डाक्टर, वकील, इंजीनियर, प्रोफ़ेसर......?

तुम बड़े होकर जो भी बनना चाहो, बन सकते हो। तुम्हारी सफलता के लिये अब अनेक दरवाजे खुले हैं। शर्त सिर्फ एक है। खूब पढ़ाई करो और क्लास में अच्छे नम्बर लाओ।

छात्रों के लिये वर्ष प्रति वर्ष सुविधायें बढ़ती जा रही हैं। रुपये-पैसे की कमी अब तुम्हारे लिये कोई अड़चन नहीं बनेगी, क्योंकि अच्छे अंकों पर अब छात्रवृत्तियाँ

मिलती हैं। उदाहरण के लिये, विज्ञान ही लो। अगर तुम 'डिसटिंक्शन' लाते हो तो 'राष्ट्रीय विज्ञान प्रतिभा योजना' के अन्तर्गत तुम्हें बी० एस०सी० प्रथम वर्ष में छात्रवृत्ति मिल सकती है, जो तुम्हारे पी०एच०डी० करने तक जारी रह सकती है। इसी प्रकार, मेधावी छात्रों को देश और विदेशों में उच्च अध्ययन के लिये अनेक छात्रवृत्तियाँ दी जाती हैं। क्या तुम जानते हो ? स्कूलों और कालेजों के छात्रों को हर वर्ष ३० करोड़ रुपये की छात्रवृत्तियाँ दी जाती हैं।

योजना से तरक्की

p 68/605

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्ववर्गं द्विगुणं कृत्वा, परवर्गेण योजयेत् ।
अष्टभिस्तु हरेच्छेषे योऽधिकः स ऋणी भवेत् ॥१२॥

अकारादिविसार्गान्ताः षोडश[१६]स्युः स्वरा अचः ।
त्रयस्त्रिंशत् कादयस्तु, व्यञ्जनानि हलश्च वै ॥१३॥

स्पर्शाः स्युः कादिमान्तास्तु, यवर्गोऽन्तस्थ एव च ।
एवं वर्णमालायां, शवर्ग ऊष्मसंज्ञकः ॥१४॥

तालव्यो मूर्धजो दन्त्यः शषसाः क्रमतो मताः ।
स्वराणामेव भेदाः स्युर्ह्रस्वदीर्घप्लुताभिधाः ॥१५॥

उदात्तश्चानुदात्तश्च स्वरित इत्यपि त्रयः ।
प्रत्येकं भेदषट्कं स्यादुदात्तादिप्रभेदतः ॥१६॥

त्रिभिरेवानुनासिक्याऽननुनासिकते द्वयम् ।
प्रत्येकं योजनाद् भेदाः षट् स्युश्चक्रानुसारतः ॥१७॥

चक्रम्

ह्रस्वः	दीर्घः		प्लुतः	
१. उदात्तानुनासिकः	१.	,,	१.	,,
२. उदात्ताननुनासिकः	२.	,,	२.	,,
३. अनुदात्तानुनासिकः	३.	,,	३.	,,
४. अनुदात्ताननुनासिकः	४.	,,	४.	,,
५. स्वरितानुनासिकः	५.	,,	५.	,,
६. स्वरिताननुनासिकः	६.	,,	६.	,,

अ इ उ ऋ युगाश्चापि प्रत्येकं वसु[८]भूमिताः[१] ।
भेदा अग्रे स्वराणां तु, प्रत्येकं द्वादशैव हि ॥१८॥

ह्रस्वप्लुतौ लृकारस्याऽन्येषां तु दीर्घकप्लुतौ ।
अचामणां परेषाञ्च, सवर्णग्राहिता मता ॥१९॥

ऋ लृ वर्णौ मिथः स्यातां, सवर्णौ तेन ख°[३]गुणौ ।
रेफोष्मणां सवर्णा न भाष्यादीनां प्रमाणतः ॥२०॥

अचः परावनुस्वारविसर्गौ भवतः सदा ।
शिरो बिन्दुरनुस्वारो, बिन्दू द्वौ तु विसर्गकः ॥२१॥

अर्धचन्द्राकृतिर्बिन्दुरनुनासिक उच्यते ।
स चाक्षु य व ले ष्वेव, नान्यत्र जायते क्वचित् ॥२२॥

विसर्गः कखयोः शिष्य पफयोः परतो यदि ।
जिह्वामूलीयको वा स्यादुपध्मानीयकस्तथा ॥
क ᳵ कुर्यात् क ᳵ पठत्यत्र, निदर्शनं क्रमाद् द्वयोः ॥२३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुस्वारो विसर्गौ वा, स्वरत्वहलत्वभागिनौ ।
तेन द्वित्वं विसर्गस्य स्याद् राम:: स्वपुरं गतः ॥२४॥

पठ पुत्र ! प्रयत्नेन वचो मे हृदये कुरु ।
स्वदेशे पूज्यते राजा, विद्वान् सर्वत्र पूज्यते ॥२५॥

यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम् ।
स्वजनः श्वजनो मा भूत्, सकलं शकलं सकृच्छकृत् ॥२६॥

श ष स इति विशेषो वा, न ज्ञायते येन कदापि लोके ।
गुदरदनविवरभेदो, दन्तैरेव लक्ष्यते तस्य ॥२७॥

एकमात्रो भवेद् ह्रस्वो, द्विमात्रो दीर्घ उच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयो, व्यञ्जनं चार्द्धमात्रकम् ॥२८॥

एकमात्रं वदेच्चाषो द्विमात्रं वायसो वदेत् ।
त्रिमात्रं तु शिखी ब्रूयान्नकुलश्चार्द्धमात्रकम् ॥२९॥

मात्रा कालस्य संज्ञाऽस्ति, साऽऽर्यादिवृत्तिगा मता ।
मात्रावर्णविभेदेन छन्दोऽपि द्विविधं मतम् ॥३०॥

ISS SSS SSI SIS ISI SII III IIS लघु गुरु
य मा ता रा ज भा न स ल ग म् ।
यमाताराजभानाद्यैः सलगैश्च दशाक्षरैः ।
अष्टौ गणा लघुदीर्घा, छन्दस्येते भवन्ति वै ॥
त्रिभिरेवाक्षरैरेको गणो यमादिसंज्ञकः ॥३१॥

संयुक्ताद्यं दीर्घं, स्वानुस्वारं विसर्गसंमिश्रम् ।
विज्ञेयमक्षरं गुरु, पादान्तःस्थं विकल्पेन ॥३२॥

द्वितीयस्य चतुर्थस्य, पादस्यान्तगतो गुरुः ।
वर्णो विकल्पितो ज्ञेयः केचिद् वदन्ति पण्डिताः ॥३३॥

SS IIS SII
ज्ञेयाः सर्वान्तमध्यादि गुरवोत्र चतुष्कलाः ।
III
गणाश्चतु र्लघूपेताः पञ्चार्यादिषु संस्थिताः ॥३४॥

आदि मध्यावसानेषु, भजसा यान्ति गौरवम् ।
यरता लाघवं यान्ति, मनौ तु गुरुलाघवम् ॥३५॥

SSS III SII ISS
मस्त्रिगुरुस्त्रिलघुश्च नकारो, भादिगुरुः पुनरादिलघुर्यः ।
ISI SIS IIS SSI
जो गुरु मध्यगतो रलमध्यः, सोन्तगुरुः कथितोन्तलघुस्तः ॥३६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सानुस्वारो विसर्गान्तो, दीर्घो युक्तपरश्च सः ।
वा पादान्ते त्वसौ वक्रो ज्ञेयोऽन्यो मातृको ऋजुः ॥३७॥

म्यरस्त जभ्नगैर्लान्तै रेभिर्दशभिरक्षरैः ।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥३८॥

सवगुर्मो मुखान्तर्लौ, यरावंत गलौ सतौ ।
गमध्याद्यौ ज्भौ त्रिलो, नोष्टौ भवन्त्यत्र गणास्त्रिकाः ॥३९॥

पादादाविह वर्णस्य, संयोगः क्रमसंज्ञकः ।
पुरः स्थितेन तेन स्याल्लघुतापि क्वचिद् गुरोः ॥४०॥

उदाहरणकञ्चात्र सर्वमावश्यकन्तथा । बुधैरन्यच्च विज्ञेयं वृत्तरत्नाकरादितः ॥

उदात्तादि प्रयोगस्तु, वेदेषु स्पष्ट एव हि ।
हरि ओम् इति सूक्ते वै, आनो भद्रा–निदर्शनम् ॥४१॥

रेखाशून्य उदात्तः स्यात्तत्रोर्ध्वं याति हस्तकः ।
अधोरेखोऽनुदात्तः स्यात्तत्र पाणेरधो गतिः ॥४२॥

स्वरित ऊर्ध्वरेखः स्यात्तत्र पाणिस्तु मध्यगः ।
स्वरितादग्रेऽनुदात्ते हि, शनैः शनैरधो गतिः ॥
उदात्ते शीघ्रमायाति, ज्ञेयं गतिद्वयं बुधैः ॥४३॥

स्वरितः केवलो यत्र, मृदु तत्र निपातयेत् ।
प्रचयो (उदात्तो) दृश्यते यत्र, तत्र हन्यात् करं बुधः ॥४४॥

ᳪँ ᳫँ

श ष स हेषु रेफे च, परतो ह्रस्वदीर्घकौ ।
अनुस्वारो हि गुँकारावाप्नोति वेद एव हि ॥४५॥

दीर्घात् परो ह्यनुस्वारो, ह्रस्वं गुँ याति हे वटो ।
ह्रस्वात् परस्तु दीर्घं वै गूँकारं प्रति पद्यते ॥४६॥

ह्रस्वेऽगुंष्ठेन संस्पर्शं, देशिन्याः कारयेत् बुधः ।
दीर्घे तूर्ध्वं प्रकर्तव्यं, देशिन्याश्चालनं वटो ॥४७॥

विसर्ग ऊर्ध्वचिह्ने तु देशिनीं चालयेत् बुधः ।
कनिष्ठिकामधश्चिन्हे, मध्ये चिन्हेऽगुंलिद्वयम् ॥४८॥

रंगे तर्जिनीविस्तारो, मकारे मुष्टिकाकृतिः ।
ककारे मध्यमाङ्गुष्ठसंयोगं कारयेत् बुधः ॥४९॥

हस्तं विना न पुण्यं स्यान्नकारे तु नखग्रहः ।
स्वाध्याये पठने चैव हस्तचालनमिष्यते ॥५०॥

अंकविद्याऽपि नित्यैव, दशाक्षरात्मिका वटो ।
एकत्वादि—परार्धान्ता, तत्प्रभेदास्त्वनेधा ॥५१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकं दश शतं चैव, सहस्रमयुतं तथा ।
लक्षञ्च नियुतञ्चैव, कोटिरर्बुदमेव च ॥५२॥

वृन्दं खर्वो निखर्वश्च, शंखः पद्मश्च सागरः ।
अन्त्यं मध्यं परार्धञ्च, दशवृद्धया यथाक्रमम् ॥५३॥

अनेकैकत्वबुद्धि र्या, सापेक्षाबुद्धिरिष्यते ।
अपेक्षाबुद्धिनाशाच्च, नाशस्तेषां निरूपितः ॥५४॥

अनादिवर्णमाला तु, वर्णमालेति संज्ञया ।
यथोपयुज्यते शिष्य ! तथा संदर्शयिष्पते ॥५५॥

पक्षिराजगृहीतोऽस्तु पतञ्जलिर्गतो मुनिः ।
प्रस्तारान् पाठयन्नब्धि, भुजङ्गस्य प्रयाततः ॥५६॥

मनोविनोदकणिका—

सख्याः सदुपदेशः

प्रत्यब्दं सखि जायते मम जनिर्बालस्य दुर्भाग्यतः,
रुग्णो मे दयितो धनं न विपुलं, सम्वर्द्धमाना पुनः ।
दुष्टेयञ्च महर्घताप्यनुदिनं, कुर्यामहं किं वद ?–
हे भद्रे परिवारयोजनविधौ लूपस्त्वया सेव्यताम् ॥

—दीनानाथत्रिवेदी मधुपः

शुभ कामनाओं के साथ

* इन्डो फॉरेन एजेन्सीज् *

२३, सर फिरोजशाह मेहता रोड़,

बम्बई – १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्मरक्षणं करणीयम्

श्रीगंगाधरगुरुः पत्रालयः पद्मपुरं, राजवोड़ा सम्बलपु,रं ओड़िशा

(कदम् कदम् बढ़ाये जा .... लयः)

धर्मरक्षणं सदा
कार्यमात्मना मुदा
वार्यतामनार्य–वृत्तिरार्यतेजसा बुधाः ! (१)

अमृतं पुनातु वा जीवनं प्रयातु वा
संपदः श्रयन्तु वात्र दुर्दशास्तुदन्तु वा
सत्यमेव पाल्यताम्
मानवत्वमर्ज्यताम्
स्थीयतां च शौर्यदीप्तचेतसा हि संविदा
धर्मरक्षणं सदा
कार्यमात्मना मुदा ... ... (२)

संस्कृतिर्हि सेव्यताम् दुष्कृतिर्विनाश्यताम्
देववागधीयतां च मातृभूः समर्च्यताम्
राष्ट्रकीर्तिगौरवम्
धर्मसारवैभवम्
रक्षितुं च वीरता विधीयतां हि मोक्षदा
धर्मरक्षणं सदा
कार्यमात्मना मुदा ... ... (३)

ओं शान्तिः शान्तिः शान्तिः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपमा कविवंशस्य मातैव

वा. श्रीमेवारामकटारा 'पङ्क' एम.ए. (संस्कृत) लखनपुरम्, (भरतपुरम्)

मम्मटाचार्यमहाभागेन काव्यप्रकाशे काव्यस्य त्रयो भेदा वर्णिताः। ध्वनिगुणीभूतव्यंग्यचित्रकाव्याभिधाः। चित्रकाव्यं तेन परिभाषितम्—'शब्दचित्रं वाच्यचित्रमव्यङ्गं त्ववरं स्मृतम्'।१-५।

यथा काऽपि सुन्दरी स्वाभूषणानवधार्य सौन्दर्यमपि सुन्दरतमं करोति हीनरूपाऽपि स्वहीनतामावृणोति तथैवालङ्कृतं काव्यम्। कविराजविश्वनाथेनाप्युक्तं साहित्यदर्पणे—

"काव्यस्य शब्दार्थौ शरीरं, रसादिश्चात्मा, गुणाः शौर्यादिवत्, दोषाः काणत्वादिवत्, रीतयोऽवयवसंस्थानविशेषवत्, अलङ्काराश्च कटककुण्डलादिवत्।" प्रथमपरिच्छेदः॥

गुणालङ्काररीतयः कविनोत्कर्षहेतवः प्रोक्ताः। श्रीशशिभूषणदासगुप्तमहोदयोऽपि "उपमा कालिदास्य" नाम स्वग्रन्थे चित्रकाव्यस्य महत्तां प्रतिपादयति। कवीन्द्ररवीन्द्रणाप्येभिः शब्दैरिदं पुष्टम्—

"यथा वर्तते तथैव लेखनं नास्ति साहित्यं यतः प्रकृत्यां यं पश्यामि तन्मम समीपे प्रत्यक्षं वर्तते। ममेन्द्रियाणि तस्य साक्षात्कारं कुर्वन्ति। साहित्यं यद् दृष्टं तत् प्राकृतमपि भूत्वा प्रत्यक्षं नास्ति अतः साहित्ये तस्याभावस्य पूर्तिः करणीया।"

सर्वेऽप्यलङ्काराः महत्त्वपूर्णाः परञ्च कतिपयविद्वान्सः एकस्मिन्नेवालङ्कारे सवर्षामलङ्काराणां मूलं पश्यन्ति। यथा ह्याचार्यकुन्तकेन तु वक्रोक्त्यलङ्कारमेव काव्यस्य जीवितमात्मेति कथितम्। मम्मटाचार्यमहाभागेनापि समर्थितमिदं मतम्—

"सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते। यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना॥"

आचार्यदण्डिमहाभागेनापि 'भिन्ना द्विधा स्वभावोक्ति र्वक्रोक्तिश्चेति वाङ्मयमु'क्त्वा वक्रोक्त्यलङ्कारस्य महत्त्वं प्रदर्शितम्। आचार्यदण्डी सर्वेष्वलङ्कारेष्वतिशयोक्त्यलङ्कारमेव बीजरूपं मन्यते। परञ्चाचार्याप्पयदीक्षितेनोपमैव सवश्रेष्ठालङ्कारो मतः। यथाह्युक्तम्—

"उपमैका शैलूषी सम्प्राप्ता चित्रभूमिका भेदान्।
रञ्जयन्ती काव्यरंगे नृत्यन्ती तद्विधा चेत्॥"

या चित्रकाव्यस्य भूमिकायाः विभिन्नरूपेष्ववतीर्य स्वनृत्येन सहृदयाननुरञ्जत्युपमैवैका सा नटीव। विभिन्नालङ्काराः नट्युपमाया एव भूमिकाभेदाः नृत्यं तथा। रूपकेनानेनेदम्प्रतीतं यदप्पयदीक्षितमहोदयोऽस्यालङ्कारस्योपमाप्रकृतिनस्याथवा मायानट्यैव दातुमिच्छति। पुनश्च—

"तदिदं चित्रं विश्वं ब्रह्मज्ञानादिवोपमाज्ञानात्।
ज्ञातं भवतीत्यादौ निरूप्यते निखिलभेदा सा॥"

ब्रह्मज्ञानेन यथा चित्रविश्वस्य ज्ञानमायाति तथैवोपमायाः ज्ञानेन कविना सृष्टस्य चित्रविश्वस्य ज्ञानं भवति। ब्रह्मज्ञानमिवात्रोपमायाः ज्ञानम्।

वामनाचार्योऽपि 'प्रतिवस्तुप्रभृतिरुपमाप्रपञ्चः' इत्युक्त्वोपमायाः प्राधान्यमेव प्रदर्शितवान्। महिमभट्टमहाभागेनापि 'सर्वेष्वलङ्कारेषूपमा जीवितायते' इति प्रयुज्योपमायाः महत्त्वं स्वीकृतम्। रूय्यकाचार्यः सर्वेषामलङ्काराणामुपमामेव मूलतत्त्वं मन्यते। विद्यानाथविद्याधरावप्यन्वमोदेतां रूय्यकम्। राजशेखरस्तूमां कवीनां माता, काव्यसर्वस्वालङ्कारशिरोरत्नाद्युपाधिभिर्विभूषयति—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"अलङ्कारशिरोरत्नं सवस्वं काव्यसम्पदाम् ।
उपमा कविवंशस्य मातैवेति मतिर्मम ॥"

प्रकारेणानेन स्मरणोपमेयोपमाऽन्वयरूपकपरिणामसन्देहभ्रान्तिमदुल्लेखापन्हुत्युत्प्रेक्षातिशयोक्तितुल्योपमादीपकप्रतिवस्तूपमादृष्टान्तनिदर्शनाव्यतिरेकसहोक्तिसमासोक्त्यर्थान्तरन्यासादयोऽलङ्काराः उपमाया एव प्ररूपाः सर्वेऽप्येते उपमामूलकाः ।

साहित्ये सर्वप्रथममुपमालङ्कारस्यैवागमनम् । भारतीयकाव्यस्य प्रथमा कृतिः ऋग्वेदः । ऋग्वेदेऽनेकेषु स्थानेषूपमा प्रयुक्ता, नाममात्रैवान्यालङ्काराणां प्रयोगः । मन्त्र एकोऽत्रोद्धृतः—

"उत त्वः पश्यन् व ददर्श वाचं-
उत त्वः शृण्वमनेन शृणोत्येनाम् ।
उतो त्व स्मै तन्वं विसस्रे-
जायेव पत्ये उषती सुवासा ॥"

न केवलमपि तूषादेवतायाः वर्णनं पश्यत —

"अभ्रातेव पुंस एति प्रतीची-
गर्तारुगिवसनयेधनानाम् ।
जायेव पत्य उशति सुवास-
उषाहस्त्रेण निरिणीते अप्सो ॥"

तथा च—

"माता पुत्रं यथा सिच्चाऽभ्येन भूम अर्णु हि ।"

मनोरमवर्णनमुपमायुक्तमुषःसूक्ते एवमन्यत्रापि—

"कन्येव तन्वा शाशदाना एषि देवि निपक्षनाणम् ।
संस्मयमाना युवतिः पुरस्तादाविर्वक्षासि
कृणुषं विभाति ॥"

वैदिकसाहित्येऽनेन प्रकारेणानेकेषु मन्त्रेषूपमाया अतिमनोहरः प्रयोगः कृतः, चित्रितश्च काव्यम् ।

ब्राह्मणेष्वारण्यकेषु चोपमैवात्यधिकं प्रयुक्ता । तैत्तरीयारण्यकादेको मन्त्र उद्धृतोऽत्र—

"नदीव प्रभावात् काचित् अक्षय्यात् स्यन्दते यथा ।
तां नद्योऽभि समायान्ति सोरुः सती न निवर्तते ॥"

विषयप्रतिपादनार्थायोपनिषत्स्वप्युपमैवाश्रिता । तैत्तरीयोपनिषदः शिक्षावल्लीतोऽत्रालोच्यमुदाहरणम्—

"यथाऽऽपः प्रवतायन्ति तश्मासां अहर्जरम् ।
एवं मां ब्रह्मचारिणो धातरायन्तु सर्वतः स्वादः ॥"

मैत्र्युपनिषद्युपमालङ्कारवत्स्वीकृता तस्या भेदोपभेदा अपि निरूपिताः ।

भारतीयसाहित्यस्य द्वितोयश्चरणो वेदाङ्गः । वेदाङ्गसाहित्ये उपमायाः उपयोगः तस्याः उपादेयतां दर्शयति । दृष्ट्वेदं निरुक्तकारोऽप्युपमाऽलङ्कारमेव सर्वेषामलङ्काराणां बीजरूपममन्यत । निरुक्तकारेणोपमाऽलङ्कारस्य शास्त्रीयविवेचनस्य प्रयत्नः कृतः । स स्वगुरोर्गार्ग्यस्य सिद्धान्तं निम्नप्रकारेणोल्लिखितवान्—

"यद् अतत् तत्सदृशं तदासां कर्म इति गार्ग्यः ।"

सः स्वयमेव स्पष्टं करोति—

"ज्यायासा व गुणेन प्रख्याततमेन वा ।
कनीयांसं वा अप्रख्यातं व उपमिमोते ॥"

तेनेदं विवेचनं सोदाहरणं कृतम् ।

लौकिकसाहित्येऽत्यधिकमुपमावाचकाः शब्दाः प्रयुक्ताः परञ्च वैदिकसाहित्ये त्वनेके शब्दाः प्रयुक्ताः यथा 'आ' 'चित्' 'था' 'यथा' 'वत्' इत्यादयः । निरुक्तकारेणोद्धृताः वेदानां कतिपयपंक्तयोऽत्रैव—

"जार आ भगम् ।"
"तं प्रत्नथा विश्वथे मथा ।"
"यथा वातो यथा वनं यथा समुद्रे एजति ।"
"प्रिय मेधवत् अभिवत् जातवेदो निरुपवत् ।"

निरुक्तकारेणोपमाऽनेकधारासु विभक्ता । तासु प्रमुखाः—कर्मोपमा रूपोपमा सिद्धोपमा लुप्तोपमा च । लुप्तोपमाऽर्थोपमापि कथिता । अतः निरुक्ते उपमायाः विशदवर्णनं प्राप्तम् । वेदेषु तु प्रयोगमात्रं वर्तते परञ्च निरुक्ते तस्याः भेदोपभेदलक्षणोदाहरणादीनां सम्पूर्णं विवरणं वर्तते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न केवलं वेदब्राह्मणारण्यकनिरुक्तेष्वेवापि तु व्याकरणेऽप्युपमायाः विस्तृतं वर्णनं कृतम्। पाणिनीये व्याकरणे निरुक्तादेवाधिकविस्तार-पूर्वकमुपमायाः दर्शनीय उल्लेखः। व्याकरणे विषयोऽयं स्पष्टरूपेण प्रतिपादितः। पाणिनि-महोदयेनोपमायाः चत्वारो भागाः कृताः–उप-मानोपमेयसाधारणधर्मोपमावाचकशब्दास्तथा। पाणिनिमहोदय उक्तशब्दान् व्याख्यायति—

"तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्।"

"उपमानानि सामान्यवचनैः।"

"उपमितं व्याघ्रादिभिः सामान्याप्रयोगे।"

कानिचित्काव्यशास्त्रिणामुपमायाः सम्बन्धे मतव्यानि समालेख्यान्यधुना। प्रमुखस्त्वेष्वाचार्येषु मम्मटाचार्यः। तेनोपमाऽनेन प्रकारेण परिभाषिता—

'साधर्म्यमुपमाभेदे, पूर्णा लुप्ता च साऽग्रिमा।
श्रौत्यार्थी च भवेद्वाक्ये समासे तद्धिते तथा।"

कविराजविश्वनाथेनापि—

"साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः
सा पूर्णा यदि सामान्यधर्म औपम्यवाचि च।
उपमेय चोपमानं भवेद्वाच्यम्.....................॥"

विभिन्नप्रकारेण विभक्तोपमा विद्वद्भिरनेकैः—

न केवलमुपमायाः प्रयोजनं काव्यमलंकर्तु-मेवास्त्यपि तु दुर्गमो विषयोऽपि सुगमतामाप्नोति। दर्शनादिविषयेष्वप्युपमैवाश्रयः। गीतायामुपषत्सु चोपमायाः बाहुल्यं वर्तते पश्यत गीतायां द्वितीयेऽध्याये येन प्रकारेण विषयः स्पष्टः कृतः—

"वासांसि जीर्णानि यथा विहाय,
नवानि गृह्णाति नरोपराणि।
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही॥"

"इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि॥
यथा संहरते चायं कूर्मोऽगानीव सर्वशः।
इन्द्रियाणीन्द्रियार्थेभ्यस्तथा प्रज्ञा प्रतिष्ठिता॥"

वेदान्तदर्शनेऽपि विषयविवेचनायोपमाया एवाश्रयेण व्याख्याकारः सफलतामाप्नोति। सदानन्दकृतवेदान्तसारादत्रोद्धृत एकोऽशः—

"असर्पभूतायां रज्जौ सर्पारोपवदवस्तुनि वस्त्वारोपोऽध्यारोपः।"

भारतीयं दर्शनं व्याख्यातुन्तूपमैवात्राश्रयः। दर्शनस्य विवेचनमुपमाऽलङ्कारस्याभावे त्वसम्भवम्। कोऽपि व्याख्याकारः स्वविचारान् स्पष्टं न कर्तुमशक्नोत्। दर्शनस्य ह्रास एव सम्भवोऽस्या अभावे। भगवन्तौ बुद्धमहावीरौ अपि स्वकार्येषु, सिद्धान्तानां प्रचारे प्रसारे वोपमाशैलूष्येव संसारे लोकप्रियतामाप्नुताम्। बौद्धग्रन्थास्तूपमां विनैकपदमपि नाक्रमन्। यथा ह्युद्धृतं धम्मपदतः 'सुत्त' मेकम्—

"सुभानु पास्सि विहरन्तं इन्द्रियेसु असंवुतं।
भोजनाम्हि अमत्त मञ्जुं कुसोतं दीनं वीरियं॥
मनसा चे पदुट्ठेन भासति वा करोति वा।
ततो न दुक्खमन्वेति चक्कं बहतो पदम्॥"

अपि तु तर्कशास्त्रे नीरसविषयेऽपि विवेचनार्थमुपमैवाधारः। यतः घटपटवेमाकुम्भकारादीनामुपमानामभावे विषयोऽस्पष्टोऽबोध्यश्चासीत्।

किं बहुना, न केवलमुपमाऽलङ्कारः काव्यस्य भाषाया अलङ्करणमात्रमपि तु विषयं स्पष्टं सुग्राह्यं कर्तुञ्चात्यन्तं हितकरः। उपमेतरालङ्कारास्तु काव्यं दुर्बोधं कुर्वन्ति परञ्चोपमाऽलङ्कारस्तु काव्यविषयं सुबोधं करोति।

कतिपयविद्वान्सः वासनालोकमुपमायाः मूलरहस्यं कथयन्ति। सौन्दर्यसौहार्दयोरनुभूतिरेव कविहृदये प्रादुर्भवत्युपमया। कवीन्द्ररवीन्द्रेणेदं–स्पष्टं कृतमधोलिखिते पद्यांशे—

"सुधु विधाता सृष्टि नह तुमि नारी।
पुरुष गढे छे तोरे सौन्दर्य संचारि॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपन अन्तर देतें वसि कवि गण ।
सोनार उपमा सूत्रे बुनिछे वसन ।।
सँपिया तोमार परे नूतन महिमा ।
अमर करे छे शिल्पी तोमारप्रतिमा ।।"

वासनालोकेनानेन प्रादुर्भूतोपमायाः इच्छा प्रकृतिनर्तक्याऽङ्गै रेव पूर्णा भवति । प्रकृतिपुरुषयोर्नैकट्यं परमावश्यकमुपमालङ्कारे । प्रकृत्या मानवीयकरणमेवोपमायाः पर्यायः । दर्शनीयं च रघुवंशे वर्णितं भगवतो नारायणस्य सौन्दर्यवर्णनम्—

"प्रबुद्धपुण्डरीकाक्षबालातपमिनिभांशुकम् ।
दिवसं शारदमिव प्रारम्भसुखदर्शनम् ।।"

अनेन सहैवोपमायां साम्यतुलनात्मकत्वोचित्यादयः परमावश्यकाः । ये कवयः उक्ततत्त्वानामभावे उपमां प्रयोजयन्ति तेषां काव्यसौन्दर्यमवरतामेवाप्नोत्यश्लीलत्वादिदोषा अपि काव्ये प्रविशन्ति च । भाषाकविकेशवदासेनैव 'रामचन्द्रिका' महाकाव्ये बहूनि हीनोपमाया उदाहरणानि प्रदर्शितानि । सः राममुलूकमिवोदितसूर्यं मर्कटाण्डकोषमिवोपमेत्यतः काव्यमश्लीलत्वादधो पातयति ।

संस्कृतसाहित्ये कवि-कुल-गुरु-कालिदासस्योपमैव श्रेष्ठातस्योपमासौन्दर्यं दृष्ट्वाऽऽलोचकस्य वाणी प्रस्फुटिता—

"उपमा कालिदासस्य भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं माघे सन्ति त्रयोगुणाः ।।"

गिरने से पहले उनकी रक्षा करें

गाय
छाप

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

राजस्थान-साहित्य-सङ्गमः, उदयपुरम्

उदयपुरस्थ – राजस्थान – साहित्यसंगमेन स्थानीय-साहित्यकाराणां सम्मेलनस्य तथा कविगोष्ठ्याश्चायोजनं गतमासेषु भारतीय-लोक-कलामण्डलस्य सभामञ्चे विहितम् ।

सङ्गमाध्यक्ष – **श्रीनिरञ्जननाथाचार्यस्य** सान्निध्ये समारोहस्याध्यक्ष्यञ्च हिन्द्याः सुप्रसिद्धेन साहित्यकारेण **श्रीजैनेन्द्रकुमारेण** निर्व्यूढम् । तत्र कविरूपेणातिथी च प्रसिद्धो गीतकारः श्रीबालकविस्तथा श्रीरघुवीरशरणमित्रमहोदयश्चास्ताम् ।

सम्मेलनस्य प्रारम्भे मान्य-संगमाध्यक्षः श्रीनिरञ्जननाथाचार्यः समुपस्थितानां साहित्यकाराणां हार्दिकं स्वागतं कुर्वाणः समभाषत यत् सङ्गमस्यास्य ख्यातेः संवर्द्धनमहं यथाशक्ति विधास्यामि। अत्र हि सर्जकानां सहयोगो विश्वासस्तथा सौजन्यञ्चापेक्ष्यते । किञ्चैतादृशानि साहित्यकाराणां सम्मेलनानि प्रान्तस्य विभिन्नेषु भागेषु सविस्तारमायोजितानि स्युः—एतादृशोऽस्माकं प्रयासः सम्पत्स्यते—इति ।

ततश्च संगमस्य निदेशक—**श्रीपुरुषोत्तमलालमेनारिया**महोदयेन भाषितं यद् राजस्थाने सप्तमशताब्द्याः पूर्वतः इदानीन्तनकालं यावत् कथासाहित्यस्य गौरवमयी परम्पराऽस्थात् । तथा च राजस्थानस्य प्राचीनानां नव्यानाञ्च कथाकाराणां रचनानां विश्लेषणं कुर्वता श्रीनिदेशकमहोदयेन प्रोक्तं यद् राजस्थानस्य गतदशकीया प्रगतिस्तीव्रगत्याभूत्, तस्याश्च भविष्यत् सर्जनस्य, सामर्थ्यस्यैवं सञ्चेतनायाश्च दृष्ट्या समुज्ज्वलं वक्तुं शक्यत इति । ततश्चाध्यक्षीयभाषणानन्तरं कविगोष्ठ्याः सर्वोऽप्यन्यः कार्यक्रमः साधु समपद्यत ।

पुस्तकपरिचयः—

१. श्रीमहाभारतवचनामृतम् (पञ्चभागात्मकम्)

२. महाभारतसुधासागरः

लेखकः प्रकाशकश्च श्रीसूर्यनारायणः एम् ए. साहित्यरत्नम् ।

प्राप्तिस्थानम्–युगनिर्माणसाहित्यागारः, २०, नथमलजी का कटला, आगरा रोड़, जयपुर–३

मूल्यम् सपादरूप्यकषट्कम् । (द्वयोश्च रूप्यकसप्तकम्) ।

लेखकमहोदयेन श्रीवेदव्यासरचितं महाभारताभिधं महाग्रन्थं सावधनतया समधीत्य सारसंग्रहविधिना संक्षिप्य विषयक्रमानुसारञ्च वर्गीकृत्य केचन सर्वमानवोपयोगिनो विषया मूलश्लोकसहिताः हिन्दीभाषानुवादसंवलिता आवश्यकटिप्पणविभूषिताश्चात्र ग्रन्थे संगृहीताः सन्ति ।

ग्रन्थस्यास्य प्रथमे भागे–'मानवधर्मोऽथवा कर्मयोगशास्त्रम्' इति मुख्यं शीर्षकमुकपल्प्य वन्दनात्मकं मङ्गलाचरणमारभ्य कर्मयोगपर्यन्तं द्विसप्ततिसंख्याका विषया संगृहीता वर्तन्ते। एते सर्वेऽपि विषया देशकालजातिभेदपार्थक्यविचारं विना समग्रमपि मानवसमाजमुन्नेतुं प्रभवन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शतपृष्ठात्मके द्वितीयभागे चास्य मानवस्य परिवारगतानि कर्तव्यानि महाभारतादुद्धृत्य सटीकं सटिपरणञ्च लेखकेन निर्दिष्टानि सन्ति। यथाहि—गुरूणामाज्ञापालनं तत्सेवा च। गुरुजनाचार्येषु च भक्त्यादयो विषयास्तथा सम्यक् प्रतिपादिताः सन्ति, यथैतेषामनुष्ठानेन विश्वस्य सर्वेषामपि प्रायो मनुष्याणां पारिवारिकं जीवनं सुखशान्तिमयमभ्युदयशीलञ्च भवितुमर्हति।

किञ्च पञ्चाशीतिपृष्ठात्मके तृतीयेभागे च 'दीर्घस्य स्वस्थस्य च जीवनस्य प्राप्तेरुपायाः' इति शीर्षकं दत्त्वा लेखकमहानुभावेन-ब्रह्मचर्य-सदाचारपालन-गोसेवाप्रभृतयो विषया महाभारतमूलश्लोकैः सम्यग् निर्दिष्टाः सन्ति।

अपि च पञ्चसप्ततिपृष्ठात्मके चतुर्थे भागे च लेखमहानुभावेन ज्ञानयोग-ध्यानयोग-भक्तियोगादयो विषयाः साधुनिरूपिताः सन्ति।

तथा च पञ्चमे भागे महाभारतस्य ध्रुव-प्रह्लादनारदादयो महत्यो विभूतयः सन्ति वर्णिताः। महाविभूतीनाञ्च तासां गुण-कर्मणां वर्णनमस्माकं भारतीयानां जनजीवने सम्प्रति चरित्रनिर्माणार्थं प्रेरणाप्रदतयात्यावश्यमस्ति।

किञ्च शतपृष्ठात्मके च श्रीमहाभारतसुधासागराभिधे षष्ठे पुस्तके च विश्वरूपस्य निराकारस्यापि साकारस्य भगवतो विष्णोः साधूनां परित्राणाय धर्मसंस्थापनाय तथा पापात्मनां विनाशाय च विभिन्नानां मत्स्य-कूर्म-वराहादीनामवताराणां कथा महाभारतात्संगृहीताः सन्ति। मुख्यतस्ता एताः कथा हिन्दीभाषायामुपनिबद्धाः सन्ति। कथाभिराभिः पौराणिककथासाहित्यस्य परिचयेन सहैव 'रामादिवत्प्रवर्तितव्यं, न रावणादिवत्' इति शोभन उपदेशोऽपि लभ्यते।

एवमत्र षट्स्वपि पुस्तकेष्वेतेषु संग्रहीतुर्लेखकस्य संग्रहे पुण्यं व्यापकाध्ययनशीलत्वं नव-नवसाहित्यसिसृक्षाभिरुचिं चाभिनन्दामि। सहैव लेखकमहानुभावस्य षण्णामप्येतेषां संग्राह्याणां पुस्तकानां प्रचारं प्रसारं च हृदयेनाहं कामये—इति।

श्रीमतां पुरीस्थ-शङ्कराचार्याणां विपक्षे कृतस्यारोपस्य निराकरणम्

विगतमार्चमासस्य ३१ तारिकायां श्री-शङ्कराचार्यमहाराजैः प्रेससम्मेलने यद् भाषितं, तत्रैतादृशी कापि वार्ता नोक्तासीत्, यया सिद्धमिदं भवेद्यत्—श्रीमद्भिर्जगद्गुरुभिः स्पृश्यास्पृश्य-भावनायाः प्रचारः कृतः।

निर्णायकस्य न्यायकर्तुः श्री एस्. एन. सहायमहाभागस्य कथनानुसारेण श्रीशङ्कराचार्यवर्येषु स्पृश्यास्पृश्यसम्बन्धिन्या भावनायाः प्रचारार्थं दोषरारोपयितुं तेषां विपक्षे च न्यायालयेऽभियोगं चालयितुं नैव कश्चनाधारो विद्यते। अत एव पटनास्थ-सबडिवीजनलाधिकारिणा मान्येन श्रीगणेशप्रसादमहोदयेन श्रीशङ्कराचार्याणां विपक्षे समुपस्थापितः सोऽयमारोपो निराकृतः।

निर्णय-न्यायकर्त्रा (मजिस्ट्रेट) श्रीसहायमहाभागेन प्रस्तुतविषये स्वस्य विवरणे (रिपोर्ट) प्रतिपादितं यन्नैतादृशानि पर्याप्तानि तथ्यान्युपलभ्यन्ते, यान्यादाय वयं विश्वासमिमं कर्तुं प्रभवेम यत्—श्रीशङ्कराचार्यैः स्पृश्यास्पृश्यविषयक-भावनायाः प्रचारः कृत इति।

किञ्च श्रीसहायमहाभागेनात्मनो विवरणस्य पुष्ट्यै प्रेस-ट्रस्ट-आफ-इण्डिया-पटनाकेन्द्रस्य व्यवस्थापकस्य श्री एस्. के. घोषमहोदयस्य दैनन्दिन्याः (नोटबुक) निर्देशोऽपि कृतः। दैनन्दिन्या अनुसारेण श्रीशङ्कराचार्यैः प्रतिपादितमासीद्यत् 'अहं राजनियमानां पालनकर्ता नागरिकोऽस्मि। अहं स्पृश्यापृश्यविषयकस्य राजनियमस्योल्लङ्घनं न विधास्यामि, परं नियमस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पालनेन सहैव धर्ममर्यादासंरक्षणस्यापि ममास्त्यधिकारः' इति।

अपि च—न्यायाधीशेन स्वविवरणे प्रोक्तं यदस्पृश्यास्पृश्यविषयकभावनायाः प्रचारकरणं राजनियमस्यानुसारेणास्त्यपराधः परं यदि कश्चिज्जनः स्वजीवने स्पृश्यास्पृश्यविषयकं विधिमनुपालयति, तर्हि स राजनियमानुसारेण दण्ड्यो न भवितुमर्हति—इत्येवं श्रीशङ्कराचार्याणां विपक्षे समुत्थापितस्यारोपस्य प्रत्याख्यानमजायत—इति जूनमासस्यास्य ५ तारिकाया नवभारतटाइम्ससमाचारपत्त्राद्विदितमभूदिति।

विनम्रं निवेदनम्

अयि साहित्यधुरीणाः सुरसरस्वतीसमुपासकाः कविवराः सुलेखका भारतीपाठकमहानुभावाः !! सादरं सप्रश्रयञ्च तत्रभवन्तोभवन्तः प्रार्थ्यन्ते यद् भवदीयायामेव भारतीपत्त्रिकायां प्रकाशनार्थं कविताः निबन्धा ग्रन्थाश्च यथाकालं श्रीमद्भिः प्रेष्यन्ताम्। भवतामेव सहयोगेनैत्र भवतामियं पत्त्रिका प्रति मासं सेवां कर्तुं प्रभवति—इति तु निश्चप्रचम्। सहैव मयैतदपि वक्तव्यमवश्यं भवति यत् स्वस्वरचनाप्रेषणकाले सकृत् स्वलेखसामग्र्या अवलोकमवश्यं विधेयम्, यतो हि बहवो लेखा एतादृशा अपि समायान्ति, येषां पठने प्रूफशोधने च महत्कष्टं भवति। लेखसामग्र्याश्चासुवाच्यतया अक्षरयोजकानां सहैव ममापि च कालो मुधैव व्यत्येति। ये तु विद्वांसो लेखनकलायां पूर्वत एव सन्ति परमदक्षाः, तेषां महानुभावानां कृते मामकोऽयं नास्त्यनुरोधः।

किञ्च बहवोपि वयोवृद्धा विद्यावृद्धाश्च विपश्चितः कुलपरम्परातश्च कविकर्मणि निबन्धादिलेखने च समर्थाः सन्तोऽपि भवन्तो यदि लेखादिसामग्रीं न प्रेषयिष्यन्ति तर्हि कोऽन्ये ?।'
तथा हि—

नीरक्षीरविवेके हंसालस्यं त्वमेव तनुषे चेत्।
विश्वस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः ? ॥

इति भूयो भूयः सादरं निवेद्य विरमति—

भावत्को
दीनानाथत्रिवेदी मधुपः

भारती के कतिपय प्रकाशन

१.	अम्बिकासूक्तम्	मूल्यं २.५०
२.	गल्पकल्पलतिका (बालोपयोगी)	१.५०
३.	सरलसंस्कृतशिक्षणोपायः (बालोपयोगिनी)	१.५०
४.	गोलनवांकुर	१.२५
५.	चित्रद्वारा संस्कृतशिक्षा (बालोपयोगिनी)	१.५०
६.	सुवर्णलक्ष्मीनक्षत्रमाला	०.५०
७.	आयुर्वेदविशेषांकः	५.००
८.	आरोग्यांकविशेषांकः	२.५०

भारती के ग्राहकों को २५% वर्तन दिया जायगा यदि सम्पूर्ण पुस्तकें एक साथ मंगायें।

व्यवस्थापक
भारती संस्कृत मासिक

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ पञ्चमोऽध्यायः

उत्तमचरित्रप्रारंभः।

अस्य श्रीउत्तमचरित्रस्य रुद्रऋषिः, अनुष्टुप् छन्दः, महासरस्वती देवता, क्लीं बीजं, (भ्रामरी बीजं), भीमा शक्तिः, सूर्यस्तत्त्वं सामवेदस्वरूप महासरस्वतीप्रीत्यर्थे पाठे विनियोगः

❀ ध्यानम् ❀

घण्टाशूलहलानि शङ्खमुसले चक्रं धनुः सायकान्
हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम्।
गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा-
पूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम्॥१

उत्तम चरित्र प्रारंभ

इस चरित्र का रुद्र ऋषि है, अनुष्टुप् छन्द है महा सरस्वती देवता है क्लीं बीज है (भ्रामरी बीज) है। भीमा शक्ति है, सूर्य तत्त्व है, सामवेद स्वरूप है, महा सरस्वती प्रीत्यर्थ विनियोग है।

ध्यान रहस्य में इस प्रकार है—

गौरी तनू से निकली शुद्धसत्त्वगुणा शिवा।
शुंभ दैत्य प्राण हरी रम्य आठ भुजावती॥१॥
बाँए करो बीच शंख घन्टा हल धनू धरे।
दाँए में बाण मुसल शूल चक्र लिए हुए॥२॥
पूजी गई स्तुत हुई देती सर्वज्ञता सदा।
महा विद्या महामाया महागौरी महेश्वरी॥३॥
पूर्णचन्द्रसमाकान्ति दुग्धपाण्डरवर्ण की।
अज्ञान नाशिनी ज्ञान प्रभाएँ वर्षती हुई॥४॥
शुक्ल वस्त्र धरे शुक्ल पुष्प चन्दन धारिणी।
मोतियों के दिव्य हार उरपै पहने हुई॥५॥
शुक्ल रत्न जड़े नाना भूषणों से सजी हुई।
मन्दहास प्रभा पूर्ण करुणा रस वर्षती॥६॥
देवर्षि और ब्रह्मर्षि गण से नित्य पूजिता।
ध्यान प्राप्त हुई सद्यः शोक मोह विनाशनी॥७॥
शरणागत भक्तों की कामना सिद्धि कारिणी।
महा सरस्वती देवी माता का ध्यान मैं करूं॥८॥

ऋषिरुवाच॥१॥

पुरा शुम्भनिशुम्भाभ्यामसुराभ्यां शचीपतेः।
त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात्॥२॥
तावेव सूर्यतां तद्वदधिकारं तथैन्दवम्।
कौबेरमथ याम्यं च चक्राते वरुणस्य च॥३॥
तावेव पवनर्द्धिं च चक्रतुर्वह्निकर्म च।
ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः॥४॥
हृताधिकारास्त्रिदशास्ताभ्यां सर्वे निराकृताः।
महासुराभ्यां तां देवीं संस्मरन्त्यपराजिताम्॥५॥

ऋषि बोले॥१॥

पहिले शुंभनिशुंभाख्य असुरो ने महेन्द्र से।
त्रैलोक्य-यज्ञभागों को मद से बल से लिया॥२॥
सूर्याधिकार भी वेही, वेही चन्द्राधिकार भी।
कुबेर और यम का करते थे जलेश का॥३॥
वे ही पवन का और करते अग्नि कर्म भी।
सब देव भगे दूर राज्य खो हार हार के॥४॥
अधिकार छीने देव, दानवों से निरस्त हो।
उस देवी जयन्ती को सभी सुमरने लगे॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तयास्माकं वरो दत्तो यथाऽऽपत्सु स्मृताखिलाः ।	हमें उसने बर दिया, दुःख में सुमरी हुई ।
भवतां नाशयिष्यामि तत्क्षणात्परमापदः ॥६॥	तत्काल ही मिटा दूंगी तुम्हारे सब कष्ट मैं ॥६॥
इति कृत्वा मतिं देवा हिमवन्त नगेश्वरम् ।	यों बुद्धि कर वे देव हिमाद्रि पर जा चढे ।
जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः ॥७॥	वहाँ जा विष्णुमाया की स्तुतियों करने लगे ॥७॥
देवा ऊचुः ॥८॥	देव बोले ॥८॥
नमो देव्यै महादेव्यै शिवायै सततं नमः ।	नमो देवि महा देवि शिवा को है सदा नमः
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥९॥	नमः प्रकृति भद्रा को करें नियत हो नमः ॥९॥
रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ।	रौद्रा का नति नित्या को गौरि धात्रि तुम्हें नमः
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ॥१०॥	ज्योत्स्नाको चन्द्ररूपा को सुखा की है सदा नमः ॥१०॥
कल्याण्यै प्रणतां वृद्धयै सिद्धयै कुर्मो नमो नमः ।	कल्याणी को प्रणति है नमो हे वृद्धि सिद्धि को ।
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥११॥	निर्ऋति क्षितिभृल्लक्ष्मी शर्वाणी को नमो नमः ॥११॥
दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ।	दुर्गा को दुर्गपारा को सारा को सर्वकारिणी ।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥१२॥	ख्याति को और कृष्णा को धूम्रा को है सदा नमः ॥१२॥
अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ।	अति सौम्या महारौद्रा उसे नति नमो नमः ।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥१३॥	नमो जगत्प्रतिष्ठा को देवी कृति तुम्हे नमः ॥१३॥
या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ।	जो देवी सब भूतों मे विष्णुमाया कही गई ।
नमस्तस्यै ॥१४॥ नमस्तस्यै ॥१५॥ नमस्तस्यै नमो नमः ॥१६॥	नमस्तस्यै ॥१४॥ नमस्तस्यै ॥१५॥ नमस्तस्यै नमो नमः ॥१६॥
या देवी सर्वभूतेषु चेतनेत्यभिधीयते ।	जो देवी सब भूतों में चेतना है कही गई ।
नमस्तस्यै ॥१७॥ नमस्तस्यै ॥१८॥ नमस्तस्यै नमो नमः ॥१९॥	नमस्तस्यै ॥१७॥ नमस्तस्यै ॥१८॥ नमस्तस्यै नमो नमः ॥१९॥
या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ।	जो देवी सब भूतों में बुद्धिरूप विराजती ।
नमस्तस्यै ॥२०॥ नमस्तस्यै ॥२१॥ नमस्तस्यै नमो नमः ॥२२॥	नमस्तस्यै ॥२०॥ नमस्तस्यै ॥२१॥ नमस्तस्यै नमो नमः ॥२२॥
या देवी सर्वभूतेषु निद्रारूपेण संस्थिता ।	जो देवी सब भूतों में निद्रारूप विराजती ।
नमस्तस्यै ॥२३॥ नमस्तस्यै ॥२४॥ नमस्तस्यै नमो नमः ॥२५॥	नमस्तस्यै ॥२३॥ नमस्तस्यै ॥२४॥ नमस्तस्यै नमो नमः ॥२५॥
या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ।	जो देवी सब भूतों में क्षुधा रूप विराजती ।
नमस्तस्यै ॥२६॥ नमस्तस्यै ॥२७॥ नमस्तस्यै नमो नमः ॥२८॥	नमस्तस्यै ॥२६॥ नमस्तस्यै ॥२७॥ नमस्तस्यै नमो नमः ॥२८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

या देवी सर्वभूतेषुच्छायारूपेण संस्थिता ।
नमस्तस्यै ॥२९॥ नमस्तस्यै ॥३०॥ नमस्तस्यै
नमो नमः ॥३१॥

या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ।
नमस्तस्यै ॥३२॥ नमस्तस्यै ॥३३॥ नमस्तस्यै
नमो नमः ॥३४॥

या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ।
नमस्तस्यै ॥३५॥ नमस्तस्यै ॥३६॥ नमस्तस्यै
नमो नमः ॥३७॥

या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता ।
नमस्तस्यै ॥३८॥ नमस्तस्यै ॥३९॥ नमस्तस्यै
नमो नमः ॥४०॥

या देवी सर्वभूतेषु जातिरूपेण संस्थिता ।
नमस्तस्यै ॥४१॥ नमस्तस्यै ॥४२॥ नमस्तस्यै
नमो नमः ॥४३॥

या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ।
नमस्तस्यै ॥४४॥ नमस्तस्यै ॥४५॥ नमस्तस्यै
नमो नमः ॥४६॥

या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता ।
नमस्तस्यै ॥४७॥ नमस्तस्यै ॥४८॥ नमस्तस्यै
नमो नमः ॥४९॥

या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता ।
नमस्तस्यै ॥५०॥ नमस्तस्यै ॥५१॥ नमस्तस्यै
नमो नमः ॥५२॥

या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता ।
नमस्तस्यै ॥५३॥ नमस्तस्यै ॥५४॥ नमस्तस्यै
नमो नमः ॥५५॥

या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता ।
नमस्तस्यै ॥५६॥ नमस्तस्यै ॥५७॥ नमस्तस्यै
नमो नमः ॥५८॥

या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता ।
नमस्तस्यै ॥५९॥ नमस्तस्यै ॥६०॥ नमस्तस्यै
नमो नमः ॥६१॥

जो देवी सब भूतों में छाया रूप विराजती ।
नमस्तस्यै ॥२९॥ नमस्तस्यै ॥३०॥ नमस्तस्यै
नमो नमः ॥३१॥

जो देवी सब भूतों में शक्ति रूप विराजती ।
नमस्तस्यै ॥३२॥ नमस्तस्यै ॥३३॥ नमस्तस्यै
नमो नमः ॥३४॥

जो देवी सब भूतों में तृष्णा रूप विराजती ।
नमस्तस्यै ॥३५॥ नमस्तस्यै ॥३६॥ नमस्तस्यै
नमो नमः ॥३७॥

जो देवी सब भूतों में क्षान्ति रूप विराजती ।
नमस्तस्यै ॥३८॥ नमस्तस्यै ॥३९॥ नमस्तस्यै
नमो नमः ॥४०॥

जो देवी सब भूतों में जाति रूप विराजती ।
नमस्तस्यै ॥४१॥ नमस्तस्यै ॥४२॥ नमस्तस्यै
नमो नमः ॥४३॥

जो देवी सब भूतों में लज्जा रूप विराजती ।
नमस्तस्यै ॥४४॥ नमस्तस्यै ॥४५॥ नमस्तस्यै
नमो नमः ॥४६॥

जो देवी सब भूतों में शान्ति रूप विराजती ।
नमस्तस्यै ॥४७॥ नमस्तस्यै ॥४८॥ नमस्तस्यै
नमो नमः ॥४९॥

जो देवी सब भूतों में श्रद्धा रूप विराजती ।
नमस्तस्यै ॥५०॥ नमस्तस्यै ॥५१॥ नमस्तस्यै
नमो नमः ॥५२॥

जो देवी सब भूतों में कान्ति रूप विराजती ।
नमस्तस्यै ॥५३॥ नमस्तस्यै ॥५४॥ नमस्तस्यै
नमो नमः ॥५५॥

जो देवी सब भूतों में लक्ष्मी रूप विराजती ।
नमस्तस्यै ॥५६॥ नमस्तस्यै ॥५७॥ नमस्तस्यै
नमो नमः ॥५८॥

जो देवी सब भूतों में वृत्ति रूप विराजती ।
नमस्तस्यै ॥५९॥ नमस्तस्यै ॥६०॥ नमस्तस्यै
नमो नमः ॥६१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता । नमस्तस्यै ॥६२॥ नमस्तस्यै ॥६३॥ नमस्तस्यै नमो नमः ॥६४॥	जो देवी सब भूतों में स्मृति रूप विराजती । नमस्तस्यै ॥६२॥ नमस्तस्यै ॥६३॥ नमस्तस्यै नमो नमः ॥६४॥
या देवी सर्वभूतेषु दयारूपेण संस्थिता । नमस्तस्यै ॥६५॥ नमस्तस्यै ॥६६॥ नमस्तस्यै नमो नमः ॥६७॥	जो देवी सब भूतों में दया रूप विराजती । नमस्तस्यै ॥६५॥ नमस्तस्यै ॥६६॥ नमस्तस्यै नमो नमः ॥६७॥
या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता । नमस्तस्यै ॥६८॥ नमस्तस्यै ॥६९॥ नमस्तस्यै नमो नमः ॥७०॥	जो देवी सब भूतों में तुष्टि रूप विराजती । नमस्तस्यै ॥६८॥ नमस्तस्यै ॥६९॥ नमस्तस्यै नमो नमः ॥७०॥
या देवी सर्वभूतेषु मातृरूपेण संस्थिता । नमस्तस्यै ॥७१॥ नमस्तस्यै ॥७२॥ नमस्तस्यै नमो नमोः ॥७३॥	जो देवी सब भूतों में मातृ रूप विराजती । नमस्तस्यै ॥७१॥ नमस्तस्यै ॥७२॥ नमस्तस्यै नमो नमः ॥७३॥
या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता । नमस्तस्यै ॥७४॥ नमस्तस्यै ॥७५॥ नमस्तस्यै नमो नमः ॥७६॥	जो देवी सब भूतों में भ्रान्ति रूप विराजती । नमस्तस्यै ॥७४॥ नमस्तस्यै ॥७५॥ नमस्तस्यै नमो नमः ॥७६॥
इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या । भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः ॥७७॥	इन्द्रियों और भूतों की अधिष्ठात्री जिसे कहें । जो भूतों में सदा व्याप्त उसको है नमो नमः ॥७७॥
चितिरूपेण या कृत्स्नमेतद् व्याप्य स्थिता जगत् । नमस्तस्यै ॥७८॥ नमस्तस्यै ॥७९॥ नमस्तस्यै नमो नमः ॥८०॥	समूचे जग में व्याप्त हुई जो चिति रूप है । नमस्तस्यै ॥७८॥ नमस्तस्यै ॥७९॥ नमस्तस्यै नमो नमः ॥८०॥
स्तुता सुरैः पूर्वमभीष्टसंश्रया- तथा सुरेन्द्रेण दिनेषु सेविता । करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहन्तु चापदः ॥८१॥	स्तुता हुई पूर्व अभीष्ट लाभ से सुरेन्द्र से सेवित जो दिनों हुई । वही हमारे शुभ हेतु ईश्वरी करे सदा क्षेम विपत्तियां हरे ॥८१॥
या साम्प्रतं चोद्धतदैत्यतापितै- रस्माभिरीशा च सुरैर्नमस्यते । या च स्मृता तत्क्षणमेव हन्ति नः सर्वापदो भक्तिविनम्रमूर्तिभिः ॥८२॥	जो ईश्वरी उद्धत दैत्य से तपे नमस्कृता है हम देवसंघ से । जो याद की तत्क्षण आपदा हरे सभक्ति नम्राङ्ग हुए जनौघ से ॥८२॥
ऋषिरुवाच ॥८३॥	ऋषि बोले ॥८३॥
एवं स्तवादियुक्तानां देवानां तत्र पार्वती । स्नातुमभ्याययौ तोये जाह्नव्या नृपनन्दन ॥८४॥	यों स्तोत्रमें युक्त हुए देवों में पार्वती वहां । न्हाने आई जाह्नवी के जल में नृपनन्दन ॥८४॥
साब्रवीत्तान् सुरान् सुभ्रूर्भवद्भिः स्तूयतेऽत्र का । शरीरकोषतश्चास्याः समुद्भूताब्रवीच्छिवा ॥८५॥	पूछा सुरों को उसने किसकी करते स्तुति । बोली शिवा व्यक्त हुई इसके तनुकोश से ॥८५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तोत्रं ममैतत् क्रियते शुम्भदैत्यनिराकृतैः ।
देवैः समेतैः समरे निशुम्भेन पराजितैः ॥८६॥

स्तोत्र मेरा कर रहे शुम्भ से हो निरस्त ये ।
समस्त देव रण में पराजित निशुम्भ से ॥८६॥

शरीरकोशाद्यत्तस्याः पार्वत्या निःसृताम्बिका ।
कौशिकीति समस्तेषु ततो लोकेषु गीयते ॥८७॥

प्रगटी अम्बिका जो थी गौरी के तनुकोश से ।
कोशिकी कहलाती है तब से वह लोक में ॥८७॥

तस्यां विनिर्गतायां तु कृष्णाभूत्सापि पार्वती ।
कालिकेति समाख्याता हिमाचलकृताश्रया ॥८८॥

इसे निकलते ही तो पार्वती श्याम होगई ।
प्रख्यात कालिका देवी रही वह हिमाद्रि पै ॥८८॥

ततोऽम्बिकां परं रूपं बिभ्राणां सुमनोहरम् ।
ददर्श चण्डो मुण्डश्च भृत्यौ शुम्भनिशुम्भयोः ॥८९॥

तब देखा धरे रूप अम्बिका को मनोहर ।
चण्ड और मुण्डने, जो थे दास शुम्भ निशुम्भ के ८९

ताभ्यां शुम्भाय चाख्याता अतीत सुमनोहरा ।
काप्यास्ते स्त्री महाराज भासयन्ती हिमाचलम् ।९०।

वे दोनों शुम्भ को बोले अतीव सुमनोहरा ।
कोई स्त्री है महाराज चमकाती हिमाद्रि को ।९०।

नैव तादृक् क्वचिद्रूपं दृष्टं केनचिदुत्तमम् ।
ज्ञायतां काप्यसौ देवी गृह्यतां चासुरेश्वर ॥९१॥

वैसा रूप किसी ने भी न देखा है, कहीं न है।
जानिये कौन है देवी लाइये दानवेश्वर ॥९१॥

स्त्रीरत्नमतिचार्वङ्गी द्योतयन्ती दिशस्त्विषा ।
सा तु तिष्ठति दैत्येन्द्र तां भवान् द्रष्टुमर्हति ॥९२॥

कान्ति से दिक्प्रकाशी है स्त्री रत्न वह सुन्दरी।
वहीं है वह दैत्येन्द्र आप जा देखिए उसे ॥९२॥

यानि रत्नानि मणयो गजाश्वादीनि वै प्रभो ।
त्रैलोक्ये तु समस्तानि साम्प्रत भान्ति ते गृहे ॥९३॥

जितने रत्नमणि है गज अश्वादि हे प्रभो !।
त्रैलोक्य के सभी तो है घर में अब आपके ।९३।

ऐरावतः समानीतो गजरत्नं पुरन्दरात् ।
पारिजाततरुश्चायं तथैवोच्चैःश्रवा हयः ॥९४॥

ऐरावत प्राप्त किया गजरत्न महेन्द्र से ।
यह कल्पद्रुम तथा अश्व उच्चैःश्रवा लिया ॥९४॥

विमानं हंससंयुक्तमेतत्तिष्ठति तेऽङ्गणे ।
रत्नभूतमिहानीतं यदासीद्वेधसोऽद्भुतम् ॥९५॥

विमान हंस संयुक्त आपके चौक में रखा ।
आश्चर्यकारी ब्रह्मा का जो है वह सदा यहीं ।९५।

निधिरेष महापद्मः समानीतो धनेश्वरात् ।
किञ्जल्किनीं ददौ चाब्धिर्मालामम्लानपङ्कजाम् ।९६

कुबेर से जीत लाए निधिपद्म महान् भी ।
अब्धि ने दी केसरिणी माला फुल्ल सरोजिनी ।९६।

छत्रं ते वारुणं गेहे काञ्चनस्रावि तिष्ठति ।
तथायं स्यन्दनवरो यः पुराऽऽसीत्प्रजापतेः ॥९७॥

स्वर्ण प्रभा बरसता यह छत्र जलेशका ।
रथ है रत्न यह जो रखता था प्रजापति ॥९७॥

मृत्योरुत्क्रान्तिदा नाम शक्तिरीश त्वया हृता ।
पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ॥९८॥

काल की मृत्युदा शक्ति आपके पास है प्रभो!।
जलेश का पास उग्र भाई के हाथ में रहा ॥९८॥

निशुम्भस्याब्धिजाताश्च समस्ता रत्नजातयः ।
वह्निरपि ददौ तुभ्यमग्निशौचे च वाससी ॥९९॥

निशुम्भ के पास सिन्धु-जात सम्पूर्ण रत्न हैं ।
अग्नि ने भी तुम्हें वह्निशोध दो वस्त्र है दिये ।९९।

एवं दैत्येन्द्र रत्नानि समस्तान्याहृतानि ते ।
स्त्रीरत्नमेषा कल्याणी त्वया कस्मान्न गृह्यते ।१००।

ऐसे दैत्येन्द्र सारे ही रत्न हैं पास आपके ।
स्त्री रत्न यह कल्याणी आप क्यों ले रहे नहीं ।१००

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋषिरुवाच ॥१०१॥

निशम्येति वचः शुम्भः स तदा चण्डमुण्डयोः ।
प्रेषयामास सुग्रीवं दूतं देव्या महासुरम् ॥१०२॥
इति चेति च वक्तव्या सा गत्वा वचनान्मम ।
यथा चाभ्येति सम्प्रीत्या तथा कार्यं त्वया लघु १०३
स तत्र गत्वा यत्रास्ते शैलोद्देशेऽतिशोभने ।
सा देवी तां ततः प्राह श्लक्ष्णं मधुरया गिरा ।१०४

दूत उवाच ॥१०५॥

देवी दैत्येश्वरः शुम्भस्त्रैलोक्ये परमेश्वरः ।
दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ॥१०६॥
अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु ।
निर्जिताखिलदैत्यारिः स यदाह शृणुष्व तत् ।१०७
मम त्रैलोक्यमखिलं मम देवा वशानुगाः ।
यज्ञभागानहं सर्वानुपाश्नामि पृथक् पृथक् ॥१०८॥
त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः ।
तथैव गजरत्नं च हृत्वा देवेन्द्रवाहनम् ॥१०९॥
क्षीरदमथनोद्भूतमश्वरत्नं ममामरैः ।
उच्चैःश्रवससंज्ञं तत्प्रणिपत्य समर्पितम् ॥११०॥
यानि चान्यानि देवेषु गन्धर्वेषूरगेषु च ।
रत्नभूतानि भूतानि तानि मय्येव शोभने ॥१११॥
स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयम् ।
सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयम् ॥११२॥
मां वा ममानुजं वापि निशुम्भमुरुविक्रमम् ।
भज त्वं चञ्चलापाङ्गि रत्नभूतासि वै यतः ।११३।
परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहात् ।
एतद् बुद्ध्या समालोच्य मत्परिग्रहतां व्रज ॥११४॥

ऋषिरुवाच ॥११५॥

इत्युक्ता सा तदा देवी गम्भीरान्तःस्मिता जगौ ।
दुर्गा भगवती भद्रा ययेदं धार्यते जगत् ॥११६॥

देव्युवाच ॥११७॥

सत्यमुक्तं त्वया नात्र मिथ्या किंचित्त्वयोदितम् ।
त्रैलोक्याधिपतिः शुम्भो निशुम्भश्चापि तादृशः ११८

ऋषि बोले ॥१०१॥

सुन यों चण्डमुण्डों की बात दैत्येन्द्र शुम्भ ने ।
सुग्रीव को दूत बना भेजा देवी-समीप में ॥१०२॥
ऐसे ऐसे कहो जाओ मेरे वचन से उसे ।
जैसे प्रसन्न हो आवे यत्न जल्दी करो वही ।१०३
वहां जा वह सुग्रीव जहां सुन्दर शैल पै ।
देवी थी उसको बोला सीधे मधुर वाक्य यों ।१०३।

दूत बोला ॥१०५॥

देवि दैत्येन्द्र है शुम्भ त्रिलोकी का महेश्वर ।
दूत मैं उसका भेजा आया तेरे समीप हूँ ॥१०६॥
आज्ञा है मान्य जिसकी सब ही देवयोनि में ।
उस देव विजेताने जो कहा है सुनों वही ॥१०७॥
सभी त्रिलोक्य मेरा है देव मेरे अधीन हैं ।
भोगता हूं यज्ञ भाग मैं ही सारे जुदा जुदा ।१०८।
त्रैलोक्य में सभी श्रेष्ठ रत्न मेरे अधीन हैं ।
ऐरावत मुझे सौंपा गजरत्न महेन्द्र ने ॥१०९॥
सिन्धु मन्थनसंभूत अश्वरत्न मुझे यहां ।
उच्चैःश्रवा सुरों ने आ सौंपा साथ प्रणाम के ।१०१
देवों, गन्धर्व नागों के अन्य जो कुछ वस्तुएँ ।
रत्नरूप रहीं सारी हैं मेरे पास सुन्दरि ॥१११॥
मानते है हम तुम्हें देवि ! स्त्री रत्न लोक में ।
हमारे पास आ क्योंकि रत्नभोक्ता हमी रहे ।११२॥
मुझे या मम भ्राता को निशुम्भ बलपूर्ण जो ।
वरले चंचलापाङ्गि क्योंकि तू रत्न रूप है ।११३।
मेरा परिग्रह हुई तू महैश्वर्य्य पायगी ।
इसको बुद्धि से सोच बन मेरा परिग्रह ॥११४॥

ऋषि बोले ॥११५॥

यों कहा तब गंभीर अन्तःस्मित हुई शिवा ।
दुर्गा भगवती भद्रा बोली जो धारती जगत् ॥११६॥

देवी बोली ॥११७॥

तूने सत्य कहा, मिथ्या इसमें कुछ भी नहीं ।
त्रैलोक्याधिप है शुंभ वैसा ही है निशुंभ भी ।११८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं त्वत्र यत्प्रतिज्ञातं मिथ्या तत्क्रियते कथम् ।
श्रूयतामल्पबुद्धित्वात्प्रतिज्ञा या कृता पुरा ॥११९॥
यो मां जयति संग्रामे यो मे दर्पं व्यपोहति ।
यो मे प्रतिबलो लोके स मे भर्ता भविष्यति ।१२०।
तदागच्छतु शुम्भोऽत्र निशुम्भो वा महासुरः ।
मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु ।१२१

दूत उवाच ॥१२२॥

अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः ।
त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुम्भनिशुम्भयोः ।१२३
अन्येषामपि दैत्यानां सर्वे देवा न वै युधि ।
तिष्ठन्ति सम्मुखे देवि किं पुनः स्त्री त्वमेकिका ।१२४
इन्द्राद्याः सकला देवास्तस्थुर्येषां न संयुगे ।
शुम्भादीनां कथं तेषां स्त्री प्रयास्यसि सम्मुखम् १२५
सा त्वं गच्छ मयैवोक्ता पार्श्वं शुम्भनिशुम्भयोः ।
केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि ॥१२६॥

देव्युवाच ॥१२७॥

एवमेतद् बली शुम्भो निशुम्भश्चातिवीर्यवान् ।
किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा ॥१२८॥
स त्वं गच्छ मयोक्तं ते यदेतत्सर्वमादृतः ।
तदाचक्ष्वासुरेन्द्राय स च युक्तं करोतु तत् ।ॐ।१२९

इति दुर्गासप्तशत्यां पञ्चमोऽध्यायः ।

किन्तु जो की प्रतिज्ञा है मिथ्या कैसे करूँ उसे।
सुन मेरी प्रतिज्ञा जो मैंने की अल्प बुद्धि से ।११९॥
जो मुझे रण में जीते मेरा दर्प निकाल दे ।
मेरे समबलो होवे वह मेरा बनै पति ॥१२०॥
तो यहाँ शुम्भ आवे, या निशुम्भ असुरेश्वर ।
मुझे जीतं देर नहीं करे शीघ्र विवाह भी ।१२१॥

दूत बोला ॥१२२॥

हे गर्विष्ठे नहीं ऐसा मेरे सम्मुख बोल तू ।
त्रैलोक्य में कौन आवे आगे शुम्भ निशुम्भ के ।१२३
और भी वर दैत्यों के सभी अमर युद्ध में ।
नहीं ठहरते तू तो स्त्री है केवल एक ही ॥१२४॥
इन्द्रादि देव जिनके रण में ठहरे नहीं ।
उन शुम्भादि के कैसे नारी सम्मुख जायगी ।१२५॥
मेरे ही कहने से जा पास शुम्भ निशुम्भ के ।
केशग्रहण से मानहीन हो मत जा वहाँ ॥१२६॥

देवि बोली ॥१२७॥

ऐसा ही बलवान् शुम्भ और दैत्य निशुम्भ है।
प्रतिज्ञा को क्या करूं मैंने विचारी पहले न थी।१२८
अब तू जा कहा मेरा यह आदरसे वहां ।
कहदे दैत्यपति को वह जो युक्त हो करे ॥१२९॥

श्रीहरिशास्त्रिविरचित हिन्दी दुर्गा पाठ में
पाँचवा अध्याय पूर्ण हुआ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपयोगी लघुकथा

श्रीगिरिराजशर्मा शास्त्री, जयपुरम्

कबीरः—चतुर्दश्यां शताब्द्यां कबीरस्याविर्भावोऽभूत् । तस्य मातापितरौ हिन्दू आस्ताम्, किन्तु तस्य परिपालनं "निऊनिया" नामकेन मुहम्मदीयवस्त्रकारेण (जुलाहा) कृतम् । काश्यां गङ्गाघाटे कबीरः प्रसुप्त आसीत् । प्रातःकालीनेऽन्धकारे श्रीरामानन्दस्वामिनः ! चरणस्पर्शः तस्य शरीरेऽभूत् । स्वामिनः मुखात् 'रामराम' इति शब्दोच्चारणमभूत् । कबीरेणेदमुच्चरतिमेव मन्त्रत्वेन गृहीतम् । कबीरो महान् कविरासीत् । तेन सहस्रशः दोहाहिन्दीपद्यानि शतशश्च गीतिपद्यानि रचितानि । तच्च काव्यं सम्पूर्णे भारतवर्षे लोकप्रियम् अभूत् । स्वकाव्ये कबीरेण दाम्भिकत्वे कठोरः आघातः कृतः । कबीरस्य शिष्याः हिन्दवो मुहम्मदीयाश्चासन् । मगहरग्रामे श्रीकबीरस्य देहावसनमभूत् । तस्य देहस्यान्त्यक्रियाया विषये तस्य हिन्दुमुहम्मदीयशिष्याणां मध्ये विवादोऽभूत् । हिन्दवः तस्य मृतं देहं दाहार्थं नेतुमैच्छन् मुहम्मदीयाश्च तं देहं भूमौ निक्षिप्य तस्यान्त्यक्रियाञ्च कर्तुम् । यदा कबीरस्य मृतदेहस्य वस्त्रमुद्घाटितम् तदा तत्र केवलं पुष्पाण्येव दृष्टानि सर्वैः । हिन्दवः तेषां दाहमकुर्वन् मुहम्मदीयाश्च तदुपरि कबरस्य (समाधिमन्दिरस्य) निर्माणमकुर्वन् ।

गुरुनानकः—पञ्चदश्यां शताब्द्यां गुरुनानकस्याविर्भावोऽभूत् । तस्य पितुर्नाम मेहताकालूरामपटवारीमहोदयः, माता च तृप्तादेवीति

कबीर :—चौदहवीं शताब्दी में कबीर का आविर्भाव हुआ था । इनके माता पिता हिन्दू थे । किन्तु इनका परिपालन 'निऊनिया' नामके मुसलमान जुलाहे ने किया था । काशी में गङ्गाघाट पर कबीर सोये हुये थे । प्रातःकाल के अंधकार में श्रीरामानन्द स्वामी का चरणस्पर्श इनके शरीर को हुवा । स्वामी के मुख से 'रामराम' यह शब्दोच्चारण हुवा । कबीर ने इसी उच्चारण को मन्त्र की तरह ग्रहण किया । श्रीरामानन्द का शिष्यत्व कबीर ने ग्रहण किया । कबीर महान् कवि थे । उन्होंने हजारो हिन्दी में दोहे और भजनों की रचना की थी । वह काव्य सम्पूर्ण भारतवर्ष में लोकप्रिय हुवा । अपने काव्य में कबीर ने दाम्भिकों पर कठोर आघात किया है । कबीर के शिष्य हिन्दू और मुस्लिम दोनों थे । मगहर ग्राम में श्रीकबीर का देहावसान हुवा । उनकी देह की अन्तिम क्रिया के सम्बन्ध में हिन्दू और मुसलमानों में विवाद होगया था । हिन्दू उनके मृत देह को जलाने के लिये ले जाना चाहते थे और मुसलमान उस देह को भूमि में गाड़ कर उसकी अन्तिम क्रिया करना चाहते थे । जब कबीर के मृत देह का वस्त्र उघाड़ा गया तो वहां केवल पुष्प ही सब ने देखे । हिन्दुओं ने उन (पुष्पों) को जलाया और मुसलमानों ने उसके ऊपर कबर निर्माण की ।

गुरुनानकः—पन्द्रहवीं शताब्दी में गुरुनानक का आविर्भाव हुआ था । उनके पिता का नाम मेहताकालूरामपटवारी महोदय और

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नामा ख्याता ग्रासीत् । कार्तिकपूर्णिमायां तिथौ पञ्जाम्बुप्रदेशस्य तलवंडीग्रामे नानकस्य जन्म ग्रभूत् । बाल्यकालादेव नानकः साधुजन संसर्ग-रतः ग्रासीत् । तस्य पत्न्याः नाम सुलक्षणा ग्रासीत् । विवाहानन्तरं तस्य द्वौ पुत्रौ जातौ । तयोः नाम्नी श्रीचन्द्रो लक्ष्मीदासश्चास्ताम् । पारिवारिके जीवने श्रीनानकस्य चित्तं न रतम-भूत् । सः परिवारं परित्यज्य देशभ्रमणार्थं गतवान् । भारतवर्षस्य समस्तानाम् तीर्थानां पर्यटनं तेन कृतम् । बहुषु तीर्थस्थानेषु तेन धर्म-शालानिर्माणं कारितम् । ग्रर्बदेशे, ग्रफगानि-स्थानदेशे ईरानादिदेशेषु गत्वा तेन स्वविचारा-णामुपदेशः कृतः । बहवः मुहम्मदमतावलम्बिनः जनाः श्रीनानकदेवस्य शिष्याः बभूवुः । तस्य श्रीनानकदेवस्यानुयायिनः शिष्याः 'ग्रन्थसाहब' नामकं यं ग्रन्थं परमया श्रद्धया प्रतिदिनं पठन्ति तस्मिन् ग्रन्थे श्रीनानकदेवस्य वाणी सुबहुप्रमाणे संगृहीताऽस्ति । ग्रस्मिन् धर्मग्रन्थे कबीर-रवि-दास-मीराबाई-नामदेवादीनां महतां सत्पुरुषाणां काव्यानि संकलितानि सन्ति । पञ्जाबीसमाजे सिन्धीसमाजे च नानकमतस्य विशिष्टः प्रभावोऽस्ति ।

माता तृप्तादेवी इस नाम से प्रख्यात थी। कार्तिक पूर्णिमा की तिथि में पञ्जाब प्रदेश के तलपंडी ग्राम में नानक का जन्म हुवा था। बाल्यकाल से ही नानक साधुजनों के संसर्ग में रहते थे । उनकी पत्नी का नाम सुलक्षणा था। विवाह के पश्चात् उनके दो पुत्र हुए। उनके नाम श्रीचन्द, लक्ष्मीदास थे। पारिवारिक जीवन में श्रीनानक का चित्त नहीं रमा। वह परिवार को छोड़कर देशभ्रमणार्थ गए। भारत-वर्ष के समस्त तीर्थों का पर्यटन उन्होंने किया। बहुत से तीर्थों पर उन्होंने धर्मशालाए बनवाई। ग्ररब देश में ग्रफगानिस्थान में, ईरान ग्रादि देशों में जाकर उन्होंने ग्रपने विचारों के उपदेश किए। बहुत से मुसलमान लोग श्रीनानकदेव के शिष्य हुए। श्रीनानक देव के ग्रनुयायी शिष्य 'ग्रन्थ साहब' नामके जिस ग्रन्थ को परमश्रद्धा से प्रतिदिन पढते हैं उस ग्रन्थ में श्रीनानकदेव की वाणी बहुत प्रमाण में संगृहोत है। इस धर्मग्रन्थ में कबीर-रविदास-मीराबाई-रामदेव ग्रादि बड़े सत्पुरुषों के काव्य संकलित हैं। पञ्जाबी समाज ग्रौर सिंधी समाज में नानक पन्थ का विशिष्ट प्रभाव है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

(प्रमादमुद्दिश्य)

आशुकवि-श्रीहरिशास्त्री, सम्पादकः

कार्ये कर्मणि यच्चेतो-
ऽनवधानमुपेक्षणम् ।
तत् प्रमाद इति ख्यातः
सर्वकर्मविगर्हितः ॥१॥

धीमतामपि कर्माणि
नश्यन्त्येव प्रमादतः ।
पश्चात्तापं ददात्येष
प्रमादः कर्मकर्तृषु ॥२॥

सत्ये, धर्मे, तथाऽर्थेऽपि
प्रमादो हानिकारकः ।
विद्याभ्यासेऽप्युपासादौ
प्रमादो न विधीयताम् ॥३॥

एतन्निषेधो द्रष्टव्यो
वेदेषूपनिषत्स्वपि ।
तस्मादेष तिरस्कार्यो
नैव धार्य्यः कथञ्चन ॥४॥

१—करने योग्य (कर्तव्य) कर्म में जो मनका अवधान न होना अथवा उपेक्षा का होना इसको प्रमाद कहते हैं। यह सभी कार्यों में निन्दित है निषिद्ध है।

२—बड़े-बड़े बुद्धिमानों के कार्य भी प्रमाद से नष्ट हो ही जाते हैं। यह प्रमाद उन कर्मकर्ताओं में पश्चात्ताप (पछतावा) देता है।

३—सत्य, धर्म-अर्थ इनमें प्रमाद नहीं करना चाहिये, विद्याध्ययन और देवउपासना में भी प्रमाद बड़ा हानिकारक है इसे कभी न करो।

४—इसका निषेध वेदों, उपनिषदों में भी देखने योग्य है, सत्यान्नप्रमदितव्यं, धर्मान्नप्रमदितव्यं, भूत्यै न प्रमदितव्यम् इत्यादि। इसलिए इस प्रमाद का तिरस्कार ही करो स्वीकार न करो यही उपदेश है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. No. J 7
Licence No. PP. 6
"Licenced to Post.
Without Prepayment"

एक राष्ट्रीय उत्पादन

३५००० से अधिक श्रमिकों को काम देने वाला

श्रेष्ठतम सामग्रियों से निर्मित

मेंगलूर

गणेश बीड़ियां

धूम्रपान करने वालों की अति प्रिय

प्रधान कार्यालय

मेंगलूर गणेश बीड़ी वर्क्स

विनोबा रोड : मैसूर–५

दूरभाष : ४२१

तार : AROMA

प्रकाशकः—जयबहादुरसिंह पता : भारती भवन, गोपालजी का रास्ता, जयपुर। दूरभाष : ७५४६६
राधेश्याम शर्मा द्वारा श्री हनुमान प्रि० प्रेस, चौड़ा रास्ता, जयपुर में मुद्रित। फोनः ६३१५६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतमासिकस्य



आर्यसंस्कृतिसुरक्षणदक्षः पारतन्त्र्यनिगडप्रतिहन्ता ।
केसरीव बलवीर्यगरिष्ठो लोकमान्यतिलकस्तिलकोऽयम् ॥
जन्मसिद्धोऽधिकारो नः स्वराज्यमिति सर्वतः ।
प्रथमं घोषणा येन कृता वीरः स नम्यताम् ॥

वार्षिकमूल्यं सप्तमुद्राः ७.००

एकप्रतः सप्ततिपणाः ०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान–मध्यप्रदेश–गुजरात–महाराष्ट्र–मद्रास–आंध्र–उत्तरप्रदेश–
बिहार–पञ्चनद–सर्वकारैः स्वीकृता—

विषय-सूची

क्र० सं०	लेखाः	लेखकाः	पृष्ठसंख्या
१.	मङ्गलम्	श्रीहरिशास्त्री, सम्पादकः, जयपुरम्	३७१
२.	नान्यः पन्थाविद्यते	श्रीअनन्तपद्मनाभशास्त्री, कवकुटपुरम्	३७२
३.	स्वास्थ्यसप्तकम्	श्रीगोपीनाथपारीकः,	३७४
४.	विश्वशान्तिर्भारतञ्च	श्रीरामस्वरूपमिश्रः, बांदीकुई	३७५
५.	मनोविनोदकणिका	मधुपः, जयपुरम्	,,
६.	संस्कृतं भारतीयराष्ट्रियता च	श्रीरामजी उपाध्यायः,	३७६
७.	अष्टाध्याय्यां प्रयुक्ता इच्छार्थकाः केचन शब्दाः	श्रीजानकीप्रसादद्विवेदः, वाराणसी	३७७
८.	सुगन्धीनि जीवनपुष्पाणि	अनु० श्रीगणेशरामशर्मा, डूंगरपुरम्	३८१
९.	पाद्यपद्यपुष्पाञ्जलिः	वाचस्पति–श्रीशशिधरशर्मा, होश्यारपुरम्	३८४
१०.	विचित्राः समाचाराः	श्रीगणेशरामशर्माणः, डूंगरपुरम्	३८५
११.	किं साधवः किञ्चिद् राष्ट्रस्य सेवां कर्तुं शक्नुवन्ति ?	अनु० दीनानाथत्रिवेदी मधुपः	३८९
१२.	सा सेविता कामदुघेव नूनम्	वैद्य–श्रीरामस्वरूपशास्त्रीः मुम्बई	३९७
१३.	सम्पादकीयम्	'मधुपः' सहसम्पादकः	३९९
१४.	श्रीदुर्गासप्तशती ६ अध्यायः	श्रीहरिशास्त्री, सम्पादकः	४०३
१५.	लघुकथा	श्रीगिरिराजशर्मा शास्त्री, जयपुरम्	४०४
१६.	समस्या–पूर्तयः	आचार्य–श्रीराधाकृष्णशर्मा, जयपुरम्	४१०
१७.	सूक्तिसुधा	आशुकवि–श्रीहरिशास्त्री, सम्पादकः	४११

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः
आशुकवि-कविभूषण-
श्रीहरिशास्त्री

सहसम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
साहित्यालङ्कारः

भारती

लेखैरुपस्कृता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

प्रबन्धसम्पादकः
सहसम्पादकश्च
गिरिराजशर्मा

भारती-भवनम्,
गोपालजी का रास्ता,
जयपुरम्

वर्षम् १९ | द्वितीय आषाढः, विक्रमाब्दः २०२६ (अगस्त, १९६९) | अङ्कः १०

मङ्गलम्

आशुकवि—श्रीहरिशास्त्री, सम्पादकः

ब्रह्मेशविष्णुसुरराजमुखैरशेषैर्देवैरहर्निशमुपासितमम्बुजाक्ष्याः ।
गन्धर्वचारणगणैर्बहुधार्चितं च पादाम्बुजं दिशतु मङ्गलमम्बिकायाः ॥

आशासु क्रमतः शचीपतियमांभोनाथवित्तेश्वरान्,
तत्कोणेषु च वह्निनिर्ऋतिजगत्प्राणं तथेशानकम् ।
ऊर्ध्वाऽधो विधिशेषकाविति नियुञ्जानं प्रवालारुणं
ध्याये तत्किमपि प्रपञ्चचतुरं सर्वस्वतन्त्रं महः ॥

मासावतरणम्

विद्वद्भिः सुरसत्तमैरपकृतो दैवज्ञकैर्धिक्कृतो
श्रीमद्भागवतादिपाठनजुषो विज्ञान्भृशं मानयन् ।
क्षीरापूपभरांश्च कांस्यपिठकान् भक्त्यैव संदापयन्
आषाढोऽधिकमाससंज्ञक इलामाप्तः सखे दृश्यताम् ॥

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नान्यः पन्था: विद्यते—

ले० श्रीअनन्तपद्मनाभशास्त्री "वैद्यनाथ" कुक्कुटपुरम्

महीशूर (मैसूर) राज्ये हासनमण्डले श्रवण-बेलगोलमिति पवित्रं क्षेत्रं वर्तते। तत्रैकं सित-पद्मैराच्छन्नं स्वच्छसलिलं सरो विद्यते। तस्य तटे पुरा श्रमणाः सिद्धिमापुः। ततः इदं क्षेत्रं 'श्रवणबेलगोलमिति (श्रमणानां श्वेतसरः) नाम प्राप।

अत्र सप्तत्यधिकचतुःशतपादोन्नते पर्वताग्रे सप्तपञ्चाशत्—पादोन्नता श्रीबाहुबलेः मूर्तिः प्रतिमायोगे तिष्ठन्ती जगते निर्ममतां बोधयति। बाहुबलिः साक्षात् मन्मथ इवासीत्। ततः कन्नडभाषायां तं 'गोम्मट' इत्यपि कथयन्ति। तस्य गोम्मटेश्वरस्य प्रतिद्वादशवर्षं, महामस्त-काभिषेकः भवति। गत-मार्च (१९६७) मासस्य त्रिंशे दिनेऽयं महोत्सवः महता विभवेन सम-पद्यत। भारतस्य विविधाभिः पुण्यनदीभिः जलमानाय्य अष्टाधिकसहस्रकलशानामभिषेकः अभूत्। ततः इक्षु-क्षीर-दधिमधु-सर्पिषां तथा धनकनकरत्नानामप्यय महाभिषेकः, पञ्चसहस्र-जनपरिमितेऽस्मिन् क्षेत्रे, न केवलं निखिलभार-तात्, किन्तु खण्डान्तरादपि जनान्, आहृत्य पञ्चलक्षाधिकानाकर्षत्। शर्मण्य (Germany) देशीयः कलाभिज्ञवृन्दः कश्चित् तस्य चलचित्र-मप्यगृह्णात्। अभिषेकसमये यदा विमानं (हेलिकाप्टर) भगवतः गोम्मटेश्वरस्य शिरसि पुष्पाण्यवर्षत्, तदा नतमस्तकः, बद्धाञ्जलिः भक्तलोकः बाहुबलेः "समवसरण"कालिकं पौराणिकं भव्यं दृश्यं प्रत्यक्षीकृत्येव पुलकितो-ऽभवत्। प्रायः कश्चित्तदासीद्वा न वा, यस्य चक्षुषी नामुञ्चतामश्रूणि, वाष्पेण कण्ठश्च न रुद्धः, हृदयं च भावपूर्णं नास्मरद् भगवन्तम्।

केरलीयः कश्चन भक्ताग्रणीः (एम्. के. जिनचन्द्रनामा) सप्ताधिकचत्वारिंशत्-सहस्र-रूप्यकैः प्रथमं कलशं क्रीत्वा भगवन्तं स्वहस्तेन अभिषिच्य स्वात्मानं धन्यमन्यत। द्वितीयश्च कलशः एकादशसहस्ररूप्यकैः क्रीतः।

इतिहासः—क्रिस्तशकदशमशतके (कर्णा-टकेषु) गंगराज राचमल्लस्य महामन्त्री सेना-पतिश्चासीत् चामुण्डरायः। तस्य मातुः कदा-चित् श्रीबाहुबलिं द्रष्टुमुत्कण्ठा समजनि। राजधान्याः तलकाडुप्रदेशात् स चामुण्डरायः मात्रा परिवारेण च सह पौदनपुरं प्रतस्थे। मार्गे श्रवणबेलगोलक्षेत्रे तस्थौ। तत्र रात्रौ तस्य स्वप्ने बाहुबलिः प्रत्यक्षीभूय "तव मातुश्च भक्त्या प्रसन्नोऽस्मि। अहं युवयोदर्शनार्थमत्रा-गतः। त्वं प्रातः बाणमेकमुत्सृज। स बाणः यत्र पतति तत्र दर्शनं दास्यामि" इत्युक्त्वा तिरोदधे। तदनुसारं बाणसन्धानेन बाहुबलेः सन्निधिं ज्ञात्वा चामुण्डरायस्तस्य कमनीयां मूर्तिं कारयामास।

पुराणम्—आदितीर्थङ्करश्रीवृषभदेवस्य ज्येष्ठपत्न्यां आदिचक्रवर्ती, भरतः, अन्ये च शतं पुत्रा आसन्। कनीयस्यां तु बाहुबलिः समजायत। स च व्यूढोरस्कः, वृषस्कन्धः, शालप्रांशुः महा-भुजः" कमनीयतमः सन् साक्षात् मन्मथ इवा-सीत्। वृषभदेवः यदा भरतमभिषिच्य अयोध्या-याम्, युवराजं च विधाय बाहुबलिं पौदनपुरे, तथान्यानपि पुत्रानन्यान्यराज्येषु विभज्य वनं जगाम। उग्रं तपश्चरन् वृषभदेवः यदा केवल ज्ञान"मलभत, तदा चक्ररत्नं चक्रवर्तिनं भरतं शिश्रिये। तेन चक्रेण सह भरतः निखिलमपि भूमण्डलं विजित्य यदाऽयोध्यां प्रविवेश, तदा चक्रं द्वारे एव रुद्धमभूत्। पृष्टाः दैवज्ञाः "तव राज्ये शत्रवः सन्ती"त्यकथयन्। सहोदरान्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized By Arya Samaj Foundation Chennai and eGangotri

विना सर्वेऽपि राजानस्तस्य शरणमागताः। अतः भरतः सहोदरान् प्रति "युष्मान् विहाय साम्राज्ये न मे सुखमस्ति। मां ज्येष्ठ इति यूयं नमत" इति सन्दिश्य दूतान् प्रेषयामास। शतमपि सहोदराः तस्य सन्देशेन अपरितुष्टाः पितरमासाद्य संन्यासं जगृहुः। बाहुबलिरपि कः बलीयानिति बाहुभ्यामेव निर्णयो भवत्वि"ति उत्तरं प्राहिणोत्। चर्मदेहिनौ समबलौ सहोदराविमौ यदा युद्धक्षेत्रमवतेरतुः तदा मन्त्रिणः व्यर्थं सेना क्षीयते, हिंसा च जायते" इति तावुभावपि नेत्र-जल-मन्त्रयुद्धेषु जयं निर्णेतुं प्रार्थयामासुः। नेत्र-युद्धे बाहुबलेर्विभीषिकया दृशा पीडितः भरतः दृष्टिमधश्चक्रे। जलयुद्धे च भरतेनोत्सृष्टाः जलबिन्दवः बाहुबलेर्गले एव जयमालामतन्वन्। मन्त्रयुद्धेषु बाहुबलिः भरतं हस्ताभ्यामुद्धृत्य अधः प्रक्षेप्तुमैच्छत्, किन्तु मनस्यचिन्तयत् किं कर्तुमुद्यतोऽहम् ज्येष्ठभ्राता पितृसमः खलु" इति तं भूमाववातारयत्। सर्वेऽपि विजयिनं बाहुबलिं प्रशशंसुः। तदा मत्सरेणाभिभूतः भरतः तत् चक्रं प्रायुङ्क्त। किन्तु तत् धर्मचक्रं अधर्मेण प्रेरितं, बाहुबलिं प्रदक्षिणीकृत्य तस्य दक्षिणभुजसन्निधौ निष्प्रभं सद्विरराम। देवदुन्दुभयो नेदुः। पुष्पवृष्टिरभवत्। बाहुबलिः प्रणम्य भरतमवदत् "पूज्यभ्रातः! नैतादृशं राज्यमहमभिलषामि, यदर्थं भ्राता भ्रात्रा, पित्रा च सह युध्यति, क्षमस्व, यदहं त्वया सहायुध्यम्। अद्य सन्यासं स्वीकृत्य प्रायश्चित्तं करिष्यामि" इत्युक्त्वा भरतेन निवार्यमाणोऽपि वनं ययौ। पितुरनिन्दितां समवसरणभूमिं प्राप्य "पितः, प्रथमं तव साम्राज्ये मां युवराजमकरोः, अधुना अत्रापि मां युवराजं कुरु" इति संप्रार्थ्य, दीक्षां स्वीकृतवान्। प्रतिमायोगेन घोरं तपश्चचार। बहुनापि कालेन तस्य "सम्यक् ज्ञानं" नाभवत् तस्य मनसि 'अहं भरतस्य राज्येऽस्मि' इति गुप्ता चिन्ताऽऽसीत्। तदा भरतः आगत्य तं प्रणम्य "स्वामिन्! भूमिरियं तव कृपया मया लब्धा, अतः त्वमात्मानमेव चिन्तय, नान्यदिति" प्रार्थयामास।

अनेन वचसा तस्य मनः निर्मलमभूत्। सम्यग् ज्ञानं च उदपद्यत। मणिखचितसिंहासनं तमुदवहत्। शिरसि छत्रमशोभत पार्श्वयोश्चामरयुगलं च व्यराजत। यक्ष-गन्धर्व-किन्नराः सिषेविरे। जिनेश्वरमिव तं त्यागमूर्तिं जनाः पूजयामासुः।

पौदनपुरे तस्य मूर्तिं शिलायां निर्माय पूजयन्ति स्म, किन्तु कालान्तरे पौदनपुरं दुर्गमं बभूव।

दशभिः शतकैः त्यागमूर्तिः स भगवान् बाहुबलिः श्रवणबेलगोलक्षेत्रे न केवलं तपश्चरति, परन्तु भारतात् तथा निखिलभूमण्डलादपि लोकान् समाकृष्य "त्यागेनैके अमृतत्त्वमानशुः नान्यः पन्थाः विद्यते" इति शिक्षयति च।

जयतु भारतमाता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वास्थ्यसप्तकम्

रचयिता—श्रीगोपीनाथपारीकः

(१)

अरुणोदयपूर्वं ये पिबन्ति सलिलं सदा ।
भवन्ति निर्विकारस्ते दोषामया भवन्ति न ॥

(२)

प्रतिदिनं निशान्ते हि भ्रमणं सुहितं स्मृतम् ।
आयुरारोग्यकारि च वातरोगनिषूदनम् ॥

(३)

साहसं भोजनं स्वप्नं व्यायामं चिन्तनं जलम् ।
न कुर्यादतिमात्रायां जायन्ते व्याधयोऽन्यथा ॥

(४)

शान्तचित्तः सदा भूत्वा भक्षयेत् मितभोजनम् ।
हितकरं सुपाच्यञ्च बलवीर्यकरं परम् ॥

(५)

करोति मानवो यश्च सदाचारस्य पालनम् ।
स महापुरुषो लोके पुण्यश्लोकश्च कीर्त्यते ॥

(६)

सायं हि कुरुते क्रीडां भोजनपूर्वमेव यः ।
नायान्ति तत्र रोगाः, स स्वस्थो भवति सर्वदा ॥

(७)

शयीत सर्वदा शीघ्रं जागृयाच्छीघ्रमेव च ।
भगवत्स्मरणं कुर्यात्प्रातः सायं प्रयत्नतः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वशान्तिर्भारतञ्च

आचार्य श्रीरामस्वरूपमिश्रः, रा० उ० मा० विद्यालय, बाँदीकुई

विज्ञानस्य विविधैः आश्चर्यपूर्णैश्चमत्कारैश्चमत्कृतम् अद्यत्वे विशालम् विश्वम्। एकत्र विज्ञानेन महानुपकारः कृतः अन्यत्र च विनाशकारिणां तत्त्वानामपि आविष्कारा कृताः, यैः अनेके प्रदेशाः नगराणि ग्रामाश्च विनष्टीकृताः। भयभीताः मानवाः विज्ञानालोकेन अणुशक्तेः भयम् अत्यधिकं वृद्धतां गतम्। विज्ञानोपजीविनो मानवाः दानवाः संजाताः हिंसायाः साधनानि प्रबलानि जातानि। मानवस्य महत्त्वं विनष्टं, वर्तते च सर्वत्र युद्धस्य विभीषिका। समाजेषु परस्परं वैमनस्यम्। एतादृशे भयावहे काले विश्वस्मिन् शांतिसंस्थापनाय अस्माकं स्वतन्त्रेण भारतदेशेन महान् प्रयासः कृतः। अस्माकं देशस्य प्रथमप्रधानमन्त्रिणा स्वर्गीय—श्रीजवाहरलालनेहरूमहोदयेन विश्वशांतये पंचशीलसिद्धान्तः जनसमक्षं प्रस्तुतः। अस्य सिद्धान्तस्य सर्वैरपि शांतिप्रियैः राष्ट्रैः संमानं कृतम्। भारतस्य अनेन सफलप्रयासेन संयुक्तराष्ट्रसंघस्य सहायतया च अनेकेषु स्थानेषु शांतिः संस्थापिता। शांतिप्रियः अस्माकं देशः नायं कस्मिन्नपि आक्रमणं करोति न च अन्यस्मै आक्रमणस्य परामर्शं ददाति। भारतस्य अनया नीत्या अनेके देशाः अतीवप्रसन्नाः जाताः, किन्तु केचन शक्तिशालिनः देशाः अप्रसन्नाः अपि भवन्ति। अत एव एतत् सिद्धयति यत् केवलम् भौतिकानां साधनानां उन्नतिः अशांतेर्मूलम्। एतन्निराकरणाय मानवाः सप्रयासाः भवेयुः तेषां विचारधारा उदारा सरला च भवेत्। भारतस्य विश्वशान्तौ एष महत्त्वपूर्णः सहयोगः। अणुशक्तेः भयं दूरीकर्तुं यत् सम्मेलनं सम्पन्नम् तस्य अध्यक्षता कृताऽस्माकं देशेन। रूसदेशेन कृतस्य अणुविस्फोटविकारस्य च प्रबलो विरोधः कृतो भारतेन यदयं रूसदेशस्य विचारः भयावहः विनाशकारी च। मानव एव मानवस्य विनाशकः स्याद्—इयं महती विडम्बना। एतस्य भयस्य निराकरणाय साधनायाः अपेक्षा वर्तते। संसारस्य शांतिप्रियेषु देशेषु भारतम् प्रमुखम्। जगति अस्माकम् देशस्य एतदर्थं सुसंमानं वर्तते यदयं एकः शांतिप्रियो महान् देशः।

अस्मिन्नपि कराले काले अस्माकं देशस्य नेतारः विभिन्नेषु राष्ट्रेषु विश्वशांतेः पावनं सन्देशं प्रेषयन्ति निवेदयन्ति च सर्वैः शान्तिप्रियैर्भवितव्यम्।

मनोविनोदकणिका—

सुन्दरीं प्रति द्राक्तरस्योक्तिः

कान्ता द्राक्तरमेत्य काचिदवद् को मेऽस्ति रोगो—वद ?
दृष्ट्वा तां सुभगां स सादरमिदं प्रत्यब्रवीत्सस्वरम्।
'सर्वांस्तेऽवयवानहं सुनिपुणं यावन्निरोक्षेऽधुना—
तावत्सुन्दरि ! निश्चलेन मनसा मौनं त्वया सेव्यताम्॥

—दीनानाथत्रिवेदी मधुपः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतं भारतीयराष्ट्रियता च

डा० श्रीरामजी उपाध्यायः, एम० ए०, डी० लिट्

भारतस्यैकताद्य वर्तते। सा कथं कदा वा सम्पादितेति विचारे समुपस्थिते सर्वङ्कषो विमर्शो जायते यदुपक्रमेऽस्मिन् नास्ति तत्राङ्ग्लानां तेषां भाषाया अनुयायिनां वा कृतित्वम्, अपि तु तेषां भारते प्रादुर्भावात् प्राक् किमपि तत् तत्त्वमासीत् सुप्रकटितं येन निःसन्दिग्धमिदं प्रोक्तम्—

उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तद् भारतं नाम भारती यत्र सन्ततिः॥

बहुविधजनानां देशेऽस्मिन् सा भारतीया संस्कृतिर्विकसिता यस्या आदर्शमात्मनीनं कर्तुं ते सर्वे जनाः परस्परं साहचर्यं विदधुरिति भारतीयसंस्कृतेः प्रतिष्ठायाः प्रथमं पदम्। इयमेव भारतीयसंस्कृतिर्भारतस्यैकराष्ट्रियत्वमपि विहितवती। वस्तुतस्तु न कश्चिद्देशो भौगोलिकसीमाभी राष्ट्रमिति नामविशेषमर्हति, अपितु केनापि संस्कृतिविशेषेण कस्यचिद् भूभागस्य राष्ट्रसंज्ञेति विशेषो जायते। सा संस्कृतिः प्रधानतः संस्कृत–साहित्ये गौणत इतरभाषासाहित्येषु च निहिता वर्तते। यदि नाम संस्कृतमपरा भारतीय-भाषा वोपेक्षिताः स्युः तर्हि भारतीया संस्कृतिरपि मूलत उच्छिन्ना भविष्यति। फलतो भारतस्य भारतीयतापि विनष्टा जायेत। आंग्लभाषाद्वारेण या अन्ताराष्ट्रियसंस्कृतिः प्रचार्यते, तस्याश्चाकचक्येन भारतीयां संस्कृतिं विनाशयितुमेवाङ्गलभाषासमर्थकानां पक्षः प्रवर्तते।

स्वकीया राजनीतिकी वा सामाजिकी वा संस्कृतिः परेषु देशेषु स्थिरं पदं निदध्यादिति आधुनिकयुगे सर्वेषां प्रबलराष्ट्राणां परमोद्योगो वर्तते। इदमेवोद्दिश्य इङ्गलैण्ड-अमेरिका-जर्मनी-रूसादि-देशानां न केवलं सार्वजनिकसंस्था अपि तु शासन–संस्था अपि भारतदेशे स्वल्पमूल्येनोत्कृष्ट साहित्यं विक्रीणन्ति, भारतीयविद्यार्थिनां स्वकीयेषु देशेषु अध्ययनार्थं समृद्धां छात्रवृत्तिमुपहरन्ति, स्वकीयदेशस्य भाषा-संस्कृतीतिहासादीनां विषयाणामध्यापनार्थं प्राध्यापकान् नियोजयन्ति। 'फोर्ड फाउण्डेशन' इति विख्याता संस्था तदेवोद्देश्यं परमं कृत्वा प्रपञ्चिता।

राष्ट्रभाषाद्वारेण राष्ट्रिया संस्कृतिः संस्थापनीया यतो नाम राष्ट्रिय-संस्कृतिं विना राष्ट्रस्य राजनीतिकमेकत्वमपि स्वप्नसृष्टिर्भविष्यति, भारतस्य विघटनमवश्यं भविता च। सा राष्ट्रिया संस्कृतिः केवलं भारतीयभाषासु सन्निहिता वर्तते। अत एव तासां सर्वासां भाषाणामध्ययनमध्यापनं च सविशेषं व्यवस्थापनीयम्। अधुना तासु केवलं संस्कृतस्य माहात्म्यं भारते सर्वत्र राजते। सा भाषा सर्वासां भारतीयभाषाणां जननीरूपेण वा सहचरीरूपेण वा समादृता। अस्माकं राष्ट्रिय-साहित्यं प्राचीनकालतोऽद्यावधि सविशेषं संस्कृतभाषायामेव वर्तते। नातः परं किमपि सत्यम्। हिन्दी-भाषायामन्यासु वा भारतीयभाषासु सन्ति नामांगुलिगणनीया एव राष्ट्रिय-साहित्य-कक्षा-योग्या ग्रन्थाः, अथ च शतशो ग्रन्था वेदोपनिषद्रामायण-महाभारतपुराणादयः, अन्ये वा बहुविधविषयस्पृशो महाकवीनामाचार्याणां च संस्कृतग्रन्था राष्ट्रिय-साहित्य-कोटिमवगाहन्ते। न केवलं भारतीयभाषासु भाविसाहित्यस्य निर्माणार्थमपितु भारतमिति नाम्नः सार्थकतां विधातुमपि संस्कृतभाषाया राष्ट्रियं साहित्यं महनीयम्।

आंग्लभाषाया अनिवार्यमध्यापनं तु दुराग्रह एव, यतो नाम कापि वैदेशिकी भाषा कस्मिंश्चित् स्वतन्त्रदेशेऽनिवार्यरूपेण न ध्रियते। आंग्लभाषा तु केवलं तैर्जनैः पठनीया ये अन्ताराष्ट्रियज्ञान-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अष्टाध्याय्यां प्रयुक्ता इच्छार्थकाः केचन शब्दाः

श्रीजानकीप्रसादद्विवेदः व्या० आ०, विद्यावारिधिः पी एच्०डी०, वा० सं० विद्यालयः, वाराणसी-२

पूर्वानुवृत्तम्:—

७. अनुज्ञैषणा—अनुज्ञाया एषणा=प्रार्थना अनुज्ञैषणा, अनुज्ञा प्रार्थनेत्यर्थः। यदा कश्चित् पुरुषः स्वयमेव किञ्चित्कार्यं कर्तुमुद्यतो भवति तदा एवमेव त्वया करणीयमिति यदन्यस्तमनुदिशति, तत्कार्यकरणे स्वीयामनुमतिं वा प्रकाशयति, स आदेशोऽनुमति र्वाऽनुज्ञाशब्देनोच्यते। यथोक्तं हरदत्तमिश्रेण—

"अनुज्ञेति=किञ्चित्कर्तुं स्वयमेवोद्युक्तस्यैवं क्रियतामित्येवं रूपोऽभ्युपगमोऽनुज्ञेति" (प० म० ८।१।४३) इति।

तदर्थमेव क्रियमाणा प्रार्थनाऽनुज्ञैषणा भवतीति बोध्यम्। यथा—ननु करोमि भोः! इति। अत्रोद्यतः पुरुषः कार्यकरणायाऽन्यस्य स्वीकृतिमभिलषतीत्याशयोऽवगम्यते। उक्तञ्च काशिकाकारेण—

"अनुजानीष्व मां करणं प्रतीत्यर्थः" (का० वृ० ८।१।४३) इति।

विधेः पूर्वं क्रियायामपकर्षो (हीनता) ज्ञातुं न शक्यते इति न तत्र युज्यतेऽनुदात्तकरणम् अत एव पाणिनिना तन्निषिध्यते—

"नन्वित्यनुज्ञैषणायाम्" (अ० ८।१।४३) इति।

यत्र च ननुशब्देन पृष्टप्रतिवचनमात्रं प्रतीयते नाऽनुज्ञैषणा तत्रानुदात्तो न निषिध्यते। अत्रेद विज्ञेयम्—कटकरणायादिष्टः शीतको (अलसः) देवदत्तो यदा निश्चितसमये कटं न निष्पादयति, तदा—अकार्षीः कटं देवदत्त! इत्येवं पृष्टः सन्नुत्तरयति—ननु करोमि भोः! इति। साम्प्रतमपि कटो न निष्पन्नः, किञ्च तन्निर्माणकार्यमहं करोमीत्यर्थः। तत्र क्रियायां विलम्बस्य दर्शनाद् हीनता प्रतीयते इति क्रियतेऽनुदात्तः।

८. संमतिः—संमतिः=पूजा, सा च शब्दैः कस्यचित् पुरुषस्थस्य गुणस्याविष्करणेन प्रतीयते। कस्यचिद्विषयस्य सम्मतिः सम्मतिप्रदातुरुत्साहं द्योतयति। सत्युत्साहे पुरुषोऽवश्यमेव किञ्चित्कार्यं प्लुतगत्या विदधाति, वेगेन कार्यकरणे एकदा कृतायाः क्रियाया आवृत्तिरपि सम्भाव्यते इत्येवाऽभिप्रेत्य मन्ये सम्मत्यर्थे प्लुतो द्वित्वञ्च विधीयते सूत्रकारेण—

"वाक्यादेरामन्त्रितस्याऽसूया-संमति-कोप-कुत्सन-भर्त्सनेषु" —(अ० ८।१।४) इति।

प्लुतविधायकं सूत्रम्—

"स्वरितमाम्रेडितेऽसूया-संमति-कोप-कुत्सनेषु" (अ० ८।२।१०३) इति। यथा—माणवक ३ माणवक, अभिरूपक ३ अभिरूपक शोभनः खल्वसीत्यादि।

९. प्रलम्भनम्—प्रलम्भनम्=विसंवादनम्, विपरीतभाषणं मिथ्याफलाख्यानमित्यर्थः। यो हि पुरुषः कस्यचित् सकाशात् स्वार्थसिद्धिं कर्तुमीहते, स च जानाति—नाहमेतादृशो विद्वान् न च तदपेक्षया बलवत्तर इति, अतो मिथ्याभूतैर्मनोरमैर्वचनैस्तं स्ववशमानीय कार्यं साधयितुं शक्नुयामिति विचार्य स तथैवाचरति। किञ्चा-

---

विज्ञान-समुपासका अन्ताराष्ट्रियां ख्यातिं लब्धुं समुत्सुकाः सन्ति।

आंग्लभाषा तु भारतीय-संस्कृतेः प्रोच्चाटिनी वर्तते। यदि नाम आंग्लभाषाया भारते सर्वोपरि स्थानं क्रियते, तर्हि त एवाङ्गल-साहित्य-संस्कृति रञ्जिता जना देशेऽस्मिन् प्रामुख्यं भक्ष्यन्ते, तेषामादर्शेन साहचर्येण च वैदेशिकी संस्कृतिर्देशेऽस्मिन् सनातनपदं लप्स्यते। सा स्थितिस्तु भारतस्य भारतीयतामेवाचिरं निराकुर्यात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रहशीलः कश्चिद् बालकोऽप्येवमेव वशीकर्तुं शक्यते। आत्मोद्देश्येन क्रियमाणायां मिथ्याभाषणरूपायां क्रियायामात्मनेपदस्यैव विधानं युज्यते, तदेवाह महर्षिपाणिनिः—

"गृधि-वञ्च्योः प्रलम्भने" (अ० १।३।६९) इति।

यथा—माणवकं गर्धयते, माणवकं वञ्चयते इति। मिथ्याभिभाषणेनैव प्रलम्भनं भवति। यदा कश्चिच्छुनो गर्धनं वर्धयितुं किञ्चिद् वस्तु प्रदर्शयति तदात्मोद्देश्येन मिथ्याव्यवहारस्याऽकरणात् प्रलम्भनार्थो न जायते, अतस्तत्रात्मनेपदाभाव एवेति श्वानं गर्धयतीत्येव प्रयोगो भवति। लीङ् धातोरपि प्रलम्भनार्थे आत्मनेपदं क्रियते—

"लियः संमानन-शालीनीकरणयोश्च" (अ० १।३।६८) इति।

अत्र चकारेण तदर्थस्योपादानं क्रियते। यथा—कस्त्वामुल्लापयते, विसंवादयतीत्यर्थः।

अनुमेयविषया इच्छार्थकाः शब्दाः

१. हर्षः—चित्तस्य प्रसन्नता हर्षः, स च कस्यचिदिष्टस्य पदार्थस्य प्राप्त्याऽवलोकनेन वा स्वान्तःस्थस्यैव भावस्य प्रकाशनेन परिलक्ष्यते। हर्षावस्थायां प्रायः पदार्थान्तरस्य ज्ञानं नैव जायते। यथा मधौ पिक आम्रमञ्जर्यादिकमवलोक्य प्रसन्नताभरेण हर्षानुभूतिं कुर्वन् यदा विरौति तदा स उन्मत्त इव दृश्यते, न च व्यापारान्तरे चित्तं (आत्मानम्) योजयति। एवं कन्यका अपि मनोरमं कञ्चित् पदार्थमवलोक्य सम्प्राप्य वा कार्यान्तरं विस्मरन्ति तत्रैव च प्रीतिं प्रक्षिपन्तीति कन्यकानां हर्षस्याऽर्थे प्रमदशब्दः, कोकिलानाञ्च हर्षस्याऽर्थे संमदशब्दो लोके रूढस्तयोर्निपातनेन साधुत्वं निर्दिशति पाणिनिः—

"प्रमद-संमदौ हर्षे" (अ० ३।३।६८) इति।

वृषभः प्रावृष्यन्यदा च कदाऽऽत्मनो हर्षमेवाऽभिव्यञ्जयन् भित्त्यादिकमालिख्य मृत्तिकाया विक्षेपणं करोति तदात्मनेपदं सुडागमश्च करणीय इति वार्त्तिककारस्याऽभिमतम्। उक्तञ्च तेन—

"हर्ष-जीविका-कुलायकरणेष्विति वक्तव्यम्" इति।

'हर्ष-जीविका-कुलायकरणेष्वेव किरतेरात्मनेपदस्योपसङ्ख्यानम्"

—(काशि० वृ० ६।१।१४२ वा०) इति च।

पाणिनीयसम्प्रदाये 'प्रमद-संमद' इति शब्दौ रूढाविति धिया तत्र निपातनं क्रियते इति व्याख्याकाराः समामनन्ति अन्यथा "प्रसमो र्मदो हर्षे", "प्रसम्भ्यां मदो हर्षे" इति वा क्रियेत। कातन्त्रकारैस्तु "मदेः प्रसमोर्हर्षे" (कात० ४।३६१) इति सूत्रं विधाय तयो रूढत्वं नाङ्गीक्रियते। तत्राल्प्रत्ययान्ताविमौ शब्दौ साध्येते।

क्वचिन्निपातनेन क्वचिच्चाऽनुशासनस्य केनचिन्नियमेन ये शब्दाः साध्यन्ते तत्र कारणं वैशिष्ट्यञ्च विद्वद्भिरन्वेषणीयम्।

२. प्रहासः—प्रकृष्टो हासः प्रहासः, परिहासः क्रीडा वा। प्रहासेन व्यवहारस्य मिथ्यात्वं प्रतीयते। यथा—रथेनाहं यास्यामीति बुद्ध्या निर्धार्य कश्चित् पुरुषान्तरं तथैवोदीरयेत्, श्रुत्वा च स पुरुषो रथे विद्यमानेऽपि वक्तुस्तदभावज्ञानमुपपादयन् परिहसति—रथेनाहं यास्यामीति यत्त्वं मन्यसे तन्न सम्भाव्यते, यतो हि त्वयेदमपि न ज्ञायते—तेन रथेन तु पितैव यात इति, तस्मादेव त्वं मुहुर्मुहुर्वदसि—रथेनाहं यास्यामि रथेनाह यास्यामीति। साम्प्रतं रथाभावे गमनं न सम्भाव्यते इति त्वया रथेन गमनस्य विचारो न कार्य इति।

श्यालादिकः कश्चित् सम्बन्धी सत्यपि वस्तुनि वञ्चनार्थं तस्य मिथ्यात्वमुपपादयन्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भगिनीपत्यादिकं परिहसति—ओदनमहं भक्षयिष्यामीति यत्त्वं मन्यसे तत्त्वदीयमज्ञानमेव यतो हि त्वदागमनात् पूर्वमेव सोऽतिथिभिर्भुक्तस्तेन त्वयौदनभक्षणस्य सङ्कल्पः परित्याज्य इति।

मन्ये सत्यव्यवहारस्य विपर्यासेन प्रहास एवावगम्यते यद्वा प्रहासेन वस्तुतत्त्वस्याऽपत्रारणमेव क्रियते इति हेतोर्विधेर्विपर्यासं प्रदर्शयता उत्तमपुरुषस्य स्थाने मध्यमपुरुषः, मध्यमपुरुषस्य च स्थाने उत्तमपुरुषः पाणिनिना विधीयते—'प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च" (अ० १।४।१०६) इति। यथा—एहि मन्ये ओदनं भोक्ष्यसे इति, न हि भोक्ष्यसे, भुक्तः सोऽतिथिभिः। एहि मन्ये रथेन यास्यसि, न हि यास्यसि, यातस्तेन ते पिता इति। वस्तुतत्त्वस्य कथने सूत्रस्य न प्रवृत्तिरिति तत्र 'एहि मन्ये ओदनं भोक्ष्ये' इति प्रयुज्यते। त्वमेहि ओदनं भोक्ष्ये इति यत्त्वं मन्यसे तत् साध्वेवेत्यर्थः। प्रहासेन हासस्य प्रकर्षः परिलक्ष्यते इति कथन्तत्रोच्चारणस्याऽपकर्षद्योतकोऽनुदात्तविधिः संपद्येतेति तन्निषेध. क्रियते—

"एहि मन्ये प्रहासे लृट्" (अ० ८।१।४६) इति।

प्रहासस्तेनैव पुरुषेण कर्तुं युज्यते यो हि वस्तुतत्त्वं वेत्ति, परञ्च यं पुरुषमभिलक्ष्य प्रहासः क्रियते स वस्तुतत्त्वं न वेत्ति। श्रीमद्भगवद्गीतायामपि भगवान् कृष्णोऽर्जुनस्य युद्धप्रतिषेधरूपवचनेन तस्याऽज्ञानमेव द्योतयन् परिहसति, यथोक्तम्—

"तमुवाच हृषीकेशः प्रहसन्निव भारत !
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः" (२।१०)
इति।

३. **प्रीतिः**—तर्पणार्थकात् प्रीञ् धातोर्भावे क्तिन्, तृप्तिरानन्दो हर्षो वाऽर्थः। महर्षिपाणिनिना—"रुच्यर्थानां प्रीयमाणः" (अ० १।४।३३) इति सूत्रे प्रीयमाणशब्दः प्रयुक्तः। प्रीयते काम्यते तर्प्यते वा यः स प्रीयमाणः। यथा मोदकादिभिर्देवदत्तस्तर्प्यते। देवदत्तनिष्ठा या मोदकभक्षणस्य रुचिस्तस्यास्तृप्तिर्मोदकैः क्रियते इति देवदत्तः प्रीयमाणो भवति तस्य सम्प्रदानसञ्ज्ञोक्तसूत्रेण क्रियते। सूत्रोपात्तरुचिशब्देनाऽन्यकर्तृको योऽभिलाषः स एव गृह्यते। यथा—देवदत्ताय रोचते मोदक इत्यत्र योऽभिलाषस्याश्रयः प्रीयमाणो देवदत्तस्ततोऽन्यो विषयरूपो मोदको रुचेः कर्त्ता भवति। यद्यपि यदाश्रयव्यापारं धातुः प्राधान्येनाचष्टे स एव कर्त्ता भवतीति देवदत्त एवात्र कर्त्तेति वक्तुं शक्यते, तथापि कर्तृशब्देनात्र वैवक्षिकं स्वातन्त्र्यं गृह्यते न तु वास्तवम्, तेन माधुर्यातिशयेन देवदत्ताश्रयमभिलाषं जनयन् मोदकोऽत्र कर्त्तेति गीयते। 'लष' धातुप्रयोगे न भवति सम्प्रदानम्। अभिधानशक्तिवैचित्र्याल्लषेराश्रयकर्तृकोऽभिलाषः, रुचेस्तु विषयकर्तृकोऽभिलाष इत्यर्थोऽङ्गीक्रियते, तेन-देवदत्तो मोदकमभिलषतीत्येव प्रयोगो जायते।

यो हि यस्य प्रीयमाणो भवति नूनमेव तस्य सर्वं सम्प्रदातुं शक्यते इति कृत्वा प्रीयमाणस्याऽर्थस्याऽत्र सम्प्रदानसंज्ञा कृतेति प्रतीयते।

४. **आलेखनम्**—आलेखनम्=विकीरणम्

ये ह्यव्यक्तवाचः पशवः पक्षिणश्च ते स्वकीयस्य कस्यचिदभिप्रायस्याऽभिव्यक्तिं मृत्तिकादेरितस्ततो विक्षेपादिना कुर्वन्ति। विक्षेपादिक्रियया तैरात्माभिप्रायस्य प्रकाशनात्तत्रात्मनेपदविधानार्थं वार्त्तिककारो निर्दिशति—"हर्ष–जीविका–कुलायकरणेष्वेव किरतेरात्मनेपदस्योपसङ्ख्यानम्" (का० वृ० ६।१।१४३) इति। अत्र सुड्विधानार्थं पाणिनिनोच्यते—

"अपाच्चतुष्पाच्छकुनिष्वालेखने" (अ० ६।१।१४३) इति। हर्षादिष्वेवार्थेषु सुडपि विधेय इत्येतदर्थं वार्त्तिककारेणोक्तम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"किरतेहर्ष—जीविका—कुलायकरणेषु" (म० भा० ६।१।१४३ वा०) इति। यथा—अपस्किरते वृषभो हृष्टः, अपस्किरते कुक्कुटो भक्ष्यार्थी, अपस्किरत श्वाऽऽश्रयार्थीत्यादि।

मन्ये—आत्मन एव हर्ष-जीविका-कुलाय-करणानामभिव्यक्तयेऽपस्किरणं वृषभादिभिः क्रियते, अत एव तत्रात्मनेपदं क्रियते। यदा च भोजनेन तृप्तः श्वा ओदनपिण्डमन्यत्र विक्षिपति तदाऽऽत्मप्रयोजनाऽभावेन नात्मनेपदं न चापि तदर्थद्योतनायैव विहितः सुडागमो विधीयते, अत एव तत्रापकिरति श्वा ओनदपिण्डमाशित इत्येव प्रयुज्यते।

५. अपह्नवः—अपह्नवोऽपह्नुतिरपलापः। कस्यचित् स्वार्थस्य सिद्धये, स्वीययोग्यताया ज्ञानस्य वा तदभावेपि प्रदर्शनाय वा कश्चित् पुरुषो मिथ्याभाषणं करोति। यथा यो हि पुरुष आत्मनः प्रशंसां वाञ्छति परं न तदनुकूलमाचरति, आचरणाभावे जनास्तस्य प्रशंसां कर्तुं न प्रवर्त्तन्ते, ते प्रशंसन्तुतमां मामिति धियात्मप्रशंसेच्छुकः पुरुषः शतं किं वा सहस्रमपि मिथ्याभाषणं कर्तुं न लज्जते। एतादृशं कार्यं निरङ्कुश एव करोति। तेन मौढ्यादिगुणाना मपह्नवो गोपनं जायते इत्यपि विज्ञायते। यतो हि मिथ्याभाषणमात्मन एवोद्देश्येन क्रियते इति तत्रात्मनेपदविधानं करणीयमेवेत्यनुशास्ति पाणिनिः—

"अपह्नवे ज्ञः" (अ० १।३।४४) इति।

यथा—शतमपजानीते, सहस्रमपजानीते इत्यादि।

६. प्रसहनम्—प्रसहनमभिभवोऽपराजयो वा। यो हि बलवान् पुरुषः स्वप्रतिष्ठां वाञ्छति स नूनमेवाक्रम्य विद्वेषिणं स्ववशमानेतुं प्रयतते। शक्तः स तेन नाऽभिभवं प्राप्नोति, किन्तु स एव बलप्रयोगेण शत्रुमभिभवति, एवं बलवत आत्मविस्तारः प्रभावो वा सञ्जायते। यतो हि तत्कार्यस्य फलं विजयिनैवाऽवाप्यतेऽतस्तत्रात्मनेपदं विधीयते। उक्तञ्च पाणिनिना—

"अधेः प्रसहने" (अ० १।३।३३) इति।

यथा तमधिचक्रे इति। तमभिबभूव, न तेन पराजित इति वाऽर्थः (दु०-का० वृ० १।३।३३) इति।

७. शालीनीकरणम्—शालीनीकरणम्=न्यग्भावनम्। निर्बल एव पुरुषः शालीनो=लज्जाशीलो भवति, अतस्सोऽन्यैः सुतरां वशीकर्तुं शक्यते। बुद्धिकौशलशून्यः स न प्रागल्भ्यं भजतेऽत एव स जड इत्युच्यते, यथाह काशिकाकारः—

"शालाप्रवेशनमर्हतीति शालीनो जडः" (का० वृ० ४।२।२०) इति।

बुद्ध्या शरीरेण वा बलवान् पुरुष आत्मलाभार्थमेव कञ्चित् पदार्थं स्वाधीनीकर्तुमिच्छति, तस्मादात्मोद्देश्येन क्रियमाणायां क्रियायामात्मनेपदमेव युज्यते कर्तुमिति निर्दिशति पाणिनिः—

"लियः संमानन—शालीनीकरणयोश्च" (अ० १।३।६९) इति। यथा श्येनो वर्त्तिकामुल्लापयते इति। श्येनो भक्षणार्थं वर्त्तिकां (बटेर=लवानामकं पक्षिविशेषम्) निहन्ति, निहननक्रियया स्ववशीकरोतीति वाऽर्थः।

एवमष्टाध्याय्यां प्रयुक्तानां केषाञ्चिदिच्छार्थकानां शब्दानां विचार इहोद्देशतः कृतः, एतदतिरिक्ता अपि एकसप्ततिः (अन्तर्द्धि-प्रश्नादयः) शब्दा इच्छार्थकास्तत्र वर्त्तन्ते, सम्भवतः कालान्तरे तत्रापि किञ्चिद् विचारयिष्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुगन्धीनि जीवन–पुष्पाणि

प्रस्तोता—श्रीशङ्करदेवविद्यालङ्कारमहाभागः
अनुवादकः–विद्याभूषणः श्रीगणेशरामशर्मा, डूंगरपुरम्

आसीदं ग्रीष्मर्तु-समयः। अमरीका देशस्य-ओहियो-प्रदेशस्य वर्दी टेलर इति नाम्नः, उद्यान-विद्याविशारदस्य कृषि-क्षेत्रे कश्चन कोऽज्ञातो युवको भृतिकर्मान्वेषणपरः समाययौ। स हि प्रतिवर्षं ग्रीष्मर्तौ वनाद्-इन्धनकाष्ठानि विच्छेद्य तत्संग्रहं चकार। स हि स्वस्वामिनः पशून्निबन्ध तथान्यान्यानि गृहकार्याणि च चक्रे। यदृच्छाप्तं भोजनं बुभुजे, रात्रौ पशुशालायां सुष्वाप।

ग्रीष्मर्तोः समाप्तिर्बभूव। अस्मिन्नेव समयान्तरे तस्य युवकस्य, जिम इत्यभिधानस्य, उद्यानस्वामिनः पुत्र्या सह प्रणयो बभूव। परन्तु उद्यानस्वामी स्तदिदमुक्त्वा स्वपुत्रीं प्रदातुं तं न्यषेधीत्-'तव सविधे धनं नास्ति, तव नामाभिधानमपि पूर्णतः कोऽपि न जानाति, तथा भविष्यं च ते किमप्युज्ज्वलं-शुभोदर्कमिव नो प्रतिभाति'।

स हि नवयुवको जिम इत्याख्यः स्वस्य जीर्ण-शीर्णानि वस्त्रादीनि पोट्टलिकायां निबध्य-उद्यान-स्वामिनः क्षेत्रात्तस्मात्प्रतस्थे।

घटनाया अस्या व्यतीताय। ३५ वर्षाणि बभूवुः। कृषिक्षेत्रस्य तस्य स्वामी टेलरनामा स्वकीयां पुराणीं पशुशालां भूमिसात् कृत्वा तत्र नव्यां पशुशालां निर्मातुमारेभे। पशुशालायास्तस्याः प्राचीनवस्तूनां स्वच्छीकरणसमये टेलरमहाशयः सुन्दरतरामेकां पट्टिकां लेभे। तस्यां पट्टिकायाम् जिमनामा भृत्यः स्वकीयं सम्पूर्णनाम लिखितवानासीत्—'जेम्स अब्राहम गारफील्ड'। अथ यस्मिन् समये टेलरनामोद्यानपालस्तामिमां पट्टिकामाप्तवांस्तस्मिन्नेव समये सोऽयं जेम्स–अब्राहम–गारफील्डमहाशयोऽमरीकादेशस्य राष्ट्रपतिरूपे सुप्रसिद्धः ख्यातिं गतश्च समभूत्।

——

पण्डितमोतीलालनेहरूमहाभागस्य गृहे खल्वेकदा कश्चनैको दीनदीनो ब्राह्मणः समाययौ। स हि प्रोवाच–मया स्वकन्यकाया विवाहसंस्कार-विधिः सम्पादनीयोऽस्ति साम्प्रतम्। साहाय्यमाप्तुं भवन्तं शरणं प्रतिपन्नोऽस्म्यहम्। मोतीलालमहोदयस्तं पप्रच्छ, 'विवाह-संस्कार-विधावत्र कियान् व्ययो भवितुं सम्भव्यते'? ब्राह्मणोऽवादीत्—'शतत्रयरूप्यकमुद्राप्रायः।'

मोतीलालमहाभागः स्वभृत्यमाहूय प्रोक्तवान्—"अद्य यावतीनां रूप्यकमुद्राणां सद्यो लाभो भवेत्, सोऽस्मै ब्राह्मणाय प्रदीयताम्"।

सन्ध्यासमये सद्योलब्धानां रूप्यकमुद्राणां योगे विहिते त्रयोदशशतानि मुद्राणां राशिर्बभूव। ब्राह्मणस्य याञ्चा केवलं शतत्रयमुद्राणामासीत्, ततो भृत्यः स मोतीलालमहोदयं पप्रच्छ—"अण्यहं रूप्यकाणां शतत्रयं ब्राह्मणाय दत्वा शेषं धनराशिमायव्ययलेखनसञ्चिकायां लाभांशकोष्ठके लिखानि"?

मोतीलालमहाभागोऽब्रवीत्, "नैवम्, ब्राह्मणायास्मै त्रयोदशशतरूप्यकाणां समग्रो हि धनराशि र्देदीयताम्। अहमस्मै दिवसस्यैकस्य सद्योलाभं दातुं सङ्कल्पमकरवम्, न तु रूप्यकाणां त्रिशतम्! कन्यायाः सौभाग्यादेव समधिको लाभोऽस्ति सम्पन्नस्ततः कथमिवाहं तमेतं धनराशिं ग्रहीतुमर्हेयम्"!

——

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यवनदेशीयस्य दार्शनिकस्य जेनो-महाशयस्य सविधे-एरिट्रायसनामको नवयुवक एको दर्शनशास्त्रं शिक्षितुमुपायाति स्म। एकदा स्वगृहं समागते एरिट्रायसे, तस्य पिता तं पप्रच्छ—"किमद्य त्वयाधीतम् ?"

एरिट्रायसः प्रशान्तभावमुत्ततार—"पितः ! तदिदं तु भवता कालान्तरे ज्ञायेत"।

पुत्रस्य तदिदमुत्तरमाकर्ण्य तज्जनकोऽतीव क्रोधाध्मातो बभूव। स हि एरिट्रायसं ताडयामास। ताडनानन्तरं एरिट्रायसः शान्त्योदतरत्—"पितृचरणाः! मयाद्य यत्किमप्यधीतम्, तदिदमेवास्ते यदहं भवत्क्रोधं सशांतिकं सहेय"।

——

लोकमान्यो बालगंगाधरतिलकमहाभागो लक्ष्मणपुरेऽधिविष्टायां राष्ट्रियमहासभायां (कांग्रेस) समवेतुमागतोऽभूत्। लक्ष्मणपुरराष्ट्रियसभायाः कार्यक्रमोऽतीव विस्तृतः सुदीर्घश्चासीत्। एकदा मध्याह्नोत्तरं यावल्लोकमान्यमहोदयः कांग्रेससभायाः कार्यकलापेषु व्यस्त-समस्तरतस्थौ। तद्दिने सः क्षणमात्रमप्यवकाशं नो लेभे। महता काठिन्येन स लोकैः कार्यकरैर्भोजनाय समुत्थापितः। भोजनं कुर्वाणं तं किलैकः स्वयं-सेवकोऽब्रूत,—"महाभाग! अद्य तु भवद्भिरत्रभवद्भिः पूजापाठादिकं सन्ध्यावन्दनादिकञ्चाकृत्वैव भोजनं कर्तव्यमापतितम्"!

लोकमान्यो धीरेण गम्भीरेण च भावेनोवाच—"अधुनापर्यन्तं वयं यत्किमपि कुर्वाणा आस्म, तत्किं पूजा नाभूत्? किं शंखघण्टाध्वननं, किं वा चन्दनघर्षणादिकं वमैव पूजा भवति? अप्यस्मिञ्जगति देश-सेवातो गुरुतरास्ति कापि पूजा नाम ?"

——

अमरीकादेशस्य राष्ट्रपतिर्जार्जवाशिंगटन-महाशयः स्वकार्येषु सर्वेष्वपि च कार्यकलापेषु समयानुवर्तनं प्रतिबद्धतायाः सविशेषमवधानं ररक्ष। यथासमयं यथानियमं च कार्येऽसम्पन्ने तत्स्वभावो विकृतिं भजते स्म। तस्यासौ नित्यनियमोऽभूद्यत् सः सायङ्कालीनं भोजनमपराह्णोत्तरं चतुर्वादनवेलायां कुरुते स्म। एकदा सः कांग्रेससभायाः काश्चन नवीनान् सदस्यान् स्वभोजे-आमन्त्रयामास। संयोगत आमन्त्रितसदस्यानामागमने विलम्बो बभूव। सर्वेऽपि च साश्चर्यमिदं ददृशुर्यद्धि राष्ट्रपतिमहोदय एकल एव हि भुञ्जानो वर्तत इति। आगन्तुकान् सदस्यान् वाशिंगटनमहोदयोऽब्रूत—"मम पाचको नेदं वीक्षते यदतिथयोऽभ्यागता नवेति। स तु केवलमिदमेवावेक्षते यद्भोजनसमयो जातोऽस्ति न वेति।"

——

विश्व-विजयस्य महत्त्वाकांक्षां दधानः सम्राट् सिकन्दरो महान् एकदा तथाविधं नगरमाचक्राम, यत्र शस्त्र-विहीनाः स्त्रियो विना नान्यः कोऽपि च पुरुषो बभूव। यवनसम्राट् चिन्तापरो बभूव यद्धि निःशस्त्राभिराभिः स्त्रीभिर्वत कथमिव योद्धव्यमिति। चिन्तयानस्यैव तस्य भोजनसमयो बभूव। सोऽतीव क्षुधातुरोऽभूत्। स उवाच,—"क्षुद् बाधते माम् भोजनं किमपि दीयताम्!"

काश्चन महिला वस्त्राच्छादिताः काश्चन स्थालीस्तत्पुरतो निदधिरे। सम्राट् सिकन्दरो महान् स्थालीभ्यो वस्त्राच्छादनमपाचकार तदा स ददर्श सुवर्णम्, सुवर्णमेव केवलम्!

क्षुधातुरः सम्राट् कथयामास, "तदिदं सुवर्णं ननु कथं नाम भक्षितुं शक्येत ?"

एका महिला प्रत्युत्तरं ददौ—"यदि च सुवर्णं भक्षणीयं नाभविष्यत्, केवलं रोटिका एव भक्ष्या अभविष्यन्, तदा भवद्देशे किं रोटिका नासन् यद्भवानन्येषां रोटिकापहरणाय निर्ययौ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततः शीघ्रमेव हि सम्राट् सिकन्दरस्ततो निवर्तयामास। स खलु नगरद्वारे शिलालेखमेकं चालेखयत्—"अज्ञाय सिकन्दरायास्य नगरस्यैका महिलातीवोत्तमं बोधपाठं समशिक्षयत्।"

——

बृटिशसम्राड् जॉर्ज पञ्चमस्य राज्याभिषेकावसरे गोपालकृष्णगोखलेमहाभागोऽपि च ब्रिटिशसर्वकारस्यातिथिरूपे निमन्त्रितो बभूव। ब्रिटिशसाम्राज्यस्य विविधसेनानां समूहा राजमार्गे गच्छन्तोऽभूवन्। गोखलेमहोदयो बृटिशप्रधानमन्त्रिणः समीप एव तिष्ठन् सर्वं तद्दृश्यं निरीक्षमाणोऽभूत्। किंचित्समयानन्तरं सिक्खसैनिकानां दलं तेन मार्गेण ययौ। प्रभावशालिनोऽनुशासनबद्धांस्तांस्तरुणान् यूनः सैनिकान् दर्शं दर्शं सर्वतो हर्षनादो भवितुमारेभे। परन्तु गोखलेमहाभागः प्रशान्तभावेन सन्तस्थे। स करतलध्वनिं नो चक्रे, तथा हर्षनादमपि नो विदधे। तदिदं विलोक्य ब्रिटेनसाम्राज्यस्य प्रधानमन्त्री तं पप्रच्छ—"किमर्थं भवान् स्वदेशवासिनां वीराणाम् युवकसैनिकानामभिवादनं न कृतवान्?" गोखलेमहोदयः सव्यङ्ग्यमुत्तरं प्रायच्छत्—"तानिमान् वीरान् सिक्खयुवकान् सैनिकान् दासत्वे निपातयतां सैनिकानां स्वदेशवासिनामपि कृते मया हर्षनादाः सुरक्षिताः सन्ति।

——

इटलीदेशस्य सुप्रसिद्धस्य फ्लोरेंसनगरस्य बाह्यप्रदेशे हरिततृणराजिसंकुले शाद्वले, प्रस्तरस्यैकस्य समीपं तिष्ठन्नेकः किलेटालीदेशाभिजनो युवा किमपीत्थं ब्रुवाणोऽभूत्—"पाषाणेऽस्मिन् मया खल्वेको देवदूतो दृश्यते। प्रभोः कृपया स्वपुरुषार्थेन चाहं तमेतं देवदूतं प्रस्तरादस्मान्मोचयिष्यामि।"

गृहं गत्वा स तं प्रस्तरमानयामास। युवकः स्वटङ्कणं, हस्तमुद्गरं चोत्थापयामास, तथा च रात्रिन्दिवमुद्यमं कृत्वा स तस्मात् प्रस्तरादेकां प्रतिमां निर्ममे। सैषा प्रतिमाद्यत्वे समस्ते संसारे डेविडमूर्तिः (देवदूतस्य मूर्तिः) इति नाम्ना विख्यातास्ते—मानवदेहस्यापूर्वच्छटाशालिनी, सुसङ्घटिता, मनोरमा च मूर्तिः। सोऽयं नवयुवको माइकेल एञ्जिलो इत्यभिधानेन शिल्पकारो महान्-इत्याख्यया सर्वैरज्ञायत। देवदूतस्यैषा मूर्तिर्विश्वस्य सुन्दरतमासु मूर्तिष्वेका परिगण्यते।

——

ब्रिटेनदेशस्य साम्यवादी नेता स्वर्गीयो हैरीपोलिट इति नामा खल्वेकदा स्वपुस्तकस्य मुद्रणार्थं धनस्यावश्यकतामन्वभूत्। स हि नाट्यकारं बर्नार्डशाहमहाभागं प्रत्यार्थिकीं सहायतां कर्तुं पत्रं लिलेख। पत्रोत्तरे साहित्यिको महान् बर्नार्डशाहमहोदयस्तदिदं लिखितवान्—

"प्रियसुहृद, त्वदीयानां मूर्खतापूर्णानां विचाराणां प्रजासु प्रापणाय नाहं ते सहयोगं दातुमुत्सहे। परन्त्वात्मनो विगते जन्मदिवसोत्सवावसरेऽहं ते सत्कारद्रव्यप्रेषणं व्यस्माषम्, ततोऽनेन पत्रेण सार्द्धं पञ्चपौण्डमुद्राणां धनदेयं पत्रं (चैक) प्रहिणोमि'"।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

* पद्य-पद्याञ्जलिः *

श्रीशशिधरशर्मा, वाचस्पतिः, एम्.ए., प्राध्यापकः पञ्जाबविश्वविद्यालयः होश्यारपुरम्, पं०

जगति विबोधं जनयन् घनविपदं प्रतिपदं दलयन् ।
विहरतु चित्रगवीको गिरिधरतरणिर्मनोनभसि ॥१॥

कुन्देन्दुगौरवर्णं लोके महसां महीयसां शरणम् ।
कमलाभं मृदुलचरणं गिरिधरचरणं समाश्रये शरणम् ॥२॥

साङ्गोपाङ्गरहस्याः लोकोद्धारोल्लसत्करुणाः ।
तनुमेकामुपपन्नाः विरेजिरे ननु चतुर्वेदाः ॥३॥

प्रोद्भूतसरिल्लेखो गुणमणिखनिधृक् सुसाङ्गसुषमाढ्यः ।
अचलेन्द्रोऽच्यो हिमभाः यस्माद्रत्नाकरो जातः ॥४॥

मधुसूदनवक्त्राब्जाज्जयति परं जाह्नवी जाता ।
जयतितरां च तदार्द्रः कोऽप्यनिलो येन काश्यपी पूता ॥५॥

वाचस्पतिगिरिधरो विबुधेन्द्रः कालिका-कान्तः ।
सारस्वतो विभूमा वैराज्यमिवाश्रितः प्रबभौ ॥६॥

आस्तिकनास्तिकनव्यप्राच्याऽखिलमतिविरोधविधुरेऽपि ।
नाम्न्येवाऽऽस्त विरोधो गिरिमधुधारामयस्य तव ॥७॥

गिरि धरति सर्वसारं निगमागमगं, गिरिञ्च यो धरति ।
धर्मं प्रत्नगरिष्ठ, गिरिधर इति वाऽञ्जसा प्रथितः ॥८॥

सम्मेलनजनकाय द्वितीयजनकाय जनकहृदयाय ।
प्रणतिशतं देशिकवर तवाऽर्प्यतेऽजरः यशःकाय ॥९॥

न पुनर्विभोऽतिकरुणा घूर्णन्नयनप्रसादपरिकीर्णा ।
"शशिधर" इत्यधराऽमृतसरणा वाणी मयाऽऽगोर्णा ॥१०॥

सत्कञ्जपुञ्जकानां मार्दवमञ्जिमविनयदस्यौ ।
सकृदपि न येन वाऽऽप्तौ चाऽऽप्तौ चरणौ पुनः स्प्रष्टुम् ॥११॥

संस्कृत-संस्कृत्योः परिषेवैवाऽऽसीत्तवाऽति येनेष्टा ।
कथमपि सैव धृताऽस्तु प्रसादनी चिन्मयस्य तव ॥१२॥

सारस्वतवर्यायोपहृतः सद्भक्तिभावितेन हृदा ।
सारस्वतोऽञ्जलिस्त्वां दीपो रविमिव विमोदयतु ॥१३॥

उद्धृतधर्मपद्मा कण्टककीलस्य बोधलीलस्य ।
पाद्यतया पद-पद्मे पद्याञ्जलिरयमुरीकार्यः ॥१४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विचित्राः समाचाराः

संग्रहीता—विद्याभूषणः श्रीगणेशरामशर्मा, डूंगरपुरम्

१—पशुभ्यः शिक्षा

हेम्बर्गस्थानस्थ न्यायालय एकं २६ वर्षीयं रीमरमहाशयं तथा च तत्पत्नीम्-एलसा-नाम्नीं सप्ताहमेकं यावत्तत्रत्यायाः पक्षिशालायाः पञ्जरे स्थापयितुमादिदेश। सोऽयमादेशोऽस्माद्धेतोः प्रादीयत यतस्तावेतौ द्वावपि तत्र पशु-पक्षिणां दम्पती-युगलानि शान्तिपूर्वकं निवसन्ति पश्येताम् तथा च शिक्षां गृह्णीयाताम्। आरक्षिविभागस्तौ दम्पती किलापराधाभियोगमारोप्य न्यायालयमुपास्थापयत्—तौ परस्परं कलहेन साकमेव हस्ताहस्ति दण्डादण्डि च मिथोऽनाडयतामित्यारोपोऽभूत्।

२—पंचविंशतिवर्षात्मकं वयः

गतदिनेषु देहल्याः प्रमुखेषु समाचारपत्रेषु विज्ञापनमेकं द्वयोष्टङ्कणकर्मकर्त्रोर्नियुक्ति-सम्बद्धम् प्राकाश्यं जगाम। अस्य विज्ञापनस्यानुसारमावेदनकर्तारः स्नातका भवेयुः। यदि च ते स्नातका न स्युस्तदा कस्यचित् सर्वकारीयस्य किं वा सर्वकारेतरस्य च कार्यालयस्य कार्यसम्पादनस्य न्यूनान्न्यूनं टङ्कणकर्मविषयको दशवर्षात्मकोऽनुभवोऽस्यमेव भवितुमर्हति। तथा च वयोमानं १८ वर्षतः २५ वर्षाभ्यन्तरगतं स्यादित्यावश्यकम्।

३—द्यूतं पत्नी च

मनीलास्थानस्य ४८ वर्षीयः—टबीजेराआ—नामको व्यापारी द्यूते दीव्यन् स्वकीयायाः स्थावर-जंगम-सम्पत्तेरपगमानन्तरं स्वपत्नीमपि चाक्षैर्दीव्यन्-अपहापयामास। एतच्छ्रुत्वा तस्य पत्नी स्वयमेव हि तस्य विजेतुः समीपं जगाम। लोकास्तां प्राबोधयन् यत्तस्याः पतिस्तां द्यूतकर्मण्यपहातुं न कमप्यधिकारं ररक्ष, ततः सा आरक्षिविभागस्य साहाय्यमादातुमर्हतीति।

परन्तु सा तदेतदुक्त्वा न्यषेधीद् यद्धि यो हि पुरुषो मामुपकरणवस्तुमात्रमवधार्य द्यूतकर्मणि दीव्यति, तेन सहाहमधुना स्वयमुषितुं नेच्छामीति।

४—कर्ण-मर्यादा

सेयं संकथा १९३८ ई० वर्षे समघटत। चिलीदेशस्य सेन्टिआगो-स्थानस्य-एलस-महाशयस्य विवाह-समये तस्य श्वश्रूस्तस्य लम्बकर्णत्वमुपजहास—कामपि चाशोभनां टिप्पणीं कृतवती। स हि तत्कालमेव प्रतिजज्ञे यत् स जीवनपर्यन्तं न कदापि च स्वश्वश्रूं सम्भाषिष्यत इति तथा च सः स्वकर्ण-मर्यादां ररक्षापि।

परन्तु भाग्यलिपिं को नु बत वितथां विदधीत। एकदा धूम्रपानप्रसङ्गे तद्गृहेऽग्निः प्रजज्वाल। भाग्यविप्लवात्तदानीम् तस्य श्वश्रूं विहाय नान्यः कोऽपि जनोऽन्यो गृहेऽवर्तत। अस्तंगतया ३० वर्षानन्तरं स साहाय्यार्थं श्वश्रूमेव सम्बोधयामास। श्वश्रूश्चापि तस्मान्न्यूनतरानाभूत्। साऽग्निप्रशमनार्थं सर्वथा निषेधं कृतवती। फलतः स एलसमहाशयोऽग्निनाऽदह्यत। पश्चात् सः श्वश्र्वां दुष्टताया आरोपं कृत्वाभियोगमुपास्थापयत् परन्तु न्यायालयस्तदभियोप्रार्थनापत्रं व्यर्थमाघोष्य मोघं चक्रे।

५—कस्य सीमा ?

लिस्बननगरे रात्रावेकदा धनिकस्यैकस्य गृहे हस्ताहस्ति दण्डादण्डि च ताडनकलहोद्घोषः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समभूत् । परमसौ क्लेशोपद्रवो न हि तत्रत्य-निवासिषु वरञ्च द्वयोश्चौरयोर्मिथो बभूव। घटना खल्वेवमघटत यदेकश्चोरस्तत्र तद्गृहं प्रविश्य धनकोषमञ्जूषां त्रोटयन्नासीत्। तावदेव तत्र कश्चनान्यश्चौरः प्राप्तः। द्वितीयश्चौरोऽयं प्रथमं चौरं प्राबोधयद्यदसौ तस्य प्रान्तो नास्ते, ततः सः स्वप्रान्तसीमाभ्यन्तरमेव गत्वा चौर्यकार्यं करोत्विति परन्तु प्रथमश्चौरस्तदिदं नो स्वीचकार। अतस्तयोर्द्वयोर्मिथो विवादो बभूव, मारणताडनप्रसंगो व्यजृम्भत। न केवलमेतावदेव वरञ्च छुरिकाग्राहं मिथः प्राहरताम्। अस्मिन् हि कोलाहले गृहजना जागरिताः। परिणामतस्तौ द्वावपि चौरौ क्षत-विक्षतावस्थायामेव-आरक्षिविभागाय समर्पितौ।

६–मार्जार्याः श्राद्धतर्पणम्

झांसीनगरस्यैकः शिल्पकारः स्वकीयायाः पालितायाः मार्जार्याः मरणानन्तरं त्रयोदशदिनावसरे २५० जनेभ्योऽप्यधिकेभ्यो भोजनमकारयत्। भोजनादनन्तरं तावेतौ शिल्पकार-दम्पती मार्जारास्थ्नां यात्रामायोजयाताम् तथा च तान्यस्थीनि विसृष्टुं प्रयागमनयताम्। परिवारोऽयं स्वमार्जार्याः शोकनिमित्तमनेकानि दिनानि यावदुपवासव्रतमपि चकार।

७–सम्भारा अत्र, धनं च तत्र

इटालीदेशस्य क्रीमानगराभिजनः सिसारे पियासेंटिनीति नामा व्यापारी खल्वतीव प्रसन्नोऽदृश्यत यदा स ग्राहकायैकस्मै जीर्णानि पुरातनानि च वासांसि चतुर्गुणेन मूल्येन व्यक्रीणात्। परं यदेव तस्य दृष्टिश्चेकसंज्ञके धनदेयपत्रेऽङ्कितेषु शब्देषु न्यपतत्तदास्य प्रसन्नता तिरोदधे। चैकपत्रे धनराशेरङ्काधो लिखितमासीत्–यदा चन्द्रमसि बैङ्क संज्ञको धनकोष उद्घाटितो भवेत्तदा तत्र गत्वा पत्रमिदमुपस्थाप्य धनराशिर्ग्रहीतव्य इति।

८–सर्वकारीया हिन्दीभाषा

भारतसर्वकारस्य केषुचित् कार्यालयेषु प्रवेशाय गृहमन्त्रालयादनुमति-पत्रं ग्रहीतव्यं भवति। अस्मिल्लघ्वाकारे पत्रेऽनुवादस्यानेकाभिस्त्रुटिभिः साकं दशाधिका अन्याश्चापि त्रुटयो विद्यन्ते। यथा षीधा (सीधा), संतसो (संतरी), चो (को), कार्या (कार्य), अधिकायी (अधिकारी), निम्न (निम्न), पदसंशज्ञा (पद) इत्यादयः।

९–सत्यपि विज्ञापने वयं जीवामः !

इगलैंडदेशस्य हर्टफोर्ड नामकस्य स्थानस्य धार्मिकी संस्थैका विज्ञापनमेकं मुद्रापयामास 'विश्वमिदं ११ दिसम्बर, ६८ बुधवारदिने मध्याह्ने १२ वादनसमये प्रलयमुपयास्यति। अतो भवत्कृते मोक्षस्यैकमात्रं मार्गोऽयमास्ते यद्भवन्तोऽस्मत्सविधेऽत्रागत्य प्रार्थनायाम् सम्मिलिता भवन्तु

१०–छिक्का...छिक्का...छिक्का...

मुरेस्थानस्यैकं १३ वर्षीयं बालकं जेम्ससिम्पर इत्याख्यं २६ नवम्बर ६८ दिने प्रातःकालादेको विचित्रो हि रोगो बबाधे। स तत आरभ्य छिक्कामनुछिक्कामाचरन् वर्तते। इदानीं यावच्छिक्कानामेतासां संख्या २७ सहस्रत्तोऽप्यधिका बभूव। चिकित्सका डाक्तराः कथयन्ति यदसौ रोगस्तेषामनुभवे सर्वथा नवीनोऽस्तीति।

११–उपकारार्थमपकारः

देहल्या गोपालसिंहमहाशयोऽधुना स्वजीवनेऽपीव चिन्तयित्वा बुद्धिमत्तयोपकारमाचरिष्यति। यतः स एकस्योपकारस्य प्रतिफलं त्वधुनैवाप्तवान्। स सकदा 'किलैकम् विपद्ग्रस्तं जनं स्ववायुशकलयानस्य पृष्ठभागमारोपयत्। स च विपद्ग्रस्तो जन एकस्मिन् रेल-सम्पातस्थले वायुशकलमुत्थाप्य परं पारं निन्ये, परन्तु तत्र गत्वा स नो तस्थौ वरञ्च तदेव वायुशकलमारुह्य सद्यः पलायनं चक्रे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१२–एकोऽन्यो विनिमयः

लेबनानस्य समाचारपत्रेषु विगतेषु दिनेष्वेकं विज्ञापनं मुद्रितं प्रचकाशे 'आवश्यकतास्ते तादृशस्यैकस्य जनस्य यो हि ४० वर्षवयस्कां स्वकीयां स्वस्थां सुन्दरीं च पत्नीं विज्ञापनदात्रेऽस्मै समर्पणाय सम्बन्ध-विच्छेदविधिना त्यजेत्। तत्परिवर्ते तस्य विवाहोऽस्य विज्ञापनदातुर्विंशद्वाविंशवर्षीययोः कयाप्येकया पुत्र्या साकं विधास्यते…… ……।'

१३–जीवितादप्यधिकं मूल्यवत्तरम्

नार्वेदेशस्यैको जलपोताजीव एवनसननामाऽकस्मात् स्वजलपोतादतलान्तकसमुद्राम्भसि निपपात। तं रक्षितुं समुद्रे रज्जुः प्राक्षिप्यत। परन्तु स तस्य रज्जोरवलम्बनमकृत्वा स्वकीयाद्वस्त्रस्यूताद् ह्विस्वीसुरायाः काचपात्रं निष्कास्य तेन रज्वा निबबन्ध तथा चीत्काराक्रोशपूर्वकमुवाच–"अहन्त्वन्ततः कथमपि रक्षितः स्यामेव, परमादावेतत् सुरापात्रं रक्ष्यताम्।"

१४--एकं सुखदमाश्चर्यम्

इदानीमेव सेनफ्रांसिस्कोनगरस्यैकस्य विश्रान्तिगृहस्य परिचारिकैका स्वजीवनस्यैकमतीवाद्भुतमाश्चर्यमपश्यत्। घटनेत्थमभवत् प्रायेण चतुर्वर्षेभ्यः पूर्वं तस्याः परिचारिकाया विश्रान्तिगृहे कश्चन जन आगच्छद्भोजनं चाभुङ्क्त। भोजनानन्तरं स तामिमां परिचारिकमवदद्यत्तस्य सविधे कपर्दिकाप्रायमपि धनं नास्ते, ततः सा कथमपि धनदानात्तं त्रायेतेति। परिचारिका सा तस्य भोजनस्य डालरद्वयमितम् मूल्यधनं स्वयमेव ददौ। अधुना पत्रालयद्वारा तस्याः परिचारिकायाः सकाशे २०० डालरमुद्रामितं धनदेयपत्रं (चैक) प्राप्तमास्ते। स एव ग्राहकस्तदेतद्धनं सधन्यवादं प्रेषितवान्।

१५--कियन्मूल्यं शरीरम्

लन्दननगरस्योच्चन्यायालयस्यैको न्यायाधीश एकस्या आंग्लमहिलाया आनुपातिकम् मूल्यं ५,९९५ पोण्डमितं (१,१७,९१० रूप्यकाणि) निर्णीतवान्। स हि न्यायाधीशस्तदिदमेतावन्मूल्यमेकेन नागरिक-चिकित्सालयेन तस्मै जनाय प्रादापयद्यस्य पत्नी त्रुटिपूर्णाद्रक्तदानात्तस्मिंश्चिकित्सालये ममार।

गिरने से पहले उनकी रक्षा करें

बालों और दाँतों की नियमित देखभाल और उनका पोषण आवश्यक है। क्यों न फिर उनके गिरने से पहले उनकी रक्षा की जाय ! इसके लिए उदयपुर का गाय छाप ब्राह्मी आँवला तैल और काला दन्त-मन्जन सर्वोत्तम है। इन आयुर्वेदिक उत्पादनों से आपके बाल घने तथा लम्बे और आपके दाँत [illegible] मजबूत रहेंगे।

इलाज से बचाव बेहतर है !

[illegible]

गाय छाप

UDAIPUR

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इस सेवा की मदद लेकर आप सिक्के, हीरे-मोती, जवाहरात इत्यादि जैसा कीमती सामान हवाई या साधारण डाक से देश के बाहर भेज सकते हैं। 'बीमाकृत बक्स' नीचे लिखी शर्तों के अनुसार होना चाहिए। लेकिन, ऐसी वस्तुओं को देश के बाहर भेजने से पहले रिजर्व बैंक की अनुमति लेना जरूरी है।

निर्यातक ध्यान दें !

आप अपना कीमती सामान

सुरक्षित रूप में

'बीमाकृत बक्स सेवा' के जरिए भेजें !

वजन	आकार	संलग्न पत्र
बक्स कम से कम ८ मिलीमीटर की मोटाई में लकड़ी या धातु का बना हो और उसका वजन १ किलोग्राम से ज्यादा न हो।	लम्बाई ३० से० मी० तक चौड़ाई २० ,, ,, ,, ऊँचाई १० ,, ,, ,,	सामान के चालान का खुला विवरण और पता।

दस्तावेज	ऐसा न करें	शुल्क
चुंगी का घोषणा-पत्र और निर्यात से सम्बन्धित अन्य पत्र।	बक्स में निम्नलिखित वस्तुयें न रखें :— (अ) बैंक नोट, नकदी नोट या हुण्डी, जिसमें बियरर चेक शामिल है; (ब) ऐसे दस्तावेज जो व्यक्तिगत पत्र-व्यवहार से सम्बन्धित हों और अभी-अभी लिखे गए हों।	२५० ग्राम तक ३ रुपये। इसके बाद, हर अगले ५० ग्राम के लिये ६० पैसे। रजिस्ट्रेशन शुल्क ७५ पैसे। प्रति ५०० रुपये पर बीमा शुल्क १.२५ रुपये। हवाई डाक से भेजने के लिए एयर सरचार्ज पहले से ही देना पड़ेगा। इस सरचार्ज की दर वही होगी जो किसी समान वजन के और उसी जगह भेजे जाने वाले हवाई-पत्र के लिए देनी होती है।



भारतीय डाक व तार

davp 69/91

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं साधवः किञ्चिद् राष्ट्रस्य सेवां कर्तुं शक्नुवन्ति ?

भारत-साधु-समाजाध्यक्षाणां **स्वामि-श्रीमदखण्डानन्दसरस्वती महाराजानां**
हरिद्वारस्थ-सुभाषघाटस्थले भारतसाधुसमाजस्य मञ्चतः

* अभिभाषणम् *



अद्य जनता राजनीतिकदलबन्धेनास्ति संत्रस्ता। जातिसंप्रदाय-भाषा-प्रान्तानां तथैतेभ्यः सर्वेभ्योपि दलबन्धस्य वर्तते सुमहान् पङ्कः। जनानां सौमनस्यं सङ्घटनं समागमश्च संघर्षो निगिरन् वर्तते। कः कथात्मनः स्वार्थसिद्धेः साधनं सम्पादयिष्यतीति न परिज्ञातुं शक्यते। विश्वासस्य तथा वञ्चनायाश्च प्रभावः प्रतिदिनं पूर्वापेक्षया दूषितोऽस्ति जायमानः। जनता च राजनीतिनेतुर्बिभेति, तथा राजनीत्याश्च भीता वर्तते।

गतजनवरीमासेऽहं जबलपुरं गत आसम्। तत्र च पञ्चदशदिनानि न्यवसम्। प्रतिदिनञ्च १५-२० सहस्रं जनाः समायान्ति स्म, शोभायात्रायाञ्च लक्षाधिकाः सम्मिलिता भवन्ति स्म। मया पृष्टं-जनानामितावती प्रवृत्तिः किमर्थमस्ति ? जनैरुक्तम्—अत्र शान्तिर्लभ्यते। राजनीतिकसभासु च रागद्वेषयोः सङ्घर्षस्य विघटनस्य तथा वैमनस्यस्य च प्रेरणा मिलति, न कोऽपि बुद्धं वाऽऽत्मानमुद्विग्नं विधातुं कामयते।

अद्य विश्वस्यापि स्थितिर्विद्यते विलक्षणा। सम्प्रदायास्तथा मतानि (मजहब) विभिन्नानि मिथः कलहायन्ते। एवं धर्मस्य मर्मभेदनं जायते। भाषाः सङ्घट्टनं भजन्ते। ज्ञानस्यानादरो भवति। प्रान्तवासिनश्च मिथोऽपहृतिमाचरन्ति, राष्ट्रं च छिन्नं भिन्नं भवति। दलानि विजयमाप्नुवन्ति, जनताश्च पराजयम्। परि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थितिश्च गम्भीरास्ति। अतो धैर्येण सह विचारः कर्त्तव्यो भविष्यति। इदानीं संकीर्ण-दृष्ट्या जीवनयापनस्य नास्ति समयः। सञ्चार-साधनानां वृद्धया समृद्धया चायं समग्रोऽपि संसार एकं गृहमिव तथैकः परिवार इव चातिनिकटे समयातोऽस्ति। महाद्वीपानां दूरता च समाप्ति गता। विज्ञानस्य चमत्कारश्च क्षणे-क्षणे प्रति-कणं परिवर्त्य दर्शयितुमीष्टे। इदानीं सर्वतो नेत्रे निमील्य गृहाङ्गण एव नैव स्थातुं शक्यते।

प्रायः सम्पूर्णमिदं जगद् दलद्वयेऽस्ति विभक्तम्। एकतः साम्यवादः सम्पूर्णस्यापि विश्वस्य जनतां स्वपक्षे सङ्घटयितुं प्रयतमानो वर्तते, तर्ह्यन्यतश्च धनिकवर्गः स्वमुष्टिकां दृढां कर्तुं प्रवृत्तो वर्तते। साम्यवादिनश्च ईश्वरं तथा धर्मञ्च न स्वीकुर्वन्ति ते धर्मं विषं मन्यन्ते, केवलं श्रमस्यार्थस्य चाधारे जनतामेकस्मिन् मञ्चे समानेतुं वाञ्छन्ति, दर्शन-धर्म-संस्कृतीनामा-मूलचूलं विनाशं कर्तुं कामयन्ते। अन्यतश्च धनिकवर्गो धनस्य भोगस्य च वासनया समाक्रान्तो वर्तते। यत्किमपि तस्य मुष्टिकायां वर्तते, तन्न दीनेभ्यो दातुमिच्छति, तेषां कृते सामान्य-जीवन-यापनस्य व्यवस्थामपि कर्तुं नेच्छति, केवलं वासनापूर्तेः संग्रहस्य चाभिमानस्य कृत एव महत्त्वं प्रयच्छति। तत्पक्षतश्च कतिपय-मतावलम्बिनोऽपि धनस्य सहायतां लभन्ते, तैश्च छलबलादिभिर्विविधैरनेकैरुपायैः एक-स्मिन् मतविशेषे निर्धना आकृष्यमाणाः सन्ति। दरिद्राणां कृते विद्यालयानां चिकित्सालयानाञ्च निर्माणं भवेत्। तेषां निवासादिकस्य स्तरः समुन्नतः स्यात्। ते च सौविध्येषु सुखसमृद्धयोः सर्वासु समुन्नतिषु च तुल्यमधिकारं प्राप्नुयुः—नैतत् कः सहृदयो वाञ्छिष्यति, परं तेषां दारिद्रयस्य दुरुपयोगं विधाय तेषां विश्वासस्य संस्काराणां तथा परम्पराणाञ्च विनाशकरणं कियदुचितमस्ति ? अत्र विचारः कर्तव्यः।

एवं हिन्दुसमासे द्विगुणितस्य संकटस्य भीषणा जलदावलिः समाच्छना वर्तते। एकतोऽनीश्वरवादिनो नास्तिका अधर्मिणो हिन्दुसमाजस्य विनाशं कर्तुं वाञ्छन्ति, अपरतश्च विभिन्नमतावलम्बिनो वैदेशिकाश्च। हिन्दुसमाजस्य समुच्छेदार्थं द्विगुणं षड्यन्त्रं प्रचलद्वर्तते।

एका तृतीया वार्ताप्यस्ति विचारणीया यद्ये लोका विदेशयात्रां कृत्वा समागच्छन्ति, ततस्ते भोग-विलासयोर्वासनया सम्मोहिता भूत्वा प्रत्यावर्तन्ते, ते च वदन्ति कुर्वन्ति च यद् भोगविलासावेव तर्वेत सर्वस्वं, धर्म-दर्शने तु सारहीने स्तः। एतेषामेकैका क्रिया हीनभावना-मभिव्यनक्ति। ते हि भारतीयां संस्कृतिं जनताञ्च हीनां मन्यन्ते, क्षणे-क्षणे च भारतीयतां निन्दन्ति। हिन्दुस्थानीयः समयः (हिन्दुस्तानी टाइम) हिन्दुस्थानीयो जनश्च नास्ति तथ्यः। एतादृशा जना जनतायाश्चित्तं दूषयन्ति। आत्मानं यो जनो हीनं मन्यते, स स्वस्य हीनतयाभिभूतो जायते तथात्मन उत्साहादर्शाभ्याञ्च-च्युतो भवति। ये सन्ति प्राप्ताधिकारास्ते स्वासन्दिकासु सुस्थिरं सन्त्युपविष्टाः। तेषां राष्ट्रस्योन्नत्या जनतायाः प्रगत्याश्च नास्ति कोऽपि सम्बन्धः। ते च धर्ममीश्वरं संस्कृतिञ्च हेयतया बुद्ध्यन्ते। नास्ति तेषां कश्चन सिद्धान्तः। ते च वैयक्तिकस्याथवा दलसम्बन्धिनश्च स्वार्थेनान्धा भूत्वा राष्ट्रहिताद्विमुखाः संवृत्ताः सन्ति। तेषामवलोकनेन प्रतीतं भवति यद् राष्ट्रस्य भविष्यदन्धकार-मयं वर्तत इति।

वयं कस्यापि दलविशेषस्य न स्मः, निष्पक्षाः स्मः। नापि वयं साम्यवादिनो नैव च धनिकवर्गमतवादिनः। कस्यापि स्वार्थे नास्माकं स्वार्थोऽस्ति निहितः। ब्राह्मे मुहूर्ते समुत्थाय विशुद्धेन हृदयेन परमात्मनो ध्यानं कुर्मो विचारयामश्च यदस्माकं राष्ट्रमिदं कां दिशं प्रतिगच्छद् वर्तते। अस्माकं संस्कृतेश्च भविष्यद्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कीदृशं विद्यते ? नैतद् वक्तव्यं भविष्यति यदा-त्मनो राष्ट्रस्य गति-मति-रतिषु विचार्य वयं दुःखिताः स्मः । सम्पूर्णस्य विश्वस्य कृते आध्या-त्मिकशिक्षायाश्चारित्र्यशिक्षायाश्च दाता धर्म-प्राणः पूतश्चायं भारतदेशोऽद्य कस्यां-कस्यां संकटापन्नायां दशायां निपतितोऽस्ति । एष हि स्वमार्गात् परिभ्रष्टोऽस्ति । इदानीमस्य कृतेऽतो-तत्कालापेक्षया मार्गदर्शकस्य महती वर्ततेऽपेक्षा ।

भवन्तो जानन्ति यद् हिन्दुसमाजस्य धार्मिकी दृष्टिर्महत्युदाराऽस्थात् । अहं दृढतया वक्तुं शक्नोमि यत्स्व-स्वोदारतायाः प्रबलाः समर्थका जनाः शीतलेन हृदयेन श्लोकस्यास्यार्थं विचार-येयुः–एतत्तुल्यमन्यद्वचो नान्यत्र कुत्रापि वर्तते—

यं पृथग्धर्मचरणाः पृथग्धर्मफलैषिणः ।
पृथग्धर्मैः समर्चन्ति तस्मै धर्मात्मने नमः ॥

सर्वे स्वधर्माचरणे सन्ति स्वतन्त्राः । सर्वे स्वधर्मस्य फलमाप्तुं स्वतन्त्राः सन्ति । सर्वे-ऽप्यात्मनः पृथक् पृथक् धर्मेण एकमेवेश्वरमारा-धयन्ति । स्वस्वकर्तव्येषु कर्मसु ईश्वरदृष्टेरवतर-णमेवास्ति धर्मः । सर्वेषां धर्मोऽस्त्येक एव । धर्मस्य सम्बन्धेऽतोऽपि महती समुदारता का भवितुमर्हति ?

हिन्दुसमाजेन धर्मस्य या रूपरेखा स्वीकृता वर्तते, नास्ति सा केनाप्येकेनाचार्येण प्रव-र्तिता । नास्ति कस्यचिदेकस्यैतिहासिककालस्य संस्कृतिः । नापि सा कस्याञ्चिद् भौगोलिक्यां सीमायामाबद्धा चास्ति । नास्ति सा कस्यचिदे-कस्य वर्गस्य सम्प्रदायस्य तथा एकस्या जात्याश्च कृते । वयं समग्रस्य विश्वस्य कृते धर्ममेकं स्वीकुर्मः । गीतायाः श्लोकेऽस्मिन् ध्यानं देयम्—

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥

मानवोऽस्त्यधिकारी । आत्मनः कर्मैव विद्यते खल्वाराधना । समग्रस्य विश्वस्य मूलमेव, योऽस्ति चेतनः, आराध्यदेवता विद्यते । एतादृशे च धर्मे भेदभावनायाः कृते कुत्रास्ति स्थानम् ? । मित्र-स्याथवा सूर्यस्य दृष्ट्या सर्वे प्राणिनो द्रष्टव्याः । यश्च संसारस्य कमपि प्राणिनं तिरस्करोति, तस्मिन्नेश्वरः कदापि सन्तुष्टो भवितुमर्हति । अभिमानी, भेददर्शी, द्वेषी तथा भूतद्रोही च जनो न कदापि शान्तिमधिगच्छति ! सर्वे प्राणिन एव सन्ति परमात्मनो मन्दिराणि । दानस्य सम्मानस्य मैत्र्यास्तथात्मनश्च दृष्ट्या सर्वे द्रष्टव्याः । एते सन्त्यस्माकं धर्मस्योद्गाराः परमो-दाराः, ये च भवद्भिः सर्वैरपि भागवतादिग्रन्थेषु सुखेन लब्धुं शक्यन्ते । एष ह्येकत्ववादी, अद्वयवादी, सर्वात्मवादी च धर्मो विद्यते ।

किञ्च तत्रभवन्तो भवन्तो जानन्त्येव भग-वतः श्रीमत आदिशङ्कराचार्यस्य जीवनस्य तां घटनाम् । यदा हि स श्रीशङ्कराचार्यो गङ्गास्ना-नार्थं गच्छन्नास तु तदानीं पुरतः कुक्कुरेण सहैक-श्चाण्डालः स्थितो वर्तते । आचार्यः प्रोक्तवान्,-दूरमपसर, चाण्डलः प्रोवाच-संन्यासिशिरोमणे ! किं श्रीमान् देहमिमं दूरेऽपसारयितुं वाञ्छति, अथवा आत्मानम् ? किं पाञ्चभौतिकोऽन्नमयो-देहः पृथक् पृथगस्ति, अथवा साक्षी चेतन आत्मा पृथक्-पृथग् विद्यते ? भवता स्पष्टमुच्यताम्—वेषस्यादरोऽस्ति, उत ज्ञानस्य ? कश्चन दण्ड-मण्डितकरतया धृतकुण्डतया एव वा श्रेष्ठो भवति ? भगवान् श्रीशङ्कराचार्यश्चाण्डालस्य वचनस्य गम्भीरतां तात्त्विकताञ्च धृतवान् । चाण्डालोऽन्ते प्रोवाच यत्–तपोधन ! तव निष्ठायां यो दोष आसीत्स मया दूरीकृतः । शङ्क-रदिग्विजयस्य कथायाश्चास्या मूलं श्रीशङ्करा-चार्यद्वारा विरचिते 'मनीषापञ्चके' विद्यते । तेन स्पष्टमुक्तं यद् येन ब्रह्मात्मैक्यस्य बोधः सम्प्राप्तः, स चाण्डालो भवेद् ब्राह्मणो वा, मम गुरुर्वर्तते । हिन्दुसमाजस्यायं सिद्धान्तः करामल-कवत् प्रत्यक्षोऽस्ति यज्जाति-वेषयोरपेक्षया ज्ञान-स्यादरः सर्वोत्तमो विद्यते इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथनस्यायमस्त्यभिप्रायो यत्—अस्माकमाद्याचार्याणां जीवन एतादृशं ज्ञानं वर्तते येन जगदभिन्नं विद्यते। एतावती निरभिमानिता चास्ति यत्ते चाण्डालवचनेऽपि नतमस्तका भवन्ति। ते हि न कञ्चिदपि जनं हीनं, घृणार्हं द्वेष्यमोर्ष्याभाजनं वा मन्यन्ते। अस्माकं महात्मानश्च भवतां हृदयेषु शान्ति-श्रद्धाप्रभृतीन् सद्गुणान् स्थापयन्ति। ते च सौमनस्यं जागरयन्ति, सौशील्यञ्च प्रतिष्ठापयन्ति, ते हि सन्त्यन्तर्ज्योतिर्द्रष्टारस्तथा समत्वे च विद्यते तेषां निष्ठा।

अपि च श्रीमद्भिरिदं श्रुतमेव स्यात् यत्—श्रीरामानुजसम्प्रदायस्य मूलभूतेष्वाचार्येषु सर्वासां जातीनामेव महापुरुषाः समवर्तन्त। श्रीगुरुदेवो मन्त्रदीक्षां प्रदाय श्रीरामानुजाचार्यमुवाच—'मन्त्रोऽयं नान्यस्मै कस्मैचन त्वया-देयः, परमकल्याणकारकः सर्वोत्तमोऽयं वर्तते मन्त्रः। स च भवनपृष्ठमारूढः, उच्चैः स्वरेण मन्त्रोच्चारणं कर्तुञ्च प्रवृत्तः। गुरुदेवः पृष्टवान्–'किमिदम्'?। आचार्यः प्रोवाच—'गुरुदेव! श्रोतृणां जनानां कल्याणं भवतु, अहमेकाकी नरकं यास्यामि। आचारप्रधानस्यैकस्याचार्यस्य समुदारतैषा विश्वे सर्वदा स्मरणीया स्थास्यति।

कश्चिन्महानुभावो महाप्रभुं श्रीचैतन्यदेवं पृष्टवान् यत्—'भवान् कोऽस्ति?'। तेन स्पष्टमुक्तम्–नाहमस्मि वर्णाश्रमाभिमानी अहन्तु परमात्मनोऽतितुच्छः सेवकोऽस्मि–इति।

भवतामेतद् विज्ञातं भवेत् यन्महाप्रभोः सम्प्रदाये सर्वविधानामपि मानवानामस्ति समावेशः। पापिनो म्लेच्छाश्चापि तदनुयायिनः समभूवन्। वस्तुतो भक्तिसम्प्रदायैरत्युदारतया सह प्राणिनां कृते कल्याणकारिणी दीक्षास्ति प्रत्ता। तैः पशुपक्षिणोऽपि वैष्णवाः सम्पादिताः। सिद्धाश्च महिषमपि किं वेदोच्चारणे सुयोग्यं न विहितवन्तः?। सच्छास्त्रेषु च जाति–वर्ग–सम्प्रदाय–निरेपक्षस्य सर्वलोककल्याणकारिणो धर्मस्यैव निरूपणमास्ते।

वयं धर्मेण सह किमपि विशेषणमुपपदं वा न योजयामः। धर्मे च भौगोलिको सोमा न भवति, यथा यूरोपीयधर्मः, एशियायीधर्मश्च। तथैतिहासिकी सोमापि न भवति, यथा आदिकालिको मध्यकालिको (धर्मः)। आचार्य–संप्रदाय–जातीनां कारणेनापि धर्मे भेदो न भवति। प्राचीनशास्त्रेषु कुत्रापि 'आर्यधर्मः, अनार्यधर्मः, इत्यादयः शब्दाः न प्राप्यन्ते। वेदे तदनुवर्ति–प्राचीन ग्रन्थेषु च हिन्दुशब्दस्य प्रयोगोऽपि न मिलति। वेदस्य कथनमस्ति यत् **'धर्मो विश्वस्य जगतः प्रतिष्ठा'**। समग्रस्य जगत आधारस्तम्भोऽस्ति धर्मः। मीमांसावैशेषिकादयो दर्शनग्रन्था विनैव केनापि परिच्छेदकेनैव 'धर्म' शब्दं प्रयुञ्जते। लोक–परलोक–परमार्थानाञ्चोपलब्धये धर्म एवास्त्येकं साधनम्। कर्मणि, सर्वजनहितस्य समष्टेरथवान्तर्यामिण ईश्वरस्य दृष्टिरेवास्ति धर्मः। अस्माकं धर्मे च प्रान्तीयता–जातीयता–साम्प्रदायिकतादीनां कारणेन जायमानस्य, वैमनस्यस्य, द्वेषस्याथवा घृणायाश्च कृते नास्ति स्वल्पोऽप्यवकाशः। विधिरयं दुर्गुणेभ्यः परित्राणार्थं सर्वोत्तमं कल्याणकारि सफलं साधनं वर्तते।

अद्य समग्रे संसारे येऽप्युपद्रवाणामुपप्लवानाञ्च घनाः समाच्छन्नाः सन्ति, तत्कारणमस्ति शिक्षागतो दोषः। सम्पूर्णे जगत्यद्य शिक्षैषा दीयमानास्ते यत् सृष्टेर्मूले नास्ति कश्चन चेतनः। जडताया विकासस्तदुत्पन्नश्च प्रकाश एव विश्वव्यवस्थां निर्वोढुं क्षमो विद्यते। समग्रं विज्ञानमेतादृशीमेव व्याख्यां कर्तुमस्ति संलग्नम्। एतादृशी शिक्षा चास्माकं भाविनां छात्राणां बुद्धिं दिग्भ्रान्तां कुर्वाणास्ते। अद्य देशे विदेशेषु प्रतिप्रदेशञ्च छात्राणामन्तर्देशे च विद्रोहः प्रविशन् विद्यते। इण्डोनेशियादेशे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राज्यविप्लवः समजनि, पाकिस्ताने च सैनिकं शासनं सञ्जातम्। फ्रांसोऽपि हिन्दोलकस्येव स्थितिमनुभवन् वर्तते। यदि विद्यार्थिनां कृते समुचितं शिक्षणं न दास्यते तेषां हृदयं चास्थया शून्यं करिष्यते तर्हि किमेतत्सम्भाव्यते यत्ते विश्वमानवतां तथा राष्ट्रियतां प्रति चोचितं दृष्टिकोणं रक्षितुं प्रभविष्यन्ति ?। अतोऽस्माकं शिक्षायामीश्वरस्य धर्मस्य नैतिकतायाः सदाचारस्य वा समावेशः परमावश्यकः। हृदयस्य पवित्रतायै, अन्तःकरणस्य शुद्ध्यै (यदधीनास्ति सर्वव्यवहाराणां शुद्धिः) धर्मादयः परमावश्यकाः। नात्र कथनस्यास्त्यावश्यकता यदत्र विषये साधुगणोऽतिमहत्त्वपूर्णं कार्यं कर्तुं शक्नोति।

एका वार्ता चैषापि विचरणीया वर्तते—यदद्य वर्तमानायां परिस्थितौ धनिकानां निर्धनानाञ्च मध्येऽन्तरं वर्द्धमानमस्ति। एकतो धनस्य सञ्चयः क्रियमाणो वर्तते, अन्यतश्च भक्षणार्थमन्नकणानामपि दुर्लभता वर्तते। यदि निर्धनानां बालकानां कृते रुग्णावस्थायां समुचितस्यौषधस्य तथा परिधानार्थं वस्त्राणां निवासार्थञ्च भवनस्य समुचिता व्यवस्था न भविष्यति तथा तेषां कृते च शिक्षणादिकस्य सौविध्यस्य समानरूपेण लाभो न सम्पत्स्यते, तदा केवलं तेषां निर्धनबालकानां भावनात्मके आधार एव धर्मात्मरूपेण रक्षणे साफल्यं नाप्तुं शक्यते। अस्माकं साधूनामिदमस्ति कार्यं, दिशि चास्यां तेषां कृते वर्तते शोभनोऽवसरो यत्ते धनिवर्गस्य निर्धनवर्गस्य मध्ये समागच्छेयुः, धनस्य हस्तान्तरितकरणे च सहयोगं दद्युः, तथा निर्धनानां कृते च विद्यालयान् चिकित्सालयान् जीवनवृत्तिं तथा लौकिकोन्नतेरवसरञ्चाप्युपस्थापयेयुः। राजनीतिकनेतारश्च तानन्यथोक्त्वा मार्गात् प्रभ्रंशयन्ति। ज्ञानिनां कृतेऽदृष्टस्य प्राप्तये च वर्णाश्रमधर्मस्य पालनस्य नास्त्यावश्यकता। स तु जिज्ञायास्तथा ज्ञानस्योत्पत्तये चास्ति। शमदमादयो हि ज्ञानस्यान्तिकचराः सन्ति सहयोगिनः। लौकिककर्मसु च ज्ञानिना केवलं हितस्यान्वयमहितस्य च व्यतिरेकं विचार्यैव विहितं कर्म कर्तव्यम्। ज्ञानिना पुरुषेण च राज्य–सेनापतित्व–शासनादीन्यपि कार्याणि कर्तुं शक्यन्ते। एषोऽस्ति शास्त्राणां निर्णयः। साधुभिश्चैतो ध्यानं दातव्यम्।

येऽपि मन्यन्ते यदस्माकं साधवः सन्ति निरुद्यमा अनुपयोगिनो वा, तेषां साधूनां विषये नास्त्यभिज्ञता। वस्तुतः साधुभिश्चानेके विद्यालया औषधालया महाविद्यालयाश्चापि परिचाल्यन्ते। तैश्च जलाधार (बाँध) मार्गादीनां निर्माणात्मकं कार्यमपि वर्तते क्रियमाणम्। भारत-साधुसमाज एतेषां सर्वेषामप्येकां सूचीं सम्पादयितुं वाञ्छति, यया स सर्वोऽपि कार्यकलापः जनतायाः सम्मुखे समुपस्थाप्येत।

साधवः स्वस्वसम्प्रदायानुसारं स्वमन्त्रान् जपेयुः। स्वेष्टदेवस्य ध्यानं कुर्युः। स्वमर्यादाश्च पालयेयुः। भारतसाधुसमाजस्य संघटनं धार्मिकसम्प्रदायस्वरूपे न, अपि तु समाज–सेवा–संस्थानस्य रूपेऽस्ति। समाजस्य मञ्चे च संन्यासिन उदासीनाः, वैष्णवाः, बौद्धाः सिक्खजातीयास्तथाऽऽर्यसामाजिकाः सर्वेऽपि समवेताः सन्ति। मञ्चोऽयं सर्वसम्प्रदायानां साधूनां कृतेऽस्ति, कामं तेषां मान्यता कापि किं न भवेत्।

हिन्दुसमाजे च मूर्तिपूजकाः सनातनधर्मानुयायिनस्तथा मूर्तिपूजाविरोधिनश्च आर्यसमाजिकाः सन्ति, परमुभयेऽपि सन्ति हिन्दुसमाजे। नायं शास्त्रार्थस्य मञ्चः, अपि तु सेवाया मञ्चो विद्यते। महात्मा बुद्धः, गुरुनानकः स्वामी दयानन्दः, महावीरः आचार्यः श्रीशङ्करः इत्यादयः सन्ति सर्वेऽपि हिन्दवः। हिन्दुसमाजस्य सम्बन्धे व्यापको दृष्टिकोणो भवेत्। शिखाधारिणः शिखारहिताः, यज्ञोपवीतिनोऽयज्ञोपवीतिनश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वे सन्ति हिन्दवः। किञ्च वैदिकानामवैदिकानां, आस्तिकानां नास्तिकानां सर्वेषामपि सन्निवेशो वर्तते हिन्दुसमाजे। संस्कृतोऽसंस्कृतश्चोभौ हिन्दू स्तः। मतानि (मजहब) सम्प्रदायाश्च आचार्याणां, संस्काराणां तथा ग्रन्थानाञ्च प्राधान्येन भवन्ति, परमेतेषामनुयायिनो विरोधिनश्च सर्वेऽपि सन्ति हिन्दवः। हिन्दुसमाजे च प्राकृतानां पृथ्वी–जलाग्नि–वृक्षादीनामपि पूजा भवति, तथा संस्कृतानां मूर्तीनाञ्चापि। निराकारस्य ध्यानं कर्तुं शक्यते निर्गुणस्य च ज्ञानम्। इयद्व्यापकदृष्टिकोणशालिनि समाजे कीदृशी अपि सङ्कीर्णता केवलमज्ञानादेव भवितुं शक्नोति। संघटनमस्ति शक्तिः, विघटनञ्च निर्बलता। ये च केललं यथा वयं वसामस्तथा वसन्ति, यथा वयं चिन्तयामस्तथा चिन्तयन्ति, ते सन्ति हिन्दवः–एवं कथनस्य नास्ति कस्याप्यधिकारः। हिन्दुसमाजोऽत्युदारो विस्तृतश्च वर्तते। तस्मिन् सर्वेषामस्ति सन्निवेशः। यः कोऽपि मनुष्यः सत्येन हृदयेनात्मानं हिन्दुं मन्यते, स स्वरीत्या (ढङ्ग) हिन्दुसमाजे स्थातुमर्हति, तन्निरोधस्याधिकारो न कस्यचनाचार्यस्य न वा सर्वकारस्य वर्तते। स्मर्तव्यमिदं यद् नास्ति 'हिन्दुः' जातिर्वा सम्प्रदायः, अपि तु समाजो वर्तते। यस्य समाजस्य मूलभित्तिरद्वैतसिद्धान्तो भवेत्, तस्मिन् भेदभावनायाः किं महत्त्वं भवितुमर्हति? हिन्दुसमाजस्तथा भारतसाधुसमाजश्चैतावुभावपि सामाजिकं दृष्टिकोणं रक्षतः। अतः साधुसमाजः प्रयत्नमिमं विधास्यति यत् सर्वेषां कृते तुल्यं सौविध्यं प्राप्तं भवेत्, सर्वेषां प्रगतिश्च स्यात्। भारत-साधुसमाज आत्मनस्तपःपूतां प्रज्ञां शक्तिञ्च विश्वशान्त्यै तथैकतासंवर्धनाय चोपयोक्ष्यति।

जानीमो वयं यद् विश्वस्य लोका भारतवर्षं पुरातनरूढियादिनं देशं मन्यन्ते। सत्यमस्ति वयं घनसम्पत्तौ भोगविलासविधौ च तेभ्यो नाग्रेसराः स्मः, परं ज्ञाने समुदारतायां समदर्शितायामाध्यात्मिकतायां, हृदयस्य पवित्रतायां तथाऽभेदभावनायाञ्चाग्रेसरा एव वर्तामहे वयम्। दृष्टिकोणेनानेन तु वयं सर्वेभ्योऽग्रेसराः स्मः। अद्य वयं विषयेऽस्मिन् समग्रमपि विश्वं मार्गं प्रदर्शयितुं शक्नुमः। परमेतावदेव न, अपि त्वद्य प्रज्ञावतां निष्कामप्रवृत्तीनां साधूनां कार्यमिदं वर्तते यत्ते पथिच्युतां राजनीतिमपि सुमार्गमानयेयुः, जनतायास्तथा जननायकानाञ्च कृते लौकिकाभ्युन्नतयेऽपि तथ्यं मार्गं बोधयेयुः, येन जनता कुपथे न पतेत्। तथा च प्रज्ञावद्भिर्निष्पक्षैस्तथा शुद्धहृदयैश्च साधुभिर्विना कार्यमिदं कः कर्तुं शक्नोति?।

अस्माकं विश्वासो वर्तते यत्केवलं भारतवर्षे एव न, अपि तु सम्पूर्णे जगति मानवसमाजस्य कृतेऽद्य साधूनां यावती आवश्यकता विद्यते, तावती पूर्वं कदापि नासीत्। अद्य साधवो ग्रामे–ग्रामे, वने–वने, जनपदे, नगरे–नगरे देशे विदेशेषु च सर्वत्र प्रसरन्तु। ईश्वरस्य धर्मस्य, पवित्रतायाः, समानतायास्तथा निर्भयतायाश्च ते तथ्यां शिक्षां सर्वेभ्यो दद्युः। दुःखिताय सुखं, अज्ञानिने च ते ज्ञानं दद्युः, भीतञ्चाभयं कुर्युः। साधूनां संघटनाय, हिन्दूनामेकतायै, प्रशासनस्य शुद्ध्यै, मानवताया जागरणार्थं, राष्ट्रस्य प्रतिष्ठायाः सम्बर्द्धनार्थं तथा सत्यस्य साक्षात्कारं कारयितुञ्चाद्य विश्वे भारतसाधुसमाजस्य सुमहत्यावश्यकता विद्यते। साधुभिश्च सद्गृहस्थानां सहयोगग्रहणे नैव कथमपि संकोचः कर्तव्यः।

गृहस्थाश्रमः साधोर्विद्यते जन्मभूमिः। साधोः सम्पूर्णापि शक्ति गृहस्थेषु एवास्ति निहिता। साधुः प्रज्ञाशक्तिरूपो वर्तते, गृहस्थश्च प्राणशक्तिरूपः। उभावपि मिथो मिलित्वा कार्यं करिष्यतश्चेत्तर्हि मार्गः सुगमः प्रगतिश्च सुलभा भविष्यति। प्रज्ञा-प्राणयोरुभयोरपि सम्मिलिता शक्तिः प्रबप्रधाना भवति। अतः साधवो गृहस्थाश्च मिथो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मिलित्वा कार्यमिदं कुर्युः—सफलतायाः प्राप्तिश्चावश्यं भविष्यति। अत्रैव च मानवसमाजस्य, राष्ट्रस्य, हिन्दुत्वस्य तथा धर्मस्य चोत्थनमस्ति। इदमेवास्ति विश्वस्य मङ्गलं कल्याणञ्च।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखमाप्नुयात्॥

—अनु० दीनानाथत्रिवेदी मधुपः

फैशन और उपयोग में अद्वितीय

'सेंचुरी' के अनूठे वस्त्र

हिज चॉईस-हर चाईस—सर्वोत्तम इजिप्सीअन रूई से निर्मित-मर्सराईज्ड, सेंचुराईज्ड (प्रीश्रंक) पौपलिनें।

हर हाईनेस—सफेद और रंगोन, मर्सराईज्ड सेंचुराईज्ड पॉपलिन।

रुबी—सुगंधित पौपलिन डोबी और चेक शर्टिङ्ग, सफेद, रंगोन और छपी हुई केम्ब्रिक्स।

परमसुख—सुपर फाईन धोतियों में सर्वश्रेष्ठ।

लेक्स ब्यूटी—सर्वोत्तम बारीक मलमल।

हर चॉईस—महिलाओं के वस्त्रों के लिए मनमोहक कपड़ा।

निराला—और "स्विस चैक" सिकुडुन रोधक और गण्डी।

निर्माता:

दी सेंचुरी स्पिनिंग एण्ड मैन्युफेक्चरिंग कम्पनी लि०

सैंचुरी भवन, डा० एनीबीसेन्ट रोड़

बम्बई—२५ डी डी

शुभ कामनाओं के साथ

●

अच्छी जात के चाय के उत्पादक और निर्माता

आत्माराम कम्पनी

प्रो० बोरसिला-टी-इस्टेट

इंडिया एक्सचेंज,

कलकत्ता-१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यूनेस्को कूरियर

विश्व–दर्शन की मासिक पत्रिका

पिछले अङ्कों की कुछ झलकियाँ :

जनवर, 1968 : रामायण और महाभारत

- द्रौपदी का विवाह
- वानरपति हनुमान्
- राम-वन-गमन

मार्च, 1968 : विज्ञान-संस्कृति के रूप में

- विज्ञान तथा हमारे युग की संस्कृति
- विश्व-प्रकृति का सौंदर्य
- अंतरिक्ष नव-संगीत

अगस्त-सितम्बर, 1968 : परमाणु के शांतिपूर्ण उपयोग

- दूसरी पनामा नहर—नाभिकीय विस्फोटकों की देन ?
- दीर्घजीवी नाभिकीय घड़ियाँ
- राष्ट्रों की सेवा में परमाणु
- परमाणु-लोक में ब्रूनो और सौफी (कमिक्स)

अक्तूबर-नवम्बर, 1968 : जापान, परिवर्तन की एक शताब्दी

- सम्राट मेइजी
- दस हजार गुड़ियों का देश
- तोक्यो : दो नगरों की कहानी

जनवरी, 1969 : वेनिस खतरे में

- वेनिस के सहस्रों विरोधाभास
- वेनिस तथा भावी वेनिसवासी
- वेनिस, पूर्व और पश्चिम को मिलाने की कड़ी

एक प्रति : एक रुपया । संयुक्तांक : 2 रुपए ।

वार्षिक शुल्क : रु० 10.50 (पुस्तकालयों एव शिक्षा संस्थाओं से रु० 9.50)

नोट : 1. जनवरी, 68 से ग्राहक बनने वालों को अगस्त, 67 से दिसम्बर, 67 तक के अंकनिःशुल्क।

2. शुल्क मनीआर्डर से ही भेजें। चैक अथवा ड्राफ्ट से भेजने पर 75 पैसे अधिक भेजें।

प्रबन्ध सम्पादक :

केन्द्रीय हिन्दी निदेशालय,

यूनेस्को कूरियर,

(शिक्षा मन्त्रालय)

रामाकृष्णापुरम, नई दिल्ली–22

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सा सेविता कामदुघैव नूनम्

ले० वैद्य-श्री राम० स्वरूपशास्त्री, सम्पादकः, बालसंस्कृतम्, बम्बई ७७

(१)

अश्नाति धेनुर्यवसं सुखेन खलं बुसं धान्यतुषं च भुङ्क्ते ।
पीत्वा जलं भ्राम्यति सा वनेषु सायं समायाति गृहं स्वकीयम् ॥

(२)

सा लेढि वत्सं परमेण प्रेम्णा हुङ्कृत्य वात्सल्यमुपानयन्ती ।
औदार्यभावेन ददाति दुग्धं पथ्यं प्रभूतं मधुरं प्रियं च ॥

(३)

सा सर्वलोकैर्जननीव मान्या संपूजनीया खलु देवतेव ।
शोभेव गेहस्य च रक्षणीया सा सेविता कामदुघैव नूनम् ॥

दी अवध शूगर मिल्स लिमिटेड

प्रधान कार्यालय :-
इण्डस्ट्री हाउस
१५९ चर्च गेट रिक्लेमेशन
बम्बई-१

मिल्स :-
हरगांव
जिला-सीतापुर
उत्तरप्रदेश

निर्माता :—
शुद्धा, श्वेता, कणवती शर्करा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

RUBY GENERAL INSURANCE COMPANY LIMITED.

Year	Nett Premium Income	Nett Claims Paid	Capital & Funds	Assets.
1968	Rs. 3,69,95,000	Rs. 1,90,83,000	Rs. 3,23,53,000	Rs. 6,86,02,000

BUSINESS TRANSACTED:

FIRE MARINE MOTOR ACCIDENT AVIATION MACHINERY AND ERECTION ETC. ETC.

BRANCHES & AGENCIES IN ALL IMPORTANT TOWNS IN INDIA
FOREIGN BRANCHES & AGENCIES.

Aden, Amsterdam, Beirut, Biratnagar, Georgetown (Guyana), West Indies, Kingston (Jamaica), Kampala, Kathmandu, Nairobi & Sanfernando.

Head Office & Registered Office :

"RUBY HOUSE",

8, India Exchange Place, CALCUTTA-1.

Managing Director, Shri K. P. Modi, J.P., A.F.I.I.

WHILE PURCHASING YOUR CLOTH
PLEASE INSIST ON
QUALITY PRODUCTION.

We are always ready to meet the exact type of your requirement.

NEW GUJRAT COTTON MILLS LIMITED

9, BRABOURNE ROAD,
CALCUTTA-1

Phone No.: 22-9121 (6 lines)

MILLS:
Naroda Road, AHMEDABAD.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राष्ट्रियैकतायै सांस्कृतिकभावनाया आवश्यकत्वम्

गतजूनमासस्य २६ तारिकायामुदयपुरे राष्ट्रिय-स्वयं-सेवकसङ्घद्वारा समायोजिते प्रादेशिक-ग्रीष्मकालिक-सङ्घशिक्षावर्गस्य समापन-समारोहेऽध्यक्षपदाद् भाषमाणो राजस्थान-जन-सेवाऽऽयोगस्य भूतपूर्वाध्यक्षः **श्रीलक्ष्मीलाल-जोशीमहाभागः** प्रतिपादितवान् यद्-हिन्दु-राष्ट्रस्य कल्पना नास्ति काचिन्नवीना, एषा तु वैदिककालादेव प्रचलन्ती वर्तते। ततश्च हिन्दु-शब्दस्य व्याख्यां कुर्वाणेन श्रीजोशीमहाभागेन भणितं यद्–'हिन्दु' शब्दोऽयं न केवलं धर्मस्यापि तु राष्ट्रस्य विद्यते प्रतीकः।

किञ्च स्वदेशे निवसतामस्मामन्यतो वीक्षणं लज्जास्पदमस्ति। वैदेशिकै राङ्ग्लैश्चास्माकं भारतीयां संस्कृतिं विस्मारयितुमनेके यत्नाः समनुष्ठीयन्त तथा भारतीयमितिहासञ्च पृष्ठतः कृत्वा तैर्बौद्धिकं दासत्वमुपास्थाप्यत। तस्यैवास्त्येष परिणामो यत्तेषामांग्लानामितो गमनानन्तरमपि वयमद्य वैदेशिकत्वं नैव त्यक्तुं वाञ्छामः। स्वातन्त्र्यप्राप्तेरनन्तरंवयमात्मानं हीनमकिञ्चित्करं वा नानुभवेम। भारतीया हि सर्वेष्वपि क्षेत्रेषु शोभनं कार्यं कर्तुं शक्नुवन्ति। स्वाभिमानस्येमां भावनां सर्वानपि जनान् सोऽयं राष्ट्रिय–स्वयंसेवकसङ्घः शिक्षयते तथात्मनो विविधैः कार्यक्रमैश्च जनतायाः सर्वविधं विकासं कर्तुञ्च प्रयतते। तथा चैवं यद्यस्मास्माभिः स्वां सांस्कृतिकीं भावनां बुद्धिस्थामकृत्वैव राष्ट्रियैकीकरणस्य प्रयासो विधास्यते तर्हि स विफलः सम्पत्स्यत इति।

एकः प्रश्नः

भारत–साधु–समाजस्य परामर्शदात्रीसमितेरध्यक्षः श्रीहरिकिशनदासोऽग्रवालमहोदयः **स्वामि–श्रीअखण्डानन्दसरस्वती**महोदयानां कतिपयविचारान् प्रश्नरूपेण बम्बईतः पाठकानां पुरतः समुपस्थापयति—

अद्य संसारे विकटा परिस्थितिर्व्याप्तास्ते। जातयः संघर्षरताः सन्ति, मानवता कथञ्चिच्छ्वसिति। सम्प्रदायाः कलहायन्ते, धर्मश्च क्षीणो भवन् वर्तते। भाषायाः कृते वैमनस्यमस्ति, परं ज्ञानस्यानादरो विद्यते। दलानि जयं प्राप्नुवन्ति, जनताश्च पराजयम्। प्रान्तरूपाण्यङ्गानि मिथः कर्तनमाचरन्ति। राष्ट्रियता च छिन्ना–भिन्नास्ति जायमाना। निर्धनानाञ्च निर्धनतामाश्रित्य कश्चन तान् हिंसां कर्तुं प्रेरयति कश्चिच्च तान् धर्मान्तरं ग्राहयति। सम्पूर्णविश्वस्य मूलभूतायामेकतायाम्–ईश्वरं प्रत्युपेक्षाबुद्धया शिक्षाद्य वर्तते समाक्रान्ता। अस्यां विषमायां परिस्थितौ राष्ट्रियतायास्तथान्ताराष्ट्रियतायाश्च भविष्यन्महान्धकारे निमग्नमिवास्ति।

अस्यां संकटापन्नायां स्थितौ त्राणं कल्याणञ्च प्राप्तुमेक एवास्ति खलूपायो यत् तात्त्विकमाधारमादाय एकस्येश्वरस्य, एकस्य धर्मस्य, एकस्याश्च मानवताया दृष्टिकोणमङ्गीकृत्य सर्वैरपि सर्वा परिच्छिन्नता लोचनयुगलात् दूरतः समुत्सारणीया। एकताया आधारश्च केवलं ज्ञानं-विज्ञानं सहृदयता वा भवेत्। विशालेन तथोदारेण हृदयेन, निर्मलेनोदात्तेन विवेकेन च सर्वेषामन्तर्विराजमानस्यैकचैतन्यस्य निरीक्ष-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

णामावश्यकम् । जीवनस्य सामाजिके भौतिके च स्तरे सर्वेषां कृते तुल्यस्य सौविध्यस्योपलब्धिरनिवार्या वर्तते । भोजन-वस्त्र-शिक्षा-दीक्षा-चिकित्सा-सम्मानानां व्यवस्था सम्पूर्णमनुष्यजात्याः कृते एकविधैव भवेत् । वैषम्यं, अशिक्षा तथा जीवनयापनस्यासौविध्यञ्च समाजे यदि स्थास्यन्ति तर्हि राष्ट्रियतादेः सारहीनैरुद्घोषैः किमपि कार्यं न सेत्स्यति । राष्ट्रस्यैकतायै एतदप्यावश्यकमस्ति यत् समग्रं राष्ट्रं समृद्धं शिक्षितं सुखितञ्च स्यात् । सौमनस्यार्थञ्चापि बाह्यान्युपकरणान्यपेक्ष्यन्ते ।

विशेषतश्च भारतराष्ट्रमिदमद्यत्वे दरिद्रतया वैषम्येणाशिक्षया च पीडितमास्ते । अस्य भूतकाले चाध्यात्मिकं विज्ञानं कामं समुत्कृष्टमस्यात्, सामाजिकी व्यवस्था वा तदा यथेच्छं महती वैज्ञानिकी समवर्तत, तथा धार्मिकी दृष्टिः कियत्यपि संग्राहिका किं नास्यात्, परं वर्तमाने काले तदुद्घोषेणैव जनानां क्षुत् दूरीकर्तुं न शक्यते । अस्माभिरन्यायस्य विरोध एव न, प्रत्युत तस्य निरोधोऽपि कर्तव्यः । वयमेकस्य राष्ट्रस्य तु का कथा, सम्पूर्णविश्वस्य मानवतायाश्चैकतायाः पक्षे वर्तामहे । परं संसारे एकतायाः प्राणप्रतिष्ठा तदैव भवितुमर्हेत् यदा जनताया दारिद्रचस्य दूरीकरणार्थं सर्वेषामेव दलानां पक्षतः सातत्येन तथ्यः प्रयासः क्रियेत । अस्माभि राष्ट्रस्यैकतातु कामयत एव, सहैव राष्ट्राणामप्यैक्यमभिलष्यते ।

किं श्रीमन्तः पवित्रस्यास्योद्देश्यस्य सम्पूर्तौ स्वयं सहयोगं प्रयच्छन्ति ? इति ।

प्रकाण्डपण्डितपरिचयः—

श्री के. माधवकृष्णशर्ममहोदयः

राजस्थान-संस्कृतशिक्षाविभागस्य निदेशकपदे वर्तमानस्य पण्डितवर्यस्य श्री. के. माधवकृष्णशर्ममहानुभावस्य जन्म १९१२ तमे ईशवीयाऽब्दे मार्चमासस्य २९ तारिकायां केरलराजस्थ-काह्लनगाढे जातम् । सोऽयं श्रीशर्ममहोदयो बाल्यादेव प्रतिभासम्पन्नोऽवर्तत । श्रीशर्ममहोदयेन च राजाज्-कालेज आफ. संस्कृत एण्ड तामिलस्टुडीज तिरुवाडचां (अर्थात् भारते संस्कृतशिक्षायाः प्राचीने महत्त्वपूर्णे केन्द्रे) अध्ययनं विहितम् । १९३३ ईशवीयतमे वर्षे च व्याकरणशिरोमणिपरीक्षां तथा इण्डो-यूरोपियन-तुलनात्मकभाषाशास्त्रस्य परीक्षाञ्चोत्तीर्य सर्वप्रथमं स्थानमवाप्तं श्रीशर्मभिः । एवं मद्रास-विश्वविद्यालयात् मद्रास-ओरिएण्टल-कान्फ्रेंस-पुरस्कारं च तथा राजाज् कालेज-तिरुवाडीतश्च वेदान्त आयंगर इति पुरस्कारं च ससम्मानमुपलब्धवान् श्रीशर्ममहोदयः ।

अपि चाध्ययनकाले एव च व्याकरणेन सहैव प्राचीन-प्रकाण्डपण्डितेभ्यो न्याय-वेदान्त-मीमांसा-ज्यौतिष-साहित्य प्रभृतीनां विषयाणां विशिष्टमध्ययनमेभिः श्रीशर्ममहोदयैरक्रियत । ततश्च मद्रास-विश्वविद्यालयीय—स्नातकोत्तरविभागे रिसर्चस्कालरपदे च कार्यं कृतम्, यत्र च स्वर्गत-श्रीकुन्हनराजस्याधीनतायां निवसतानेन ग्रीक-जेण्ड - अवस्तोभाषायास्तथाऽऽधुनिकशोधप्रणाल्याश्च पर्याप्तमध्ययनं विहितम् । स्व० श्रीकुन्हनराजस्य सुप्रसिद्धे सम्पादनकार्यद्वये (अर्थात् श्लोकवार्तिक-नारायणभट्टकृत-प्रक्रियासर्वस्वयोः सम्पादने) तदर्थं पूर्णः सहयोगोऽदीयत । अत्रैव वसता च श्रीशर्ममहोदयेन पाणिनीयव्याकरणे शोधात्मकं कार्यं कृतम्, यस्मिन् मद्रासविश्वविद्यालयेन १९४० तमे ईशवीयेऽब्दे च 'मास्टर आफ ओरिएन्टल लर्निंग' इत्युपाधिना तथा 'लेडी श्रीनिवास आयंगर' इति पुरस्कारप्रदानेन च सम्मानितोऽक्रियत श्रीशर्ममहानुभावः ।

एतदतिरिक्तञ्च श्रीशर्ममहोदयेन मद्रास-प्रेसीडेन्सी-कालेजे (मद्रासे) जर्मनभाषाया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अध्ययनं कृतम् । तदनन्तरञ्च थियासाफिकल-सोसायटीद्वारा संचालिते अडयारपुस्तकालये ५ पञ्चवर्षाणि यावत् वैदिक-पाण्डुलिपीनां डिस्क्रिप्टिव केटलागं व्यरचयत्, यस्य च समित्याः तात्कालिकाध्यक्ष-श्री डा० अरुण्डे महोदयेन महती प्रशंसा कृता । अस्मिन्नेव कालखण्डे च श्रीशर्मभिर्विविधलिपीनामपि ज्ञानमधिगतम् ।

पाणिनीयविषयमधिकृत्य श्रीमता शोधरूपं यत्कार्यं कृतं तदस्ति नूनमभूतपूर्वम् । विषयेऽस्मिन् चैकेनांग्लविदुषा त्वेतत्प्रतिपादितं यदहं महान्तं सन्तोषमनुभवामि यज्जीवतैव मया कार्यमिदं विलोकितमिति ।

अस्मिन्नेव विषये च सुप्रसिद्धो विद्वान् डा० श्रीबटुकृष्णमहोदयश्चाभाषत यत्-मयैतादृशः कोऽपि विद्वान् न भारते, नापि यूरोपे च दृष्टो यस्य पाणिनीयव्याकरणविषये एतावान् सम्भवेदधिकारः । श्रीशर्ममहोदयस्य शोधात्मके कार्येऽस्मिन् विलियमनार्मनब्राउनलुईरनी-श्रीकृष्णमाचार्य-बटुकृष्णघोष-डा० गोडे-डा० अग्रवालप्रभृतिभिर्महानुभावैरतिमहती प्रशंसाऽक्रियत ।

स्वर्गीयद्रावतरश्रीकुन्हन्राजेन श्रीशर्ममहोदयस्य विषये प्रोक्तमासीद्यत् श्रीशर्ममहोदयोऽयमेतादृशो विद्यते विद्वान्, यस्मिन् प्राचीन पाण्डित्यस्यागाधत्वं तथैवार्वाचीनवैदुष्यस्य च विशालत्वमेवं विश्लेषणात्मकप्रतिभायाश्च समन्वयः समुपलभ्यते । तथा सरदार-पण्णिकरमहोदयेन चाप्येकत्र प्रोक्तमस्ति यदेतादृशस्य विदुषः प्राप्तिर्यद्यप्यसम्भवा नो, तर्हि अति कठिना तु वर्तत एवेति ।

किञ्च पण्डितप्रवरेणानेन वेद-पुराण-दर्शनेतिहास-सहित्य-व्याकरण-ज्यौतिष-तन्त्र-धर्मशास्त्र-काव्यविषयकाणामनेकेषां ग्रन्थानां संपादनं शोधकार्यमेवं पाण्डुलिपीनां प्रकाशनञ्च सम्यक् विहितम् ।

अपि च अनूप-संस्कृतपुस्तकालयमधितिष्ठता श्रीशर्ममहोदयेन बीकानेर-नरेशानधिकृत्य लिखितानामपूर्वज्ञाननिधीनां संस्कृतग्रन्थानां परिचयः शोधकर्तॄणां कृते प्रत्तः, येषु च पाण्डित्यदर्पणम्, स्फोटसिद्धिः, शिल्पशास्त्रं, भारोत्थापनयन्त्रं, सिद्धान्तसंहिता, सारसमुच्चयः, भास्करभूषणं, धर्मतत्त्वकलानिधिः, सिद्धान्तसर्वस्वं, सारस्वती द्वैतसुधा, हरिजीवनमिश्रस्य प्रहसनम्, टोडरानन्दः, सङ्गीतकल्पतरुः सङ्गीतचूडामणिप्रभृतयो ग्रन्थाः सन्ति प्रमुखाः । तथा चैतेषां कार्यकालेऽनूपसंस्कृतविद्यालयोऽन्ताराष्ट्रियख्यातिं प्राप्तवान् । विगतेषु त्रिंशदब्देषु चैभिर्महानुभावै. ५०,००० पाण्डुलिपीनां परीक्षणं कृतम् ।

अपि च पाणिनीयव्याकरणविषयकं शोधात्मकञ्चेदं कार्यं सुमहत्त्वपूर्णं विद्यते । यद्यपि विंशतिवर्षेभ्यः प्रागेव कार्यमिदं क्रमशः प्राकाश्यमुपगतं, परमद्याप्यस्याग्रे न केनापि प्रगति विहिता । स्वर्गत-डा० विष्णुश्रीसीतारामसूक्तकरमहोदयः श्रीशर्ममहानुभावं श्लाघमानः समवोचद्यत् पाणिनीयव्याकरणस्यातिकठिनतया विषयेऽस्मिन् शोधकर्तॄणां संख्या विरलतां भजमाना दृष्टिपथमुपयाति । किं बहुना शोधग्रन्थे चास्मिन् जटिलतमानामनेकासां समस्यानां समाधानं कृतमास्ते । एतदर्थं जिज्ञासुभिः सोऽयं शोधग्रन्थः श्रीशर्ममहोदयविरचितः संग्राह्यो द्रष्टव्यश्च वर्तते ।

श्रीशर्ममहानुभावः सोऽयं विगतेभ्योऽनेकवर्षेभ्यो राजस्थानसंस्कृतविभागस्य निदेशकपदमलंकुर्वाणो विद्यते । विगते च दशकद्वये प्रान्ते चात्र संस्कृतशिक्षायाः क्षेत्रे महती प्रगतिः समजनीति स्फुटमेवेति शम् ।

विनीतो
दीनानाथत्रिवेदी मधुपः
सहसम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ षष्ठोऽध्यायः

पूर्वानुवृत्ता—

ऋषिरुवाच ॥१॥	ऋषि बोले ॥१॥
इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः । समाचष्ट समागम्य दैत्यराजाय विस्तरात् ॥२॥	सुन यों बात देवी की वह दूत सकोप हो । आया विस्तार से बोला सब वृत्तान्त शुम्भ को ॥२
तस्य दूतस्य तद्वाक्यमकर्ण्यासुरराट् ततः । सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनम् ॥३॥	दूत की बात सुनके दैत्यराज सकोप हो । सेनाधिपाल अपने धूम्रलोचन को कहा ॥३॥
हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः । तामानय बलाद् दुष्टां केशाकर्षणविह्वलाम् ॥४॥	धूम्रलोचन तू शीघ्र निज सेना समेत जा । बल से उस दुष्टा को चोटी पकड ला यहां ॥४॥
तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठतेऽपरः स हन्तव्योऽमरो वापि यक्षो गन्धर्व एव वा ॥५॥	उसका पक्ष ले कोई खडा हो यदि शत्रु तो । मार दे उसको चाहे देव, गन्धर्व, यक्ष हो ॥५॥
ऋषिरुवाच ॥६॥	ऋषि बोले ॥६॥
तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः । वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ ॥७॥	आज्ञा यों पा शीघ्र वह धूम्र लोचन दानव । गया जल्दी वहाँ दैत्य सेना साठ हजार ले ॥७॥
स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थिताम् । जगादोच्चैः प्रयाहीति मूलं शुम्भनिशुम्भयोः ॥८॥	उसने देख देवी को बैठी जो हिम शैलपै । जोर से जा कहा पास चल शुंभनिशुंभ के ॥८॥
न चेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यति । ततो बलान्नयाम्येष केशाकर्षणविह्वलाम् ॥९॥	जो राजी से आज मेरे प्रभु पास न जायगी । तो ले चलूंगा बल से तुझे चिकुर खींच के ॥९॥
देव्युवाच ॥१०॥	देवी बोली ॥१०॥
दैत्येश्वरेण प्रहितो बलवान् बलसंवृतः । बलान्नयसि मामेवं ततः किं ते करोम्यहम् ॥११॥	दैत्येश ने तुझे भेजा बली तू सैन्य युक्त है । बल से ले चलेगा तो तेरा क्या कर मैं सकूं ॥११॥
ऋषिरुवाच ॥१२॥	ऋषि बोले ॥१२॥
इत्युक्तः सोऽभ्यधावत्तामसुरी धूम्रलोचनः । हुंकारेणैव तं भस्म सा चकाराम्बिका ततः ॥१३	यों कहा दौडता आया देवी पै धूम्रलोचन । हूंकार से ही अम्बा ने उसे भस्म बना दिया ॥१३
अथ क्रुद्धं महासैन्यमसुराणां तथाम्बिका । ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः ॥१४॥	तब क्रुद्ध हुवा सैन्य देवी पै बरसने लगा । तीखे बाण तथा शक्ति फरसों को निरन्तर ॥१४॥
ततो धुतसटः कोपात्कृत्वा नादं सुभैरवम् । पपातासुरसेनायां सिंहो देव्याः स्ववाहनः ॥१५॥	जटा हिलाता तब तो क्रुद्ध हो गर्जता हुवा । देवी का सिंह वह जा दैत्यों की सैन्य पै पडा ॥१५
कांश्चित् करप्रहारेण दैत्यानास्येन चापरान् । आक्रम्य चाधरेणान्यान् स जघान महासुरान् ॥१६	कर प्रहार से केई मुख से डाढ़ से कई । दबा दबा अधर से कई मारे महासुर ॥१६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केषांचित्पाटयामास नखैः कोष्ठानि केसरी ।	अनेकों के फाड दिये नखों से पेट सिंह ने ।
तथा तलप्रहारेण शिरांसि कृतवान् पृथक् ॥१७॥	किये तल प्रहारों से शिरों को धड से पृथक् ॥१७॥
विच्छिन्नबाहुशिरसः कृतास्तेन तथापरे ।	शिर बाहु कटे केई किये दानव और भी ।
पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः ॥१८॥	हिला हिला जटा सिंह दैत्यों का रक्त पी गया ॥१८
क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना ।	क्षणही में सभी सैन्य किया नष्ट महामन्य ।
तेन केसरिणा देव्या वाहनेनातिकोपिना ॥१९॥	अतिकोपी उस महादेवी वाहन सिंह ने ॥१९॥
श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनम् ।	मरा सुन शिवा से यों शुम्भ ने धूम्रनेत्र को ।
बलं च क्षयितं कृत्स्नं देवी केसरिणा ततः ॥२०॥	सेनां को भी क्षीण हुई देवी के क्रुद्ध सिंह से ॥२०
चुकोप दैत्याधिपतिः शुम्भः प्रस्फुरिताधरः ।	हुवा कुपित दैत्येश अधर स्फुरने लगा ।
आज्ञापयामास च तौ चण्डमुण्डौ महासुरौ ॥२१॥	आज्ञा दी शुम्भ ने चण्ड मुण्ड दानव युग्म को ॥२१
हे चण्ड हे मुण्ड बलैर्बहुभिः परिवारितौ ।	हे चण्ड ! मुण्ड ! अपना बल ले पहुँचों वहाँ ।
तत्र गच्छत गत्वा च सा समानीयतां लघु ॥२२॥	शीघ्र ही जाकर उसे लाओ पकड के यहाँ ॥२२॥
केशेष्वाकृष्य बद्ध्वा वा यदि वः संशयो युधि ।	केश खींचो तथा बांधो, यदि संशय होय तो ।
तदाशेषायुधैः सर्वैरसुरैर्विनिहन्यताम् ॥२३॥	युद्ध के बीच शस्त्रों से दैत्यों से मार दो उसे ॥२३॥
तस्यां हतायां दुष्टायां सिंहे च विनिपातिते ।	मार के उस दुष्टा को और सिंह पछाड के ।
शीघ्रमागम्यतां बद्ध्वा गृहीत्वा तामथाबिकाम् । ॐ ॥२४॥	शीघ्र आओ उसे बाँध लाओ पकड के यहाँ ॥२४॥
इति श्रीदुर्गासप्तशत्यां षष्ठोऽध्यायः पूर्णः।	श्रीहरिशास्त्रिविरचित हिन्दी दुर्गा पाठ में छठा अध्याय पूर्ण ।

शुभ कामनाओं के साथ

* इन्डो फॉरेन एजेन्सीज् *

२३, सर फिरोजशाह मेहता रोड़,

बम्बई – १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपयोगी लघुकथा

श्रीगिरिराजशर्मा शास्त्री, जयपुरम्

ज्ञानेश्वरस्तुकारामः
समर्थो मध्वबल्लभौ
नरसिस्तुलसीद्दासः
कम्बः साधुकुलोत्तमः ॥१६॥

ज्ञानेश्वर, तुकाराम, समर्थ (रामदास) मध्वाचार्य, बल्लभाचार्य नरसी, तुलसीदास, जम्ब ये साधुकुल में उत्तम पुरुष हैं।

ज्ञानेश्वरः—श्रीविठ्ठलपन्तस्य त्रयः पुत्रा आसन्, तथैका च कन्या आसीत्। तेषान्नामान्यासन् निवृत्तिनाथः, ज्ञानेश्वरः, सोपानदेवं, मुक्ताबाई च। श्रीविठ्ठलपन्तेन स्वगुरोः श्रीरामानन्दस्याज्ञया संन्यासग्रहणानन्तरं पुनर्गृहस्थधर्मः स्वीकृतः। अतः ब्राह्मणैः एतस्य पापकृत्यस्य प्रक्षालनार्थं यत् प्रायश्चित्तमादिष्टं तदनुपालयन् स स्वपत्न्या रुक्मिणीदेव्या सह त्रिवेणीसङ्गमे देहविसर्जनं कृतवान्। तदा तस्य चत्वारः पुत्रा अतीवबाल्यवयस्काः आसन्। श्रीविठ्ठलपन्तो गृहस्थाश्रमेऽपि त्यागमयं जीवनं यापितवान्। अतः तस्य देहत्यागावसरे गृहे काऽपि सम्पत्तिः नासीत्। भिक्षाचर्यां कृत्वा तस्य पुत्राः स्वोदरनिर्वाहं कृतवन्तः।

ज्ञानेश्वरः—श्रीविठ्ठलपन्त के तीन पुत्र और एक कन्या थी। उनके नाम थे निवृत्तिनाथ, ज्ञानेश्वर, सोपानदेव और मुक्ताबाई। श्रीविठ्ठलपन्त ने अपने गुरु श्रीरामानन्द की आज्ञा से संन्यासग्रहण करने के पश्चात् फिर से गृहस्थाश्रम स्वीकार किया था। अतः ब्राह्मणों ने इसके पापकृत्य के प्रक्षालन के लिए जो प्रायश्चित्त बताया उसका पालन करते हुए अपनी पत्नी रुक्मिणी देवी के साथ इन्होंने त्रिवेणी संगम में देह विसर्जन की। उस समय उसके चार पुत्र अत्यन्त अत्यल्पवयस्क थे। श्रीविठ्ठलपन्त ने गृहस्थाश्रम में भी त्यागमय जीवन व्यतीत किया इस कारण उसके देहत्याग के समय घर में कोई भी सम्पति नहीं थी। भिक्षाचर्या करके उसके पुत्र अपना उदर निर्वाह करते थे।

श्रीज्ञानेश्वरस्य जन्म भाद्रकृष्णाष्टम्यां १३३२ सम्बत्सरे आलन्द्यां बभूव। तस्य पितरौ यदा दिवङ्गतौ, तदा सः पञ्चवर्षवयस्क आसीत्। आलन्दीग्रामस्य ब्राह्मणैः कथितम् "यदि पैठणस्य विद्वांसः युष्मभ्यं यज्ञोपवीतग्रहणस्याधिकारं प्रयच्छन्ति तर्हि वयमपि सर्वे तं स्वीकरिष्यामः।" ब्राह्मणानां सम्मतिं स्वीकृत्य ते चत्वारः बालकाः पैठणं प्रति गतवन्तः। तस्मिन् समये मुक्ताबाई अतीवस्वल्पवयस्का आसीत्।

श्रीज्ञानेश्वर का जन्म भाद्रपदकृष्णा अष्टमी को १३३२ सम्बत्सर में आलन्दी में हुआ था। उसके मातापिता जब दिवङ्गत हुए तब वह पांच वर्ष की उम्र का था आलन्दीग्राम के ब्राह्मणों ने कहा 'यदि पैठण के विद्वान् तुमको यज्ञोपवीतग्रहण करने का अधिकार देते है तो हम भी सब उसको स्वीकार करेंगे। ब्राह्मणों की सम्मति स्वीकार करके वे चारों बालक पैठण गए। उस समय मुक्ताबाई अतीव कम

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पैंठणनगरे ब्राह्मणानां एका सभा संजाता । तैः कथितम्—"एतेषां बालकानां शुद्धिः केवलमनन्यया भगवद्भक्त्या एव भवितुमर्हति" ।

ब्राह्मणै र्यज्ञोपवीतस्याधिकारो न दत्तः । अनेन ते सर्वे दुःखिता न बभूवुः । तैः सहर्षं ब्राह्मणानां निर्णयः स्वीकृतः ।

एते चत्वारः जन्मतः एव परमभक्ताः ज्ञानिनः अद्भुताः यौगसिद्धाश्चासान् । श्रीज्ञानेश्वरस्तु योगस्य साक्षात्मूर्तिरेवासीत् । केचन दुष्टाः व्यङ्ग्यवाण्या तेषां बालकानां उपहासं कुर्वन्ति स्म । पैंटणे केचनोद्धताः जनाः श्रीज्ञानेश्वरमूचुः "यदि त्वं सर्वेषु देहेषु एकं आत्मनं पश्यसि तर्हि महिषेण वेदपाठं कारय ।" श्रीज्ञानेश्वरेण महिषस्योपरि स्वहस्तो यदा निक्षिप्तस्तदा सहसा तस्य मुखात् शुद्धवैदिकमन्त्राणामुच्चारणं प्रारब्धम् ।"

श्राद्धस्यावसरे यदा पैठणस्य ब्राह्मणैः अस्य गृहे भोजनस्य निषेधः कृतः तदा श्रीज्ञानेश्वरः स्वपितॄन् प्रत्यक्षमाहूय तान् भोजनं कारितवान् । इमं चमत्कारं विलोक्य पठणब्राह्मणैः तदर्थं शुद्धिपत्रं लिखितम् ।

कालान्तरे च सर्वे भ्रातरः 'नेवासे' स्थानमागतवन्तः । अत्र श्रीज्ञानेश्वरेण स्वज्येष्ठभ्रातुः श्रीनिवृत्तिनाथस्यादेशेन गोताग्रन्थस्य ज्ञानेश्वरीभाष्यं श्रावितम् । सः स्वज्येष्ठभ्रातरं गुरुं मन्यते स्म । यदा तेन 'ज्ञानेश्वरी' व्याख्या श्राविता तदा तस्यायुः पञ्चदशवर्षमितमासीत् ।

तदनन्तरं श्रीज्ञानेश्वरेण स्वभ्रातृभि र्मुक्तादेव्या भगिन्या च सह तीर्थाटनमारब्धम् । अस्या यात्राया अवसरे बहवः प्रसिद्धा सन्तः तैः सह गतवन्तः । उज्जैन-प्रयाग-काशी-गया-वृन्दावन-द्वारिकादिस्थानेषु तीर्थयात्रां कृत्वा ते सर्वे पण्ढरपुरं प्रत्यागताः ।

अवस्था की थी । पैंठण नगर में ब्राह्मणों की एक सभा हुई । उन्होंने कहा—इन बालकों की शुद्धि केवल अनन्य भगवद्भक्ति से ही हो सकती है ।

ब्राह्मणों ने यज्ञोपवीत का अधिकार नहीं दिया इससे वे सब दुःखित नहीं हुए । इन्होंने सहर्ष ब्राह्मणों का निर्णय स्वीकार किया ।

ये चारों जन्म से ही परमभक्त, ज्ञानी, अद्भुत योगसिद्ध थे । श्रीज्ञानेश्वर तो योग के साक्षात् मूर्ति ही थे । कुछ दुष्ट व्यङ्ग्यवाणी से उन बालकों का उपहास करते थे । पैंठण में कुछ उद्धत लोग श्रीज्ञानेश्वर को बोले "यदि तू सभी देहों में एक आत्मा देखता है तो महिष से वेदपाठ करवा" । श्रीज्ञानेश्वर ने महिष के ऊपर अपना हाथ जब रखा तो सहसा उसके मुख से शुद्ध वैदिक मन्त्रों का उच्चारण प्रारम्भ हुवा ।

श्राद्ध के अवसर पर जब पैठण के ब्राह्मणों ने इनके घर में भोजन का निषेध किया तो श्रीज्ञानेश्वर ने अपने पितरों को प्रत्यक्ष बुलाकर उनको भोजन कराया । इस चमत्कार को देख कर पैठण के ब्राह्मणों ने उन्हें शुद्धि पत्र लिख दिया ।

कालान्तर में सारे भाई 'नेवासे' स्थान पर आगए । यहां श्रीज्ञानेश्वर ने अपने ज्येष्ठ भाई श्रीनिवृत्तिनाथ के आदेश से गीताग्रन्थ का ज्ञानेश्वरीभाष्य सुनाया । वह अपने ज्येष्ठभाई को गुरु मानते थे । जब उसने 'ज्ञानेश्वरी' व्याख्या सुनाई तब उसकी आयु पन्द्रह वर्ष की थी ।

उसके पश्चात् श्रीज्ञानेश्वर ने अपने भाइयों के साथ तथा बहिन मुक्तादेवी के साथ तीर्थाटन आरम्भ किया । इस यात्रा के समय बहुत से प्रसिद्ध सन्त उनके साथ गए । उज्जैन-प्रयाग-काशी-गया-वृन्दावन द्वारकादि स्थानों में तीर्थयात्रा करके वे सब पण्ढरपुर लौटे । सम्पूर्ण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समस्ते दक्षिणभारते श्रीज्ञानेश्वरमहाराजः सम्पूजितोऽभूत्। तत्कालीनाः सर्वे प्रसिद्धाः महात्मानः तस्य बहुसम्मानं कृतवन्तः। एकविंशतिवर्षात्मकेऽल्पायुषि मार्गशीर्षकृष्णत्रयोदश्यां तिथौ १३५३ वत्सरे तेन जीवितसमाधिर्गृहीतः। एकवर्षान्तरं श्रीसोपानदेवः श्रीनिवृत्तिनाथः, मुक्तादेवीं च एते सर्वे परमधामयात्रां कृतवन्तः।

दक्षिणभारत में श्रीज्ञानेश्वरमहाराज सम्पूजित हुए। तत्कालीन सारे प्रसिद्ध महात्माओं ने उनका बहुत सम्मान किया। इक्कीस वर्ष की अल्पायु में मार्गशीर्ष कृष्ण त्रयोदशी तिथि के दिन १३५३ संवत्सर में उनने जीवित समाधि ग्रहण की। एक वर्ष के पश्चात् श्रीसोपानदेव श्रीनिवृत्तिनाथ, मुक्तादेवी इन सबने परमधाम की यात्रा की।

श्रीतुकारामः—दक्षिणभारते देहूग्रामे १६६५ तमे ख्रिष्ट्रियाब्दे तुकारामस्य जन्माऽभूत्। अस्य पिता बोल्होबा—इति नाम्ना ख्यातः, माता च 'कनकाबाई' आसीत्। त्रयोदशवर्षात्मके वयसि अस्य विवाहोऽभूत्, किन्तु अस्य पत्नी 'रखुमाई' श्वासरोगेण पीडिताऽऽसीत्। अतः बालोजीमहोदयेनास्य 'जीजाई' देव्या सह द्वितीयो विवाहः कारितः।

श्रीतुकारामः—दक्षिण भारत में देहूग्राम में १६६५ ईसवी में तुकाराम का जन्म हुआ। इसके पिता 'बोल्होबा' इस नाम से विख्यात थे और माता 'कनक बाई' थी। तेरह वर्ष की आयु में इनका विवाह हुआ। किन्तु इनकी पत्नी 'रखुमाई' श्वासरोग से पीडित थी। अतः बालोजी महोदय ने इनका 'जीजाई' देवी के साथ द्वितीय विवाह कराया।

अस्य पिता 'श्रीबोल्होबा' महोदयो यदा जराजीर्णोऽभूत् तदा तेन स्वज्येष्ठपुत्रस्य भाईसावजीमहोदयस्य कृते गृहभारस्य ग्रहणार्थं अत्यधिक आग्रहः कृतः, किन्तु स तु परमो विरक्त आसीत्। अतः सप्तदशवर्षे एव तुकारामस्योपरि गृहभार आपतितः। चतुर्वर्षपर्यन्तं तेन गृहव्यवस्था सम्यक्तया सम्पादिता। तदनन्तरं अस्योपरि संकटनां वज्रपातोऽभूत्।

इनके पिता 'श्रीबोल्होबा' जब जराजीर्ण हुए तब उन्होंने अपने ज्येष्ठपुत्र भाईसावजीमहोदय को गृहभार ग्रहण करने को अत्यधिक आग्रह किया। किन्तु वह तो परम विरक्त था। इस कारण सत्रहवर्ष की आयु में ही तुकाराम के ऊपर गृहभार आगआ था। चार वर्ष तक इनने गृह व्यवस्था अच्छी प्रकार की। इसके पश्चात् इन पर संकटों का वज्रपात ही होगया।

सहसा माता-पित्रोः देहावसानमभूत्। तदनन्तरं ज्येष्ठभ्रातुः पत्न्याः देहान्तमप्यवलोक्य स अत्यधिको विरक्तो भूत्वा तीर्थाटनं कर्तुं मगमत्। अस्य द्रव्यराशिः सरलहृदयतया धूर्तैः स्वहस्तगतः कृतः। ऋणभारेण गृहमाच्छन्नमभूत्। पत्न्या द्विशतरजतमुद्राः ऋणरूपेणानीताः। तस्य द्रव्यराशेः विनियोगं कृत्वा श्रीतुकारामेण पञ्चाशतमुद्रा अर्जिताः, किन्तु तद्धनमपि मार्गे तेन एकस्मै दीनजानाय तदीयां दुर्दशां विलोक्य दत्तम्।

सहसा मातापिता का देहावसान हो गया। तदनन्तर बडे भाई की पत्नी का भी देहान्त देखकर ये अत्यधिक विरक्त होकर तीर्थाटन करने को गए। इनकी द्रव्यराशि सरलहृदय होने के कारण धूर्तों ने अपने हस्तगत करली। ऋणभार से घर दब गया। पत्नी दो सौ रुपये ऋण रूप में लाई। उस द्रव्य राशि का विनियोग करके श्रीतुकाराम ने पांच सौ रुपये अर्जित किए, किन्तु वह धन भी मार्ग में उनने एक दीन व्यक्ति को उसकी दुर्दशा देखकर दे दिया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्य प्रथमा पत्नी अतीवसुशीला आसीत्, किन्तु तस्याः पुत्रस्यापि च देहान्तोऽभूत्। द्वितीया स्त्री अत्यन्तकर्कशाऽऽसीत्। तस्याः कठोरव्यवहारेण श्रीतुकारामः खिन्नः आसीत्। एषु दिवसेषु दुर्भिक्षमप्यापतितम्। अनेन विपज्जालेन तस्य वैराग्यं दृढतरमभूत्। स्वस्य द्रव्यराशेरर्धभागस्तेन स्वलघुभ्रात्रे कान्होजीमहोदयाय दत्तः, अवशिष्टोऽर्धभागश्च नदीप्रवाहे प्रक्षिप्तः। स अहोरात्रं भगवन्नाम-संकीर्तन एव निमग्नः संजातः। तेन पितामहेन निर्मापितस्य श्रीविठ्ठलमन्दिरस्य जीर्णोद्धारोऽपि कारितः।

देहगेहयोश्च सर्वां चिन्तां विहाय स सदा सर्वदा नामसंकीर्तने एव निमग्नोऽभूत्। अतः तस्य मुखात् स्वतः एव कविता निसृता। तस्य अभङ्गेषु ज्ञानस्य गूढतत्वं प्रकटितम्। तत्रत्य एक वेदान्तपण्डितः श्रीरामेश्वरभट्टमहोदयः अनेनाऽतिक्षुब्धोऽभूत्। तेनोक्तम् 'शूद्रः तुकारामः वेद-वेदान्तशास्त्रस्य गूढतत्वानि मराठीभाषायाः पद्येषु उच्चारयति'। तेन तत्रत्येन राज्याधिकारिणा तस्य कृते ग्रामनिष्कासनस्याज्ञा प्रदापिता। श्रीतुकारामेण श्रीभट्टमहोदयस्य समीपं गत्वा पृष्टम् 'यानि पद्यानि मया उच्चरितानि तेषां किं भविष्यति, श्रीभट्टे नोक्तम् यत् तानि नदीप्रवाहे निक्षिपतु भवान्। श्रीतुकारामेण सर्वा पद्यपञ्जिका इन्द्रायणीनद्यां प्रवाहिता।

अनेन कृत्येन श्रीतुकारामः अतीवखिन्नोऽभूत्। तेन चिन्तितं यत् भगवत्कृपया तस्य मुखादभंगपद्योच्चारणमभूत् भगवता किमर्थं तेषां नाशार्थं प्रेरणा कृता। अनेन दुःखेन दुःखितः श्रीतुकारामः श्रीविठ्ठलमन्दिरसम्मुखे अवस्थितस्य शिलाखण्डस्योपरि त्रयोदशदिवसपर्यन्तं अन्नजले त्यक्त्वा शयानोऽभूत्। तदनन्तरं श्रीविठ्ठलप्रभुः प्रकटितोऽभूत्। तं सम्बोध्य भगवान् उवाच "तवाऽभङ्गपद्यपञ्जिका मया तव

इनकी प्रथम पत्नी अत्यन्त सुशील थी। किन्तु उसके पुत्र का भी देहान्त हो गया। द्वितीय स्त्री अत्यन्त कर्कशा थी। उसके कठोर व्यवहार से श्रीतुकाराम खिन्न थे। इन्ही दिनों में दुर्भिक्ष भी आगया। इस विपद् जाल में उनका वैराग्य दृढतर हो गया। अपनी द्रव्यराशि का आधा भाग उनने अपने लघु भाई कान्होजी महोदय को दिया और अवशिष्ट अर्ध भाग नदी प्रवाह में फेंक दिया। वे अहोरात्र भगवन्नाम संकीर्तन में ही निमग्न रहते थे। उनने पितामह द्वारा बनाए श्रीविट्ठलमन्दिर का जीर्णोद्धार भी कराया।

शरीर और घर की सारी चिन्ता छोडकर वे सदा सर्वदा नाम संकीर्तन में ही निमग्न थे अतः उनके मुख से स्वतः ही कविता निकली। उनके अभङ्गों में ज्ञान का गूढतत्व प्रगट हुआ। वहां के एक वेदान्ती पण्डित श्रीरामेश्वरभट्ट महोदय इससे अत्यन्त क्षुब्ध हुए। उसने कहा 'शूद्र तुकाराम वेद वेदान्त के गूढतत्व मराठी भाषा के पद्यों में उच्चारण करता है'। उसने वहां के राज्याधिकारी से उनके ग्राम से निष्कासन की आज्ञा निकलवादी। श्रीतुकाराम ने श्रीभट्टमहोदय के पास जाकर पूछा 'जो पद्य मैंने उच्चारित किए उनका क्या होगा' श्रीभट्ट ने कहा कि उन्हें नदीप्रवाह में फेंक दो। श्रीतुकाराम ने सारी पद्यपञ्जिका इन्द्राणी नदी में बहा दी।

इस कृत्य से श्री तुकाराम अत्यन्त खिन्न हुए। उनने विचार किया कि भगवत्कृपा से उसके मुख से अभङ्ग पद्योच्चारण निकले हैं। भगवान् ने किस लिये उनके नाश के लिये प्रेरणा की। इस दुःख से दुःखित श्री तुकाराम ने श्रीविट्ठल मन्दिर के सम्मुख रखी शिलाखण्ड पर तेरह दिन तक अन्न-जल छोड कर सोये रहे। तदनन्तर श्रीविठ्ठल प्रभु प्रगट हुए। उनको सम्बोधन करके भगवान् बोले "तेरी अभङ्ग पद्यों की बही

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भक्तेभ्यः प्रदत्ता"। तद्भक्तैः सा पद्यपञ्जिका नदीप्रवाहात् गृहीताऽऽसीत्।

भगवद्भक्तस्यापराधेन श्रीरामेश्वरभट्टस्य समस्ते शरीरे भीषणदाहोऽभूत्। तेन श्रीतुकारामस्य समीपे गत्वा तस्य शिष्यत्वं स्वीकृतम्।

छत्रपतिः श्रीशिवराज (शिवाजी) महोदयोऽपि श्रीतुकारामदर्शनार्थं अनेकवारमगात्। समर्थरामदासस्वामिनः शरणे गमनस्यादेशोऽपि श्रीतुकारामेणैव श्रीशिवराजमहोदयाय दत्तः।

चैत्रकृष्णाद्वितीयायां तिथौ १७०६ ख्रिष्ट्रियवत्सरे श्रीतुकारामस्य जीवनलीला समाप्ता। इदं जनैः श्रूयते यत् स सशरीरो विमानेन वैकुण्ठलोकं गतवान्।

मैंने तेरे भक्तों को देदी है' उनके भक्तों ने वह नदी प्रवाह में से ली थी। भगवद्भक्त के अपराध से श्री रामभट्ट के समस्त शरीर में भीषण दाह होगया। उससे श्री तुकाराम के समीप जाकर उनका शिष्यत्व स्वीकार कर लिया।

छत्रपति शिवराज (शिवाजी) महोदय भी श्रीतुकाराम के दर्शन के लिए अनेक बार गए। समर्थरामदास स्वामी के शरण में जाने का आदेश भी श्रीतुकाराम ने ही श्रीशिवराज महोदय को दिया।

चैत्र कृष्ण द्वितीया तिथि को १७०६ ईस्वीय सन् में श्रीतुकाराम ने जीवन लीला समाप्त की। लोगों से यह सुना जाता है कि वे सशरीर विमान द्वारा वैकुण्ठ लोक को गए।

भारती के कतिपय प्रकाशन

१.	अम्बिकासूक्तम्	मूल्यं २.५०
२.	गल्पकल्पलतिका (बालोपयोगी)	१.५०
३.	सरलसंस्कृतशिक्षणोपायः (बालोपयोगिनी)	१.५०
४.	गोलनवांकुर	१.२५
५.	चित्रद्वारा संस्कृतशिक्षा (बालोपयोगिनी)	१.५०
६.	सुवर्णलक्ष्मीनक्षत्रमाला	०.५०
७.	आयुर्वेदविशेषांकः	५.००
८.	आरोग्यांकविशेषांकः	२.५०

भारती के ग्राहकों को २५% वर्तन दिया जायगा यदि सम्पूर्ण पुस्तकें एक साथ मंगायें।

व्यवस्थापक
भारती संस्कृत मासिक

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान प्राच्यविद्या प्रतिष्ठान, जोधपुर

– द्वारा –

शोध, संदर्भ एवं दुर्लभ महत्त्वपूर्ण ग्रंथों का

राजस्थान पुरातन ग्रंथमाला के अन्तर्गत प्रकाशन

प्रकाशित ग्रंथों की सूची

(क) राजस्थानी–हिन्दी

प्रकाशन का नाम	सम्पादक	मूल्य
दशकण्ठवधम्	श्री गङ्गाधर द्विवेदी	रु० ४–००
श्री भुवनेश्वरी महास्तोत्रम्	श्री गोपालनारायण बहुरा	रु० ३–७५
रत्नपरीक्षादिसप्तग्रन्थसंग्रह	पद्मश्रीमुनि जिनविजय, पुरातत्वाचार्य	रु० ६–२५
स्वयम्भूछंद	प्रो० एच० डी० वेलणकर	रु० ७–७५
वृत्तजातिसमुच्चय	" " "	रु० ५–२५
कविदर्पण	" " "	रु० ६–००
वृत्तमुक्तावली	स्व० पं० मथुरानाथ भट्ट	रु० ३–७५
कर्णामृतप्रपा	पद्मश्रीमुनि जिनविजय, पुरातत्वाचार्य	रु० २–२५
पदार्थरत्नमंजूषा	पद्मश्रीमुनि जिनविजय, पुरातत्वाचार्य प्रस्तावना–श्री दलसुख मालवणिया	रु० ३–७५
त्रिपुराभारती–लघु–स्तव	पद्मश्रीमुनि जिनविजय, पुरातत्वाचार्य	रु० ३–२५
प्राकृतानन्द	" " "	रु० ४–२५
इन्द्रप्रस्थ–प्रबन्ध	डा० दशरथ शर्मा	रु० २–२५
एकाक्षर–नाम कोश–संग्रह	पन्यासप्रवर मुनि रमणीकविजय	रु० ६–००
वासवदत्ता कथा	जे० एम० शुक्ला	रु० ४–५०
वृत्तमौक्तिक	म० विनयसागर	रु० १८–२५
चांद्रव्याकरण	पं० वेचरदास दोशी	रु० ७–००

पुस्तक विक्रेताओं को २५ प्रतिशत कमीशन दिया जाता है।

(राजस्थान सरकार द्वारा प्रसारित)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समस्या-पूर्तयः

आचार्य—श्रीराधाकृष्णशर्मा, म० सं० कालेजः, जयपुरम्

सेव्यताम्—

जिह्वे यदि त्वं रसमर्मवेदिनी, तदा त्वया मे वचनं विचार्यताम् ।
विहाय संसाररसं विषोपमं गोविन्दनामामृतमेव सेव्यताम् ॥१॥

यत्रापूर्वरसप्रवाहमधुरं माधुर्यमास्वाद्यताम् ।
वर्णालङ्कृतिसद्गुणैरनुपमं सौन्दर्यमालोक्यताम् ॥
ब्रह्मानन्दमिवाप्य यस्य वशतः सर्वं तिरोधीयताम् ।
तद्दिव्यं कविसृष्टिसारललितं काव्यामृतं सेव्यताम् ॥२॥

वैद्यं प्राह युवा यतो मम भवेत् स्वास्थ्यं प्रभो तद् वद ।
पार्श्वे तद्दयितां विलोक्य रसिको वैद्योऽब्रवीत् तं पुनः ॥
भैषज्यं किमु पृच्छसि प्रियसखे ! मासे वसन्तेऽधुना ।
तन्वीयं सुखवर्धिनी स्मितमुखी श्यामा सदा सेव्यताम् ॥३॥

लोकतन्त्राधिकारः—

अशनवसनचिन्ता केवलं दृश्यतेऽद्य,
कथमिव परिचर्चा ज्ञानविज्ञानयोस्तु ।
विगतकुशललोको व्याप्त-पर्याप्तशोको
जनमतहृतसारः लोकतन्त्राधिकारः ॥१॥

विभवमदविघूर्णाः द्वेषदुर्नीतिपूर्णाः
विगतमतिविवेकाः शासका वा प्रजा वा ।
दिश नय शुभमार्गं तत्कृते त्वं कवीन्द्रः ।
किमुत नहि तवायं लोकतन्त्राधिकारः ॥२॥

दृष्टि र्या विदुषां मनोविजयिनी सा जित्वरी जित्वरी ।
या ते चारुनितम्बमन्थरगतिः सा गत्वरी गत्वरी ॥
या सुस्मेरविलासकार्मणकरी सा चातुरी चातुरी ।
कान्ते त्वल्ललिताधरामृतझरी **सा माधुरी माधुरी** ॥

पुत्रं या हनुमन्निभं प्रजनयेत् सा वानरी वानरी ।
या विद्याधनधर्मकीर्तिकलिता सा चातुरी चातुरी ॥
या सन्नीतिविवेकतो विजयिता सा जित्वरी जित्वरी ।
या नारायणनाममोदमधुरा **सा माधुरी माधुरी** ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

(असुरानुद्दिश्य)

आशुकवि-श्रीहरिशास्त्री, सम्पादकः

न सुखं स्वल्पमपि ये
प्रापयन्ति जनानिह।
असुरास्ते निगद्यन्ते
नराः सच्छास्त्रकोविदैः ॥१॥

१—जो जन कभी किसी को तनिक भी कोई सुख नहीं पहुंचाते हैं, वे शास्त्रविदों द्वारा असुर कहे गये हैं (कहे जाते हैं)।

न रक्षन्ति शरण्यान् ये
लुण्टन्ति पथिकान् सदा।
ते राक्षसा निगद्यन्ते
नराः सच्छास्त्रकोविदैः ॥२॥

२—जो जन किसी शरणागत की रक्षा किसी प्रकार भी नहीं करते हैं और उन्हे तथा सदैव पथिकों को लूटते रहते हैं। वे नर शास्त्रवेत्ताओं द्वारा राक्षस कहे जाते हैं।

वचनं कटु रूक्षं च
दयाहीनं च मानसम्।
येषान्तेऽपि समुद्दिष्टा
असुरा राक्षसा अपि ॥३॥

३—जिनका वचन कडुवा और रूखा होता है एवं मन दया (करुणा) से हीन होता है वे भी लोग विशेषविज्ञों द्वारा असुर और राक्षस कहे जाते है।

ये वै निरर्थमेवाऽत्र
बाधन्तेऽन्यहितं सदा।
विद्वद्भिस्तेऽपि कथिता
असुरा राक्षसाः खलु ॥४॥

४—जो लोग व्यर्थ ही परहित को नष्ट किया करते हैं, विद्वान् जन निश्चय ही उन्हें भी असुर और राक्षस कहते हैं।

न तैः सहानुवर्तव्यं
न हि मान्यं च तद्वचः।
ते कदापि न सन्धेया
इति नीतिविदां मतम् ॥५॥

५—ऐसे (असुरों राक्षसों) मनुष्यों से कोई व्यवहार नहीं करना, न उनकी बात पर विश्वास करना न उनकी बात मानना, न वे मिलने योग्य ही हैं क्योंकि वे किसीके साथी नहीं होते हैं इस तरह का नीतिज्ञ विद्वानों का मत है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. No. J 7
Licence No. PP. 6
"Licenced to Post.
Without Prepayment"

एक राष्ट्रीय उत्पादन

३५००० से अधिक श्रमिकों को काम देने वाला

श्रेष्ठतम सामग्रियों से निर्मित

मेंगलूर

गणेश बीड़ियां

धूम्रपान करने वालों की अति प्रिय

प्रधान कार्यालय

मेंगलूर गणेश बीड़ी वर्क्स

विनोबा रोड : मैसूर-५

दूरभाष : ४२१

तार : AROMA

प्रकाशकः—जयबहादुरसिंह पता : भारती भवन, गोपालजी का रास्ता, जयपुर। दूरभाष : ७५४६६
राधेश्याम शर्मा द्वारा श्री [illegible] में मुद्रित। फोनः ६३१५९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतमासिकस्य

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार
22 NOV 19

स्वतन्त्रे गणतन्त्रेऽस्मिन् भारते प्रतिभारते ।
भगवान् गणनाथोऽयं गुणिगण्यः प्रसीदतात् ॥

श्रावणभाद्रपदाङ्कौ

१९

११

वार्षिकमूल्यं सप्तमुद्राः ७.००
एकप्रतेः सप्ततिपणाः ०.७०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान–मध्यप्रदेश–गुजरात–महाराष्ट्र–मद्रास–आंध्र–उत्तरप्रदेश–
बिहार–पञ्चनद–सर्वकारैः स्वीकृता

विषय-सूची

क्र० सं०	लेखाः	लेखकाः	पृष्ठसंख्या
१.	मङ्गलम्	श्रीहरिशास्त्री, सम्पादकः, जयपुरम्	४१५
२.	कालिदासस्योपमाविलासः	श्रीभगवान्शरणभारद्वाजः, बरेली	४१६
३.	मनोविनोदकणिका	मधुपः, जयपुरम्	४१८
४.	आश्रमशुकः	वैद्य–श्रीरामस्वरूपशास्त्री, बम्बई	४१९
५.	विचित्रलग्नघटीयन्त्रम्	स्वामी श्रीलक्ष्मणशास्त्री, नागौरः	४२०
६.	यात्रापत्रम्	श्रीनवलकिशोरकाङ्करः, जयपुरम्	४२१
७.	वामनविजयम्	आचार्य–श्रीविश्वनाथमिश्रः, बीकानेरः	४२५
८.	शिवराज्योदये महाकाव्ये ४१ तमः सर्गः	डा० श्रीधरभास्करवर्णेकरः, नागपुरम्	४२७
९.	उद्घाटनभाषणम्	श्रीविश्वनाथशास्त्री, वाराणसी	४३१
१०.	लिङ्गविषयकोविचारः	वैद्य श्रीबदरीप्रसादशास्त्री, प्रपूर्णा	४३७
११.	श्रीदुर्गासप्तशती ७ अध्यायः	अनु० श्रीहरिशास्त्री, सम्पादकः जयपुरम्	४४३
१२.	सम्पादकीयम्	'मधुपः', सहसम्पादकः	४४७
१३.	लघुकथा	श्रीगिरिराजशर्मा शास्त्री, जयपुरम्	४५०
१४.	प्रहेलिका	श्री भी० त्र्यं० केढे, जालना	४५४
१५.	सूक्तिसुधा	आशुकवि–श्रीहरिशास्त्री, सम्पादकः	४५५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः
आशुकवि-कविभूषण-
श्रीहरिशास्त्री

सहसम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
साहित्यालङ्कारः

प्रबन्धसम्पादकः
सहसम्पादकश्च
गिरिराजशर्मा

भारती-भवनम्,
गोपालजी का रास्ता,
जयपुरम्

भारती

लेखैरुपस्कृता याऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

वर्षम् १९ | श्रावणः, विक्रमाब्दः २०२६ (सितम्बर, १९६९) | अङ्कः ११

मङ्गलम्

आशुकवि-श्रीहरिशास्त्री, सम्पादकः

सत्कर्माणि विधातुमत्र मनुजाः स्युः सावधाना यतो,
लोकानामशुभः शुभश्च समयो युष्माभिरादिश्यताम् ।
सूर्येन्दुक्षितिजज्ञगीष्पतिसितध्वान्तार्किकेतूनिति,
व्यादेशं ददती प्रभुर्भगवती भव्याय भूयान्मम ॥
देवा विष्णुशिवार्कचन्द्रगणराड् यक्षा हि सिद्धादयः,
स्वान् स्वान्भक्तजनान्यथार्हसमये यस्याः पदाम्भोरुहं ।
सम्प्राप्य नमस्य तत्परिचयं दत्त्वा च तेभ्योऽमृतं,
याचन्ते सफला भवन्ति च, मनस्तां देवतां सेवताम् ॥

मासावतरणम्

वर्षाभिः सरितोऽखिला अपि रजोम्लानाः प्रकुर्वन्नयं,
सर्वां भूमिमहो सुरूपरुचिरामापादयन्सर्वतः ।
शंभुं विल्वदलैश्च रुद्रपठनै रभ्यर्चयन्सादरं,
श्रीमान् भ्राजति भूतले तपविपद्विद्रावणः श्रावणः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालिदासस्योपमाविलासः

ले०—श्रीभगवानशरणभारद्वाजः 'प्रदीपः' बरेली

कालिदासः सुरसरस्वतीकमनीयालङ्कारः, संस्कृतकाव्याकाशकलाधरः, अशेषविश्वपण्डितमण्डलाखण्डलैर्वन्दितचरणारविन्दः, कविताकामिनीशेखरतिलकश्चास्तीत्यत्र नास्ति कापि संशीतिर्कणिकापि। तस्य काव्यकादम्बिनीं दर्शं-दर्शं मनो मयूरायते चातकायते च। हृदयन्तु केनाप्यननुभूतपूर्वरसोद्रेकेण परिप्लावितं सम्पद्यते। बुद्धिरप्यनायासत एव तद्वशवर्त्दा भवति। कालिदासीयं काव्यं त्वनवद्यानन्दविलसितमस्ति। तत्सौन्दर्यमियत्तया वर्णयितुं सरस्वत्यपि न क्षमा। स नूनं कविकुलगुरुः।

स उपमा-सम्राड् वर्तते। अस्यालङ्कारस्यातीव हृद्यः प्रयोगस्तत्कृतिषूपलभ्यते। उपमा शैलूषी कथ्यते स्वव्यापकत्वात्। कालिदासोऽस्याः प्रयोगे नितरां दक्षो विद्यते।

कवेर्दृष्टिर्हिमगिरौ पतति। हिमवाँस्तस्मै मानदण्ड इव प्रतीयते—

अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधीवगाह्य
स्थितः पृथिव्या इव मानदण्डः॥
(कुमार० १।१)

उमा स्वमातुरङ्के विराजते। सुता सौन्दर्येण जननीमपि प्रकाशयति—

तया दुहित्रा सुतरां सवित्री
स्फुरत्प्रभामण्डलया चकासे।
विदूरभूमिर्नवमेघशब्दा-
दुद्भिन्नया रत्नशलाकयेव॥
(कुमार० १।२४)

उमावपुर्नूतनतारुण्येनाक्रान्तमस्ति—

उन्मीलितं तूलिकयेव चित्रं
सूर्यांशुभिर्भिन्नमिवारविन्दम्।
बभूव तस्याश्चतुरस्रशोभि
वपुर्विभक्तं नवयौवनेन॥
(कुमार० १।३२)

उमा अभिनवक्षौमवस्त्रं धारयित्वा दर्पणे स्वाननच्छविमालोकयति। प्रतीयते यत् पूर्णचन्द्रेण प्रकाशिता शरद्यामिनी क्षीरोदधितटमाश्रयते—

क्षीरोदवेलेव सफेनपुञ्जा
पर्याप्तचन्द्रेव शरत्त्रियामा।
नवं नवक्षौमनिवासिनी सा
भूयो बभौ दर्पणमादधाना॥
(कुमार० ७।२६)

निशा समागता। दिक्षु तमः प्रसरति। कमलानि मुद्रितानि सञ्जातानि। चन्द्र उदयति। सुधांशुकिरणावली तिमिरं नाशयति। इन्दुर्नायको निशा च नायिका, मरीचयोऽङ्गुल्यः, मुद्रितानि कमलान्येव मुद्रितानि नेत्राणि। पश्यन्तु सुधियस्तावत्कल्पनामाधुर्य्यम्—

अङ्गुलीभिरिव केशसञ्चयं
संनिगृह्य तिमिरं मरीचिभिः।
कुड्मलीकृतसरोजलोचनं
चुम्बतीव रजनीमुखं शशी॥
(कुमार० ८।६३)

धवलं हासवर्णमिति कवि-परम्परा। मेघदूते कविः कैलासं सुरवधूदर्पणं शिवस्य राशीभूतमट्टहासमिति वर्णयति—

गत्वा चोर्ध्वं दशमुख-
भुजोच्छ्वासितप्रस्थसन्धेः
कैलासस्य त्रिदशवनिता-
दर्पणस्यातिथिः स्याः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शृङ्गोच्छ्रायैः कुमुदविशदैर्यो
वितत्यस्थितः खं
राशीभूतः प्रतिदिनमिव
त्र्यम्बकस्याट्टहासः ॥
(पूर्वमेघः, ५८)

मेघ ! तव भ्रातृजाया मम द्वितीयमिव जीवितमस्ति । अहश्चक्रवाकः, सा मे चक्रवाकी । आवयोर्मध्ये सम्प्रति अपरिमेया दूरी । सा बालैव । मन्ये यत्सा शिशिरमथिता पद्मिनीव म्लानानना भविष्यति । कियत्कष्टम् ! —

तां जानीथाः परिमितकथां
जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे
चक्रवाकीमिवैकाम् ।
गाढोत्कण्ठां गुरुषु
दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां
पद्मिनीं वान्यरूपाम् ॥
(उत्तरमेघ० २०)

गताः सुखदिवसाः । संयोगकाले चश्चन्द्र-मयूखाः सुखावहा आसन्, ते कालेऽस्मिन् सन्तापदाः जाताः । यक्षप्रियायाः नेत्रे अश्रुपूर्णे जाते । दिवसे स्थलकमलिनीवत् सा न प्रबुद्धेव भविष्यति, न च सुप्तैव—

पादानिन्दोरमृतशिशिराञ्जालमार्गप्रविष्टान्
पूर्वप्रीत्या गतमभिमुखं संनिवृत्तं तथैव ।
चक्षुः खेदात्सलिलगुरुभिः पक्ष्मभिश्छादयन्तीं
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम् ॥
(उत्तरमेघः, २७)

निशाचरमुक्ता उर्वशी चन्द्रोदयेऽन्धकारविमुक्ता रजनीव, धूममुक्ता अनलार्चिरिव मृत्तिकापङ्किल उज्ज्वलतामुपगतो गङ्गापयःपूरः—

आविर्भूते शशिनि तमसा मुच्यमानेव रात्रिर्-
नैशस्यार्चिर्हुतभुज इव च्छिन्नभूयिष्ठधूमा ।
मोहेनान्तर्वरतनुरियं लक्ष्यते मुच्यमाना
गङ्गारोधःपतनकलुषा गच्छतीव प्रसादम् ॥
(विक्रमोर्वशीयम् १।६)

रघुवंशस्य द्वितीयीके सर्गे नन्दिनीं सुदक्षिणा तथैवानुजगाम यथा स्मृतिः श्रुत्यर्थमनुसरति—

तस्याः खुरन्यासपवित्रपांसु-
मपांसुलानां धुरि कीर्तनीया ।
मार्गं मनुष्येश्वरधर्मपत्नी
श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ॥
(रघु० २।२)

दिलीपेन यदा जलप्रपाताद् दृष्टिराकृष्य गवि पातिता, तदा पीतवर्णः सिंहो दृष्टिगोचरतामुपयातः—

स पाटलायां गवि तस्थिवांसं
धनुर्धरः केसरिणं ददर्श ।
अधित्यकायामिव धातुमय्यां
लोध्रद्रुमं सानुमतः प्रफुल्लम् ॥
(रघु० २।२९)

दिलीप आपन्नसत्त्वां सुदक्षिणां रत्नगर्भां धरित्रीं, अग्निगर्भां शमीं, अन्तस्सलिलाञ्च सरस्वतीमिव मन्यते—

निधानगर्भामिव सागराम्बरां
शमीमिवाभ्यन्तरलीनपावकाम् ।
नदीमिवान्तःसलिलां सरस्वतीं
नृपः ससत्त्वां महिषीममन्यत ॥
(रघु० ३।९)

इन्दुमतीस्वयम्वरस्य दृश्यम् । इन्दुमती यं नृपतिमुपगच्छति स आशावान् जायते, किन्तु यदा सा तं विहाय अन्यमुपयाति, तर्हि तन्मुखं विवर्णं जायते—

सञ्चारिणी दीपशिखेव रात्रौ
यं यं व्यतीयाय पतिम्वरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे
विवर्णभावं स स भूमिपालः ॥
(रघु० ६।६७)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अजोऽतीवमृदुनीत्या शशास, निर्ममत्वं परित्यज्य जनाननुरञ्जयामास—

सदयं बुभुजे महाभुजः
सहसोद्वेगमियं व्रजेदिति ।
अचिरोपनतां स मेदिनीं
नवपाणिग्रहणां वधूमिव ॥
(रघु० ८।७)

पुष्पकविमानमारूढो राघवो मैथिल्यै समुद्रं दर्शयति, कूटं, गङ्गायमुनयोः सङ्गमं च निर्दिशति—

त्वया पुरस्तादुपयाचितो यः
सोऽयं वटः श्याम इति प्रतीतः ।
राशिर्मणीनामिव गारुडानां-
सपद्मरागः फलितो विभाति ॥
क्वचित्प्रभालेपिभिरिन्द्रनीलै-
र्मुक्तामयी यष्टिरिवानुविद्धा ।
अन्यत्र माला सितपङ्कजाना-
मिन्दीवरैरुत्खचितान्तरेव ॥
क्वचित्खगानां प्रियमानसानां
कादम्बसंसर्गवतीव पंक्तिः ।
अन्यत्र कालागुरुदत्तपत्रा
भक्तिर्भुवश्चन्दनकल्पितेव ॥
क्वचित्प्रभा चान्द्रमसी तमोभि-
श्छायाविलीनैः शबलीकृतेव ।
अन्यत्र शुभ्रा शरदभ्रलेखा
रन्ध्रेष्विवालक्ष्यनभः प्रदेशा ॥
क्वचिच्च कृष्णोरगभूषणेव
भस्माङ्गरागा तनुरीश्वरस्य ।
पश्यानवद्याङ्गि विभाति गङ्गा
भिन्नप्रवाहा यमुनातरङ्गैः ॥
(रघु० १३।५३-५७)

अग्निवर्णनिधनोन्मुखत्वाद्राजकुलस्य कियती हृदयद्राविका स्थितिः--

व्योमपश्चिमकला स्थितेन्दु वा
पङ्कशेषमिवधर्मपल्वलम् ।
राज्ञि तत्कुलमभूत्क्षयातुरे
वामनार्चिरिव दीपभाजनम् ॥
(रघु० १६।५१)

कालिदासस्य रसभारभरोद्भिन्ना भारती-मराहृते को विजानाति ? अहं तु मल्लिनाथमेव प्रमाणभूतं मन्ये—

कालिदासगिरां सारं कालिदासः सरस्वती ।
चतुर्मुखोऽथवा साक्षाद् विदुर्नान्ये तु मादृशाः ॥

मनोविनोदकणिका—

मूर्खाणामस्ति बाहुल्यम्

नागरिकः— कश्चिद् ग्राम्यं जनं कोपाद् भर्त्सयन्निदमब्रवीत् ।
'इदानीमपि संसारे मूर्खाणां नास्ति न्यूनता' ॥

ग्रामीणः— भवति वर्तमाने तु कथमेतन्न सम्भवि ? ॥

—दीनानाथत्रिवेदी मधुपः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आश्रम-शुकः

ले० वैद्य-श्रीरामस्वरूपशास्त्री, सम्पादकः बालसंस्कृतम्, बम्बई ७७

(१)

शाखास्वहो आश्रमपादपानां वसामि नित्यं वसतौ मुनीनाम् ।
आश्नामि जम्बूनि च दाडिमानि ह्याम्राणि स्वादूनि सदा यथेष्टम् ॥

(२)

गृणामि नामानि शुभानि विष्णोः श्रीकृष्ण गोविन्द हरे मुरारे ! ।
पदानि चादाय पठद्वटुभ्यो भणामि साधूनि शुभाषितानि ॥

(३)

स्वस्थैः प्रसन्नैः शिशुभिर्मुनीनां जागर्मि प्रातर्मुदितः सदैव ।
खेलामि कूर्दामि रमे कुमारैः तिष्ठामि मौनी मुनिभिश्च सायम् ॥

(४)

उड्डीय चाकाशपथा सुदूरं निर्माय सङ्गं सखिभिः समेतः ।
भ्रमामि चात्राश्रमतीरजानाँ शिरःसु तिष्ठामि महोरुहाणाम् ॥

(५)

ज्ञानं हि शास्त्राणि विचारयद्भ्यः शृणोमि सूक्तानि पठन्मुनिभ्यः ।
गङ्गां च तीरे वहतीं वगाह्य प्राप्नोमि पुण्यानि गुणार्जितानि ॥

(६)

भवन्ति धन्यानि धनानि पुण्यैः धनैश्चतैः सह सिद्ध्यन्ति कामाः ।
सिद्धेषु कामेषु भवन्ति धर्माः धर्मेषु कल्याणपरम्पराः स्युः ॥

(७)

क्षुद्रोऽपि चेन्मन्दमतिः खगोऽपि जानाति सङ्गेन सतां शुभानि ।
कुतो न धीरश्चतुरो मनुष्यः कं कं गुणं नार्हति कांच सिद्धिम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विचित्रं लग्नघटीयन्त्रम्

ले०—स्वामी श्रीलक्ष्मणशास्त्री, संस्कृतविद्यालयाध्यक्षः, नागौरः (राजस्थानं)

वियति भवद्भिः कदाचिद् दृष्ट स्वित्! यद् उदीच्यां दिशि ध्रुवनाम्नी तारकैकास्ति। सा सदैवैकत्र तिष्ठति। अन्यतारकावद् सा न भ्रमति। तद्ध्रुवताराया बहिः परितः किमपि तारकद्वयं सदा परिभ्राम्यत् परिदृश्यते। घट्याः केन्द्ररूपेण ध्रुवतारास्ति। घट्याः कररूपं च तत्तारकद्वयं स्वपरिभ्रमणेन निम्नोक्तपद्यानुसारेण दर्शकेभ्यः समयं सूचयति—

तुलालग्नं प्राच्यां दहनविदिशायामलिधनू,
यमाशायां नक्रो घटतिमितनू यातुविदिशि।
प्रतीच्यां मेषाङ्गं वृषभमिथुने यायुविदिशि,
ह्युदीच्यां कर्काङ्गं हरविदिशि सिंहोऽथ
युवतिः ॥१॥

अर्थात्—यदा तत्तारकाद्वयं ध्रुवतारायाः पूर्वस्यां दिशि वर्तते तदा तुला लग्नम्, आग्नेय्यां वृश्चिको धनुश्च, दक्षिणस्यां मकरलग्नम्, नैर्ऋत्यां कुम्भो मीनश्च, पश्चिमायां मेषलग्नम्, वायव्यां वृषो मिथुनं च, उत्तरस्यां कर्कलग्नम्, ऐशान्यां सिंहः कन्या च लग्नं भवेत्, इति।

इदं परमेश्वरनिर्मितं समयप्रदर्शकं घटीयन्त्रमस्ति। अयं ध्रुवतारारूपेण दृश्यमानो ध्रुवलोकोऽस्ति। यत्र ब्रह्मणः प्रपौत्रः, स्वायम्भुवस्य मनोः पौत्र उत्तानुपादस्य राज्ञः पुत्रो ध्रुवस्तिष्ठति। यो ध्रुवः पञ्चवर्षवयस्येव श्रीविष्णुं प्रसाद्य तं लोके प्रपेदे, एतद्विषये श्रीमद्भागवतस्य चतुर्थस्कन्धेऽष्टमाध्यायादारभ्य द्वदशाध्यायपर्यन्तं वर्णितं ध्रुवाख्यानं मनोविनोदाय तत एवावगन्तव्यम् पाठकमहोदयैः—इति।

❀ अयं विचित्रलग्नघटीसूचको लेखोऽतिप्राचीनश्चमत्कारकश्च पाठकानामस्माभिरस्माकमतिप्राचीनपुस्तकालयस्य कस्मिंश्चित् पुस्तके जीर्णशीर्णदशायामुपलब्धात् अत्यशुद्धिसहितादेकस्मात्पत्रादधिगतः। लेखोयं संशोध्यास्माभिर्यथामति संस्कृतभाषायामनूद्य वहुषु साम्प्रतं विश्रुतेषु संस्कृतपत्रेषु प्रकाशितः। एतल्लेखविषयो बहुषु ज्यौतिषग्रन्थेषु नोपलभ्यते।

दी अवध शूगर मिल्स लिमिटेड

प्रधान कार्यालय :—
इण्डस्ट्री हाउस
१५९ चर्च गेट रिक्लेमेशन
बम्बई—१

मिल्स :—
हरगांव
जिला—सीतापुर
उत्तरप्रदेश

निर्माता :—
शुद्धा, श्वेता, कणवती शर्करा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

❀ यात्रापत्रम् ❀

श्रीमत्सु साहित्यार्णवकर्णधारेषु विद्वद्धौरेयेषु सुहृद्वर्येषु तत्रभवत्सु श्रीजगदीशशर्म-साहित्याचार्येषु समुल्लसन्तु सपुरस्कारा नमस्काराः ।

अयि अभिन्नहृदयाः सहृदया महोदयाः,

पत्रमधिगतम्, कुशलं वर्त्ते । अपि प्रतिपलं कुशलं कलयन्ति भवन्तः सपरिवाराः ? मन्ये, परिणाम-परिलेखनकर्म तु समं समवसितमेवेति विनान्तरायम् । इह सह सहधर्मिण्या निकेतनमधिवसतो मम त्रिगुणानि सप्त दिनान्यवसितानि । अव्यभिचारिणीयं मे लिखिनिर्यदत्र स्वर्गाश्रमं समया समयेऽस्मिन् मया स्वर्गसुखमेवानुभूयतेऽनुदिनम् । इयमेवास्ति मे साम्प्रतिकी दैनिकी चर्याः—

अद्यप्यत्र महत्येव प्रत्यूषे साधूनां सौस्नातिकानां "उठे या नहीं, न्हाये या नहीं, उठो ठंडा पानी पड़ेगा" इत्यनेन तुमुलेन कर्णकटुकोलाहलेन निद्रा विद्राव्यते, तथापि शयनवसनं त्यक्तवतो मे मानसे विविध-निविड-विटपि-विटप-परिकर-संश्लिष्ट-लतारूढ-विहग-निवह कृत-कलकल-स्वनेन कस्याप्यपूर्वानन्दथोर्विजृम्भणं जाजायते, आलस्यसमवायश्च समूलमुत्खन्यते । ततः कुश-कुसुम-दल-फल-मूलबहुलेषु वनेषु बहुदूरं मलमूत्रोत्सर्गक्रियां समाप्य तुषारासार-शीतलायां पुण्यतोयायां गङ्गायां कृत-धर्माभिषेक-नैयमिकावश्यकक्रियेण मयका सुरसरिदुपकूलमेव सन्ध्योपासन-पाठपूजादिकं विधीयते तदनन्तरं समीर-रय-विकम्पित-साल वेणु-सहकारादिपादपैः कृतातिथ्यपरम्परासु वनराजिषु स्वास्थ्यवर्धनोऽप्यङ्गप्रकम्पनः सुखस्पर्शनः स्पर्शनः परिसेव्यते । पथि च प्रायः प्रतिदिनमेव 'मस्तबाबा'ऽभिधः कश्चनान्वर्थाभिधानो महात्मा गङ्गाकूलं निकषा कन्दरायामेकस्यां संवसन्नध्यक्षीक्रियते । अयं हि दिव्यौषधि-रस-रसायनमिव गाङ्गं पानीयं पायं पायं परिपुष्टगात्रो नैसर्गिक-सुन्दरावयवविन्यासः सुभग-भाल-कपोल-कर्ण-नासः शम-दम-यम-नियम-समर्जित-श्रुत-शील-सदाचारादिगुणाश्रयोऽपि शिशुरिव परिहासस्वभावः, अविरतं भगवद्गुण-श्रवण-स्मरण-विवरण-परायणोऽपि स्मितवदनेन्दीवर-महोत्सवेन स्वं समया दर्शनार्थमुपस्थितानां वनितानामपि मनःसु पञ्चेषोः सशरासनमिषुमिवोपदधानः परितः परिलम्बमान-मसृण-कुटिल-जटिल-प्रभूता-सित-कचकलापेन प्रचुरेण ब्रह्मवर्चः प्रभावेण च मूर्त्तिमान् प्रथमाश्रम इव शोभमानो विराजते । सोऽयं नित्यमनुसवनं विना पुस्तकं भगवतीं भागवतीं कथां कथयति । यथेच्छं गीतामपि गायति । एनमेके शुकं कथयन्ति, अन्ये व्यासं समवगच्छन्ति, परे सूतं निर्दिशन्ति, कतिपये च लोमशं वदन्तीत्युल्लेखालङ्कृतेरुदाहृतित्वमुपगच्छन्नयं समेषां विश्वासपात्रतां श्रद्धास्पदताञ्च बिभर्त्ति ।

अस्मिन्नेव समीरसेवनान्तराले कतिचन भाग्यशालिनो जना यदा कदा यत्र कुत्र कन्दरासु कृतावासानां धर्माभिषेकक्रियाकैतवेन च विविक्ते गङ्गाकूले समागतानामसिताजिनचैलेन स्नान-सान्द्र-श्वेत-जटाजालेन च विराजमानानां शीतोष्ण-वातवर्षादिष्वपि गिरिचराणामिव नागानां पूर्णमनावृतावयवानां भव्यभालेनाभिव्यक्तवर्चसां महीयसां तपोजुषां दर्शनेनात्मानं पावयन्ति । कथयन्ति हि तद्विदो जना यदिमे मासस्य द्विरिहायान्ति गङ्गास्नानाय । अहमप्येकदा वनान्तात् प्रत्यावर्त्तमानः प्रातः कुरङ्गप्लुतैः पर्वतशिखरमारोहन्तं शङ्ख-सित-जटाजूट-मण्डितं महर्षि-वसिष्ठ-निर्विशेषं कमपि मुनिविशेषं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नातीदूराद् विलोक्य प्रहर्षजवोद्भिद्यमानपुलककुलको यावत् साक्षात्कर्त्तुं तदन्तिकमगच्छम्, तावन्न जाने कुत्र गतो वा तत्रैव तिरोधानमभजदित्यहमपि हस्तभ्रष्टद्रविण इव कृपणस्तमेवानुशोचन् प्रत्यागच्छम् । अस्तु ।

गौरीगुरोः पावनं पवनं परिसेव्य समागतेन मया किञ्चिद्विश्रम्य यदा कदा समुचितमूल्यलब्धा रस-मधुरिमाधरीकृतसुधाधाराः शुद्धाज्यवत्यो रसवत्योऽप्यास्वाद्यन्ते जठराग्नि शक्तिमुद्वीक्ष्य । ततः स्वाध्यायो विधीयते । मध्याह्ने चोचितार्थक्रीत-चूर्ण-तण्डुल-सूप-शाकादिवस्तुजातेन व्यञ्जनादिकं सम्पाद्याकण्ठमुदरः परिपूर्यते, किञ्चिद् विश्रम्य स्वपितिसुखं वाऽनुभूय वृत्तपत्रादिकञ्च गोचरीकृत्य प्रूफपत्रसंशोधन-पुस्तकादिलेखन-पत्रप्रेषणादिकं नियमरूपेण कर्मानुष्ठीयते ।

अथ सायं पुनः कृतशौचादिक्रियाकलापेन भगवत्या भागीरथ्याः प्रभूते नहि नहि परमपूते प्रवाहे वारि-विहाराभिषेकामोदः सञ्चीयते मया । दिवसेष्वेषु गङ्गातटीयः सायङ्कालिकः शोभनतमः समयः कस्य वाधन्यस्य चेतसि ब्रह्मावाप्तिसहोदरं सातिशयं सातं न जनयति ? किमन्यत्, सुखावहेन मञ्जुलतमेन समयेन प्रवर्धमानानुरागभरासावितहृदयः परमौत्कण्ठ्य-प्रवृत्त-प्रणय-प्रवाहः पूषणोऽपि प्रेयसीं प्रतीचीं समालिङ्गितुमिव त्वरितं त्वरितं पलायमानो लोलुप्यते । तथा रजनीरमणोऽपि स्वकीयां रमणीं सभाजयितुमिव करधृतधवलवसनः शनैः शनैः समागच्छन् सहृदयानां मनःसु कमप्युल्लास-विलासं समुत्पादयति । इह हि समयेऽस्मिन् कुत्रचिद् वारिविहार-दोहदेन समायाता विभिन्न-प्रान्तसीमन्तिन्यः कामोष्माणं सान्त्वयितुमिव जलविहरण-परायणा विलोक्यन्ते । कुहचिच्च स्नानक्रियानुकूले गङ्गाकूले समुत्तारितवसना अपि शीतलजलावगाहनभीताः प्रवाहं नाभि-विशमानाः केवलं चरणोत्पलाभ्यां पानीयं समुत्फालयन्त्यो यौवनमद-मत्त-कान्त-कुन्तल-कमनीया अनिमिषलोचनावलोकनीयाः सुललित-भाव-विलास-विलसितावयवरमणीया हठाच्चक्षूंषि समाकर्षन्ति तटमुपगतानां जरठानामपि किम्पुनर्यूनाम् । कतिचन च कमलवदनाः सुललितललना जलमवगाह्य गङ्गाम्भसामुत्पलक्षतिं क्षपयन्त्य इव तरन्त्यः सुमनसामपि मनो मोहयन्ति । कस्मिंश्चिच्च सुर-स्रोतोवहातटवर्त्तिनि मुक्ताचूर्णकणनिकरेणेव सिकता-सित-कण-विच्छुरिते विविक्ते प्रदेशे स्वैरमितस्ततो भ्रमन्त्यः काम-कोदण्डायित-भ्रूमण्डल-सुभग-मुख-पङ्कजश्रिया श्रियमुपहन्त्यश्च मेदिनीमण्डलमणयो रमण्यो रमणैः सह गीर्वाणनगरनिवासिनोऽस्तिरस्कुर्वत्यश्चेतांसि चोचुरति । अथापरत्रामरसरित्तटे परिधृतपीताम्बराः परित्यक्तसमाडम्बराः करपरिधृतारकूटकरका धरामराः सायं सन्ध्यामुपासितुं शैवलिनीजल प्रविष्टा देवदीर्घिका-सलिलावतीर्णान् महर्षिप्रवराननुहरन्ति । सायं समये स्वतः समुद्भूत-प्रभूत-प्रभावभारेण गन्धवहप्रवाहेण जन्हुकन्यायां साम्रेडमुत्पद्यमाना विलीयमानाश्च विमला वीचिमाला अपि दरिद्राणां वाञ्छा इव प्रतीयन्ते ।

एवं सायङ्कालिकं नन्दनोद्यानमिव स्रवदमरसरिदानन्दसन्दोहं चायं चायं लोकं लोकञ्च लोकातिगं तत्रत्यं दृश्यं विचित्रमदभ्रं रसास्वादं चयमानो निकेतनं प्रत्यावृत्त्य सायमशनं च विधाय सार्धनववादनं यावत्तत्राभिमुखं भगवतः प्रार्थनायां सम्मिल्य दशवादनात् पूर्वमेव परमप्रसादपूरिते प्रासादे सुखस्वापं कुर्वन्नपि स्वप्ने तान्येव बुद्धिसात्कृतानि दैनिकानि दृश्यानि साक्षात्कुर्वन् रात्रिन्दिवं तामेवामन्दां मुदं लालभ्ये । एषाऽस्ति मे नैत्यिकी दिनचर्या ।

अत्रैकदा प्रचण्डतायाः शिखरिशिखरं समारूढे निदाघराजे सहसैवापराह्ने वर्षाकालिकः समयः समभवत् । झटिति गिरि-गह्वर-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तरु-कानन-विकम्पनः प्रभञ्जनश्चलितुं समारब्धः। अथ क्षणेनैव परितः पर्वतमाला इव मेघमाला वियति समजञ्जन्यन्त। ताश्च बहोः कालाद् वियुक्ताः सख्य इव परस्परं प्रेम्णा सम्मिल्य घोरान्धकारं जनयन्त्यश्च प्रेमाश्रुप्रवाहमिव पृथुलस्थूलजलबिन्दुभिर्भूरि भूमिमभ्यषिञ्चन्। वारिदाश्च तासां मिलितिमहोत्सवमभिनन्दन्त इव पटहध्वानं वितन्वन्तो व्यराजन्त। चपलाश्चापि चापल्येन चोद्यमाना नृत्यन्त्य इव क्षणे क्षणे प्रकाशं विस्तारयन्त्यः किमप्यपूर्वं शर्म समयच्छन्। एवं स्वल्पेनैव समयेन सर्वतः कापि प्राकृतिकी वार्षिकी विच्छित्तिरत्र समवालोलुक्यत सर्वैः। नैदाघप्रसारोऽपि तत्कालमेव चौर इव कुत्रापि व्यलीयत। मेघमालाश्चापि समेषामस्माकं मनस्तोषं चेतःशान्तिञ्च विधाय तत्रविप्रुषा तत्पर्यासीव खण्डशो भूत्वा न जाने कुत्र व्यलीयन्त। कुमुदिनीनाथोऽपि पीयूषपूरमिव सिञ्चन् दिवि समुदैत्।

अथान्येद्युः प्रभातेऽत्रत्याः कतिचन यात्रिणो जनाः सस्त्रीका हर्षवर्षकं लोचनरोचकं कालमाकलय्य भगवतो नीलकण्ठस्य दर्शनार्थमुदचलन्। अहमपि पत्नीद्वितीयः कृतनिश्चयो विविधनव-नव-वनरुहामोद-मुदित-वदनायाः काननश्रियः सन्दर्शनाकृष्टहृदयस्तानन्वगच्छम्। अनालोकितपूर्वमासीत्तद्धि मे नीलकण्ठमन्दिरम्। तत्तु निकेतनादस्मादुपर्युपरि पर्वतं गव्यूतित्रयमवर्त्तत। परं गव्यूतिद्वयन्तु परमो विषमो मार्गं आसीत्। नावर्त्तत कुत्रापि सरलः पन्थाः। प्रायः सर्वत्रैवाविद्यत समुद्घातिनी मेदिनी। भाग्यात् तदैव प्रभञ्जनोऽपि स्वसैन्येन साकं तत्रोपस्थाय सर्वानप्यस्मान् रजस्वलाक्षानचरीकरीत्। तेन पदे पदे प्रास्खलन् सचिक्कणेषु पाषाणखण्डेषु नः पादप्रक्षेपाः। क्षणे क्षणे चाध्वन्यमुष्मिन् नैकविध-प्रसून-स्तबक-फल-किसलय-शोभाभार-नम्यमान-लतावलयेन कशाघातेनेव सम्मुखं हन्यमाना वयं नैकपदमपि पुरोगन्तु सहसा सक्षमा अभूम। मम पत्न्यास्तु विचित्रैव दशाऽजायत। सा पूर्वमेव निर्बला रुग्णा चासीत्, साम्प्रतञ्च पर्वतारोहणश्रान्ता क्लान्ता कथमपि पदात् पदमपि गन्तुमशक्नुवती पुरोयायिभ्यो जनेभ्यः शपते स्म। अतस्तत्रैव मध्येमार्गं स्वल्पं विश्रम्य पुनरपि समूर्जितोत्साहेन नवीनीकृता इव वयमग्रे चलन्तो वनान्ताद् वनान्तं, गिरिशृङ्गाद् गिरिशृङ्गं, अपत्यकातोऽपत्यकां, तरुलता-गुल्मवृन्दात् तरुलतागुल्मवृन्दं समुल्लङ्घ्य परितः परिराजमानानां कोटि-कीर-निकरातिशायिहारित्यानां समिथुनानेक-विहग-वृन्द-विहित-निकेतनानाम्, अन्यत्र चाहाराकुल-शावककुल-कृत-विविध स्वनमुखरितानां सालताल-तमालादितरुराजानां नाकादप्यधिकानन्ददायिशोभासमूहानां रामणीयकं दर्शं दर्शमात्मानं धन्यं मन्यमाना मध्याकाशमुपगतवति भगवति विवस्वति सर्वे वयं नीलकण्ठशिखरमगमाम। तत्र गत्वा तु गेहे प्रमुदितानुरक्त-कलत्र-पुत्र-पौत्रपरिवारा गृहपतय इव वयं सर्व एव कमप्युद्भुतं सुखसमवायमलालम्भ। तत्रारान्मन्दिरान्मण्डूककुल-कलित-हृदयस्तटं मुभयतश्च तरुषु शुकशावक-कुल-कृत-कलकलारावः सूनशोभा-भार-नत-लता-बाहुभिर्वनराजिभिर्विहितनमस्कार एकः स्वच्छजलधरः सुनिर्झर आसीत्। यद्वारिमाधुर्यं सुधासौन्दर्यमपि न्यक्कुर्वत् स्वर्वासिनामपि हृदयेषु तत्पानस्पृहां तानयति। निःसन्देहं सोऽयं निर्झरः प्रकृतिदेव्याः स्वच्छमुकुर इव गिरिपतितः कश्चन गगनतलावतार इव, प्रवहन् पारदप्रवाह इव, कैलासवासिनः शङ्करस्य विशदाट्टहास इव विराजमानः सर्वेषामस्माकं लोचनमहोत्सवोऽबोभवीत्। अत्रैव वयं राजीवराजमान-वारिभिः कर-पाद-वदनानि प्रक्षाल्य भगवन्तं नीलकण्ठञ्च जलेना-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भिषिच्य साकमानीतेन भोज्यवस्तुनोदरदेवमप्यभ्यर्च्य किञ्चिद्विश्रम्य च भूयोऽपि पीयूषमिव स्वादूदकं कामं निपीय ततः प्रचलिताः। भगवान् मरुत्वानपि करुणायेव मन्दानिलेन सार्धं तत्र वार्दलान् छत्रनिचयानिवातानयत्। अतः प्रत्यावर्तनेऽनेहसि नेषदपि कष्टमस्पृशन्नः। प्रत्युत गिरिसानून्यध्यासीना वार्दला मन्दानिलेन लम्बायमाना भवन्तो नगाधिराजस्य पताकाप्रसारा इव शोभमाना अस्माकं मनांस्यचोचुरः। गिरिशिखरादस्तमनेऽनेहसि सहस्ररश्मेर्दृश्यमपि कामपि कमनीयतामभजत। मन्ये, पङ्कीभूतानां मयूखानां भारातिरेकेण स्वात्मानं विनाधारं वियति धारणेऽक्षमो रविबिम्बो जलनिधौ पतन् समेषां दयाभाजनतामलभत। निकेतनं समागच्छति समागच्छति स्वस्मन्मण्डले यावद् भास्वानस्तमगच्छत् पश्चिमाकाशे च स्वल्पविभाभासितास्तारकाः स्वर्णाचलशिखर-संस्थित-मार्तण्डरथस्याश्वचक्रयोः सङ्घर्षसमुत्थिता वह्निविस्फुलिङ्गा इव व्यराजन्त, तावद्वयमपि स्वालयमुपेत्य सर्वे सायङ्कालिकं भोजनादिकं सर्वं कृत्यजातं सम्पाद्य निद्रादेव्या विशदेऽङ्के विश्रमितुमगच्छाम।

एवमहमत्र सपत्नीको बहुविध-वृजिन-परितापतप्यमानमात्मानमनुपलभ्यानन्दविनोदेन समं गाङ्गेन पानीयेन शीतलयन् स्नापयंश्च सद्यः परनिर्वृतिं लभे। परन्त्विदन्त्वनुभवाम्येव—

वरीवृषति वार्दलाः क्रमुककल्पबिन्दुव्रजैः
विबोभुवति गर्जना मधुर-मन्द्र-सान्द्रस्वनाः।
सरीसृजति यद्यपि प्रकृतिरण्यमन्दां मुदं
तथापि भवतो विना प्रियवरा! न शान्तेः कणः॥

शेषं सर्वविधं कुशलमविकलं वर्तते, भवता वृत्यताम्। आयुष्मन्तो बालकाश्चाशीर्भिरभिनन्द्यन्ताम्। किमन्यदिदमन्यत्तु—

युष्माकं भ्रातृपादेषु वासुदेवमहात्मसु।
अस्माकं नतयः सन्तु युष्माभिर्विनिवेदिताः॥

इहाधिकादधिकं मासस्यान्तिमं सप्ताहं यावत्तिष्ठासा वर्तते। यतो मिमेलिषति मे मनः प्रतिदिनं भवतः। अतः प्रस्थाय च यथासमयं दिनद्वयं हरिद्वारे स्थित्वा जयपुरे भवतो द्रक्ष्यामीति—

दिनाङ्कः — कविशिरोमणिः
२०-६-६९ — आचार्य-श्रीनवलकिशोरकाङ्करः
पारीककालेजः, जयपुरम्।

शुभ कामनाओं के साथ

* इन्डो फॉरेन एजेन्सीज़ *

२३, सर फिरोजशाह मेहता रोड़,

बम्बई – १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

❀ वामनविजयम् ❀

प्रणेता—श्रीविश्वनाथमिश्रः, शार्दूलसंस्कृतविद्यापीठं, बीकानेरः ।

[मान्या मनीषिणः! गतेष्वङ्केषु श्रीमिश्रमहोदयेन विरचितं **कलिकौतुकाभिधमभिनवं** नाटकं तत्रभवद्भिर्विद्वद्भिः पठितमेव । पुनश्चेदानीं भारतीपाठकानां पण्डितानां मनोविनोदाय तथा विद्यार्थिनाञ्चोपकाराय 'श्रीवामनविजयं' नाम नवं तन्नाटकं समुपस्थाप्यते, यद्धि विद्यापीठस्य वार्षिकोत्सवे तत्रत्यैश्छात्रैः सम्यगभिनीतं तदानीं तत्र समुपस्थितैर्विशिष्टैर्नागरिकैर्विपश्चिद्भिश्च भृशं प्रशंसितमभूत् ।

वस्तुतः श्रीमिश्रमहोदयो लेखनकलाकुशलो विद्वान् विद्यते—इतीह नास्ति मनागपि सन्देहः । सहैव चायं मिश्रमहानुभावः संस्कृतस्य प्रचार-प्रसारात्मके कर्मणि चानुपमं सहयोगं वितरन् वर्तत इत्यतोऽमन्दमानन्दमनुभवामि, तदर्थञ्च श्रीमिश्रमहानुभावाय हृदयेन धन्यवादांश्चार्पयामि—इति—

मधुपः]

प्रथमं दृश्यम्

(सामूहिकं गानम्)

जय वृषभध्वज शिव त्रिपुरारे ?
भालनयनभवभीतिनिवारण !
योगनिरत स्रुतिसागरतारण !
त्र्यम्बक मारदहन दनुजारे ॥
जय वृषभध्वज"""" ॥१॥

दर्पितदक्षविहितमखभञ्जन ?
आशुतोष हर नतजनरञ्जन ?
निगमनिवेदित नेति विचारे ॥
जय वृषभध्वज"""" ॥२॥

अपुनर्भवसुखशान्तिनिधानम्
कोऽपि न वेद विपुलमहिमानम्
क्वापि वससि वचसामिह पारे ॥
जय वृषभध्वज"""" ॥३॥

द्वितीयं दृश्यम्

(ततः प्रविशति सूत्रधारः पारिपार्श्वकश्च)

सूत्रधारः—अप्यहो कथमिव दृश्यते अशान्तं वातावरणम् । देशस्यान्तरिकं बाह्यञ्च निखिलमेव तरवमान्दोलितमिवावलोक्यते । यच्च भारतम्—

जेता संग्रामभूमे—
रतुलबलनिधिर्मानिनामेकनेता,
गोप्ता धर्मस्य शास्ता,
कुमतिगतिजुषां विद्विषां दुर्मदानाम् ।
मेधावी धीरधुर्यः
श्रुतिविमलमतिर्वेदवेदाङ्गवेत्ता,
भूत्यै भूयात् शिवोऽयं
निखिलभवहितो मूर्तिमानार्यदेशः ॥

पूर्वमेवं विख्यातमासीत् तत्रैवेदानीं कथमौदासीन्यं नैराश्यञ्च दृष्टिपथमवतरति ? आश्चर्यम् ! महादाश्चर्यम् ।

पारिपार्श्वकः—प्रिय वयस्य ! सत्यमेव भणति भवान् । आसीत् पूर्वं तादृशः समयः यदा इदमेव भारतं जगति भूस्वर्गपदवीमध्यगात् । विकासभूमिः सभ्यतायाः सन्देशवाहको विश्वबन्धुतायाः, प्रचारकः मनुष्यतायाः आदर्शः शालीनतायाः अयमेव देशः आसीत् । अहमपि स्मरामि पुरातनं भव्यं भारतीयगौरवम् । श्रूयताम्—

वङ्गैरुद्दामशक्तिः श्रमनिरतजनै-
रुत्कलैरुन्नतश्रीः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नीतौ मद्रै रनिद्रः स्मृतसुगतगुणै-
रेधमानो विहारैः ।
सन्नद्धो लब्धकीर्ती रणशिरसि सदा
वीरपङ्क्ताम्बुजातैः,
संस्कर्ता संस्कृतीनां जगति विजयते
भारतं नाम देशः ॥

परन्तु अस्मिन् नवनिर्माणसमये अलमतीत-चिन्तया । नीतिरप्याह—गते शोको न कर्त्तव्यः । तस्मात् वर्तमानमेवानुलक्ष्याचरणीयं किमपि ।

सूत्रधारः—मित्रवर्य ? अतीतस्योपहासं न न कुरु । अतीतमेवास्माकं नवनिर्माणस्याधार-शिला भविष्यति ।

पारिपार्श्वकः—नाहमतीतमुपहसामि । किन्तु हस्तोपरिहस्तं धृत्वा केवलम् अतीतम्, अतीतम्, इति रटनेन कार्यं न चलिष्यति । किं विस्मृतोऽसि यत् अनेकशतवर्षाणि यावत् पार-तन्त्र्यशृङ्खलायां कीदृशमस्य देशस्य, ताडनं, लुण्ठनं, दोहनं, शोषणञ्च जातम् । देशवासि-नाम् सत्येन संकल्पेन अपूर्वेणोत्साहेन, स्तुत्येन प्रयासेन च जाते कथमपि स्वातन्त्र्ये पार्श्ववर्तिना विश्वासहीनेन चीनेन आक्रान्तं भारतं पुनरपि आन्दोलितं जातमास्ते । अत एव सर्वत्र वाता-वरणे प्रातिकूल्यं दृष्टिपथमायाति ।

सूत्रधारः—बाढम् । यथार्थमभिहितं प्रिय-वयस्येन । साम्प्रतं निःसंशयं मे मनः । तदत्रा-स्मिन् अवसरे समवेतानां सभ्यजनानां मनो-विनोदाय कोऽपि नियोगोऽनुष्ठीयताम्, येनामन्दा-नन्देन सह प्रसूता भवेत् कापि नवीनप्रेरणा, देशस्य नवनिर्मितिश्च सुचारुतया सम्पद्येत ।

पारिपार्श्वकः—ननु भवानेवात्र विषये निर्दिशतु किमपि ।

सूत्रधारः—अस्मिन् रचनात्मके निर्माण-समये यदा शत्रवः अस्माकं योजनाबद्धं कार्यं विनाशयितुं तत्पराः सन्ति, तदा 'व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः' इति नीतिमनुसृत्य इदानीं "वामन-विजयम्" नामकं नाटकमभिनेतव्यम् । मन्ये नाटकेनानेन आनन्दोपलब्धिपुरः सरमिदमपि विज्ञात भविष्यति यत् बलेन, छलेन, येन केना-प्युपायेन वा शत्रवो विजेतव्या एव भवन्तीति ।

पारिपार्श्वकः—शोभनम्, शोभनम् ! निर्वा-चितं खलु सर्वथा सामायिकमेव नाटकम् । भगवद्भक्तिसंचारणे नवीनाभाप्रसारणे च नाटकमिदं सफलतां गमिष्यतीति मे दृढः प्रत्ययः ।

सूत्रधारः—तर्हि अलं विलम्बेन । पात्राणि रङ्गमञ्चे अवतारणाय त्वरितमेव प्रेरणीयानि । रसभावभरितायाः अस्याः परिषदः सम्यक् परितोषाय यतनीयमस्माभिः ।

पारिपार्श्वकः—उचितमेवाह भवान् । नाटके क्रियमाणः विलम्बः भवत्युद्वेजकः सामाजिका-नाम् । तदेहि अविलम्बितमेव पात्रप्रवेशाय प्रयतावहे ।

(उभौ निष्क्रान्तौ)

क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ श्रीशिवराज्योदये महाकाव्ये

४१ तमः सर्गः

महाकविः डॉ० श्रीधरभास्करवर्णेकरः, डी.लिट्, नागपुरम्

पूर्वानुवृत्तम्—

स एवं कोङ्कणं जित्वा स्वराज्यरिपुमर्दनः ।
प्रत्याजगाम विजयी शिवो राजगढं प्रति ॥१॥

सम्प्राप्ते शिशिरे काले विगलत्तरुपल्लवे ।
रजोधूसरिताकाशे शुष्कशीर्णतृणाङ्कुरे ॥२॥

असुखस्पर्शनस्पर्शे सुखस्पर्शाग्नितेजसि ।
चन्द्रप्रायस्फुरत्सूर्ये हिमप्रायजलाशये ॥३॥

त्वरायितप्रदोषे च विलम्बितदिनोदये ।
युगायितत्रियामे च क्षणायितदिने तथा ॥४॥

घननिहारसञ्चारमलिनीभूतचन्द्रिरे ।
शीतलानिलसंपर्कनिस्सत्त्वीकृतभास्करे ॥५॥

प्रज्वलद्वह्निसान्निध्यसम्पुञ्जीभूतनिर्धने ।
विचित्रोर्णिकसद्वस्त्राच्छन्नगात्रमहाधने ॥६॥

कोष्णशय्यासुखासक्तिप्रशयानाखिलालसे ।
कवोष्णकूपाम्भःप्रातःस्नानोत्सुकसुधार्मिके ॥७॥

प्रफुल्लकुन्दकुसुमे परिम्लानाम्बुजाकरे ।
निष्फलाखिलमाकन्दे सुफलोदुम्बरद्रुमे ॥८॥

प्रातः कुज्झटिकाच्छन्नतुङ्गपर्वतशेखरे ।
सायं गोचरणोध्दूतरजोलुप्तमहावने ॥९॥

चिरं भानुकरस्पर्शसौख्यसुप्रियदक्षिणे ।
तुषारानिलसंस्पर्शक्लेशनातिप्रियोत्तरे ॥१०॥

स राजगढवास्तव्यः शिवः स्वे सदने स्थितः ।
सुहृद्‌भिर्मन्त्रयामास शालाखानविमर्दनम् ॥११॥

तानुवाच सुहृद्वर्यान् निजादेशवशंवदान् ।
दुस्साहमयं किञ्चित् कार्यं सुचिरचिन्तितम् ॥१२॥

योऽयं दिल्लीपतेरत्र मातुलोऽतुलदुर्मदः ।
महाराष्ट्रे समायातस्तमिच्छामि निषूदितुम् ॥१३॥

चिरेण तेन दुष्टेन जनताऽत्र प्रपीडिता ।
कष्टं जीवति हा हा धिक् सौनिकायत्तगौरिव ॥१४॥

क्षत्रियाणां परो धर्मो ह्यापन्नपरिपालनम् ।
स चेन्न पाल्यते सम्यग् धिगस्तु हतजीवितम् ॥१५॥

प्रमत्तम्लेच्छनिवहैर्धर्षितानां गृहे गृहे ।
कुलाङ्गनानामाक्रन्दाः क्रथयन्तीव मामिह ॥१६॥

गृहीतकरवालोऽहमाखेटिक इव स्वयम् ।
प्रविश्य निलये तस्य ऋक्षवत् तं विदारये ॥१७॥

महासाहसिकस्यैवं ज्ञात्वा तस्य मनीषितम् ।
व्यामूढभावमापन्ना धीरा अपि सुहृद्वराः ॥१८॥

सुदुर्घटमिदं कर्म कथङ्कारं विधीयताम् ।
इति चिन्ताकुलाः सर्वे तूष्णींभावं प्रपेदिरे ॥१९॥

तेषु कश्चिद् विलम्बेन मौनमुद्रां प्रभेदयन् ।
मन्दं मन्दं मनाग्भीतः कथञ्चिद् वच आददे ॥२०॥

राजन् वीरवरस्येदं तव साहसकांक्षितम् ।
सुदुर्घटमिति ब्रूयात् को नु त्वद्विक्रमं स्मरन् ॥२१॥

त्वया स्वल्पबलेनापि चतुरङ्गबलान्वितः ।
विनाशितोऽफझुलोऽसौ राघवेणेव रावणः ॥२२॥

पर्णालदुर्गे ग्रस्तस्त्वं जौहरेण दुरात्मना ।
ततोऽपि बहिरायातो राहुवक्त्रादिवार्यमा ॥२३॥

त्वया निसर्गधीरेण देव सान्नहुकेन हि ।
यद् यदाचरितं कर्म तत्तदन्यस्य दुष्करम् ॥२४॥

परन्त्विदानीं यद् देव ! कर्तुमिच्छसि साहसम् ।
सर्वथा दुष्करं मन्ये जानन्नपि बलं तव ॥२५॥

सपादलक्षसंख्येन सैन्येनातिबलीयसा ।
संरक्ष्यते दिवानक्तं हन्तव्यः स रिपुस्तव ॥२६॥

अनीक्षिता न गच्छन्ति यत्र ते मशका अपि ।
कथं नु त्वादृशः शस्त्री प्रविशेत् तत्र सद्मनि ॥२७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुरात्मनोऽन्तःकरणे सद्बोधोऽपि समाविशेत् ।
गृहे नु शास्ताखानस्य प्रवेशस्तव दुर्घटः ॥२८॥

राहोरपि शिरो भूमौ पतेच्चन्द्रकराहतम् ।
त्वच्चन्द्रहासाघातेन कथं नु रिपुमस्तकम् ॥२९॥

मेघोदबिन्दवोऽपीयुर्भुवं भित्त्वा रसातलम् ।
व्यूहमुल्लङ्घ्य तत्सद्म कथं नु तव सैनिकाः ॥३०॥

स्फुलिङ्गोऽपि हि नेत्रान्तः प्रविशेदकृतव्यथः ।
गृहीतकरवालस्त्वं द्विषतोऽन्तर्गृहे कथम् ॥३१॥

पिपीलकोऽपि प्रसरेद् गूढं श्रवसि हस्तिनः ।
अत्यन्तचपलोऽपि त्वं कथं नु रिपुसद्मनि ॥३२॥

रक्षिणो जागरूकास्ते घोरशस्त्राः सहस्रशः ।
गृध्रदृष्ट्या निरीक्षन्ते चराचरविचेष्टितम् ॥३३॥

प्रसरन् गन्धवाहोऽपि शिबिरान्तरितस्ततः ।
रक्षकैः कुत एतीति स गन्धेन परीक्ष्यते ॥३४॥

एवं सेनानिवेशं तं दुष्प्रवेशतमं रिपोः ।
प्रविश्य राजन्नेकाकी कथं शत्रुं हनिष्यसि ॥३५॥

तत् तस्य भाषितं श्रुत्वा सुहृदः संशयात्मनः ।
बलान्मौनमुपाश्रित्य शिवः सस्मितमैक्षत ॥३६॥

सखाय इङ्गितज्ञास्ते साकूतं वीक्ष्य तत्स्मितम् ।
निरस्तभयसन्देहा अहसन्नुच्चकैर्मुदा ॥३७॥

कश्चिदन्योऽब्रवीद राजन् संशीतिस्त्वयि नोचिता ।
कार्यसिद्धिः सरीसर्ति यस्य ते वचसोऽग्रतः ॥३८॥

अविनिश्चित्य साफल्यं कर्तव्यस्य स्वकर्मणः ।
वृथा न वाचमादत्ते कर्मयोगी भवादृशः ॥३९॥

मर्त्यलोके ह्यसंकल्प्यं स्वर्गलोकेऽपि दुर्घटम् ।
यद् ब्रूते तत् करोत्येव कर्मयोगी भवादृशः ॥४०॥

भाग्यवन्तो वयं नूनं पामरा वनवासिनः ।
चिन्तामणिरिव प्राप्तो यैरिह त्वादृगग्रणीः ॥४१॥

आदिदिक्षसि यद्यन्नः करणीयं सुदुष्करम् ।
तत्तदेवावगच्छ त्वं कृतमित्येव तत्क्षणे ॥४२॥

तवाभीप्सितमित्येव सफलं कर्म तावकम् ।
यत्ना हि पामराणां नः प्रायो यान्ति निमित्तताम् ॥४३

कृष्णस्यैव महाशक्त्या स गोवर्धन उद्धृतः ।
तोषाय किन्तु गोपानां तत्तलस्पर्शडम्बरः ॥४४॥

त्वया संकल्पितं कार्यं तव शक्त्यैव सेत्स्यति ।
सन्तोषः परमस्माकं त्वत्साहाय्यमुपेयुषाम् ॥४५॥

इति तद्भाषितं शृण्वन् नितान्तानतमस्तकः ।
निर्विण्णस्तवनेनेव ततो निर्यातुमुत्थितः ॥४६॥

सुहृदः पारिषद्याश्च समुत्थितमवेक्ष्य तम् ।
सह तेनैव तत्कालं प्रतिबिम्बवदुत्थिताः ॥४७॥

तस्यामेव निशीथिन्यां चराः कपटकोविदाः ।
रिपुरन्ध्राणि विज्ञातुं सम्प्रचेरुः शिवाज्ञया ॥४८॥

शूरा नियुद्धनिष्णाताश्चतुःशतमितास्तदा ।
दुरूहं साहसं कर्तुं संगृहीताः सुहृद्वराः ॥४९॥

शुद्धाष्टम्यर्धरात्रे हि चैत्रमासस्य निश्चितम् ।
सहसाक्रम्य दुष्टस्य शास्ताखानस्य मर्दनम् ॥५०॥

रमझानोपवासेन निशि भुक्त्वाऽऽमिषं भृशम् ।
गाढनिद्रावमग्नेषु यवनेष्वखिलेष्वपि ॥५१॥

खड्गचर्मधरो धीरोऽनुयातो वीरसैनिकैः ।
महावीरः प्रतस्थेऽसावुत्खातुं लोककण्टकम् ॥५२॥

स्थले स्थले निरुद्धास्ते यद्यप्यरिगणैर्निशि ।
न शशाक परिज्ञातुं कोऽप्यमून् छद्मकोविदान् ॥५३

प्राविशन् क्रमशः सर्वे सहसा तं महालयम् ।
शास्ताखानः स यत्रासीत् सुखनिद्रावशंगतः ॥५४॥

नानाविधविलासानामुपयोगैरखण्डितम् ।
परिश्रान्ता यवन्यश्च यत्रासन् स्वप्नमोहिताः ॥५५॥

आरक्षिणश्च यत्रत्या भूरिभोजनतुन्दिलाः ।
निरस्तभीतिसन्देहाः स्वप्नस्वर्गमिवारभन् ॥५६॥

प्रातराशार्थमन्नानि पचितुं पाककोविदाः ।
सूदाः केचन यत्रासन् व्यापृताः स्वस्वकर्मसु ॥५७॥

यो यो दृष्टिपथं प्राप्तः सुप्तो जागरितोऽथवा ।
कृतान्तकवलीभूतः खड्गाघातहतः स सः ॥५८॥

इष्टिकापिहितं द्वारं विनिर्भिद्यान्तरं द्रुतम् ।
प्राविशन् सदनान्तस्ते यत्रासीन्निद्रितो रिपुः ॥५९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्रत्यो यवनः कश्चिद् विनिद्रः सहसोत्थितः ।
भिया दुद्राव वेगेन शास्ताखानस्य कोष्ठकम् ॥६०॥

स तमाह महाभीतिग्रस्तवाक्शक्तिसञ्चरः ।
सदनान्तः समायाताः केऽपि शस्त्रधरा इति ॥६१॥

सुखस्वप्ननिमग्नोऽसौ बोधितोऽप्यमुना भृशम् ।
शय्यां मृद्वीममुक्त्वैव चुक्रोध परिबोधिने ॥६२॥

गच्छ गच्छ महामूढ दुःस्वप्नेनासि बाधितः ।
मा स्म भङ्क्षीः सुखस्वापं चिरजागरितस्य मे ॥६३॥

यूयमारक्षिणः सर्वे प्रकृत्यातीवघस्मराः ।
रमजानोपवासेन नक्तं खादथ भूरिशः ॥६४॥

अत्याहारेण कुप्यन्ति वातपित्तादयो भृशम् ।
येषां, ते निशि पश्यन्ति स्वप्नानशुभसूचकान् ॥६५

इति ब्रुवति सक्रोधं तस्मिन्निद्रासुखालसे ।
प्रविष्टस्तत्र वेगेन लसत्खड्गधरः शिवः ॥६६॥

व्याविद्धाः यवनाः सर्वे यवन्यश्च भयार्दिताः ।
चक्रन्दुरुच्चकैर्घोरं दृष्ट्वा तन्मृत्युताण्डवम् ॥६७॥

भीत्यातिकम्पमानाभिर्धावन्तीभिरितस्ततः ।
वात्याभिरिव दासीभिर्दीपाः निर्वापिताः क्षणात् ६८

तत्र गाढतमोमग्ने सदने भीतिसंकुले ।
विद्युल्लता अभासन्त भ्रमत्खड्गलतामयाः ॥६९॥

निजान्यभेदमज्ञात्वा यो यः पुर उपागतः ।
ताभिः कृतान्तजिह्वाभिः स स द्राक्कवलीकृतः ॥७०॥

फत्तेखानाभिधः पुत्रः शास्ताखानस्य दुर्भगः ।
नियुध्यमानः पित्रर्थे तत्कालं पञ्चतामगात् ॥७१॥

अवध्या अपि शूराणां धार्मिकाणां विशेषतः ।
अकस्मान्निर्हता: काश्चिच्छास्ताखानस्य योषितः ।७२

योषितश्चतुराः काश्चित् तद्रक्षणपरायणाः ।
निन्युरन्तःप्रकोष्ठं तं गूढं जवनिकावृतम् ॥७३॥

स्वखड्गाघातवध्यं तं दुष्टारातिं गवेषयन् ।
शिवो विवेश तत्रैव क्रोधोद्दीप्तविलोचनः ॥७४॥

पलायमानमालोक्य तं नीचमतिकातरम् ।
संडनीलीलयोत्प्लुत्य शिवःखड्गमपातयत् ॥७५॥

आसन्नमृत्युकालोऽपि दुर्भाग्येन स रक्षितः ।
कुतोभाग्यविहीनस्य मरणं शिवखड्गतः ॥७६॥

खड्गाघातेन विच्छिन्नसव्यपाण्यङ्गुलीत्रयः ।
शास्ताखानो विदुद्राव कथञ्चन जिजीविषुः ॥७७॥

मत्वा निषूदितः शत्रुरिति शीघ्रं बहिर्ययौ ।
भयार्तजनसम्मर्दात् शिवः प्रागरुणोदयात् ॥७८॥

तेऽप्याहतावशिष्टाश्च कृतकृत्याः सुहृज्जनाः ।
यथागतं बहिर्जग्मुरविज्ञाता अरातिभिः ॥७९॥

इति रिपुमतिलीलयैव दुष्टं
परिपीड्य स्वबलेन भूरिसैन्यम् ।
तदवधमवगत्य दूतवाक्यात्
कृतकृत्योऽपि शिवो न तोषमाप ॥८०॥

इति श्रीशिवराज्योदये महाकाव्ये
शास्ताखानविमर्दनाख्यः
एकचत्वारिंशत्तमः सर्गः
समाप्तः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान प्राच्यविद्या प्रतिष्ठान, जोधपुर

- द्वारा -

शोध, संदर्भ एवं दुर्लभ महत्त्वपूर्ण ग्रंथों का

राजस्थान पुरातन ग्रंथमाला के अन्तर्गत प्रकाशन

प्रकाशित ग्रंथों की सूची

(ख) राजस्थानी-हिन्दी

प्रकाशन का नाम	सम्पादक	मूल्य
कान्हड़दे प्रबन्ध	प्रो० के० वी० व्यास	रु० ६२-२५
क्यामखां रासा	डा० दशरथ शर्मा और अगरचन्द भंवरलाल नाहटा	,, ४-७५
लावा रासा	श्रीमहताबचन्द खारेड़	,, ३-७५
बांकीलाल री ख्यात	श्रीनरोत्तमदास स्वामी	,, ५-५०
राजस्थान साहित्य संग्रह भाग १	,, ,, ,,	,, २-२५
,, ,, ,, भाग २	डा० पुरुषोत्तमदास मेनारिया	,, २-७५
कवीन्द्रकल्पलता	रानी लक्ष्मीकुमारी चूडावत	,, २-००
जुगलविलास	,, ,, ,,	,, १-७५
भगतमाल	श्री उदयराज उज्ज्वल	,, १-७५
राजस्थान, पुरातत्व मंदिर के हस्तलिखित ग्रंथों की सूची भाग १	पद्मश्री मुनि जिनविजय, पुरातत्वाचार्य	,, ७-५०
राजस्थान प्राच्यविद्या प्रतिष्ठान हस्तलिखित ग्रंथों की सूची भाग २	श्री गोपालनारायण बहुरा	,, १२-००
राजस्थान हस्तलिखित ग्रंथ सूची भाग १	पद्मश्री मुनि जिनविजय, पुरातत्वाचार्य	,, ४-५०
,, ,, ,, भाग २	डा० पुरुषोत्तमदास मेनारिया	,, ३-७५
स्व० पुरोहित हरिनारायणजी विद्याभूषण ग्रंथ संग्रह	श्री गोपालनारायण बहुरा	,, ६-२५
मुहता नैणसी री ख्यात भाग १	श्री बदरीप्रसाद साकरिया	,, ८-५०
,, ,, ,, भाग २	,, ,, ,,	,, ९-५०
,, ,, ,, भाग ३	,, ,, ,,	,, ८-००
,, ,, ,, भाग ४	,, ,, ,,	,, ८-.५
राजस्थानी साहित्य संग्रह भाग ३	श्री लक्ष्मीनारायण गोस्वामी	,, ५-५०
सूरजप्रकाश भाग १	श्री सीताराम लालस	,, ८-००
,, भाग २	,, ,, ,,	,, ९-५०
,, भाग ३	,, ,, ,,	,, ९-७५
नेहतरंग	श्री रामप्रसाद दाधीच	,, ४-००
मत्स्य-प्रदेश की हिन्दी साहित्य को देन	डा० मोतीलाल गुप्त	,, ७-००

पुस्तक विक्रेताओं को २५ प्रतिशत कमीशन दिया जाता है।

(राजस्थान सरकार द्वारा प्रसारित)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विगते जनवरीमासे वाराणसीस्थ-सार्वभौम-संस्कृत-प्रचारकार्यालयद्वारा समयोजितो संस्कृतप्रचारसम्मेलने—असमप्रदेशीय-लोकसभासदस्यानां सम्माननीयनां—

श्रीविश्वनाथशास्त्रिमहोदयानाम्

उद्घाटन-भाषणम्

यामृषयो मन्त्रकृतो मनीषिणः
अन्वैच्छन् देवास्तपसा श्रमेण ।
तां देवीं वाचं हविषा यजामहे
सा नो दधातु सुकृतस्य लोके ॥

सम्माननीयाः सभापतिमहोदयाः
गुणगणालंकृताः मान्याः प्रतिनिधयः
सभास्ताराः सुधियश्च

सर्वप्रथममहं सार्वभौम-संस्कृत-प्रचार-कार्यालयस्य सञ्चालकमहोदयेभ्यस्तदनु स्वागत-समित्याः सदस्येभ्यश्च कृतज्ञतां प्रकटयितुमिच्छामि यैरहं सामान्योऽपि जन एतादृशाऽसामान्य-विद्वज्जनमण्डलमण्डितस्यास्य सम्मेलनस्य उद्घाटनाय सस्नेहमामन्त्रितः। परन्तु अहं कया वाचा, कैर्वा शब्दैर्भवादृशां विदुषां मानसमावर्जयानीति न जाने । चन्द्रिका हि अब्धिमुत्तरलीकरोति न खद्योतः। पुनश्च असमप्रदेशवासिनो वयं सम्प्रति बहोः कालात् मुस्लिमजनानां विरोधिभावनया नागा-मिजो-प्रभृतिभिः पर्वतीयजनैः सह भाविताभिर्विषमसमस्याभिस्तथा असमप्रदेशं विभज्य तत्र नूतनपहाड़ीराज्यस्य संघटनचर्चया तदीयभाविफलाफलचिन्तया च भृशमाकुलान्तःकरणाः भाषासाहित्यसंस्कृति-सम्बन्धिनीभिश्चर्चाभिः किञ्चिद्दूरमपवाहिताः स्म। सम्प्रति भारतभुवः पूर्वीयसीमान्तस्य शत्रुदेशतः सम्पृक्तस्य च अस्य प्रदेशस्य केनोपायेन एकतासुरक्षा च सुदृढा स्यादित्येतद्विषये सर्वेषां मनो मस्तिष्कं च बलात् प्रभावितं करोति । परन्तु उपर्युक्तानां भाषा-साहित्य-संस्कृतीनामुपेक्षा तथा तद्विषयक-स्वकर्तव्यपालनाच्च्युतिरेव भारतस्य वह्वीनां समस्यानां प्रधानं कारणमित्यादि वयं सम्यगवगच्छामः। अतः साम्प्रतमपि यद्यस्माभिरस्यां दिशि ध्यानं न दीयते, स्वकर्तव्यपालनं च न क्रियते तर्हि न केवलं राष्ट्रस्य हानिः, अस्माकं कर्तव्यविरति-रूपमयशोऽपि चिराय भारतीयेतिहासे सुप्रतिष्ठितं स्यात् । एतदेव सर्वमालोच्य, भवद्भ्यश्च कामपि प्रेरणां ग्रहीतुकामः श्रीमतामेतस्मिन् शुभानुष्ठाने सम्मिलितः, संस्कृतभाषायाः तत्प्रचारस्य च विषये प्राप्तकालं किञ्चिन्निवेदयितुमिच्छामि ।

मान्या मनीषिणः

"संस्कृतं नाम दैवीवागन्वाख्याता महर्षिभिः" इति कथयता दण्डिना संस्कृतस्य दिव्यत्वं दीप्तिमतीत्वं च प्रतिपादितम् । संस्कृतं नाम न कस्यचिद् प्रान्तस्य केषाञ्चिद् जनानां केवलं कार्यविशेष-निर्वाहार्थं वा प्रयुक्ता भाषा, अतो नेयं संकीर्णा स्थाननामाङ्किता जननामाङ्किता वा। संस्कृतं हि सर्वेषु देशेषु सर्वेषामेव जनानां कृते सर्वकार्यार्थं परिशीलिता भाषा, तस्मादेव संस्कृतस्य संस्कृतत्वम् ।

इयमेव भाषा भारतीय-संस्कृतेः मूलं भूत्वा न केवलं तां द्रढीयसीं करोति अपि तु तस्याः उदारतां विश्वजनीनताञ्च सम्पादयति । तेनैव विभुन्नेषु कालेषु राज्यनाश-गणविप्लवादिभिः प्रतिघातकैः प्रतिहन्यमाना अपि भारतीय-संस्कृतिः रूपान्तरमेव भजते, न तु सर्वथा मूलाद् विच्छिन्ना जाता, जायते वा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतभाषाया वैभवं साहित्य-दर्शन-विज्ञानादिकं वा समधिकृत्य मयात्र कथनं पुनरुक्तवद् भविष्यति। संस्कृतभाषा महिमामयी सहृदय-हृदयसंवाद-वहने चाद्वितीया, अर्थव्यञ्जनाया द्योतने च सर्वाः भाषाः अतिशेते इति कथनमपि अनवीकृतमेव। नहि अत्र कस्यापि वैमत्यं वैरस्यं वा। ननु संस्कृत-विद्वेषिणापि एतदनस्वीकार्यमेव।

सर् हेरेस् हेमन उइलसन्-महोदयेन संस्कृत-विषये यदुक्तं तदेवास्मिन् प्रसंगे सर्वथा स्मरणीयम्—

न जाने विद्यते किं तद् माधुर्यमत्र संस्कृते।
सर्वदैव समुन्मत्ता येन वैदेशिका वयम्॥
यावद् भारतवर्षं स्याद् यावद् विन्ध्य-हिमाचलौ।
यावद् गंगा च गोदा च तावदेव हि संस्कृतम्॥

संस्कृतं केवलं धर्मकार्यार्थमेव, अतः संस्कृतं खलु धर्मभाषेति भ्रान्तिविलासो न कस्यापि विदुषो मनसि अद्यत्वे पदं करोति।

खृष्टजन्मनः प्राग् बहुतिथेभ्यः कालेभ्यः स्थितिं प्रचारं च लभमाना संस्कृतभाषा न केवलं धर्मकार्याय नियोजिता अपि तु धर्मभाषा-राष्ट्रभाषा-ग्रन्थभाषा-जनभाषा इति अवस्था-चतुष्टयं प्राप्ता सर्वासां भारतीयानां भाषाणां जननी पालनी च भूत्वा सर्वोत्तमा विराजते स्म। साहित्यदर्शनादिकमारभ्य आयुर्वेदार्थशास्त्र-कामशास्त्र—ज्योतिर्विज्ञानादिषु विषयेषु संस्कृतमय-ग्रन्थाः विरचिता अभवन्, युद्धविद्या-उद्भिद्विद्या-रन्धनविद्या-वास्तु विद्या-चौर्यविद्यादिषु अपि प्रस्थानेषु विरचिताः ग्रन्थाः संस्कृतस्य सर्वात्मकत्वम् उद्घोषयन्ति।

नृपतीनां राजपुरुषाणाञ्च स्वशासनेषु पर-राष्ट्रसम्बन्धि, लोकेषु संस्कृतमपरिहार्यमासीदिति राष्ट्रभाषारूपेण अस्याः स्थितिः सन्देहकोटिविनिर्मुक्ता ज्ञायते।

ये खलु विद्वांसः संस्कृतभाषा कदाचित् जनानां मुखे आसीदिति विवदन्ते तेऽपि भाषागतवैशिष्टयमन्वेषयन्तः संस्कृतस्य कथ्यलक्षणाक्रान्तत्वम् स्वीकुर्वन्ति एव। संस्कृतं यदि केवलं ग्रन्थभाषा एव अभविष्यत् तर्हि 'वाढम् अथ किम्' 'आमन्त्रये' 'हन्त' इत्यादयः प्रयोगाः न अलप्स्यन्त।

संस्कृतनाटकानि अभिनीतानि इति सर्वेषां विदितमेव। श्रोत्रनयनतृप्तये खलु नाटकानि अभिनीतानि, अभिनीयन्ते च, न केवलं नयनरञ्जनाय। तस्मात् संस्कृतस्य सर्वबोध्यत्वं कथ्यत्वञ्च सर्वथा स्वीकार्यमेव।

परिव्राट्प्रधानाः चैनिकाः फाहियान्-धर्मोत्तराचार्यप्रभृतयः (हिउवेन चां, खलु धर्मोत्तराचार्य इति कल्हणेन राजतरंगिण्यां वर्णितः।) आल्वेरुणिप्रभृतयश्च ऐतिहासिकाः संस्कृते पटुतां लेभिरे इति संस्कृतस्य धर्मे, दर्शने, राजनीतौ च अपरिहार्यता प्रतीयते।

संस्कृतभाषा मृता कठिना कालपर्युषिता च अतो वैज्ञानिकयुगे इदानीन्तने नोपयुज्यते इति केचिदामनन्ति। एदादृशाभियोगखण्डनाय अत्र अनवसरः अनवकाशश्च, तथापि संक्षेपेण इदमेव वक्तव्यं यत् विक्रमाब्दात् बहुतिथेभ्यः कालेभ्यः इदानीं यावत् एकरूपतया स्थिता अविकृता संस्कृतभाषा पूतिगन्धा न जाता न वा इयं मृत्युलक्षणाक्रान्ता, वरम् अन्यासामपि भारतीयभाषाणाम् इयं संजीवनी। अद्यत्वेऽपि साहित्य-दर्शनादिविषयकाः परश्शताः ग्रन्थाः संस्कृते विरचिता वर्तन्ते इति संस्कृतस्य प्रत्यक्षं सजीवत्वम्। संस्कृतभाषा प्रायः सर्वासां भारतीयानां भाषाणां जननी भूत्वा ताः स्वस्तन्येन परिपोषयति परिवर्द्धयति च इति तस्याः सजीवत्वम् अनुमेयम्। ननु नेयं यदि जीवनो शक्तिः या खलु जीवती सती अन्याः अपि जीवयति, तर्हि का नाम जीवितता?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतभाषा कठिना व्याकरणाककण्टकिता इति उक्तिरपि एकदेशदर्शनदूषिता । या खलु भाषा चतुःसहस्रवर्षप्राचीना विविधभावप्रकाशदक्षा विचित्रशब्दाढ्या सङ्गीतमयी च, यथा एकापि देवी दिक्करवासिनी तीक्ष्णकान्ता ललितकान्तेति द्विधा विराजते, तथा सेयं कठिन सरलात्मिका । ननु पृच्छ्यते, मेकले-यथाचर्हाडिवार्क-प्रभृतिभिर्व्यवहृता आंगलभाषा वा कियद् आर्जवं भजते ।

नहि पाणिनीयेन अनुशासनेन संस्कृतभाषा निरुद्ध-गति-प्रसारा सञ्जाता, न वा अभिनवशब्दगठने अर्थप्रकाशे च खञ्जीकृता, न वा भाषान्तरेभ्यः शब्दानां गुणानां रीतीनाञ्च स्वीकरणे विमुखीकृता । नैतेषु कश्चिदन्तरायो विद्यते । सुनियन्त्रिता वाहिनी यथा कार्यक्षमा अमोघवीर्या अप्रतिहता च भवति पाणिनीयशासनानुशासिता संस्कृतभाषापि स्वे महिम्नि प्रतिष्ठिता सुसंस्कृता बलिष्ठा प्रेरणामयी जंगमा च जाता । यदि संस्कृतम् अनुशासितं नाभविष्यत् तर्हि संस्कृतवाणी अपि प्रान्तीयभाषावत् परस्परविच्छिन्ना बहुधा विभक्ता अभविष्यत्, प्राचीनवाङ्मयः नवीनवाङ्मयात् सर्वथा अन्य इव प्रतीतः स्यात् । तथा सति भारतीयसंस्कृतिरपि छिन्नमूला लतेव शुष्कतामगमिष्यत्, नहि भारतवर्षे इदानीं विराजमाना संहतिः एतादृशी दृश्येत, न वा ऐक्यं यथास्थितमुपलभ्येत ।

नहि कदाचित् संस्कृतवाक् असूर्यम्पश्या बधूरिव रुद्धद्वारे कक्षे निरुद्धा आसीत्, नवा भाषान्तरीयानां शब्दानां न वा अन्यदेशीयानां भावानां वा आत्मीयकरणे वैराग्यं प्रदर्शितवती । सुप्राचीनेऽपि काले संस्कृतवाक् ग्रीक्-पारसी-रोमका-दिभाषातः प्रान्तीयाभ्यो भाषाभ्यश्च शब्दादीन् रीति-गुणादींश्च उपयेमे ।

जवनिका-युत-यामित्र-हीरा-द्रेष्काण-लेष्टुका-पत्रोर्ण-वारवाण-हेलि-पीलु-शिकिदा-फुप्फुस्-कञ्चुप्रभृतयः परः सहस्रशः शब्दा एव अत्र प्रमाणम् । 'जलं खादय' 'विवाहं करु' 'त्वं भावस्व' इत्यादयः परश्शताः प्रयोगाः प्रान्तीयभाषातो गृहीताः संस्कृते ।

संस्कृतस्य प्राञ्जलत्वे सहजबोध्यत्वे च पुराणानि एव प्रमाणम् । विश्वकोषरूपतां भजमानानि पुराणानि प्रायशः अनुष्टुप्-छन्दोभिस्तथा वरचितानि, यथा संस्कृतानभिज्ञैरपि सुखमवबुध्यन्ते ।

अनुस्वार-विसर्ग-बहुलं श्रुतिकठोरं संस्कृतं कीदृक् श्रुतिमधुरं संगीतमयञ्च भवेत् इति चेत् 'चन्दन-चर्च्चित-नील-कलेवर-पीतवसन-वनमाली' इत्यादि जयदेवीय-गोविन्दगीतानि एव प्रमाणम् । यद्यपि छन्दःशास्त्रोक्तविधिना 'संस्कृतपद्यानि विरचनीयानि तथापि प्रान्तीय-भाषातः अपि छन्दःशैलीमनुसृत्य संस्कृतपद्यविरचने केचित् कवयः कृतप्रयत्ना दृश्यन्ते । किं बहुना-कामरूपप्रान्ते एव ईशवीये अष्टादशशतके विरचितानि रूपकाणि तत् दिग्दर्शनं कुर्वन्तु ।

यथा—' यदि तव देव पलायनमेव
नवनीतभोजनभिया
सततताम से मदीयमानसे
क्रियतां प्रवेशनक्रिया ।" (कामकुमारहरणम्)

अन्यच्च-पार्सी-उर्दू शब्दबहुलाः संस्कृतग्रन्था अपि दृश्यन्ते ।

यथा-"……यदि भवति गुरुर्मालखानागृहस्थः ……तस्य दुष्मणो न भवति" इत्यादि ।

अद्यतनी अवस्था—इदानीन्तने काले, विशेषतः स्वाधीनोत्तरे काले, संस्कृतस्य अध्ययनं क्षीणम् अध्यापनं ततोऽपि क्षीणतरं जातम् । नहीदानीं संस्कृतं केवलमवहेलितम् उपेक्षितमपि । प्राक् स्वाधीने काले कतिपयेषु संस्कृतविद्यालयेषु प्राचीनपद्धत्या पठन-पाठनादिकमभवत् । राजकीयानुकूल्यञ्च तत्र आसीत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जनानाञ्च तत्राभिनिवेशः परिलक्षितः। अधुना तु कारणवशात् प्रायशो जनानां गरिष्ठसंख्यकानां संस्कृताध्ययनस्य प्राचीनपद्धतिं प्रति औदासीन्यम्, विद्यार्थिनाञ्च तत्र आग्रहाभावः इति सर्वे अनर्था बहुलीभूय तां लुप्तप्रायां कुर्वन्ति।

नहि इदानीं संस्कृतं बाहुल्येन अर्थसाधनम्। प्राचीनरीत्या संस्कृताध्ययनं राजसेवायाम् अनर्हं करोति इति अपवादो दुर्निवार एव। अर्थस्य पुरुषो दास इति भाषणस्य याथार्थ्यं प्रतिपादयन्ती सती जीवनवृत्तिः जगति क्रमशः कठिनतरा एव जायते।

ज्ञानार्थं सेवनीया महीयसी विद्या अपि देवीत्वं परित्यज्य सेवादासी भूत्वा जनान् सेवते इदानीम्। तस्मात् सेवायाम् अर्हीकरणम् ततश्च अर्थोपार्जनसामर्थ्यम् एतदेव विद्यायाः सेवनीयत्वे सम्प्रति मानदण्डतां गतम्। अस्यां स्थितौ किं कर्तव्यम्? संस्कृतं तथा अध्येतव्यं यथा तया पुरुषो नहि केवलम् अर्थोपार्जनक्षमो भवेत् अपितु देश-कालोचितविहारी च स्यात्। अन्यथा एतस्य प्रतिकारः कदापि न भवेत्।

इदमत्र स्मरणीयम्—संस्कृतज्ञानं विषयान्तरज्ञानलाभे भाषान्तरपाटवे च नान्तरायो भवति, न वा पुरुषं अर्थोपार्जनसामर्थ्यहीनं करोति। प्रमाणानि बहूनि तत्र सन्ति। प्राचीने काले संस्कृतज्ञाः खलु, नानादेशीय-भाषाणामध्ययनेन तासु पारदर्शिनः नानाविषयाभिज्ञाः सन्तः साहित्यदर्शनज्योतिषादीनां ग्रन्थानामनुवादेन जनानां चित्ताकाशं यथा प्रशस्तमं भवति तथा यतन्ते स्म। केचित् प्राचीनाः "चतुर्दश-भाषाभिज्ञाः" "अष्टादशभाषाभिज्ञाः" इति स्वात्मानं कथयन्ति। प्राचीनाः स्थापत्य-भास्कर्यादिषु अपि सुनिपुणा आसन्।

अन्यच्च मन्तव्यम्—"नहि ज्ञानेन सदृशं पवित्रमिह विद्यते" इति मुनेर्वचनस्यामृषात्वप्रतिपादनपूर्वकं संस्कृताध्ययनजनितं ज्ञानं जनानां संकीर्णतां चूर्णयति, अज्ञतां दूरीकरोति, समाजे सार्वजनीनतामुदारताञ्च सम्पादयति। तस्मात् संस्कृताध्ययनात् समाजः आदर्शानुगामी जायेत। अज्ञानं खलु तिमिरं, तदेव जनान् बाधते, जनाः अन्धेनैव नीयमाना यथान्धाः भवन्ति।

कया रीत्या संस्कृतमध्यनीयम्—अधुना इदं विवेचनीयम् किं प्राचीनपद्धत्या संस्कृतम् अध्ययनीयम् उत अन्यया। एतस्मिन् वितर्के अस्याः बलाबलं हेयोपादेयत्वञ्च परीक्षणीयम्। गुरुशिष्ययोः साक्षाद्घनिष्ठसम्बन्धं सम्पादयित्री, कायेन मनोव्यापारं संयोजयित्री, कर्मणा अध्ययनस्य समन्वयं कुर्वती संस्कृताध्ययनस्य प्राचीना पद्धतिः स्वल्पव्ययसाध्या अनाडम्बरा च। एषा पद्धतिः शिक्षया समाजं शिक्षितैः च जनताम् एकीकृत्य कृत्रिमां विभिन्नतां दूरीकरोति इति महान् लाभः। एषा एव अध्ययनपद्धतिः सत्सु अपि राजविप्लवेषु सामाजिक-परिवर्तनेषु च पार्थिवसम्पदं प्रति औदासीन्यप्रदर्शनपूर्वकं परम्परागतं भारतस्य महदैतिह्यम् अमूल्यरत्नमिव एतासु प्राचीनपाठशालासु बहुकालं पालयन्ती रक्षयन्ती चासीत्। एतेषां गुणानामभावात् अधुना अध्ययनपद्धतिः विकृतिमापन्ना ऐतिह्यभ्रष्टा इव जाता, इदमपि संस्कृताध्ययनं प्रति वीतस्पृहत्वे कारणमन्यतमं मन्ये।

अस्यां पद्धतौ न्यूनता च वर्तते, यथा तुलनात्मकाध्ययनस्य अभावः अपरिहार्यत्वेन परिगणितेषु आधुनिककालोचितेषु ज्ञातव्येषु प्रवेशाभावः, पृथक्त्वञ्च, अन्यानि च तादृशानि कारणजातानि। तस्मात् प्राचीनपद्धतिः सुचिन्तितं संशोधनमर्हति।

संशोधने क्रियमाणे सर्वथा स्मरणीयं यत्-
(१) संशोधनेन प्राचीनपद्धतेः प्राणभूताम् अध्ययनगम्भीरतां, निर्मलशास्त्रज्ञानं, शास्त्राणां पंक्ति-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योजनं न विनश्येत्, न वा संशोधनं पल्लवग्राहित्वे पर्यवस्येत् इति ।

पाश्चात्यरीत्या विद्यालय-महाविद्यालय-विश्वविद्यालयादिषु संस्कृतम् अध्यापितमास्ते। इदानीमनुकूलवातावरणाभावात् तेषु अपि छात्राणां संस्कृतं प्रति क्रमशः औदासीन्यं शैथिल्यञ्च दृश्यते । अस्मिन्नपि विषये विद्वद्भिः मनो निधेयम् ।

कस्मिन् पर्याये संस्कृतं स्यात्—आधुनिके काले संस्कृतभाषा कस्मिन् पर्याये केन रूपेण व्यवहारयोग्यतामर्हति इत्यस्मिन्नपि विषये महान् विवादो वर्तते । केचिदत्युत्साहिनः संस्कृतभाषा भारतस्य राष्ट्रभाषा भवेदिति स्वाभिप्रायमाविष्कुर्वन्ति । अन्ये तु तदसहमाना अभिमतस्य उद्भटतां कथयन्ति । संस्कृतभाषा न सर्वजनबोध्या इति तेषामापत्तिः । आंगलभाषा अस्मद्देशे द्विशतवर्षं राष्ट्रभाषारूपेण विराजिता, इदानीमपि विराजमाना, तथापि प्रतिशतं द्वित्रा एव जनाः आंग्लभाषां जानन्ति नवेति तथ्यम् अस्मिन् प्रसंगे अवधेयम् । राष्ट्रभाषात्वेन परिगृहीतापि संस्कृतभाषा सर्वैः जनैः सर्वेषु कार्येषु सर्वदैव व्यवहर्तव्या इत्यत्र को नु खलु राजादेशः ? कुतर्क एषः । अक्षरपरिचयहीनैः अपि जनैः संस्कृतस्य प्रतिशत दश शब्दाः ज्ञायन्ते, न तु आंग्लभाषायाः ।

द्विसहस्राब्दं यावत् धरणीमण्डले सर्वेषु स्थानेषु निवसन्त ईहुदीजनाः कियद्वर्षेभ्यः प्राक् इज्राइलविषये पुनर्जन्म लब्ध्वा विस्मृतप्रायां अव्यवहृतां हिब्रुभाषां स्वेषां राष्ट्रभाषारूपेण प्रतिष्ठाप्य सर्वाणि कार्याणि साधयन्तो वर्तन्ते । न ते कुत्रापि हिब्रुभाषाग्रहणात् पर्युदस्ताः । अपि संस्कृतस्य पुनर्विन्यासः ततोऽपि कठिनतरः ?

हिन्दीभाषाप्रचारार्थं हिन्दीभाषाभाषिणो जनाः हिन्दीप्रान्तेभ्यः अहिन्दीभाषिप्रान्तेषु सर्वथा प्रेषणीयाः, न तु संस्कृतस्य प्रचाराय प्रसाराय वा कोऽपि कस्मिंश्चित् स्थाने तथा प्रेषणीयः आनेतव्यो वा । आसीराष्ट्रात् कामरूपम्, आकाश्मीरान् केरलपर्यन्तं, भारतवर्षेषु सर्वत्र संस्कृतवाङ्मयः बद्धमूलो विराजते जलसेचनेन स एवं बर्द्धनीयो पुष्पपल्लवैः सुशोभितो भवेत् ।

संस्कृतस्य सार्वजनीनत्वम् ईशवीयद्वादशशतकेऽपि परस्परं विभिन्नभाषाभाषिणां माध्यमत्वं च कविना श्रीहर्षेणोक्तम्—

अन्योन्यभाषानवबोधभीतेः
संस्कृत्रिमाभिर्व्यवहारवत्सु ।
दिग्भ्यः समेतेषु नृपेषु तेषु
सौवर्गवर्गो न जनैरचिह्नि ॥

आस्तां तावत्, नायमस्माकं प्रस्तुतः ।

भारतवर्षे यथा संहतिर्दृढतरा स्यात्, सर्वतश्चानुभूयेत, यथा भारतीया महती संस्कृतिः सर्वैः याथातथ्येन बुध्येत, यथा भारतीयो महान् इतिहासः स्वरूपतः सर्वेषां गोचरीभवेत्, यथा वा प्रान्तीयानां भाषाणां सम्यक् परिपुष्टिर्जायेत अध्ययनञ्च भवेत्, ततोऽपि महत्तरा विश्वशान्तिः मैत्रीभावना च यथा सर्वेषां मनसि विराजेत, यथा च जनैः "वसुधैव कुटुम्बकम्" "सर्वेऽत्र सुखिनः सन्तु, मा कश्चिद्दुःखभाग् भवेत्" इति सूक्तीनां मर्मार्थो गृह्येत तथा तथा गृहे गृहे जने जने च संस्कृतस्य अध्यापनं विधेयं चर्चा च कर्तव्या । एतदर्थं केन्द्रीयसर्वकारेण प्रान्तीयसर्वकारैश्च कृतप्रयत्नैः भवितव्यम् । एतदर्थमेव च नगरे नगरे संस्कृत-प्रचार-सम्मेलननामायोजनस्य महती आवश्यकता वर्तते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुभ कामनाओं सहित

डालमिया सिमेंट (भारत) लिमिटेड

डालमियापुरम् (तमिलनाडु)

"राक्फ़ोर्ट" मार्का, डालमिया पोर्टलैण्ड एवं पोज़ोलाना सिमेंट
तथा
डालमिया रिफ्रैक्टरीज़ के निर्माता।

उड़िसा सिमेंट लिमिटेड

राजगंगपुर (उड़िसा राज्य)

"कोणार्क मार्का", डालमिया पोर्टलैण्ड एवं पोजोलाना सिमेंट
हर प्रकार और आकार की रिफ्रैक्टरीज़, आर० सी० सी० स्पन पाइप्स तथा
प्रीस्ट्रैस्ट कंक्रीट सामान के निर्माता।

DALMIA ENTERPRISES

मुख्य कार्यालय :
४—सिंधिया हाउस, नयी दिल्ली—१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लिङ्गविषयको विचारः

ले० साहित्यरत्नं श्रीबदरीप्रसादशास्त्री, प्रपूर्णा, खेतड़ी, राजस्थानम्

क्रमानुगतः—

अर्थाद् यथा भाष्यवार्तिकानुसारं हरिकारिकोक्तलौकिक लिङ्गलक्षणे "स्तनकेशादिसम्बन्धो विशिष्टा वा स्तनाऽऽदय" इत्यत्र स्तनकेशसम्बन्धस्योपलक्षणात् प्रसवयोनिविशेषादियथास्वं दृष्टो विशेष आदिग्रहणाद् गृह्यते। लोमसम्बन्धोऽपि विशिष्टोऽन्यस्याप्युपलक्षणमिति चैवं प्रसवादयोऽपि गृह्यन्ते। तद्वदिहाचेतनेष्वपि यथास्वमुपव्यञ्जनविशेषविशेषणस्य ग्रहणं कार्यम्।

यतो हि अस्ति खट्वादीनामपि किञ्चिन्निमित्तं यद्वशात्तत्र स्त्र्याद्याकारप्रत्ययप्रसवोऽनुभूयते।

अर्थात् जातिरूपतृतीयलक्षणेऽस्मिन्नादिपदग्रहणाद् यथायथं विशिष्टमेवोपव्यञ्जनं स्वीकर्तव्यम्।

इतश्च यथाऽत्र स्त्र्याद्याकारप्रत्यायकं यत् किञ्चिन्निमित्तमादिग्रहणाद् गृह्यते, तथैव पूर्वोक्तलौकिकलिङ्गलक्षणद्वयेऽपि तद्ग्राह्यं, यतस्तदपि पूर्वोक्तं पक्षद्वयमभिप्रायव्याकत्वात् पूर्वत्रैवोपेक्षणीयं न स्यात्। प्रत्युत तयोः शुद्धवैकल्पिकलक्षणत्वं सम्पद्यते। वस्तुतस्तु "तदुपव्यञ्जना जाति" रिति हरिकारिकायां तत्पदवाच्यं "स्तनकेशादिसम्बन्धः" इत्यत्रोक्तं स्तनकेशादिकमेवास्ति। अतस्तत्पदवाच्यं यत् स्तनादि तदेवोपव्यञ्जनं यस्याः सा तदुपव्यञ्जना "स्तनाद्युपव्यञ्जनाजातिर्लिङ्ग" मित्यस्मिंल्लक्षणेऽप्यादिपदग्रहणाद् यथायथं विशिष्टमेवोपव्यञ्जनं ग्राह्यम्।

अर्थात् पूर्वोक्तपक्षद्वयोक्तलक्षणद्वये स्तनकेशादीत्यत्र यथा प्रसवयोन्यादि यथास्वं दृष्टो विशेष आदिग्रहणाद् ग्रह्यते, तथैव स्तनाद्युपव्यञ्जनाजाति रित्यस्मिन् तृतीयलक्षणेऽप्यादिपदग्रहणाच्चेतनाचेतनसाधारणेऽपि द्रव्ये यथास्वमुपव्यञ्जनविशेषविशेषणं ग्राह्यम्। तद्ग्रहणे च खट्वादीनामचेतनानामपि किञ्चिन्निमित्तं गृह्येत, यद्वशात्तत्र स्त्र्याद्याकारप्रत्ययप्रसवो बोभवीतीत्येवं तादृशकिञ्चिन्निमित्तस्य यथायथं विशिष्टोपव्यञ्जनरूपस्यैव च पूर्वोक्तलक्षणद्वयेऽपि ग्रहणात्तदपि निर्दुष्टं स्यादिति भावः।

एवञ्च खट्वाशिषपादिष्वचेतनेषु भ्रू कुंशादिषु चेतनेष्वपि "स्तनकेशादिसम्बन्धो विशिष्टा वा स्तनादय" इति हरिकारिकोक्तादिपदलक्षितमस्ति किञ्चित् स्तनकेशातिरिक्तं तद् विलक्षणं विशिष्टं निमित्तं यच्च "तदुपव्यञ्जना जाति" रिति हरिकारिकोक्तजातिरूपलिङ्गलक्षणेऽपि तत्पदेनोच्यते, यद्वशादेव च खट्वाशिषपादिष्वचेतनेषु भ्रू कुंशादिषु च चेतनेष्वपि द्रव्येषु स्त्रीत्वादिलिङ्गजातिरवगम्यते। तच्चेदं निमित्तम् "अर्थ, व्यक्ति, वस्तु," रूपं त्रिविधमेवभवितुमर्हति।

किञ्चात्रेदमाकूतम्—अर्थ, व्यक्ति, वस्तूनां तु त्रिलिङ्गानां सर्वभावेष्वव्याहतप्रसरत्वात् त्रिलिङ्गयोगस्तदाकारप्रत्ययान्यथानुपपत्त्याऽनुमीयते।

परं सर्वेषु भावेषु स्तनलोमतत्साहश्याख्यानां मिथोविरोधिनियतव्यञ्जनानां समवायसम्बन्धरूपं स्त्रीत्वादिलौकिकं लिङ्गं कथं स्यादिति लौकिकलिङ्गलक्षणावधीरणेन जातिपक्षावलम्बनमेव वरमित्यन्ये।

इतश्च "सर्वत्राभिन्नाभिधानप्रत्ययोन्नीतसद्भावा जाति-रिति काणभुजीप्रक्रियामनुसृत्य जातिलक्षणं परिष्कुर्वाणस्तत्रभगवान् पत-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

र्जातिरपि जातीनां हि सर्वगतत्वादेकाश्रयसमवायित्वं बह्वीनामप्युपपादयामास। अत्रायमाशयः सरूपाणामेकशेष एकविभक्तौ १।२।६४ विति सूत्रभाष्ये—"आविर्ष्टलिङ्गा जाति" र्यल्लिङ्गमुपादाय प्रवर्तते, उत्पत्तिप्रभृत्याविनाशात्तल्लिङ्गं न जहातीत्युक्तम्।

अर्थात् स्वाश्रयेऽर्थतया व्यक्तितया वस्तुतयाऽपि च पुंस्त्व-स्त्रीत्वनपुंसकत्वाऽऽख्यानेकलिङ्गसत्त्वेऽपि स्वयं यत् किञ्चिदेकमेव लिङ्गमुपादत्ते। तथा चानेकलिङ्गवत्त्वेऽप्यनेकलिङ्गासिद्धिरेकलिङ्गवत्त्वञ्च जातौ स्यात्।

कथञ्च तदित्याशङ्क्याऽह दृष्टान्तमुद्योते "ब्राह्मणी शब्दवाच्यया जात्या तु स्वाश्रयगत स्त्रीत्वमेवोपादीयते, ब्राह्मणशब्दवाच्यया जात्या चाऽऽश्रयगतं पुंस्त्वमेवेति व्यवस्था। किञ्च तथाप्ययं-ब्राह्मणीपदार्थः इयं ब्राह्मणव्यक्तिरिदं ब्राह्मणवस्तु, ब्राह्मणीदारा इत्यादिप्रयोगेषु तु यथा ब्राह्मणीपदार्थ इत्यत्र ब्राह्मण्या एव पदार्थत्वमुच्यते। तथात्वे चात्रैकस्मिन्नपि द्रव्ये ब्राह्मण्याख्ये ब्राह्मणीशब्देन स्त्रीत्वं पदार्थशब्देन तु पुंस्त्वमिति—ब्राह्मण्याख्यद्रव्यश्रयाया (व्यक्त्याश्रयायाः) जातेः स्त्रीत्वाद्युक्तानेकलिङ्गाश्रयत्वेऽपि पदार्थऽऽख्यनिमित्तरूप वैशिष्ट्ये न सामासिकवृत्तिमासाद्य वाक्यतयैव वा पुंस्त्वाऽऽख्यैक लिङ्गवत्त्वमेव दृश्यते। तथाचात्र प्रयोगोक्तब्राह्मणीद्रव्ये (व्यक्तौ) द्रष्टान्तोक्तसामान्यव्यवस्थानुसारं स्त्रीत्वनिमित्तातिरिक्तं पदार्थपदेन पुंस्त्वरूपनिमित्तवैशिष्ट्यमासाद्य तदुत्पत्ति–प्रभृत्याविनाशात् पुंस्त्वाभिधं लिङ्गं न जहाति जातिः। अथवा "अयं ब्राह्मणीपदार्थः" इति प्रयोगे ब्राह्मणी जातिः, पदार्थोऽपि पदार्थत्वेन जातिरिति ब्राह्मणीत्वपदार्थत्वयोर्जातौ सामानाधिकारण्य उभयो र्ब्राह्मणीत्वपदार्थत्वयोर्जातित्वाविशेषाद् भिन्नत्वे सति जातेरनेकलिङ्गाश्रयत्वमपि दृश्यते। किञ्च ब्राह्मणीशब्दवाच्यया जात्या स्वाश्रयगतं स्त्रीत्वमेवोपादीयते। पदार्थशब्दवाच्यया तु जात्या स्वाश्रयगतं पुंस्त्वमेवोपादीयते। प्रयोगे चात्रैकैव जातिः स्त्रीत्वपुंस्त्वाऽऽख्याऽनेकलिङ्गवत्त्वेऽपि पदार्थत्वगतलिङ्गाभिव्यञ्जकनिमित्तवैशिष्ट्ये न पुंस्त्वाभिधमेकमेव लिङ्गमुपाददाना व्यवह्रियते। "इयं ब्राह्मणव्यक्ति" रित्यत्र च ब्राह्मणत्वव्यक्तित्वाभिधपुंस्त्वस्त्रीत्वाऽऽख्यानेकलिङ्गवत्त्वेऽपि व्यक्तित्वगतनिमित्तवैशिष्ट्यमादाय स्त्रीत्वाभिधमेकमेव लिङ्गमुपाददाना व्यवह्रियते।

एवमेव "इदं ब्राह्मणवस्त्व" त्यत्रापि-ब्राह्मणत्ववस्तुत्वाभिधपुंस्त्वनपुंसकत्वाऽऽख्यानेकलिङ्गवत्त्वेऽपि वस्तुत्वगतनिमित्तवैशिष्ट्यमादाय नपुंसकत्वाभिधमेकमेव लिङ्गमुपादत्ते।,

अथवात्र समासं स्वीकृत्य समुदायशक्त्या "ब्राह्मणवस्तू' पदवाच्या माला मोटकादयः स्त्रीत्वपुंस्त्वविशिष्टा अपि वस्तुत्वगतलिङ्गाभिव्यञ्जक (निमित्त) वैशिष्ट्ये न नपुंसकत्वविशिष्टा व्यवह्रियामाणा भवन्तीत्येवमन्यत्रापि ज्ञेयम्।

एवञ्च "अयं पदार्थः, इयं व्यक्तिरिदं वस्त्विति सर्वत्र शब्देषु भावेषु वा सर्वलिङ्गसत्त्वेऽपि क्वचित् पदार्थतया क्वचिद् व्यक्तितया क्वचिद् वस्तुतया तत्तन्निमित्तवैशिष्ट्यमेकमेवादाय सर्वशब्दगतायाः सर्वभावगताया वा स्त्रीत्वाद्येकलिङ्गप्रत्यायकत्वं जातेर्जाघटीति। पदार्थत्वव्यक्तित्ववस्तुत्वैः स्त्रीत्वादिजातीनां बह्वीनामपि सर्वशब्दगतत्वादेकाश्रयसमवायित्वमप्युपपद्यते।

किञ्चोक्तलौकिकलिङ्गलक्षणद्वये नैषा व्यवस्था स्यात्। अर्थाल्लौकिके लिङ्गलक्षणे लौकिक स्त्रीत्वादिनिमित्तस्यैव योन्यादेः स्त्रीत्वादिप्रत्यायने लोकप्रसिद्धत्वात् प्राधान्यं, सति चैवं प्रधाननिमित्तं विहाय जातिपक्षोक्तमिवान्यनिमित्त-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रहणे तु तत्र स्त्रीत्वादिज्ञानमसम्भवं, लक्षणोक्तादिपदोपलक्षितलोकप्रसिद्धयोन्यादिनिमित्तवदर्थरूपस्य लौकिकस्त्रीत्वादेर्ग्रहणे च पुनः पूर्वोक्तदोषतादवस्थ्यम् । उतवा—अर्थव्यक्तिवस्तुशब्दानां क्रमशः पुंस्त्रीनपुंसकलिङ्गानां सर्वेषां सर्वभावेषु द्रव्यायमाणेषु वस्तुष्वव्याहतप्रसरत्वात् तत्र त्रिलिङ्गयोगस्तदाकारप्रत्ययान्यथानुपपत्त्याऽनुमातुं शक्यते । परं मिथो विरोधिनियतव्यञ्जनसम्बन्धरूपं लौकिकं लिङ्गत्रयं प्रत्येकस्मिन् द्रव्यायमाणे वस्तुनि (सर्वभावेषु) कथमनुमीयेतेत्यतो—यथा सम्भवं लौकिकलिङ्गलक्षणमपेक्षितमप्युपेक्ष्य जातिपक्षावलम्बनं कृतं भाष्यकारेण । तद्वदेव च भाष्यवार्तिकमुपजीव्य "स्तनकेशादिसम्बन्धोविशिष्टा वा स्तनाऽऽदयः । तदुपव्यञ्जना जाति"रित्येवं लिङ्गलक्षणं परिष्कुर्वता श्रीहरिणाऽपि लक्षणत्रयस्य मिथोऽसाङ्कर्यं पार्थक्यमपि प्रदर्शितम् ।

अथैवमसार्वत्रिकत्वाल्लौकिकलिङ्गलक्षणोपेक्षणपुरःसरं पुनरिह निगदमालोच्यते जातिपक्षस्तथा चाह हरिर्वाक्यपदीयान्तर्गतलिङ्गसमुद्देशे—"तिस्रो जातय एवैताः केषाञ्चित्समवस्थिताः । अविरुद्धा विरुद्धा वा गोमहिष्यादिजातिभिः" ।।४।। अदसीयोऽयमर्थो वैयाकरणभूषणसारस्य काशिकाटीकायां—केषाञ्चिद् वैशेषिकाणां मते परस्परविरुद्धाभिर्गोत्वमहिषत्वादिजातिभिः सह परस्परमविरुद्धा एताः (स्त्रीत्वाद्याः) समवस्थिताः । अर्थाद् गोत्वमहिषत्वादिजातीनां परस्परमविरोधं महिष्यादावपि गवादिव्यवहारापत्तिर्गवादावपि च—महिष्यादिव्यवहारापत्तिः स्यात् । अतस्तासां मिथो विरोधस्वीकारेऽपि गोमहिष्यादिजातिभिर्मिथो विरुद्धाभिरपि स्त्रीत्वाद्या एतास्तिस्रो जातयोऽविरुद्धाः समवस्थिताः स्त्रीत्वाद्युपव्यञ्जनैक्याद् अवगम्यन्ते । एवमेव च तासां गोत्वादिना मिथोविरोधेऽपि मिथोविरुद्धासु तासु गोत्वादिजातिषु—इयं व्यक्तिरयंपदार्थ इत्यादिव्यवहारस्य सार्वत्रिकत्वात् स्त्रीत्वादिजातीनामविरोधः सर्वत्र । अर्थात् पुंस्त्वादावपि, इयं व्यक्तिरित्येवं व्यवहर्तुं शक्यते ।

अत्रैवायमप्याशयो गोत्वं जातिर्महिषत्वमपि जातिरिति जातित्वाविशेषाद् गोत्वमहिषत्वयोः परस्परमविरोधे सति गवादौ महिषादिव्यवहारापत्तिर्महिषादौ च गवादिव्यवहारापत्तिः । अतो गोत्वादिभिजतिरप्यनेकत्वमादाय गोत्वमहिषत्वादिना तासांमनेकजातीनां मिथो विरोधस्वीकारेऽपि स्त्रीत्वादिजातीनां गोत्वादिजातिभिर्विरुद्धत्वमविरुद्धमेकाश्रयसमवायित्वञ्च घटते ।

अथवैकस्मिन् गोपदार्थे (सास्नादिमति स्तनकेशादिमति च गोद्रव्ये) गोत्वस्त्रीत्वादिना विरोधेऽपि सास्नादिमत्त्वं गोत्वनिमित्तमादाय गोत्वजातिः स्तनकेशाऽऽदिमत्त्वमर्थव्यक्ति वस्तुत्वं वाऽऽदाय स्त्रीत्वाऽऽदिजाति विशेष्यविशेषणतयैकस्मिन्नाश्रये (गोद्रव्ये) प्रवर्तेत, इति तयोरेकाऽऽश्रयसमवायित्वं मिथोऽविरुद्धत्वञ्च सम्पद्यते ।

अत एव प्रातिपदिकार्थस्य त्रिकत्वपक्षमादायाजाद्यत इति सूत्रवृत्तिं समर्थयता—श्रीनागेशेनापि शेखरे टाबादिप्रत्ययानां द्योतकत्वं स्त्रीत्वस्य च द्योत्यत्वं स्वीकृत्य स्त्रीत्वस्य विशेषणत्वमवाचि । अन्यथा "प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थस्य प्राधान्य"मितिव्युत्पत्त्या स्त्रीत्वस्य प्रत्ययार्थत्वे "औपगव" इत्यत्रापत्यरूपप्रत्ययार्थस्य विशेष्यत्वमिव स्त्रीत्वस्यापि विशेष्यतापत्तिः स्यात् । तथात्वे च प्रकृत्यर्थस्य विशेषणत्वं प्रत्ययार्थस्य च विशेष्यत्वं स्यात् । तेन च "राम" इत्यादावपि रामत्वविशिष्ट एक इत्येवं बोधे पदार्थः पदार्थेनान्वेति न त्वेकदेशेनेति नियमभङ्गो बोभवीति वाक्यार्थज्ञाने ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्तु— एवमुक्तरीत्याऽप्येकस्मिन्नाश्रये गोत्वाश्वत्वाऽऽदीनामिव स्त्रीत्वपुंस्त्वाऽऽदीनां गोत्वादिभिर्मिथो विरोधो न भवति।

अर्थाद् गवि गोत्वस्य महिष्यां महिषीत्वस्य नियतव्यञ्जनभेदात् मिथोविरुद्धासु गोमहिष्यादिजातिषु, स्त्रीत्वादीनां स्तनकेशादिनियतव्यञ्जनैक्यात् स्त्र्याद्यास्तिस्रोऽपि जातयोऽविरुद्धाः समवतिष्ठन्ते। यादृशं स्त्रीत्वं गवि तादृशमेव महिष्यां यादृशञ्च गोत्वं गवि नहि तादृशं महिषीत्वं महिष्यामित्यतो मिथो विरुद्धासु गोमहिष्यादिजातिषु स्त्र्याद्यास्तिस्रो जातयोऽविरुद्धा भवन्तीति विवेकः।

अत एवोच्यते—

हस्तिन्यां वड़वायाञ्च स्त्रीतिबुद्धेः समन्वयः।
अतस्तां जातिमिच्छन्ति द्रव्यादिसमवायिनीम्॥

अर्थाद् भिन्नजातीयेष्वपि (सत्त्वेषु) स्त्र्याद्याकार बुद्धे रनुगमाज्जात्यन्तरैः स्त्रीत्वादिजातीनामविरुद्ध एकार्थ समवाय उक्तः। यतो हि, हस्तिन्यां तद्भिन्नजातीयायां वडवायाञ्च स्त्रीति बुद्धेः समन्वयो (स्त्रीत्वरूपाया लिङ्गजातेरनुगमो) भवति। अतो द्रव्यगुणकर्मसामान्यदावपि समवायसम्बन्धेन वर्तमानां स्त्रीत्वादिलिङ्गरूपां जातिमिच्छन्ति तया च स एवद्रव्याद्यर्थः केनचिच्छब्देन नियतलिङ्गोऽभिधीयमान स्तल्लिङ्गजातियोगी, शब्दान्तरेण तु लिङ्गजात्यन्तरयोगी प्रत्याय्यत इति न काचित् क्षतिः। एवमेव च 'जात्याख्यायाम्' मितिसूत्र भाष्ये सर्वेषां लिङ्गानां सर्वत्र सद्भावात् केनचिच्छब्देन प्रत्याय्यमानं वस्तु कस्यचिल्लिङ्गस्य व्यञ्जकमिति दाराऽऽदिशब्देषु नियतलिङ्गतासिद्धे ति कैय्यटग्रन्थोऽपि सङ्गच्छते। एवञ्चकत्र द्रव्याद्यर्थे तद्वाचकशब्दभेदात् कदाचित् स्त्रीत्वतया कदाचिन्न पुंस्त्वतया कदाचित्तु नपुंसकत्वतया प्रतीयमानं जातिरूपं लिङ्गमपि न विरुध्यते। यद्यथा भावशब्देन पुंस्त्वोपाधिसत्तोच्यते। सत्ताशब्देन च स्त्रीत्वोपाधिः साम्यशब्देन च नपुंकत्वोपाधिरित्येवं शब्दशक्त्यनुसारेणैव सर्वत्र लिङ्गोपाधिव्यवस्थिताः शब्दा द्रव्यायमाणं वस्त्वाचक्षाणास्तद्धर्मैर्लिङ्गोपाधितयैव तत्र तत्र प्रवर्तन्ते, तथा चैकस्मिन् स्त्र्याद्यर्थे शब्दभेदाच्छब्दशक्त्यनुसारेण स्त्रीत्वं स्त्रीभावः स्त्रीतेति त्रिलिङ्गयोगमुक्त्वा शब्देजेन प्रत्ययेन लिङ्गे ष्वपरो लिङ्गयोगोऽप्युच्यते। तमेव स्फुटमुपपादयितुमाह—

परतन्त्रस्य यल्लिङ्गमपोद्धारे विवक्ष्यते।
तत्रादौ शब्दसंस्कारः शब्दैरेव व्यवस्थितः॥

अर्थात् नामपदेन सत्वभूतस्यार्थस्याभिधीयमानत्वात्तस्य समास एकार्थीभावलक्षणेऽन्वये स्वस्मात् परस्य शब्दस्य योऽर्थः स परार्थस्तस्याभिधानं परार्थाभिधानं तद्रूपायां परार्थाभिधानरूपायां वृत्तावुपसर्जनीभूतस्यापि, अत एव परतन्त्रस्य पूर्वपदस्य प्रक्रियायामपोद्धारे प्रकृतिप्रत्ययविभागात्मकेऽभिधित्सिते प्रत्ययेन यल्लिङ्गमुपादीयते नान्तरीयकं तत् केवलं "शब्दैरेव व्यवस्थितः शब्दसंस्कार एव" शब्दान्वाख्याननिमित्तं शब्दैरेवाङ्गीकृतं प्रयोगे तु लौकिके वाक्ये शब्दान्वाख्याननिमित्तभूतं तदविवक्षितमिति।

अत्रायमाशयः कुक्कुटाण्डं मृगक्षीरं काकशाव इत्यत्र समासे कुक्कुट्यादीनामण्डादिष्वि" ति वार्तिकेन पुंस्त्वमतिदिश्यते। किञ्च यथा दर्शनीयभार्यादावुत्तरपदेन स्त्रीलिङ्गेन सामानाधिकरण्यात् पूर्वपदस्यावगम्यमानायां स्त्र्यर्थतायां तत्र पुंस्त्वातिदेशो युक्तः, कुक्कुटाण्डादौतु कुक्कुटादेरण्डादिविशेषणस्य जातिमात्रविवक्षायां स्त्रीत्वस्याविवक्षितत्वात्, अस्त्रीपूर्वपदविवक्षितत्वाद् भाष्ये प्रत्याख्यातमिदं वार्तिकमिति शब्देन्दुशेखरेऽपि जातिमात्रपरायां नोदनायां जात्यन्तरनिवृत्तिपरत्वात् कुक्कुटादिशब्दैरेव समासेन सिद्धे रित्युक्त्वा प्रत्याख्यातं कुक्कुट्यादिशब्दैस्तु न समासोऽनभिधानादिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थात् कुक्कुटाण्डादौ दर्शनीयभार्यादिवत् स्त्रीलिङ्गताऽभावात्–कुक्कुटादीनां पूर्वपदानां स्त्र्यर्थतानियमेन नावधार्यते। प्रत्युत समुदायशक्त्याऽभिधीयमानपरार्थस्य जातिमात्रविवक्षायां प्रक्रियावाक्ये तु शास्त्रीयापोद्धारे कुक्कुटस्याण्डं मृगस्य क्षीरं काकस्य शाव इत्येवं पुंल्लिङ्गेन प्रदर्शनं सत्त्वभूतस्यार्थस्य लिङ्गं नान्तरीयकत्वात्। ततश्चासौ सत्त्वाभिधायिनः शब्दस्य संस्कार एव। अण्डक्षीरादीनाञ्च पुनः पुंसः सम्बन्धाभावात् अर्थात् प्रयोगे लौकिके वाक्ये व्यपेक्षारूपसामर्थ्ये तु स्त्रीत्वमवगम्यते, इति तत्र कुक्कुट्या अण्डं मृग्याः क्षीरं काक्याः शाव इति स्त्रीत्वमपि।

उत वा वृत्तावुपसर्जनपदेन परार्थाभिधायिना भाव्यं, वृत्तौ तूपसर्जनीभूतस्वार्थमर्थान्तरं प्रत्याययतीति, अयोग्यत्वाद् विशेषणेन सम्बध्यते, इति समर्थसूत्रभाष्ये कैयटग्रन्थानुसारमपि "कुक्कुटाण्ड" मित्यत्र कुक्कुटपदं न हि कुक्कुटत्वादिविशिष्टं स्वार्थं कुक्कुटव्यक्तिं प्रत्याययति। प्रत्युत समासे स्वीकृतसमुदायशक्त्या कुक्कुटत्वजातिविशिष्टं परार्थमण्डद्रव्यमभिधत्ते। पुनश्च यथा समासे पृथक्शक्तिं स्वीकुर्वाणानामस्माकं मते "प्राप्तमुदकं यं स" इत्यत्र यत्कर्मकप्राप्तिकर्तृ उदकमिति बोधः प्राप्तोदक इत्यस्य तु, उदककर्तृक प्राप्तिकर्मीभूतो ग्राम इति परार्थाभिधायको बोधस्तथैवात्रापि कुक्कुट्या अण्डमित्यत्र बोधविपर्ययो माभूदित्यतो जातिमात्रविवक्षायां कुक्कुटाण्डादौ शब्दान्वाख्याननिमित्तं पुंस्त्वमभ्युपगम्यते। लौकिके प्रयोगेवाक्ये सर्वेषां पदानां विशेषणत्ववैशिष्ट्ये नोपपस्थितत्वात् स्त्रीत्वमवगम्यत एवेति सर्वत्र शब्देषु स्त्रीत्वाद्यनुक्तप्रत्ययजननादविरुद्धसमवायाः स्त्रीत्वादिजातयो भवन्तीति लिङ्गेष्वपरलिङ्गयोगोपि।

अथवा क्वचिद् वृत्तौ लिङ्गविशेषस्याप्युपादानं क्वचिच्च त्यागोपि भवति, यथा 'कुमारीपुत्रः" इत्यत्र स्त्रीत्वोपादानं "कुक्कुटाण्ड" मित्यत्र च स्त्रीत्वरूपलिङ्गविशेषस्य त्यागः। क्वचिच्च वाक्येऽपि जात्यन्तरनिवृत्तिपरे लिङ्गविशेषाविवक्षा दृश्यते यथा—"छागस्य मांस" मित्यत्र छागेतरजातिनिवृत्तिपरत्वविवक्षायां स्त्रीत्वमविवक्षितं जातौ तु छागमिव छाग्या अपि समावेशात्।

इत्येवमपि सर्वत्र स्त्रीत्वादिजातयो लिङ्गेषु चापरो लिङ्गयोगोपीत्यत्रैव पुनः स्फुटां व्याप्तिमुदाहरति हरिः—

बुध्याकल्पितरूपेषु लिङ्गेष्वपि च सम्भवः।
स्त्रीत्वाऽऽदीनां व्यवस्था हि सा लिङ्गैर्व्यपदिश्यते॥

अत्राह श्रीहेलाराजो बहिर्वस्तूनां बुध्यांशेनेन कल्पिताकारेषु समारोपितरूपेषु, उपाधित्वेन वस्तुविषयेष्वभिधीयमानेषु स्त्रीत्वादिषु-स्त्र्याद्यर्थेषु वा, अपि लिङ्गेष्वपरो लिङ्गयोगो यथास्वं शब्दप्रतिपाद्येष्विति सर्वशब्दविषयाणां लिङ्गानां व्याप्तिः। सा व्यवस्था नियमः स्त्रीत्वादीनां लिङ्गे लिङ्गीयाध्यासः शब्दैः प्रतिपाद्यते।

तथाहि भावप्रत्ययान्तैर्लिङ्गाभिधायिभिः शब्दैरर्थानां स्त्र्यादीनां लिङ्गानियमेन प्रत्यायने स्त्रीत्वं स्त्रीता स्त्रीभाव इति स्त्रीत्वविशिष्टस्य द्रव्यस्य स्त्रीशब्देनाभिहितस्य भावप्रत्ययेन प्रवृत्तिनिमित्तनपुंसकत्वादियोगित्वं स्वभावात् प्रकाश्यते। भावशब्देन च पुंस्त्वादिविशिष्टमिति शब्दज्ञेन प्रत्ययेन लिङ्गेष्वपरलिङ्गयोगो लक्ष्यते।

अर्थाद् एकत्रार्थे वस्तुविषये बहिस्तनस्तनाद्युपव्यञ्जन—सत्त्वात्—स्त्र्याद्याधिके वाच्येऽपि लिङ्गरूपेकार्थे स्मृत्यनुभवाऽऽख्येन ज्ञानेन कल्पितप्रत्ययाद्युपाधिवशात् कल्पितस्त्र्याद्याकारता-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मादाय प्रत्येकोऽप्यभिधीयमानो वस्तुविषयोऽर्थरूपः कल्पितप्रत्ययाद्युपाधिविशिष्टैः—शब्दैरेव सर्वलिङ्गतामापद्यते। इति सर्वशब्दविषयाणां लिङ्गानां व्याप्तिः सेयं व्यवस्था नियमो लिङ्गैरेवव्यपदिश्यते। यथाहि भावप्रत्ययान्तै लिङ्गाभिधायिभिः शब्दैः प्रतिपाद्यवस्तुविषयकार्थानां–स्त्र्यादीनां लिङ्गानियमेन प्रत्यायने स्त्रीत्वं, स्त्रीता, स्त्रीभाव, इत्येवं स्त्रीत्वविशिष्टस्य द्रव्यरूपार्थस्यैकस्यैव स्त्रीशब्देनाभिहितस्य त्वतलाभ्यां भावप्रत्ययाभ्यां प्रवृत्तिनिमित्तस्त्रीत्वयोगित्वं नपुंसकत्वयोगित्वं वा स्वभावात् प्रकाश्यते भावशब्देन च पुनः पुंस्त्वविशिष्टमिति शब्दजेन प्रत्ययेन लिङ्गेष्वपरो लिङ्गयोगो भवतीति प्रागुक्तमेव।

अथापि "ब्राह्मणी" शब्दवाच्ये प्रत्ययार्थप्राधान्यव्युत्पत्त्या "स्त्री" ति वस्तुविषयेऽर्थे भावप्रत्ययाभ्यां त्वतलाभ्यां स्त्रीत्वं स्त्रीता स्त्रीभाव उतवा ब्राह्मणीत्व, ब्राह्मणीता, ब्राह्मणीभाव, इत्येवं पूर्वोक्तस्यैवास्यैकस्य स्त्रीति वाच्यस्य वस्तुविषयस्यार्थस्य स्त्रीत्वपुंस्त्वनपुंसकत्वयोगित्वं स्वभावात्प्रकाश्यते। एवमेवान्यत्रापि सर्वत्र शब्दजेन प्रत्ययेन लिङ्गेष्वपरलिङ्गयोगे सिद्धे सर्वेऽपि शब्दा अर्थाश्च सर्वलिङ्गाः सम्भवन्ति।

अत एवाजयमेरुस्थप्राच्यविद्याप्रतिष्ठानात् प्रकाशितस्य वामनीयलिङ्गानुशासनस्य भूमिकायां तदीयसम्पादिकया पुरा सर्वे शब्दाः सर्वलिङ्गा आसन्नित्युक्तम्। तथात्वे चेदृशोक्तशब्दशक्तिस्वभावादेव 'तिस्रो जातय" इत्यादिनोक्तरीत्यावाऽश्वत्वगोत्वादीनामिव स्त्रीत्वपुंस्त्वादीनामेकत्रार्थ आश्रये वा न मिथो विरोधशङ्कावकाशः।

इत्थञ्च रत्नपरीक्षालक्षणग्रंथेषु ह्यचेतनानामपि स्त्रीत्वादिलिङ्गदर्शनात् तत्राप्येवमेव स्त्रीत्वादिलिङ्गव्यवस्थास्वीकार आवश्यकः—

क्रमशः—

JUST OUT

FOURTH PRINT OF

BUNCH OF THOUGHTS

In Good 1/4 Calico Bound with beautiful Tricolour Jacket

Pages: 439+xxxviii

Price Rs. 10/- only

Rs. 11-50 for a single copy inclusive of Reg. postage charges no V.P.P.

For details:

RASHTROTTHANA SAHITYA

Gavipuram Road, Kempegowdanagar,

BANGALORE 19

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ सप्तमोऽध्यायः

'ॐ' ऋषिरुवाच ॥१॥	ऋषि बोले ॥१॥
आज्ञप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः ।	आज्ञा लिये चले दैत्य आगे के चण्ड मुण्ड ले ।
चतुरङ्गबलोपेता ययुरभ्युद्यतायुधाः ॥२॥	चतुरंगी सैन्य लिये अस्त्र शस्त्र उठा उठा ॥२॥
ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थिताम् ।	देवी को उनने देखा मुसुकाती विराजती ।
सिंहस्योपरि शैलेन्द्रशृङ्गे महति काञ्चने ॥३॥	सिंह पै स्थित थी दिव्य शैल के स्वर्ण शृंग पै ॥३
ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः ।	वे उसे देख लाने को उद्योग करने लगे ।
आकृष्टचापासिधरास्तथान्ये तत्समीपगाः ॥४॥	चाप खींचे खड्ग धारे उसके पास आगये ॥४॥
ततः कोपं चकारोच्चैरम्बिका तानरीन् प्रति ।	तब देवी शत्रुओं के प्रति कोपित हो उठी ।
कोपेन चास्या वदनं मषीवर्णमभूत्तदा ॥५॥	कोप से इसका वक्त्र मषावर्ण हुआ तब ॥५॥
भ्रुकुटीकुटिलात्तस्या ललाटफलकाद् द्रुतम् ।	कुटिल भ्रुकुटि वाले अम्बिका के ललाट से ।
काली करालवदना विनिष्क्रान्तासिपाशिनी ॥६॥	कालि करालवदना निकली खड्ग पाश ले ॥६॥
विचित्रखट्वाङ्गधरा नरमालाविभूषणा ।	विचित्र खट्वाङ्ग लिए नरमाला गले धरे ।
द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा ॥७॥	पहने व्याघ्र का चर्म सूखो अति भयङ्करी ॥७॥
अतिविस्तारवदना जिह्वाललनभीषणा ।	बडे विशाल मुख की जिह्वा लपलपा रही ।
निमग्नारक्तनयना नादापूरितदिङ्मुखा ॥८॥	गडी आंखें लाल, नाद पूरती थी दिगन्त में ॥८॥
सा वेगेनाभिपतिता घातयन्ती महासुरान् ।	वेग से वह आ कूदी दैत्यों को मारती रही ।
सैन्ये तत्र सुरारीणामभक्षयत तद्बलम् ॥९॥	सेना में इन दैत्यों को खागई बल पूर्व ही ॥९॥
पार्ष्णिग्राहाङ्कुशग्राहियोधघण्टासमन्वितान् ।	पीठ के और आगे के योधा घण्टा समेत ही ।
समादायैकहस्तेन मुखे चिक्षेप वारणान् ॥१०॥	गजों को एक कर से मुख में फैंकती रही ॥१०॥
तथैव योधं तुरगै रथं सारथिना सह ।	घोडों के संग योधों को रथों के साथ सारथि ।
निक्षिप्य वक्त्रे दशनैश्चर्वयन्त्यतिभैरवम् ॥११॥	मुखमें फैंक दातों से चबाती भयदा हुई ॥११॥
एकं जग्राह केशेषु ग्रीवायामथ चापरम् ।	केशो में पकडा एक गले में एक ओर को ।
पादेनाक्रम्य चैवान्यमुरसान्यमपोथयत् ॥१२॥	अन्य को पैर से दाब उर से अन्य को तथा ॥१२॥
तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः ।	दैत्यों को उन शस्त्रों को महास्त्रों को महेश्वरी ।
मुखेन जग्राह रुषा दशनैर्मथितान्यपि ॥१३॥	मुख में रोक दांतों से तोडती थी प्रकोप से ॥१३॥
बलिनां तद् बलं सर्वमसुराणां दुरात्मनाम् ।	उन दुर्जन दैत्यों की सेना में बहु दानव ।
ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा ॥१४॥	किये मर्दित, खायेभी, ताडा अन्यान्यको वहां ॥ १४
असिना निहताः केचित्केचित्खट्वाङ्गताडिताः ।	खड्गाहत हुए केई केई खट्वाङ्ग से मरे ।
जग्मुर्विनाशमसुरा दन्ताग्राभिहतास्तथा ॥१५॥	अनेक दैत्य दांतों की नोकों से छिन्न हो पडे ॥१५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षणेन तद् बलं सर्वमसुराणां निपातितम् । दृष्ट्वा चण्डोऽभिदुद्राव तां कालीमतिभीषणाम् ॥	असुरों की सभी सेना क्षण में यों विनष्ट की । देख चण्ड भगा आया भीषण कालिका प्रति ॥१६
शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः । छादयामास चक्रैश्च मुण्डः क्षिप्तैः सहस्रशः ॥१७	भयकारी बाण छोडे भीमाक्षी पर दैत्य ने । फँके हजारों चक्रों से मुण्ड ने ढांप ही दिया ॥१७॥
तानि चक्राण्यनेकानि विशमानानि तन्मुखम् । बभुर्यथार्कबिम्बानि सुबहूनि घनोदरम् ॥१८॥	उसके मुख में जाते चक्र यों सोहने लगे । अनेक रवि के बिम्ब जैसे बादल में घुसे ॥१८॥
ततो जहासातिरुषा भीमं भैरवनादिनी । काली करालवक्त्रान्तर्दुर्दर्शदशनोज्ज्वला ॥१९॥	तब काली हँसी रुष्टा भयकारी निनाद से । कराल मुख में दांत दुर्दश चमके घने ॥१९॥
उत्थाय च महासिं हं देवी चण्डमधावत । गृहीत्वा चास्य केशेषु शिरस्तेनासिनाच्छिनत् ॥२०	उठा कृपाण हूं बोल झपटी चण्ड पै शिवा । पकडे इसके केश काटा मस्तक खड्ग से ॥२०॥
अथ मुण्डोऽभ्यधावत्तां दृष्ट्वा चण्डं निपातितम् । तमप्यपातयद् भूमौ सा खड्गाभिहतं रुषा ॥२१॥	अब तो मुण्ड भी दौडा देखके चण्ड को पडा । इसे भी खड्ग से काट भूमी पर गिरा दिया ॥२१॥
हतशेषं ततः सैन्यं दृष्ट्वा चण्डं निपातितम् । मुण्डं च सुमहावीर्यं दिशो भेजे भयातुरम् ॥२२॥	पडा यों चण्ड को देख महा विक्रम मुण्ड को । बची सेना दिशाओं में भय विह्वल हो भगी ॥२२
शिरश्चण्डस्य काली च गृहीत्वा मुण्डमेव च , प्राह प्रचण्डाट्टहासमिश्रमभ्येत्य चण्डिकाम् ॥२३॥	चण्ड का शिर ले काली वहीं पकड मुण्ड को । अट्टहास किया बोली चण्डिका के समीप आ ॥२३
मया तवात्रोपहृतौ चण्डमुण्डौ महापशू । युद्धयज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यति ॥२४॥	उपहार दिये मैंने चण्ड मुण्ड महा पशू । मारेगी युद्धमख में स्वयं शुंभ निशुम्भ तू ॥२४॥
ऋषिरुवाच ॥२५॥	ऋषि बोले ॥२५॥
तावानीतौ ततो दृष्ट्वा चण्डमुण्डौ महासुरौ । उवाच कालीं कल्याणी ललितं चण्डिका वचः॥२६	देख, लाए हुए दोनों चण्ड मुण्ड महासुर । कल्याणी चण्डिका बोली कालिका को शुभं वचः ॥२६॥
यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता । चामुण्डेति ततो लोके ख्याता देवि भविष्यसि ॥ ॥ॐ॥२७॥	जो तू पकड लाई है चण्ड को और मुण्ड को । चामुण्डा नाम से होगी लोक विख्यात देवि ! तू॥ २७॥
इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये चण्डमुण्डवधो नाम सप्तमोऽध्यायः	श्रीहरिशास्त्रिविरचित हिन्दी दुर्गापाठ में सातवां अध्याय पूर्ण हुआ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बढ़िया किस्म चाहती हैं ?

जो लोग हमेशा शुद्ध और बढ़िया चीजें खरीदना चाहते हैं वे घी, मक्खन, वनस्पति तेल, शहद, मसाले और अन्य कृषि-जनित वस्तुयें एगमार्क का लेबल देखकर ही खरीदते हैं।

पिछले वर्ष लगभग १५० करोड़ रुपये के मूल्य की कृषि व पशु-धन से उत्पन्न वस्तुओं पर एगमार्क के लेबल लगाए गए।

२ करोड़ रुपये से भी ज्यादा के मूल्य का एगमार्क माल विदेशों को भेजा गया।

तो हमेशा एगमार्क वस्तुयें ही खरीदिए

AGMARK

एगमार्क का निशान केवल उन्हीं चीजों पर लगाया जाता है, जिनकी सरकार शोधशालाओं में भली भांति परीक्षा कर लेती है।

एगमार्क का निशान शुद्धता और बढ़िया किस्म की पहचान है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

फैशन और उपयोग में अद्वितीय

'सेंचुरी' के अनूठे वस्त्र

हिज़ चॉईस–हर चाईस—सर्वोत्तम इजिप्सीअन रूई से निर्मित-मर्सराईज्ड, सेंचुराईज्ड (प्रीश्रंक) पौपलिनें।

हर हाईनेस—सफेद और रंगीन, मर्सराईज्ड सेंचुराईज्ड पॉपलिन।

रूबी—सुगंधित पौपलिन डोबी और चेक शर्टिङ्ग, सफेद, रंगीन और छपी हुई केम्ब्रिक्स।

परमसुख—सुपर फाईन धोतियों में सर्वश्रेष्ठ।

लेक्स ब्यूटी—सर्वोत्तम बारीक मलमल।

हर चॉईस—महिलाओं के वस्त्रों के लिए मनमोहक कपड़ा।

निराला—और "स्विस चैक" सिकड़ुन रोधक और गण्डी।

निर्माता :

दी सेंचुरी स्पिनिंग एण्ड मैन्युफेक्चरिंग कम्पनी लि०

सेंचुरी भवन, डा० एनीबीसेन्ट रोड़

बम्बई—२५ डी डी

गिरने से पहले उनकी रक्षा करें



बालों और दाँतों की नियमित देखभाल और उनका पोषण आवश्यक है। क्यों न फिर उनके गिरने से पहले उनकी रक्षा की जाय! इसके लिए उदयपुर का गाय छाप ब्राह्मी आँवला तैल और काला दन्त-मन्जन सर्वोत्तम है। इन आयुर्वेदिक उत्पादनों से आपके बाल [illegible] तथा [illegible] और [illegible] मजबूत होंगे।

इलाज से बचाव बेहतर है!

[illegible]

गाय छाप

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

अभिनन्दनसमारोहः

गतजुलाईमासस्य ३१ तारिकायां जयपुरस्थ-महाराज-संस्कृतकालेजस्य प्राङ्गणेऽत्र जयपुर-नगरमण्डलकांग्रेसद्वारा—राजस्थानमुख्यमन्त्रि-**श्रीमोहनलालसुखाडिया**महानुभावस्य ५३ त्रिपञ्चाशत्तमं जन्मदिवसमधिकृत्याभिनन्दन-समारोहः समायोजितोऽभूत् ।

तत्र मङ्गल-स्वागतगीतिपाठानन्तरं श्री-सुखाडियामहानुभावस्य कांग्रेसाधिकारिभि-र्दीर्घायुष्यमकाम्यत । तथा मुख्यमन्त्रिमहोदयं श्लाघमानैः श्रीसुमनेशजोशीप्रभृतिभिर्महानुभावैः स्वस्वकविता अपठ्यन्त । एवं म० सं० कालेजा-ध्यक्ष—श्रीगोविन्दनारायणशर्मनैयायिकैः संस्कृ-तेऽभिनन्दनपत्रं पठित्वा श्रीसुखाडियामहोदयाय तत् सादरं समर्पितम् ।

अवसरे चास्मिन् राजस्वमन्त्री **श्रीराम-किशोरव्यासमहोदयः** समभाषत यत् श्री-सुखाडियामहोदयोऽयमस्माकं वर्तते वयश्चास्य स्मः । तथा विंशतिवर्षात्मकः सोऽयं राजस्थान-स्येतिहासोऽस्यैव मुख्यमन्त्रिणस्त्यागेन सुस्थिर-तयाचाग्रेऽवर्धत । विविधानि कष्टानि सहमानः स्वस्वास्थ्यस्य चोपेक्षां कुर्वाणः सोऽयं मुख्यमन्त्री दुर्भिक्षपीडितप्रान्तवासिनो जनान् संरक्षितु नैकान् यत्नान् कृतवान् । अहं भवते धन्यवादं वितरामि, जनता च शुभाशिषः—इति ।

ततश्च नगरकांग्रेसाध्यक्ष-श्रीबालचन्द्रवैद्य-महोदयेन श्रीसुखाडियामहानुभावाय अभिनन्दन-पत्रं समर्प्य ५३ त्रिपञ्चाशत्सहस्ररूप्यकमितो धनराशिश्च समर्प्यत ।

किञ्च नगरविकास—न्यासाध्यक्षः श्रीसरदार-मलसांघीमहोदयश्चावोचत् यदष्टदिनेष्वेव ७३ त्रिसप्ततिसहस्रमुद्राणां संग्रहोऽनायासेनैव जातः—इत्यतो मुख्यमन्त्रिणि जनताया अनुरागो भवति स्फुट एवेति ।

ततश्च सुखाडियामहोदयेन स्वभाषणे प्रति-पादितं यत्पञ्चदशवर्षात्मकेऽस्मिन् स्वस्य मुख्य-मन्त्रित्वकाले मया हि क्षेत्र-मण्डल-जाति-सम्प्र-दायानां विचारान् परित्यज्य कार्यमनुष्ठितम् । यस्मिन् प्रान्ते मण्डले वा यस्य वस्तुनोऽभावो विद्येत, तत्रैव तस्य समाधानं करणीयमित्यहं वरं मन्ये । अपि च यदि कुत्रापि यष्टिकाप्रहारो-ऽपि जायते तदा मम मनसि महान् आघातो भवति गुलिकाप्रहारस्य तु कथैव का ? अन्ते च श्रीमुख्यमन्त्रिमहोदयेनाशा प्रकटितैषा यत् समुपस्थितायाः कस्याश्चनापि परिस्थित्याः प्रबलं सामुख्यं विधास्यत इति । ततश्चायं भारतोपरि-वारोऽपि श्रीमुख्यमन्त्रिमहोदयमभिनन्दति तदर्थञ्च कामयते—

तदिदं नूतनं वर्षं श्रीमते मुख्यमन्त्रिणे ।
सन्मङ्गलाय बोभूयात् कृपया परमात्मनः ॥

मानवस्य चन्द्रलोके प्रवेशः

विदितमेवेदं तत्रभवतां भवतां यद् गतजुलाई-मासस्य १६ तारिकातः अपोलो ११ अन्तरिक्ष-यानेन ये विशिष्टा वैज्ञानिका मानवाः आर्मस्ट्रांग—एल्ड्रिन—कौलिन्साभिधाः यां चन्द्रलोकस्य यात्रां समारभन्त, ते महतोत्साहेन तां यात्रां समाप्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मासस्यास्येव २४ तारकायां रात्रौ (११-१०) वादनवेलायां पूर्वनियते स्थले प्रशान्तसागरे सकुशलमवातरन्—इति तेभ्यश्चन्द्रयात्रिकेभ्यो वयमपि हृदयेन धन्यवादान् वितरामः! एभिश्च महानुभावैस्ततश्चन्द्रलोकात् मृत्तिका विचित्राणि नानाविधानि चित्राणि चानीयन्त। अथ च मृत्तिकादीनां सम्प्रति परीक्षणं क्रियमाणमास्ते।

अत्रास्ति मामकीनं किञ्चिन्निवेदनं यद् अनया हि चन्द्रलोकयात्रयास्माकं चेतसि विविधास्तर्काः समुद्भवन्ति। यथा हि 'सोमोऽस्माकं ब्राह्मणानां राजा०' इत्यादिमन्त्रनिर्दिष्टश्चन्द्रः कीदृशः क्व वा वर्तते?। भारतीयाः साध्व्यो नार्यश्च चन्द्रमुद्दिश्योपवासमनुतिष्ठन्ति तदनुष्ठितस्योपवासस्य कोऽस्त्याधारः? 'मनश्चन्द्रे निलीयते' इत्यादीनां वचसां किमस्ति मूलम्?। किञ्च वैज्ञानिकानां सुदृढोऽयमस्ति विश्वासो यत् नास्ति चन्द्रलोके कश्चन जीववर्गो नापि वा जलादिकम्। अस्माकं ग्रन्थेषु च लिखितमस्ति चन्द्रस्य शीतरश्मित्वम्। एवं शशिवदना-चन्द्रमुखीप्रभृतीनां पदानां कीदृशोऽर्थः सम्प्रति स्वीकर्तव्यो भविष्यति। अर्थात् कमनीये कामिन्या मुखे चन्द्रसादृश्यं प्राचीनाः कवयो वर्णितवन्तस्तच्चन्द्रसादृश्यमाह्लादकत्वादिकन्तु चन्द्रयात्रिकैरानीतेषु चित्रेषु नैव प्राप्यते।

विषयेऽस्मिन् हिन्दीविश्वभारती-चन्द्रपरिषत्सदस्येन शार्दूलसंस्कृतविद्यापीठप्राचार्य—**श्रीविश्वनाथमिश्र**महोदयेन पूर्वं प्रकाशितान् प्रश्नान् तथा चास्माकं प्राचीनानां शास्त्रकाराणाञ्च सिद्धान्तान् भारतीपाठकानां पुरतः समुपस्थापयामि साम्प्रतमिह—

मान्याः

सुविदितमेवेदं समेषां विदुषां यत् साम्प्रतं पाश्चात्यैर्वैज्ञानिकैर्महता समारम्भेण विधीयते चन्द्रतत्त्वान्वेषणम्। तत्तद्यन्त्रसाहाय्येन संगृहीतानि च तैः सहस्रशश्चन्द्रधरातलचित्राणि, परं नाद्यावधि तैश्चन्द्र-द्रव्यादिविषये निर्णीतं किमपि याथातथ्येन। अस्माकं शास्त्रेषु च चन्द्रविषये सन्ति प्रतिपादिता नानासिद्धान्ताः। बीकानेरस्थहिन्दीविश्वभारत्यां चेदानीं चन्द्रतत्त्वानुसन्धानसमितिपरामर्शेन प्रचलति तत्तच्छास्त्रवर्णिततत्तत्सिद्धान्तानुसारं चन्द्रतत्त्वान्वेषणम्। समितिमते शास्त्रदृष्ट्या चन्द्रमसि प्रतीयते जलतत्त्वस्य प्राधान्यं, पाश्चात्यैश्च तन्निराक्रियते। वैशेषिकप्रशस्तपादभाष्यसेतुटीकाकारैः श्रीपद्मनाभमिश्रैश्चानुमीयते भौमदिव्योदर्याकरजचतुर्विधतेजोऽन्तर्गत दिव्यतेजसि चन्द्रमसोऽन्तर्भावः। तैजसे विषये चन्द्रमसोऽन्तःपाते कथं नोपलभ्यते चन्द्रमसि उष्णस्पर्शः! जलतत्त्वेनाभिभवाच्चेन्नोपलभ्यते उष्णस्पर्शस्तर्हि किं जलतत्त्वमप्यभिमतं चन्द्रमसि कणादशास्त्रस्य?

अपरंच—तैजसं हि सुवर्णञ्च अत्यन्तानलसंयोगेऽप्यनुच्छिद्यमानजन्यद्रवत्ववदस्ति। यन्न भवति अत्यन्तानलसंयोगे अनुच्छिद्यमानजन्यद्रवत्ववत्, न तत् तैजसं यथा पार्थिवं तत्त्वम्। प्रकारेणामुना साधितः सुवर्णे पार्थिवांशस्याभाव, तथैव किं तैजसे चन्द्रमसि अपि पार्थिवांशस्याभाव एव वर्तते वा तत्र पृथिवी? किञ्च तैजसं शरीरं यथा आदित्यलोके तथैव किं तैजसं शरीरं चन्द्रलोकेऽप्यस्ति। अस्ति चेत् यथा पार्थिवावयवोपष्टम्भात् आदित्यलोकस्थं तैजसं शरीरमुपभोगक्षमं तथैव किं चन्द्रलोकीये तैजसे शरीरेऽपि पार्थिवावयवोपष्टम्भनमस्ति न वा? अस्ति चेत् कथं तत्र पार्थिवांशस्याभावो वक्तुमर्हः?

अथ चेच्चन्द्रस्तेजसो विषयस्तदा कस्यायं भोग्यः?

इत्यादयः प्रश्ना अन्ये च तत्तच्छास्त्र-प्रतिपादितवर्णनानुसारं समुद्भूताः प्रश्ना विविध-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शास्त्रज्ञैस्तत्रभवद्भिर्मान्यैरवश्यं समाधास्यन्त इत्याशास्ति—इति ।

प्रस्थानिकः—सम्मानसमारोहः

प्राप्तपत्त्रानुसारेण विदितमभूद्यद् विगते जुलाईमासे ग्वालियरस्थमहाविद्यालये संस्कृत-विभागाध्यक्षस्याग्निहोत्रिणो डा० प्रभुदयालु-महाभागस्य प्रास्थानिकः सम्मानसमारोहः संस्कृतपरिषद्द्वारा समायोजितोऽभूत् । तत्र सर्वतः प्रथमं मङ्गलपाठे जाते परिषत्सचिवेन श्रीरमेशचन्द्रपौराणिकेन पुष्पमाल्यार्पणपुरस्सरं श्रीमतोऽग्निहोत्रिमहोदयस्य सम्मानमक्रियत ।

तत्र च समुपस्थितैरेतदीयमाभारं प्रदर्शय-द्भिर्विद्वद्भिः श्रीमतोऽग्निहोत्रिमहोदयस्य विशिष्ट-कार्यकलापविषयमुद्दिश्य स्वस्वविचाराः प्रकटि-तास्तथा श्रीमतेऽग्निहोत्रिमहानुभावाय ससम्मानं धन्यवादाश्चार्प्यन्त ।

अवसरेचास्मिन् तदानीं तत्र-ग्वालियरस्थ-जीवाजी विश्वविद्यालयस्य कुलसचिवः श्रीभट्टा-चार्यप्राचार्यः श्रीपण्डितः, श्रीविश्वनाथोपाध्यायः, हिन्दीविभागाध्यक्ष-श्रीमित्तलमहोदयः, डा० श्रीवर्माणः, डा० श्रीश्यामवर्माणः, डा० वीर-बालाशर्मा, एवं श्रीकुमारीरस्तोगी, श्रीबद्रीप्रसादः 'शिवः,' श्रीमहेशश्रीवास्तवः, श्रीवासुदेवशर्म-प्रभृतयो विशिष्टाः सभ्याः सम्मिलिताः समभूवन् । अन्ते च श्रीमता अग्निहोत्रिमहोदयेन प्रत्युत्तरं प्रयच्छता सहयोगिभ्यः साधुवादाश्छात्रेभ्यश्च शुभाशिषोऽदीयन्त । समुपस्थितानां सर्वेषामपि तेषां छायाचित्रस्यायोजनमभूदिति शम् ।

प्रयागे संस्कृतशिक्षा

समाचारपत्रादवगतमभूद्यत् नगरेऽत्र मासत्रयाय जिज्ञासु-सरलतम-संस्कृत-प्रचार-समितेस्तत्त्वावधाने बिभिन्नस्थानेषु निःशुल्करूपेण संस्कृत-शिक्षणस्यायोजनं कृतमास्ते । अवसरेऽस्मिन् पौराणिकाः, जैनाः, मुस्लिमादयश्च महत्यां संख्यायां भागं गृह्णाना विद्यन्ते । इदानीमत्र प्रशिक्षणार्थिनां २२५ संख्या वर्तते ।

यद्येवंविधान्यायोजनानि प्रतिनगरं समये-समये कुर्वीरन्, तदा संस्कृतस्य समधिकः प्रचारः प्रसारश्च स्वल्पतमे काले सम्भवेदित्यहं मन्ये ।

—दीनानाथत्रिवेदी मधुपः
सहसम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपयोगी लघुकथा

श्रीगिरिराजशर्मा शास्त्री, जयपुरम्

समर्थरामदासः—सप्तदशम्यां शताब्द्यामस्य श्रीसमर्थरामदासस्याविर्भावोऽभूत् । अस्य पिता श्रीसूर्याजीपंतठोसरः, माता च रेणाबाई आसीत् । अस्य बाल्यकालीनं नाम 'नारायणः' इत्यासीत् । महाराष्ट्रप्रदेशे जाम्बनामके ग्रामे नारायणस्य जन्म अभूत् । अस्य जेष्ठो भ्राता परमो धार्मिक आसीत् । सः 'श्रेष्ठ' इति नाम्ना ख्यात आसीत् । नारायणस्य बाल्यकाले अस्य पितुः श्रीसूर्याजीपन्तस्य देहान्तोऽभूत् । मातुराग्रहेण नारायणः स्वविवाहार्थं उद्यतोऽभूत् । स बाल्यकालादेवातीव विरक्तवृत्तिरासीत् । विवाहमण्डपे 'सावधानेति' शब्दं श्रुत्वा नारायणो विवाहमण्डपात् पलायितोऽभूत् ततो नासिकक्षेत्रं प्राप्य तत्र तेन पञ्चवट्यां द्वादशवर्षपर्यन्तं कठोरं तपोऽनुष्ठितम् । त्रयोदशकोटिमितेन श्रीराम जय राम जय जय राम' इति मन्त्रजपेन स प्रभोः श्रीरामचन्द्रस्य साक्षात्कारं कृतवान् । तदनन्तरं द्वादशवर्षपर्यन्तं तेन सम्पूर्णस्य देशस्य तीर्थयात्रा कृता । मुहम्मदीयशासनेन प्रपीडितस्य हिन्दुसमाजस्य दीनदशां तेन स्वनेत्राभ्यां विलोक्य पतितसमाजस्य सामर्थ्यसम्पादनार्थं सन्देशो दत्तः । स्थाने स्थाने महावीरस्य हनुमतः कोदण्डपाणेः श्रीरामस्य च उपासनायाः प्रचारः कृतः । यवनानामत्याचाराणां प्रतीकारस्य प्रेरणा

समर्थरामदासः—सत्रहवीं शताब्दी में इन समर्थरामदासजी का आविर्भाव हुआ था । इनके पिताजी श्रीसूर्याजीपंतजी ठोसर और माता रेणाबाई थी । इनका बाल्यकालीन नाम नारायण था । महाराष्ट्र प्रदेश में जाम्ब नाम के ग्राम में नारायण का जन्म हुवा था । इनके जेष्ठ भ्राता परम धार्मिक थे । वे 'श्रेष्ठ' इस नाम से विख्यात थे । नारायण के बाल्यकाल में इनके पिता श्री सूर्यजीपन्त का देहान्त हो गया था । माता के आग्रह से नारायण अपने विवाह के लिए तैयार हुआ । वे बाल्यकाल से ही अत्यन्त विरक्त वृत्ति के थे । विवाह मण्डप में सावधान शब्द सुनकर नारायण विवाहमण्डप से भाग गए । उन्होंने नासिक क्षेत्र में जाकर वहां पञ्चवटी में बारह वर्ष तक कठोर तप किया । तेरह करोड 'श्रीराम जय राम जय जय राम' मन्त्र जप से उन्होंने प्रभु रामचन्द्र का साक्षात्कार किया । उसके पश्चात् बारह वर्ष तक उन्होंने सम्पूर्ण देश की तीर्थयात्रा की । मुहम्मदीय (मुस्लिम) शासन से प्रपीडित हिन्दू समाज की दीन दशा उन्होंने अपने नेत्रों से देख कर पतित समाज में सामर्थ्य सम्पादन का संदेश दिया । स्थान स्थान पर महावीर हनुमान् की, धनुर्धारी श्रीरामचन्द्र की उपासना का

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेन साधारणजनेषु समुद्भाविता। स्वसंघटनस्य निर्माणं कृत्वा तेन जनजागरणस्य कार्यं सर्वत्र प्रारब्धम्। श्रीसमर्थगुरुरामदासस्य सन्तसंघटनस्य—श्रीशिवाजीमहाराजेनारब्धे स्वातन्त्र्यसम्पादनकार्ये अतीवोपयोगोऽभूत्। दासबोधः, आत्मारामः, मनोबोधः (मनाचे श्लोकः) इत्यादिषु अनेकेषु ग्रन्थेषु समर्थस्य श्रीरामदासस्वामिनः तात्विकानां व्यावहारिकाणाञ्च विचाराणां दर्शनं भवति।

प्रचार किया। यवनों के अत्याचारों के प्रतीकार की प्रेरणा का उन्होंने जनसाधारण में निर्माण की। अपना संगठन बनाकर उन्होंने जनजागरण का कार्य सर्वत्र प्रारम्भ किया। श्री समर्थ गुरु रामदास के सन्त संगठन का श्रीशिवाजी महाराज द्वारा प्रारम्भ किए स्वातन्त्र्यसम्पादन कार्य में अत्यधिक उपयोग हुआ। 'दासबोध' 'आत्माराम' 'मनोबोध' (मनाचे श्लोक) इत्यादि अनेक ग्रन्थो में समर्थ श्री रामदास स्वामी के तात्विक और व्यावहारिक विचारों का दर्शन होता है।

सुरक्षा और सेवा के लिये

रूबी जनरल इन्स्योरेंस कम्पनी लिमिटेड

वर्ष की नैट प्रीमियम आय,	नैट प्रदत्तधनराशी,	मूलधन और फन्डस्	असैटस्
१९६८, रु० ३,६९,९५,०००	रु० १,९०,८३,०००	रु. २,२३,५३,०००	रु. ६,८६,०२,०००

बिजनेस ट्रान्जेक्टैड

फायर मेराइन मोटर एक्सीडैंट अवीयेशन मशीनरी तथा रिएक्शन आदि-आदि

ब्रान्चेंज तथा एजेंसीज भारत के समस्त प्रमुख नगरों में और विदेशों में

प्रधान कार्यालय और पञ्जीकृत (रजिस्टर्ड) कार्यालय

रूबी हाऊस

८, इण्डिया एक्सचेंज प्लेस, कलकत्ता-१

दिल्ली कार्यालय २१, दरियागंज दिल्ली

मैनेजिंग डाइरेक्टर श्री के० पी० मोदी, जे० पी० ए. एफ. आई. आई.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाराजा श्री उम्मेद मिल्स लिमिटेड़

पाली मारवाड़

– उल्लेखनीय उत्पादन –

* वस्त्र *

सुन्दर व आकर्षक
कोर्स, मीडियम व सुपर फाइन में
मर्सराइज्ड़, ब्लीच्ड़, डाइड व प्रिन्टेड
*लट्ठे *चद्दरें *पॉपलिन
*केम्ब्रिक *लॉन
*वायल *धोती *साडी
आदि ।

* सूत *

कार्डेड, कोम्ब्ड़ मर्सराइज्ड़
१ काउन्ट से १४० काउन्ट तक
हैंको में, कोनों पर व
साइज किया हुआ
बीमों पर

रिटेल शॉप–लक्ष्मी मार्केट, पाली

तार: उम्मेदमिल्स

फोन: ३३, ३७ व पी.बी.एक्स ६७, ८०, १५० बीस लाइनें

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान में पिछले बीस वर्ष

कुछ विशिष्ट उपलब्धियां

कृषि

राज्य के एकीकरण से पूर्व खाद्यान्नों के अभाव के फलस्वरूप इनका आयात किया जाता था, लेकिन अब उत्पादन क्षमता में वृद्धि के उपरान्त खाद्यान्नों का निर्यात देश के विभिन्न भागों में किया जाने लगा है। खाद्यान्नों का उत्पादन जो १९५०–५१ में २९.०० लाख टन था बढ़कर वर्ष १९६७–६८ में ६६.०८ लाख टन हो गया है।

बिजली

विद्युत क्षेत्र में महत्वपूर्ण प्रगति के कारण जहां प्रथम योजना के आरम्भ में ८ मेगावाट बिजली फर्म पावर उपलब्ध थी वह बढ़कर १९६८–६९ में २३३ मेगावाट हो गई है। इसके अतिरिक्त इन्हीं वर्षों में जिन बस्तियों में बिजली पहुंचाई गई है उनकी संख्या ४२ से बढ़कर २,१३६ हो गई है।

तकनीकी शिक्षा

तकनीकी शिक्षा के क्षेत्र में स्नातक पर प्रशिक्षण क्षमता सन् १९५०–५१ में ६० से बढ़कर १९६७–६८ में ७३० तक पहुंच गई है।

जन स्वास्थ्य

पिछले २० वर्षों में राजस्थान में अस्पतालों और दवाखानों की संख्या १९५०–५१ में २३४ व १५६ से बढ़कर क्रमशः १९६८–६९ में ३३५ व २२० हो गई है। इसी प्रकार इन वर्षों में रोगी शय्याएं ५,७२० से बढ़कर १२,६३१ हो गई है। पहले केवल जयपुर में ही मेडीकल कालेज था लेकिन अब उदयपुर, अजमेर, बीकानेर, व जोधपुर में भी मेडीकल कालेज है।

सहकारिता

सरकारी समितियों की संख्या १९६७–६८ में २२,४६० तक पहुंच गई जिसकी सदस्यता १३.८७ लाख है। कृषकों को १९६८–६९ के अन्त तक सम्भवतः १२ करोड़ रुपये के अल्प और मध्यकालीन ऋण बांटे जाएंगे। जबकि १९५०–५१ में वह ऋण केवल १४.३५ लाख रुपयों के दिये गए।

सिंचाई

लघु सिंचाई के अन्तर्गत सिंचित क्षेत्र सन् १९५०–५१ में ११.७४ लाख हैक्टर था जो सम्भवतः यह क्षेत्र १९६८–६९ के अन्त तक २३.५० लाख हैक्टर तक बढ़ जावेगा।

शिक्षा

राजस्थान में ३०० या उससे अधिक आबादी वाले ग्रामों में प्राथमिक शिक्षा की सुविधाएं उपलब्ध हैं। ६ से ११, ११ से १४, और १४ से १७ वर्ष तक आयु के कुल बच्चों में स्कूल जाने वाले विद्यार्थियों का प्रतिशत १९६८–६९ के अन्त तक क्रमशः ५६.५, २३.३ और ११.०० हो गया है १९५१–५२ में यह प्रतिशत केवल १४.८, ५.० व १.९ था।

जल प्रदाय

सन् १९४९ में ग्रामीण जल प्रदाय योजना नहीं के बराबर थी। सन् १९६८–६९ में १८९ योजनाएं चालू हैं। लगभग समस्त शहर जल प्रदाय योजना के अन्तर्गत लाये जा चुके हैं। इन शहरी जल प्रदाय योजनाओं की संख्या १९५०–५१ में ५ से बढ़कर १९६८–६९ में ७८ हो गई है।

सड़क यातायात

राजस्थान में सड़कों की लम्बाई १९५१–५२ में १८,७४९ किलोमीटर से बढ़कर १९६८–६९ में ३१,३६३ किलोमीटर हो गयी है।

राजस्थान सरकार द्वारा प्रसारित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रहेलिका

रचयिता— श्री भी. त्र्यं. केंढे, मुख्याध्यापकः श्रीरामसंस्कृतविद्यालयः, जालना,

(१)

नमपथगमनार्थे सागराधारणार्थे
किमपि न अशनार्थे तस्य वा वाहनार्थे ।
अविरतगमनं स्यात् नास्ति विश्रांतिर्यस्य
कथय तदभिधेयं मां सखे ! कौतुकाय ॥

(२)

अणुसमो यदि देहः प्राप्य भूमिं जलं च
वरयति महिमानमप्रमेयं गरिष्ठम् ।
जनयति बहुसूनून् तेषु तत् बाहुलेन
वसति कथय, किं तत् केन नाम्ना प्रसिद्धम् ॥

(३)

भूम्याऽऽगतो दंड एवाहमस्मि
कांडैर्युतो रामपुराणवच्च ।
पर्णैर्युतं शोभित-केतनं मे
चोष्यं सुमिष्टं वद नाम किं मे ॥

१ पृथ्वी, २ बीजम्, ३ इक्षुदण्डः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

(ब्राह्मणमुद्दिश्य)

आशुकवि-श्रीहरिशास्त्री, सम्पादकः

दयावन्तो ब्रह्मचर्य-
परा: शौचपरायणा: ।
श्रौतकर्मरता विज्ञा
ब्राह्मणा: समुदोरिता: ॥१॥

१—दयावान् ब्रह्मचर्य पालनेवाले शौच (पवित्रता) सदाचार में लगे हुए वेदोक्त कर्मनिष्ठ विद्वान् ब्राह्मण कहलाते हैं।

ब्राह्मणास्ते जगत्पूज्या
वन्दनीयाश्च भूतले ।
धर्मकर्मोपदेष्टार-
स्तपश्चर्यापरायणा: ॥२॥

२—भूतल में वे ही ब्राह्मण हैं वे ही जगत्पूज्य हैं वे ही वन्दनीय हैं। जो धर्म-कर्म के उपदेश करते हैं, और नित्य तपस्या करते रहते हैं ?

गुरवो देवसिद्धाश्च
शरणागतवत्सला: ।
शास्त्रतत्त्वविदो विद्या-
ऽध्यापका: शमशालिन: ॥३॥

३—जो गुरु हैं (ब्रह्मविद्या प्रदान करते हैं) देव जिनके सिद्ध हैं अर्थात् जो दैवी सिद्धि को पा चुके हैं। जो शरणमें आये की रक्षा करते हैं, उसके दुःख को दूर करते हैं। शास्त्रों के तत्त्व जानते हैं विद्याऐं पढ़ाते है और जिनका जीवन शम (शान्ति) प्रधान है।

वेदाधारा स्तएवाऽस्मिन्
अनुकार्या धरातले ।
तेषामेवोपदेशं च
पालनीयं च सर्वश: ॥४॥

४—वेदों के (वेद ज्ञान) के आधारभूत वे ही ब्राह्मण इस संसार में अनुकरणीय है। उन्हीं का किया उपदेश हम सबको क्षत्रिय वैश्य शूद्रों को सर्वप्रकार माननीय तथा पालनीय है।

तदुक्तेनैव मार्गेण
गन्तव्यं क्षत्रियादिभि: ।
तेषामादेशतो गच्छन्-
मार्गस्थो नावसीदति ॥५॥

५—उनके बताए हुए मार्ग पर ही क्षत्रियादिको चलना चाहिये, उनकी आज्ञानुसार चलता हुआ मार्गस्थ कोई भी दुःखी नहीं होता है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. No. J 7
Licence No. PP. 6
"Licenced to Post.
Without Prepayment"

* मङ्गलम् *

श्रीहरिशास्त्री, सम्पादकः

सिन्दूरशोणद्युतिसर्वगात्रा,
वराक्षिपाशाङ्कुशहस्तपद्मा ।
रक्ताम्बरा चन्द्रकलावतंसा
श्रीसुन्दरी स्तान्मम मंगलाय ॥

मासावतरणम्

वापीकूपनदीनदानविरतं वर्षाभिरापूरयन्
मेघान्वारिभरांश्च वायुरयतः सर्वत्र संचारयन् ।
प्रारंभे किल मानयन्प्रतिगृहं श्रीकृष्णजन्मोत्सवं
विघ्नेशं च समर्चयन्परदले भाद्रो हि मा: प्राप्तवान् ॥

प्रकाशक.—जयबहादुरसिंह पता: भारती भवन, गोपालजी का रास्ता, जयपुर। दूरभाष: ७५४९६
राधेश्याम शर्मा द्वारा श्री हनुमान प्रिंटिंग प्रेस, चौड़ा रास्ता, जयपुर में मुद्रित । फोनः ६३१५६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतमासिकस्य



पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार
22 NOV 69

सोढं येन महत्कष्टं देशस्वातन्त्र्यलब्धये ।
वन्द्यो राष्ट्रपिता सोऽयं श्रीमान् गान्धीमहोदयः ॥
अशनं वसनं चास्य साधारणमभूदलम् ।
सदाचारः सदा गान्धी महात्मा नम्यतामयम् ॥

—मधुपः

१९

वार्षिकमूल्यं सप्तमुद्राः ७.००

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

१२

एकप्रतेः सप्ततिपणाः ०.७०

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान–मध्यप्रदेश–गुजरात–महाराष्ट्र–मद्रास–आंध्र–उत्तरप्रदेश–

बिहार–पञ्चनद–सर्वकारैः स्वीकृता

विषय–सूची

क्र० सं०	लेखाः	लेखकाः	पृष्ठसंख्या
१.	मङ्गलम्	श्रीहरिशास्त्री, सम्पादकः, जयपुरम्	४५९
२.	आधुनिकपरिप्रेक्ष्ये संस्कृतम्	श्रीशम्भुनाथाचार्यः, करहलः	४६०
३.	श्रीभारतीवन्दनानवकम्	श्रीगोविन्दरामद्विवेदी, आहोरः,	४६३
४.	वामनविजयम्	आचार्य–श्रीविश्वनाथमिश्रः, बीकानेरः	४६४
५.	गालिबस्य गीतानि	कालूरि–श्रीहनुमन्तरावः, हैदराबादः	४६६
६.	आंग्लभाषायाः का सिद्धिः ?	श्रीव्रजेशचन्द्रः शास्त्री	४६७
७.	गोसेवा	खंडवल्लि–श्रीसूर्यनारायणशास्त्री, आन्ध्रः	४६९
८.	संस्कृतभाषा मृता नास्ति	श्रीहरिशास्त्री, सम्पादकः	४७१
९.	जिज्ञासा–समाधानम्	पं० श्रीबदरीप्रसादशास्त्री, प्रपूर्णा	४७३
१०.	राष्ट्रपिता श्रीगान्धी महात्मा	दीनानाथत्रिवेदी मधुपः	४७७
११.	श्रीगान्धिगौरवम्	श्रीशिवगोविन्दशास्त्री, जयपुरम्	४७९
१२.	सर्वदेवमयः श्रीगान्धी	श्रीराधाकृष्णशर्मा साहित्याचार्यः, ,,	४८१
१३.	भववभवसंन्यासी	श्रीया० वि० देवासकरः, बडौदा	४८२
१४.	श्रीगान्धेः सूक्तिसंग्रहः	श्रीगणेशरामशर्मा, डूँगरपुरम्	४८३
१५.	मोदकलाभोपायः	मधुपः	४८४
१६.	श्रीमहात्मने श्रद्धाञ्जलिः	श्रीगुरुजीमहोदयाः	४८५
१७.	संस्कृतपण्डितान् प्रत्यभ्यर्थना	मधुपः श्रीगिरिराजशर्मशास्त्री	४८७
१८.	सम्पादकीयम्	'मधुपः' सहसम्पादकः	४८८
१९.	श्रीदुर्गासप्तशती, अष्टमोऽध्यायः	अनु० श्रीहरिशास्त्री, सम्पादकः जयपुरम्	४९६
२०.	लघुकथा	श्रीगिरिराजशर्मा शास्त्री, जयपुरम्	५००
२१.	सूक्तिसुधा	आशुकवि–श्रीहरिशास्त्री, सम्पादकः	

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः
आशुकवि-कविभूषण-
श्रीहरिशास्त्री

सहसम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
साहित्यालङ्कारः

प्रबन्धसम्पादकः
सहसम्पादकश्च
गिरिराजशर्मा

भारती-भवनम्,
गोपालजी का रास्ता,
जयपुरम्

भारती

लेखैरुपष्टुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

वर्षम् १९ | आश्विनः, विक्रमाब्दः २०२६ (अक्टूबर, १९६९) | अङ्कः १२

मङ्गलम्

आशुकवि-श्रीहरिशास्त्री, सम्पादकः

भालाक्षकादि-सुरमालार्चिता, वपुषि बालारुणोपमविभा
ज्वालावलीव रुचिमालामयी, प्रणतपालाभिधानविदिता ।
हाला मदारुणविशालाक्षिणी स्वमधुरालापतर्जितपिका
बालाम्बिका मसृणकालान्तका हि भवजालात्समुद्धरतु माम् ॥१॥

मासावतरणम्

प्राक् पक्षे द्विजभोजनैः पितृगणान् श्राद्धेषु संप्रीणयन्
शुक्ले स्वात्मदलेऽम्बिकां प्रतिगृहं भक्त्यार्चयन् मोदतः ।
सन्ध्याया रचनार्चनासु च कुमा-रो र्नागिरोर्योजयन्
मासः प्राप्त इहाश्विनो रवितपं तीव्रं समापादयन् ॥२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आधुनिकपरिप्रेक्ष्ये संस्कृतम्

ले०—श्रीशम्भुनाथाचार्यः साहित्याचार्यः, आजादहिन्द इण्टर कालेजः, करहलः, मैनपुरी)

[विदुषा लेखकेनात्र स्वकीये लेखे संस्कृतस्य प्रचार-प्रसारात्मकस्य कर्मणः प्रतिबन्धका हेतवो निर्दिष्टाः सहैव तन्निराकरणोपायश्चापि निर्दिष्टाः। तत्र सर्वैरपि संस्कृतस्याभ्युदयमिच्छद्भिर्विद्वद्भिरवश्यमेव समनोयोगं ध्यानं देयमिति—मधुपः]

जलं जीवनमित्यनर्थान्तरम्। प्रवहमानं जलं यथा पवित्रं, निर्मलं तुष्टिकरं च कीर्त्यते तथैव क्रियाशीलं, सरित्प्रवाहवन्निरन्तरगमनशीलं नवनवोन्मेषजुष्टं, परिवर्तनशीलं मानवजीवनमपि श्लाघ्यं प्रशस्यञ्च प्रोच्यते। गगनस्पर्धिनः कस्मादपि शिखरिणो विनिसृतं अम्भः उच्चावचेषु स्थलेषु पतनोत्पतनाभ्यां निरन्तरप्रवाहाच्च यथा संघर्षस्यैव एकमात्रा कथा तथैवेदं मानवजीवनमपि उत्थानपतनयोः, हासशोकयोः, सुखदुःखयोश्चैका नितान्तविचित्राऽऽख्यायिका खलु। प्रवहति जले सम्मोहनस्य यथैकमाकर्षणं तथैव जनजीवनेऽस्मिन् विवेकशक्तेः, प्रक्षालनशक्तेः, श्लाघ्यमेकं मोहनं विद्यते।

आद्ययुगीनमानवेन अनयैव विवेकशक्त्या परेषु हार्दभवानां रहस्योद्घाटनाय, परस्परमवबोधाय, कतिचित् संकेता निर्मिताः। कालान्तरे नैजान् संकेतान् अपर्याप्तान् अवगम्य, कठिनपरिश्रमेण नूतनानि अनुसन्धानानि विधाय, परिवर्तितयुगानुसारिणो नव्यान् प्रयोगान् परीक्ष्य यत्कथमपि तेन भाषाया रूपं स्थिरीकृतम्। आद्यसृष्टेः का भाषा आसीदिति कथनं तु महत्कठिनं, किन्तु निखिलेऽस्मिन् जगति प्राप्तासु समस्तभाषासु प्राचीनत्वं, प्राग्भावित्वं वा संस्कृतस्यैवेति "जिन्दा अवेस्ता—ऋग्वेदयोः" भाषाद्वयस्य तुलनात्मकमध्ययनं विधाय भाषाविज्ञानविद्भिः स्थिरीकृतम्। भाषाया रूपनिर्माणे मानवमस्तिष्कं अतिरिच्य जलवाय्वोः भौगोलिकपरिस्थितीनामपि च प्रभावो भवति। भौगोलिकपरिस्थिति-जल-वायु-प्रभावेण सह मानवस्य परिवर्तनानुरागिणी मनोवृत्तिः आद्यां तामेकां भाषां अनेकरूपेषु व्यभिनत्। भाषाया इमानि विभिन्नरूपाणि—प्राकृत-अपभ्रंश—लैटिन-ग्रीक-इंग्लिश-रशियनेत्यादीनि—अस्या एव मनोवृत्तेः परिणामः।

एवमेव प्रस्तरयुगं लौहयुगं च परित्यज्य वयमद्य विज्ञानयुगे-राकेटयुगे श्वसिमः। विज्ञानेन प्रत्येकक्षेत्रे आमूलानि परिवर्तनानि विहितानि। अस्माकं जीवनस्य मूल्यम्, विचाराणां दिशा, चिन्तनस्य आयामः, धर्मस्य विश्वासः, हृदयस्य संवेदनशीलतेति नैकमपि वस्तु यद् विज्ञानेन अस्पृष्टं स्यात्। रामस्य वनवासः, यक्षस्य प्रवासः, कृष्णवियोगे गोपिकानां विलापः, सीताया अपहरणं, पञ्चानां पतीनां द्रौपद्याः पत्नीत्वम्, महाभारतस्य समरः, इत्येतानि नव्यया दिशा चिन्तयितुमस्मान् विवशीकुर्वन्ति टेलीविजनयुगोऽयम्, यत्र रेडियोश्रवणमपि पुरातनं प्रतीयते। राकेटस्य प्रचुरप्रचारात् वायुयानमपि महत्त्वशून्यं भविष्यतीति नातिशयोक्तिः।

महत्क्रान्तिकरमपीदं परिवर्तनं अतीताद् असम्पृक्तं, अतीतमञ्चलं सर्वथा विहाय वर्तितुं, नार्हति। उचितमपि चेदम्। प्राचीनानि मूलभूततत्त्वानि आदायैव किमपि नवीनं पल्लवितं भवति। यथाहि आयुर्वेदस्य विकासः खलु एलोपैथी, अग्निबाणस्य विकसितं रूपं अणुबमः, पुष्पकविमानस्य नव्यं रूपं वायुयानमिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतस्य हिन्दी इव लैटिनस्य विकसितं रूपं इंग्लिश भाषा। अस्माकं कथनस्यायमाशयो यद् वयं कियन्तोऽपि आधुनिका भवेम, प्राचीनतां प्रति श्रद्धाभावना, सम्मानवृत्तिः, तद्रक्षणं तदुन्नतिप्रयासश्चास्माकमावश्यकानि कर्त्तव्यानि। तद्विषये मौनं अभिशापः, संकीर्णवृत्तिश्च।

संस्कृतं ह्यस्माकं आदिभाषा वेदभाषा च विद्यते। यस्मात् भारतात् "स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः" तस्येयं भाषा देववाणी कथ्यते। सभ्यताया उदयस्य, संस्कृते-र्गौरवस्य, जीवनस्य शाश्वतमूल्यानां, विचाराणां परम्परायाश्च समन्वितं रूपं यदि कुत्रापि द्रष्टुं शक्यते तद् संस्कृतदर्पण एव। आद्यानां ऋषीणां प्रबुद्धगीतानि, तपःपूतानां ब्रह्मर्षीणां चिन्तनानि, मूर्धाभिषिक्तानां चक्रवर्तिनां शासन-कार्याणि, वैश्यानां वाणिज्यकौशलं, शूद्राणां निःस्वार्थसेवापरायणता, भक्तानां भक्तिपीयूष-वर्षी गीतगरिमा, कवीनां कल्पनाविहारः, संयोगिनां शृङ्गारः, वियोगिनां प्रस्तरद्रावी विलापः, किमधिकं कथयामो नास्ति किमपि तद्वस्तु यदत्र नोपलभ्येत। सुकुमारमतीनां बालानां मनोरञ्जनादारभ्य गूढदार्शनिकानां ज्ञानपिपासाशान्तिपर्यन्तं यत्किमपि काम्यते तत्समस्तमत्र विद्यते।

सेयं संस्कृतभाषा समानरूपेण कठिना सरला च। योग्यगुरूणामभावे काठिन्यञ्चास्याः कथयितुं न पार्यते—तितीर्षुरस्ति कश्चिदुडुपेनैव सागरम्—इत्येव सुवचः। अपरतश्चेयमतीव सरला। अस्याः वाक्ययोजनं च नितान्तं सरलम्। वाक्ये पदानां स्थाननियमस्य निश्चितत्वाद्—अतएव शिथिलत्वात्—'रामः लेखन्या एकं पत्रं लिखति' इति वाक्यं "लिखति पत्रं एकं रामः लेखन्या," 'एकं पत्रं रामः लेखन्या लिखति", "लेखन्या एकं पत्रं लिखति रामः", इत्यादि विभिन्नरूपेषु लेखितुं शक्यते। सन्धिनियमानुसारेण वाक्येषु यन्माधुर्यमायाति तदद्वितीयम्। समासविधानञ्चास्या निजं वैशिष्ट्यम्, येन विपुलतरमपि वाक्यं पदवत् लघु भवति। शब्द-धातुरूपनियमस्तु महावैज्ञानिकः। अकारान्तस्य 'राम' शब्दस्य रूपाणां कण्ठस्थीकरणेन सर्वेषामकारान्तपुंल्लिङ्गशब्दानां रूपाणि प्रायेणावगतानि भवन्ति। एवमेवान्येषां शब्दानां कथा।

कश्चिदपि सहृदयो जिज्ञासुः षट्मासेषु वार्तालाप–सामान्यलेखनादिज्ञानं स्वल्पेनैव परिश्रमेण प्राप्तुमर्हति। यद्यप्युक्तरीत्या संस्कृतमतीव सरला भाषा, तथापि सामान्यजनतायै अस्याः परिचयं दातुं सरलीकरणप्रयासः क्रियते संस्कृतानुरागिभि प्रसारकार्यतत्परैः। एतदर्थं अनेकाः परीक्षा निर्धारिताः, सरलतमानि पाठ्य-पुस्तकानि लिखितानि, यत्र तत्र विद्वत्सम्मेलनं वाण्यायोज्यते यत्र जाज्वल्यमाने–सरलीकरण-रूपे प्रश्नेऽत्र गूढो विचारो विमर्शश्च क्रियते।

एतावत्तावत् एतत्सरलताविषये किमपि प्रोक्तं, इदानीं अन्यस्मिन्पक्षेऽपि किमपि वक्तव्य-मावश्यकमस्ति। अद्यैक ईदृशोऽपि विचारकवर्गः समीक्ष्यते योऽमुं प्रश्नं ह्यार्थिकदृशा विवेचयति। तन्मते आधुनिकेऽस्मिन्युगे, प्रगतियुगे—आर्थिक-संघर्षशीले युगे तत्सर्वं व्यर्थं, अकिञ्चित्करं यत्समाजस्य देशस्य चार्थिकप्रगतौ किमपि सहयोगं कर्तुं नालम्। यच्चार्थिकदृशा व्यर्थं तस्य चास्तित्वमेव शङ्क्यम्। अनया सरण्या वर्तमाने युगे संस्कृताध्ययनस्य निष्फलत्वं अकिञ्चित्कर-त्वञ्च सुव्यक्तमेव। सामान्यतः सत्यमपीदं प्रतीयते। शास्त्रि-आचार्यपदवीजुषां समक्षं अध्यापनादतिरि क्तिमपिक्तं जीविकासाधनं नोपलक्ष्यते, तदपि च महता भाग्येन प्रयासेन च लभ्यते। अद्य पाश्चात्यभाषा-साहित्य-मननाद् अधिगततर्कशक्तयो भौतिकतावादि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समीक्षकाः पुराण-महाभारत-श्रीमद्भागवत-कथाविषये सन्दिहन्ति। प्रत्यक्षवादिनः खलु इमे उपहसन्ति कथावाचकान् व्यासाभिमानिनः पण्डितान्, भौतिकविज्ञाननिकषेऽनुत्तीर्णानि तथ्यानि ग्रहीतुं नाभिलषन्ति मनसापि। श्रीसत्यनारायणकथा श्रीमद्भागवतसप्ताहश्रवणं वा यत्र कुत्रापि दृश्यते तद् धर्मभीरुताया निदर्शनं न तु धर्म प्रियतायाः।

इदमपि कथ्यते यत् संस्कृतस्य जीवनशक्तिः व्याकरणनियमेष्वाबद्धतया ह्रासमुपगता। अपभ्रंशादि भाषाणां जन्मन इदमेव कारणम्। जनसाधारणपथादपसृत्य राजपथमनुगतं खलु संस्कृतम्। भाषा तु सैव प्रचारं प्रसारं वा लभते या जनभाषा भवेत्, या राजकूपत्वं विहाय जनसरित्त्वमुपेयात्। अस्ति संस्कृतं राजभाषेति सत्यं, किन्तु लोकाश्रयहीना एकान्तवासिनी वियोगिनीव जाता ननु।

लोकाश्रयो जीवनस्यापेक्षिकं तत्त्वमिति संस्कृतस्य तदर्थं सरलीकरणप्रयासः श्लाघ्यः किन्तु सरलीकरणस्याभिप्रायो हिन्दीकरणं न भवितुमर्हति। शास्त्रि-आचार्यादि—परोक्षाः संस्कृतमाध्यमेनाऽऽयोज्यन्ते किन्तु नैके विश्वविद्यालया तेभ्योऽपि संस्कृते एम० ए० पदवीं वितरन्ति ये हिन्दीभाषायामेव उत्तरं ददति। इदश्चान्यत् हास्यास्पदं यत् महाविद्यालयेषु त एव एम० ए० पदवीभाजः स्थानं लभन्ते निवर्तन्ते च निराशाः शास्त्रिणो वाचार्याः। एम०ए० उपाधिधारिभ्योऽस्माकं द्वेषो नास्ति, ते नियुज्यन्ताम् किन्तु योग्यतामाश्रित्य नो पाधिमेव केवलां निरीक्ष्य। संस्कृतविभागाध्यक्षः संस्कृत एव किमपि लेखितुं वक्तुं वा न शक्नुयात्, किमतोऽधिकं हास्यास्पदं स्यात्। उक्तविद्यालयेषु एम०ए० इतिपदवीभाजां आचार्यपदवीजुषां वा समानः प्रवेशो मुक्तः स्यात्, यदि कश्चित्पदवीद्वयसमलङ्कृतो ह्युपेयात्तस्मा एवावसरः प्रदेयः।

केवलां शालीयां परम्परां विश्वविद्यालयीयां वा पद्धतिमनुसृत्य समधिगतविद्येषु छात्रेषु एकाङ्गिज्ञानताया आरोपोऽपि नास्त्यकारणः। परम्पराद्वयमाश्रित्य चाधीयानाश्छात्रा "इतो भ्रष्टस्ततोभ्रष्टः" इति भणितिं चरितार्थयन्ति। प्रौढं ज्ञानं कूपमण्डूकताया व्यापकं ज्ञानं पल्लवग्राहितायाश्च निदर्शनं समजनि, इत्यहो।

इदमपि विचारणीयं यत् संस्कृतस्य भविष्यत् तावदुज्ज्वलतया प्रतीतं न भविष्यति यावत् तदध्ययनं प्रति जनतास्वाकर्षणं नोत्पत्स्यते समयः परिवर्तितः। निष्कारणवेदाध्ययनस्य दिवसा विलयं गताः। भारतीयसंस्कृतिरक्षार्थं, वेदोपनिषज्ज्ञानोपलब्धये, अपवर्गसाधनाय, निष्कारणाध्ययनाय वा न तावत् कश्चिद् बुभुक्षितः प्रयतिष्यते, यावत् तत्क्षुधानिवृत्त्यर्थं पर्याप्तमन्नम्, तत्पूर्तयेऽपेक्षितं धनम्, शासकीयसेवासु समानाधिकारः सामाजिकश्च सत्कारो यावन्न दीयते। यद्येताः सुविधास्तदध्येतृभ्यः प्रदत्ता भविष्यन्ति तदा प्रतिभाशालिनामपि प्रेमात्र भविष्यति, प्रतिभाबलं चाधिगत्य संस्कृतं पुनरपि गतं गौरवं ह्यवाप्य "संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः" इति भणितिं च सार्थां करिष्यतीति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीभारती-वन्दना-नवकम्

रचयिता—श्रीगोविन्दरामद्विवेदी, साहित्यशास्त्री, रा. उ. मा. शाला, आहोरः

सुरैर्दानवैः किन्नरैर्यक्षसिद्धैः, कवीन्द्रैर्मुनीन्द्रैर्यतीन्द्रैश्च पारम् ।
महिम्नो यदीयस्य नाप्तं कदाचित्, हृदाऽनन्तरूपां भजे भारतीं ताम् ॥१॥

सिताब्जासनस्थां पयश्शुभ्रवर्णैः सुरम्यैर्दुकूलैर्लसच्छ्वेतगात्राम् ।
सितं वाहनञ्चापि हंसो यदीयम्, हृदा तां भजे भारतीं सर्वशुक्लाम् ॥२॥

कराभ्यां धृतां कच्छपीं रम्यवीणाम्, रसालस्वरां सारयित्वा दयार्द्रा ।
अबोधत्रियामाहृतज्ञानपुञ्जम्, जगज्जागृत या विधत्ते भजे ताम् ॥३॥

तथा पुस्तकं सारभूतं गृहीत्वा, त्रिलोक्यां सदा ज्ञानमेवास्ति पुण्यम् ।
इतीवोपदेशं ददानां वदान्याम्, हृदा संदधे भारतीं ज्ञानरूपाम् ॥४॥

अथ स्फाटिकां मालिकां धारयन्तीम्, ध्रुवं ज्ञानमभ्याससाध्यं समस्तम् ।
इतीष्टं सुवृत्तं दिशन्तीं जगत्याः—हितार्थेऽहमाप्तां भजे भारतीं ताम् ॥५॥

विना यद्दयाया दिगन्तेषु कीर्तिः प्रसारं न याति प्रभूतेऽपि वित्ते ।
परं तत्प्रभावाद्धनाभाविनोऽपि, कवीन्द्राः पृथिव्यां प्रसिद्धाः भजे ताम् ॥६॥

समाश्रित्य यन्नामनौकां सहायां, जनाः पापिनामग्रगण्या अपि द्राक् ।
शरीरावसाने विशन्तीन्द्रलोकम्, भजे पावनीं स्वर्गदां भारतीं ताम् ॥७॥

असौ देवलोके प्रसिद्धप्रभावा, तथाऽसौ नृलोकेऽपि मान्यप्रतिष्ठा ।
ध्रुवं वन्द्यते नागलोकेऽपि नागैः, त्रिलोकेश्वरीं भारतीं तां भजेऽहम् ॥८॥

मातर्विनाशय हृदस्तिमिरं समस्तम्,
सज्ज्ञानसूर्यकिरणैः कुरु तत्र तेजः ।
येनान्धकारपतितं किल वस्तुजातम्,
दृष्टेः समापततु वर्त्मनि विश्ववन्द्ये !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

❀ वामनविजयम् ❀

प्रणेता–श्रीविश्वनाथमिश्रः, शार्दूलसंस्कृतविद्यापीठं, बीकानेरः ।

पूर्वानुवृत्तम्—

तृतीयं दृश्यम्

(सिंहासनासीनो बलिः, प्रधानामात्यः, सेनाध्यक्षः, अन्ये सभासदश्च यथास्थानमवस्थिताः)

बलिः—(उद्विग्नः सन् आवेशमुद्रया) सेनापते त्वादृशे युद्धकलाकुशले सेनानायके सत्यपि अदितितनयैः कृतः अस्माकं पराजयः भृशं दुःखयति माम् । न हि वयं बले, साहसे वा देवेभ्यो न्यूनाः, ततः किमिति पराजिता इति न पारये निर्णेतुम् । पलायमानानस्मान् अवलोक्य इन्द्रेण योऽट्टहासः कृतः सः अधुनाऽपि मम हृदये शूलायते ।

सेनापतिः—महाभाग ? वयं देवेभ्योऽन्यूना इति सत्यम्, युद्धकला चास्माकं तेभ्यः शोभना । युद्धसमये चास्माभिः सर्वेऽप्युपायाः अवलम्बिताः सर्वाश्च कलाः प्रदर्शिताः परं न जाने कथमीदृशी अघटनीयघटना सम्पन्ना ?

बलिः—(मन्त्रिणं दृष्ट्वा) भो मन्त्रिन् ? आलोच्यताम् यदिदानीं केन प्रकारेण वयमस्यापमानस्य प्रतिकारे समर्थाः भविष्यामः ?

मन्त्री—पारदृश्वानः नीतिशास्त्रस्य, ज्ञातारः चराचरस्य, कर्णधाराः दितिवंशावतंसस्य, गुरुदेवमहोदयाः शुक्राचार्या एव अस्यां विषमपरिस्थितौ समुचितमुपायं दर्शयिष्यन्ति । तेभ्यो विना नान्यः पन्थाः विद्यतेऽयनाय ।

बलिः—शोभनं स्मारितम् शोभनम् । परन्तु कथमिदानीं तेषां वन्द्यचरणानां दर्शनं स्यात् ?

(बलिः विचारमुद्रया तिष्ठति)

ततः प्रविशति द्वारपालः—

द्वारपालः—जयतु जयतु अशेषराजन्यशिरःसमभ्यर्चितशासनः, असुरकुलकुमुदकलाधरः, महाराजः । एते खलु प्रातःस्मरणीयाः नित्याभिवन्दनीयाः परमपूजनीयाः मन्त्रद्रष्टारो गुरुदेवमहोदयास्तत्रभवन्तः शुक्राचार्याः समुपस्थिताः वर्तन्ते ।

बलिः—(हर्षमुद्रायाम्) अहो ? गुरुदेवमहाभागाः स्वत एव समुपस्थिताः । अहोभाग्यं परमसौभाग्यम् । धन्यं मे जीवनम् (मन्त्रिणं प्रति)

मन्त्रिन्—शीघ्रातिशीघ्रं राजोपचारोचितां पूजनसामग्रीमुपाहरतु भवान्, यावदहं गुरुदेवं सस्वागतमानयामि ।

[बलिः गुरोरभिमुखं गच्छति गुरुं दृष्ट्वा साष्टाङ्गं प्रणमति, ततः गुरुमानीय सिंहासने उपवेश्य पूजयति प्रार्थयते च]

गुरुर्ब्रह्मा गुरुर्विष्णु र्गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः ॥
अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥

शुक्रः—आयुष्मान् भव सौम्य ? सर्वत्र विजयी भूयाः !

(ध्यानपूर्वकं बलिं पश्यन्)

असुरकुलकमलदिवाकर ? अद्य तव मुद्रा उदासीना कथं दृश्यते ? वीराणां समुद्वेजकः तव ध्वनिः कथमद्य मन्दायते ? अखिलविभवान् साक्षात् कुर्वती तवेयं तनुः कथमद्य जीर्णेव, शीर्णेव, शुष्केव वा लोचनपथगोचरी भवति ? राजन् ? अस्ति कच्चित् सर्वं कुशलम् ? अपि संचालनं भवति सुचारुतया शासनस्य ? अपि निरामयाः वर्धन्ते कच्चित् असुरकुलशक्तयः ?

बलिः—दनुजवंशशरण्य ? दयामय ? प्रभो ? सर्वदा सत्यं तथ्यमेवोदीर्यते भवता । यत्र भवताम् आशीर्वचांसि सन्ति तत्र कोदृशोऽपि अभावः कथमपि स्यातुं नार्हति । भवतां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृपाकटाक्षेण सर्वं शोभनं रमणीयमेवास्ते, किन्तु.........

शुक्रः—(आवेशमुद्रया) किन्तु.........कथय-कथय किन्तुशब्दस्य गर्भे कीदृशः संसारो निलीनो वर्तते यस्याभिलाषा व्यथयति भवन्तम् ? इह जगति का नाम शक्तिः अवशिष्टा, तिरोहिता वा वर्तते यदर्थम् उद्विग्न इव भृशं सन्तप्त इव च परिलक्ष्यते भवान् ? अथ केयं ससुपस्थिता कठिना समस्या या भवन्मार्गावरोधिका सती आकुलयति भवन्तम् ? यथार्थमभिधेयम् ।

बलिः—प्रभोः शत्रुभिः सुरैः जयमानः पराजयः सदैव पीडयति माम् । मृतवत् मन्ये आत्मानमधुना । न कदाचित् शान्तिरनुभूयते, न कुत्रापि रुचिः प्रवर्तते, नैव हर्षः, न वा उल्हास, न च कश्चन प्रमोद एव शक्यते कर्तुम् । यदा पराजयस्य घटना स्मृतिपथमायाति, तदा कम्पते शरीरम्, विदीर्यते—हृदयम्, भिद्यते मनः उद्विजते चेतः । किंकर्तव्यविमूढ इव, विक्षिप्त इव च भवामि तदा । आचार्य ! परमविषण्णोऽस्मि । मम गात्राणि सीदन्ति, मुखं च परिशुष्यति ।

शुक्रः—बले ? स्थाने खलु तवोद्वेगः । शत्रुभिः जायमानः पराजयः कस्य मनस्विनश्चेतो न दुनोति । अस्तु यज्जातं तत्तु जातमेव, वद इदानीम् किमभिलषितं ते साधयानि ?

बलिः—दयामय ? मम मानसमहोदधौ उत्तालतरंगायमाणाः विविधाः कामनाः, अभिलाषाः, समीहाश्च सदैव घातप्रतिघातं कुर्वाणाः विद्यन्ते । येन केनाप्युपायेन विजयः प्राप्तव्यः इति मे हृद्या कामना । स्वामिन् ? गर्वोद्रेकात् मस्तकमुन्नमय्य गगनतले विहारं कुर्वतो देवान् धराशायिनः सम्पाद्य, विगतमानम् इन्द्रञ्च पातालतलं प्रवेश्य इन्द्रस्य अमरावतीं दनुजकुलकल्लोलिनीं रचयितुमिच्छामि । भवतां पुनीतेनाशीर्वादेन अखिलान् दितिसुतान् विभवयुतान् कृत्वा मातृसेवाञ्च सफलयितुमिच्छामि ।

शुक्रः—कथमिव नहि "भविष्यतः समारंभाः
आदादेव विलक्षणाः" ।

अत एवोक्तम्—

वीरास्तपन्ति तेजोभिः वीरात् बिभ्यति जन्तवः ।
वीरेण शास्यते लोको वीरभोग्या वसुन्धरा ॥

बले ? महौजसो मानधनाः भवन्ति । ते दुर्गमस्थानान्यपि समुल्लंघ्य सर्वानतिशेरते । तात ? नैराश्यं मा गच्छ । भूतले वर्तमानानां सर्वेषां प्राणिनाम् अयं जन्मसिद्धोऽधिकारो वर्तते यत् स स्वात्मनि चमत्कारमुत्पादयेत् । अद्य यद् वस्तु कण इव दृश्यते तदेव श्वः मण इव भवति । अद्य यः सूक्ष्मबिन्दुरूपेण दृश्यते स एव श्वः महासिन्धुरूपे परिणमति । भूतले यद् वस्तु अद्य अचलवत् प्रतिष्ठितं दृश्यते तदेव परदिने भूकम्पस्य भूदोलस्य भूचालस्य च रूपं धारयित्वा तादृशीं भयंकरीं रचनां रचयति यया त्रस्ताः सर्वे प्राणिनः इतस्ततःआश्रयं कामयन्ते । एवमद्य यः खलु हस्तद्वययुक्तो बलिः अस्ति स एव श्वः सहस्राक्षं, सहस्रपादं सहस्रभुजमपि नारायणं वशीकर्त्तुं समर्थो भविष्यतीति नात्र सन्देहलेशोऽपि ।

बलिः—गुरो ? भवतामुपदेशेन दत्तं नवनवं जीवनम्, दर्शितः सन्मार्गः, प्रस्तुतञ्च धैर्यरूपं जलयानं कल्पनासमुद्रे प्रवहतः अधीरस्य मे कृते । महानुभाव ! कृपां विधेहि ? तथा समुन्नतः तादृशं मन्त्रं प्रदेहि यद्वशाद् वशंवदोऽयं भवतां प्रत्येकमक्षरं साकारं कृत्वा मेदिनीतलं विजयपुष्पोपहारैः सुशोभितं कर्त्तुं शक्नुयात् ।

सा कास्ति शक्तिर्जगतीतलेऽस्मिन्
लब्धुं न शक्या गुरुभक्तितो या ।
सा कास्ति लोके महती विपत्ति–
र्गुरोः कृपाभिर्न निवार्यते या ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गालिबस्य गीतानि

अनुवादकः—कालूरि श्रीहनुमन्तरावः, हैदराबादनगरम्

सर्वं नास्ति सुसाध्यं
नितान्त मपि दुर्लभा नरे नरता ॥

धृतभिक्षुकवेषोऽहं
दातॄणां चेष्टितानि पश्येयम् ॥

काशयां तव वेण्याः
चिन्ता निगलव्यथा च तदनु मम ॥

उद्यानगता सा किलः
वाञ्छेत् को नाम तत्र पुष्पाण्यधुना ?

कस्या वा स्मृत ओष्ठौ
दृष्टश्चुम्बनमयो मया सुस्वप्नः ॥

चरणौ तस्याः खिन्नौ
नवतं सा कस्य वा गता स्वप्नपथम् ॥

चित्राणि लेखांश्च मम प्रियायाः
लब्धानि मद्वेश्मनि मयि प्रमीते ॥

आगमनं प्रतिश्रुत्य नागता किमिदं प्रिये ।
मां ममैव गृहस्याद्य व्यदधा द्वारपालकम् ॥

पतितो मत्प्रियागेहाङ्गणे निर्गतचेतनः ।
तस्याश्चरणचिह्नोऽहं मुहुर्मुहु स्चुम्बेयम् ॥

ययातिनृपतेः स्वर्गनिष्कासनकथा श्रुता ।
निर्गम्यते मयाऽद्य त्वद्गेहादवमतात्मना ॥

भवत्यमोघं गुरुवाक्यमेव
सत्कर्मसिद्धौ किल बीजमन्त्रः ।
गुरोः प्रसाक्षात् सुलभं न किं स्यात्
तलातले वा भुवि चाधिपत्यम् ॥

शुक्रः—नभो विशालं गुरुभक्तिरस्ति चेत्
तदा स्युरुद्यानसमाः ह्यधीतिनः ।
गुरोर्वचः कल्पतरुः प्रसूयते
सदा सुधायाः खलु बीजमद्भुतम् ॥

विधीयते यत्र रवीन्दुतुल्यो
गुरोरुदारो विमलः प्रकाशः
भूत्वेव भृङ्गी सकला कलापि
तत्रैव झंकाररवं तनोति ॥

राजन् ? सर्वासां शक्तीनां मूलं तपो वर्तते, तपसा एव धाता रचयति, विष्णुः पालयति, शिवश्च संहरते। तपोबलादेव अंबरतलमवरुह्य विभासते भगवान् भुवनभास्करः, प्रकाशते-चन्द्रः, दीप्यन्ते च नक्षत्रमण्डलानि। अतः तपसः दानस्य च शंखनादेन त्वमपि समस्ताः कामनाः सफलयितुमर्हसि। एकस्य महतः अध्वरस्या-योजने महादानस्याहुतिद्वारा ब्रह्मणः कमलासनम्, शंकरस्य हिमालयः, विष्णोः शेषशय्या च आन्दोलिताः भविष्यन्ति।

बलिः—शिरसा वहामि भवदाशीर्वचांसि। श्रीमतामादेशानुसारम् आयोजनीये यज्ञे भवतां पादार्पणेन बलेः सर्वाः कामनाः अवश्यमेव सफलाः भविष्यन्ति।

पटाक्षेपः

क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आंग्लभाषायाः का सिद्धिः ?

ले०—श्रीव्रजेशचन्द्रः श्रीवास्तवः, शास्त्री

पञ्चपञ्चाशत्कोटिजनसङ्कुलेऽस्मिन् भारते वर्षे समयतोऽल्पतः देवभाषांग्लभाषयोर्वैशिष्ट्ये तयोः सिद्धिदायित्वे च प्रचलन्तः पुष्कलाः मतभेदाः अस्माकं दृष्टिपथमायान्ति। बहुभिर्विद्वद्भिस्तु संस्कृतभाषायाः हेयतामुद्घुष्य आंग्लभाषायाः ग्राह्यत्वं सप्रमाणं सतर्कञ्च प्रचार्यते। परं सूक्ष्मसमीक्षया तेषामिमा अखिलाः युक्तयः न समीचीना अपि तु युक्त्याभासा एव। अतः आसां दीयमानानां दास्यमानानां च युक्तीनामवखण्डनं सरलतयैव विधातुं शक्यते।

आंग्लभाषायाः सिद्धेः प्राक् वयं भाषाविवादाविर्भावविषयस्यैव तावदन्तरीक्षणं गवेषणाञ्च कुर्मः। यदाऽस्माकं राजनीतिकनेतारः क्षुद्रस्वार्थनिष्पादनं जायमानं नावलोकितवन्तस्तदा ते सत्यधर्मन्यायप्रभृतीन् मानवीयगुणानुज्झित्वा अनृतान्यायाश्रयिणः सञ्जाताः। संस्कृतस्य हीनतां प्रदर्शनाय समुपस्थपिता तैरीयं युक्तिः यद्यथा भारते आदिकाले संस्कृतभाषा परकीयस्थानाद् समायाता कालान्तरे च जनभाषारूपे परिवर्तिता तथैवांग्लभाषापि विदेशीया। ततः कथं नहि साऽस्य देशस्य जनभाषारूपत्वेन पदमलङ्कर्तु क्षमा। परमयि! विमलतर्कार्णवपारगाः बुधाः! विचारयन्तु तावद्भवन्तः एषां निर्मूलयुक्तिविषये। अस्माभिस्तु ग्रन्थानामनुशीलनेन यत्किञ्चित् अनुभूतं तेन त्वेतदेव ज्ञायते यत्संस्कृतस्य यज्ज्वल्यमानं रूपं भारते आगतं तद्भारतीयानामेव व्यवहारेण प्रयोगेण च। तस्यादर्शस्य उपदेष्टा पथिप्रदर्शको वा कोऽपि बाह्यदेशीयो नासीत्। परमियमांग्लभाषा त्वस्माकं बन्धूनामुपरि हठात् आरोपिता येनास्माकं पूर्वविकसिताः स्वदेशीयप्रणाल्यः सर्वथोन्मूलिताः। आंग्लशिक्षाधिकारी लार्डमैकाले त्वस्माकं देशे इमामेव भावनां स्वीये हृदये निधाय आगतवान् यदहमस्य देशस्य निवासिनः वेषेण भारतीयान् अन्तःकरणेन गौराङ्गांश्च निर्मापयिष्यामि। नाऽत्र विचिकित्सा यत्तस्येयं भावना फलाधिरूढाऽपि सञ्जाता।

भोः विमलसुधियः! आलोच्यतामिदानीं यदस्मिन् शताब्दीपर्यन्तकालान्तरे का सिद्धिरनयांग्लभाषयाऽस्माकं देशेन समासादिता। अनयानार्यांग्लभाषया सर्वप्रथमं त्वस्माकं हृद्देशेषु हीनभावनाविर्भाविता। जाता वयं निजश्रद्धाबिन्दून् प्रति अश्रद्धालवः। गताऽस्माकं वर्णव्यवस्था, विनष्टः धर्मः, निर्गता राष्ट्रभक्तिः बन्धूनां हृदयेभ्यः, खण्डितानि मातुरङ्गानि। अयि! किमन्यदवशिष्टं यस्य विनाशायांग्लभाषायाः सिद्धेः भृशं गीतानि गीयन्त एतैः राष्ट्रविरोधितत्त्वैः। अनया परकीयभाषानुकरणप्रवृत्त्यैव तु कुण्ठिताऽस्माकं स्वतन्त्रचिन्तनशक्तिः। बहवोऽन्धानुकर्त्तारः विपश्चितस्तु गदन्त्येवं यदांग्लभाषायाः समतायामस्मदीया सुरभारती अतीव अविकसिता, निर्बला, गहनभाववहनेऽसमर्था च। परं नव्योऽयमुद्घोषः तेषामल्पज्ञानां, नूतनोऽयं डिण्डिमः परमुखापेक्षिणामद्भूतोऽयं कोलाहलोऽसमर्थानां मातुरबोधबालानाञ्च। न जानन्ति ते विमूढाः यदियमेव विश्वस्यैका ईदृशी भाषा याऽतीवप्राचीना सबला समृद्धा च। न जाने कियन्तः वैदेशिका अपि एतत्कटुसत्यं मुक्तस्वरेण अङ्गीकुर्वन्ति। सततज्ञानगङ्गाजुषां भवतां पुरतः तेषामुद्धरणप्रस्तुतिर्नावश्यकी। एको विद्वान् समर्पयति स्वीयं श्रद्धाञ्जलिम्। यथाः—

"We adore Panani as he reveals India. We adore India as she reveals the spirit, the only spirit."

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

संस्कृतभाषायाः समृद्धिरेतावतैव अनुमातुमलं यत्तस्याः कोशे पञ्चकोटिप्रायाः शब्दाः विद्यन्ते यदा चांग्लभाषायां त्रिशत्सहस्रा एव मौलिकाः शब्दाः। को जल्पति मतिमान् यदस्माकं जगद्गुरुः देशः, उपकृतोऽनयानार्यया भाषया। न वयमधमर्णा अपितूत्तमर्णा एव। दत्ताऽस्माभिर्दिक् वैदेशिकेभ्यः। अस्माकं दर्शनशास्त्रस्य, विज्ञानस्य, चिकित्साशास्त्रस्य, साहित्यस्य, गणितशास्त्रस्य वर्त्तन्ते तेऽद्यधुनापि अधमर्णाः। नो चेदेवं तर्हि किं तैरस्माकं प्राचीनग्रन्थाः मुषिताश्चौरवत्। वयं जानीमः यदेकदा विण्टरनिट्जमहोदयः पृष्टः केनापि भारतीयेन यत्किमीदृक् वस्तु यद्भारतेन विश्वस्मै दत्तमिति। प्रश्नेऽस्मिन् दत्तमुत्तरं तेन यन्निर्बाधरूपेण निःसङ्कोचरूपेण च यस्य नाम ग्रहीतुं शक्यते तत्कथासाहित्यमिति। स्थालीपुलाकन्यायतः एतावतैव विभाव्यतां भवद्भिः श्रीमद्भिः संस्कृतभाषाया विपुलवैभवः।

अपि च, निखिलविश्वस्मिन् भारतलङ्काबर्माऽभिधानानि त्रीणि राष्ट्राणि विहाय न कोऽपि ईदृशः देशः यत्र व्यवहारस्य शासनस्य च भाषा कापि विदेशीया स्यात्। भारतं विहाय उपर्युक्तोभयोः राष्ट्रयोरपि स्वभाषायाः प्रयोगः उत्तरोत्तरमुन्नत्तिमादधाति। परं न जानेऽस्माकं नेतॄणां बुद्धिषु को विकारः जातः येन ते सर्वदा परावृतगङ्गामेव प्रवाहयन्ति।

अस्माकं स्वर्गीयपूज्यप्रधाननेतृभिस्तु आंग्लभाषा एकेनेदृशेन वातायनेनोपमिताऽऽसीत् येन वयं विश्वस्य औद्योगिकीं वैज्ञानिकीं च प्रगतिं प्रेक्षितुमर्हामः। परमस्मद्विचारे तैः महोदयैरपि नैतद्विमृष्टमासीत् यदेतद्वातायनमेकस्मिन् ईदृशे स्थाने निर्मेयं यतः कोऽपि अस्मद्देशीयां नग्नतां अन्तःपुरकलहान् च वीक्षितुं समर्थः न भवेत्।

अन्ततः इदमेव कथयिष्याम्यहं यद्यथा कोऽपि बद्धचरणः विहगः आकाशे स्वच्छन्दरूपेण विहर्त्तुमसमर्थः तथैव परकीयभाषावलम्बनेन वयं भ्रष्टगत्या प्रचलितुं तु पारयामः परं स्वच्छन्दोड्डयनेन मुक्ताकाशे उत्पतनस्यानन्दं भोक्तुं न कथमपि शक्नुमः। अतः यदि रक्षणीयाऽवशिष्टा भारतीयसभ्यता संस्कृतिः संमानार्हं जीवनं च तर्हि 'परधर्मो भयावहः' इति श्रुत्युक्तनीत्यनुसारेण अस्माकं गीर्वाणभारत्येव समावलम्बनीया, परिवर्धनीया, पोषणीया च।

गिरने से पहले उनकी रक्षा करें

बालों और दाँतों की नियमित देखभाल और उनका पोषण आवश्यक है। क्यों न फिर उनके गिरने से पहले उनकी रक्षा की जाय? इसके लिए उदयपुर का गाय छाप ब्राह्मी आँवला तेल और काला दन्त-मन्जन सर्वोत्तम है। इन आयुर्वेदिक उत्पादनों से आपके बाल [illegible] तथा लम्बे और आपके दाँत [illegible] मजबूत रहेंगे।

इलाज से बचाव बेहतर है!

[illegible]

गाय छाप
UDAIPUR

Digitized by Arya Samaj Foundation Chennai and eGangotri

❀ गोसेवा ❀

खंडविल्लि—श्रीसूर्यनारायणशास्त्री मुगन्डा, आन्ध्रप्रदेशः

सर्वाऽभ्युदयसंधात्री
सर्वमंगलदायिनी ।
गोसेवा क्रियते यत्र
स देशः सुखभाग् भवेत् ॥१॥

कुक्षौ गोमातुरखिलैः
देवैः विष्णुर्विराजते ।
क्रियते यदि गोहिंसा
सर्वाः कुप्यन्ति देवताः ॥२॥

यदि देवाः प्रकुप्यन्ति
सोऽनर्थः कष्टदो भवेत् ।
देशस्याऽशांतिरूपेण
गोसेवाऽवश्यकी ततः ॥३॥

यदा यदाऽशांतिरुदेति देशे
तन्मूलहेतुस्सचिवैः विभाव्यः ।
अज्ञाय यद्यामयमूलहेतुं
क्रियेत वैद्यं विफलं हि यत्तत् ॥४॥

गो ब्राह्मणेभ्यश्शुभमस्तु नित्य-
मेवंविधा सूक्तिरतीव सत्या ।
गावः सदा मानवजीवितानां
क्षेमाय वृध्यै प्रभवन्ति नूनं ॥५॥

सदा यदीयानि पयांसि देवाः
कांक्षन्ति नाकेऽग्निमुखात् प्रियेण ।
रुच्यानि दिव्यत्वकराणि तानि
कांक्ष्याणि सर्वैः न कथं भवेयुः ॥६॥

यैस्सोमपाः इन्द्रमुखान् यजंति
पुष्णन्ति यैरात्मशिशून् जनन्यः ।
पुष्णन्ति यैरात्मबलं बलाढ्याः
धन्यस्स यः कांक्षति गोपयांसि ॥७॥

स्वजीविते सर्वदशासु सर्वे
निरामयाः गोपयसा जनास्ते
देवैः प्रतुष्टैरमृतं स्वकीयं
पयोमिषान्नोऽर्पितमादरेण ॥८॥

पापाऽपहात् गोघृतदीपदानात्
क्षीराऽब्धिपूर्वैव्रतकल्पकाले ।
सन्तर्पयंत्यांध्रगृहेषु कृष्णं
अतो हि नो गोघृततुल्यमस्ति ॥९॥

प्रायश्चित्तादिकार्येषु
पंचगव्यं यः सेवते ।
पापैस्सर्वैः विमुच्याथ
पुण्यकर्माऽर्हतां व्रजेत् ॥१०॥

दिलीप इति राजेन्दुः
कामगोश्शपकारणात् ।
अपत्यहीनो नन्दिन्या-
स्सेवया पुत्रवानभूत् ॥११॥

वसिष्ठवचनाद्राजा
गोसेवाव्रतमुद्वहन् ।
भूपालकोऽपि झटिति
गोपालक अभूदहो ॥१२॥

स्थितः स्थितामुच्चलितः प्रयातां
जलाभिलाषी जलमाददानाम् ।
रीत्याऽनया भक्तियुतः स धेनुं
छायेव तां भूपतिरन्वगच्छत् ॥१३॥

एवं गुरोर्धेनुमतीवभक्त्या
संचारयन् पर्वतमेखलासु ।
ततोऽद्भुतैः तैस्तैः प्रकृतेर्विलासैः
कर्षन् दिलीपः क्षणमुन्मुखोऽभूत् ॥१४

अत्रान्तरे दर्शितमिंद्रजालं
धेन्वा प्रभोः भक्तिपरीक्षणाय ।
धेनुं यथेच्छं चरन्तीं सुखेन
प्रसह्य सिंहः किल तां चकर्ष ॥१५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोरक्षणायोद्धृतबाणहस्तो
राजा यदा मुद्रितहस्तबाणः ।
गोपालकस्सिंहममुं ययाचे
धेनुं विमोक्तुं स्वशरीरमत्तुं ॥१६॥

नैच्छद्यदा धेनुममुं विमोक्तुं
राजा स सिंहेन विलोभितोऽपि ।
सिंहो ह्यतो भक्षितुमस्य देहं
राजा ददावामिषवत् स्वदेहं ॥१७॥

अत्रान्तरे सूनमयी सुवृष्टिः
पपात राज्ञोपरि सा नभस्तः ।
यावत् प्रभुः पश्यति, सुप्रसन्ना
गौरेव दृष्टा न मृगाधिपस्सः ॥१८॥

एवं स्वदेहार्पणतः स राजा
ररक्ष तां भारतजीवनाडीं ।
राज्ञस्सुसेवाव्रतत्यागशीलैः
प्रीता च गौः कामदुघाऽभवत् सा ॥१९

एवं दिलीपोऽलभतेष्टसिद्धि
कीर्तिं प्रमोदं खलु गोः प्रसादात्
वंशस्य कर्तारमनन्तकीर्तिं
पुत्रं पवित्रं जगतस्सुमित्रम् ॥२०॥

एकदा मुनिवर्यस्य
वसिष्ठस्याऽश्रमं वरं ।
परिवारसमेतस्सन्
विश्वामित्रस्तथाऽगतः ॥२१॥

नन्दिन्यास्सुप्रभावेन
वसिष्ठो भोजनं ददौ ।
आगतेभ्यः यथातृप्ति
पंचभक्ष्यसमन्वितम् ॥२२॥

विश्वामित्रस्तु नन्दिन्याः
प्रभावं विस्मयाऽवहम् ।
दृष्ट्वा स्वार्थपरीतस्तां
आत्मसात्कर्तुमुद्यतः ॥२३॥

वसिष्ठचोदनाद्धेनुः
रोमांचमकरोत्तदा
रोमभ्य उद्गता सेना
गोमूत्रात् गोमयात्ततः ॥२४॥

विश्वामित्रं ससैन्यं सा
निष्कासितवती चमूः ।
एवं गोराग्रहः देश
क्षोभया परिवर्तितः ॥२५॥

इत्थं गोराग्रहो देश-
क्षोभाय, तदनुग्रहः ।
देशशान्त्यै प्रकल्प्येत
गोसेवां कुरुतेष्टदाम् ॥२६॥

एवं हि ये लोकहिताय धेनुं
भक्त्या भजंत्यात्मसुखं वृणांतः ।
लोकाय शांतिं समुपार्जयन्ति
जीवन्ति सर्वाऽभ्युदयैरुपेताः ॥२७॥

शुभ कामनाओं के साथ

* इन्डो फॉरेन एजेन्सीज् *

२३, सर फिरोजशाह मेहता रोड़,
बम्बई – १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतभाषा (देववाणी) मृता नास्ति ।

आशुकवि-श्रीहरिशास्त्री, सम्पादकः

संसारे ईदृशः को जनोऽस्ति य एवं वदति, संस्कृत (देववाणी) भाषा मृताऽऽस्ते। भारतीय प्रेसरजिष्ट्रारस्य विज्ञप्त्यनुसारं १६५८ ईशाब्दे भारतदेशे संस्कृतभाषायां २६० पत्रिकाः प्रकाशिता भवन्ति स्म । यासां ग्राहकसंख्या एकादशसहस्रमिता ग्रासीत् ।

विज्ञप्त्यनुसारमेव १६६३ मिते ईशवीयाब्दे संस्कृतभाषापत्रिकाणां संख्या १८ अष्टादश-संख्यापरिमिताऽऽसीत् ।

महाराष्ट्रे उत्तरप्रदेशे तथा पश्चिमबंगदेशे च प्रत्येकं संस्कृतभाषायाः पंच पंच पत्रिकाः प्रकाशिता भवन्ति स्म । गुर्ज्जरदेशे तिस्रः ३ पत्रिकाः तथा बिहारमध्यप्रदेशे च तथा राजस्थानात् च द्वे द्वे पत्रिके प्रकाशिते भवतः । एवं आन्ध्रप्रान्ततो दिल्लीप्रान्ततश्च हिमाचलप्रदेशतः पञ्चाम्बुप्रदेशतस्तामिलाताडुतश्च एका एका पत्रिका प्राकाश्यमाणास्ति । एषां सर्वतः प्राचीना पत्रिका संस्कृतसाहित्यपरिषत् आसीत् या १६१८ ईशवीयाब्दतः कलकत्तानगरात् प्रकाशते । एवं संस्कृतभाषायाः प्रचारे वर्तमानेऽपि य इमां भाषां मृतां वदन्ति तेभ्यो महामानवेभ्यः किमस्ति वक्तव्यमिति शम् ।

फैशन और उपयोग में अद्वितीय

'सेंचुरी' के अनूठे वस्त्र

हिज चॉईस-हर चाईस—सर्वोत्तम इजिप्सीग्रन रूई से निर्मित-मर्सराईज्ड, सेंचुराईज्ड (प्रीश्रंक) पौपलिनें ।

हर हाईनेस—सफेद और रंगीन, मर्सराईज्ड सेंचुराईज्ड पॉपलिन ।

रुबी—सुगंधित पौपलिन डोबी और चेक शर्टिङ्ग, सफेद, रंगीन और छपी हुई केम्ब्रिक्स ।

परमसुख—सुपर फाईन धोतियों में सर्वश्रेष्ठ ।

लेक्स ब्यूटी—सर्वोत्तम बारीक मलमल ।

हर चॉईस—महिलाओं के वस्त्रों के लिए मनमोहक कपड़ा ।

निराला—और "स्विस चैक" सिकडुन रोधक और गण्डी ।

निर्माता :

दी सेंचुरी स्पिनिंग एण्ड मैन्युफेक्चरिंग कम्पनी लि०

सेंचुरी भवन, डा० एनीबीसेन्ट रोड़

बम्बई—२५ डी डी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान आपको आमंत्रित करता है

आइये! अपना उद्योग लगाइये

राजस्थान में विपुल आर्थिक साधन एवं स्वस्थ जन शक्ति उपलब्ध है। यह साधन आपको अपना उद्योग लगाने का अवसर प्रदान करते हैं।

राजस्थान आपको निम्न सुविधाएं प्रदान करती है :—

१. औद्योगिक क्षेत्रों में सस्ती दर पर भूमि।

२. औद्योगिक बस्ती में निर्मित शेड तथा सस्ती दरों पर भू-खण्ड। साथ ही बिजली पानी, सड़कें बैंक इत्यादि की सुविधा।

३. सस्ते ब्याज एवं आसान किस्तों पर ऋण।

४. बड़े एवं मध्यम श्रेणी के उद्योगों को वित्तीय संस्थाओं द्वारा दिये जाने वाले ऋण पर गारन्टी।

५. उधार पट्टे पर मशीनें प्राप्त करने में सहायता।

६. सस्ती दरों पर विद्युत शक्ति तथा लघु उद्योगों द्वारा विद्युत शक्ति उपभोग पर वित्तीय अनुदान।

७. राजकीय जल प्रदाय योजना तथा सिंचाई परियोजना के द्वारा सस्ती दरों पर स्वच्छ पानी।

८. चुंगी कर, बिक्री कर तथा बिजली की ड्यूटी पर छूट।

९. उत्पादित माल की बिक्री में सहायता।

१०. कच्चे माल एवं मशीनरी प्राप्त करने में सहायता।

११. निःशुल्क सूचना सेवा एवं उचित मार्ग-दर्शन।

विस्तृत जानकारी के लिए कृपया निर्देशक, उद्योग एवं नागरिक रसद विभाग, राजस्थान, जयपुर से सम्पर्क स्थापित करें।

❀ राजस्थान के औद्योगिकरण में भागीदार बनिये ❀

राजस्थान सरकार द्वारा प्रसारित।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

❀ जिज्ञासा-समाधनम् ❀

ले० साहित्यरत्नं पं० श्रीबदरीप्रसादशास्त्री, प्रपूर्णा, खेतड़ी, राजस्थानम्

विदितचरमेवेदं पुराणेतिवृत्तविदां यद् धर्मप्रधानेऽस्मिन् भारते धार्मिकशासकोचितां नीतिं विहाय शकुनिसहायश्च निन्द्यद्यूतादिछलबलमवलम्ब्य पाण्डवदायमपहृतवान् दुर्योधनः सुयोधनश्चापि नाम्ना ।

स च पुनः कुरुकुलकलङ्कः कर्णाविकीर्णकुमन्त्रणापूर्णकर्णोऽत एव दूषितान्तःकरणोऽकारणमेव करुणावरुणार्णवस्य शरणशरण्यस्य धर्मकर्मरक्षणविचक्षणस्य यदुकुलेऽवतीर्णस्य लीलावतारस्य साक्षात्परात्परस्य परमेश्वरस्य हितमपि वचोऽनाकर्ण्याखर्वं गर्वं बिभ्राणो ब्रुवाणो दुर्वचांसि निराकरिष्णुरिव स्वीयश्रेयांसि नरनिकरसंहारकारणं भीषणरणनिमंत्रणमुद्घोषयन् न हि न्याय्यमपि पाण्डवराज्यं प्रत्यर्पयामास ।

अथैवं शमप्रधानेन नयेन स्वीये राज्येऽनधिगते बलादिव कौरवैः प्रस्तावितं रणमेव शरणं स्वीचक्रुः पाण्डवा अपि । ततश्च "कुरुक्षेत्रं हि देवयजन" मिति श्रुतेः परमपवित्रेश्रुतिपुराणप्रसिद्धे भारतवर्षान्तर्गते कुरुक्षेत्राभिधे धर्मक्षेत्रे कौरवपाण्डवयुद्धं नाम विश्वयुद्धमेव बभूव ।

तथा च श्रमप्रधानजीवनाः स्त्रीशूद्राद्या अपि सततश्रौतस्वाध्यायनिरतं द्विजव्रजमिव समग्रमपि धर्मतत्त्वमन्वयव्यतिरेकमुखेन यथार्थमवगच्छेयुरित्यतो धर्मयुद्धेऽस्मिन्नैतिहासिके संमिलितानां प्रसङ्गप्राप्तानामन्येषामपि महानुभावानां दुर्योधनाऽऽदीनामाततायिनाञ्च जीवनचरितवर्णनात्मकं काव्योचितकोमलया गिरा "महाभारताख्य" मद्भुतं ग्रन्थं जग्रन्थ श्रीकृष्णद्वैपायनो मुनिः । तत्रैवेयं प्रमाणभूता स्मृतिरपि जागर्ति—

स्त्रीशूद्रद्विजबन्धूनां श्रेय एवं भवेदिह ।
इति भारतमाख्यानं कृपया मुनिना कृतम् ॥

एवञ्च सुप्रसिद्धस्यास्य महायुद्धस्य निखिलमपि वृत्तान्तमक्षिभ्यामन्धं धृतराष्ट्रं व्यासप्रसादाऽऽसादितयोगविद्यस्त्रैविधस्यापि शुभाभिधेयः सञ्जयस्तत्कालमेव (युद्धसमकालमेव) महाभारतग्रन्थग्रथनात् प्रागेव श्रावयामास ।

अत एवायं सञ्जयधृतराष्ट्रसम्वादो महाभारतरचयित्रा स्वयं भगवता व्यासेन स्वनिर्मिते महाभारते तत्रापि भीष्मपर्वणि युद्धभूमिकायामेव यथास्थाने वर्णितः । आधुनिकाऽऽलोचककथनानुसारं महाभारतग्रन्थरचनोत्तरकालभाविन्यस्मिन् संवादे स्वीकृते तु महाभारतग्रन्थे तद्वर्णनमसम्भवं स्यात् । प्राप्यते च भारते तद् वर्णनम्, अतो गीताप्रवचनाऽऽदिना कौरवपाण्डवयुद्धवर्णनात्मकस्यास्य सञ्जयधृतराष्ट्रसम्वादस्य महाभारतनिर्माणकालात् प्राग्भवत्वं, युद्धान्ते च सद्य एव धृतराष्ट्रस्य गान्धार्या सह रात्रौ वनगमनदर्शनाद् युद्धवृत्तान्तश्रवण कालाभावात् भारतेऽपि युद्धान्ते तद्वर्णनाभावाद् युद्धकालिकत्वमेव सिध्यति । सन्त्यत्र शब्दप्रमाणभूतानि कानिचिदपि व्याससञ्जयोक्तानि महाभारतपद्यानि "नमस्तस्मै भवत्पित्रे इत्यादीनि प्रसङ्गप्राप्तान्युपरिष्टाद् वक्ष्यमाणानि ।

परमत्र सञ्जयधृतराष्ट्रप्रश्नोत्तर्यां भूतकालिकक्रियाप्रयोगान्नालोचयन्तः संशेरते । आपातरमणीयामालोचनात्मिका पल्लवितां पाश्चात्यपाण्डित्यसरणिमनुसरन्तः पाश्चात्यशिक्षादीक्षिता मीमांसकदुर्दुरुढाः केचित् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राष्ट्रपिता का निर्देश

जो राष्ट्र शराब की आदत का शिकार है कहना चाहिए कि उसके सामने विनाश मुंह बाये खड़ा है।

शराबी, पत्नी, माता और बहन का भेद भूल जाता है और ऐसे गुनाह कर डालता है, जिन पर वह अपनी शान्त अवस्था में लज्जा अनुभव करता है।

शराब से बढ़ कर मनुष्य का नाश करने वाली कोई पेय वस्तु नहीं हो सकती।

शराब और नशीली चीजें अपने व्यसनियों के नैतिक कल्याण को जड़ से खोद देती हैं।

राजस्थान सरकार द्वारा गान्धी शताब्दी पर प्रसारित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्ये चात्र भारतीपत्रिकाया अप्येकोनविंशतिवर्षीये पञ्चमाङ्के प्रकृतविषयकजिज्ञासा प्रकाशनमिषेण पाण्डित्यप्रौढिम्ना प्रथितयशसः श्रद्धालवश्च पौराणिकार्षसिद्धान्तेषु खोरीग्रामस्थ-पाठशालाप्रधानाध्यापकाः श्रीमन्तः कल्याणदत्तशर्माणोऽपि तादृशामेव बालधियां विचिकित्साऽमयचिकित्सार्थं परमावश्यकं महाभारतोक्तं धर्मतत्त्वं मुहुरनुशीलयितुं तत्रैव निगूढं नवनवं वैज्ञानिकं रहस्यमप्याविष्कर्तुञ्च पुनः प्रेरयन्ति समुत्साहयन्ति च श्रीधीरोदात्तविद्यावीरवरमिव सुरसरस्वतीसमुपाशकान् पूर्वपक्षोचितैर्वाग्बाणप्रहारैरिति तत्रापि विवादस्यास्य स्वगौरवानुरूपत्वाभावात् मौनमाकलयत्सु शास्त्रनदीष्णेषु प्रतिभटेष्वप्रतिभटोऽप्यहं शास्त्रीयतत्त्वावबोधाय कमप्यूहापोहव्यूहं विरचयन्निव समुल्लिलिखिषामि ।

तत्रादौ महाभारतयुद्धकाल एव तद् युद्धं दूरदर्शनश्रवणादियंत्रोपयोगेन प्रत्यक्षं पश्यन् यद्वा किञ्चित् प्रत्यक्षदर्शनपुरःसरं योगविद्याबलेन तु तदग्रिमं समग्रमपि युद्धवृत्तान्तं ज्ञानाधिकरणेन ज्ञानस्वरूपेणेव वाऽत्मनैवावगच्छन् सञ्जयस्तद्युद्धवृत्तान्तं धृतराष्ट्रं प्रति श्रावयामासेत्यत्राद्यपक्षपोषकाः शब्दानां यथेष्टमर्थं दोहं दोहं कामं पुष्णन्तु नाम स्वकीयं पक्षं, तत्र च "यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचि" दित्यार्षोक्तिर्बहुधा सद्युक्तियुक्ता तेषामपि पक्षपोषणायालम्, परमैहिकामुष्मिकधर्मवर्णनप्रधाने महाभारते तत्रापि गीतोपदेशात्मके प्रकृतस्थले च नूनमेव गौणताङ्गते भौतिकविज्ञानोपदेशे नायं पक्षः सूक्ष्मेक्षिकया समीक्षमाणानां समेषामक्षरजुषां सचेतसां चेतश्चमत्कारकः स्यादिति गीताब्रह्मसूत्राद्याध्यात्मिकःज्ञानग्राहकग्रन्थप्रणेतुरध्यात्मवादिनो व्यासस्य शिष्यः सञ्जयः स्वगुरोः (व्यासस्य) प्रसादादासादितयोगविद्यो युद्धदर्शनाय कुरुक्षेत्रं गतोऽपि केनचित् कार्येण हस्तिनपुरं प्रत्यागतः किञ्चित् प्रत्यक्षतया योगबलेनापि चाखिलं प्रवर्तमानं महाभारतयुद्धवृत्तान्तमवगत्य तत्कालमेव धृतराष्ट्रं श्रावयामासेति द्वितीय एव पक्षः श्रेयान् ।

यथा महाभारतस्य भीष्मपर्वणि स्वयं सञ्जयोऽप्याह—

नमस्तस्मै भवत्पित्रे पाराशर्याय धीमते ।
यस्य प्रसादाद्दिव्यं मे प्रज्ञाविज्ञानमुत्तमम् ॥
दृष्टिश्चातीन्द्रिया राजन् दूराच्छ्रवणमेवहि ।
परचित्तस्य विज्ञानमतीतानागतस्य च ॥
व्युत्थितो पत्तिविज्ञानमाकाशे च गतिः सदा ।
अस्त्रैरसङ्गो युद्धे च वरदानान्महात्मनः ॥
प्रत्यक्षं यन्मया दृष्टं दृष्टं योगबलेन च ।
शृणु तत्पृथिवीपाल मा च शोके मनः कृथाः ॥

इतश्च तत्रैवाऽऽदौ व्यासोऽप्याह—

अथ गावल्गणिः धीमान् सङ्गरादेत्य सञ्जयः ।
प्रत्यक्षदर्शी सर्वस्य भूतभव्यभविष्यतः ॥
ध्यायते धृतराष्ट्राय समुपेत्यैवमब्रवीत् ।

अथात्र प्रसङ्गसङ्गतिमुपपादयितुं भारते प्रागुक्तव्यासपद्याऽऽशय एवावगन्तव्यः स चेत्थमस्ति "भूतभव्यभविष्यतः" सर्वस्य युद्धवृत्तान्तस्य, उत वा कार्यकारणयोरनन्यत्वाद् भूतकालिकपाण्डवराज्यापहारणादियुद्धकारणजातस्य वर्तमानव्यूहरचनादियुद्धोद्योगस्य कुरुपाण्डवसेनयोर्मिथः शस्त्रास्त्रप्रहरणात्मकस्य भविष्यतोऽपि त्रिष्वपि कालेषु त्रिविधस्यास्य सर्वस्य युद्धस्य युद्धभुवङ्गतोऽत एव प्रत्यक्षदर्शनशीलोऽपि गावल्गणिर्धीमान् सञ्जयः सङ्गरात् कुरुक्षेत्राद् हस्तिनपुरं गत्वा तत्र शोकाकुलं धृतराष्ट्रं नृपतित्वात् सम्यक् प्रकारेण सादरमुपेत्य शोकाकुलाय तस्मै "नमस्तस्मै" इत्यादितः "प्रत्यक्षं यत् मया दृष्ट दृष्टं योगबलेन चे"त्यन्तेन पद्यपुञ्जेन स्वयमेव वक्ष्यमाणं वृत्तान्तमाचचक्षे । अत्र सञ्जयस्य सङ्गरादागमनेनाऽऽगत्य च हस्तिनपुरस्थेन धृतराष्ट्रेण सह सङ्गमेन सञ्जयस्य युद्धभुवि गमनं ततश्च हस्तिनपुरं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्यागमनं चेत्येतत् सर्वं श्रुतार्थापत्त्या स्फुटमुह्यतेऽतस्तदर्थक पदाध्याहारोऽप्यत्र कृतः।

एवञ्च युद्धदिदृक्षया कुरुक्षेत्रं गतोऽपि तत्र समवेतान् युयुत्सून्, अर्थाद् "व्यूहरचनाया युद्धस्य प्रधानाङ्गत्वाद् अङ्गाङ्गिनोरभेदान्वयाद् युयुत्सूनां व्यूहरूपं युद्धम्" अक्षिलक्ष्यीकृत्य तत्रैव श्रीमद्भगवत्कृतगीताप्रवचनात् प्रागेव केनचित् कार्येण पूर्वोक्तव्यासोक्त्यनुसारं हस्तिनपुरं प्रत्यागतः सञ्जयो व्यासप्रसादाद् दिव्यप्रज्ञाविज्ञानवान् त्रिकालज्ञोऽतीन्द्रियदिव्यदृष्टि दूरदर्शनश्रवणपरचित्तविज्ञानादिविविधसिद्धिसम्पन्न आकाशगतिको युद्धे च शस्त्रास्त्रै र्हन्तुमशक्यो भूत्वा स्वीयामपि महाभारतयुद्धदिदृक्षां प्रशमयन् भगवत्कृतगीताप्रवचनादितो दुर्योधनवधान्तं यावत् समस्तं युद्धवृत्तान्तं व्यासप्रसादाल्लब्धोक्तयोगसिध्या पश्यन् शृण्वंश्च शोकाकुलाय अत एवाविवेकिने योगविद्याविमुखाय धृतराष्ट्रायाप्याचक्ष इति पूर्वप्रस्तुतैः सञ्जयोक्तश्लोकैरेव सर्वं स्फुटीभवति।

अत्रैव च "मा च शोके मनः कृथाः" इत्यनेन राज्यपुत्रादिषु ममत्वाऽऽकृष्टचेतनत्वाद् अत एवाविवेकित्वाच्छोकाकुलत्वादविजितेन्द्रियत्वाद् योगसिद्धेश्च पुनर्विजितेन्द्रियविवेकिजनलभ्यत्वाच्च धृतराष्ट्रः स्वपितुरपि व्यासस्य प्रसादाद् योगसिध्द्युपलब्धिपात्रतां नैवाससादेत्यपि सिद्धं तथात्वे च "सञ्जय इव सोऽपि (धृतराष्ट्रोऽपि) दिव्यं दृष्टिं व्याससकाशात् कथं न प्राप्तवा" नितीयं शङ्कापि निरस्ता वेदितव्या।

एवमिह "सङ्गरादेत्य सञ्जयः"....ध्यायते धृतराष्ट्राय समुपेत्यैवमब्रवीदिति व्यासोक्त्यनुसारं सञ्जयस्य युद्धदिदृक्षया कुरुक्षेत्रगमनं ततश्च हस्तिनपुरे धृतराष्ट्रान्तिके तस्याऽऽगमनमवगम्यते।

अत एवांशिकयुद्धस्य प्रत्यक्षदर्शित्वमपि सञ्जयस्यानुमितं पुनः "प्रत्यक्षं यन्मयादृष्टं दृष्टं योगबलेन चे"त्यादिना शब्दप्रमाणेनापि सिध्यति। पुनश्च "यस्य प्रसादाद्दिव्यं मे प्रज्ञाविज्ञानमुत्तम"मित्यादितः प्रत्यक्षं यन्मया दृष्टं दृष्टं योगबलेन चे"त्यन्तेन सञ्जयवाक्येन व्यासस्य प्रसादात्तस्य (सञ्जयस्य) दूरदर्शनश्रवणादियोगसिद्धिसम्पन्नत्वं योगबलेन युद्धद्रष्टृत्वं चाप्यवगम्यते।

अन्यच्च "प्रत्यक्षं यन्मया दृष्टं दृष्टं योगबलेन चे"त्यत्र यत्पदवाच्यस्य युद्धस्यैकस्मिन्नपि युद्धकाले द्विधा दर्शनमसङ्गतं भवति। अर्थात् प्रत्यक्षतया योगबलेन चोभयथाऽपि युद्धसाक्षात्काररूपफलैक्ये "आत्ममनश्चक्षुर्विषयाणां क्रमिकसंयोगरूपो बहिस्तनः प्रत्यक्षव्यापारस्तद्विरोधी चाऽऽत्मनि चित्तवृत्तिनिरोधरूप आन्तरिको यौगिकव्यापार"श्चेति मिथो विरोधि प्रत्यक्षयौगिकाऽऽख्य द्विविधव्यापारस्यानर्थक्यात्। वस्तुतस्तु एकस्या अपि दृशिक्रियाया विषयसाक्षात्काररूपैकमात्रफलनिष्पत्तौ बहिस्तनत्वप्रत्यक्षत्वान्तरीयकत्व दिव्यत्वादिभेदैर्मिथोऽत्यन्तविरुद्धयो र्व्यापारयोरेकदैवैकस्मिन् कर्तर्यसम्भवाद् यत्पदवाच्यं युद्धं यावत् मया सञ्जयेन प्रत्यक्षं दृष्टमितः परं हस्तिनपुरमागते मयि व्यवहिते मामकीने प्रत्यक्षव्यापारेऽत एव व्यवहितविषयेन्द्रियत्वाद् यावच्च योगबलेन दृष्टं "दृश्यं युद्धं" तत्सम्बन्धिवृत्तान्तरूपेण शृण्वित्यनेन यद्यपि किञ्चिद् युद्धं प्रत्यक्षं दृष्टं किञ्चिच्च योगबलेन दृष्टमिति सिद्धम्, किञ्च कियत् प्रत्यक्षं दृष्टं कियच्च योगबलेनेत्यपि, "व्यासप्रसादाच्छ्रुतवानेतद् गुह्यमहं परम्। योगं योगेश्वरात् कृष्णात् साक्षात् कथयतः— स्वयमिति सञ्जयोक्त्या गीतोपदेशादिदुर्योधनबधान्तं युद्धं योगबलेन दृष्टं सिध्यति। तथात्वे च तदवशिष्टमाद्यं मिथः सम्प्रहरणात्मकयुद्धादौ सामरिकव्यूहरचनात्मकं युद्धमेव प्रत्यक्षदृष्टमिति श्रुतार्थापत्त्या लभ्यते इति प्रागप्युक्तमेव किञ्चात्र वादिविप्रतिपत्ति वारणाय सञ्जयोक्तस्यास्य पद्यस्यायमध्याशयोऽवगन्तव्यः। (क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राष्ट्रपिता श्रीगान्धी महात्मा

दीनानाथत्रिवेदी मधुपः, भारतीसहसम्पादकः जयपुरम्



सुनिश्चितमेवेदं यत् समये-समये महापुरुषाणां प्रादुर्भावो भवति। अत एव देशस्यास्य समुद्धाराय श्रीगान्धीमहात्मनोऽपि प्रादुर्भावः १८६९ तमे ईशवीयाब्दे काठियावाड़-प्रांते पोरबन्दरनाम्नि स्थाने समजायत।

बाल्यकालः शिक्षा च

बाल्यकालश्चास्य महानुभावस्य राजकोटे एव व्यत्यगात्। प्रारम्भिकी शिक्षा दीक्षा चापि तत्रैवाभूत्। ततश्चास्य महात्मनस्त्रयोदशवर्षात्मके वयस्येव विवाहसंस्कारः कस्तूरबाईदेव्या सह समपद्यत। अथ च १८८७ तमे ईशवीये वर्षे च गान्धीमहानुभावः स मैट्रिकपरीक्षां समुत्तीर्य १८८८ तमे ईशवीये वत्सरे च वैरिस्ट्रीपरीक्षोत्तरणात् प्राक् स्वस्य श्रीमातुः पुतलीदेव्याः पुरतो मांसमदिरादिवस्तूनामस्पर्शनस्य यां प्रतिज्ञां कृतवान् तामाजीवनं निरवहत्।

कार्यकलापः

अथ १८८३ तमे ईशवीयेऽब्दे च दक्षिणाफ्रीकादेशं गतेन महात्मना तत्र स्थितेषु भारतीयेषु जनेषु तत्रत्यैर्गौराङ्गैः कृतानामत्याचाराणां दूरीकरणाय च सुमहान् प्रयासः कृतः, अन्ते च तत्र साफल्यमपि लब्धम्। अनन्तरं १९२० तमे वर्षे चासहयोगान्दोलनं समारब्धम्, १९२४ तमे ईशवीये वत्सरे च हिन्दुमुस्लिमानां मिथो जायमानस्य कलहस्य शान्त्यर्थं २१ एकविंशतिदिनानि यावत् श्रीगान्धीमहात्मनोपवासः कृतः ततो वैदेशिकवस्त्राणां बहिष्कारात्मकमान्दोलनम्, एवं डांडीयात्रा च तेनाक्रियत। ततः 'भारतं त्यजत' इत्यान्दोलनस्यानन्तरञ्च १९४७ तमे ईशवीयेऽब्दे अगस्तमासस्य १५ तारिकायां महात्मनस्तस्यैव भगीरथप्रयत्नेन भारतमिदं स्वातन्त्र्यमलभत।

संक्षेपतश्च तेन श्रीमहात्मना स्वजीवनकाले देशेऽस्मिन् दलितवर्गस्योत्थानाय, स्त्रीशिक्षायै, खादीग्रामोद्योगाय, देशेऽत्र वर्तमानासु नानाविधासु विभिन्नतासु चैकतायै तथा दीनजनानां दैन्यस्य दूरीकरणार्थञ्च विविधानि कार्याणि कृतानि। सहैव श्रीगान्धीमहोदयेन स्वस्य सम्पू-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

णोऽपि जीवने सत्यताया अहिंसायाश्च पूर्णरूपेण पालनं विहितम्। अहिंसामेव च स सर्वोत्तमममोघञ्च शस्त्रममन्यत। वस्तुतः सर्वेऽपि धर्मग्रन्था अहिंसाया महिमानमुद्घोषयन्ति। यथा हि—

अहिंसा परमो धर्मस्तथाऽहिंसा परं तपः।
अहिंसा परमं सत्यं यतो धर्मः प्रवर्तते॥
सर्वयज्ञेषु वा दानं सर्वतीर्थेषु वाप्लुतम्।
सर्वदानफलं वापि नैतत्तुल्यमहिंसया॥

तदीयः सिद्धान्तः

श्रीगान्धीमहानुभावः स हि सर्वानपि धर्मान् समानरूपेणाद्रियते स्म। अत एव स सर्वजातीयानपि मानवान् सम्मानयति स्म। अत एव महत्मनस्तस्य सेयं धर्मनिरपेक्षता तदीयसुदृढधार्मिकतामाश्रित्यैवास्थात्। परमद्य धर्मनिरपेक्षतायाः सम्यगर्थं न बुध्वा बहवोऽपि महानुभावा जिह्वया ईश्वरस्य नाम्नो नोच्चारणं कुर्वन्ति, हस्ताभ्यां तं न पूजयन्ति, मनसा च तं न चिन्तयन्ति। श्रीमहात्मनस्तस्य तु मतमिदमासीद्यत् सर्वेषामपि धर्माणां लक्ष्यमेकमेव विद्यते, कामं तल्लक्ष्यप्राप्तये भवन्तु नाम विभिन्नाः पन्थानः। अत एव स महानुभावः स्वस्य भगवत्प्रार्थनासभासु विभिन्नधार्मिकग्रन्थानां पाठ कुरुते स्म।

अपि च महात्मनस्तस्यायं दृढो विश्वासोऽवर्तत यत् सर्वेऽपि धार्मिका जनाः सुदृढधर्मबन्धनेन सन्ति बद्धा इति। तथा च स महात्मा यथोपदिशति स्म तथैवाचरति स्म स्वयमपि। तस्य हि कथनमिदमासीद्यत् लघु-लघून्यपि कार्याणि कर्तुं न केनापि लज्जा करणीयेति। अत एव स महात्मा बहून्यपि कार्याणि स्वयमेव सम्पादयति स्म।

महात्मानं प्रत्यस्माकं कर्तव्यम्

किञ्च महतः प्रमोदस्यायमवसरो यदत्र देशेऽक्टूबरमासस्यास्य २ तारिकायां समस्तदेशविदेशवासिभिर्महानुभावै र्महता समारोहेण राष्ट्रपितुस्तस्य गान्धीमहात्मनो जन्मशताब्दीमहोत्सवः प्रायो यत्र तत्र सर्वत्र समायोजितोऽभूत्। समारोहे चास्मिन् राष्ट्रस्य जनतया शासकैश्च तं महात्मानमुद्दिश्य यत्किमप्यनुष्ठितं तदस्ति तेषां केवलमात्मनः कर्तव्यपालनमेव, यतो हि श्रीगान्धीमहात्मना सम्पूर्णेऽप्यात्मनो जीवनकाले देशमिमं स्वतन्त्रं विधातुं तथा संरक्षितुञ्च यानि विविधानि कष्टानि सोढानि, तानि सन्ति नूनमवर्णनीयान्येव।

अपि च गान्धीमहात्मनः समायोजितः सोऽयं जन्मशताब्दीमहोत्सवो वस्तुतस्तदैव साफल्यमवाप्स्यति, यदा हि सर्वेऽपि भारतीया मानवाः कायेन वाचा मनसा च तन्निर्दिष्टं मार्गमनुसरिष्यन्ति। अद्य प्रायः सर्वत्र समये समये विलोक्यते यद् विपदि समुपस्थितायां कस्याञ्चित्केवलं महात्मनस्तस्य नामोच्चार्योच्चार्य गान्धीमतानुयायिनमात्मानं ख्यापयन्ति, परं नैतत्समुचितम्।

सुनिश्चित्तमेवेदं यदद्य सुविशालानां विविधानां सभानामायोजनं कुर्वाणास्ते एव प्रायो गान्धीभक्ता बाहुल्येन दृष्टिपथमायान्ति, येषां वेषभूषा, संलापः, भाषा, तथाऽऽचरणादिकञ्च सर्वमपि महात्मनस्तस्य वैपरीत्यं भजते। मान्यस्य तस्य महात्मनो मनसि तु महती चिन्तेयमस्थाद्यन्मम देशेऽत्र बहवो दीना हीना अनाथाश्च जना एतादृशा अपि विद्यन्ते, ये हि भोक्तुं पर्याप्तमन्नं शरीराच्छादनार्थञ्च वासांसि नाप्नुवन्ति—इत्यत एव महानुभावः स सर्वस्मिन्नपि समये स्वस्यार्धशरीरे एव वस्त्रं दधाति स्म तथा स्वल्पमेव भारतीयं सात्त्विक च भोजनं कुरुते स्म। अतोऽद्य गान्धीसिद्धान्तमनुपालयतां मान्यानां महानुभावानां संख्या नाधिकेति स्पष्टं वक्तुं शक्यते। तथा हि—

गच्छन् तिष्ठन् स्वपन्यस्तु देशहितमचिन्तयत्।
तस्मात्सोऽयं महात्मा तु महात्मेवाऽभवद् भुवि॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

❁ श्रीगान्धिगौरवम् ❁

कविः—श्रीशिवगोविन्दशास्त्री, जयपुरम्

"बाल्यम्"

आदौ स्मरामि गुरुपादरजांसि चित्ते
स्थित्वा पुरः स्वकरकम्पितपूर्णभागै-
रुष्णं विधाय बहुशीतसमृद्धिशीतम्
नौम्यङ्घ्रियुग्ममित[1]धाम हृदि स्वकीये ।।१।।

प्रणम्य भारतीं देवीं शम्भुरत्नं गुरुं तथा ।
आश्रित्य भारतीं वाणीं ब्रुवेऽहं गान्धिगौरवम् ।।२

आलोक्यात्मकथां शुभ्रां लिखितां गान्धिहस्ततः ।
संक्षिपाम्यत्र बालानाम् कृते संक्षेप-पाठिनाम् ।।३।।

पठन्तो भारतीया हि लप्स्यन्ते गौरवं स्वकम् ।
महद्भ्यो लभते ज्ञानं श्रेयोऽनुकरणं मतम् ।।४।।

अस्माकं भारतं वर्षं हिन्दुस्थानेति कथ्यते ।
महतां जन्मनां भूमिः, रामकृष्णादयस्त्विह ।।५।।

जाता यत्र सदाचारा गोखलेतिलकादयः ।
दृष्ट्वा ये बन्धनं मातुः कांग्रे संपर्यचालयन् ।।६।।

१ इतः = प्रातः

वस्तुत इदानीमपि तस्य महात्मनो विविघोपद्रवाक्रान्तस्यास्य देशस्य कृते नूनमासीदावश्यकता, परं दुर्भाग्यतः १९४८ तमे ईशवीये वत्सरे जनवर्याः ३० तारिकायां भगवत्प्रार्थनासमये पापात्मना नाथूरामनामकेन भारतीयेनैव गुलिकाप्रहारेण हतः स महात्मा ।

यद्यपि स हि महात्मा गान्धी भौतिकेन शरीरेण नास्माकं मध्येऽद्य विराजते तथाप्यात्मनो नित्यत्वात् स महात्मा नूनमाकल्पान्तं स्थास्यति । विश्वबन्धवे तस्मै महात्मने भारतीपरिवारः सोऽयं हृदयेन श्रद्धाञ्जलिं समर्प्य कामयते यत्—

येनाहिंसाबलेनैव देशो नीतः स्वतन्त्रताम् ।
सर्वै राष्ट्रपितुस्तस्य साम्प्रतं घुष्यतां जयः ॥

यदा जगत्यां विपदासु मग्नान्,
व्यलोकयत्स्वीयजनान्मुरारिः ।
तदा विशेषं पुरुषं स्वकीयम्
कुत्रापि जातं नितरां करोति ।।७।।

श्रीगुर्जरे पोरयुते च बन्धे
नाम्नः सुदाम्नः सुहृद्रोऽथ पुर्य्याम्
श्रीमोड़वंशे वणिजां समाजे,
जातो महानुत्तमचन्द्रगान्धी ।।८।।

गन्धस्य कार्य्ये नितरां हि लग्नाः,
गान्धीति संज्ञामलभन्त पूर्वे ॥
धीमान[2] कार्ये स तुलब्ध कीर्तिः,
श्रीकर्म्मचन्द्रं सुतमेव लेभे ।।९।।

यो राजकोटे धनिठक्कुरस्य,
धीमान[2]कार्यं कृतवान् सदैव ।
तुर्य्या तु पत्नी'पुतली' च तस्य,
दधार गर्भं प्रभुशक्तिपूर्णम् ।।१०।।

यद्दोहदं सेच्छति तत्तदेव,
अलाच्च तस्यै स तु कर्म्मचन्द्रः,
आयुस्तदीयं सुरवर्त्म वेद-[3]
वर्षीयमासीत् सुतसूतिकाले ।।११।।

एकोनविंशे सति वैक्रमीये,
२-१०-१८६९, बाणद्विवर्षे[4]सितभाद्रमासे ।
असूत पुत्रं हरिवा[5]सरे यम्
स मोहनो दासयुतश्च गान्धी ।।१२।।

उच्चैर्ग्रहैर्ज्ञातगतिश्च बालम्,
विलोक्य भेरीं सुरता ननाद ।।
ववौ च दिक्षु त्रिविधः समीरः,
मन्दं जगर्जु र्जलदाः सचञ्चलाः ।।१३।।

२ दीवानेति तद्भवः
३-४०, ४-सं० १९२५ अर्थात् २-१०-१८६९
ई० ५-द्वादशी

Digitized by Arya Samaj Foundation Chennai and eGangotri

"यथार्थच्छात्रः"

वस्वेक[6]वर्षं स पपाठ विद्याम्
कदापि नैच्छत्प्रतिलेखमेषः ॥
समत्ववृद्धिं विषमत्वहानिम् ।
चकार सर्वेषु जनेषु गान्धी ॥१॥

भ्रान्त्या च मांसं स तु धूम्रपानम् ।
चक्रे तु दुष्टस्य समागमेन ॥
मातुश्च भक्त्या परिहृत्य सर्वम् ।
शमी च भूतः पितृ-भक्तिपूर्णः ॥२॥

क्रीडाश्च त्यक्त्वा सह-पाठिमध्यात्
पित्रोश्च सेवां नितरां करोति ॥
तस्यास्ति दासी किल कापि रम्भा,
ददौ च तस्मै शुभराममन्त्रम् ॥३॥

नाट्या[7]च्च सत्यश्रवणस्य पाठाद्[8] ।
भक्तिश्च पित्रो हृदये दधार ॥
तस्यास्ति हार्दं सुरभारतीषु,
पठ्यासुरैच्छज्जनभारतीयाः ॥४॥

श्रीसंस्कृतं संस्कृति-पूर्णभाषाम् ।
इत्यस्ति शिक्षा गुरुगान्धिनोऽस्य,
प्रौढोप्ययं वै विविधैरुपायैः,
गीतां सुगीतां कृतवान् श्रमेण ॥५॥

"विवाहः"

गुणैक[9]वर्षे पितृकर्म्मचन्द्रः,
सुतस्य गोदानविधे[10]स्तु पूर्वम् ॥
विवाह-दीक्षां कृतवान् स्वजातौ ।
मुग्धो विवाहस्य कृतौ किशोरः ॥१॥

कस्तूरिबालां पुरतो विधाय ।
तदंसहस्तो भ्रमरीश्चकार ॥
अभुक्तकंसारमभोजयत्ताम् ।
द्यूते जितो नूतनया च वध्वा ॥२॥

एतादृशी बाल-विवाहरीतिः ।
ऊढा स्वमातु भवने वसेत्तु ॥
आसीत्तदासक्तिरतीव तस्याम् ।
बाल्ये विवाहस्य बुभोज शर्म्म ॥३॥

आदर्शनार्य्या गुणगौरवादि ।
दत्तं स्वपत्न्यै गृहशिक्षितायै ॥
कालेजमध्ये पठनं तु तस्मै,
न रोचते ह्यल्पधनं श्रमेण ॥४॥

"विलायतयात्रा"

तदैव चायात् कुलमित्रमेकः,
श्रीभावजीवः परमो हितैषी ।
जोशीत्युपाख्यः स तु विप्रवर्य्यः ।
श्रीमातरं भ्रातृयुताञ्च गान्धेः ॥१॥

उवाच वाक्यं निजसूनुसाक्ष्यं ।
ग्राह्या सुविद्या लघुतोऽपि नूनम् ॥
कुशाग्रबुद्धिः पठनेच्छुरच्छः ।
श्रीमोहनो वैश्यकुलावतंसः ॥२॥

वाक्कीलविद्यापठनाय सोऽयम् ।
कथं न प्रेष्येत 'विलायतं'[11]नु ॥
रोगी यदिच्छेद्धितकारि पथ्यम् ।
तदेव दद्यात् स तु वैद्यराजः ॥३॥

छात्रस्य गान्धेरियमेव वाञ्छा ।
सिद्धा स्वयं सा भगवत्कृपातः ॥
भविष्णुवृक्षस्य तु पर्णपुञ्जं ।
सुचिक्कणं स्यान्नहि कापि शङ्का ॥४॥

परं शुभे कर्मणि विघ्नरेखा,
आयात्यवश्यं प्रकृतिः पुराणी ।
पारे समुद्रं न कदापि यायात्,
जातिव्यवस्था गुरुमातृचित्ते ॥५॥

६-१८ । ७-सत्यहरिश्चन्द्रनाटकं दृष्ट्वा
८-श्रवणकुमारस्य कथां पठित्वा
९-१३, १०-श्मश्रुमुण्डनम्

११-विशेषो लायः लाभः यत्र स विलायो विदेशः तस्य भावः तत्त्वम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वदेवमयः श्रीगान्धी महात्मा

प्र० श्रीराधाकृष्णशर्मा साहित्याचार्यः, म०स० कालेजः, जयपुरम्

देशानुरागाद्धितभाववेगाद्
हेलावहेल्याथ सुखं समग्रम् ।
ममर्ष क्लेशान् विविधान् महोग्रान्
गान्धि महात्मानममुं स्मरामि ॥१॥

सन्तीर्य दुःखौघसमुद्रमद्भुतं
चक्रे स्वतन्त्रत्वरवेर्नवोदयम् ।
जगत्यहिंसाबलजित्वरं परं
श्रद्धासुमैरद्यसमर्चयामि तम् ॥२॥

गुरुण्डसङ्गादभिदूषिताङ्गी
सोत्का यदुत्सङ्गसुखं लषन्ती ।
स्नात्वाऽस्य शान्त्यब्धिजले तनुं स्वां
चकार शुद्धां किल भारतश्रीः ॥३॥

व्यक्तित्वमासीद् भुवि पूज्यगान्धेः
चित्तं जनानां ननु नह्यतीव ।
वृद्धेषु वृद्धस्तरुणेषु तादृक्
बालेषु बालप्रिय एव नित्यम् ॥४॥

सर्वदेवमयोऽयं महात्मा—

आसीद् वृषस्तेहृदये क्षमा करे
मुखे मृगाङ्कः खलु वाचि भारती ।
गान्धिन् परे तेजसि भास्करस्थिति-
र्मतौ च गीर्वाणगुरुः प्रतिष्ठितः ॥५॥

कोपेऽन्तको वैश्रवणः प्रसादे
तव प्रतापेऽनिलमित्रमित्थम् ।
विश्वात्मनोरूपतया पृथिव्यां
निश्शेषगीर्वाणमयस्त्वमासीः ॥६॥

स्थानं न लेभे समयं विलोक्य,
परं चकम्पे निजधर्मभीरुः ।
उवाच माता खलु वैष्णवाऽहम्,
पिता तदीयो नहि वर्त्तते हहा ॥६॥
मद्याच्च मांसान्नहि तत्र रक्षा,
करोमि किं किं नहि निश्चयो मे ।
सभ्येन चोक्तं मम मोहनोऽयम्,
करोतु संकल्पमसेवितुञ्चेत् ॥७॥
ओमित्थमूचे जननी यदैव,
उवाच बालः पुरतस्तदैव ।
मद्यं च मांसादि न हि स्पृशेयम्,
स्वं ब्रह्मचर्यञ्च दधामि नित्यम् ॥८॥
इत्थं प्रतिज्ञाय स्वमातरं प्रति,
जगाम शीघ्रं स तु मुम्बइं मुदा ।
मनोरथं प्राप्य युवा स गान्धी,
गम्भीरभावेन जहर्ष चित्ते ॥९॥

तत्रैव नैके बहुभीति-वार्त्ताम्,
अश्रावयन्नुच्च जलोघजाताम् ।
माता स्ववध्वा बहुभूषणानि,
विक्रीय बन्धोश्च धनं युयोज ॥१०॥

वसुवसुवसुचन्द्रे[12], ईशवीये च वर्षे ।
सितवर[13]वृतमासे, तूर्य्यतिथ्यां[14] विमुच्य ॥
परिगणितसुमासं बालमेकञ्च पत्नीम् ।
गृहपरिजनमध्ये बम्बईतो जगाम ॥११॥

[क्रमशः]

१२–१८८८ ई०; १३–सितम्बर मास १४–ता. ४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राष्ट्रपितुर्जन्मशताब्दीमहोत्सवप्रीत्यर्थम् :-

"भववैभवसंन्यासी"

प्रणेता-श्री या० वि० देवासकरः, वटपत्तनस्थः (बडौदा)

भारते भारतीयानां श्रूयते भारतीरतिः ।
भारती भारते कुर्यात्, भाषितां सुरभारतीम् ॥१॥

स्त्रीणां पतिरतिः प्रेष्ठा मदनश्च रतिप्रियः ।
विद्यारतिश्च विद्यार्थी विद्वान्वै भारतीरतिः ॥२॥

विहाय स्वार्थसर्वस्वं निधाय हृदि भारतम् ।
स्वातन्त्र्यार्थं स राष्ट्रस्य निनाय जनिमात्मनः ॥३॥

राष्ट्रैक्यं परमं ध्येयं सतीष्वप्रतिपत्तिषु ।
विश्वशांतिः सुखायैवं शशास स प्रियः पिता ॥४॥

सत्याग्रहसुसज्जः स संगरं जितवान् सुधीः ।
अहिंसा परमो धर्म इत्यशात्त्र पिता महान् ॥५॥

प्रियं संप्राप्य स्वातंत्र्यं कीर्तिं नीत्वा दिशो दश ।
विस्माययञ्जगत्सर्वं महात्मा स दिवं गतः ॥६॥

रामराज्यं पुनर्वाञ्छी विश्वशान्तिसमीहकः ।
तत्समो राष्ट्रनिर्माता, न भूतो न भविष्यति ॥७॥

वीतरागभयद्रोहः स्वार्थत्यागी च तत्समः-
भववैभवसंन्यासी न भूतो न भविष्यति ॥८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गान्धेः सूक्तीनां संग्रहः

संग्रहीता—विद्याभूषणः श्रीगणेशरामशर्मा, डूंगरपुरम्

यदा राज्यं नियम-व्यवस्थाविहीनं भवेत्, किं वा भ्रष्टाचारि भवेत्, तदिदमेकतुल्यमेवास्ते, तदा सविनयमवज्ञा नाम पावनं कर्तव्यं भवति। यो हि नागरिको नन्वेवंविधेन राज्येन सह विनिमय-सम्बन्धं पालयति, स तस्य राज्यस्य भ्रष्टाचरणस्याराजकतायाश्च सहभागी भवति।

—यंग इण्डिया, ५ जनवरी १९२२

❃ ❃ ❃

जनान्दोलनानि समस्ते हि संसारेऽप्रत्याशितरीत्या नेतॄन् समुदपादयन्। अस्माकमेतत् (सत्याग्रहात्मकं) आंदोलनमपि चास्य प्रोक्तस्य नियमस्यापवादरूपं भवितुं नार्हति। अतो यत्रेदमुचितमास्ते यद्धि हिंसायाः शक्तीः सन्नियमितुं प्रत्येकः प्रकल्पनीयः सम्भाव्यश्च प्रयत्नः क्रियेत, तत्रेदमपि चावधातव्यं भवति यत् सविनयमवज्ञान्दोलने प्रारब्धे सति तत्तावत्पर्यन्तं समाप्तिं नेतुं न शक्यते यावत् कोऽपि चैकोऽपि सविनयं प्रतिरोधकर्ता मुक्तो भवेदथवा जीवितशेषः स्यात्।

—यंग इण्डिया, २७ फरवरी ३०

❃ ❃ ❃

श्रमिकेणैतदनुभवितव्यं यद्धि श्रमः, श्रमेण साकमेव धनसम्पदपि भवति। यावदेव श्रमजीवाः समुचितं शिक्षिताः सङ्घटिताश्च भविष्यन्ति तथा स्वकीयां शक्तिं चानुभविष्यन्ति, तथैव ते तामवस्थां प्राप्स्यन्ति, यस्यां प्रभूतायाः प्रभूततमापि च सम्पत्तिरपि तान् पराजित्य स्वस्याधीनान् विधातुं न प्रभविष्यति। सङ्घटितः प्रबुद्धश्च श्रमः स्वात्मनः परिश्रमस्य समयान् स्वयमेव हि समुपस्थापयिष्यति तांश्च सः स्वयमेव हि स्वीकारयिष्यतीति।

हरिजनः, १ मार्च १९३५

कृषका अधिकांशा अशिक्षिता वर्तन्ते। वयस्काः पाठशालास्वध्ययनयोग्यवयसश्च सर्वेऽपि च कृषाणाः शिक्षिता विधेयाः। सेयमावश्यकता पुरुषाणां, स्त्रीणामुभयेषामपि च वर्तते। यदि च कृषका भूमिहीनाः कृषाणाः सन्ति तदा तेषां पारिश्रमिकं तं स्तरं यावन्नेतव्यं स्याद्येन स मान-मर्यादं जीवन-यापनस्य हृदयालम्बनं सम्भवेन्नाम। एवं विधस्य जीवन-स्तरस्यायमभिप्रायो भवितुमर्हति यद्भोजनार्थं संतुलित आहारो निवासार्थं वासयोग्यं गृहं तथा च परिधानाय तावन्ति वासांसि स्युर्यानि स्वास्थ्यस्यापेक्षां पूरयितुं सक्षमाणि भवेयुः।

—बांम्बे क्रोनिकल, २८-१०-४४

❃ ❃ ❃

यदि च सत्यमेव पृच्छ्येत, तदा कामं स्वल्पीयस्यां मात्रायामेव भवेन्नाम, काममपि हिंसां विना न तु विश्वस्यास्य कोऽपि कार्यकलापः सम्भवति, न कोऽपि चोद्यमो वोद्योगो वा सं भवति। अस्माभिः कर्तव्यमेतदास्ते यद्वयं यथासम्भवं न्यूनान्न्यूनां हिंसां विदध्याम। वस्तुतोऽहिंसा तु निषेधात्मकोऽस्ति शब्दः। अस्यार्थो भवति तथाविधः प्रयासो यो हि जीवनेऽनिवार्यां हिंसां परित्यक्तुं करणीयो भवेत्।

—हरिजनः १ सितम्बर १९४०

❃ ❃ ❃

मम मित्राणि मे महतो महीयांसं सम्मानमेतदेव दातुं पारयन्ति यत्ते मम मनोऽभीष्टानि कार्याणि, सङ्कल्पांश्च स्वजीवने समाचरेयुः किं वा यदि तेषां मयि विश्वासो न भवेत्तदा ते स्वशक्तिभरं मम प्रतिरोधं कुर्वन्त्विति।

—यंग इण्डिया, १२ जून १९२४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मम रूढे मुक्तिस्तेषां प्राचीनतमानां शास्त्राणां दिव्यताया निषेधपर्यन्तं गच्छति यानि मे तर्क-बुद्धि तोषयितुं न प्रभवन्ति।

—यंग इण्डिया १४, जुलाई १६२०

❀ ❀ ❀

कस्याश्चनापि संस्थाया हितचिन्तकोऽहं तावदेव भवामि यावत् सा संस्था मम च राष्ट्रस्य चाभ्युन्नतौ सहयोगं करोति। अभ्युन्नतेः साधकत्वस्थाने कापि संस्था यावदेव तद्बाधाकरी प्रतीयते, तावदेव तया साकं विद्रोहाचरणं स्वकीयं बाध्यकरं कर्तव्यमहं मन्ये।

—यंग इण्डिया, १६ सितम्बर १६२६

❀ ❀ ❀

स्वात्मदमनस्य, प्रायेण कातरतायाः सीमानं यावत् प्राप्तेऽस्मिन् कातरताग्रस्ते देशे शूरवीरताया आत्मत्यागस्य च मात्राऽऽवश्यकतातोऽधिकं न कदापि भवितुं सम्भवति।

—यंग इण्डिया, २ अप्रेल १६३१

५ आक्टोबर १६६६ दिनमानात् साभारम्

मनोविनोदकणिका—

मोदकलाभोपायः

मोदकान् खादतो विप्रान् दृष्ट्वा श्राद्धे निरन्तरम्—
ईश्वरं प्रार्थयामास क्षुधार्तः कोऽपि भिक्षुकः।
अग्रे जन्मनि विप्रः स्यां—तथा कुरु कृपां प्रभो ! ॥

—मधुपः

साधना [गुजराती साप्ताहिक]
की
'साधना' प्रसार योजना

(१) सद्भावना निधिः कम से कम रु० एक से लेकर यथाशक्ति निधि के रूप में रकम ली जाएगी।
(२) 'साधना' के दस वर्षीय और पन्द्रह वर्षीय ग्राहक बनें। दस वर्षीय ग्राहक से केवल रु० १०० चंदा लिया जायेगा। और १५ वर्षीय ग्राहक से केवल रु० १५० चंदा लिया जाएगा। याद रहे कि दोनों योजनाओं से ग्राहक को क्रमशः रु० ५० और रु० ७५ का प्रत्यक्ष लाभ होगा।
(३) आजीवन सदस्यः—(Life Member)
रु० २०० देकर सदा के लिए साधना प्राप्त करें।

पत्र व्यवहार करें :—

व्यवस्थापक महोदय, 'साधना' साप्ताहिक
रेड क्रास मार्ग, अहमदाबाद-१ (गुजरात)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमहात्मने श्रद्धाञ्जलिः

राष्ट्रिय-स्वयंसेवकसंघस्य सरसंघचालकः
श्री मा. स. गोलवलकर– पूज्य गुरुजी–
महानुभावः सांगली नगरे (आन्ध्रे) श्रीगांधी-जन्मशताब्द्याः पुण्येऽवसरे समायोजितायां सभायां समभाषत यद्वयमात्मनः पवित्रवार्तानां तथा राष्ट्रस्य महापुरुषाणाञ्च स्मरणं प्रातःस्मरणे कुर्मः। अतोऽस्माकं भारतभक्तिस्तोत्रेऽस्मिन् श्रीमहात्मगान्धिन उल्लेखः स्पष्टरूपेण वर्तते।

किञ्चांग्रेजानां शासनस्य समाप्तये च जनजागरणेन संघटितसमाजनिर्माणस्य महत्यावश्यकतासीत्। लोकमान्यतिलकमहोदयेन तदानीं कार्यमिदमनुष्ठितम्। ततः श्रीतिलकमहानुभावस्यानन्तरञ्च श्रीमहात्मना कार्यस्यास्य सूत्रं स्वहस्तयोर्धृतम्, तेन हि अस्यां दिशि सुमहान् प्रयासोऽक्रियत। शिक्षिताशिक्षितेषु स्त्रीपुरुषेषु सेयं प्रेरणा समुत्पादिता यदंग्रेजानां शासनं सम्प्रति समापनीयम्, देशस्यास्य च स्वातन्त्र्यं सम्पादनीयम्। एतदर्थञ्च यत्किमपि मूल्यं दातव्यं भविष्यति, तद्वयं दास्याम इति।

अपि च देशस्य समग्रापि जनता वर्तते भारतमातुः सन्ततिः, स्वातन्त्र्यार्थञ्च योद्धव्यम्–सेयं प्रेरणा श्रीगान्धीमहात्मनोऽन्तःकरणे कुतः समुदपद्यत? सर्वानपि वर्तमानान् धर्मान् प्रत्यादरभावना च कुतः समजायत। अत्रेदमुत्तरमस्ति–यत्सेयं भावना हिन्दुधर्मादुत्पन्ना। अत्र हि विभिन्नेष्वनेकेषु भेदेषु विद्यमानेष्वपि 'एकं सद् विप्रा बहुधा वदन्ति' इत्येवंरूपास्ति शिक्षा। श्रीमहात्मनश्च जीवनमनया सम्मिश्रितमासीत्। अत एव श्रीगन्धीमहानुभावः समये-समये स्वयं वदति स्म यदहमस्मि सुदृढो हिन्दुः। अत एव सर्वेष्वपि मानवेष्वेव न, अपि तु जीवमात्रे स्निह्यामीति।

एवं हि तस्य महात्मनः सम्पूर्णे जीवने तथा राजनीतौ च 'न हिंस्यात् सर्वा भूतानि' इत्यस्य तत्त्वस्यानुसारेण सत्याहिंसयोर्यत्प्राधान्यमस्थात् तत् तदीय-सुदृढहिन्दुत्वस्य कारणादेव।

किञ्च श्रीगुरुजीमहानुभावेनाग्रे प्रतिपादितं यत् श्रीगान्धीमहात्मानः स्मरणकाले तदुपदेशानुसारेण शीलस्य चारित्र्यस्य स्वत्वस्यापि च महत्त्वं बोद्धव्यम्। श्रीमहात्मस्तस्य जीवनाच्च सत्यस्य पालनं विधेयम्, कुमार्गतश्च धनग्रहणस्य प्रवृत्तिः परित्याज्या, बुभुक्षितेभ्यश्चान्नदानादिकमवश्यं सर्वैरपि करणीयम्।

अन्ते च श्रीगुरुजीमहोदयेन प्रोक्तं यद् राष्ट्रियस्वयंसेवकसंघः श्रीगान्धीमहात्मानं प्रति महान्तमादरं बिभर्ति। तथा चाहमद्य पुण्ये पर्वणि श्रीगान्धीमहात्मने तस्मै हृदयेन श्रद्धाञ्जलिमर्पयामीति।

अनु० मधुपः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती मातु भारते

संस्कृतपण्डितान् प्रत्यभ्यर्थना

अयि मान्या मनीषिणः ! सुविदितमस्तु तत्र भवतां भवतां यद्यथा कथचिन्मन्दमत्या सुरभारतीं सेवमानस्य मम मनसि बहोः कालादेव महती समुत्क्टा वाञ्छाविद्यत-यदहं सु-सिद्धानां सुरभारती-समुपासकानां राजस्थानवासिनामेवं देशेऽत्र तत्तत्प्रान्तमण्डलप्रदेशवर्तिनां स्मरणपथ-मुपयाताना सम्प्रति वर्तमानानाञ्च समेषामपि विदुषां संस्कृत-पण्डितपरिचयनामकस्य विशिष्टस्य ग्रन्थस्य प्रकाशनं कुर्यामिति ।

श्रीपरमात्मनः कृपया च मम मनोरथपादपस्य पुष्पफलसंजननाय सोऽयं शोभनोऽवसरः सम्प्रति सम्प्राप्तः । माननीयेन प्रबन्धसम्पादकेन श्रीगिरिराजशर्मशास्त्रिमहोदयेन च सम्वर्द्धितो-त्साहोऽहं पुण्यतमं कार्यमिदं सम्पादयितुं यत्र तत्र सर्वत्रापि विद्यमानानां सर्वेषामपि श्रीमतां भवतां पण्डितानां परिपूर्णं सहयोगं कामये ।

ग्रन्थस्यास्य प्रकाशनञ्च विद्वत्परिचयसम्बन्धिन्यां सामग्र्यां पर्याप्तमात्रायां प्राप्तायां सत्यान्तु तत्तत्प्रान्तप्रदेशानुसारेण विभिन्नेषु भागेषु सम्पत्स्यते । अतः सर्वतः प्रथमं राजस्थानेऽत्र विराजमानानां माननीयानां ख्यातिमुपगतानां पण्डितानां परिचयात्मकस्य ग्रन्थस्य प्रथमो भागः प्रकाशितो भविष्यति । एवमन्यान्यप्रदेशवर्तिनामपि कोविदानां पृथक्-पृथक् भागाः प्रकाशिताः सम्भविष्यन्ति ।

अतोऽचिरादेव सर्वैरपि धीमद्भिर्विद्वद्भिर्निम्नाङ्कितपत्रानुसारेण स्वस्वपरिचयसम्बन्धिनी नातिविस्तीर्णा सारगर्भातिशीघ्रमेव सामग्री सम्प्रेषणीया, तथा परिचयात्मकसामग्र्या आवरणपत्रे परिचयात्मकग्रन्थस्य संकेतश्चाप्यवश्यं कर्तव्यः—इति सादरं सप्रश्रयञ्च श्रीमतोऽत्र भवतो विपश्चितो भूयो भूयोऽहमभ्यर्थ-इति ।

संस्कृत-पण्डित-परिचय-ग्रन्थः

१. नाम
२. पितृनाम, जन्मस्थानादिकं संक्षेपेण
३. गुरुनाम, शिक्षा दीक्षा, समुत्तीर्णाः परीक्षाश्च
४. कस्मिन् शास्त्रे विशिष्टा योग्यता वर्तते ?
५. शिष्या विशिष्टा यदि भवेयुः
६. कार्यक्षेत्रम्, संस्कृतसेवाकार्यविवरणम्
७. **ग्रन्थरचना, विशिष्टरचनायाः एका प्रतिरप्यत्रावश्यं प्रहेया येन पाठकानां मनोविनोदाय लाभाय तथा प्रकाश्यमानस्यास्य ग्रन्थस्योपयोगितायाः सम्वर्धनाय च तत एवोदाहरणरूपेण ग्रन्थे** कश्चनांशोऽप्यवश्यं दातुं शक्येत ।
८. सहैव लघुचित्रमेकं चित्रप्रतिकृतिः (ब्लाक) वा
९ वर्तमान-पूर्णसंकेतः
१०. अन्यश्चावश्यको ज्ञातव्यो विषयः, अनावश्यकश्च विस्तारो नापेक्ष्यते ।

विनीतः—
दीनानाथत्रिवेदी मधुपः साहित्यालङ्कारः,
न्याय-साहित्याचार्यः,

संकेतः—महाराज-संस्कृत-कालेजः
जयपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दूरभाष: ७५४९६

सम्पादकमण्डलम्
आशुकविः श्रीहरिशास्त्री
गिरिराजशर्मा
दीनानाथत्रिवेदी 'मधुपः'
पत्रक्रमांक १०६७९

भारती
संस्कृतस्य प्रमुखं मासिकपत्रम्

भारती-भवनम्
गोपालजी का रास्ता,
जयपुर (राजस्थान)
श्रावण शु० ६ सं० २०२६
दिनांक २२-१०-१९६९

॥ श्रीः ॥

मान्यवर ! महोदय !!
सादरं वन्दे !

"संस्कृत-प्रचार-परिषदः" कार्यसमितेः सदस्यैर्विगतेभ्यः कतिपयवर्षेभ्यः प्राक् संस्कृतस्य प्रमुखानां विदुषां कवीनां साहित्यकाराणामेवं संस्कृतसेविनां परिचयग्रन्थप्रकाशनस्य निश्चयः कृत आसीत् । एतदर्थं पूर्वं स्व० भट्टश्रीमथुरानाथशास्त्रिमहोदयास्तथा पण्डितश्रीवृद्धिचन्द्रशास्त्रिणश्चैव-मन्येऽपि द्वित्रा महानुभावाः प्रार्थिताः समभूवन्, परं यदा यस्य कार्यस्य शुभारम्भस्य योगः समायाति, तदैव तत् कार्यमारब्धं भवति ।

एवञ्च यदास्माकं "भारती" पत्रिकायाः सहसम्पादक—श्रीदीनानाथशास्त्रिमहोदयस्य सम्मुखे विषयोऽयं प्रचालितोऽभूत्तदायमतिप्रसन्नो भूत्वा प्रत्यवदद्यत् कार्यमिदं सुसम्पन्नं कर्तुन्तु ममापि बहोः कालादेव विद्यते हार्दिकोऽभिलाषः । यदि च संस्कृतप्रचारपरिषत् कार्येऽस्मिन् योगदानं कर्तुं वाञ्छति, तर्हि कार्यमिदं निर्विघ्नतया शीघ्रमेव सुसम्पन्नं भविष्यतीति ।

पण्डित-श्रीदीनानाथत्रिवेदिमहोदयेन चास्य संस्कृतपण्डित-परिचयग्रन्थस्य प्रकाशनात्मकमिदं कार्यं समारब्धमास्ते । अतः कृपया श्रीमन्तो भवन्तो विद्वांसः सहलग्ने पत्रके निर्दिष्टां सारगर्भितामेवमुपयुक्तां च सामग्रीं शीघ्रं सम्प्रेष्य ग्रन्थस्यास्य प्रकाशने सहयोगं दातुमनुगृह्णन्तु ।

अपि चादौ पण्डितानां परिचयस्य प्रकाशनं क्रमशो भारत्यां विधास्यते, तदनन्तरं च प्रकाशित-सामग्र्याः संकलनेन च सोऽयं ग्रन्थः प्रकाशितो भविष्यति ।

सर्वतः प्रथमं राजस्थाने स्थितानां संस्कृतसाहित्यकाराणां ततश्च देशस्य विभिन्नप्रदेशेषु वर्तमानानां संस्कृतज्ञानामपि परिचयग्रन्थः प्रकाशितो भविष्यति ।

अतो मया निवेद्यते यत् कृपया प्राप्तेऽवसरे शीघ्रमेव प्रस्तुतविषयकसामग्रीं सहैव स्व-स्वचित्रप्रतिकृतिं (ब्लाक) चापि प्रेषयन्तु—इति शम् ।

भवदीयः
(गिरिराजशर्मा)
प्रबन्धसम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीदीनानाथत्रिवेदी मधुपः, सहसम्पादः

अभिनन्दनम्

श्रीपरमात्मनः परमया कृपया पवित्रतमस्य भारतस्य राष्ट्रपतिसिंहासने विराजमानं देशभक्तं सदा सदाचारसम्पन्नं **श्रीवराहगिरिवेंकटगिरि**महानुभावमभिनवं राष्ट्रपतिं तथा गुणगणमण्डितं जनताहिततत्परञ्च नवमुपराष्ट्रपतिं **श्रीगोपालस्वरूपपाठक**महोदयमुपलभ्य भारतीपरिवारः सोऽयममन्दमानन्दमनुभवन् भारतभारतीयपरम्परासंरक्षणपरायणं तत्रभवन्तौ भवन्तावुभावपि हृदयेनाभिनन्दतीति ।

संस्कृत-दिवस-समारोहः

राजस्थानस्य राजधान्यां गतागस्तमासस्य २७ तारिकायां सोऽयं संस्कृतदिवससमारोहो महता समारोहेण समपद्यत । नगरेऽत्र विद्यमानानां प्रायः सर्वेषामपि शिक्षणालयानां विभिन्नध्वजालङ्कृताः शिक्षकाश्छात्राश्च 'संस्कृतं विजयताम्' इत्यादीनि वाक्यान्युच्चैरुद्गिरन्तो विभिन्नशोभायात्रास्वरूपं बिभ्राणाश्च नगरस्य विभिन्नेषु भागेषु यत्र तत्र सर्वत्र प्रभातपरिभ्रमणं कृतवन्तः ।

ततश्च महाराज-संस्कृत-कालेजमुपागतवतामेतेषां समेषां विदुषामध्यापकानां बालकानां बालिकानाञ्च सोऽयं समवायो महत्यां सभायां परिणतोऽभूत् । अथ तदानीन्तननिश्चितकार्यक्रमानुसारेण भाषणादिके कार्ये सम्पन्ने तस्याः सभाया विसर्जनमजायत ।

पुनश्च तस्मिन्नेव दिने सायं ५ वादनवेलायां महाराज-संस्कृतकालेजस्यैव प्राङ्गणे शिक्षामन्त्रि-**शिवचरणमाथुर**महाभागस्याध्यक्ष्ये प्रस्तुतस्यास्य समारोहस्यायोजनमभूत् ।

तत्र मङ्गलाचरणानन्तरं सर्वतः प्रथमं कालेजाध्यक्ष- **श्रीगोविन्दनारायणशर्म**महाभागैर्दिवसस्यास्य परिचयः कारितः । ततोऽस्य समारोहस्योद्घाटनमाचरता संस्कृतपरामर्शदातृमण्डलाध्यक्ष-**श्रीलक्ष्मीलालजोशी**महानुभावेन संस्कृतस्य महत्त्वं प्रतिपादयता भणितं यत् संस्कृतानुरागिभिर्विद्वद्भिश्च सर्वैरपि सम्भूय संस्कृतस्य प्रचारप्रसारात्मके कर्मणि सन्नद्धैर्भाव्यमिति । अन्ते च श्रीजोशीमहोदयैः संस्कृतस्यास्य समुज्ज्वलस्य भविष्यतश्च कामनाऽक्रियत ।

ततश्च **डा० श्रीमथुरालालशर्मभिश्च** स्वभाषणे प्रतिपादितं यत् स्वतन्त्रतायाः सम्प्राप्त्या भारतस्यास्य मस्तकं समुन्नतं जातम् । तथा कृषिविज्ञानोद्योगात्मकेषु कार्येष्वपि समुन्नतिर्जाता । परं ५०० पञ्चशतवर्षेभ्यः प्राक् संस्कृतस्य कृते यत्स्थानं प्राप्तमासीत् । तत्तु नेदानीमस्ति । अवरंगजेबस्य तदाऽऽदेशोऽयमासीद्यत्—संस्कृतं न कोऽपि कमप्यध्यापयेत् इति । सोऽयमादेशः ४०० चतुश्शतवर्षाणि यावत्प्राचलत् । पुनश्चांग्रेजानां शासनकाले १८६१ तमे ईशवीयेऽब्दे संस्कृतविश्वविद्यालयानां स्थापना समजायत ।

अग्रे च श्रीशर्ममहोदयैः प्रतिपादितं यत्सम्प्रति राजस्थानसर्वकारेण संस्कृतसंरक्षणं प्रति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ध्यानं दत्तमास्ते। यद्यपि शास्त्रिणामाचार्याणाञ्च संख्या सम्प्रति वर्द्धमानास्ति, तथापि संस्कृते न विद्यते समुचिताभिरुचिः। संस्कृतपण्डितानां प्रायो बालकाः संस्कृतं न पठन्ति। वयमात्मानं हीनं मन्यमानाः सर्वकारमेवाश्रयामः। नैतदस्ति शोभनमिति।

ततश्च डा० **श्रीपुरुषोत्तमलालभार्गव**महोदयाः समभाषन्त यद् येन विदुषा लेटिनभाषा नाधीता तस्यास्ति नूनमांग्लभाषाऽपूर्णा, तथैव संस्कृतस्याध्ययनेन विनाऽन्यभाषाणामध्ययनमपि विद्यतेऽपूर्णमेवेति।

किञ्च संस्कृतस्य विश्वभाषासु समुन्नतं स्थानमस्थात्। तथा संस्कृतस्य क्षेत्रं व्यापकमासीत्। भारताद्बहिरपि संस्कृतस्य शोभनः प्रचारोऽविद्यत। अनेके वैदेशिका अपि संस्कृतस्य महाविद्वांसः समभूवन्। इदानीमपि विदेशेषु संस्कृतस्याध्ययनाध्यापने जायमाने स्त इति।

अथ शिक्षामन्त्री **श्रीशिवचरणमाथुर**महोदयः स्वस्याध्यक्षीये भाषणे समभाषत यदद्य दिने संस्कृतपण्डितैः स्वकर्तव्यं बोद्धव्यम्। संस्कृतशिक्षायाः संवर्द्धनस्य विद्यते मम मनसि महती चिन्ता। संस्कृतस्य कृते २० विंशतिलक्षमितो धनराशिरस्ति नियतः। १८ अष्टादशसहस्रं छात्राः संस्कृतमधीयते, परं छात्राणामेतया संख्यया मम नास्ति सन्तोषः। सर्वैरपि विद्वद्भिः सम्भूयात्र विचारः कर्तव्यः। राज्यस्य धनद्वारैव संस्कृतस्य समुन्नतिर्न भवितुं शक्नोति, किन्तु संस्कृतपण्डिता अपि मनोमालिन्यं परित्यज्य सेवाभावनयैव कार्यं कर्तुं तत्परा यदि सम्भवेयुस्तदैव साफल्यं लब्धुं शक्येत।

अग्रे च श्रीमाथुरमहोदयेन प्रतिपादितं यदिदानीं कायेन वाचा मनसा च मौलिककार्यसम्पादनस्य वर्तते महत्यावश्यकता। संस्कृतदिवसस्यास्य साफल्यं तदैव परिगणितं भविष्यति, यदा सर्वेऽपि विद्वांसः संस्कृतस्य सर्वासामपि समस्यानां समाधानार्थं चिन्तनं विधास्यन्ति। सर्वकारस्तु मार्गदर्शनं कामयते-इति।

अन्ते च शिक्षासचिव-**श्रीजगन्नाथसिंह**महता महोदयेन वैदिकप्रदर्शिनीं 'भारती' (संस्कृतपत्रिका) प्रदर्शिनीञ्चोदघाटयदिति। ततो धन्यवादार्पणानन्तर समारोहस्यास्य समापनमभूत्।

किञ्चाद्यास्माभिः सर्वैरपि संस्कृतसमुपासकैः संस्कृतदिवसस्यास्याभिनन्दनं कर्तव्यम्। तथा केन्द्रीयसर्वकारस्याभिनन्दनञ्चास्माभि विधेयम्, यतो हि सेयं प्रेरणा साम्प्रतमस्माभिः सर्वकारपक्षत एव समुपलब्धा। अतः संस्कृतज्ञानामपि कृते संस्कृतं प्रत्यनुरागः परमावश्यकः, तैश्च समये-समये संस्कृतमध्येतारश्छात्राश्च प्रोत्साहनीयाः। सहैव संस्कृतपण्डितैः संस्कृतस्य कृते किमपि रचनात्मकं कार्यमवश्यमेव कर्तव्यमास्ते।

संस्कृतसंवादाः

बीकानेरस्थ श्रीशार्दूलसंस्कृतविद्यापीठे संस्कृतदिवससमारोहः समीचीनरूपेण समपद्यत २७-८-६९ दिनांके बुधवासरे प्रातः पञ्चवादनतः सार्धसप्तवादनं यावत् विद्यापीठस्याध्यापकाः छात्राश्च प्रातर्भ्रमणं विधाय संस्कृतगौरववर्धकानि नैकानि वाक्यानि प्रयुञ्जानाः निखिलं नागरिकं वातावरणं संस्कृतमयमकुर्वन्।

एतदुपक्रमे सायं पञ्चवादनतः विद्यापीठस्य "सरस्वतीसदने" एका सभा आयोजिता आसीत् यस्याः सभापतिपदं विद्यावाचस्पतयः श्रीविद्याधरशास्त्रिणः अलमकुर्वन्। सरस्वतीवन्दनवेदपाठानन्तरं प्रचाल्यमानेऽत्र कार्यक्रमे सर्वप्रथमं विद्यापीठस्य मन्त्रिणः श्रीअनन्तलालव्यासमहोदयाः स्वकीयेन संस्कृतभाषणेन सभापतिं सभाजयन्तः समागतजनानां स्वागतं कृतवन्तः। तदनन्तरं विद्यापीठस्य प्रधानाचार्याः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीविश्वनाथशर्माणः संस्कृतदिवसस्योपरि विस्तृतं प्रकाशं दत्तवन्तः। एतदनन्तरं गीतगोविन्दगीतिः, कविसम्मेलनम्, प्रहसनम्, गायनञ्चेत्यादयः विभिन्ना कार्यक्रमाः समपाद्यन्त। बालकानां मुखेभ्यो मधुरां सरलां सरससंस्कृतशब्दावलीं श्रुत्वा दर्शकगणा मुग्ध इवाभवन्।

अस्मिन्नवसरे श्रीकाशीनाथ आचार्यचन्द्रमौलिः प्रो० बालचन्द्रशास्त्रिलक्ष्मीचन्द्रपोद्दाचार्यौ डा० टी० के० भारद्वाजः डा० बी० एन शर्मा रतनलालशास्त्रिप्रभृतीनां विदुषां महत्त्वपूर्णानि भाषणानि समजायन्त। विद्वद्भिः भाषितं यत्–संस्कृते एव निहितो भारतस्य महत्त्वपूर्णो निधिः। एतस्य प्रचारेण किं भारतं न स्वकीयं पुरातनं गौरवमासादयिष्यति न वा किमपि उच्चतममादर्शमेव प्राप्स्यति। अतो भारतस्य सर्वाङ्गीणविकासाय संस्कृतस्य व्यापकमध्ययनाध्यापनं कर्त्तव्यम्। डा० वी० एन० शर्मणा संस्कृतस्यैवोचितं राष्ट्रभाषात्वमिति प्रत्यपादि। तेनोक्तं यत् अनेनैव यथा भारतस्य सर्वासां समस्यानां समाधानं भविष्यति। डा० भारद्वाजेन–संस्कृतविदुषां समादरस्यावश्यकता प्रतिपादिता। श्रीरतनलालशास्त्रिणा-हायरसेकेण्ड्रीकक्षापर्यन्तं संस्कृतस्यानिवार्यता स्यादित्युक्तम्। सभापतिश्रीविद्याधरशास्त्रिणः स्वकीये महत्त्वपूर्णे भाषणे प्रोक्तवन्तो यद् यावत् सर्वकारीयस्तरेण संस्कृतविदुषां समादरो न भविष्यति तावत् संस्कृतस्य पूर्णरूपेण प्रचारो न भविष्यति। त्रिभाषायोजनायां सस्कृतस्य प्राथमिकतामपि ते प्रत्यपीपदन्।

अन्ते "हे अमरभारती आओ" इत्यस्य सुमधुर प्रभावोत्पादकञ्च गान छात्रैः गीतम्। तेनैव सह कार्यक्रमः पूर्णतामविन्दत्। अत्र भाषणद्वयमतिरिच्य निखिलोऽपि कार्यक्रमः संस्कृतेनैव सम्पन्नो यश्च मुक्तकण्ठं प्रशंसितः प्रेक्षकवरिष्ठैः।

"ब्यावरनगरे संस्कृतदिवसः"

राजस्थानशिक्षाविभागनिर्देशमधिकृत्य ब्यावरनगरस्थ—श्रीसनातनधर्मसंस्कृतमहाविद्यालये नागस्तमासस्य सप्तविंशतितारिकायां संस्कृतदिवसो महतोत्साहेन सम्पादितः। महाविद्यालयस्य चतुःशतछात्राणां, शिक्षकवर्गाणामेवञ्च संस्कृतप्रेमिनागरिकाणां सहयोगेन प्रातः षष्ठवादनसमये नगरस्थसुभाषोद्यानत एकस्मिञ्छोभायात्रारूपे प्रभातनगरभ्रमणं समारब्धम्। यस्मिन् संस्कृतभाषायास्तथा भारतीयसंस्कृतिसम्बन्धिनो विभिन्ना घोषा महतोत्साहेन घोषिता आसन्। सर्वतोऽग्रे महाविद्यालयोयः पीतो ध्वजस्तथा मध्ये मध्ये च संस्कृतसम्बन्धिन्यो विचित्राः सुसज्जिताः सुभाषितसूक्तयः महोत्सवस्याकर्षकत्वं नयन्ति स्म।

नगरस्य प्रमुखमार्गेषु परिसरन्त्येषा शोभायात्रा महाविद्यालयस्य भवनं प्राप्य सभायां परिणताऽभूत्। सभायां संस्कृतकवितापाठसंगीतकार्यक्रमानन्तरं संस्कृतभाषाया महत्त्वे तथा च राष्ट्रीयैकतायां संस्कृतभाषाया योगदानमित्यादिविषयेषु विदुषां सारगर्भितानि भाषणानि समलञ्चक्रुर्महोत्सवम्।

अस्यामेव सभायां स्थानीयसंस्कृतपरिषदपि घटिता तथा चास्य स्मृतौ महाविद्यालये षष्ठकक्षात उपाध्यायकक्षापर्यन्तं नैतिकशिक्षारूपेण श्रीमद्भगवद्गोतायाः अध्यापनकार्यक्रमोऽप्यारब्धः।

महाविद्यालयस्य तत्वावधाने संस्कृतप्रौढशिक्षायै रात्रिकक्षा अपि प्रारब्धा भवेयुरिति निश्चित्यैतदर्थं विभागीयस्वीकृति र्ग्राह्येति निश्चितम्।

एवञ्च ब्यावरनगरे सम्पादित एषः प्रथमः संस्कृतदिवसोऽतीवोत्साहप्रेरणाप्रदश्च सञ्जातः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्ते च महाविद्यालयीयच्छात्रपरिषदाऽस्मिन्नुपलक्ष्ये छात्रेभ्यः फलानि वितीर्य समारोहस्य कार्यवाही समापिता—इति ।

प्रधानाचार्यः

असमप्रान्तीय-नलबारी-नगरस्थे संस्कृतमहाविद्यालये संस्कृत–दिवसः

भारत–संसदीय संस्कृतपरिषन्निर्दिष्टपद्धत्या विगते इं २७–८–६६ दिवसे श्रावणीपूर्णिमायां नलबारीस्थसंस्कृतमहाविद्यालये ससमारोहं संस्कृतदिवस उद्यापितोऽभूत् । तत्र छात्राणां मध्ये संस्कृतशिक्षाया उपयोगमधिकृत्यालोचनाचक्रमनुष्ठितमभवत् । केचनाध्यापका अन्यत्रायोजितेषु संस्कृतदिवससमारोहेषु गत्वा गत्वा तत्र संस्कृतवाङ्मय भाषणं दत्त्वा आधुनिकभारते संस्कृतभाषा–साहित्ययोः प्रभावमुपयोगं च प्रत्यपादयन् ।

मध्याह्ने द्वादशवादनसमये संस्कृतमहाविद्यालयभवने आचार्य–श्रीमनोरञ्जनशास्त्रिणां साभापत्ये संस्कृतमहाविद्यालयस्थ–सारस्वतपरिषदो विशेषाधिवेशनमेकमनुष्ठितम्, तत्र समवेतैः संस्कृतप्रेमिभिः सज्जनैरध्यापकैर्विद्यार्थिनां चानेकैः भारतदेशस्य विभिन्नभाषासु, संस्कृतिषु, धर्म्मेषु, जनजीवनपद्धतौ, सामाजिकाचार-विचारेषु च सस्कृतभाषा–साहित्ययोरनुस्यूतमप्रतिहतंप्रभावमुपपादयद्भिः साम्प्रतमपि भारतराष्ट्रस्य कृते भारतीयजनतानां पारस्परिकसंहतिसम्पादनाय स्वगत–भारतीयभावजागृतये च संस्कृतशिक्षा – संरक्षण – प्रचारयोरपरिहार्यत्वं सयुक्तिकं विवृतं स्वीये संस्कृतवाङ्मये मातृभाषामये च भाषणे ।

केचिद् वक्तारः स्वभाषणे सुस्पष्टमवोचन् यत् "एतस्मिन् पूर्वप्रान्तवर्त्तिन्यसमप्रदेशे स्वातन्त्र्यलाभात् प्राक् संस्कृतशिक्षाया यावान् प्रसारः, संस्कृतपण्डितानां यादृक् समादरः, संस्कृतशिक्षां प्रति देशवासिनामधिशासनस्य च यथा श्रद्धापूर्णमानुकूल्यमासन् तत् सर्वमिदानीं स्वतन्त्रेऽसमराज्ये द्रुतगत्या ह्रसमाणं परिलक्ष्यते। स्वातन्त्र्यलाभात् परं विषयान्तरशिक्षार्थं शताधिका विद्यालयाः, महाविद्यालयाश्च, तथानेके विश्वविद्यालया अण्यस्मिन् प्रदेशे संस्थापिताः, आरबिकमहाविद्यालया अपि (Arabic College) त्रयः प्रतिष्ठापिता ये महाविद्यालयान्तरसमकक्षतया स्वीक्रियन्ते राज्यसर्वकारतः, तदुचितार्थसाहाय्यमपि लभमानाः सुतरां सम्बर्द्धन्ते ।

संस्कृतशिक्षार्थं तु नैतावत्कालमस्मिन् प्रान्ते सर्वकारेण संस्थापितः सञ्चालितो वा कोऽपि महाविद्यालयो विद्यते । आङ्ग्लशासनकाले श्रीहट्टनगरे यः संस्कृतमहाविद्यालय आसीत् । श्रीहट्टस्य पाकिस्थानान्तर्भुक्त्या स विलुप्तिमगमत् । अत्र नलबारीनगरे १६३८ खृष्टाब्दे संस्थापितो यः संस्कृतमहाविद्यालयो यथाकथञ्चिज्जीवति स तु राज्यसर्वकारतः आरबिकमहाविद्यालय–समकक्षतयाप्यस्वीक्रियमाणो, यथोचितमर्यादामपेक्षितार्थसाहाय्यञ्चालभमानोऽवहेलितमवमानितं चात्मानं मन्यमानो महाविद्यालयनाममात्रं बिभ्रदेव वर्त्तते ।

आङ्ग्लशासनाधीनकालेऽपि वैदुष्यख्यातिसम्पन्ना एतत्प्रदेशाभिजना बहवः संस्कृतविद्वांसो 'महामहोपाध्याय' उपाधिप्रदानेन सम्मानिता अभूवन् येन संस्कृतविदुषामुत्साहो जनतायाश्च संस्कृतपण्डितान् प्रति श्रद्धोपाचीयेताम् । भारताधिशासनेनेदानीं वैदुष्यख्यातिमद्भ्यः संस्कृतविद्वद्भ्यः 'वैदुष्यप्रमाणपत्रप्रदानरूप (Certificate of learning) सम्मानं प्रतिवर्षं वितीर्यमाणं दृश्यते । स्वतन्त्रभारतस्य त्रयोविंशतिवर्षाणि व्यतीतानि । असमप्रदेशप्रसूतानां संस्कृतविद्या–प्रचारैकव्रतानां सुप्रथितयशोमण्डितानां संस्कृतपण्डितानामेकतमस्यापि वैदुष्यं तत्-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्मानार्हतया परिगणितं नाभूत्। प्रदेशान्तर इवास्मिन् प्रदेशेऽपि विविधशास्त्रनिष्णाताः कृतिनः बहवः संस्कृतविद्वांस आसन् येषामल्पसंख्यका एवेदानीमवशिष्यन्ते ये प्राणानपि पणीकृत्यैतावत्कालं भारतीयपरम्परागत-शास्त्रसम्प्रदायवर्त्तिकां प्रज्वालितां परिपालयन्ति।

एवमवहेलिताऽनादृता निराश्रया चातः परं संस्कृतशिक्षाऽसमप्रदेशे कथं जीवितुमुत्सहेत यद्यधिशासनपक्षतः तत्संरक्षणव्यवस्था न क्रियेत ?

सभायां सर्वसम्मतं प्रस्तावद्वयं गृहीतमभूद यदत्रोपरिष्टात् सन्निविष्टमास्ते।

ततः सभापतिमहाभागः सरलसुरगिरा सुदीर्घं भाषणमेकं प्रदत्तवान्। संस्कृतभाषा भारतवर्षस्य निश्वसितमित्युपपादयता तेनोक्तं यत् "संस्कृतभाषां विना भारतवर्षं कदाऽपि नासीत्, इदानीमपि नास्ति, इतः परमपि न भविष्यति। यथा सुप्तो मूर्च्छितो मूढो वा स्वीयनिश्वास-प्रश्वासयोः सद्भावं नावबुध्यते न वा तत्प्रयोजनमभ्युपगच्छति तथैवेदानीं भारतवासिनो जनाः संस्कृतं प्रति हतादरा उदासीनाश्च तत्सद्भावं नोपलभन्ते न च तत्प्रयोजनं स्वीकुर्वन्तीति विज्ञाय संसदीयसंस्कृतपरिषद्-सदस्यैः संस्कृतदिवसपालनायोजनमिदं कृतम् येन भारतराष्ट्रनिश्वासरूपां संस्कृतभाषां प्रति भारतीयजनताया मनः आकृष्टं भवितुमर्हति। निश्वाससद्भावनिश्चये हि भारतवर्षस्य जीवितभावो निःसन्दिग्धं प्रतीतो भवेदिति।

एतादृग्दिवसपालनेनाऽपि यदि भारतवासिनः संस्कृतं प्रति उद्बुद्धा आग्रहशीला न भवेयुस्तर्हि ते भारतवर्षं प्रत्येवोदासीना, भारतराष्ट्रस्यैव सचेतनतामनङ्गीकुर्वाणाः किञ्चन प्राणहीनं जडं भारतराष्ट्रमुपासत इति प्रत्येतव्यम्।

पुराऽत्रासमप्रान्ते कोच-कछारि-छुटिय-आहोमजयन्तीयादयो विभिन्नजनजातीया राजानः प्रजाश्च सहस्रशः संस्कृतभाषायोगेनैव भारतीयभावमापन्नाः। इदानीमपि तद्वंशजाः सर्वे भारतीयमात्मानमभिमन्यन्ते, समग्रं च भारतराष्ट्रं स्वदेशत्वेन स्वीकुर्वन्ति। तेषु ये संस्कृतभाषाप्रभावमुक्ता आसन् तद्वंशाभिजना एव साम्प्रतमात्मानमभारतीयमभिमन्यन्ते स्वजन्मभूमिं च भारतराष्ट्राद् बहिर्भावयितुं यतन्ते। यावदेते संस्कृतभाषातः, तत्कुक्षिगतसंस्कृतेश्च दूरे तिष्ठेयुस्तावदेव भारतीयत्वाभिमानाद् भारतराष्ट्राच्चापसरेयुः। आर्थनीतिकोन्नयनप्रलोभनेन, राजनोतिकसुयोगदानप्रतिश्रुत्या, सांविधानिकसौविध्यप्रदानप्ररोचनया वा न तेषां भारतं प्रत्यात्मीयताबुद्धिराधीयेत। तस्मादेतेषामभारतीयभावग्रस्तानां पूर्वप्रान्तस्य जनतानां मनसि भारतीयभावोत्पादनायाऽपि एतत् प्रदेशे संस्कृतशिक्षाप्रचारेऽधिको मनोयोगो देय अधिशासनेनेति"।

अतः परं भगवत्स्तोत्रपाठेन सभाकार्यं समाप्तिं नीतम्।

सभायां सर्वसम्मत्या गृहीतं प्रस्तावद्वयम् :-

(१) नलबारीनगरे द्वात्रिंशद्वर्षेभ्यः प्रागेव संस्थापितं प्रदेशस्यैकमात्रमिदं संस्कृतमहाविद्यालयाख्यमनुष्ठानं राज्येऽस्मिन् विविधसंस्कृतशास्त्राणामुच्चशिक्षां प्रसारयदास्ते। तदस्य सामग्रिकमुन्नयनं विधाय राजियकसंस्कृतमहाविद्यालयत्वेन च स्वीकृत्य सर्वं सञ्चालनभारं राज्यिकाधिशासनं गृह्णीयादिति समितिरियं सनिर्बन्धं प्रार्थयते।

(२) असमप्रदेशाभिजनानां वैदुष्ययशोदीप्तानां विदुषामेकतमोऽपि संस्कृतपण्डितो भारतसर्वकारप्रवर्त्तितवैदुष्यप्रमाणपत्रेण (Certificate of learning) नैतावत् कालं सम्मानितः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतद्विषयं प्रति राज्यिकाधिशासनीयगृह-मन्त्रणालयस्य केन्द्रीयसर्वकारस्य च समुचितं सहानुभूतिपूर्णं मनोयोगमाकर्षतीयं सभा।

छात्रपरिषद उद्घाटनम्

गतागस्तमासस्य ३१-८-६९ दिने स्थानीय-श्रीदादूमहाविद्यालये छात्रपरिषदः समुद्घाटन-समारोहो महाराज-संस्कृत-कालेजाध्यक्ष-श्रीगोविन्दनारायणशर्मनैयायिकमहाभागस्य साभापत्ये समपद्यत।

तत्र मङ्गलाचरणानन्तरं महाविद्यालयस्य प्राचार्य-श्रीदयानन्दशर्मशास्त्रिमहोदयेन स्वागत-भाषणमक्रियत। तथा श्रीसुरेन्द्रशास्त्रिणा च स्वागतपद्यान्यश्राव्यन्त। श्रीबलरामाचार्येण च संस्थाया अस्याः संक्षिप्तः परिचयः प्रास्तूयत। छात्रपरिषन्मन्त्रिणा च श्रीचन्द्रशेखरमहोदयेन परिषदः परिचयः कारितः।

अथ समारोहस्यास्योद्घाटनमाचरता राज्य-वित्तसमाजकल्याणमन्त्रि--श्रीविश्वम्भर-नाथजोशीमहानुभावेन भाषितं यन्महाविद्यालय-स्यास्य सम्बन्धस्त्यागिभिस्तपस्विभिश्च सहा-स्थात्-इत्यस्त्यन्यविद्यालयेभ्योऽस्य वैशिष्ट्यम्। यद्यपि वैदेशिकानां भारतेऽत्रागमनस्य प्रभावोऽस्माकं शिक्षापद्धतावपि पतितस्तथापि प्राचीना शिक्षाप्रणाल्यपि कुत्रचित्प्राचलद् विगते कालखण्डे। सम्प्रति चापि तामेव प्राचीनां प्रणालीमनुसर्तुमग्रे वर्द्धितव्यं तत्र भवद्भिर्वि-द्वद्भिः सर्वैरपि।

एवमग्रे च श्रीजोशीमहाभागेन स्वभाषणे प्रोक्तं यत्-सर्वेषामपि शब्दानामुत्पत्तिः संस्कृता-देव समभूत्। तथा च एशियायूरोपप्रभृतीनां बाह्यदेशानां भाषाणामपि जननी संस्कृतमेव विद्यते-इतीह नास्ति कस्यापि सचेतसो वैमत्यम्। किञ्चालौकिकं काव्यानां रसमास्वाद-यितुं भारतस्यातीतं स्वरूपं सभ्यतां संस्कृतिञ्च परिज्ञातुं भारतीयान्यभाषाणामवबोधार्थञ्चाप्य-ध्येयं खलु संस्कृतम्। अतोऽस्माकं पाठ्यक्रमे संस्कृतस्यास्ति महत्यावश्यकतेति।

एतदर्थञ्च संस्कृतमिदं यथा लोकप्रियं सरलञ्च स्यात्, तथा विद्वद्भिः प्रयत्यम्। किञ्च तादृशः प्रयत्नः समनुष्ठेयो येन संस्कृतं जनभाषा-रूपं लभेत। सत्येवन्त्ववश्यमेकदा संस्कृतमिदं राष्ट्रभाषापदमपि ग्रहीतुं शक्ष्यतीति सुनिश्चित-मेव।

अग्रे च च्छात्रान् सम्बोध्य श्रीजोशीमहो-दयेन प्रतिपादितं यत् संस्कृतच्छात्रैः संस्कृतेन सहैवान्यान्यभाषाणामपि कर्तव्यमध्ययनम्। तथैव यद्यप्यस्माकमायुर्वेदशास्त्रं विद्यते परिपूर्णं विज्ञानं तथापि नवनवानां रोगाणां दूरीकरणा-येदानीन्तनेभ्यो द्राक्तरेभ्यस्तदुपचारादिकम-वश्यं संग्राह्यं वैद्यैरप्यनवद्यैरिति।

ततश्चात्मनोऽध्यक्षीयं भाषणं कुर्वता श्रीगोविन्दनारायणशर्मनैयायिकमहोदयेन प्रति-पादितं यद्वयं महतां महतां महोत्सवानामवसरे-ष्वेव स्थित्वा विचारानेवं विधान् कुर्मो यदध्येयं खलु सर्वैरपि संस्कृतमिति। परं वस्तुतः स्थितिरेषा विद्यते यत्सुसमृद्धिसम्पन्ना महानुभा-वास्तु संस्कृतमध्येतुं निजान् बालकान् नैव प्रेषयन्ति खलु शिक्षणालयेषु।

सम्प्रति च प्रायो विलोक्यते यत्सर्वत्रापि केवलं ग्रामवासिनो निर्धनाश्च छात्रा एव पठन्ति खलु संस्कृतम्। ये च महानुभावा भग-वत्कृपया सन्ति धनाढ्यास्ते स्वबालकान् पूर्व-मांगलभाषामध्याप्य द्राक्तरविद्यां पाठयन्ति। निर्धना दीनाश्च बालका नैतां विद्यां ग्रहीतुं पारयन्ति। तथापि दृढतयाहमिदं वक्तुं शक्नोमि यदुच्छृङ्खलताया निवारणार्थं हिन्द्याश्च राष्ट्र-भाषात्वमापादयितुमिदं संस्कृतमवश्यं सर्वैरपि स्वीकर्तव्यं भविष्यतीति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्ते च स्वामि-श्रीमङ्गलदासमहाभागेन प्रतिपादितं यदद्याशीर्वादस्य नास्ति समयः। इदानीं जगति न सन्ति ते ऋषयो महर्षयश्च। एवं सत्यपि यदि भवन्तो निर्बलेभ्यश्छात्रेभ्यः सहयोगं प्रयच्छन्तः स्वकर्तव्यं पालयेयुस्तर्हि ममापि शुभाशीर्वादो भवद्भिः सर्वैः सह वर्तत एवेति।

संस्कृतपरिषद उद्घाटनम्

गतागस्तमासे ग्वालियरनगरे महारानी-लक्ष्मीबाई-कलावाणिज्य-महाविद्यालयस्य संस्कृतपरिषदो निर्वाचने श्रीरमेशचन्द्रः पौराणिकोऽध्यक्षः सचिवश्च श्रीमहेशप्रसादमिश्रः पदाधिकारिणौ निर्वाचितौ। एवमन्येऽपि।

एवं नाथद्वारस्थ-राजकीय-संस्कृत-कालेजे छात्रसंसदः प्रदाधिकारिणां गतदिवसेष्वेव समपद्यत निर्वाचनम्। तत्र प्राचार्यः श्रीनारायणत्रिपाठी संरक्षकः, श्रीरामस्वरूपशर्मा निदेशकः, श्रीरघुनन्दनशर्मा अध्यक्षः, श्रीमदनमोहनश्च मन्त्री-इत्येवमन्येऽपि पदाधिकारिणो निर्वाचिताः सञ्जाता इति।

तुलसीजयन्तीसमारोहः

गतमासे बारां (राज०) स्थिते सार्वजनिकविद्यालये श्रीमांगीलालात्रिपाठिनः साभापत्ये बालबन्धुपरिषदा गोस्वामि-श्रीतुलसीदासस्य जयन्तीसमारोहो महतोत्साहेन समायोजितोऽभूत्। सहैव च तत्र संस्कृतबालबन्धुपरिषदो निर्वाचनमपि जातम्। तत्र निर्वाचनेऽध्यक्षः श्रीगोपालशर्मा, मन्त्री च श्रीबाबूलालः।

अभिवादनपद्यपुष्पाञ्जलिः

जयपुरस्थ - महाराजसंस्कृतकालेजेऽक्टूबरमासस्य २ तारिकातस्त्रिदिवसीयः श्रीगान्धीमहात्मनो जन्मशताब्दीसमारोहस्य कार्यक्रमः समायोजितोऽभूत्। अवसरेऽस्मिन् तृतीयदिने अयोध्यास्थ-लक्ष्मणदुर्गाधीश्वराः **श्रीसीतारामशरणस्वामिनः** स्वपादार्पणेन कालेजमिमलंकृतवन्तः। तदानीमत्र पण्डितप्रवराणामेतेषां कर्मज्ञानभक्तिविषयाणां समन्वयात्मकं वैदुष्यपूर्णं भाषणं समजायत। वस्तुतः श्रीमतां तपोधनानामेतेषां धर्माचार्याणां प्रायः सर्वेष्वपि शास्त्रेषु परिपूर्णोऽधिकारो विद्यते। अतश्चैते महात्मानो विद्वद्भि र्भक्तैश्चाभिनन्दनीयाः समभ्यर्चनीयाश्च सन्ति।

अवसरे चास्मिन् जगद्वन्द्यचरणानां धर्माचार्याणामेतेषां श्रीसीतारामशरणदेवपादानां चरणसरोरुहेषु सादरं सश्रद्धञ्च भूतपूर्व म० सं० कालेजस्य साहित्यप्राध्यापकैः श्रीरामचन्द्रसाहित्याचार्यैरभिवादनपद्यपुष्पाञ्जलिरेष समर्पितो यथा हि—

श्रीरामराजधान्यां लक्ष्मणदुर्गेश्वरा महामान्याः
सीतारामशरणाख्य-शास्त्रिणो जयन्ति सन्तवराः

शब्दे शिवं विषम-लोचनतो विहीनं,
श्रीराघवेन्द्र-पदपङ्कजचञ्चरीकम्।
कारुण्यपूरितदृशैव कृतार्थयन्तं
वन्दे गुरुं सकलकामदुहं शरण्यम्॥२॥

षट्शास्त्रवारांनिधिमन्थनाद्रिं,
वेदार्थविज्ञाननिधिं महान्तम्।
निजोपदेशैर्जगदुद्धरन्तं,
वन्दे तमेनं गुरुमार्तबन्धुम्॥३॥

अद्य धन्या वयं सर्वे धन्यं च जयपत्तनम्।
ईदृशानां सतां सङ्गो नाल्पपुण्येन लभ्यते॥४॥

संस्कृत-दिवसः

प्राप्तपत्रानुसारेण विदितमभूद्यत् अगस्तस्य २७ तारिकायां लक्ष्मणगढस्थिते ऋषिकुलविद्यापीठे समारोहमिममुद्घाटयता आचार्य-**श्रीगौरीशङ्करमहोदयेन** प्रतिपादितं यत् संस्कृतमिदं राष्ट्रस्यानुपमो निधिरस्ति, तथा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थाने चाद्यावधि संस्कृतविश्वविद्यालयस्य स्थापना न जातेत्यस्ति महती दुःखावहा वार्ता।

अवसरे चास्मिन् विद्यापीठस्य पक्षतः प्राचार्य-श्रीनन्दकुमारशास्त्रिणा श्रीगौरीशङ्कर-शर्ममहोदयायाभिनन्दनपत्रं सादरमर्पितम् सहैव नाटकाभिनय-कवितापाठादीनाञ्च कार्यक्रमः प्राचलत्।

ततः स्वस्याध्यक्षीये भाषणे वैद्यवर-श्रीमूल-चन्द्रमहोदयेन च भाषितं यत् संस्कृतस्य गुण-कीर्तनेनैव न किमपि कार्यं सेत्स्यति। एतदर्थं किमपि रचनात्मकं सुदृढं कार्यं कर्तव्यं भवि-ष्यतीति।

अनन्तरञ्चात्र विद्यापीठे योग-वेदान्तशास्त्रयो-र्व्यावहारिकशिक्षायै च संस्थापितस्य साधनाश्र-मस्योद्घाटनमपि श्रीगौरीशङ्करशर्मभिः सम्पा-दितम्।

अन्ते च श्रीनटवरलालजोशीमहोदयेन तथा श्रीगणेशत्रिवेदिना च समुपस्थितेभ्यः पण्डितेभ्यो नागरिकेभ्यश्चाभारः प्रकटितः-इति।

छात्रसंसद उद्घाटनम्

अक्टूबरमासस्यास्य ६ तारिकायां दौसास्थ-राजकीय-संस्कृतकालेजस्यच्छात्रसंसदः समुद्-घाटनं राज्यगृह-जनसम्पर्क-पर्यटनमन्त्रिणः श्रीहीरालालदेवपुरामहोदयस्याध्यक्ष्ये सानन्दं समपद्यत।

तत्र सर्वतः प्रथमं छात्र-संघाध्यक्षेण श्रीरमेशचन्द्रशर्मणा माननीयाध्यक्षमहोदयस्य स्वागतमक्रियत। ततः कालेजीयैश्छात्रैश्च शाकुन्तलनाटकस्य चतुर्थाङ्कस्याभिनयः प्रदर्शितः।

श्रीमन्त्रिमहोदयेन च स्वस्याध्यक्षीये भाषणे देशस्य सर्वभाषाभ्यः संस्कृतस्य प्राचीनत्वं प्रति-पादयता साधितं यत् संस्कृतमेवेदं तादृशं साध-नमेकं विद्यते, येन भारते सर्वत्रैकतायाः स्थापना कर्तुं शक्यते। एतदर्थञ्च संस्कृतपण्डितैः संस्कृ-तस्य प्रचारः प्रसारश्च कर्तव्य इति।

ततश्च महाविद्यालयस्यास्य प्राचार्य—श्रीप्यारेलालशर्मभिः महाविद्यालयेऽत्र शास्त्रि-कक्षायास्तथा महाविकालस्य कृते भवनस्य च महती आवश्यकता प्रतिपादिता। धन्यवादार्प-णेन च सभाया विसर्जनमभूदिति।

A NEW RELEASE :
HINDU RASHTRA and 'MINORITIES'
(ENGLISH)
Published by : RASHTREEYA SWAYAMSEVAK SANGH, KARNATAK
PRICE : 35 PAISE
Paise 50 only to sent one copy by ordinary Book-Post.
V. P. P. will not be sent.
COMMISSION FOR BULK PURCHASERS.
Copies available at :
RASHTROTTHANA SAHITYA
Gavipuram Road, : : : Kempegowdanagar,
BANGALORE - 19.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अष्टमोऽध्यायः

ॐ ऋषिरुवाच ॥१॥

चण्डे च निहते दैत्ये मुण्डे च विनिपातिते ।
बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥२॥

ततः कोपपराधीनचेताः शुम्भः प्रतापवान् ।
उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह ॥३॥

अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः ।
कम्बूनां चतुरशीतिर्निर्यान्तु स्वबलैर्वृताः ॥४॥

कोटिवीर्याणि पञ्चाशदसुराणां कुलानि वै ।
शतं कुलानि धौम्राणां निर्गच्छन्तु ममाज्ञया ॥५॥

कालका दौर्हृदा मौर्याः कालकेयास्तथासुरा ।
युद्धाय सज्जा निर्यान्तु आज्ञया त्वरिता मम ॥६॥

इत्याज्ञाप्यासुरपतिः शुम्भो भैरवशासनः ।
निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः ॥७॥

आयान्तं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम् ।
ज्यास्वनैः पूरयामास धरणीगगनान्तरम् ॥८॥

ततः सिंहो महानादमतीव कृतवान् नृप ।
घण्टास्वनेन तान्नादमम्बिका चोपबृंहयत् ॥९॥

धनुर्ज्यासिंहघण्टानां नादापूरितदिङ्मुखा ।
निनादैर्भीषणैः काली जिग्ये विस्तारितानना ॥१०

तं निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशम् ।
देवी सिंहस्तथा काली सरोषैः परिवारिताः ॥११

एतस्मिनन्तरे भूप विनाशाय सुरद्विषाम् ।
भवायामरसिंहानामतिवीर्यबलान्विताः ॥१२॥

ब्रह्मेशगुहविष्णूनां तथेन्द्रस्य च शक्तयः ।
शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ॥१३

यस्य देवस्य यद्रूपं यथाभूषणवाहनम् ।
तद्वदेव हि तच्छक्तिरसुरान् योद्धुमाययौ ॥१४॥

हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः ।
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते ॥१५

ऋषि बोले ॥१॥

ऐसे नष्ट हुए देख चण्ड औ मुण्ड दैत्य को ।
तथा बहुतसी सेना क्षीण देख महासुर ॥२॥

अति कोप पराधीन हुवा शुंभ प्रतापवान् ।
आज्ञा दी सब सेना के उद्योग असुरौघ को ॥३॥

आज सारे बल लिये छयासी दैत्य उपायुध ।
चौरासी कम्बु कुल के जाँय सेना निजी लिए ॥४

पचास कोटि-वीर्याख्य दानवों के चलैं कुल ।
तथा सौ कुल धौम्रों के जावें मेरे निदेश से ॥५॥

कालकेयासुर तथा मौर्य्य कालक दौर्हृद ।
सज्ज हों रण में जावें शीघ्र मेरे निदेश से ॥६॥

आज्ञा दे यों दानवेश शुंभ भैरवशासन ।
महासैन्य हजारों ले निकला रण के लिये ॥७॥

आते निहार चण्डी ने उस भीषण सैन्य को ।
ज्यानादों से भर दिया भू और नभ गर्भ को ॥८॥

सिंह ने जब किया महानाद महीपते ! ।
घण्टा से अम्बिका ने वे सभी नाद बढा दिये ॥९॥

ज्या, सिंह, घण्टानादों के शब्दसे दिग् गुंजारती ।
विशालमुख काली ने जीते निज निनाद से ॥१०

इसको सुन दैत्यों की सेना ने सब ओर से ।
देवी सिंह तथा काली सबको घेर ही लिया ॥११

इस ही बीच में भूप ! दैत्यों के नाश के लिए ।
सुखार्थ सुर सिंहों के बहुवीर्या बलान्विता ॥१२॥

ब्रह्मा शिव स्कन्द विष्णु इन्द्र की शक्तियाँ वहाँ ।
चण्डिका के पास आईं उनके वे स्वरूप ले ॥१३॥

जिसका रूप जैसा था जैसा भूषण वाह था ।
वहीं ले उसकी शक्ति दैत्यों से लड़ने गईं ॥१४॥

माला कमण्डलु लिए बैठी हंस विमान पै ।
ब्रह्मशक्ति प्राप्त हुई ब्रह्माणी कहते इसे ॥१५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ।
महाहिमलया प्राप्ता चन्द्ररेखाविभूषिणा ॥१६॥

बैल पै बैठ माहेशी त्रिशूल वर धारती ।
भुजंग कंकणवती आई चन्द्रकला धरे ॥१६॥

कौमारी शक्तिहस्ता च मयूरवरवाहना ।
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी ॥१७

कौमारी शक्ति कर में लिये बैठी मयूर पै ।
दैत्यों से लडने आईं अम्बिका गुहरूपिणी ॥१७॥

तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ।
शङ्खचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ॥१८॥

वैष्णवी शक्ति भी आई बैठी बिहग राज पै ।
शंख चक्र गदा शार्ङ्ग खड्ग हाथ लिये हुई ॥१८॥

यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः ।
शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥१६

अनूप रूप हरि का धारे यज्ञ वराह का ।
वाराही शक्ति भी आई देह धारे वराह का ॥१६

नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ।
प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥२०॥

नृसिंह के नारसिंही धारती तुल्य देह को ।
आई वहां जटाओं से डुलाती तारकावलि ॥२०॥

वज्रहस्ता तथैवैन्द्री गजराजोपरि स्थिता ।
प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा ॥२१॥

वज्र हाथ लिए ऐन्द्री बैठी थी गजराज पै ।
हजार नेत्र की आई जैसा इन्द्र तथा वह ॥२१॥

ततः परिवृतस्ताभिरीशानो देवशक्तिभिः ।
हन्यन्तामसुराः शीघ्रं मम प्रीत्याऽऽह चण्डिकाम् ॥

उन देवी शक्तियों से घिरे शङ्कर ने कहा ।
चण्डी को, मम प्रीत्यर्थ मारो दानव शीघ्र ही ॥२२

ततो देवीशरीरात्तु विनिष्क्रान्तातिभीषणा ।
चण्डिकाशक्तिरत्युग्रा शिवा शतनिनादिनी ॥२३॥

तब देवी तनू में से निकली अति भीषणा ।
चण्डिका शक्ति अत्युग्र सौ शिवा सम चीखतीं ॥२३

सा चाह धूम्रजटिलमीशानमपराजिता ।
दूत त्वं गच्छ भगवन् पार्श्वं शुम्भनिशुम्भयोः ॥

वह बोली धूम्रजटी शिवको अपराजिता ।
भगवन् ! दूत हो जाओ पास शुंभनिशुंभके ॥२४

ब्रूहि शुम्भं निशुम्भं च दानवावतिगर्वितौ ।
ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः ॥२५॥

गर्बीले दैत्य दोनों ही शुंभ और निशुंभको ।
जो और भी वहां दैत्य आये युद्धार्थ हैं, कहो ॥२५

त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः ।
यूयं प्रयात पातालं यदि जीवितुमिच्छथ ॥२६॥

त्रैलोक्य-राज्य ले इन्द्र देवता हविभाग लें ।
तुम पातालमें जाओ यदि जीवन चाहते ॥२६॥

बलावलेपादथ चेद् भवन्तो युद्धकाङ्क्षिणः ।
तदागच्छत तृप्यन्तु मच्छिवाः पिशितेन वः ॥२७

बलगर्वभरे युद्ध चाहो तो शीघ्र आइये ।
तुमारे मांस से मेरी शिवाएं परितृप्त हों ॥२७॥

यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयम् ।
शिवदूतीति लोकेऽस्मिन् ततः सा ख्यातिमागता ॥

नियुक्त दूत देवीने किया था शिवको स्वयम् ।
इससे शिवदूती ही लोक ख्यात हुई वह ॥२८॥

तेऽपि श्रुत्वा वचो देव्याः शर्वाख्यातं महासुराः ।
अमर्षापूरिता जग्मुर्यत्र कात्यायनी स्थिता ॥२६॥

शिवोक्त बात देवी की सुन वे भी महासुर ।
क्रोध पूरित हो आये जहां कात्यायनी रही ॥२६॥

ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः ।
ववर्षुरुद्धतामर्षास्तां देवीममरारयः ॥३०॥

आते ही उस देवी को बाणशक्ति सुवृष्टिसे ।
लगे बरसने उग्रकोप संयुत दैत्य वे ॥३०॥

सा च तान् प्रहितान् बाणाञ्छूलशक्तिपरश्वधान् ।
चिच्छेद लीलयाऽऽध्मातधनुर्मुक्तैर्महेषुभिः ॥३१॥

वह देवी दैत्यमुक्त शरशूलादि शस्त्रको ।
काटती थी कौतुकसे चापसे बाण छोडती ॥३१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्याग्रतस्तथा काली शूलपातविदारितान् । खट्वाङ्गपोथितांश्चारीन् कुर्वती व्यचरत्तदा ॥३२	उसके अग्रतो काली शूलसे छेदती रिपु । खट्वाङ्ग से शत्रुचूर्ण करती फिरती रही ॥३२॥
कमण्डलुजलाक्षेपहतवीर्यान् हतौजसः । ब्रह्माणी चाकरोच्छत्रून् येन येन स्म धावति ॥३३	कमण्डलू के जलसे ओजतेजविहीन भी । करती रिपुओंको थो ब्राह्मी जाती जहां जहां ॥३३
माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी । दैत्याञ्जघान कौमारी तथा शक्त्यातिकोपना ॥३४	माहेशी शूलसे और चक्रसे वैष्णवी वहां । कौमारी शक्तिसे शत्रु मारतो कोपसे भरी ॥३४॥
ऐन्द्रीकुलिशपातेन शतशो दैत्यदानवाः । पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः ॥३५॥	ऐन्द्रीने सैकंडो मारे वज्रसे दैत्य दानव । छिदे कटे पडे भूपै रक्तको वर्सते हुए ॥३५॥
तुण्डप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः । वराहमूर्त्या न्यपतंश्चक्रेण च विदारिताः ॥३६॥	तुण्ड प्रहारसे नष्ट डाढसे वक्षमें छिदे । बाराही ने पछाडे थे चक्रसे काटभी दिये ॥३६॥
नखैर्विदारितांश्चान्यान् भक्षयन्ती महासुरान् । नारसिंही चचाराजौ नादापूर्णदिगम्बरा ॥३७॥	नखोंसे फाडती और खाती राक्षस वृन्दको । घूमती थी नारसिंही दिशोंमें नाद पूरतो ॥३७॥
चण्डाट्टहासैरसुराः शिवदूत्यभिदूषिताः । पेतुः पृथिव्यां पतितांस्तांश्चखादाथ सा तदा ॥३८	प्रचण्ड अट्टहासोंसे त्रस्तहो भूमिपै पडे । शिवदूती तब उन्हीं असुरों को चबा गई ॥३८॥
इतिमातृगणं क्रुद्धं मर्दयन्तं महासुरान् । दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ॥३९॥	यों मातृगणको क्रुद्ध दैत्योंके मारते हुए । देख, नाना उपायोंसे भागे दानव सैनिक ॥३९॥
पलायनपरान् दृष्ट्वा दैत्यान् मातृगणार्दितान् । योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः ॥४ ॥	भगते देख दैत्योंको मातरोंसे प्रपीडित । लडने आगया दैत्य रक्तबीज महासुर ॥४०॥
रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः । समुत्पतति मेदिन्यां तत्प्रमाणस्तदासुरः ॥४१॥	इसके रक्तकी बुंद देहसे भूमिपै गिरै । तभी प्रगट होता है वैसाही और दानव ॥४१॥
युयुधे स गदापाणिरिन्द्रशक्त्या महासुरः । ततश्चैन्द्री स्ववज्रेण रक्तबीजमताडयत् ॥४२॥	वह दानव ऐन्द्रीसे लडा हाथ गदा लिये । ऐन्द्रोने ताडितकिया बज्रसे रक्तबीजको ॥४२॥
कुलिशेनाहतस्याशु बहु सुस्राव शोणितम् । समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ॥४३॥	बज्रकी चोटसे रक्त उसका खूबही बहा । उससे प्रगटे नानादैत्य वैसे पराक्रमी ॥४३॥
यावन्तः पतितास्तस्य शरीराद्रक्तबिन्दवः । तावन्तः पुरुषा जातास्तद्वीर्यबलविक्रमाः ॥४४॥	उसकी देहमे बुंदे जितनी रक्तकी पडीं । उतने ही दैत्य उठे वैसेही बलवीर्यवान् ॥४४॥
ते चापि युयुधुस्तत्र पुरुषा रक्तसम्भवाः । समं मातृभिरत्युग्रशस्त्रपातातिभीषणम् ॥४५॥	वे रक्तजात भी दैत्य लडे मातृसमूहसे । उग्रशस्त्रप्रहारोंसे भयकारक युद्धमें ॥४५॥
पुनश्च वज्रपातेन क्षतमस्य शिरो यदा । ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः ॥४६॥	पुनः कुलिशसे शीस इसका क्षतजो हुवा । तब रक्त बहा दैत्य हजारों हीं खड़े हुए ॥४६॥
वैष्णवी समरे चैनं चक्रेणाभिजघान ह । गदया ताडयामास ऐन्द्री तमसुरेश्वरम् ॥४७॥	वैष्णवीने समरमें इसे मारा स्वचक्रसे । गदा घातकिया इन्द्रशक्तिने असुरेश पै ॥४७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैष्णवीचक्रभिन्नस्य रुधिरस्रावसम्भवैः ।	चक्रसे छिन्न उसके शोणित स्राव हों उठे ।
सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः ॥४८॥	तत्प्रमाण हजारों ही दैत्योंसे छागया जगत् ॥४८॥
शक्त्या जघान कौमारी वाराही च तथासिना ।	कौमारी ने शक्तिमारी बाराहीने कृपाणसे ।
माहेश्वरी त्रिशूलेन रक्तबीजं महासुरम् ॥४९॥	माहेशी ने शूलमारा साथही रक्तबीजपै ॥४९॥
स चापि गदया दैत्यः सर्वा एवाहनत् पृथक् ।	कोपसे पूर्ण हो दैत्य रक्तबीजमहासुर ।
मातृः कोपसमाविष्टो रक्तबीजो महासुरः ॥५०॥	गदासे सबको मारा शक्तियोंको पृथक् पृथक् ॥५०
तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि ।	शक्ति शूलादि से छिन्न उसके देहसे गिरे ।
पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः ॥५१॥	रक्त प्रवाहसे भूपै उठे दानव सैकडों ॥५१॥
तैश्चासुरासृक्सम्भूतैरसुरैः सकलं जगत् ।	उन शोणित संभूत असुरोंसे सभी जगत् ।
व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम् ॥५२॥	छागया इससे सारे देवों में भय आगया ॥५२॥
तान् विषण्णान् सुरान् दृष्ट्वा चण्डिका प्राह सत्वरा ।	सुरोंको यों डरे देख चण्डीने शीघ्र ही कहा ।
उवाच कालीं चामुण्डे विस्तीर्णं वदनं कुरु ॥५३॥	कालीको, अपना वक्त्र वितीर्ण करलो अभी ॥५३
मच्छस्त्रपातसम्भूतान् रक्तबिन्दून्महासुरान् ।	शस्त्र संघातसे जात बून्दों को रक्तबीजके ।
रक्तबिन्दोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिना ॥५४	असुरों को वेगभरे मुखसे तुम पोंजिए ॥५४॥
भक्षयन्ती चर रणे तदुत्पन्नान्महासुरान् ।	तज्जात असुरों को खाती विचर युद्धमें ।
एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति ॥५५॥	रक्तहीन हुवा दैत्य शीघ्र यों नष्ट होयगा ॥५५॥
भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे ।	खाये हुए ये तेरेसे उपजेंगे पुनर्नहीं ।
इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम् ॥५६	ऐसा कह उसे देवीने किया शूलघात तो ॥५६॥
मुखेन काली जगृहे रक्तबीजस्य शोणितम् ।	मुखसे पीगई कालो रक्तको रक्तबीज के ।
ततोऽसावाजघानाथ गदया तत्र चण्डिकाम् ॥५७॥	उसने भी गदाघात चण्डिकापै किया पुनः ॥५७॥
न चास्या वेदनां चक्रे गदापातोऽल्पिकामपि ।	गदा की चोट ने पीडा चण्डी को कुछ भी न की ।
तस्याहतस्य देहात्तु बहु सुस्राव शोणितम् ॥५८॥	बहु रक्त स्राव हुवा उसके क्षत देह से ॥५८॥
यतस्ततस्तद्वक्त्रेण चामुण्डा सम्प्रतीच्छति ।	जहां तहां हो चामुण्डा, उसे पीती रही वहाँ ।
मुखे समुद्गता येऽस्या रक्तपातान्महासुराः ॥५९॥	उठे जो इसके रक्त पात से बहु दानव ॥५९॥
तांश्चखादाथ चामुण्डा पपौ तस्य च शोणितम् ।	उनका पी गई रक्त चामुण्डा खागई उन्हें ।
देवी शूलेन वज्रेण बाणैरसिभिर्ऋष्टिभिः ॥६०॥	देवो ने शूलकुलिश बाण खड्गादि से उसे ॥६०॥
जघान रक्तबीजं तं चामुण्डापीतशोणितम् ।	मारा कि जिसका रक्त चामुण्डा सब पी गई ।
स पपात महीपृष्ठे शस्त्रसङ्घसमाहतः ॥६१॥	शस्त्र संघाहत हुवा आपडा वह भूमि पै ॥६१॥
नीरक्तश्च महीपाल रक्तबीजो महासुरः ।	नीरक्त हो महीपाल रक्तबीज महासुर ।
ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप ॥६२॥	तब वे देव अतुल हर्ष को प्राप्त हो नृप ! ॥६२॥
तेषां मातृगणो जातो ननर्तासृङ्मदोद्धतः ॥ॐ॥६३	उनका मातृगण भी नाचा मदप्रमत्त हो ॥६३॥
इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमहात्म्ये रक्तबीजवधो नामाष्टमोऽध्यायः ॥८॥	श्रीहरिशास्त्रि विरचित हिन्दी दुर्गापाठ में ८वां अध्याय पूर्ण हुवा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपयोगी लघुकथा

श्रीगिरिराजशर्मा शास्त्री, जयपुरम्

श्रीमध्वाचार्यः—कर्नाटकप्रदेशस्य मंगलूरमण्डले उडूपीक्षेत्रादनतिदूरे बेललिग्रामो वर्तते। तत्रैव भार्गवगोत्रीयस्य नारायणभट्टस्य निवास आसीत्। तस्य पत्नी वेदवती माघशुक्लसप्तम्यां तिथौ १२९५ संवत्सरे एकं तेजोमयं पुत्रमसूत। तथा पित्रास्य नाम वासुदेवो रक्षितम्।

वासुदेवो बाल्यकाले अतिबलिष्ठो हृष्टपुष्टाङ्गश्चासीत्। जनाः तं 'भीम' इति नाम्ना घोषितवन्तः। अति स्वल्पायुष्येव तेन शास्त्राणामध्ययनं कृतम्, संन्यासग्रहणस्य चेच्छा प्रकटिता। तस्य अद्भुतां प्रतिभां योगशक्तेश्च चमत्कृतिं दृष्ट्वा जननी–जनकाभ्यां तस्मै संन्यासग्रहणस्यानुमतिः प्रदत्ता आसीत्। एकादशवर्षात्मके वयसि वासुदेवेन श्रीमदच्युतपक्षाचार्यस्य सकाशात् संन्यासदीक्षा गृहीता। तस्य संन्यासदीक्षोत्तरं प्रदत्तं नाम पूर्णप्रज्ञ इत्यासीत्। श्रीपूर्णप्रज्ञस्वामिनमेव जनाः श्रीमध्वाचार्य इति नाम्ना उद्घोषयन्ति।

संन्यासग्रहणानन्तरम् श्रीमध्वाचार्येण तीर्थयात्रा प्रारब्धा। यात्रायां स्थाने स्थाने शास्त्रार्थान् कृत्वा तेन भक्तिस्थापना जनहृदयेषु कृता। अस्मिन्नेव यात्राया अवसरे तेन गीताया भाष्यं लिखितम्। श्रीबदरिकाश्रमे, भगवता श्रीव्यासेन प्रत्यक्षमागत्य श्रीशालिग्रामस्य मूर्तित्रयं तस्मै प्रदत्तम्। उडुप्यां तेन प्रस्थापिता अन्या अपि मूर्तयः सन्ति।

श्रीमध्वाचार्यस्य जीवनं त्यागमयं भगवत्प्रेममयं चासीत्। एकदा एकस्योद्योगपतेः जल-

श्रीमध्वाचार्यः—कर्नाटक प्रदेश के मंगलूरमण्डल में उडूपी क्षेत्र के समीप ही बेललिग्राम है। वहीं भार्गवगोत्रीय नारायणभट्ट का निवास था। उनकी पत्नी वेदवती ने माघ शुक्ला सप्तमी को संवत् १२९५ में एक तेजोमय पुत्र को उत्पन्न किया। पिता ने इसका नाम वासुदेव रखा।

वासुदेव बाल्यकाल में अतिबलिष्ठ और हृष्ट पुष्ट था। लोग उनको भीम इस नाम से पुकारते थे। बहुत छोटी अवस्था में ही इनने शास्त्रों का अध्ययन किया और संन्यास ग्रहण की इच्छा प्रगट की। इनकी अद्भुत् प्रतिभा और योगशक्ति के चमत्कार देखकर माता पिता ने उन्हें संन्यास ग्रहण की अनुमति दे दी थी। ग्यारह वर्ष की आयु में वासुदेव ने श्रीमद् अच्युतपक्षाचार्य से संन्यास दीक्षा ग्रहण की थी। इनका संन्यास दीक्षा के पश्चात् प्रदत्त नाम पूर्णप्रज्ञ था। श्रीपूर्णप्रज्ञ स्वामी को ही लोग श्रीमध्वाचार्य इस नाम से बोलते है।

संन्यासग्रहण के पश्चात् श्रीमध्वाचार्य ने तीर्थयात्रा प्रारम्भ की। यात्रा में स्थान स्थान पर शास्त्रार्थ करके उनने लोगों के हृदय में भक्ति स्थापना की। इसी यात्रा के अवसर पर इनने गीता का भाष्य लिखा। श्रीबदरिकाश्रम में भगवान् श्रीव्यास ने स्वयं आकर श्रीशालिग्राम की तीन मूर्तियां इन्हें दी। उडुपी में उनके द्वारा स्थापित अन्य भी मूर्तियां हैं।

श्रीमध्वाचार्य का जीवन त्यागमय एवं भगवत्प्रेममय था। एक बार एक उद्योगपति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

113539

निमग्नभूतः पोतस्तेन रक्षितः स उद्योगपतिः स्वस्य धनसम्पत्तेरर्धभागं तस्मै दातुमुद्यतोऽभूत् किन्तु मध्वाचार्येण स न गृहीतः। स्वद्वेष्टॄन् प्रति स्वस्य च शत्रून् प्रति स कदापि क्रुद्धो नाऽभूत्, तैः सह सदा तेन प्रेमयुतो व्यवहारः कृतः।

श्रीमध्वाचार्यः सदैव भगवच्चिन्तनरत आसीत्। स्वजीवनस्य अन्तिमे भागे सदिन्तर-नामके स्थाने निवसता तेन परमधामयात्रा कृता। श्रीमध्वाचार्यस्य मतं द्वैतवादः कथ्यते जनैः। भगवान् सर्वेश्वरोऽस्ति अनन्तश्च जीवसमूहस्तस्य वशवर्ती अस्ति। भगवद्भजनेनैव जीवो दुःखात् पूर्णरूपेण मुक्तो भवितुमर्हति।

आचार्यप्रवरस्योपदेशानां सारोऽस्ति–संसारस्य मिथ्याप्रपञ्चचिन्तने समयस्य विनाशोऽनुचितः। भगवच्चिन्तन एव स्वचित्तस्य लय उचितः। चिन्तनात् श्रावणात्, ध्यानात् स्तवनाच्च महत्तरं किमपि कार्यं नास्ति। भगवच्चरणकमलयोः स्मरणमात्रेणैव युष्माकं सर्वपापक्षयो भविष्यति। प्रभोः स्मरणं सदा सर्वदा करणीयम् येन देहत्यागस्यावसरेऽपि तस्य विस्मरणं न भवेत्।

श्रीवल्लभाचार्यः–वैशाखमासस्य कृष्णैकादश्यां तिथौ १५३५ तमे संवत्सरे चम्पारण्य (रायपुर) नगरे श्रीवल्लभाचार्यस्य जन्म अभूत्। तस्य पिता श्रीलक्ष्मणभट्ट आसीत् माता च श्रीइलम्मा आसीत्। श्रीलक्ष्मणभट्टस्य वंशपरम्परायां सोमयज्ञस्य परम्परा आसीत्। इदमुच्यते जनैः यत् तस्य वंशे यदा शतसंख्यका यज्ञाः समाप्तिं गतास्तदा श्रीवल्लभाचार्यस्य प्रादुर्भावोऽभूत्।

श्रीवल्लभाचार्येण काश्यां श्रीमाधवेन्द्रपुरी-महोदयस्य सकाशात् वेदशास्त्रादीनाञ्च अध्ययनं

का जल में डूबते हुए जहाज को उनने बचाया। वह उद्योगपति उन्हें अपनी आधी धन सम्पत्ति उन्हें देने लगे पर मध्वाचार्य ने वह नहीं ली। अपने द्वेषियों के प्रति और अपने शत्रुओं के प्रति वे कभी क्रुद्ध नहीं होते थे। उनके साथ वे सदा प्रेममय व्यवहार करते थे।

श्रीमध्वाचार्य सदैव भगवत् चिन्तन रत रहते थे। अपने जीवन के अन्तिम समय में सदिन्तर नामक स्थान पर निवास करते हुए उन्होंने परमधाम यात्रा की।

श्रीमध्वाचार्य के मत को लोग द्वैतवाद कहते हैं। भगवान् सर्वेश्वर हैं अनन्त हैं और जीव समूह उनके वशवर्ती हैं। भगवद्भजन से ही जीव दुःख से सर्वथा मुक्त हो सकता है।

आचार्यप्रवर के उपदेशों का सार है कि संसार के मिथ्या प्रपंच के चिन्तन में समय का विनाश अनुचित है। भगवत् चिन्तन में ही अपने चित्त का लय उचित है। चिन्तन से, श्रवण से, ध्यान से, और स्तुति से बडा कोई भी कार्य नहीं है। भगवत् चरण कमल के स्मरण मात्र से ही तुम्हारा सर्व पाप क्षय होगा। प्रभु का स्मरण सदा करना चाहिये। जिससे देह त्याग के अवसर पर भी उनका विस्मरण न हो।

श्रीवल्लभाचार्य–वैशाखमास की कृष्णा एकादशी तिथि के दिन १५३५ सम्बतसर में चम्पारण्य (रायपुर) नगर में श्रीवल्लभाचार्य का जन्म हुवा। इनके पिता श्रीलक्ष्मणभट्ट थे और माता श्रीइलम्मा थी। श्री लक्ष्मणभट्ट की वंश-परम्परा में सोमयाग की परम्परा थी। लोग यह कहते हैं कि जब उनके वंश में सौ संख्या में यज्ञ समाप्त हो गये तब श्रीवल्लभाचार्य का जन्म हुवा।

श्रीवल्लभाचार्य ने काशी में श्रीमाधवेन्द्रपुरी महोदय से वेदशास्त्रादि का अध्ययन किया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

113539

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृतम्। एकादशवर्षवयस्कः स सर्वशास्त्रज्ञाननिष्णातोऽभूत्। काशीतः स वृन्दावनमागत्य वृन्दावनाच्च तीर्थयात्रायै प्रस्थानमकरोत्। विजयनगरस्य नृपतेः श्रीकृष्णदेवस्य राज्यसभायां तस्य सभापण्डितैः सह शास्त्रार्थं कृत्वा सः तान् पराजितवान्। तत्र राज्ञा एष वैष्णवाचार्यस्योपाधिना विभूषितः। राज्ञा पूजितो बहुधनेन च सम्मानितोऽभूत्। तद्द्रव्यस्याधिकांशो भागस्तेन तत्रैव पण्डितेषु वितीर्णः।

ग्यारह वर्ष के वे सर्वशास्त्रों के ज्ञान से निष्णात हो गए। काशी से वे वृन्दावन में आकर वृन्दाबन से उन्होंने तीर्थयात्रा हेतु प्रस्थान किया। विजय नगर के राजा श्रीकृष्णदेव की राजसभा में उसके सभा पण्डितों के साथ शास्त्रार्थ करके उनने उन्हें पराजित किया। वहाँ राजा ने इन्हें वैष्णवधर्म की उपाधि से विभूषित किया। राजा के द्वारा पूजित और खूब धन से वे सम्मानित हुए। उनने वह अधिकांश धन वहीं पण्डितों में वितरित कर दिया।

स्वप्ने भगवदादेशं प्राप्य अष्टाविंशतिवर्षात्मके वयसि सः विवाहमकरोत्। अस्य पुत्रः श्रीविट्ठलनाथः साक्षाद्विट्ठलप्रभुरेवासीत्–इति भक्ता जनाः कथयन्ति। स्वजीवनस्यान्तिमे समये श्रीवल्लभाचार्यमहाभागः काश्यां निवासमकरोत्। जनाः कथयन्ति यत् तत्र हनुमानघट्टे स गङ्गास्नानं कृत्वा यदा बहिरागतोऽभूत् तदा सशरीर एव परमधाम प्रत्यगात्। द्विपञ्चाशद्वर्षात्मके वयसि १५८७ संवत्सरे च तस्य परलोकगमनं बभूव।

स्वप्न में भगवान् का आदेश प्राप्त करके अठाईस वर्ष की आयु में उनने विवाह किया। इनके पुत्र श्रीविट्ठलनाथ साक्षात् विट्ठल प्रभु ही थे ऐसा भक्त जन कहते हैं। अपने जीवन के अन्तिम समय में श्रीवल्लभाचार्य काशी में निवास करते थे। लोग कहते हैं कि वहां हनुमान घाट पर वे गङ्गा स्नान करके तब बाहर आए तो सशरीर ही परमधाम को चले गए। बावन वर्ष की आयु में १५८७ सम्वत्सर में उनका परलोक गमन हुवा था।

श्रीवल्लभाचार्यः श्रीचैतन्यमहाप्रभोः समकालिक आसीत्। तयोः सम्मेलनमप्यभूत्। अस्य अष्टयामसेवा अतीव मनोहरा आसीत्। भगवतः श्रीकृष्णस्य सेवां वात्सल्यभावेन कृत्वाऽस्याः प्रचारोऽपि अनेन कृतः। वात्सल्यभावः सर्वथा निष्कामभावोऽस्ति। तत्र बाल्यस्वरूपात् श्रीकृष्णात् याचनायास्तु स्थानमपि नास्ति। तत्र तु श्रीकृष्णस्य सेवा तेन च सह स्नेहव्यवहार एवाऽस्ति।

श्रीवल्लभाचार्य श्रीचैतन्यमहाप्रभु के समकालीन थे उन दोनों का मिलना भी हुआ था। इनकी अष्टयाम सेवा अति सुन्दर थी। भगवान् श्रीकृष्ण की सेवा वात्सल्य भाव से करके इसका प्रचार भी इनने किया। वात्सल्य भाव सर्वथा निष्कामभाव है। वहां बाल्य स्वरूप वाले श्रीकृष्ण से याचना का तो स्थान भी नहीं है। वहां तो श्रीष्ण की सेवा और उसके साथ स्नेह व्यवहार ही है।

श्रीवल्लभाचार्यस्य मतं शुद्धाद्वैतमतमस्ति। अयं मार्गो भगवत्कृपया भक्तानां भक्तिभावं पोषयति। अत इदं मतं पुष्टिमार्ग इति नाम्नाऽपि प्रसिद्धमस्ति। एषः सम्प्रदायः रुद्रसम्प्रदायोऽ-

श्रीवल्लभाचार्य का मत शुद्धाद्वैत मत है। यह मार्ग भगवत्कृपा से भक्तों के भक्तिभाव को पुष्ट करता है। इस कारण पुष्टिमार्ग इस नाम से प्रसिद्ध है। यह सम्प्रदाय रुद्रसम्प्रदाय है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्ति। भगवान् शङ्करः अस्य सम्प्रदायस्य प्रवर्तकः आदिगुरुश्चासीत्।

भगवान् शङ्कर इस सम्प्रदाय के प्रवर्तक और आदि गुरु थे।

श्रीवल्लभाचार्यस्य समये एव श्रीसूरदासोऽप्यभूत्। स च श्रीवल्लभार्यस्य शरणागतोऽभूत्। 'अष्टछाप' इति नाम्ना प्रख्याताः अन्येऽपि कवयः श्रीवल्लभसम्प्रदायस्यैवासन्। तेषां काव्येषु श्रीकृष्णप्रेम्णोऽद्भुना धारा प्रवाहिताऽभूत्।

श्रीवल्लभाचार्य के समय में ही श्रीसूरदास भी हुए थे और वे श्रीवल्लभाचार्य के शरणागत हुए थे। 'अष्टछाप' इस नाम से प्रख्यात अन्य भी कवि श्रीवल्लभ सम्प्रदाय के ही थे। उनके काव्यों में श्रीकृष्ण प्रेम की अद्भुत धारा प्रवाहित हुई थी।

शुभ कामनाओं के साथ

* इन्डो फॉरेन एजेन्सीज् *

२३, सर फिरोजशाह मेहता रोड़,

बम्बई - १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. No. J.7
Licence No. PP. 6
"Licenced to Post.
Without Prepayment".

सूक्ति-सुधा

(वायुमुद्दिश्य)

आशुकवि-श्रीहरिशास्त्री, सम्पादकः

वायुरेष महद्भूतं
वायुरायुर्हि जीवताम् ।
वायुः क्रियावान् भूतेषु,
नान्य इत्यवधार्यताम् ॥१॥

वायु (हवा) महान् भूत (जगत्का कारण पांच महाभूतों में एक प्रधान) है वायु ही जीवधारियों का आयु है । भूतों में वायु ही क्रियाशील है । अन्य भूत क्रियावान् नहीं है ॥१॥

वायुनैव हि भूतानि
क्रियावन्ति भवन्ति च ।
वेदेषु वायुरेवायं
क्षेपिष्ठा देवता मतः ॥२॥

इस वायु से ही समस्त भूत क्रियावान् होते हैं । वेदों उपनिषदों में यह वायु ही क्षेपिष्ठा देवता माना गया है । एक वस्तु को अपने वेग से दूर फेंक देने वाला क्षेपिष्ठा कहलाता है ॥२॥

एष हि प्राणिनां देहे
शोणितं वहतेऽनिशम् ।
अन्याश्चापि क्रिया सर्वाः
कुरुते वायुरेव हि ॥३॥

यह वायु ही देहधारियों के देह में रुधिर का संचार करता है और २ भी क्रियाएं यही करता है ॥३॥

तस्माद् भो बालकाः स्वच्छं
वायुं श्रयत सर्वदा ।
शीतलः सुरभिः स्वच्छो
वायुर्वै प्राणभृन्मतः ॥४॥

इस कारण हे बालकों ! वायु का आश्रय करो, वायु को देव और प्राण मान कर इसे धारण करते रहो । सदा स्वच्छ सुगंधित तथा शीतल वायु का सेवन करते रहो ॥४॥

यतोऽस्यैव प्रभेदास्ते
प्राणा विद्भिः समीरिताः ।

क्योंकि अपने प्राण (दसों ही) इसके ही भेद हैं ऐसा तत्त्व विद्वान् कहते हैं ।

प्रकाशकः—जयबहादुरसिंह पताः भारती भवन, गोपालजी का रास्ता, जयपुर । दूरभाष : ७५४९६
राधेश्याम शर्मा द्वारा श्री हनुमान प्रिं० प्रेस, चौड़ा रास्ता, जयपुर में मुद्रित । फोनः ६३१५९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2009

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar